CC-0. In Public Domain. Digitization by eGangotri

पु.नं. ४०२६

अद्वैतसिद्धि द्वितीय-
परिच्छेदः, लघुचन्द्रिका-
सेपेतः॥

३९

Almira-1
Shelf-4
23

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पु. नं. ४०२६

अथलघुचन्द्रिकोपेतायाअद्वैतसिद्ध्याद्वितीयपरिच्छेदस्य प्रारम्भः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ माभैष्टेत्यमृतसंदिग्धमुखचंद्रमनोहरं गोवर्धनधरं धाराधरं धौरेयमाश्रये श्रीनारायणतीर्थानां पदपंकेरुहस्मृतिः ॥ स्मृतिमव्याहतां कुर्यात्सदा पदपदार्थयोः ॥ पदार्थनिष्ठं पदार्थयोर्भेदबुद्ध्यविरोधित्वे सत्यखंडविषयकं वाक्यार्थनिष्ठमुक्तबुद्धिविरोधित्वे सत्यखंडविषयकं पदार्थैश्च महावाक्यीयोग्राह्यौ तेन सत्यं ज्ञानमित्यादेरपि स्वघटकपदार्थयोर्भेदधीविरोधित्वेपि न दोषः महावाक्यार्थबोधोपयोग्यखंडवाक्यार्थबोधजनकं पदार्थनिष्ठं अनन्यशेषाखंडवाक्यार्थबोधजनकं वाक्यार्थनिष्ठमिति वा बोध्यं यन्महावाक्यीयपदार्थयोर्भेदबुद्ध्यविरोधि सत्तन्महावाक्यीयपदार्थस्वरूपाखंडार्थकं यत् तत्तन्महावाक्यीयपदार्थनिष्ठं यन्महावाक्यार्थबोधोपयोगिपदार्थबोधपर्यवसायियत् तत्तन्महावाक्यपदार्थनिष्ठं यन्महावाक्यीयपदार्थयोर्भेदबुद्धिविरोधि सत्तन्महावाक्यार्थरूपाखंडार्थकं यत् तन्महावाक्यार्थनिष्ठं यन्महावाक्यार्थबोधेऽनन्यशेषे पर्यवसायियत् तत्तन्महावाक्यार्थनिष्ठमिति निष्कर्षः सोयं देवदत्त इत्यादीत्यादिपदा

॥ श्रीगणेशाय नमः ॥ हेयं निरूप्य बंधाख्यं तन्निवृत्तेर्निबंधनं यज्ज्ञानं तदखंडार्थमादेयमधुनोच्यते १ तच्चाखंडार्थं द्विविधमेकं पदार्थनिष्ठमपरं वाक्यार्थनिष्ठं एकैकं च पुनर्वैदिकलौकिकभेदेन द्विविधं पदार्थनिष्ठं वैदिकमपि द्विविधं तत्पदार्थनिष्ठं त्वंपदार्थनिष्ठं च तत्र सत्यं ज्ञानमनंतमित्यादि तत्पदार्थनिष्ठं योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्यादि त्वंपदार्थनिष्ठं प्रकृष्टप्रकाश इत्यादि तु लौकिकं पदार्थनिष्ठं वाक्यार्थनिष्ठमपि वैदिकं तत्त्वमस्यादिवाक्यं सोयं देवदत्त इत्यादि तु लौकिकं अत्राहुः किमखंडार्थत्वं न तावन्निर्भेदार्थत्वं यतो निर्भेदत्वस्य शब्दबोध्यत्वे विशेषणतायामुपलक्षणतायां च निर्घटंभूतत्वमिति वत् सखंडार्थत्वे वस्यात् शब्दाबोध्यत्वे तु वस्तुगत्या यन्निर्भेदं ब्रह्म तद्बोधकसगुणवाक्यानामपि अखंडार्थत्वापत्तिः अथ यन्निर्भेदं वस्तुगत्या तन्मात्रपरत्वं न प्रकृष्टप्रकाशादिवाक्येऽव्याप्तेः तेषां धर्मिसमसत्ताकभेदवद्वस्तुपरत्वेन वस्तुगत्या निर्भेदार्थनिष्ठत्वाभावात् अत एव निर्विशेषार्थत्वमपि न नाप्यपर्यायप्रातिपदिकार्थमात्रपर्यवसायित्वं शीतोष्णस्पर्शवंतौ पयःपावकावित्यादावनेकद

यं चंद्र इत्यादिसंग्रहः प्रकृष्टप्रकाश इत्यादीत्यादिपदेन त्वंवृकर्णो देवदत्त इत्यादेरपि पदार्थनिष्ठस्य ग्रहणात् द्रु (१प्रातिपदिकार्थपरेऽतिव्याप्तेः ॥ ५)

पकार्यस्य सोयमित्यादेरुक्तिर्नासंगतेति बोध्यं शब्दबोध्यत्वे सोयमित्यादिपदयोरन्यतरेणोपस्थाप्यतावच्छेदकत्वे विशेषणतायामुपाधित्वे विशेषणत्वे च उपलक्षणतायामिति उपलक्ष्यतावच्छेदकधर्मांतरोपस्थितिजनकस्यैवोपलक्षणता नियमादुपलक्षणतायामपि सखंडार्थत्वमित्यभिमानः अपर्यायेत्यादि अपर्यायपयोः प्रातिपदिकयोरर्थमात्रे एकस्मिन् प्रातिपदिकार्थपर्यवसायित्वं भिन्नरूपेण स्वार्थस्मृतिद्वारा एक प्रातिपदिकार्थमात्रानुभावकनानानामत्त्वमिति यावत् घटः कलश इत्यादिवारणाय द्वारांतं शीतोष्णस्पर्शौ पयःपावकावित्यादेर्वारणाय शेषं एक प्रातिपदिकार्थमात्रानुभावकतावच्छेदकाकांक्षादिमत्त्वार्थकं न च घटः कलश इत्यादेरनाकांक्षत्वे नांत्यदलेनैव वारणादाद्यदलं व्यर्थमिति वाच्यमुद्देश्यविधेययोरैक्येन सप्रकारकबोधं प्रत्यनाकांक्षत्वेपि एकोद्देश्यविधेयत्वादाविव संभेदेनान्यतरवैयर्थ्यमिति

त्वेनप्रातिपदिकार्थमात्रानुभावकत्वेनाकांक्षाभावात्॥

एम·
२११

CC-0. In Public Domain. Digitization by eGangotri

॥ अतएवप्रातिपदिकान्यनतिरिक्तविषयाणिप्राह भगवान्प्रथमशद्वित्वविभक्त्यापाणिनिरतस्सकलतर्कसमयज्ञोवर्षिवचसोरनतिरिक्तविषयत्वंइत्यनेनउ
च्चैरित्यादौनामप्रथमाविभक्त्योरेकार्थानुभावकत्वमुक्तंसंक्षेपशारीरकेनचैवंघटःकलशइत्यादौलक्ष्यत्वमेवस्वीक्रियतामितिवाच्यंसखंडार्थत्वंहिभिन्नरूपेणो
पस्थितिद्वारास्वार्थयोर्भेदबुद्धिविरोधिताद्दशानुभवजनकस्यैवतथाचघटकलशपदार्थयोर्भेदबुद्धेराहार्य्यत्वेनतांप्रतिविरोधित्वस्याप्रसिद्ध्यानतत्पदयो
रखंडार्थत्वंअखंडविषयकस्यापिताद्दशानुभवस्यताद्दशभेदधीविरोधित्वंभिन्नरूपविशिष्टयोस्तादात्म्यधीद्वारकत्वान्नानुपपन्नंताद्दशधीद्वारकत्वंचसंक्षेपशा
रीरकेउक्तंसामानाधिकरण्यमत्रभवतिप्राथम्यभागान्वयः पश्चादेवविशेषणेतरतयापश्चाद्विरोधोद्भवःउत्पन्नेचविरोधएकरसकेवस्तुन्यखंडात्मधीःस
वैरेवततः पदैरयमिहज्ञेयः क्रमःसूरिभिरितिसामानाधिकरण्यंपदयोः समानविभक्तिकत्वनिश्चयः अन्वयस्तात्पर्यविषयशाब्दधीप्रयोजकःविशे-
षणेतरतयाभिन्नधर्मविशिष्टयोस्तादात्म्यधीःविरोधोद्भवस्ताद्दशधियःप्रमात्वाभावेनतात्पर्याविषयत्वज्ञानमितिभावः अर्थपरत्वमेकनामार्थमात्रप
रत्वं प्रत्येकमिति यद्यपिपयः शीतस्पर्शं पावकउष्णस्पर्श इतिवाक्यद्वयंप्रकृतेनश्रूयतेनवाकल्पनीयंद्विवचनांतपदाभ्यामेवतात्पर्यविषयधीसंभवात् त-

॥ ॥ नचसंभूयार्थपरत्वमत्रनास्त्येवप्रत्येकंत्वेकैकार्थपरत्वंलक्षणवाक्यत्वादिति नातिव्याप्तिरितिवाच्यं
तथापिब्रह्मण्यसंभवात् अभिधयालक्षणयावावेदांतवाक्यानांनिःसंबंधेब्रह्मणिपर्यवसानानुपपत्तेः अतएव
नैकविशेष्यपरत्वमपितत् विशिष्टैकविशेष्यबोधकनीलोत्पलादिवाक्येऽतिव्याप्तेरिष्टापत्तेश्च ॥ ६ ॥

थापिसमासांतरर्गतयोरपिपयः पदशीतस्पर्शपदयोः सुबंतत्वमतुबंतत्वप्रतिसंधानंविनानशाब्दधीः स्वप्रकृत्यव्यवहितोत्तरत्वेनप्रत्ययज्ञानस्यासमासस्थ
लेहेतुतयाक्लृप्तत्वादेवंसुबंतयोरप्यव्यवहितत्वेनज्ञानापेक्षणान्नाद्दशवाक्यद्वयस्यप्रकृतेवश्यंप्रतिसंधेयत्वेनतस्यैवप्रत्येकशब्देनलक्ष्यत्वेनग्रहणमथवासमा
सवाक्येनालक्ष्येणवाक्यार्थबुद्धापश्चात्प्रतिसंधीयमानमुक्तवाक्यद्वयमिहप्रत्येकंलक्ष्यत्वेनाभिमतंसमासवाक्यंतुसंसर्गाविषयकानुभवजनकत्वरूपलक्षणस्यैव
लक्ष्यमतएवसंसर्गासंगीत्यादितत्वप्रदीपिकादौलक्षणद्वयमुक्तंप्रकृतलक्षणानुरोधेनैकैकनामार्थमात्रविषयकबोधद्वयेउक्तवाक्यतात्पर्य्यकल्पनेनोक्त
वाक्यजबोधोत्तरंवाक्यद्वयानुसंधानस्यावश्यकत्वात् वस्तुतोवाक्यद्वयानुसंधानाभावेपिश्रूयमाणोक्तवाक्यस्यैवबोधद्वयोपधायकत्वमुक्तलक्षणानुरोधि
तात्पर्य्यवशादितिध्येयं एकैकार्थपरत्वमेकैकार्थमात्रपरत्वं नातिव्याप्तिरिति वस्तुतः समुदितवाक्येपिलक्ष्यत्वंलक्षणवाक्यस्यमात्रपरस्यविशेषणीभूत
पदार्थांतरव्यवच्छेदपरत्वेनपदार्थांतराविशेषणकनामार्थधीपर्यवसायित्वंलक्षणंचसंभवतीतिबोध्यं निःसंबंधइतिनिःसमन्वयत्वात् कल्पितोप्यभि
धालक्षणासम्बन्धोनसंभवतीत्यभिमानः इष्टापत्तेरितिनीलादिविशेषणाभानेपिविशेष्यमुत्पलादिरूपमेकंमन्यतेपीष्टमितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यार्थभेदादिति तथाच प्रत्येकमुक्तवाक्यद्वयं लक्ष्यं नतु समुदितवाक्यं नचैवं पयः पावकाविस्यत्र लक्ष्ये अखंडार्थत्वमिति प्रतिज्ञाविरोध इति वाच्यमित्यत्रेत्यस्योक्त वाक्यसमानविषयकवाक्यद्वये इत्यर्थकत्वादिति भावः। एकार्थपरे एकार्थप्रमापके तस्यमिति शक्तत्वस्यैव तत् परत्वरूपत्वात् यथाच प्रमापकत्वं तथो क्तमनुपदमेवं च प्रमाजनकत्वमक्षतमिति भावः बहुवचनेनेति द्विवचनबहुवचनद्वंद्वसमासानां साहित्यबोधकत्वस्य व्युत्पत्तिसिद्धत्वात्साहित्यस्य चैकक्रियान्व यित्वस्वरूपत्वादुक्तप्रमारूपैकक्रियाजनकत्वमेव प्रकृते बहुवचनलभ्यमिति भावः। इत्यादावपि इति आदिर्यस्य ताहशेधवखदिरपलाशा इत्यत्र साधारणधर्म युक्ताइति वाक्ये इत्यर्थः यथाश्रुते तु नामार्थेषु सुबर्थसंख्यादिसंसर्गप्रमापकत्वेन पदस्यापि तातिरिक्ता गोचरप्रमाजनकत्वाभावादेकक्रियासंभवेन साहित्यविव क्षायाव्यर्थत्वात् ननूक्तवाक्यस्यासाधारणधर्मोपलक्षिताखंडार्थत्वेन संसर्गाविषयकत्वेपि धवादिनानाविषयकप्रमारूपैकक्रियान्वयित्वरूपसाहित्यस्या पिसत्त्वात्कथं तद्वारणं नहि एकमात्रार्थप्रमा प्रकृतलक्षणे प्रविष्टा येन ताहशप्रकृतक्रियान्वयित्वरूपसाहित्यं प्रकृते लभ्येत यदिच तद्घटितमेव लक्षणमुच्यते तदा शीतो ष्णस्पर्शवंतौ पयः पावकावित्यत्र लक्षणोक्तिर्विरुद्धेति चेत्सत्यं तथापि पूर्वोक्तरीत्या धवोऽसाधारणधर्मयुक्तः खदिरोऽसाधारणधर्मयुक्त इत्यादिवाक्यानामनुसंधानेनै

शीतस्पर्शवत्य आपः उष्णस्पर्शवान् पावक इति वाक्यार्थभेदाच्च असंभवस्तु तन्मात्रप्रश्नोत्तरत्वादिति हेत्वसि
द्धुद्धारेनिरसिष्यते अत्रच घटः कलश इत्यादौ संसर्गाप्रमापके एकार्थपरे ऽतिव्याप्तिवारणायापर्यायशब्दानामिति
तत्रापि बहुवचनेन संभूयैकार्थप्रतिपादकत्वस्य लाभात्तत्र धवखदिरपलाशा इत्यादावतिव्याप्तिः॥ ❦ ॥

वशात्बोधात् यत्र क्रमिकोक्तानुसंधानेभ्यः क्रमेणैव धवाद्यखंडबोधा जातास्तत्र तु युगपत्तत्र प्रत्येकवाक्यस्यैव एकवाक्यविशिष्टापरवाक्यस्या पि एकवाक्यार्थमात्रप्रमाजनकत्वानपायात्तत्रातिव्याप्तिवारणायोक्तप्रमांप्रति जनकतावच्छेदकं पत्पदसमभिव्याहृतयत्पदत्वं तत्पदसम भिव्याहृततत्पदत्वमखंडार्थत्वमित्यर्थलाभाय च साहित्यस्योक्तत्वात् एवं चोक्तप्रमाजनकतावच्छेदकानुपूर्वीमत्त्वस्य पदांतरविशिष्टे सोयमित्यादौ सर्व त्राखंडार्थके सत्त्वात्तद्वारणाय साहित्योक्तिरिति पर्यवसितं उक्तजनकतावच्छेदकानुपूर्वीयावत्सु पदेषु पर्याप्ता तावदितरपदाघटितत्वं लक्षणमिति निष्कर्षः धवेत्यादिकं तु उपलक्षणमिति ध्येयम् ननु पदांतरविशिष्टं प्रत्येकवाक्यं प्रत्येकवाक्यादतिरिक्तं नवा आद्ये तस्य जनकतावच्छेदकशून्यत्वान्नातिव्याप्तिर्द्वि तीये तस्य लक्ष्यत्वादेव नसेति चेन्न आद्ये तस्य जनकतावच्छेदकवत्त्वान्न हि विशिष्टसत्ता सत्तात्वशून्या नीलादिविशिष्टघटो वा घटत्वशून्यो विशिष्टसत्ता सत्तेत्यादिप्रत्ययात् विशिष्टे केवलतादात्म्यस्येव केवलवृत्तिधर्मसंसर्गस्यारोपात् केवले विशिष्टतादात्म्यतद्धर्मयोरिव विशिष्टेपि केवलतादात्म्यतद्धर्म योरारोपात्परस्पराध्यासानुरोधात् किंच सोयमित्यादिवाक्यज्ञानस्य स इति पदोत्तरायमिति पदविषयकधीत्वेनाखंडधीहेतुत्वं स इति पदत्वेन घटादिविषयकज्ञानादखंडप्र

८ ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२
अ·सि·
टी·ल·
२

परस्परानवच्छिन्नार्थानां वाच्यतासम्बन्धेन परस्पराविशेषितार्थानामन्योन्यावाच्यवाचकानामपर्य्यायाणामिति यावत् अव्यतिरिक्तैकरसप्रातिपदिकार्थमा त्रान्वयः यतोऽव्यतिरिक्तं विशेषणीभूतेन पदार्थान्तरेणाविशेषितमत एकरसं पदार्थान्तरसंसर्गनैरपेक्ष्येणाभासमानं यत् तस्य प्रातिपदिकार्थमात्रस्य वान्वयः प्रमापकत्वमिति पूर्वोक्तलक्षणयोः संवादो बोध्यः वेदान्तानामनन्यशेषत्वरूपमनन्याकांक्षत्वं न तु स्तुतिपरतया कर्म्मविधिशेषत्वमतः उ क्तप्रमापकत्वसंभव इति ज्ञापनायानन्याकांक्षाणामित्युक्तमथवा घटो गंधाश्रयः पृथिवीत्यादौ गंधाश्रयपदस्य घटपदरूपान्याकांक्षत्वेन पृथिवीप

यत्वपर्य्यायशब्दानां संसर्गगोचरप्रमितिजनकत्वं वा तेषामेकप्रातिपदिकार्थमात्रपर्य्यवसायित्वं वाऽखंडार्थत्वं तदुक्तं पंचपादिकाकृद्भिः॥ पदानां परस्परानवच्छिन्नार्थानामनन्याकांक्षाणामव्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वय इति उक्तं च तत्त्वप्रदीपिकाकृद्भिः संसर्गा संगिसम्यग्धीहेतुता या गिरामियं उक्ताऽखंडार्थता यद्वा तत्प्रातिपदिकार्थतेति तत्र आद्येऽप्राप्तयोः प्राप्तिः संयोग इत्यादिसंयोगलक्षण वाक्येऽव्याप्तेः अथ पदस्मारितपदार्थसंसर्गप्रमापकत्वं विवक्षितं तत्रापि द्विषदन्नं न भोक्तव्यमित्येतत्परे विषं भुंक्ष्वेति वाक्येऽतिव्याप्तेः न च द्विषद न्नं न भोक्तव्यमिति शास्त्रमूलत्वेन शास्त्रीयपदस्मारितपदार्थसंसर्गप्रमापकत्वादत्र नातिव्याप्तिरिति वाच्यं युक्तिमूलत्वेनास्य शास्त्रमूलत्वासिद्धेः अ थ प्रतिपिपादयिषितपदार्थसंसर्गप्रमापकत्वमत्र विवक्षितं तत्राप्यसंभवः चंद्रब्रह्मादिशब्दार्थानां स्वरूपतो ज्ञाततयाऽप्रतिपिपादयिषितत्वेन संसर्ग विशेषप्रतियोगित्वेनैव प्रतिपिपादयिषितत्वात् अत एव न द्वितीयलक्षणमपि तथा च लक्षणासंभवात् प्रमाणमप्यसंभवि अलक्षिते प्रमाणस्योप न्यसितुमशक्यत्वादिति अत्रोच्यते पदवृत्तिस्मारितातिरिक्तमत्र संसर्गपदेन विवक्षितं तथा चापर्य्यायशब्दाः नापदवृत्तिस्मारितातिरिक्तागोच रप्रमाजनकत्वमाद्यलक्षणं पर्य्यवसितं तथा च न संयोगलक्षणेऽव्याप्तिः तस्य पदवृत्तिस्मारितत्वात् नापि द्विषदन्नभोजननिषेधकेऽतिव्याप्तिः तत्रा निष्टसाधनत्वसंसर्गस्य पदवृत्त्यस्मारितस्य प्रतिपाद्यत्वात् शीतोष्णस्पर्शवंतौ पयःपावकावित्यत्रात्वखंडार्थत्वमिष्टमेव न च धर्मधर्म्मिभावासहमखंडा र्थत्वं कथं धर्मिभेदसहतामिति वाच्यं एकत्रासहिष्णुतायाः सर्वत्रासहिष्णुतापादकहेतुत्वात्॥ इदमनाकांक्षमतो न पृथिवीरूपाखंडप्रमापकत्वमत स्तदुक्तं। तत्प्रा

तिपदिकार्थता एकप्रातिपदिकार्थमात्रप्रमापकत्वं मूलत्वासिद्धेरिति यद्यपि शास्त्रस्यामूलत्वेपि तादृशमासवाक्यमूलं संभवति तथापि न सर्वत्र क्वचित्तदभावेपि शब्दान्य मानमूलकस्य विषं भुंक्ष्वेति वाक्यतात्पर्यविषयस्य शत्रुगृहभोजनानिष्टसाधनत्वस्य संभवात् प्रतिपिपादयिषितेति॥ प्रकृतवाक्यतात्पर्यविषयेत्यर्थः पद वृत्तीति स्वघटकपद वृत्तीत्यर्थः स्वं लक्षीभूतं वाक्यं अपर्य्यायेत्यादि स्वघटकपदवृत्तिस्मारितान्यागोचरप्रमाजनकत्वे सति पर्य्यायतापन्ननामद्वयाघटितत्वमर्थः तस्य संयोगस्य धर्मधर्म्मिभा वासहं विशेषणविशेष्यभावासहं धर्मिभेदं पदार्थद्वयविषयकत्वं एकत्र विशेषणविशेष्यभावे सर्वत्र पदार्थद्वयविषयकत्वादौ अहेतुत्वादव्याप्यत्वात्॥ ६ ६ १॥ राम·
२१२

CC-0. In Public Domain. Digitization by eGangotri

ननुस्मारितेतित्यक्ता ज्ञाप्येतिकुतो नोक्तं उक्तार्थापत्त्या ज्ञाप्ये निष्ठसाधनत्वसंसर्गे वृत्तेरनुपयोगात् साक्षाद्वृत्तिज्ञानजन्यज्ञानविषयत्वाभावाच्च तद्विवक्षणे नोक्त
संसर्गवारणसंभवात् वृत्तिज्ञानाधीनविषभोजनस्मृतिद्वारकार्थापत्त्यैव तज्ज्ञापनात् तत्राह तथाप्यन्वितेति संसर्गस्यान्विताभिधानमते शक्त्याज्ञाप्यत्वादभिहिता
न्वयमते लक्षणया ज्ञाप्यत्वादतिव्याप्तिरिति योजना प्रकृत्यर्थस्यैव अभिहितान्वयमतेऽपि प्रकृत्यर्थसंसर्गस्य शक्तिलभ्यत्वात् वाक्यार्थसंसर्गस्येत्युक्तं क्रियाकारकयोः
संसर्गस्येति तदर्थः तदुक्तं संक्षेपशारीरके प्रत्ययप्रकृतिशब्दतो बहिर्विधृतेऽभिहितसंगतिष्वनः। प्रत्ययप्रकृतिशब्दयोः पुनर्नियममन्वितधियो निमित्ततेति अभिहितसंगति
रिति पदजन्यशाब्दधीमात्रजन्यानुभवविषयत्वमित्यर्थः पदजन्यानुभवाविषयत्वे सति पदजन्यानुभवजन्यानुभवविषयत्वमिति यावत् प्रत्ययप्रकृतिशब्दतो बहिरिति प्र
कृतिप्रत्ययार्थयोर्यः संसर्गस्तदन्यस्य संसर्गस्येत्यर्थः प्रकृत्यर्थान्वितप्रत्ययार्थप्रतियोगिकसंसर्गस्येति यावत् अभिहितान्वयमतेऽपि पक्षत्रयं वार्त्तिकादावुक्तं तथाहि तर्के
चरणो वाक्याधिकरणीयवार्त्तिके भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया। अनेकगुणजात्यादिवाचकार्थानुरंजिता। अन्वयव्यतिरेकाभ्यां प्रत्ययार्थस्तु सेष्यते केश्चिदन्यै
स्तु धात्वर्थः सामीप्येनोपकारतः। अपरैः समुदायार्थस्तथैवाभ्युपगम्यते पाकादौ यत्र दृष्टा सा भवत्यादौ तथैव चेति वाक्यार्थः वाक्यप्रयुक्तशाब्दधीमुख्यविशेष्यः आख्या
तवत्तया आख्यातसामान्यप्रतिपाद्यत्वात्तेन वर्त्तमानत्वादौ लडादिमात्रप्रतिपाद्ये न व्यभिचारः वाक्यार्थत्वं प्रकटयति अनेकेत्यादि सामीप्येनेति प्रत्ययस्येत्यादि स्तथा च

॥ तथाप्यन्विताभिधानवादिमते शक्त्याऽभिहितान्वयवादिमते च लक्षणया वाक्यार्थभूतसंसर्गस्य वृत्तिज्ञाप्यत्वात् सर्वत्र प्रमाणवा
क्येतिव्याप्तिः स्यात्तद्वारणायोक्तं स्मारितेति ॥ १ प्रत्ययस्य पूर्ववर्त्तितारूपसामीप्यसम्बन्धेनावच्छिन्नं प्रकृतिनिष्ठायां शाब्दबोधहेतुतायामवच्छेदक
त्वं प्रकृतेरेव तत्सम्बन्धेन प्रत्ययविशिष्टरूपेण भावनाविशिष्टे पाकादावनुभावकतास्वीकारात् समुदायार्थः प्रकृतिप्रत्ययोभयार्थः प्रकृतिविशिष्टप्रत्ययार्थ इति
यावत् प्रकृत्यर्थान्वितप्रत्ययार्थशाब्दबोधे उत्तरवर्त्तितासम्बन्धेन प्रकृतिविशिष्टप्रत्ययस्य हेतुत्वस्वीकारात् विशिष्टे हेतुताग्राहकमानेन विशेषणेऽपि हेतुताग्रहादुभ
योर्हेतुताकार्यतावच्छेदकं तु पच्यादिधातोः पाकान्वितभावनाशाब्दत्वं पाकान्वितशाब्दत्वं वा तिबादिप्रत्ययस्यापि पाकान्वितभावनाशाब्दत्वमन्वितभावनाशाब्दत्वं
वेति वक्ष्यते अत्र प्रत्ययार्थत्वं प्रत्ययमात्रजन्यशाब्दधीविषयत्वं प्रकृतिप्रत्ययसमुदायार्थत्वपक्षस्य वक्ष्यमाणत्वात् एवं धात्वर्थत्वादिकं बोध्यं तथा च भावनादिकं
प्रत्ययमात्रवाच्यं तत्शाब्दबोधानुकूलशक्तेरेव तद्वाचकत्वरूपत्वात् उपलक्षणमेतत् एतद्रीत्या कर्मत्वादिकं सुबर्थो नामार्थ उभयार्थो वेत्यपि बोध्यमेवं च प्रथम
पक्षे कर्मत्वादिकमनाद्यर्थ इव घटत्वादिकं घटादिनामार्थस्तथाच प्रकृत्या प्रत्ययेन च स्वार्थघटत्वादिमात्रं प्रथमतोऽनुभाव्यते स्वार्थस्य संस्कारसहितस्य पदज्ञानस्य सा
क्षादेव स्वार्थानुभवे हेतुत्वं न तु स्वार्थस्मृतिद्वारं तत्र स्वीक्रियते यथा पंचपाद्यां स्वीकृतं व्याप्तिसंस्कारविशिष्टं लिंगज्ञानमनुमितिहेतुर्न त्वंतरा व्याप्तिस्मृतिरिति ताभ्यां प्र
कृतिप्रत्ययजन्यानुभवाभ्यां प्रकृतिप्रत्ययार्थयोः संसर्गशाब्दधीर्जायते न तु प्रकृतिप्रत्ययाभ्यां तया प्रकृत्यर्थान्वितकर्मत्वादिसंसर्गस्य क्रियायां शाब्दधीरित्याद्यः पक्षः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰ सि॰
टी॰ ल॰
३

तथाचैकपदविशिष्टापरपदत्वेनजनकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वाभावेपियत्पदविशिष्टयत्पदविषयितातन्नद्खंडधीजनकताव्याप्यातत्पदविशिष्टतत्पदव
त्वमखंडार्थत्वमितिवाच्यंतथाचप्रत्येकवाक्यस्यैवपदांतरविशिष्टस्यापितस्यविषयितातादृशजनकताव्याप्येतितत्रातिव्याप्तिःस्यादितितादृशजनकताव्याप्यविषयि
ताकंतादृशविषयिताकेनान्येनाघटितंयत्तत्त्वमेवाखंडार्थत्वंएतेनप्रमेयत्वादिधर्मविशिष्टस्यसोयमित्यादेरपिवारणंतस्यतादृशविषयिताकत्वेसत्यपितादृशविष
यिताकेनान्येनसोयमित्यनेनघटितत्वादेवंचपदांतरविशिष्टस्यसोयमित्यादेःसर्वस्याखंडार्थकस्यवारणायसाहित्योक्तिरितिपर्यवसितंधवेत्यादिकंतूपलक्षणं
अत्रबहुवचनंनानानेकत्वमात्रस्यबोधकंनतुनामबहुत्वबोधकंनाम्नोरप्यखंडार्थत्वादितिबोध्यंवस्तुतस्तुधवखदिरपलाशाइत्यत्रधवेतिखदिरेतिप्रत्येकभागेऽ
तिव्याप्तेर्बहुवचनेनैकप्रमाजनकानेकनामघटितत्वंलक्षणेनिवेश्यतेनचधवेत्येकनाम्नःप्रमाजनकत्वाभावादेवतत्रनातिव्याप्तिरितिवाच्यंअभिहितान्वयमतेप्र
त्ययादिनिरपेक्षप्रकृतेःप्रकृत्यादिनिरपेक्षप्रत्ययस्यचस्वार्थानुभावकत्वेनतादृशानुभवस्यैवप्रकृतिप्रत्ययार्थसंसर्गबोधेहेतुत्वात्शावरभाष्यादौतथैवोक्तत्वात्त्व
नुस्वार्थप्रतियोगिकस्यस्वार्थांतर्गतस्यसंसर्गस्यानुभावकेयोगिकेपंकजादिपदेऽतिव्याप्तेर्वारणायबहुवचनमितितन्नशोभतेस्यघटकपदवृत्तिस्मारितान्या

॥ पदज्ञाप्येत्युक्तेऽर्थापत्त्यापदज्ञाप्यमनिष्टसाधनत्वमादायविषंभुंक्ष्वेतिवाक्येऽतिव्याप्तिःस्यात्तद्वारणायवृत्तीति॰॥ ❖ ॥

विषयकप्रमाजनकत्वस्यैवप्रकृतेनिवेश्यत्वात्पंकादिरूपस्यघटकपदवृत्तिस्मारितपंकादिभिन्नसंसर्गप्रमापकत्वस्यैवपंकजादिपदेसत्वात्नचैवंपंकजंगं
धविशेषवत् पाचकोधर्मविशेषवानित्यादिलक्षणवाक्येष्वव्याप्तिरितिवाच्यंतेषांपद्मादिस्वरूपमात्रपरत्वेनपंकादिसंसर्गाप्रमापकत्वात्तथान्विताभिधानमतेभिहि
तान्वयमतेचप्रकृत्यर्थान्वितप्रत्ययार्थेपिशक्तिस्वीकारात् पंकजन्मादिसंसर्गोपिपदवृत्तिस्मारितइतिचेन्नअन्वितशक्तेरन्वयांशेकुब्जत्वस्यानुपदमाचार्यैर्व
क्ष्यमाणत्वात् ननुपदवृत्तिपदेनकृत्तद्धितांतसमासाअपिग्राह्याःस्मारितपदेनतज्ज्ञाप्याअपिग्राह्यास्तथाचपंकादिसंसर्गोपिपदवृत्तिस्मारितःअतएवद्वितीयलक्ष राम॰
णस्यवृत्तिपदस्यतथैवार्थोऽन्यथाऔपगवादिनामार्थस्यतत्रवृत्तिविषयत्वोक्तिविरोधादितिचेन्नद्वितीयलक्षणेऽप्युपेत्यतथोक्तावपिप्रथमलक्षणेतथोक्तौमानाभावा २१३
त्तावतापिबहुवचनेनतद्वारणासंभवाच्चतथाहिबहुवचनंनानेकनामार्थकंपंकजादिसाधारण्यात् नापिसुबंतत्वेनप्रतिसंधीयमानानेकार्थकंसरसिज
मित्यादौतत्सत्त्वात् तत्त्वमसीत्यादावव्याप्तेश्चनापिविभक्त्यंतत्वेनज्ञायमानानेकार्थकंसरसिजमित्यादिसाधारण्यात्। अर्थापत्त्याहिविषदन्नभोजनमनिष्टसा
धनमित्यर्थेविनाप्रोक्तस्यविषमित्यादिवाक्यस्यार्थवत्त्वमनुपपन्नमित्यायर्थापत्त्याअनिष्टसाधनत्वंहिविषदन्नभोजनस्यानिष्टसाधनत्वसंसर्गवृत्तीतिपदवृत्तीत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येन तत्रापि व्यभिचारवारणापेक्षा न च प्रथमपक्षेपि पदजन्यबोधस्य घटत्वीयाकर्मतेत्यादिशाब्दबोधं प्रति हेतुत्वस्य स्वीकारात्तादृशकारणस्य पदजन्यबोधाजन्ये श्वे
तोऽश्वो धावतीतिबोधतुल्यबोधे व्यभिचारवारणाय तत्कार्यतावच्छेदके तादृशकारणवैशिष्ट्यनिवेशस्यावश्यकत्वात्प्रथमपक्षेपि गौरवं तुल्यमिति वाच्यं घटत्वीया
कर्मतेत्यादिबोधे घटमित्यादिपदजन्यघटत्वकर्मताधीरूपाया आसत्तेः कारणतायाः पक्षत्रयेपि स्वीकारात्तत्र व्यभिचारवारणस्य पक्षत्रयेपि कर्त्तव्यत्वात् एतावांस्तु विशेषो
यदाद्यपक्षे पदजन्यशाब्दधीरेव तादृशी आसत्तिरितरपक्षयोस्तु पदजन्या स्मृतिरिति वृत्त्या पदजन्यपदार्थज्ञानस्य स्वविशिष्टशाब्दत्वजन्यतावच्छेदकमिति तु पक्षत्रयेपि
बोध्यं न च घटमित्यादिपदज्ञानं घटपदतदर्थयोर्वृत्तिरूपसम्बन्धविषयकसंस्कारसहितं घटादिनामविभक्त्यर्थयोः संसर्गविषयकशाब्दधीहेतुरस्तु किमासत्तेर्हेतु
त्वकल्पनयेति वाच्यं घटः कर्मत्वमित्यादिनिराकांक्षपदजन्यपदार्थोपस्थित्या नामविभक्त्यर्थयोः संसर्गविषयकपदप्रयोज्यशाब्दधीवारणाय तादृशशाब्दबोधे घट
मित्यादिवाक्यघटकपदजन्यपदार्थज्ञानस्य हेतुत्वकल्पनात् तादृशपदजन्यत्वं च वृत्त्याग्राह्यं तच्च घटादिपदतदर्थवृत्तिज्ञानजन्यसंस्कारसहकृतत्वं तथा चोक्तसंस्का
रोक्तपदाभ्यां जनितज्ञानस्य हेतुत्वमत एवाकाशमिति पदादाश्रयाश्रयिभावसम्बन्धेनाकाशसम्बन्धितया गृहीतादुपस्थितस्याकाशस्याकाशमेकमिति न शाब्दधी
रत एवार्थाध्याहारवादिभिरपि तादृश्या घटकर्मत्वाद्युपस्थित्या सहितादानयेत्यादिपदाद्घटमानयेत्यादिवाक्यस्थलीयो बोधो न स्वीक्रियते भट्टमतेपि वाक्याजा
न्यस्य शाब्दबोधस्य स्वीकारेपि नोक्तोपस्थित्या शाब्दधीः स्वीक्रियते पदाजन्याभिरेव साकांक्षपदजन्याभिरेव वा तादृशोपस्थितिभिस्तस्याः स्वीकारात् अत एवानन्
येति पदमात्रस्मरणे घटकर्मत्वस्य पदाजन्योपस्थित्या भट्टमते क्रियाकारकयोर्नान्वयधीः शाब्दी ह्याकांक्षा शब्देनैव पूर्यत इति भट्टोक्तेः शाब्दी शब्देन केनचित् शाब्द
बोधे जनयितव्ये या आकांक्षा सा शब्देनैव निष्पाद्यते यत्र शब्दः कोपि न श्रुतस्तत्र शब्दस्य नाकांक्षासंपादकत्वं यथा पश्यतः श्वेतिमारूपमित्यादौ भट्टैरुक्तेः शाब्दबोधे शा
ब्दबोधेच्छारूपैवाकांक्षा पदाघटितैव किं च घटमित्यादिपदे विस्मृतेपि तादृशादर्थज्ञानात्तादृशसंसर्गशाब्दधीदर्शनान्नोक्तपदधीः साक्षाद्धेतुः न चैवं निर्विकल्पक
पदार्थमात्रशाब्दधीरपि घटमित्यादिसाकांक्षपदधीजन्या कथं तत्रापि घटादिपदस्यामादिपूर्ववर्त्तित्वे विस्मृतेपि तादृशशाब्दधीः स्यादिति वाच्यं तस्याः साकांक्षपद
धीजन्यपदार्थस्मृतिस्थानीयत्वेन घटादिपदेऽमादिपदपूर्ववर्त्तित्वरूपाकांक्षाविस्मरणे सति तस्या उत्पत्त्यसंभवान्न हि तादृशविस्मरणे सति घटादिपदमात्रधीजन्या
स्मृतिः साकांक्षपदजन्या अत एव न घटत्वीयाकर्मतेति शाब्दधीजनिका तस्मात्पदजन्योपस्थितिजन्ये पदार्थसंसर्गशाब्दबोधे तादृशासत्तेर्हेतुतया पदार्थमात्रविष
यकस्यापि शाब्दबोधस्योक्तसंसर्गशाब्दबोधोपयोगित्वं सिद्धं पदार्थस्मृतिस्तु प्रथमपक्षेनासत्तिः संभवति लाघवेन पदार्थमात्रानुभावकत्वस्य पदे कल्पनात् पदार्थमा
त्रशाब्दानुभवस्यैव पदादुत्पत्तिसंभवेन स्मृतिकल्पनाया व्यर्थत्वात् न च पदार्थमात्रं प्रति स्मारकत्वमेव पदस्य कल्प्यते नानुभावकत्वमिति वाच्यं हस्तिहस्तिपकयो
र्हि संयोगादिसम्बन्धेन मिथः सम्बन्धितया गृहीतत्वात्तयोरेकज्ञानस्यापरस्मारकत्वं युक्तं पदस्य तु स्वार्थं प्रत्यनुभावकत्वस्याकल्पनात्पदार्थसंसर्गानुभावकत्वेस्यागौरवे
णाभावात् सम्बन्धांतरस्य च तत्र तस्याभावात्स्मारकत्वासंभवात् न हि स्मृतिशक्तत्वरूपं स्मारकत्वमेव स्मृतिप्रयोजकः सम्बन्धः हस्तिहस्तिपकादिस्थले तद्दर्शनात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि· प्रत्ययपूर्ववर्त्तित्वविशिष्टप्रकृतेः कर्मत्वादिविशिष्टघटत्वाद्यवनुभावकत्वं प्रकृत्युत्तरप्रत्ययस्य घटत्वादिविशिष्टकर्मत्वाद्यावित्यपरं पक्षद्वयं तयोराद्यमादायक
टी·ल· रणत्वविशिष्टदधिविधीयत इतिगुणकामाधिकरणे शास्त्रदीपिकादावुक्तं द्वितीयमादाय दधिविशिष्टकरणत्वं विधीयत इत्युक्तं तत्र कर्मत्वादिकारकस्य विशेष्य
४ त्वमेव युक्तं प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययार्थं प्राधान्येनेति नैरुक्तानुशासनादत एव भावार्थाधिकरणे प्रत्ययार्थस्यैव प्राधान्यमुक्तं न च त
थापि घटत्वाद्यन्वितकर्मत्वादेर्घटादिपदस्यैव वाचकं मुख्यत्वान्नतु तदुत्तरप्रत्ययोजघन्यत्वादिति वाच्यं तथा सति प्रत्ययार्थस्य निरुक्तकाराद्युक्तप्रधान्यानुपपत्तेः
। प्रत्ययस्यावाचक… त्वे तदर्थस्यैवाप्रसिद्धेः संभवत्यर्थसाधुत्वे पदसाधुत्वस्य द्योतकत्वमात्ररूपस्यान्याय्यत्वात् घटपदापेक्षया अम्औटशसां भूयस्त्वेन मुख्यत्वन्याय
स्य प्रकृतेर्बाधस्यौचित्यात् विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् सधर्मत्वमितिन्यायेन कर्मण्यनादिविधायकानुशासनसिद्धममादीनां भूयसां कर्मत्वादिवाचकत्व
रूपं धर्मं न बाधितुं युक्तं किंतु एकस्य घटपदस्य मुख्यत्वन्यायसिद्धं कर्मत्वादिवाचकत्वमेव बाध्यते अत एवैकत्वादिसंख्यापि अमाद्येकवचनादेरेवार्थो न तु नामार्थः ना
मार्थस्तु जातिरेव व्यक्तेरपि लक्षणयैव यत्र बहुषु धर्मो न प्राप्तः किंतु संदिग्धो यथा नव्यता किं कमते शब्दसमवायित्वमेकस्यैवेशस्य अथवा बहूनां जीवानामिति
संदेहे जीवेषु तस्याप्राप्तत्वेन बाधाप्रसक्त्या ईशस्य प्राथम्यरूपस्य मुख्यत्वस्याभावाच्च विप्रतिषिद्धत्वादिन्यायाविषयत्वादेकत्र तत्कल्पनेलाघवान्न जीवेषु तत्क
ल्पनेतस्माद्विभक्तेर्द्योतकत्वं स्वीकृत्य प्रातिपदिकार्थपंचत्वमतमयुक्तमेव अत एव निपातानां द्योतकत्वं भट्टवार्त्तिके दूषितं किंच घटपटादिपदानां घटत्वपट
त्वादिकर्मताकरणतादिष्वनन्तशक्तिकल्पनेऽवच्छेदकगौरवं महदित्याशयेन द्वितीयपक्षस्यैवालंबनं न तु प्रथमपक्षेपदार्थसंसर्गविषयकः पदार्थविषयक
शाब्दबोधः कुत्रोपयुज्यते प्रवृत्ताविति चेन्न उपादानतावच्छेदकप्रकारकप्रत्यक्षमिष्टसाधनत्वादिज्ञानं च तत्र हेतुस्तत्रोक्तशाब्दबोधो नाद्यः सप्रकारकत्वप्रत्य
क्षत्वयोरभावात् न द्वितीयः घटत्वादिकर्मकज्ञानमिष्टसाधनमित्याकारकत्वाभावाद्यत्र विशेषणधीविधयासउपयुज्यते तदुक्तं नामधेयत्वरणेभट्टैः
अनुपस्थितविशेषणा विशिष्टधीर्न जायते न ¯ नभिहितविशेषणापीति चेन्न न त्वनभिहितविशेषणेत्यनेनैव विशेषणस्य शाब्दबोधानपेक्षोक्तेस्तथा च प
दजन्यपदार्थस्मृत्यैव विशिष्टधीसंभवान्नोक्तशाब्दबोध आवश्यकः। उच्यते यथा क्रियाकारकयोरन्वयबोधे घटमित्यादिपदज्ञानं प्रकृतिप्रत्ययार्थयोरन्वयधी
द्वारा न कारणं तादृशधिय एव तत्र हेतुत्वसंभवेन तद्द्वारा तस्य हेतुत्वे गौरवात् किंतु तादृशधियं प्रत्येव तस्य पदार्थस्मृतिद्वारा हेतुत्वमिति द्वितीयतृतीयपक्षयोः स्वी
क्रियते तथा तादृशधियं प्रत्युक्तस्मृतिद्वारोक्तपदज्ञानस्य हेतुत्वेपि गौरवादुक्तपदज्ञानस्य पदार्थमात्रविषयकशाब्दबोधं प्रति साक्षादेव हेतुता तन्मात्रविषयक राम·
त्वं तु सांसर्गिकविषयत्वानिरूपिततद्विषयताशालित्वं तेन घटमित्यादिपदस्य घटत्वकर्मत्वादिसमूहालंबनजनकत्वेपि तत्संग्रहः घटत्वविशिष्टकर्मतादि २१४
शाब्दधीत्वं नोक्तपदधीजन्यतावच्छेदकं तत् स्वीकारे तु तदपेक्षया गौरवं श्वेतोऽश्वो धावतीत्यस्यैव वाक्यजन्यस्य घटत्वविशिष्टकर्मतादिविषयकस्य शाब्दबो
धस्य भट्टमते स्वीकारेण तत्र व्यभिचारवारणाय कार्यतावच्छेदके तादृशपदज्ञानविशिष्टत्वनिवेशात्सुतरां गौरवं पदार्थमात्रशाब्दबोधस्तु न पदं विनोत्पद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्धं शृणोमि घटत्वीयकर्मतां शृणोमि घटत्वकर्मताविशिष्टं शृणोमि शाब्दयामीत्याद्यनुभवस्यैवोदयेन शुद्धघटत्वं स्मरामीत्येव प्रत्ययात् अत एव पर्वते वह्निसंयो
गमनुमिनोमि न तु केवलं पर्वतं वह्निसंयोगं वेति प्रत्ययः पक्षसाध्यसंसर्गविषयतावच्छिन्नमनुमितित्वमवगाहते तस्मादज्ञातस्यैव विशेष्यविशेषणसंसर्गस्य प्र
माणप्रयुक्तविषयताकत्वेन न पदार्थमात्रविषयता प्रमाणप्रयुक्ता नन्वनुभवमात्रस्यागृहीतग्राहित्वेपि शाब्दजन्यबोधोनुभवविलक्षणः पदार्थमात्रेण सह पदस्य
स्मृतिप्रयोजकसम्बन्धाभावेन स्मृतिविलक्षणश्च पदार्थसंसर्गानुभावकत्वे गौरवेण पदार्थमात्रे तत्स्वीकारे च स्मारकत्वकल्पनायावैयर्थ्यादभिधायकत्वस्यैव पदे स्वीका
रात् स्मृतिशक्तत्वस्य स्मृतिप्रयोजकसम्बन्धतायां कुत्राप्यदृष्टत्वेन सम्बन्धान्तरस्यैव तस्याः सर्वत्र कल्पनादिति चेन्न निर्विकल्पके शाब्दत्वस्याप्रामाणिकत्वेन पदार्थसं
सर्गानुभावकत्वस्यैव पदानामुचितत्वस्योक्तत्वात् स्मृत्यनुभवविलक्षणानन्तबोधकल्पनापेक्षया स्मृतिद्वारकसंसर्गानुभावकत्वस्यैव लघुत्वाच्च त्वयापि हि निर्वि
भक्तिकघटादिपदाद्घटत्वादिस्मृतिः स्वीक्रियत एव तथा च घटादिपदत्वेनैव स्मारकत्वस्य त्वयापि स्वीकारात् शाब्दनिर्विकल्पके स्मृतित्वस्य दुर्वारत्वेन तुरीयविषय
तावच्छिन्नशाब्दत्वावच्छिन्नं प्रति शब्दस्य हेतुतान्तरकल्पनस्य वैयर्थ्येन पदार्थद्वयविषयतानिरूपितसांसर्गिकविषयतावच्छिन्नशाब्दत्वेनैव शब्दकार्यत्वं युक्त
मिति अपि च वृद्धयोर्व्यवहारं दृष्ट्वा यदा वालस्य शक्तिग्रहस्तदा प्रथमतः सुबन्ततिङन्तसमुदायरूपे महावाक्ये एकवाक्यताप्रकारकज्ञानस्य विशिष्टैकवाक्यार्थशा
ब्दबोधे हेतुतां गृहीत्वा तदन्यथानुपपत्त्या सुबन्ततिङन्तपदानां समुदायघटकानां कार्यं प्रकृतिप्रत्ययार्थसंसर्गबोधं तादृशहेतुतायां वालो द्वारतया कल्पयति तत्रापि ता
दृशसंसर्गबोधस्य साक्षात्सुबन्तादिपदजन्यत्वानुपपत्त्या द्वारतया पदार्थमात्रज्ञानं विभक्त्यन्तपदघटकनामादिपदजन्यं कल्पयति तत्र पश्चात्पदार्थमात्रज्ञानजन
कत्वमेव नामादिपदस्य विभक्त्यादिसहितस्य गृहीत्वा प्रकृतिप्रत्ययार्थसंसर्गशाब्दधीजनकत्वस्य त्यागे उपजीव्यविरोधापत्तिः न चैकवाक्यताज्ञानस्य हेतुत्वे मा
नाभाव इति वाच्यम् अन्वयव्यतिरेकज्ञानसहकृतप्रत्यक्षस्य तत्र मानत्वात् न च वाक्याजन्ये श्वेतोश्वो धावतीति शाब्दबोधे व्यभिचार इति वाच्यं वाक्यार्थबोधे पदार्थज्ञान
माकांक्षायोग्यतासत्तिसहकृतं सामान्यसामग्री विशेषसामग्री तु एकवाक्यताप्रकारकपदसमूहविशेष्यकज्ञानं न विशिष्टवाक्यार्थज्ञाने श्वेतोश्वो धावतीत्यादौ तु श्वे
तरूपदर्शनस्य लेगवादिद्रव्याभावनिश्चयादश्वसंसर्गं विना दृश्यमानं श्वेतत्वमनुपपन्नमिति धीः श्वेतरूपस्याश्वान्यद्रव्यवृत्तित्ववाधधीसहकृताद्रव्यवृत्तित्वधी
र्धावनकर्तृत्वं विनोपलभ्यमानं खुरविक्षेपशब्दादिकमनुपपन्नमिति धीर्धावनकर्तृत्वस्य तादृशद्रव्यवृत्तित्वधीर्वा पश्यतः श्वेतिमा रूपं हेषाशब्दं च शृण्वतः खु
रविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचिदिति वार्त्तिकोक्तेरिति नन्वत्र पक्षे अभिहितघटनायदा तदानीं स्मृतिसमवुद्धियुगप
देविधत्तः। परहशि पुनरन्विताभिधाने पदयुगलात् स्मृतियुग्ममेव पूर्वमिति संक्षेपशारीरकोक्तिविरोधः प्रकृत्यादिपदस्य स्मृतिजनकत्वेन स्मृतिसमेत्यस्यासंगतेः य
दि हि पदार्थस्मृत्युत्तरस्मृतिसमो बोध इत्युच्यते तदाप्यसंगतिः प्रकृतिप्रत्ययार्थयोः संसर्गस्याज्ञातत्वेन तद्बोधस्य स्मृतिसमत्वाभावादन्विताभिधानमतेपि पूर्वं स्मृते
र्द्वितीया — ईउच्यमानत्वेन मतयोर्विशेषालाभाच्चेति चेन्न पदपदस्य सुबन्तनामपरत्वात्तथा चान्त्यपक्षे यद्यपि नाम्नः सुपा च स्वार्थस्य स्मृतिरेव जन्यते न तु प्रथमपक्षाइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰ सि॰
टी॰ ल॰
५

तथाननुभवाच्चएवंच घटमित्यादिपदात्प्रथमतः पदार्थानुभवस्यैवोत्पत्त्यातस्यपदार्थसंसर्गबोधंप्रतिविशेषणधीविधयापिहेतुत्वसंभवः कर्मताघटत्वीयेतिबोधेका
र्मतायाअविशेषणत्वेपिविशेष्यतावच्छेदकप्रकारकधीविधयातद्धियोहेतुताक्रियाकारकसंसर्गबोधेतस्याअपिविशेषणत्वेनतत्रैवतदुपयोगसंभवाच्चनन्वेवमपि
पदार्थमात्रानुभवस्यज्ञातविषयकत्वेनाप्रमात्वात् तज्जनकत्वेपिशब्दस्यप्रमाणत्वंनस्यादितिचेन्नप्रमाकरणत्वाभावेपिप्रमाप्रयोजकत्वरूपस्यैवप्रमाणत्वस्यश
ब्देप्रथमपक्षेस्वीकारादुक्तलाघवानुरोधात् तथेंद्रियादीनामपिप्रत्यक्षादिप्रमायांप्रयोजकत्वमेवस्यान्नतुकारणत्वविशेषरूपंकरणत्वंनिर्विकल्पकीयतुरीयविषयता
सम्बन्धेनैवप्रत्यक्षंप्रत्यतिलाघवेनेंद्रियस्यसंयोगादिसम्बन्धेन हेतुतानांस्वीकारसंभवात् नचनिर्विकल्पस्यातींद्रियत्वात्तदाद्यसाक्षात्करोमीतिमानसंनस्यादिति वा
च्यंभट्टमतेज्ञानमात्रस्यातींद्रियत्वेनप्राकट्यरूपज्ञाततामादायैवसाक्षात्करोमीतिमानसधीनिर्वाहाच्छब्दप्रयोज्येशब्दाजन्येशाब्दत्वस्यैवेंद्रियप्रयोज्ये इंद्रियाजन्ये
पिसप्रकारकबोधेसाक्षात्कारत्वस्यसंभवादतएवशब्दजन्यतापिजातिरूपपदार्थनिष्ठतुरीयविषयताशालिशाब्दत्वेनैवसांसर्गिकविषयत्वानिरूपितत्वादिनि
वेशेपिगौरवात् तुरीयविषयतायाविषयत्वांतरानिरूपितत्वेनपदार्थसंसर्गबोधेव्यभिचाराभावात् तथाचनिर्विकल्पधीरेवप्रथमपक्षेशब्देंद्रियादिजन्याअत
एवालोचननामकंनिर्विकल्पकमेवेंद्रियजन्यमित्यन्येपिवदंतिसंसर्गप्रमायांतदयोगव्यवच्छिन्नकारणरूपंकरणंएवमनुमित्यादिकमपिप्रथमंनिर्विकल्पकंजा
यतेपश्चात्सविकल्पकंप्रथमतएववातत्सविकल्पकंतत्रव्याप्त्यादिघटकतयासाध्यादिज्ञानसत्त्वेनानुमित्यादिरूपविशिष्टधीसंभवेननिर्विकल्पकानुमितिवैय
र्थ्यात् तद्धेतोरेवतदस्त्वितिन्यायादतएवाभिहितान्वयवादीभट्टमतेऽभिहितेनपदार्थेनकरणेनपदार्थसंसर्गशाब्दधीर्जायतेतन्मतइतितथाव्यवहारः द्वितीय
यतृतीयसंख्ययोरपिअभिहितेन प्रकृतिप्रत्ययार्थयोः संसर्गेणकरणेनक्रियाकारकरूपयोः संसर्गशाब्दधीरभिधानंचपदजन्यानुभवस्तस्यकरणत्वेनतद्विषय
त्वविशिष्टस्यकरणत्वव्यवहारः तदेवंप्रथमपक्षोपपादनंद्वितीयतृतीयपक्षवादिनांत्वयमाशयः ननिर्विकल्पकस्यशब्दप्रमाणजन्यतासंभवः प्रमाणत्वाव
च्छेदेनागृहीतग्राहिधीजनकत्वनियमात् नचोक्तधीप्रयोजकत्वस्यैवनियमस्तदवच्छेदेनेति वाच्यंसाक्षात्तज्जनकत्वसंभवेपरंपरयाजनकत्वाकल्पनात् नच
निर्विकल्पविषयतायाः शब्दकार्यतावच्छेदकत्वेलाघवात्तथाकल्पनमितिवाच्यंस्मृतावेवशब्दजन्यत्वतुरीयविषयतयोः संभवेनशब्दजन्यनिर्विकल्पकेशाब्दत्वे
मानाभावात् स्मरामीतिमानसस्यैवतत्रतज्जन्यज्ञाततायांवोत्पत्त्याशाब्दयामीतिमानसाभावात् नचसम्बन्धाभावेनस्मारकत्वासंभवः पदार्थसंसर्गानुभावकत्वस्यै राम॰
वपदेपदार्थसम्बन्धत्वसंभवात् नचागृहीतग्राहित्वस्यप्रमाणजन्यज्ञानेनियमेमानाभावइतिवाच्यंविषयव्यवस्थापकत्वस्यैवतत्रमानत्वात् तच्चस्वविशेष्येस्व २१५
विशेषणस्यविपरीतज्ञानाभावप्रयोजकत्वंज्ञानांतरेणतत्रतस्यगृहीतत्वेतुतस्यज्ञानांतरस्यतादृशाभावप्रयोजकतयाक्लृप्तत्वेनगृहीतग्राहिणस्तत्कल्पनेमाना
भावः किंचतुरीयविषयताशालिशाब्दत्वस्यकार्यतावच्छेदकत्वेपिघटत्वाद्यंशेनिर्विकल्पकप्रत्यक्षात्मकेश्वेतोऽश्वोधावतीत्याद्याकारेवाक्याजन्यशाब्दबोधेचव्य
भिचारात्तुरीयविषयतावच्छिन्नशाब्दत्वमेवतथावाच्यंतथाचाप्रसिद्धपदार्थयोः संसर्गविषयतायामेवशाब्दत्वावच्छेदकत्वस्वीकारात्कर्मतायांघटत्वस्यसम्ब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घटत्वप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतात्वावच्छिन्नावच्छेदकताकशाब्दत्वेनवा तत्कार्यता घटत्वान्वितं शाब्दयामीतिप्रत्ययादुक्तायाः शाब्दत्वाव
च्छेदकतायाः स्वीकारात् घटत्वादिविषयतामात्रावच्छिन्नशाब्दत्वेन तु न तत्कार्यता शाब्दत्वस्य तन्मात्रानवच्छिन्नत्वात् घटमित्यादिवाक्यजधीस्थले घटत्वं स्मरामी
त्येव प्रत्ययेन घटत्वं शाब्दयामीत्यप्रत्ययात् अत एवानुवादवाक्यार्थे स्मरामीत्येव प्रत्ययादनुवादवाक्यात्प्रमोत्पत्तिवारणाय प्रमात्वे तत्तद्धर्मविषयकाज्ञानस्य हेतु
त्वात् शाब्दादिज्ञानस्य च प्रमात्वनियमात् सामान्यसामग्रीबाधेन नोक्तस्थले प्रमोत्पत्तिः तस्मादुक्तव्यभिचारवारणायोक्तप्रकारतावच्छिन्ने नोक्तविशेष्यतावच्छि
न्नेन वा शाब्दत्वेन घटादिपदज्ञानकार्यता तार्किकादिमते तु घटत्वीयकर्मत्वांशेऽनुमित्यादिरूपस्य पटत्वीयकरणताशाब्दज्ञानस्यैवास्वीकारादुक्तव्यभिचाराभावेन
घटत्वाद्यवच्छिन्नविषयताशालि —— शाब्दत्वेन तत्कार्यता तन्मते जातेः संस्थानव्यंग्यत्वानियमेनानुमितित्वशाब्दत्वादिजातिस्वीकारेणानुमित्यात्मकशाब्दज्ञान
स्यस्वीकारे सांकर्यापत्त्या भिन्नविषयकानुमित्यादिसामग्र्याः शाब्दबोधांशे प्रतिबंधकत्वस्वीकारात् मीमांसकमते गुणादौ जात्यस्वीकारेपि विषयिताविशेषरूपशाब्दत्वा
नुमितित्वादिस्वीकारात्तेषां सांकर्यस्यादोषत्वात् तथा च घटं घटेन घटायेत्यादिसाधारणघटत्वाद्यन्वितविशेष्यतावच्छिन्नशाब्दत्वमुक्तघटादिपदधीकार्यतावच्छेदकं
अमादिपदधीकार्यतात्वन्वितकर्मतादिविशेष्यतावच्छिन्नशाब्दत्वेन घटं पटमित्यादिसाधारणेन वस्तुतस्तु विशेष्यतात्वं न निवेश्यते किंतु विषयतात्वं विशेष्यताप्र
कारतासाधारणं घटत्वतदन्वितयोर्निवेश्यते तेन घटइत्यादावेकत्वहित्वादिप्रकारतानिरूपितघटत्वादिविशेष्यताया अपि संग्रहः ननु घटं घटेनेत्याद्यनुपूर्वीविशेष
ज्ञानत्वेन घटत्वादिकर्मताकरणादिशाब्दप्रतिहेतुत्वमवश्यं वाच्यमन्यथा अमघटेत्याद्यानुपूर्वीज्ञानादपि तदापत्तेस्तथा च घटादिपदज्ञानत्वेन घटत्वाद्यन्वितशाब्दत्वे
न च कार्यकारणत्वं वृथा अथ घटमित्याद्यानुपूर्वीविशेषाणामेकस्याप्यज्ञानदशायां घटत्वान्वितशाब्दसामान्याभावस्योपलभ्यमानस्य घटमित्याद्यानुपूर्वीविशेषाभा
वकूटेन प्रयुक्तत्वकल्पने गौरवाद्घटत्वान्वितस्य शाब्दत्वेन घटपदस्य ज्ञानत्वेन कार्यकारणत्वं प्रकल्प्य घटपदज्ञानसामान्याभावप्रयुक्तत्वमुक्तशाब्दसामान्याभावस्य।
कल्प्यते तादृशकार्यकारणत्वाकल्पने तु न तत्प्रयुक्तत्वं तस्य सिध्यति कार्यतावच्छेदकावच्छिन्नाभावस्यैव कारणतावच्छेदकावच्छिन्नाभावप्रयुक्तत्वादिति चेन्न।
निर्विभक्तिकघटादिपदज्ञानकाले घटादिपदज्ञानसामान्याभावस्याभावेन तदा तत्प्रयुक्तत्वस्य तादृशशाब्दसामान्याभावे वक्तुमशक्यतया तादृशानुपूर्वीज्ञानविशेषा
भावकूटस्यैव तत्प्रयोजकता या वाच्यतया घटादिपदज्ञानसामान्याभावकालेप्युक्तविशेषाभावकूटस्यैव प्रयोजकतासंभवे नोक्तकार्यकारणत्वकल्पनस्य वैयर्थ्यादि
ति अत्रोच्यते निर्विभक्तिकघटादिपदज्ञानदशायामुक्तसामान्याभावस्याभावेन तत्प्रयोजकत्वासंभवेपि घटादिपदज्ञानसामान्याभावकालावच्छिन्नस्योक्तशाब्दसा।
मान्याभावाधिकरणत्वस्य तत्तत्पुरुषनिष्ठस्य घटादिपदज्ञानसामान्याभावप्रयुक्तत्वस्य लाघवेन स्वीकारसंभवेन तदनुरोधेनोक्तकार्यकारणत्वकल्पनात् सविभक्तिकघ
टादिपदज्ञानत्वेन वा कारणत्वमास्तां यदि तु विशेषकारणेष्वनुगतं यत्सामान्यरूपं तेन रूपेण कारणत्वस्यास्वीकारेपि तदवच्छिन्नाभावो विशेषकार्यानुगतसामान्यरूपा
वच्छिन्नाभावे प्रयोजकः स्वीक्रियते तादृशलघुधर्मावच्छिन्नाभावत्वस्यैव तत्त्वावच्छेदकत्वसंभवादिति चिंत्यते तत्रास्तां तथैव न चैवं घटादिपदोत्तरामादिपदज्ञानत्वेन हेतु।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशाब्दानुभवस्तथापितत्त्वमस्यादिवाक्यस्थलेऽखंडार्थकधीरेवमिलिताभ्यांसुबंतपदाभ्यांजन्यतेअखंडस्यचार्थस्यचिद्व्यक्तिमात्ररूपत्वेनपूर्वंज्ञातत्वात्प्रत्येकमपिता
भ्यांतादृशाखंडबोधस्यैवजननात्स्मृतिसमवुद्धियुगंताभ्यांजन्यतेनतुघटमानयेतिपदाभ्यामिवप्रत्येकमज्ञातविषयकमन्विताभिधानमतेतुस्मृतिसमातादृशधीर्नस्वीक्रि
यतेमहावाक्यार्थबोधस्यैवशाब्दत्वस्वीकारादवांतरबोधस्यशाब्दत्वस्वीकारेशाब्दधीसामान्येस्वीकृतस्यकार्यत्वान्वितविषयकत्वस्यभंगापत्तेरतःसुबंतपदयुगलात्स्मृ
तियुग्ममेवप्रत्येकमेकैकस्मृतिजननात् मिलितात्तुमहावाक्यार्थरूपस्यक्रियाकारकान्वयस्यशाब्दधीर्ज्ञानविध्येकवाक्यतयातत्त्वमसीत्यस्यबोधकत्वात् कार्यत्वाविषय
कशाब्दबोधास्वीकारात् अभिहितान्वयमतेतदादिपदस्यस्वघटितवाक्यतात्पर्यविषयविषयकशाब्दबोधंप्रतिप्रथमांत्यपक्षयोर्हेतुत्वंसचबोधोनिष्प्रकारकएवअर्थेऽ
नुपलब्धेतत्प्रमाणमितिजैमिनीयसूत्रेणज्ञातेसिद्धार्थेपितात्पर्यस्योक्तत्वात्॥ अत्रपदमात्रस्यसामान्यतःस्वघटितवाक्यतात्पर्यविषयशाब्दधीहेतुत्वेपिविशेषतः
कारणत्वंचिंत्यतेप्रकृत्यर्थान्वितेप्रत्ययार्थकर्मत्वादौघटेत्यादिप्रकृत्युत्तरप्रत्ययपदस्यामादेरनुभावकत्वरूपाशक्तिः प्रत्ययपूर्ववर्त्तिघटादिपदस्यकर्मत्वाद्य
न्वितघटत्वादौसेत्युक्तेपक्षद्वयेसमुच्चयस्वीकारेघटत्वान्वितकर्मत्वंकर्मत्वान्वितंघटत्वमितिबोधद्वैविध्यस्ययुगपदापत्त्यावाक्यभेदापत्तिः यदिप्रकृत्यर्थान्वितक
र्मत्वादौप्रत्ययस्यप्रकृत्युत्तरस्यानुभावकत्वमित्येवस्वीक्रियतेतदाप्रकृतेरवाचकत्वापत्तिः प्रकृतेरेवकर्मत्वाद्यन्वितघटत्वाद्यनुभावकत्वस्वीकारेप्रत्ययस्यावाच
कत्वापत्तिः प्रकृतिप्रत्यययोर्द्वयोर्विशिष्टार्थानुभावकत्वेकेवलप्रकृतिपदेप्रत्ययपदेवोभयवाचकत्वापत्तिरेकैकस्यैकैकार्थानुभावकत्वेपूर्वोक्तपक्षत्रयस्यप्रथ
मपक्षएवस्वीक्रियेतकिंचवेदांतमहावाक्यस्थपदानामखंडार्थबोधंप्रत्येवविशेषतोहेतुत्वस्यवाच्यतयाकथंसर्वपदानामन्वितबोधकत्वं॥ तस्मान्नान्वितेपदानां
शक्तिः किंत्वनन्वितेघटत्वादौतदनुभवात्सदजन्यादन्वितानुभवइतिप्रथमपक्षएवयुक्तइतिपार्थसारथिमिश्रादयस्तदसत् अन्वितशक्तिवादस्याशयानवबोधा
त् अभिहितान्वयमतेऽन्विताभिधानमतेचाकृत्यधिकरणन्यायेनज्ञातावेवानुभावकत्वरूपापदानांशक्तिरित्युच्यतेतस्यघटत्वादिकमेवघटादिपदानुभाव्यमि
तिपक्षेयथाश्रुतएवार्थः अन्यान्वितघटत्वादिकंतदर्थइत्युक्तपक्षेतुतादृशशक्तेर्यदीयतयाग्रहः शाब्दधीप्रयोजकः सोर्थोवाच्यतयाव्यवह्रियतेसाचजातिरेवेतितत्रै
ववाचकत्वंघटादिपदेव्यवह्रियतेनतुघटत्वाद्यन्वितेअन्यान्वितघटत्वादौवाअतएवननानार्थत्वापत्तिर्यत्रहिनानाधर्माणांप्रत्येकनिरूपितत्वेनपदेशक्तिग्रहास्तत्त
द्धर्मशाब्दधीप्रकारणानितत्रैवपदस्यनानार्थत्वंप्रकृतेतुघटत्वशक्तित्वेनघटपदेशक्तेर्ज्ञानंकारणंनत्वन्यधर्मशक्तित्वेनापीतिनघटपदस्यनानार्थत्वंतस्मादन्या॥ राम॰
न्वितघटत्वंघटपदस्यशक्यमन्यान्वितकर्मत्वममादिपदस्येत्यादिविवरणाद्युक्तेरयमर्थः शाब्दत्वावच्छेदकविशेष्यता निरूपितसंसर्गतानिरूपितघटत्वप्रकारताशालि २१६
त्वंघटपदधीकार्यतावच्छेदकंघटत्वीयकर्मतांशेऽनुमित्यादिरूपेघटकरणत्वांशेशाब्दज्ञानेघटपदंविनाप्युत्पन्नेव्यभिचारस्यादतःशाब्दत्वावच्छेदकेतितादृशप्र
कारताविशेषणंकर्मतायांघटत्वंशाब्दयामीतिप्रत्ययात्तस्यास्तत्त्वस्वीकारात्। उक्तप्रकारताशालिशाब्दत्वेनकार्यत्वस्वीकारेपिसएवदोषः केवलविशेष्यतात्वेन
केवलप्रकारतात्वेनवाशाब्दत्वावच्छेदकत्वाभावात्शाब्दत्वावच्छेदकत्वंविशिष्टप्रकारताविशेषणंतथाचविशिष्टप्रकारतात्वावच्छिन्नशाब्दत्वावच्छेदकतालाभः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटत्वप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतात्वावच्छिन्नावच्छेदकताकशाब्दत्वेनवातत्कार्यताघटत्वान्वितंशाब्दयामीतिप्रत्ययादुक्तायाः शाब्दत्वाव
च्छेदकतायाः स्वीकारात् घटत्वादिविषयतामात्रावच्छिन्नशाब्दत्वेनतुनतत्कार्यताशाब्दत्वस्यतन्मात्रानवच्छिन्नत्वात् घटमित्यादिवाक्यजधीस्थले घटत्वंस्मरामी
त्येवप्रत्ययेन घटत्वंशाब्दयामीत्यप्रत्ययात् अतएवानुवादवाक्यार्थेस्मरामीत्येवप्रत्ययादनुवादवाक्यात्प्रमोत्पत्तिवारणाय प्रमात्वे तत्तदर्थविषयकाज्ञानस्यहेतु
त्वात् शाब्दादिज्ञानस्यचप्रमात्वनियमात् सामान्यसामग्रीबाधेननोक्तस्थलेप्रमोत्पत्तिः तस्मादुक्तव्यभिचारवारणायोक्तप्रकारतावच्छिन्नेनोक्तविशेष्यतावच्छि
न्नेनवाशाब्दत्वेन घटादिपदज्ञानकार्यतातार्किकादिमतेतु घटत्वीयकर्मत्वाद्यंशेऽनुमित्यादिरूपस्यपटत्वीयकरणताशाब्दज्ञानस्यैवास्वीकारादुक्तव्यभिचाराभावेन
घटत्वाद्यवच्छिन्नविषयताशालि —— शाब्दत्वेनतत्कार्यतातन्मते जातेः संस्थानव्यंग्यत्वानियमेनानुमितित्वशाब्दत्वादिजातिस्वीकारेणानुमित्यात्मकशाब्दज्ञान
स्यस्वीकारेसांकर्यापत्याभिन्नविषयकानुमित्यादिसामग्र्याःशाब्दबोधादौप्रतिबंधकत्वस्वीकारात् मीमांसकमतेगुणादौजात्यस्वीकारेपि विषयिताविशेषरूपशाब्दत्वा
नुमितित्वादिस्वीकारात्तेषांसांकर्यस्यादोषत्वात् तथाचघटंघटेनघटायेत्यादिसाधारणघटत्वाद्यन्वितविशेष्यतावच्छिन्नशाब्दत्वमुक्तघटादिपदधीकार्यतावच्छेदकं
अमादिपदधीकार्यतात्वन्वितकर्मतादिविशेष्यतावच्छिन्नशाब्दत्वेनघटंपटमित्यादिसाधारणेनवस्तुतस्तुविशेष्यतात्वंननिवेश्यतेकिंतुविषयतात्वंविशेष्यताप्र
कारतासाधारणं घटत्वतदन्वितयोर्निवेश्यते तेनघट इत्यादावेकत्वद्वित्वादिप्रकारतानिरूपितघटत्वादिविशेष्यताया अपिसंग्रहः ननुघटंघटेनेत्याद्यनुपूर्वीविशेष
ज्ञानत्वेनघटत्वादिकर्मताकरणादिशाब्दंप्रतिहेतुत्वमवश्यंवाच्यमन्यथा अम् घटेत्याद्यानुपूर्वीज्ञानादपितदापत्तेस्तथाचघटादिपदज्ञानत्वेनघटत्वाद्यन्वितशाब्दत्वे
नचकार्यकारणत्वंवृथा अथघटमित्याद्यानुपूर्वीविशेषाणामेकस्याप्यज्ञानदशायांघटत्वान्वितशाब्दसामान्याभावस्योपलभ्यमानस्य घटमित्याद्यानुपूर्वीविशेषाभा
वकूटेनप्रयुक्तत्वकल्पने गौरवाद्घटत्वान्वितस्यशाब्दत्वेनघटपदस्यज्ञानत्वेनकार्यकारणत्वंप्रकल्प्य घटपदज्ञानसामान्याभावप्रयुक्तत्वमुक्तशाब्दसामान्याभावस्य
कल्प्यते तादृशकार्यकारणत्वाकल्पनेतुनतत्प्रयुक्तत्वंतस्यसिध्यति कार्यतावच्छेदकावच्छिन्नाभावस्यैव कारणतावच्छेदकावच्छिन्नाभावप्रयुक्तत्वादितिचेन्न।
निर्विभक्तिकघटादिपदज्ञानकाले घटादिपदज्ञानसामान्याभावस्याभावेन तद्दशातत्प्रयुक्तत्वस्यतादृशशाब्दसामान्याभावेवक्तुमशक्यतया तादृशानुपूर्वीज्ञानविशेषा
भावकूटस्यैवतत्प्रयोजकतायावाच्यतया घटादिपदज्ञानसामान्याभावकालेप्युक्तविशेषाभावकूटस्यैवप्रयोजकतासंभवेनोक्तकार्यकारणत्वकल्पनस्यवैयर्थ्यादि
ति अत्रोच्यते निर्विभक्तिकघटादिपदज्ञानदशायामुक्तसामान्याभावस्याभावेन तत्प्रयोजकत्वासंभवेपि घटादिपदज्ञानसामान्याभावकालावच्छिन्नस्योक्तशाब्दसा
मान्याभावाधिकरणत्वस्य तत्तत्पुरुषनिष्ठस्य घटादिपदज्ञानसामान्याभावप्रयुक्तत्वस्यलाघवेनस्वीकारसंभवेन तदनुरोधेनोक्तकार्यकारणत्वकल्पनात् सविभक्तिकघ
टादिपदज्ञानत्वेनवाकारणत्वमास्तांपदितुविशेषकारणेष्वनुगतंयत्सामान्यरूपंतेनरूपेणाकारणत्वस्यास्वीकारेपि तदवच्छिन्नाभावोविशेषकार्यानुगतसामान्यरूपा
वच्छिन्नाभावेप्रयोजकः स्वीक्रियतेतादृशलघुधर्मावच्छिन्नाभावत्वस्यैवतत्वावच्छेदकत्वसंभवादितिविंसतेतरास्तांतथैवनचैवंघटादिपदोत्तरामादिपदज्ञानत्वेनहेतु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वशाब्दानुभवस्तथापितत्वमस्यादिवाक्यस्थलेऽखंडार्थकधीरेवमिलिताभ्यांसुबंतपदाभ्यांजन्यतेअखंडस्यचार्थस्यचिद्व्यक्तिमात्ररूपत्वेनपूर्वंज्ञातत्वात्प्रत्येकमपिता
भ्यांतादृशाखंडबोधस्यैवजननात्स्मृतिसमबुद्धियुगंताभ्यांजन्यतेनतुघटमानयेतिपदाभ्यामिवप्रत्येकमज्ञातविषयकमन्विताभिधानमतेतुस्मृतिसमातादृशधीर्नस्वीक्रि
यतेमहावाक्यार्थबोधस्यैवशाब्दत्वस्वीकारादवांतरबोधस्यशाब्दत्वस्वीकारेशाब्दधीसामान्येस्वीकृतस्यकार्यत्वान्वितविषयकत्वस्यभंगापत्तेरतःसुबंतपदयुगलात्स्मृ
तियुग्ममेवप्रत्येकमेकैकस्मृतिजननात् मिलितात्तुमहावाक्यार्थरूपस्यक्रियाकारकान्वयस्यशाब्दधीर्ज्ञानविध्येकवाक्यतयातत्त्वमसीत्यस्यबोधकत्वात्कार्यत्वाविषय
कशाब्दबोधास्वीकारात् अभिहितान्वयमतेतदादिपदस्यस्वघटितवाक्यतात्पर्यविषयविषयकशाब्दबोधंप्रतिप्रथमांत्यपदयोर्हेतुत्वंसचबोधोनिष्प्रकारकएवअर्थेऽ
नुपलब्धेतत्प्रमाणमितिजैमिनीयसूत्रेणज्ञातेसिद्धार्थेपितात्पर्यस्योक्तत्वात्॥ अत्रपदमात्रस्यसामान्यतःस्वघटितवाक्यतात्पर्यविषयशाब्दधीहेतुत्वेपिविशेषतः
कारणत्वंचिंत्यतेप्रकृत्यर्थान्वितेप्रत्ययार्थकर्मत्वादौघटेत्यादिप्रकृत्युत्तरप्रत्ययपदस्यामादेरनुभावकत्वरूपाशक्तिःप्रत्ययपूर्ववर्त्तिघटादिपदस्यकर्मत्वाद्य
न्वितघटत्वादौसेत्युक्तपक्षद्वयेसमुच्चयस्वीकारेघटत्वान्वितकर्मत्वंकर्मत्वान्वितंघटत्वमितिबोधद्वैविध्यस्ययुगपदापत्त्यावाक्यभेदापत्तिःयदिप्रकृत्यर्थान्वितक
र्मत्वादौप्रत्ययस्यप्रकृत्युत्तरस्यानुभावकत्वमित्येवस्वीक्रियतेतदाप्रकृतेरवाचकत्वापत्तिःप्रकृतेरेवकर्मत्वाद्यन्वितघटत्वाद्यनुभावकत्वस्वीकारेप्रत्ययस्यावाच
कत्वापत्तिःप्रकृतिप्रत्यययोर्द्वयोर्विशिष्टार्थानुभावकत्वेकेवलप्रकृतिपदेप्रत्ययपदेवोभयवाचकत्वापत्तिरेकैकस्यैकैकार्थानुभावकत्वेपूर्वोक्तपक्षत्रयस्यप्रथ
मपक्षएवस्वीक्रियतेकिंचवेदांतमहावाक्यस्थपदानामखंडार्थबोधंप्रत्येवविशेषतोहेतुत्वस्यवाच्यतयाकथंसर्वपदानामन्वितबोधकत्वं॥ तस्मान्नान्वितेपदानां
शक्तिःकिंत्वनन्वितेघटत्वादौतदनुभवात्तदजन्यादन्वितानुभवइतिप्रथमपक्षएवयुक्तइतिपार्थसारथिमिश्रादयस्तदसत् अन्वितशक्तिवादस्याशयानवबोधा
त् अभिहितान्वयमतेऽन्विताभिधानमतेचाकृत्यधिकरणन्यायेनजातावेवानुभावकत्वरूपापदानांशक्तिरित्युच्यतेतस्यघटत्वादिकमेवघटादिपदानुभाव्यमि
तिपक्षेयथाश्रुतएवार्थःअन्यान्वितघटत्वादिकंतदर्थइत्युक्तपक्षेतुतादृशशक्तेर्यदीयतयाग्रहःशाब्दधीप्रयोजकःसोऽर्थोवाच्यतयाव्यवह्रियतेसाचजातिरेवेतितत्रै
ववाचकत्वंघटादिपदेव्यवह्रियतेनतुघटत्वाद्यन्वितेअन्यान्वितघटत्वादौवाअतएवननानार्थत्वापत्तिर्यत्रहिनानाधर्माणांप्रत्येकनिरूपितत्वेनपदेशक्तिग्रहास्तन्ना
धर्मशाब्दधीषुकारणानितत्रैवपदस्यनानार्थत्वंप्रकृतेतुघटत्वशक्तित्वेनघटपदेशक्तेर्ज्ञानंकारणंनत्वन्यधर्मशक्तित्वेनापीतिनघटपदस्यनानार्थत्वंतस्मादन्या
न्वितघटत्वंघटपदस्यशक्यमन्यान्वितकर्मत्वममादिपदस्येत्यादिविवरणाद्युक्तेरयमर्थःशाब्दत्वावच्छेदकविशेष्यता निरूपितसंसर्गतानिरूपितघटत्वप्रकारताशालि
त्वंघटपदधीकार्यतावच्छेदकंघटत्वीयकर्मतांशेऽनुमित्यादिरूपेघटकरणत्वाद्यंशेशाब्दज्ञानेघटपदंविनाप्युत्पत्तेर्व्यभिचारःस्यादतःशाब्दत्वावच्छेदकेतितादृशप्र
कारताविशेषणांकर्मतायांघटत्वंशाब्दयामीतिप्रत्ययात्तस्यास्तत्त्वस्वीकारात्।उक्तप्रकारताशालिशाब्दत्वेनकार्यत्वस्वीकारेपिसएवदोषःकेवलविशेष्यतात्वेन
केवलप्रकारतात्वेनवाशाब्दत्वावच्छेदकत्वाभावात्शाब्दत्वावच्छेदकत्वंविशिष्टप्रकारताविशेषणंतथाचविशिष्टप्रकारतात्वावच्छिन्नशाब्दत्वावच्छेदकतालाभः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नोक्तरीत्यालक्षणात्वस्यानिरूपणात्॥ स्वार्थधीद्वारा वोधकत्वंतु तीरादौगंगादिपदस्येव घटत्वीयकर्मत्वादिसंसर्गे घटमित्यादिपदस्याप्यस्त्येव गंगादिपदेन हि प्र-
वाहस्योपस्थितिः प्रथमतस्तयातीरोपस्थितिस्तयातच्छाब्दधीस्तथा घटमित्यादिपदेनोक्तकर्मत्वादेः शाब्दधीः प्रथमतस्तयोक्तकर्मत्वादेःसंसर्गस्यस्मृत्यभावेपि
शाब्दधीस्तस्मात्स्वार्थधीवोध्यनिष्ठस्यशाब्दार्थप्रतियोगिकसम्बन्धस्यलक्षणात्वंनिर्दोषंशाब्दार्थश्चत्रिविधः पदार्थः प्रत्ययांतपदार्थोवाक्यार्थश्च आद्योगंगायामि
त्यादौप्रवाहादिर्द्वितीयोघटमानयेत्यादौघटकर्मतादिस्तृतीयोऽर्थवादवाक्यार्थः लक्षकत्वंतादृशशब्दार्थनिष्ठलस्यशाब्दधीजनकधीविषयत्वंतच्चपदार्थेलक्ष्यस्मृ
तिद्वारा अन्ययोः साक्षादितिविवेकः व्यक्तीभविष्यतिचेदमग्रे द्वितीयपरिच्छेदतएव मूलेतदिदमुक्तंमूलेऽभिहितान्वयवादरूपेद्वितीयपक्षेचाज्ञातायाएव पदार्थ
निष्ठायालक्षणायावृत्तित्वांगीकारात् नसंसर्गस्यपदस्मारितत्वमितिपदार्थनिष्ठायाघटत्वीयकर्मतादिरूपप्रत्ययांतपदार्थसम्बन्धरूपायालक्षणायाः प्रत्ययांत-
पदार्थधीवोध्यक्रियाकारकसम्बन्धानुयोगिकसम्बन्धरूपायाः वृत्तित्वेतिशाब्दधीप्रयोजकोयोवोधकसम्बन्धस्तत्वेत्यर्थः क्रियाकारकसम्बन्धांशेशाब्दधि
योनिर्वाहेऽज्ञातेवलक्षणावश्यमाणरीत्योपयुज्यतइतिभावः अन्विताभिधानवादेतुतादृशसम्बन्धस्यपदशक्यत्वमेवनतुघटत्वीयकर्मतादिशाब्दधीमात्रज-
न्यशाब्दधीविषयत्वंकार्यत्वविधेयतानिरूपितक्रियानिष्ठोद्देश्यतावच्छेदकतायाघटकर्मत्वादिकारकनिष्ठातत्सम्बन्धेनशाब्दवोधंप्रतिघटः कर्मत्वमित्यादि-
निराकांक्षपदाजन्यायाघटकर्मताद्युपस्थितिस्तद्वाराघटमित्यादिपदज्ञानंघटकर्मत्वाद्यर्थाध्याहाररूपंमानांतरंवाहेतुर्घटमित्यादिपदाज्ञानकालेआनयेत्यादि
पदज्ञानकालेतादृशमानांतराद्युक्तसम्बन्धेनशाब्दवोधोत्पत्तेरेवंकार्यत्वविधेयतानिरूपितायाक्रियानिष्ठोद्देश्यतातत्सम्बन्धेनशाब्दवोधंप्रतिआनयनंकार्यत्वा-
मित्यादिनिराकांक्षपदाजन्याया आनयनकार्यत्वाद्युपस्थितिस्तत्सम्बन्धेनआनयेत्यादिपदज्ञानमानयनकार्यत्वाद्यर्थाध्याहाररूपंमानांतरंवाहेतुः कार्यत्वा-
न्वितेपदानांशक्तिरितिप्राभाकरवाक्यस्यास्मिन्नेवार्थेपर्यवसानंसाक्षात्परंपराकार्यत्वान्वितत्वस्यदुर्वचत्वेनतदाशयविषयकत्वस्यपदकार्यतानवच्छेदकत्वात्
तत्रचकार्यानुकूलाशक्तिस्तृणफूत्कारसम्बन्धादौनतुतृणादौफूत्कारासंवद्धतृणादितोपिवन्ह्यादिकार्योत्पत्त्यापत्तेरितियथास्वीक्रियतेतथोक्ताध्याहारपदज्ञा-
नयोःकारकपदक्रियापदयोर्वामिलनेतादृशशक्तिर्नतुपदज्ञानादावितिस्वीक्रियतेतेनक्रियापदज्ञानकारकाध्याहारयोःकारकपदक्रियापदज्ञानयोर्वामिलनंकृते
वशाब्दधीर्नतुकारकक्रियाध्याहारयोरेवमिलनेप्राभकरसिद्धांतेनथैवस्वीकारात्तथाचक्रियाकारकसम्बन्धशाब्दवोधानुकूलाशक्तिःपदघटितेस्वीक्रियतेइतिप
दंतत्रोक्तमुच्यतेतादृशशक्तेश्चघटत्वकर्मकदर्शनंकार्यमित्याकारकशाब्दधीर्यद्यपिनिरूपिकातथापितस्याघटत्वशाब्दधीत्वस्यापिसत्वाद्घटत्वशाब्दधीनिरूपि-
तशक्तित्वेनैवशक्तेर्घटादिपदेज्ञानेकारणंलाघवान्नतुक्रियाकारकसम्बन्धेशाब्दधीनिरूपितशक्तित्वेनेतिसम्बन्धांशेकुब्जशक्तिवाद इत्युच्यतेतदिदमुक्तमाचप
क्षेकुब्जशक्त्यंगीकारादितिअंगीकारान्नसंसर्गस्यपदवृत्तिस्मारितत्वमितियोजनाअज्ञातायाएवशक्तेः सम्बन्धांशेऽनुभावकत्वेननसम्बन्धस्मारकत्वमित्यर्थः सम्ब
न्धांशेऽनुभवंप्रतिपदस्यकारणत्वेनतत्रतदनुकूलाशक्तिरस्त्येवपरंतुयथाघटत्वादिजात्यंशेज्ञातासतीतत्स्मृतिद्वाराक्रियाकारकसम्बन्धशाब्दवोधंजनयतितथा

CC-0. In Public Domain. Digitization by eGangotri

२ अ॰ सि॰ त्वानांस्वीकारेपि घटादिपदज्ञानत्वेन तदभावाद्घटादिपदे घटत्वादिशक्त्यभावे तादृशशक्तिज्ञानहेतुत्वासंभवः तत्पदज्ञानत्वावच्छिन्नाया हेतुताया एव मीमांसकमतेऽश
टी॰ त॰ क्तिरूपत्वादिति वाच्यं पटपदोत्तरामपदज्ञानत्वेनैवामपदपूर्ववर्त्तिघटपदज्ञानत्वेनापि हेतुताया विनिगमकाभावेनास्वीकारस्य पूर्वमुक्तत्वात्॥ घटत्वप्रकारतानि
७ रूपितकर्मताविशेष्यताकशाब्दत्वेनेव कर्मताविशेष्यतानिरूपितघटत्वप्रकारताकशाब्दत्वेनापि कार्यत्वस्य स्वीकाराद्घटत्वीयानुभावकतारूपशक्तेस्तादृशशक्ति
त्वेन घटपदज्ञानं हेतुरम् पदपूर्ववर्त्तित्वस्य कर्मताविशेष्यकत्वस्य वा तत्रानिवेशेपि घटत्वशक्तत्वस्य घटपदेऽक्षतत्वात् तथा च घटमित्यादिपदज्ञानस्य घटादिपदविशेष्य
कघटत्वादिशक्तज्ञानजन्यसंस्कारोद्बोधकस्य घटकघटादिपदज्ञानजनितघटत्वादिस्मृतिद्वारा घटत्वीयकर्मतादिशाब्दहेतुत्वं घटः कर्मत्वमित्यादिनिराकांक्षपदजन्यघ
टत्वादिस्मृतेर्घटमित्यादिपदघटकघटादिपदाजन्यत्वात्॥ तादृशस्मृतिद्वारा घटमित्यादिपदज्ञानस्य नानुभावकतेति घटादिपदस्य स्वघटकेति विशेषणं घटमित्या
दिपदघटकेति तदर्थः एवं च घटादिपदज्ञानत्वादिरूपेण घटत्वाद्यन्वितानुभावकत्वाभावेपि न क्षतिः घटत्वीयकर्मतासंसर्गो निरूपकत्वरूपो दर्शनादिक्रियानि
ष्ठ उक्तकर्मताशाब्दबोधेन लक्षणयानुभाव्यते ननु यथा गंगादिपदात्तीरादिशाब्दबोधस्थले तीरादौ गंगादिपदशक्यसम्बन्धरूपलक्षणाज्ञानं कारणं यथा वा तत्पद
शक्योपस्थित्यधीनतीराद्युपस्थितिरूपा लक्षणा प्राचीनमते स्वरूपसती कारणं तथा प्रकृते उक्तनिरूपकत्वरूपसंसर्गे घटमित्यादिपदस्य शक्यं यद्घटत्वीयकर्मत्वा
दिकं तत्प्रतियोगिकत्वादिरूपसम्बन्धज्ञानं तदुपस्थित्यधीना तदुपस्थितिर्वा कारणमपेक्ष्यते तदभावे तु तादृशसंसर्गशाब्दज्ञानासंभव इति चेन्न तत्रैव हि बोध्य
बोधकयोः सम्बन्धज्ञानं पूर्वमपेक्ष्यते यत्र बोध्यप्रमापूर्वं बोध्योपस्थितिरपेक्ष्यते यथा घटत्वाद्यन्वितस्य शाब्दप्रमापूर्वं घटादिपदे घटत्वादेरनुभावकत्वरूपश
क्तिज्ञानं विना घटत्वाद्युपस्थितिरूपकारणाभावेनोक्तप्रमाविरहाद् उक्तोपस्थितिहेतुतयोक्तशक्तिज्ञानमपेक्ष्यते यथा वा गंगादिपदतीरादयोः सम्बन्धज्ञानं वि
नागंगादिपदोपस्थापितप्रवाहादितीरादयोः सम्बन्धज्ञानं विना वा तीराद्युपस्थित्यभावेन तीराद्युपस्थितिहेतुकतीरादिशाब्दप्रमाविरहाद् उक्तोपस्थितिरपेक्ष्यते य
त्र तु बोध्यप्रमापूर्वं तदुपस्थितिर्नापेक्ष्यते तत्र तन्नापेक्ष्यते यथा रूपादिचाक्षुषादिप्रमापूर्वं रूपाद्युपस्थितेरनपेक्ष्यतया रूपादिचक्षुरादिसम्बन्धज्ञानं रूपाद्यु
पस्थितिहेतुतया नापेक्ष्यते किंतु रूपादौ चक्षुरादिसंयुक्तघटादिसमवेतत्वं स्वरूपसत्कारणमपेक्ष्यते तथा च वाक्यार्थीभूतस्य क्रियाकारकसंसर्गस्यापूर्वत्वा
त्तदुपस्थितेस्तत् शाब्दप्रमायामनपेक्ष्यतया तद्धेतुतयोक्तसंसर्गरूपे बोध्ये तद्बोधकस्य घटत्वीयकर्मत्वादिरूपार्थस्य सम्बन्धज्ञानं नापेक्ष्यते किंतूक्तार्थस्य द एम॰
र्शनादिक्रियानिष्ठसंसर्गसम्बन्धसत्तामात्रमन्यथा तादृशक्रियाकारकसंसर्गज्ञानस्य प्रमात्वानुपपत्तेः ननु तादृशसम्बन्धे घटादिपदस्य न लक्षणा तच्छ २१७
क्यघटत्वसम्बन्धत्वाद्यभावात् उक्तकर्मत्वादेस्तादृशशक्यत्वात्तद्बोध्यत्वाच्च अत एव न घटमित्यादिपदस्य सा लक्षणा यया तस्य तद्बोध्यनिष्ठस्य तत्पदबोध्यप्रति
योगिकसम्बन्धस्य तत्पदलक्षणात्वात् कर्मत्वादिनिरूपकत्वरूपस्य संसर्गस्य चोक्तपदाबोध्यत्वात् गंगायां घोषोस्तीत्यादौ हि लक्षणया गंगादिपदबोध्ये तीरादौ स्थित
स्य गंगादिपदबोध्यप्रवाहादिप्रतियोगिकसंसर्गस्य लक्षणात्वं दृष्टमतो घटत्वीयकर्मत्वादिसंसर्गस्य लक्ष्यत्वानुपपत्तिरिति चेन्न लाक्षणिकपदस्य लक्ष्यार्थाबोधकत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वावांतरवाक्यार्थधीपूर्विकामहावाक्यार्थधीः घटमानयेत्यादौ त्वनियमइतितन्नवाक्यार्थकर्मकेकुलकादौ च सकारकैकक्रियाबोधेपदैर्जाते ततकर्मकक्रियांतरबो
धस्यपदैरेवजननं पश्यमृगोधावतीत्यादौयुक्तंघटमानयेत्यादावनियमस्तुनयुक्तः लाघवेनमहावाक्यार्थबोधस्यैवैकस्यपदजन्यत्वस्वीकारात् भट्टमतेमहावा
क्यार्थबोधस्यनियमेनविशिष्टवैशिष्ट्यावगाहित्वमगुरुमतेविशेष्येविशेषणांतत्रापिविशेषणांतरमितिबोधस्यैवसर्वत्रसंभवात् अशाब्दस्यविशेषणताव
च्छेदकप्रकारकज्ञानस्यसत्वेतुविशिष्टवैशिष्ट्यशाब्दबोधस्यापिक्वचित्संभवात् तस्मादन्विताभिधानमतेऽवांतरवाक्यार्थबोधाभावेननस्मृतिसमोबोधस्तत्वम
सीतिवाक्यात् किंतुअभिहितान्वयमतेइत्यभिहितघटनेत्याद्युक्तिर्युक्तैव अन्विताभिधानमतेपिक्रियाकारकसम्बन्धबोधंप्रतिपदस्योक्तरीत्याकारणत्वेनश
क्तत्वात्तदृशक्तेरुक्तसम्बन्धशाब्दधीप्रयोजकत्वादुक्तसम्बन्धशक्तिरूपपदवृत्तिप्रयुक्तशाब्दधीविषयत्वरूपंपदवृत्तिज्ञाप्यत्वमस्त्येवतथापिनपदवृत्तिप्र
युक्तस्मृतिविषयत्वरूपंपदवृत्तिस्मारितत्वंननुतादृशशक्तेस्तादृशसम्बन्धीयसम्बन्धरूपायाःपदेपूर्वंग्रहणेसतिपदरूपैकसम्बन्धिज्ञानादुक्तसम्बन्धरूपा
परसम्बन्धिस्मृतिरपिकदाचिज्जायतएवेतितादृशस्मारितत्वमुक्तसम्बन्धेप्यस्त्येवेतिस्मारितपददानेप्युक्तसम्बन्धप्रमापकवाक्येऽखंडार्थलक्षणातिव्याप्ति
स्तदवस्थेतिचेन्नस्मारितांतेनस्वजन्यस्मृतिद्वारायद्विषयकशाब्दबोधेपदवृत्तिःप्रयोजिकातत्त्वस्यविवक्षितत्वात् यत्पदेनयोऽर्थोग्राह्यस्तद्विषयकास्मृतिः
स्मृतिपदेनग्राह्यातथाचोक्तसम्बन्धशाब्दबोधेपदवृत्तेःप्रयोजकत्वंनोक्तद्वारातादृशस्मृतिंविनापितस्यशाब्दबोधोत्पत्तेः जातिशक्तिज्ञानस्यजातिस्मृतिद्वा
राव्यक्तिस्मृतिप्रयोजकत्वात्तद्वाराचव्यक्तिशाब्दधीप्रयोजकत्वात् जातिशक्तेरप्युक्तप्रयोजकत्वमस्त्येवतस्मादुक्तसम्बन्धस्योक्तरीत्यापदवृत्तिस्मारितत्वेपि
नक्षतिः ननुवह्न्यादिनिष्ठशक्तेर्दाहादिकार्यइवशाब्दबोधरूपेपदकार्येपदनिष्ठशक्तेःप्रयोजकत्वंयुक्तंउक्तसम्बन्धेलक्षणायास्तु ज्ञातायानतत्संभवः नच
लक्ष्यस्योक्तसम्बन्धस्यशाब्दबोधेलक्षणायाघटत्वादीयकर्मतादिरूपशब्दार्थसम्बन्धरूपायाःप्रमाणीयसम्बन्धविधयाहेतुत्वंशब्दार्थस्यैवक्रियाकारकस
म्बन्धविषयकशाब्दधीकरणत्वादिंद्रियविषयसम्बन्धस्यप्रत्यक्षहेतुत्वदर्शनेनप्रमाणप्रमेयसम्बन्धस्यसामान्यतोहेतुत्वसंभवादिति वाच्यं धूमभ्रम
जन्यप्रमानुमितावयोगोलकंवह्निमदित्याकारिकायांवन्ह्यादौधूमादेर्व्यापकत्वरूपसम्बन्धसत्वेपिद्रव्यत्वादिलिंगकपर्वतोवह्निमानित्याद्यनुमितौद्रव्यत्वा
दिव्यापकत्वाद्यभावादितिचेन्नसाध्यवद्विशेष्यकंयत्त्वज्ञानंतद्विशेष्यवृत्तित्वोपलक्षितनिष्ठसाध्यतावच्छेदकावच्छिन्नविषयत्वस्यलिंगसम्बन्धस्यलिंगिनि
सर्वत्रसंभवादतीतादिसाध्येऽनुमित्यव्यवहितपूर्वमुक्तविशेष्यवृत्तित्वस्यतदुपलक्षितनिष्ठसाध्यतावच्छेदकस्यवाऽभावेपितदवच्छिन्नविषयत्वस्यसत्त्वात्
प्राभाकरादिमतेऽनुमितिपरामर्शयोरेकवन्ह्यादिविषयकत्वनियमास्वीकारादनुमितिविधेयेतादृशविषयत्वस्यानुमितिजनकपरामर्शीयसत्त्वानियम
मेपिअनुमातृपुरुषीयसंशयादिपुरुषांतरीयस्मरणादिरूपज्ञानांतरीयस्यविषयत्वस्यनियमेनसत्त्वात्॥ भ्रमानुमितौतूक्तसम्बन्धासत्वेपिनक्षति
स्तस्यामनुमितित्वजातेरसत्त्वात्मन्मतेमनोवृत्तिरूपप्रमायामेवतत्स्वीकारेणाविद्यावृत्तिरूपभ्रमेतदस्वीकारात्तत्रदोषादेरेवकारणत्वेनतत्सम्बन्धस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्तसम्बन्धांशेज्ञातासतीतत्स्मृतिद्वारातत्शाब्दबोधंनजनयतितस्यवाक्यार्थत्वेनापूर्वत्वात्तदनुभवस्मृतीविनापितत्शाब्दबोधोत्पत्तेः प्रकृतिप्रत्ययाभ्यांबुध्यमानोयोऽर्थ
स्तस्यद्वयोःसम्बन्धरूपत्वेतदंशेप्यज्ञातैवशक्तिस्तथायथाघटेनानयेत्यादौघटत्वकरणत्वयोरानयनकार्यत्वयोर्वासम्बन्धांशेतस्यापिवाक्यार्थत्वेनस्मरणानपेक्षणा
त् तस्मात्तत्वेतुतदंशेपिशक्तिर्ज्ञानैवतदीयशाब्दानुभवप्रयोजिकायथातत्त्वमस्यादिमहावाक्येतत्त्वपदाभ्यांबुध्यमानंशुद्धचैतन्यंज्ञातयैवशक्त्याबुध्यतेविशिष्टश
क्तस्यपदस्यकेवलव्यक्तिरूपैकदेशेपिशक्तिसत्वात्। अतएवतत्रप्रत्येकंपदाभ्यांस्मृतिद्वयमुत्पाद्यतद्वाराशाब्दधीर्जन्यतेपदतदर्थयोःशक्तिरूपसम्बन्धस्यगृहीतत्वेन।
पदरूपसम्बन्धिग्रहणेसत्यर्थस्मृतिसंभवात् नन्वेवमभिहितान्वयवादेपितृतीयपक्षेतथासंभवादभिहितान्वयवादेपदाभ्यांस्मृतिसमबुद्धिद्वयमन्विताभिधानवादे
चताभ्यांस्मृतिद्वयमितिविशेषःकुतःसंक्षेपशारीरकेउक्तइतिचेदुच्यतेऽभिहितान्वयवादेप्रत्येकंविभक्तंतपदाभ्यांस्मृतिद्वयद्वाराशाब्दधीद्वयंजन्यतेमहावाक्यार्थधीस्तु
तेनैवधीद्वयेननतुपदज्ञानेन अतएवपदज्ञानासत्त्वेसामानांतरजन्याभ्यामाकांक्षायोग्यतादिसहिताभ्यामर्थज्ञानाभ्यांजन्यतेअतएवपश्यतःश्वेतिमारूपंहेषाशब्दं
चशृण्वतःखुरविक्षेपशब्दंचश्वेतोऽश्वोधावतीतिधीः दृष्टावाक्यविनिर्मुक्तानपदार्थैर्विनाक्वचिदितिवार्त्तिकवाक्येपदज्ञानसामान्याभावेपिशाब्दधीस्तदर्थज्ञाना
भावेतुनक्वापीत्युक्तंतथाचाभिहितान्वयवादेपदज्ञानस्थलेमहावाक्यार्थधीकरणस्यशाब्दबोधस्यावश्यकतयास्मृतिसमोपिसकल्प्यतेपद्यपिस्मृतिसमत्वंज्ञात
विषयकत्वंप्रमाणाजन्यज्ञानंचाज्ञातविषयकमेवअनुवादवाक्यादिस्थलेवाक्यार्थज्ञानंस्मृतिरेवप्रमाणादप्रमानुत्पत्तेरतएवघटत्वीयकर्मतादिप्रमायांवाक्येन।
जननीयायांतद्विषयकाज्ञानंसहकारिकल्प्यतेतथाप्यगत्यामहावाक्यादिस्थलेपदजन्योबोधःस्मृतिसमःकल्प्यतेतथाचस्मृतिप्रमाविलक्षणमपिज्ञानंप्रमाणज
न्यंस्वीक्रियतेअन्यथानुपपत्तेः अतएवघटोस्तीत्यादिवाक्यजन्येऽस्तित्वंघटत्वीयमितिशाब्दबोधेघटत्वनिर्विकल्पकशाब्दबोधःस्मृतिसमएवकरणंनिर्धर्मि।
तावच्छेदकशाब्दबोधासंभवेनैकत्वप्रकारकघटत्वविशेष्यकशाब्दबोधस्यतत्रासंभवात् नहिशाब्दबोधीयविशेष्यताकेनाप्यनवच्छिन्नास्वीक्रियते। अन्विता
भिधानवादिनस्तुनेदंसम्मतंक्रियाकारकसम्बन्धादिरूपस्यमहावाक्यार्थस्यज्ञानंहिपदजन्यंवदंतितदुक्तंयद्यदाकांक्षितंयोग्यंसन्निधानंप्रपद्यते तेनतेना।
न्वितःस्वार्थःपदैरेवावगम्यतेइतिसन्निधानंपदजन्यस्मृतिविषयत्वंतथाचाकांक्षायोग्यतासत्तिसहकृतपदैरेववाक्यार्थस्यक्रियाकारकसंबंधादिरूपस्यशा
ब्दबोधोत्पत्तेर्नावांतरवाक्यार्थस्यप्रकृतिप्रत्ययार्थसम्बन्धादिरूपस्यशाब्दधीविषयत्वेमानमस्तिविशेष्येविशेषणंतत्रापिविशेषणांतरमितिरीत्यामहावाक्या
र्थधीसंभवात् कुतःस्मृतिसमबोधस्वीकारोऽन्यथानुपपत्त्यभावात् यदिहिघटत्वीयकर्मतादिमात्रस्यशाब्दधीःस्वीक्रियतेतदाशाब्दबोधानांकार्यत्वविषयकत्वनिय
मस्यप्राथमिकव्युत्पत्तिकालेक्लृप्तस्यभंगःस्यादथापिक्रियाकारकसम्बन्धादिबोधात्पूर्वंप्रकृतिप्रत्ययार्थसम्बन्धादिविषयकमवांतरवाक्यार्थज्ञानंमन्यसेतादृश
ज्ञानस्यानुभविकत्वाद्धिशिष्टवैशिष्ट्यबोधात्मकस्यक्रियाकारकसम्बन्धबोधस्योक्तज्ञानंविनापलापापत्तेः तर्हिप्रत्येकपदार्थस्मृतिजन्यामवांतरस्मृतिंमन्यस्वप्र
त्येकपदार्थसम्बन्धितयाप्रकृत्यर्थविशिष्टप्रत्ययार्थस्यगृहीतत्वेनतत्स्मृत्यातत्स्मृतिसंभवान्नैतावतातस्यशाब्दबोधोपिमंतुशक्यःयत्तुवाक्यार्थकर्मकेकुलकादौ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुब्जशक्त्यंगीकारादिति यद्यपिसंसर्गानुभवंप्रत्यपिपदस्यजनकत्वेनवाक्यार्थीभूतसंसर्गेपिशक्तिरस्त्येवतज्जनकस्यैवतच्छक्तत्वात्॥ तथापितच्छ-क्तत्वेनप्रकृत्यादिपदस्यज्ञानंनकारणंकिंतुघटत्वादिशक्तत्वेनेत्यन्विताभिधानमतस्यनिष्कर्षः।उक्तंहिशब्दमण्यादौ ननुपदानामन्वयधीजनकत्वा-त्तत्रशक्तिरस्त्येव अशक्तस्याजनकत्वादितिचेत् सत्यंकिंत्वन्वयबोधेस्वरूपसतीसाव्याप्रियतेनतुज्ञाताघटज्ञानशक्तत्वेनज्ञानादेवघटान्वयबोधो-पपत्तेः यथाजातिशक्तस्यपदस्यतवव्यक्तिज्ञानेशक्तिःस्वरूपसतुपयुज्यतेनतुज्ञातेति।तवेतिप्राभाकरंप्रतिमणिकारस्यान्विताभिधानमतपरिच्छि दि-नउक्तिः व्याप्रियतेकारणतावच्छेदकतयाप्रयोजकत्वेननिश्चीयतेकार्यान्वितशक्तौहिपूर्वखंडितायामन्विताभिधानंप्राभाकरेणपूर्वग्रंथेऽवलंवितंतत्त्वोक्तमतविवेचनेनसंनिरस्तःअन्विताभिधानंचनत्वर्थापत्तिरस्तिपतत्पदार्थव्यतिरिक्तमर्थमवगच्छामोनचशक्तिमंतरेणतदवकल्प्यतेइत्यन्येनशा-वरभाष्येतद्भूताधिकरणेआशंक्यतत्रार्थस्यतन्निमित्तत्वात्भवेदर्थापत्तिर्यद्यसत्यामपिशक्तौनान्यंनिमित्तमवकल्पेतअवगम्यतेतुनिमित्तंकिंपदार्थाः प-दानिहिस्वस्वमर्थमभिधायनिवृत्तव्यापाराणि।अथेदानींपदार्थाअवगताःसंतोवाक्यार्थमवगमयंतीत्यादिनातस्मात्पदार्थप्रत्ययतएववाक्यार्थोनास्यपदस्य

आद्यपक्षेकुब्जशक्त्यंगीकारात्द्वितीयपक्षेचाज्ञातायाएवपदार्थनिष्ठायालक्षणायावृत्तित्वाङ्गीकारान्नसंसर्गस्यपदस्मारितत्वं किंत्वनुभाव्य-
त्वमित्यतिव्याप्तिपरिहारः॥

मुदायेनसम्बन्धइत्यंतेनचदूषितं। तथाचोक्तनिः कृष्टमतेनलक्षणाकरणान्नदोषइतिभावः अज्ञातायाइति शक्यसम्बन्धरूपलक्षणायाः संसर्गेसत्वे-पिज्ञानंनापेक्षितमितिभावः।किंत्वनुभाव्यत्वमिति।आकांक्षादिज्ञानस्यैवसंसर्गानुभावकत्वमाकांक्षादिघटकपदवृत्तिस्मारितोवस्तुगत्यायोर्थस्तात्पर्य-विषयस्तत्संसर्गानुभवत्वस्यैवतत्कार्यतावच्छेदकत्वान्नघटमानयेत्यादौघटादिलक्षणायुक्तस्यापिकपालादेरनुभवप्रसंगइतिभावः यत्तुघटमानयेत्या-दावुक्तलक्षणातिव्याप्तिस्तदवस्थास्वघटकपदवृत्तिस्मारितान्यागोचरप्रमाजनकत्वमित्यस्योक्तस्मारितान्यप्रमापकान्यत्वंउक्तस्मारितान्याविषयकप्र-माजनकत्वंवार्थः आद्येस्वंगामानयेत्यादिवाक्यंतद्घटकपदवृत्तिस्मारितान्योयोगवादिसंसर्गस्तदप्रमापकत्वस्यघटमानयेत्यादौसत्त्वात् नांत्यःसत्या-दिवाक्यस्यसंसर्गबोधकत्वेऽनुवादकत्वापातादिति तन्नशोभतेघटमानयेत्यादेरपिस्वपदस्मारितान्यप्रमापकतयातदन्यत्वाभावात् स्वपदेनयाव-द्वृत्तुंशक्यतेतावत्सामान्यभेदस्यैवनञा बोधनादन्यथास्वसमानाधिकरणात्यंताभावाप्रतियोगीत्यादौविभागादेरपिबोध्यत्वापत्तेरुक्तात्यंताभावप्र-तियोगिसंयोगान्यत्वस्यतत्रसत्त्वात् द्वितीयपक्षस्यैवाचार्योक्तलक्षणावाक्यार्थतायाःस्फुटत्वेनविकल्पानवकाशाच्चअनुवादकत्वंतुनिराकरिष्यतएवतस्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातीतिकसाध्येसत्वात् ज्ञेयमात्रेज्ञानकरणसम्बन्धस्यहेतुत्वेपिक्षतिविरहात्। अतएवतर्कचरणेवाक्याधिकरणेलक्षणायाअज्ञायमानतयैववाक्यार्थी
भूतसंसर्गशाब्दबोधेहेतुत्वमुक्तं अथोक्तपरंपरासम्बन्धसाधारणस्यप्रमाणप्रमेयसम्बन्धत्वस्यैकस्याभावेनेंद्रियविषयसम्बन्धदृष्टांतेननानुमानानुमे
यादिसम्बन्धस्यहेतुत्वंयुक्तमिति चेन्न प्रत्यक्षस्थल इवानुमितिशाब्दबोधादिस्थलेपिविशेषरूपेणवान्वयव्यतिरेकाभ्यांतस्यहेतुत्वसंभवान्नहि म
न्मतेतद्व्यतिरेकेऽनुमित्यादिकमुत्पद्यतेतार्किकादिमतेगुणविशेषाभावेप्रमानुत्पादवत् वस्तुतस्तुतात्पर्यज्ञानइवलक्षणाज्ञानेपिघटमित्यादिपदार्थ
त्वेनैवपदार्थभानसंभवात् घटकर्मताप्रतियोगिकानयननिष्ठसम्बन्धविशेषत्वेनसम्बन्धस्याभावेपिक्षतिविरहात् लक्षणायावाक्यार्थीभूतसम्बन्ध
ज्ञानमेवहेतुरज्ञातायाएवलक्षणायास्तच्छब्दधीप्रयोजकत्वमितिग्रंथेऽज्ञातपदमुक्तविशेषरूपेणाज्ञातार्थकमेवंचशाब्दबोधीयविषयतासामान्य
स्यवृत्तिज्ञानविषयताप्रयोज्यत्वनियमोनव्याहतः संभवतिचोक्तनियमोलक्ष्यशाब्दधीसामान्यस्यलक्षणाधीजन्यत्वस्वीकारेऽभिहितान्वयमतेआ
द्यपक्षेजातेः शाब्दबोधस्यशक्तिज्ञानेनेवव्यक्त्यादिशाब्दबोधस्यलक्षणाज्ञानेनैवजननादन्यथाजातिशाब्दबोधेपिशक्तिज्ञानंप्रयोजकंनस्याद्वाक्या
र्थइवजातावपिव्युत्पत्तिग्रहस्यानपेक्षासंभवात् अज्ञातायालक्षणायाइवशक्तेरपिप्रयोजकत्वसंभवात् पदार्थेव्युत्पत्तिग्रहस्यान्वयव्यतिरेका
भ्यांहेतुत्ववाक्यार्थेतुनतौस्तइतितुवासनामात्रं अतएवान्विताभिधानादिनआहुः वाक्येनैवहिवाक्यार्थः साक्षादेवाभिधीयतेउपलक्षणतश्चास्यस
म्बन्धग्रहसंभवः। वाक्यंगोपदयुक्तंयत्तत्सास्नादिमदन्वितंवाक्यार्थंवदतीत्येवंव्युत्पत्तिः सुकरैवहीतिसाक्षाद्वाक्यार्थस्मृतिमवांतरवाक्यार्थशाब्दबो
धंचाद्वारीकृत्यउपलक्षणतः सास्नादिमत्वादिरूपोपलक्षणमंतर्भाव्यगोकर्मत्वान्वितानयनादिरूपस्यवाक्यार्थस्यशाब्दबोधात्पूर्वमज्ञानात् सास्ना
दिमत्कर्मत्वान्वितानयनस्यवाचकंगामानयेतिवाक्यंगोकर्मकस्यानयतिपदार्थस्यवावाचकमुक्तवाक्यमित्येवंरीत्याशक्तिरूपव्युत्पत्तिग्रहेसास्नादिमत्त्व
मानयतिपदार्थत्वादिकंवोपलक्षणतयाभासतेवाच्यकोटावप्रवेशात् गोत्वादेरेवशाब्दबोधेभानेनतत्प्रवेशात् तस्माद्वाक्यार्थेपिव्युत्पत्तिग्रहस्यान्वयव्य
तिरेकौतांत्रिकसंमतौ किंचतार्किकादीनामपितौसंमतौतथाहि सद्व्युत्पन्नपुरुषीयशाब्दबोधेसद्व्युत्पत्तिधीः कारणंसाचघटमितिपदधीर्घटवृत्तिकर्मताशा
ब्दधीकारणमितिधीरूपाविपरीतव्युत्पन्नपुरुषीयशाब्दबोधेविपरीतव्युत्पत्तिधीः कारणंसाचघटः कर्मत्वमितिवाक्यधीस्तादृशशाब्दधीकारणमितिधीरू
पातथाचानुभावकत्वस्यैवमीमांसकमतेशब्दशक्तित्वाद्घटमितिपदंघटवृत्तिकर्मतावाचकमितिग्रहेघटवृत्तिकर्मताआनयतिपदार्थीयसंसर्गविशेषप्र
तियोगिनीतिग्रहेचसतितादृशोक्तकर्मतावाचकंघटमितिपदमित्याकारंलक्षणाज्ञानंसंभवतीतितद्धेतुत्वंनिर्दोषं। अभिहितान्वयमतेप्रथमपक्षेघटपदा
म्पदयोः प्रत्येकरूपेणवानुभावकत्वेनघटमित्यस्याननुभावकत्वेपिनयोरेकवाक्यताज्ञानस्यन्यायरत्नादावनुभावकत्वस्वीकारेणघटमित्यस्यतत्रएकवि
शिष्टार्थबोधकत्वरूपैकवाक्यत्वांशेविशेष्यविधयानुभावकत्वसत्वादितिदिक्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अखंडशब्दार्थशक्यतावच्छेदकरूपस्यप्रवृत्तिनिमित्तस्यभेदेपिलक्षणायाखंडार्थत्वमित्याह नप्रवृत्तीति। ननुगंगादिपदलक्ष्यस्यागंगात्वादिकमिवानंतादि
पदलक्ष्यस्यब्रह्मणोनंतत्वादिकंस्यात्तत्राह यथाचेति वक्ष्यतइति। जहल्लक्षणास्थलएवयेनपदेनयल्लक्ष्यंतत्तच्छक्यस्वरूपाद्भिन्नत्वनान्यलक्षणास्थलेअतएवच्छ
त्रिपदलक्षितानामेकसार्थगतानांकस्यचिच्छत्रित्वमित्यादिवक्ष्यते अखंडलक्षणास्थितिः१ अखंडार्थनिष्ठंस्वघटकपदवृत्तिस्मारितान्याविषयकप्रमाजनकंलक्षणावा।
क्यत्वात् इतरव्यावृत्तिधीपरत्वात्यावंतिलक्षणावाक्यानितावन्मात्रमुख्यविशेष्यकधीमुख्यविशेष्यत्वाद्वा आद्येहेतौयतयन्निष्ठस्येतरभेदस्यज्ञापनपरंतत्तत्वरूपान्यावि
षयकप्रमाहेतुरितिसामान्यमुख्याव्याप्तेःपर्यवसानंस्मारितातस्यसाध्येनिवेशप्रयोजनाभावान्नमतेइतरव्यावृत्तौतात्पर्याभावस्यवक्ष्यमाणत्वेपिपरमतेतास्यर्थावश्यक
त्वान्नहेत्वसिद्धिः।धीविशेषमुख्यविशेष्यत्वंतुस्वमतसाधारणोहेतुःद्वितीयसाध्येहेतुमाह तन्मात्रेति। ब्रह्मप्रातिपदिकार्थबुभुत्सानिवर्तकधीमात्रपरत्वादित्यर्थःयोय
न्मात्रार्थबुभुत्सानिवर्तकधीमात्रपरःसतन्मात्रार्थमात्रप्रमापकइतिपर्यवसानंबोध्यं अकार्येत्यादि कार्यकारणाभावापन्नद्रव्यद्वयबोधकंयद्यत्तद्भिन्नत्वे

ननुप्रवृत्तिनिमित्तभेदेऽपर्य्यायत्वंसचानंतादिपदेषुनसंभवतिशुद्धब्रह्ममात्रनिष्ठत्वादतोवेदांतेषुलक्षणाव्याप्तिरितिचेत् नप्रवृत्तिनिमित्तभेदंस्वीकृ
त्यैवलक्षणयाऽनंतादिपदानांशुद्धब्रह्मपरत्वस्यवक्ष्यमाणत्वात् नचशुद्धेसंबंधाभावान्नलक्षणापीतिवाच्यं अतात्विकसंबंधेनैवलक्षणोपपत्तेःभ्रमप्र
तीतरजतत्वेनशुक्तौरजतपदलक्षणावत्शुद्धस्यैवसर्वकल्पनास्पदत्वेनशुद्धेनकल्पितसंबंधानुपपत्तिः यथाचानंतादिपदानांलाक्षणिकत्वेपिब्रह्मणिनं
तत्वादिप्रसंगस्तथावक्ष्यतेइत्यद्वैतसिद्धावखंडलक्षणोपपत्तिः १एवंलक्षणसंभवेप्रमाणसंभवोपितथाहिसत्यादिवाक्यमखंडार्थनिष्ठंब्रह्मप्रातिपदि
कार्थमात्रनिष्ठंवालक्षणवाक्यत्वात् तन्मात्रप्रश्नोत्तरत्वाद्वाप्रकृष्टप्रकाशश्चंद्रइत्यादिवाक्यवदितिपदार्थविषयाखंडार्थतानुमानंतत्त्वमस्यादिवाक्यमखं
डार्थनिष्ठंआत्मस्वरूपमात्रनिष्ठंवाअकार्यकारणद्रव्यमात्रनिष्ठत्वेसतिसमानाधिकरणत्वात्॥ १सतिद्व्यान्यमतियोगिकसंसर्गविषयकंयत्तद्भिन्नत्वेचसति

विरुद्धविभक्तिकनामद्वयाघटितनानापदत्वादित्यर्थःमृद्घटइत्यादेर्वारणायाद्यंसत्यंतंनीलोघटइत्यादेर्वारणायद्वितीयंघटस्यकपालमित्यादेःषष्ठ्यर्थसम्बन्धेनघ
टप्रकारकधीजनकत्वमतेद्व्यान्यसंसर्गाविषयकत्वात्तद्वारणायाघटितांतंघटादावेकपदमात्रेचव्यभिचाराच्चरमदलंसंसर्गविषयकपदेनमुख्यविशेष्यांशेसंसर्ग
विषयकोक्तेर्नाद्यदलंव्यर्थंमृद्घटइत्यादौमृत्वादिविशिष्टस्यैवमुख्यविशेष्यत्वंतत्रचमृत्वादेर्द्व्यान्यस्यसंसर्गोनविषयःकिंतुशुद्धेमृदादौअतएवोक्तसंसर्गांशे।
विशेष्यतान वच्छिन्नायन्नामस्वार्थद्व्यानुपादेयस्यद्रव्यस्यबोधकेनस्वसमानविभक्तिकेननाम्नासमभिव्याहृतंस्वविरुद्धविभक्तिकपदासमभिव्याहृततत्तन्ना
मघटितवाक्यंयद्यद्भवतितत्तन्नामार्थान्याविषयकप्रमाजनकमितितुपर्यवसानंबोध्यंनीलोघटइत्यादौनीलादिनाम्नोपिस्वार्थानुपादेयद्रव्यबोधके
नघटादिनाम्नासमभिव्याहारात्तद्घटितवाक्येतदर्थान्याविषयकप्रमाजनकत्वाभावेनव्यभिचारात्स्वार्थद्रव्येत्युक्तं॥ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२
अ·सि· द्वितीयं अपर्यायशब्दानामेकप्रातिपदिकार्थप्रमापकत्वमित्येवंरूपं। ननु औपगवः श्यामत्वादिमान् वनमेकदेशस्थवृक्षा इत्यादावव्याप्तिः श्यामत्वादिमत्त्वापत्यादि
टी·ल· मत्त्वसौपगवादेस्तद्विषयत्वेन श्यामादिप्रातिपदिकार्थस्य तद्विषयत्वेऽप्युपादिप्रातिपदिकार्थानां तद्विषयत्वेनैकमात्रप्रातिपदिकार्थत्वाभावात्॥ मात्रार्थानिवेशे च नाना
१० नामार्थसंसर्गविषयकत्वेऽपि लक्षणोपपत्तिस्तत्राह तत्रापि ऐकत्वमिति वृत्तिविषयत्वं शक्तिलक्षणान्यतद्वितांतसमासानामन्यतमज्ञानाधीनज्ञानविषयत्वं तथा च या
दृशधर्मविशिष्टस्य शक्त्यादिज्ञानाधीनधीविषयत्वं तादृशयत्किंचिद्धर्मविशिष्टभिन्नाविषयप्रमाजनकत्वं पर्यवसितं नाव्याप्तिरिति औपगवादिसमुदायस्य शक्ति
लक्षणयोरभावेऽपि तद्धितांतत्वेन तज्ज्ञानाधीनधीविषयत्वस्य गोसमीपवृत्त्यपत्यत्वविशिष्टे सत्त्वात्तन्मात्रप्रमापकत्वात् श्यामादिवाक्ये लक्षणान्वयः वनसेनापदयो
स्तु शक्तिज्ञानाधीनस्मृतिविषयत्वस्य वनत्वादिविशिष्टेषु नानावृक्षेष्वपि सत्त्वात्तदन्वयः यद्यप्येकदेशस्थनानावृक्षत्वमेव वनत्वं तथा चैकदेशस्थेत्यादेर्यथाश्रुतार्था
त्वं पर्यायशब्दद्वयत्वान्न लक्ष्यता तथापि तस्यासाधारणधर्मान्तरपरत्वाल्लक्ष्यताबोध्या वस्तुतस्तु श्याम इत्यादेरौपगवादेः स्वरूपमात्रप्रश्नोत्तरत्वेन तन्मात्रविषयक
त्वसंभवात् तद्धितादिपदस्य तत्स्वरूपमात्रलाक्षणिकत्वान्नयौगिकार्थविषयकत्वमेकदेशेत्यादेरपि वनादिपदलक्षितनानावृक्षस्वरूपमात्रविषयकत्वं न च व।

एवं द्वितीयमपि लक्षणं सम्यगेव तत्रापि ऐकत्वं प्रातिपदिकार्थस्य एकधर्मावच्छेदेन वृत्तिविषयत्वं न त्वेकमात्रव्यक्तित्वं अतो यौगिकार्थौपग
वादिप्रश्नोत्तरे श्यामो दीर्घो लोहिताक्ष औपगव इत्यादौ· अनेकार्थात्मकवनसेनादिप्रश्नोत्तरे एकदेशस्था वृक्षा वनमित्यादौ च नाव्याप्तिः
प्रीतो ह्रस्वः स्पर्शवं तोपयः पावका विति तु प्रत्येकमनेकार्थपरत्वात् संग्राह्यमेव तदुक्तं कल्पतरुकृद्भिः अविशिष्टमपर्यायानेकशब्दप्रका
शितं एकं वेदांतनिष्णाता अखंडं प्रतिपेदिरे इति॥ नादिस्वरूपस्य संसृष्टरूपत्वात्संसृष्टमेव तद्विषय इति वाच्यं चंद्रादिस्वरूपस्यापि चंद्रत्वादिसं
सृष्टत्वात् प्रकृष्टप्रकाशेत्यादेश्चंद्रव्यक्तिमात्रविषयकत्वानुपपत्तेस्तथा च शक्तिलक्षणान्यतररूपा लक्षणारूपा वा याएकानाम्नो वृत्तिस्तज्ज्ञानजन्यस्मृतिविष
यान्याविषयकप्रमाजनकत्वमेव लक्षणं भवति। एकदेशेत्यादावेकस्या वनपदलक्षणाया विषयत्वस्य नानावृक्षस्वरूपेष्वनपायात् आचार्याणां तु श्याम इत्यादे
संसृष्टनामार्थविषयकत्वाभ्युपगमेऽपि लक्षणं संभवति एकवृत्तिविषयत्वस्य निवेशे तस्यैकवृत्तिस्मारितत्वपर्यवसन्नतया एकपदस्य नामपदस्य चं वैयर्थ्या
त्तत्त्यागे च पूर्वलक्षणाविशेष इत्याशयः। अखंडाभावनिवेशात्तु वैयर्थ्यमखंडार्थवाक्ये एकनामार्थमात्रविषयो न तु नामार्थद्वयमाख्यातार्थौ वेति व्युत्पा
दनस्य प्रयोजनत्वान्नानतिप्रयोजनकत्वमत एव प्रातिपदिकार्थमात्रपरत्वेऽपि कथमखंडार्थता संसृष्टस्यैव नामार्थत्वादित्याशंक्य प्रातिपदिकार्थविशेष्यांशमात्रप
रत्वस्य साध्यत्वादित्याचार्यैरग्रे वाच्यमिति तु ध्येयम्॥ यत्तु शीतोष्णास्पर्शौ पयः पावकावित्यादेर्द्वैत्वेन भेदबोधकत्वान्नाखंडार्थत्वमिति तन्न द्वंद्वस्य भेदाभेदोदासीनपदा
र्थबोधकत्वाल्लक्षणावाक्यत्वेनैव साहित्यरूपभेदाबोधकत्वात् साक्षात्परंपरया वा कार्यद्वयद्वारा वाखंडविषयकबोधद्वयमात्रे तस्य तात्पर्यान्न अविशिष्टं पदार्थान्तरा

नानांत एकपदेष्विति विषयं अखंडं॥

राम· २२०

CC-0. In Public Domain. Digitization by eGangotri

।यथाश्रुतेतत्कप्रमायाएवप्रसिद्धेस्तज्ज्ञानकत्वसिद्ध्यसंभवेनासंगतेर्वस्तुतस्तुविशेषणतावच्छेदकप्रकारकनिश्चयस्यविशिष्टवैशिष्ट्यबुद्धिहेतुत्वात्वा
द्विप्रतिपत्त्यादिनाप्रमासंसर्गागोचरानवेतिसंदेहेपिव्याप्तिनिश्चयादिसंभवइतिभावः।यत्तुप्रमात्वंविशेष्याविषयकवृत्तिसकलप्रमावृत्तित्वादभिधेयत्ववदि
त्याभासस्साम्यमिति तन्नशोभतेसप्रकारकस्यैवसविशेष्यकत्वेनविशेष्याविषयकंनिर्विकल्पकमेवेतुक्तानुमानस्याप्यनाभासत्वात्निर्विषयकवृत्तित्वानु
मानंतुतर्कशून्यमितिपूर्वानुमानमुक्ततर्कवत्त्वान्नतत्समंअत्रसत्यादिवाक्यजन्यप्रमासंसर्गागोचरालक्षणवाक्यजप्रमात्वात्यायासंसर्गविषयिकासानल
क्षणावाक्यजप्रमायथाघटमानयेतिवाक्यजप्रमेत्याद्यनुमानेष्वनसाध्याप्रसिद्ध्यादिशंकेतिध्येयं सत्यत्वादेः।सत्यत्वज्ञानत्वादेः परापरेति सत्यत्वंसर्वे
षुजातिमत्सुवर्त्तमानत्वात्परजातिर्ज्ञानत्वादिकंत्वतथात्वादपराजातिः तस्याःसत्यत्वादिजातेःअन्यत्रापीति ब्रह्मलक्षणत्वेनब्रह्मणितत्सत्वेतयावाच्यमे
वान्यत्रापिसत्त्वेनतदतिव्याप्तमितिभावः मन्मतेसत्यत्वंनजातिर्मानाभावाद्बाधाविषयत्वेनैवसदाकारबुद्ध्युपपत्तेश्चबाधाविषयत्वंस्वकालावच्छेदेनप्रपंचे

पद्यप्यत्राप्यप्रयोजकत्वंसंभाव्यतेतथापिसंदेहरूपासाध्यप्रसिद्धिर्नदुर्लभावस्तुतस्तुप्रकृष्टादिवाक्यएवतत्प्रसिद्धिर्दर्शितानचलक्ष
णवाक्यत्वंसत्यादिवाक्येष्वसिद्धंसत्यत्वादेः परापरजातितयातस्याश्चान्यत्रापिविद्यमानत्वेनासाधारण्याभावात् नचतात्विकंतद्ब्रह्मणिअद्वैत
श्रुतिविरोधात् अतात्विकंत्वन्यत्रापितुल्यमितिवाच्यं परमार्थसत्यादिरूपतायाब्रह्मस्वरूपलक्षणत्वात् अस्मन्मतेयद्यपिसत्याद्यन्यतम
पदंस्वरूपलक्षणपरंब्रह्मणोन्यस्यतदाभासत्वात्तथापिपरैरपिसत्वस्यसत्वेप्रतिज्ञानत्वस्यसत्यत्वेसत्यानंदत्वस्यशून्यवादिनापिसत्वरहितज्ञानानंदा
त्मकत्वस्यब्रह्मणोन्यत्रांगीकारान्मिलितंविनाननिर्विचिकित्सब्रह्मसिद्धिरितिमिलितंलक्षणंनचैवंविशिष्टस्यलक्षणत्वेसखंडार्थत्वप्रसंगःवाच्यः
ऽस्यसखंडत्वेपिलक्ष्यस्याखंडत्वात्॥९

पिसत्त्वान्नब्रह्मलक्षणंत्रिकालाबाध्यत्वंलक्षणंभवदपिनस्वरूपलक्षणंस्वरूपलक्षणंवुभुत्सयाचसत्यादिवा
क्यंप्रवृत्तमतस्त्रिकालाबाध्यत्वोपलक्षितस्वरूपात्मकंसत्यत्वंस्वरूपलक्षणंसत्यपदार्थः।एवंवृत्तत्ववच्छिन्नचित्वादिरूपज्ञानत्वाद्युपलक्षितस्वरूपंज्ञानत्वा।
दिकंज्ञानादिपदार्थइत्याशयेनाह परमार्थसत्यादीति नन्वेवंत्वन्मतेसत्यादिपदानामेकस्यैवलक्षणबोधकत्वसंभवात् पदांतरंव्यर्थंतत्राहाभ्यासदिति त
दाभासत्वात् परमार्थसत्यादिस्वरूपत्वाभावात् सत्त्वस्येति ब्रह्मणोऽन्यत्रांगीकारादित्यत्रान्वयः ज्ञानानंदात्मकत्वस्येति।मिथ्याभूतज्ञानस्याकारएवत
द्विषयःसोपिमिथ्येवशून्यवादस्यविज्ञानवादविशेषरूपत्वात्तथाचानंदोपिज्ञानाकारत्वात् ज्ञानाभिन्नइतिज्ञानात्मकानंदत्वंतन्मतेब्रह्मभिन्ने पीतितद्वारणाय
सत्यमितिभावः।ननिर्विचिकित्सेतिपरमतेसत्यत्वादेःब्रह्मभिन्नेस्वीकारात्सत्यत्वाद्युपलक्षितंब्रह्मजडादिरूपंनवेतिसंशयाज्जडादिविलक्षणब्रह्मस्वरूपनिश्च
याययज्ञानादिपदमावश्यकमितिभावःविशिष्टस्यसत्त्वज्ञानत्वादिविशिष्टस्यानंदत्वस्य वाच्यस्यवाच्यसत्यत्वादिघटितस्य लक्ष्यस्यसत्ताद्युपलक्षितस्य॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाच सोयमित्यादौ तत्पदार्थानुपादेयस्येदंपदार्थस्य बोधकेन तत्पदसमानविभक्तिकेन युक्तं नाम तत्पदं तद्धृ इति वाक्यं सोयमिति तच्च तत्पदार्थान्याविषयप्र
माहेतुरेवं तत्त्वमस्यादिवाक्येपि स्वपदेन तदादिपदमादाय योजनीयं। ननु नीलो घट इत्यादौ नीलघटयोस्तादात्म्यसम्बन्धो भाति सोयमित्यादौ त्वखंडा
र्थकत्वमित्यत्र किं नियामकमिति चेत् अत्रोच्यते चतुर्धा सामानाधिकरण्यं विशेषणविशेष्यभावे यथा नीलो घट इत्यादौ अध्यासे यथेदं रजतमि
त्यादौ व्यावहारिकं तादात्म्यं विशेषणविशेष्यभावः प्रातीतिकतादात्म्यमध्यासे बाधायां यथा यश्चोरः स स्थाणुरित्यादौ यश्चोरत्वेन ज्ञातः स चोरो न
किंतु स्थाणुरित्यर्थः ऐक्ये यथा सोयमित्यादौ तत्तेदंतयोरेककालावृत्तित्वेन तदुपहितयोस्तादात्म्यासंभवेन तदुपलक्षितयोरखंडं व्यक्तिमात्ररू
पमैक्यं भाति तथाच यत्र तादात्म्यं न संभवति तत्राखंडार्थत्वाज्जीवत्वेशत्वोपहितयोस्तादात्म्यासंभवादखंडार्थत्वं। नीलो घट इत्यादौ तु तादात्म्य।
संभवति गुणक्रियाद्रव्यरूपकार्याणां सामान्यविशेषयोश्चाकार्ययोस्तादात्म्यस्वीकारात् विशिष्टकेवलयोरंशांशिनोश्च तादात्म्यं संभवति केव।

तन्मात्रप्रश्नोत्तरत्वाद्वा सोयमित्यादिवाक्यवदिति वाक्यार्थविषयाखंडार्थत्वानुमानं न च सत्यादिवाक्ये तन्मात्रप्रश्नोत्तरत्वमसिद्धं ब्रह्मविदाप्नोति
परमिति ब्रह्मवेदनस्यैवेष्टसाधनतया तन्मात्रस्य बुभुत्सातस्तन्मात्रस्यैव प्रश्नविषयत्वात् न च प्रकृष्टादिवाक्ये साध्यवैकल्यं तद्वाक्यं पक्षीकृत्य तन्मात्रप्र
श्नोत्तरत्वेन चंद्रमात्रनिष्ठतायाः सामान्यव्याप्तिमवलंब्य साधनात् एवं तत्त्वमस्यादिवाक्येपि तन्मात्रप्रश्नोत्तरत्वं नासिद्धं कोहमित्यात्मस्वरूपस्यैव प्रश्नविषयत्वे
न तदधिकप्रत्युक्तेरयुक्तेः नाप्यत्र दृष्टान्तासिद्धिः देवदत्तस्वरूपमात्रे पृष्टेस्य प्रवृत्तेः न चाप्रयोजकत्वं प्रश्नोत्तरयोर्वैयधिकरण्यापत्तेर्विपक्षबाधकतर्कस्य विद्य
मानत्वात् न च संसर्गगोचरप्रमितिजनकत्वं साध्यमप्रसिद्धं प्रत्यक्षादिनापि इदमित्थमिति विशेषणसंसर्गगोचराया एव प्रमितेर्जननादिति वाच्यं निर्विक
ल्पकस्य स्वीकर्तृणां तस्मिन्नेव प्रसिद्धेः इतरेषां तु प्रमात्वं संसर्गगोचरवृत्ति सकलप्रमावृत्तित्वादभिधेयत्ववदिति सामान्यतस्तत्प्रसिद्धेः॥ त्वे विशिष्टस्यांशिनि चांशस्य क

ल्पितत्वेन कार्यत्वात् पुरुषो दंडीत्यादावपि दंडसंयोगस्य गुणत्वेन द्रव्ये तादात्म्यात् तद्विशिष्टस्यापि पुरुषे तादात्म्यसंभवः नित्यगुणस्य ज्ञानानंदादिरूपस्य नित्यांशस्य च जलादि
परमाणौ ब्रह्मणि च तादात्म्यं संभवत्येव गुणत्वादेव अत एव नित्यगुणद्रव्ययोरकार्यकारणनिष्ठसामानाधिकरण्यस्य व्यभिचारित्वात् द्रव्यनिवेशः ननु स्वं घटपदं तदर्था
नुपादेयद्रव्यबोधकमृत्पदसमभिव्याहृतं तदेव तद्धृ इति वाक्ये च तदर्थान्याविषयकप्रमाहेतुत्वाभावाद्व्यभिचार इति चेत् सत्यं तद्वारणाय स्वार्थद्रव्यानुपादानस्येत्यपि द्रव्य।
स्येत्यत्र विशेषणं वाच्यमेवमपि परमते गगनं महदित्यादौ स्वपदेन महत्पदमादाय तदर्थानुपादानगगनबोधकपदयुक्तं तद्धृ इति वाक्यं तस्य व्यभिचरित्वात् स्वार्थद्रव्येत्यावश्य
कमिति ध्येयं द्वितीयसाध्ये हेतुमाह तन्मात्रेति अत्र पूर्वोक्तरीत्या पर्यवसानं बोध्यं तन्मात्रस्य ब्रह्ममात्रस्य प्रश्नविषयत्वात् सत्यादिवाक्यनिवर्त्यबुभुत्साविषयत्वात् यद्वि
षयकत्वेनेष्टसाधनं तदन्यविषये बुभुत्सायां मानाभाव इति भावः तदसिद्धेरिति प्रश्नोत्तरयोर्वैयधिकरण्यापत्तितर्केण प्रमात्वपक्षकोक्तानुमानेन तादृशप्रमासिद्धौ तज्जनकत्वरूपसाध्यस्य प्रकृष्टादिवाक्ये प्रसिद्धिरिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामानाधिकरण्यप्रत्ययस्यैवाभेदनियामकतया पार्थिवरूपादेः पृथ्व्याश्रयेण सविशेषाभेदस्य दुर्वारत्वात्। अन्यथा पृथिव्यां सत्यां रूपस्यैव पृथिवीत्वे सति पृथिव्या अपि नाशात्तयोरप्यभेदानुपपत्तेः तस्मात्स्वरूपलक्षणं लक्ष्यात्यंताभिन्नं विशेषणं लक्षणं यावद्दाश्रयभावि। तटस्थलक्षणं कालावच्छेदेन स्वाश्रयनिष्ठमिति विवेको युक्त इति भावः ब्रह्मणीति। न चाश्रयकालत्वव्यापकत्वस्यैव यावद्द्रव्यभावित्वरूपत्वेनाविद्याविषयत्वादिकमेव तादृशधर्म इति तस्य स्वरूपलक्षणत्वं भवन्मते कुतो नोच्यते इति वाच्यं जगत्कर्त्रभिन्नोपादानत्वस्यैवाविद्याविषयत्वादेरपि मन्मते स्वरूपान्यत्वेन तटस्थलक्षणत्वव्यवहारात्। न च भवन्मते जगत्कारणत्वादेस्तटस्थलक्षणत्वानुपपत्तिः कर्त्रभिन्नोपादानत्वरूपस्य तस्य ब्रह्मकालत्वव्यापकत्वादिति वाच्यं मन्मते स्वरूपलक्षणान्यत्वेन तत्र तटस्थलक्षणत्वोपचारात्॥ उपादानाभिन्नकर्तृत्वस्यैव मन्मते मुख्यतटस्थलक्षणत्वस्वीकारात्कर्तृत्वस्य मायापरिणामज्ञानेच्छाकृतिरूपत्वेन स्वकालत्वाव्यापकत्वेन स्वकालावच्छेदेन स्वाश्रयनिष्ठ-

ब्रह्मणि यावद्द्रव्यभाविधर्मविरहाच्च वस्तुतस्तु द्वारत्वेन लक्षणे तात्पर्यं न द्वारिणोऽखंडार्थत्वं विरुणद्धि न च स्वरूपज्ञानस्य प्रागेव सामान्यतो जातत्वात्तज्ज्ञानेनैतद्द्वारापेक्षेति वाच्यं ज्ञानमात्रे स्वद्वारत्वाभावेऽपि संशयादिनिवर्तके तज्ज्ञाने तद्द्वारापेक्षणात् न च सत्यखंडवनादिलक्षणवाक्ये व्यभिचारः तत्रापि साध्यसत्त्वस्य व्युत्पादनात् न च किंचंद्रलक्षणमित्यसाधारणधर्मप्रश्नोत्तरे प्रकृष्टप्रकाशादिवाक्ये व्यभिचारः तत्र हि न चंद्रस्वरूपपरत्वं किंतु प्रकर्षाश्रयो यः प्रकाशस्तत्स्वरूपपरत्वं तथा च प्रकर्षोपलक्षितप्रकाशव्यक्तिस्वरूपमात्रप्रतिपादकत्वेन तत्राप्यखंडार्थत्वाविरोधात् अत एव धर्मे पृष्टे चंद्रस्वरूपं वक्तुं नोचितमिति निरस्तं धर्म्मस्यैव स्वरूपत उक्तेरुक्तत्वात् अन्यथा प्रश्नोत्तरयोर्वैयधिकरण्यापत्तेः ननु इदं वाधितं धर्मिज्ञानाधीनसप्रकारकसंशयादिनिवर्तकं मोक्षहेतुं सप्रकारकं ज्ञानं प्रति साधनत्वेन वेदांतविचारविधानान्यथानुपपत्त्या वेदांतवाक्ये साध्याभावनिश्चयादिति चेत् न अनृतादिप्रतिषेधकव्यावृत्ताकारज्ञानेनैव अनृतादिसंशयादिनिवृत्त्युपपत्तेरन्यथासिद्धत्वात् न हि सप्रकारकत्वमात्रं तत्र तंत्रं भ्रमकालीनानुवृत्ताकारज्ञानस्य सप्रकारकत्वेन संशयादिनिवर्तकत्वे भ्रमकथैवोच्छिद्येत ज्ञानस्याज्ञानसमविषयत्वेनैव तन्निवर्त्तकत्वात् न तु समानप्रकारकत्वेनापि गौरवात्॥ २२

त्वात्। मन्मते कालत्वव्यापकजातेरेव विशेषणलक्षणत्वे न जगदुपादानत्वादेर्मुख्यतटस्थलक्षणत्वसंभवाच्च स्वरूपतटस्थयोरेव लक्षणयोर्मन्मते स्वीकारसंभवाच्चेति भावः लक्षणे सत्यत्वादिधर्मस्य ब्रह्मणि वैशिष्ट्यबोधे संशयादिनिवर्तकेति। सत्यत्वादिवैशिष्ट्यबोधोत्तरवृत्तिनिसत्यत्वाद्युपलक्षिताखंडबोधरूपेत्यादिः। प्रकाशव्यक्तिस्वरूपेति न च चंद्रसम्बन्धित्वेन प्रश्नात्तेनैव रूपेणोत्तरवाक्ये न। बोध इति वाच्यं चंद्रस्यासाधारणधर्मश्चंद्रलक्षणमित्यस्य ज्ञातत्वेन तत्स्वरूपमात्रस्य पृष्टत्वेनोत्तरवाक्यजधीविषयत्वात्॥ अनृतादिप्रतिषेधकव्यावृत्ताकारेति अनृतादिव्यावर्तकं यत्सत्यत्वादिरूपं व्यावृत्तविशेषरूपं तदुपलक्षितविषयकेत्यर्थः अनृतादिसंशयेति। ब्रह्मानृतं न वेति संशयेत्यर्थः निवर्त्तकत्वात् अज्ञानतत्कार्यसंशयादिनिवर्त्तकत्वात् निदिध्यासनपूर्वस्यापातज्ञानस्य तु नाज्ञाननिवर्त्तकत्वमनावृत्तप्रमात्वेनैव तत्स्वीकारात्तत्र च प्रमात्वस्य संदिग्धत्वेनावृत्तत्वात् विवेचितमे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ॰ सि॰ टी॰ ल॰ १२ सत्ताद्युपलक्षितमेवलक्षणं सत्ताद्यैकैकोपलक्षितेजडत्वादिसंशयेनज्ञानादिपदांतरवाच्यज्ञानत्वाद्युपलक्षितस्यैववोधस्तन्निवर्त्तकइतिनस[illegible]ति।
इदमेवविवेचयति। यद्यपीतिनिवर्त्तनीयांशेजडत्वादिभ्रमरूपनिवर्त्तनीयेत्यर्थः नपदांतरवैयर्थ्यं नज्ञानादिपदवैयर्थ्यं। नन्वेवंवाच्यघटितवाक्यार्थस्यसखंड।
त्वंस्वीकृतंविरुध्येततत्राहातोवाच्येति। वैशिष्ट्यस्यवैशिष्ट्यबोधस्य उपायत्वात्द्वारत्वात् तद्विरोधिताअ खंडसिद्धिविरोधिताअभ्युपेत्याह धर्मलक्षणस्येति॥
भावायोगः भावव्यवहारायोगः इतरव्यावृत्त्यनुमितिप्रतिपक्षोलक्ष्यंहेतुर्लक्षणंतदुभयरूपत्वमत्यंताभेदेनसंभवतिहेतोपक्षसम्बन्धाभावादितिभावः अंतःकरणे
निविभिन्नमनोवृत्तिरूपोपाधिभेदादेकस्याप्युपहितरूपेणभेदसंभवात्सम्बन्धसंभवइतितादृशमनोवृत्तिश्चब्रह्मपदार्थस्वरूपमात्रस्यलक्षणायोपस्थितिस्त
द्विषयत्वेनलक्ष्यतासत्तादिपदार्थस्वरूपमात्रस्यलक्षणायोपस्थितिश्चतद्विषयत्वेनलक्षणत्वंसाचोपस्थितिरभिहितान्वयमतेऽनुभवोमतांतरेस्मृतिस्तादृ
शविषयत्वरूपेणलक्ष्यलक्षणयोः साक्षिणैवप्रथमंगृहीतयोरनुमितिहेतुपरामर्शविषयत्वंयदितुइतरव्यावृत्तिरर्थान्नतुशब्दादितिकल्पतरुकारो।

यद्यपिसर्वेषांसत्तादिपदानांलक्ष्यमेकमेवनिर्विशेषंब्रह्मतथापिनिवर्तनीयांशाधिक्येननपदांतरवैयर्थ्यं अतोवाच्यार्थवैशिष्ट्यस्याखंडसिद्ध
वुपायत्वान्नतद्विरोधितानन्विदंविरुद्धं असाधारणधर्मरूपलक्षणपरवाक्यस्यसखंडार्थत्वनियमादितिचेत् नसर्वलक्षणवाक्यानांस्वरूपमा
त्रपर्य्यवसायित्वेनसखण्डार्थत्वनियमासिद्धेः धर्मलक्षणस्याखंडत्वविरोधित्वेपिस्वरूपलक्षणस्यतदविरोधित्वाच्चनचाभेदेलक्ष्यलक्षणभावायो
गः अंतःकरणवृत्तिनिबंधनाकारभेदेनउभयोपपत्तेः आवृतत्वानावृतत्ववत् अन्यथास्वरूपलक्षणतटस्थलक्षणविभागोनस्यात् नचयावद्द्रव्यभाविता
भाविताभ्यांव्यवस्थातावताहिस्थायित्वास्थायित्वव्यवस्थास्यात् नतुस्वरूपादिरूपातवमतेपार्थिवरूपादौस्वरूपलक्षणेव्याप्तेश्च ॥त्वा इतरव्यावृत्तेरर्थाप

त्तिरेवनानुमितिस्तदापिब्रह्मपदार्थस्यसत्तादिपदार्थानामैक्यंपदखंडाकारशाब्दधियाप्रमितंतत्सत्तादिव्यावृत्तिंब्रह्मपदार्थनिष्ठांविनानुपपन्नमित्यनुपपत्ति।
ज्ञानेनासत्तादिव्यावृत्तिर्ब्रह्मनिष्ठेत्यर्थापत्तेरुत्वादात्ब्रह्मपदार्थत्वस्यचब्रह्मपदजन्यतादृशधीविषयत्वरूपत्वाद्यत्रानुपपन्नंगृह्यतेतस्यैवलक्ष्यत्वादिनाव्यावृत्त्युप
पाद्यस्यानुपपन्नस्यैवलक्षणत्वात्तदनुपपन्नविषयकमनोवृत्तिविषयत्वेनलक्षणत्वसिद्धयालक्ष्यलक्षणभावोमनोवृत्तिभेदेनैवेतिभावः आवृतत्वानावृतत्ववदितिय
थैकस्मिन्नपिब्रह्मणिआविद्यकभेदेनपूर्णानंदरूपेणावृतत्वंचिद्रूपेणानावृतत्वंतथोपाधिभेदेनाविद्यकभेदात्सम्बन्धइतिभावः। यावत्द्रव्यभाविताभाविताभ्या।
मितियावत्कालंलक्ष्यंतिष्ठतितावत्कालस्थायिपृथिवीत्वादिकंपृथिव्यादेःस्वरूपलक्षणंतदन्यद्गंधादिकंतटस्थलक्षणमित्यर्थः नतुस्वरूपादीति नचयावदाश्र।
यस्थायिपृथिवीत्वादिकंनपृथिव्याद्भिन्नंकिंतुसविशेषाभेदएवातएवोक्तंयावद्वस्तुनभेदवदितियावद्धर्मिस्थायिनिधर्मेधर्मिभेदाभेदौनस्तः किंतु
धर्मिणः सविशेषाभेद इत्यर्थः। पार्थिवरूपादिकंतुनस्वरूपलक्षणमितिवाच्यंभेदस्यैवविशेषपरिभाषाकरणेनात्यंताभेदाभावेनपृथिवीत्वादेःपृथि

आदिस्वरूपलक्षणत्वसंभवात्॥

राम॰ २२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसर्गनिरूपकत्वेनतात्पर्यविषयइतिसाध्येचबाधः नहितेनरूपेणपदार्थस्तात्पर्यविषयोनिरूपकत्वस्यसम्बन्धसम्बन्धस्यशाब्दबुद्धावभावात्। संसर्गेव्यभिचाराच्च अथतात्पर्यविषयतापर्याप्त्यधिकरणत्वेनहेतुनाएकपदार्थसंसृष्टापरपदार्थात्यंताभिन्नत्वंसाध्यंकेवलःपदार्थः संसर्गोवानोक्तपर्याप्त्यधिकरणंब्रह्मणितुसत्यादिसंसृष्टज्ञानादेस्तादात्म्यसत्वेपिनात्यंताभेदइतिचेन्नपूर्वसाध्येप्येवंवाच्यतयातद्विशेषापत्तेः अप्रयोजकत्वाच्चतात्पर्यावेदकमानस्यशुद्धेसत्वेतस्यैवतात्पर्यविषयत्वेबाधकाभावादबाध्यपरत्वस्याग्निहोत्रादिवाक्येष्वभावादाह प्रमितिविषयपरत्वेतिव्यवहारकालाबाध्यपरत्वेत्यर्थःपदार्थाबाध्यस्याप्रमाणवाक्येपिसत्वादबाध्यविषयकत्वंत्यक्त्वाऽबाध्यपरत्वमुक्तंप्रमाणवाक्येचाबाध्यपदार्थस्यतात्पर्याविषयत्वात्तद्व्युदासः अलक्षणवाक्यत्वस्येति। लक्षणवाक्यानांसर्वेषांसंदिग्धसाध्यकतयापक्षत्वेनतद्भिन्नेष्वेवसाध्यव्यापकतानिश्चयइतिभावः नचसाध्याभावंप्रत्युपाध्यभावस्यव्याप्यत्वाग्रहणान्नायमुपाधिरितिवाच्यंपक्षेलक्षणवाक्यत्वस्यनिश्चयसत्वेनसंसर्गपरत्वरूपव्यापकसंदेहस्यव्याप्तिग्रहाविरोधित्वात्। अंकुरादौनिश्चितकार्यत्वादिहेतौस

द्वितीयानुमानेप्रमाणवाक्यत्वस्याबाध्यपरत्वमात्रेणप्रमितिविषयपरत्वमात्रेणचोपपत्तौविशिष्टसाध्यस्यतत्रातन्त्रत्वेनाप्रयोजकत्वात् अलक्षणवाक्यत्वस्योपाधित्वाच्च नापिवेदांतजन्याप्रमासप्रकारिकाविचारजन्यत्वात् संशयनिवर्तकत्वाद्वाकर्म्मकांडजन्यज्ञानवत् वेदांतवाक्यजन्या। प्रमाब्रह्मप्रकारविषयाब्रह्मधर्मिकसंशयविरोधित्वात् ब्रह्मविचारजन्यत्वाद्वायदेवंतदेवंयथाकर्मकांडविचारजन्योनिश्चयइतिप्रतिसाधनमस्त्वितिवाच्यंतवमतेज्ञानमात्रस्यसप्रकारत्वेनविचारजन्यत्वसंशयविरोधित्वयोर्व्यर्थत्वात् अप्रयोजकत्वात् निष्प्रकारकज्ञानादपिसंशयादिनिवृत्तिसंभवात् लक्षणवाक्याजन्यत्वस्योपाधित्वाच्च अतएवद्वितीयानुमानमप्यपास्तं ब्रह्मनिष्ठप्रकारविषयत्वसाधनेदृष्टांताभावाच्च सर्वेषुचप्रतिसाधने। षुप्रश्नोत्तरयोर्वैयधिकरण्यापत्तिः प्रतिकूलतर्कोवसेयः॥ ((कर्तृकत्वसंदेहवत् प्रकृतेपिप्रश्नोत्तरवैयधिकरण्यापत्त्यादितर्कसत्वाच्चव्यर्थत्वात् असाधकत्वात्

विचाराजन्यादिज्ञानेसप्रकारकत्वेयत्साधकंतत्तात्पर्यग्राहकमानादिकंतदेवविचारजन्यादिज्ञानेपितत्साधकमितिभावः अथवाविचारजन्यत्वंविचारजन्यतावच्छेदकीभूतंविचारसमानविषयकनिश्चयत्वमेवसंशयविरोधिताअपितदवच्छेदकंतत्समानविषयकनिश्चयत्वंनिश्चयत्वंचविरुद्धाविषयकज्ञानत्वमितिज्ञानत्वान्यभागोव्यर्थ विशेषणमितिभावः। नचसप्रकारकनिश्चयत्वस्यसाध्यत्वाज्ज्ञानमात्रस्यतत्रव्यभिचारित्वेननेतरवैयर्थ्यमितिवाच्यं उक्तजन्यताविरोधितयोरवच्छेदकंहिसप्रकारकत्वघटितंनवाआद्येतयोरवच्छेदकघटितत्वेनस्वरूपासिद्धिः द्वितीयेसप्रकारकत्वंविनापितयोरुपपत्तिस्त्वयापिस्वीकृतेवअथजन्यताप्रतिबंधकत्वयोःसप्रकारकत्वावच्छिन्नत्वेपिनत द्घटितत्वंजन्यताजनकत्वयोरखंडत्वस्वीकारात्तथापिवस्तुगत्यातदवच्छिन्नयोस्तयोःपक्षेऽसिद्धिरेवतयोर्वस्तुगत्यातदनवच्छिन्नत्वस्वीकारेतूक्तसाध्यंविनापिहेतूपपत्तिसंभवादितिविवेचितमनुपदमेतत् अतएवव्यर्थत्वाप्रयोजकत्वाभ्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्रव्याद्याकारज्ञानानां द्रव्यत्वाद्यवच्छिन्नविषयताकज्ञानानां घटाद्याकारत्वस्य घटत्वाद्यवच्छिन्नविषयताकत्वस्य न घटेत्यादि। तथा च तूलाज्ञाननिष्ठप्रतियोगितासम्बन्धेन नाशं प्रति स्वविषयतावच्छेदकावच्छिन्नविषयताकत्वसम्बन्धेन प्रमात्वेन हेतुत्वमिति भावः भेदाच्चेति॥ तथा च स्वसमानविषयकत्वसम्बन्धेनैव हेतुत्वसंभवो द्रव्यत्वघटत्वादिविशिष्टरूपविषयभेदेन द्रव्यघटाद्याकारज्ञानाज्ञानयोर्न नाश्यनाशकभावापत्तिरितिभावः। तथा प्रतिपादितमिति। घटं न जानामीत्यज्ञानस्य जातिमानित्यादिज्ञानेन नाशः स्यादनवच्छिन्नघटत्वप्रकारताकत्वस्य निवेशेन घटत्वमात्रप्रकारकधीप्रकारत्वानित्यस्याप्यनाशकतापत्तिर्गौरवं च तस्माद्द्रव्यघटजातिमदादीनां विषयाणां भेदादेकज्ञानादन्याज्ञानं न निवर्त्तते इति समानविषयकत्वमेव सम्बन्धः। शक्तिविशेषाणामेव तावत्तद्विषयकाज्ञाननाशकताव

अज्ञानविषयश्च शुद्धं ब्रह्म अज्ञानकल्पितस्य तदितरस्याज्ञानविषयतायोगात् तथा च शुद्धब्रह्माकाराचित्तवृत्तिर्निष्प्रकारिकैवाज्ञाननिवर्तिका प्रकारमात्रस्याप्यविद्याकल्पितत्वेन तद्विषयाया वृत्तेरविद्यासमविषयत्वाभावात् यथा चाविद्यातत्कार्यविषयं ज्ञानं तदनिवर्त्तकं तथा व्युत्पादितं प्राक् द्रव्याद्याकारज्ञानानां च घटाद्याकारत्वस्यानुभवनिरस्तत्वान्न द्रव्याद्याकारज्ञानेन घटाद्याकाराज्ञाननिवृत्तिप्रसंगः द्रव्यत्वघटत्वयोर्भेदेन विषयभेदाच्च यथा च समानप्रकारकत्वमादायापि न निस्तारस्तथा प्रतिपादितमस्माभिर्वेदान्तकल्पलतिकायामिति दिक् ननु अस्तु सत्प्रतिपक्षः तथा हि सत्यादिवाक्यतात्पर्य्यविषयः संसृष्टरूपः संसर्गरूपो वा प्रमाणवाक्यतात्पर्यविषयत्वात् संमतवत् सत्यादिवाक्यं स्वतात्पर्य्यविषयज्ञानाबाध्यसंसर्गपरं स्वतात्पर्य्यविषयज्ञानाबाध्यस्वकरणकप्रमाविषयपदार्थनिरूप्यसंसर्गपरं वा प्रमाणवाक्यत्वादग्निहोत्रादिवाक्यवत् विषं भुंक्ष्वेत्यादौ वाच्यार्थसंसर्गपरत्वाभावेपि स्वकरणकप्रमाविषयपदार्थनिरूप्यसंसर्गपरत्वान्न व्यभिचारः स्वच्छिद्रं कोकिलः पिक इत्यादौ चानतिभिन्नार्थत्वे सामानाधिकरण्यायोगेन च्छिद्रकोकिलादीनां स्वपिकादिशब्दवाच्यत्वसंसर्गपरत्वान्न व्यभिचार इति चेत् न आद्यानुमाने संसृष्टरूप इति साध्ये संसर्गसंसर्गरूप इति साध्ये च संसृष्टरूपे पदार्थे व्यभिचारात् तयोरपि प्रमाणवाक्यतात्पर्य्यविषयत्वात्॥ एकैकस्य कत्वमन्यथा तत्तद्विषयकत्वप्रमात्वादीनां [illegible]

षणाविशेष्यभावे विनिगमकाभावादनेकहेतुत्वापत्तेरित्यादि प्रतिपादितमित्यर्थः पूर्वानुमाने बाध्यसंसर्गादिपरत्वेनार्थान्तरादाह स्वतात्पर्येत्यादि [illegible] तात्पर्यविषयसंसर्गस्य ब्रह्मधीबाध्यताज्ज्ञानान्तं अखंडब्रह्मणोप्यभावादौ स्वरूपसम्बन्धरूपत्वात् सिद्धसाधनादाह स्वकरणकेत्यादि निरूप्यान्तं अनतिभिन्नार्थेत्यादि भिन्नमत्यन्तभिन्नमतिक्रान्तोऽतिभिन्नो भेदाभेदवान्। तादृशार्थत्वाभावे इत्यर्थः। संसर्ग इति। न च द्वयोः पदार्थयोरयं संसर्ग इति प्रत्यया संसर्गस्यापि संसृष्टत्वा [illegible] चार इति वाच्यं। तथा सति प्रकृष्टप्रकाशादिवाक्ये चन्द्रत्वादिसंसृष्टपरत्वमादाय सिद्धसाधनार्थान्तरादाह तद्वारणाय सत्यादिवाक्यघटकपदार्थानामेकसंसृष्टापरत्व इति साध्यकरणे संसर्गे व्यभिचारावश्यकत्वात् संसृष्टरूप इति न च संसर्गरूप इत्यस्य संसर्गनिरूपक इत्यर्थकत्वान्न पदार्थे व्यभिचार इति वाच्यं ब्रह्मण्यप्यविद्या

CC-0. In Public Domain. Digitization by eGangotri

अनभ्यासदशापन्नं अप्रामाण्यशंकास्पदं ज्ञानविशेषस्य अप्रामाण्यशंकाशून्यस्य वैपरीत्येन व्युत्क्रमेणापि ज्ञानादिरूपे दोषे सति फलानुपधानं तदभावे सति फलोपधानमित्यर्थः य
त्तु प्रश्नोत्तरयोरसंकीर्णस्वरूपं विषय इति न युक्तं विपर्ययविरोधिफलोपहितरूपस्य तत्त्वेनोक्तफलस्य तद्विषयत्वादिति तन्न शोभते फलस्योपाधित्वेन तत्र तद्विषयत्वस्य केना
प्यनुक्तत्वात्॥ फलत्वे फलीभूतधीविषयत्वे चंद्रे चंद्रत्वादिविशिष्टे शुक्तिस्वरूपाज्ञानेति इदं रजतादिभिन्नत्वेन न जानामीत्यज्ञानेत्यर्थः। चंद्रस्वरूपाज्ञानेति इदं तम आदिभिन्नत्वे

अथानभ्यासदशापन्नं ज्ञानं न विपर्ययविरोधि प्रकृतेपि समं विषयतुल्यत्वेपि ज्ञानविशेषस्यैव विपर्ययनिवर्त्तकत्वस्य सर्वतंत्रसिद्धांतत्वात् शंखः श्वेतो न पीत इ
त्यादिपरोक्षज्ञाने भासते यादृशं श्वैत्यस्वरूपं पीताभावस्वरूपं वा तादृशमेवापरोक्षज्ञानविषयस्तादशायां विपर्ययविरोधीति विपर्ययविरोधिज्ञानफलोपहितमेवासं
कीर्णमित्युच्यते फलोपधानतदभावौ च दोषविशेषतदभावयोर्वैपरीत्येनेत्यन्यदेतत् तथा चैकमेव स्वरूपं दशाविशेषभेदेन संकीर्णमसंकीर्णं चेति संकीर्णतादशायां युगपज्ज्ञानाज्ञा
नयोरुपपत्तिः अत एव व्यावृत्तिवैशिष्ट्यं व्यावर्त्तकवैशिष्ट्यं वाऽसंकीर्णत्वमित्यपास्तं शंखः श्वेतो न पीत इत्यत्रोभयसद्भावेपि विपर्ययाविरोधित्वरूपसंकीर्णतायादर्शना
त् यद्यपि यश्चंद्रस्तत्र चंद्रत्वं तमोनक्षत्रादिव्यावृत्तिश्चास्तीति मया ज्ञायत एव तथापि चंद्रस्वरूपं न ज्ञायत इत्यनुभवेन व्यावर्त्तकव्यावृत्तिवैशिष्ट्यस्याजिज्ञासितत्वेन जि
ज्ञासितं चंद्रस्वरूपमेव विपर्ययविरोधिज्ञानविशेषं जनयता प्रकृष्टप्रकाशश्चंद्र इति वाक्येन बोध्यत इति किमनुपपन्नं व्यावृत्तेः शाब्दबोधफलत्वेपि तदविषयत्वान्नाखंडार्थत्व
व्याघातः तद्बोधकपदाभावाच्च अथ लक्षणया व्यावृत्तेः शाब्दबोधे भानं न वैयर्थ्यात्तत्र तात्पर्याभावेन लक्षणाया अयोगात् तथाहि चंद्रे वा व्यावृत्तिर्बोध्यते व्यक्तिविशेषे वा
नाद्यः या शुक्तिः सा रजतादिभिन्नेति ज्ञानेपि शुक्तिस्वरूपाज्ञानतत्कार्यविपर्ययदर्शनवत् यश्चंद्रः स तम आदिविलक्षण इति ज्ञानेपि चंद्रस्वरूपाज्ञानतत्कार्यविपर्ययादि
दर्शनात् द्वितीये त्वावश्यकत्वाद्व्यक्तिविशेष एव बोध्यतां किं व्यावृत्त्या शब्दानुपस्थितया व्यक्तिविशेषबोधादेव वस्तुसिद्धेः नहि धूमोस्तीति वाक्ये वह्नौ लक्षणा अत एव विनैव लक्ष
णां व्यावृत्तिः शाब्दबोधे भासते घटेन जलमाहरेत्यत्र छिद्रेतरत्ववदिति निरस्तं छिद्रेतरत्वस्यानन्यलभ्यत्वेन शब्दतात्पर्यविषयत्वेपि न व्यावृत्तेस्तथात्वं हानोपादानादिवत्
फलत्वेनान्यलभ्यत्वात् छिद्रेतरत्वमपि लक्षणां विना न शाब्दबोधविषयः अन्यथा लक्षणोच्छेदापत्तेः किंतु शाब्दबोधविषये जलाहरणसाधने वस्तुगत्याऽस्तीत्यन्यत्र विस्तरः अ
त एवोक्तमाकरे अन्यतो व्यावृत्तिरर्थात्तु शब्दादिति न च कश्चंद्र इति धर्मप्रश्नोयं कश्चंद्रधर्म इति स्वाधीने शब्दप्रयोगे निष्प्रयोजनलक्षणाया अन्याय्यत्वात् तद्बोधनेऽखंडार्थ-
त्वस्योपपादितत्वाच्च ननु सर्वलक्षणवाक्यानां वस्तुगत्या परस्परभिन्नतत्तत्प्रातिपदिकार्थमात्रविषयज्ञानजनकत्वेन सप्रकारकज्ञानजनकत्वाभावात् प्रश्नवाक्यस्थविशेष्य
मात्रसमर्पकं चंद्रादिपदमेव प्रयोक्तव्यमुत्तरवाक्ये किं प्रकृष्टप्रकाशादिपदेनेति चेत्॥ ११ ननजानामीत्यज्ञानेत्यर्थः वह्नौ लक्षणेति साक्षात्परंपरया वा लक्षणां विना-
पि योर्थः सिध्यति तद्बोधार्थं लक्षणाया अन्याय्यत्वात् व्यक्तं चेदं शब्दमण्यादाविति शेषः अर्थादिति अखण्डस्य स्वलक्षणस्य व्यावृत्तेश्च पश्चादन्यत्राज्ञातत्वेनान्वयव्याप्तिग्रहणे-
नव्यतिरेकव्याप्तिज्ञानरूपार्थापत्तित एव व्यावृत्तिधीरिति भावः॥ ११॥ ॥ ११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰सि॰ टी॰त॰ २४

नचयोयोपद्धर्मिकसंशयविरोधीसतन्निष्ठप्रकारविषयकइत्यादिसामान्यव्याप्तौनिश्चयोदृष्टांतइतिवाच्यंत्वन्मतेसंशयत्वनिश्चयत्वादेःप्रकारविशेषादिघटितत्वनिय
तत्वेनपक्षदृष्टांतसाधारण्याभावेनपक्षविषयकसंशयादिनिवेशेसाधनवैकल्यात्तदृष्टांतविषयकत्वनिवेशेस्वरूपासिद्धेः।तात्पर्यविषयीभूतान्वयानुपपत्त्येति।भोज
नप्रस्तावादिनायष्टिधरकर्मस्यान्वितप्रवेशेन्यायेनसवनीययागान्वितत्वरसेगृहीततात्पर्यविषयत्वस्यानुपपत्तेरित्यर्थः।न्यायस्सूच्यतेतृतीयांत्याधिकरणेस्थितंशाक्यानाम
यनेनामसत्रेषट्त्रिंशद्वर्षादिकंतत्रश्रूयतेसंस्थितेसंस्थितेऽहनिग्रहपतिर्मृगयांयाति।सयान्मृगानहंतितेषांतरसाःसवनीयाःपुरोडाशाइतितत्रतरसशब्दितंमांसंविधी
यमानंसर्वपुरोडाशकार्यार्थमुतधानादिरूपस्यसवनीयहविःपंचकस्यकार्यार्थमितिसंशयेविधिप्रत्यासन्नत्वात्पुरोडाशशब्दितंपुरोडाशकार्यमुद्दिश्यमांसविधिःसवनी
याइतिनविवक्षितमुद्देश्यविशेषणत्वात्।।किंतुसृष्टिशब्दइवलिंगसमवायन्यायेनसवनीयासवनीयपुरोडाशानुवादइतिप्राप्तेब्रूमःविधेयतरसप्रत्यासत्तेर्मुख्यत्वाच्च

ननुदृष्टांतेसाध्यवैकल्यंतथाहिप्रकृष्टप्रकाशादिवाक्यंनतावदभिधयाऽखंडार्थनिष्ठंप्रकृष्टादिपदस्याखंडेभिधायाअभावात्तत्त्वयानंगीकाराच्चनापिलक्षणा
याप्रकृष्टप्रकाशस्यद्रव्यस्यगुणस्यवाचंद्रेऽन्वयोपपत्तेरन्वयानुपपत्तिरूपलक्षणाबीजाभावादितिचेत्नयष्टीःप्रवेशयेत्यादौलोकेतरसमयाःपुरोडाशाभवंतीत्या
दौवेदेचयथाश्रुतान्वयसंभवेपियथातात्पर्यविषयीभूतान्वयानुपपत्त्यायष्टिधरपुरुषेषुसवनीयहविर्मात्रेचयष्टिपुरोडाशशब्दयोर्लक्षणाश्रितातथैवेहतात्पर्य
विषयीभूतान्वयानुपपत्तिनिमित्तयालक्षणयाऽखंडार्थपरत्वोपपत्तेःकश्चंद्रइतिचंद्रस्वरूपेपृष्टेतन्मात्रपरस्यैवोत्तरस्योचितत्वात्ननुचंद्रस्वरूपस्यज्ञातत्वेतत्र
प्रश्नोनयुज्यतेअज्ञातत्वेधर्मिज्ञानसाध्यबुभुत्सासंदेहयोश्चंद्रइत्यनूद्यकइतिप्रश्नस्यचंद्रशब्दस्यार्थवत्वाज्ञानेनाप्रातिपदिकतयानङुतरसुविभक्त्यायुक्तत्वप्रसं
गात्चंद्रस्वरूपेज्ञातेपितस्यासंकीर्णस्वरूपंनज्ञातमितिनयुक्तंतस्मिन्स्वरूपद्वयाभावात्असंकीर्णत्वेननज्ञातमितिचेत्असंकीर्णत्वप्रकारकप्रतीतिपरत्वपर्य
वसितंतच्चव्यावर्त्तकवैशिष्ट्यंव्यावृत्तिवैशिष्ट्यंवाउभयथाप्यखंडार्थत्वभंगइतिचेत्नभावानबोधात्तथाहिचंद्रस्वरूपस्यज्ञातत्वाभ्युपगमादेवतदज्ञातत्व
निबंधनदोषानवकाशःज्ञातत्वेपिचविपर्य्ययविरोधिज्ञानानुदयदशायांतदुदयार्थंप्रश्नोयुज्यतएवअन्यथासर्वत्रप्रश्नमात्रोच्छेदापत्तेः॥ ॥

सवनीयशब्दोविवक्षितार्थएवअन्यथासवनीयपदस्यसवनीयासवनीयपुरोडाशइवपुरोडाशस्यापिपुरोडाशकार्येलक्षणेतिलक्षणाद्वयंस्यात्तस्मात्सवनीयपदस्यमु
ख्यार्थान्यागविशेषानुद्दिश्यतदीयधानादिहविर्विधेनतरसंविधीयतेतादृशान्वयस्यतात्पर्यविषयत्वात्तुरोधेनपुरोडाशधानादिहविःसम्बन्धित्वेनरूपेणसवनीयास्वल
क्षणायापुरोडाशपदेनानूद्यतेतथाचपुरोडाशपदमेवोद्देश्यविशेषणत्वादविवक्षितार्थमितिसवनीयहविर्मात्रेपुरोडाशधानादिहविष्कसवनीयमात्रेविषयीभूतान्वयानुपप
त्तीतिविषयीभूतस्यान्वयोयस्यांतादृशानुपपत्तीत्यर्थःविपर्ययविरोधिज्ञानेतिचंद्रःप्रकृष्टप्रकाशोनवेत्यादिधीविरोधियत्प्रकृष्टप्रकाशत्ववैशिष्ट्यधीद्वारकमुक्तप्रकाशत्वोप
लक्षितस्वरूपज्ञानंतदित्यर्थःननुविषयाभेदेपूर्वोत्तरज्ञानयोरविरोधित्वविरोधित्वरूपवैचित्र्यमनुपपन्नंतत्राहान्यथेति।प्रश्नमात्रेति।उत्तरवाक्यसमानविषयकाप्रामाण्य

पम॰ २२४

CC-0. In Public Domain. Digitization by eGangotri

अथवाऽनुवादस्यसतिसंभवेसन्निहितगामित्वेनाग्नेयत्वादिनैवोद्देश्यतानत्वपूर्वघटितरूपेणातादृशलक्षणायांमानाभावात्। प्रधानापूर्वार्थत्वस्याविशेषेणा-
ग्नेयादेरिवप्रयाजादेरपिप्रधानत्वापत्तेः नचैवमुक्तांगानामतिदेशोच्छेदः अपूर्वविशेषार्थत्वइवाग्नेयाद्यर्थत्वेपितद्वत्कुर्यादित्यतिदेशेनाग्नेयादिस्थानापन्नेसौर्यादा
वतिदेशोपपत्तेः एवंचव्रीहीन्प्रोक्षतीत्यादौव्रीहित्वादिनैवोद्देश्यसम्बन्धात्सुतरांव्रीहित्वादिविशिष्टोद्देशेनप्रोक्षणादिविधिःयद्यपिव्रीह्यादिस्वरूपस्यप्रोक्षणाद्यसा
ध्यतातथापिप्रोक्षणादिविशिष्टव्रीहीणामेवकल्पितवाक्यांतरेणापूर्वार्थत्वंकल्प्यतांनतुव्रीह्यादिपदेष्वेवापूर्वसाधनलक्षणानिषादस्थपत्यधिकरणविरोधापत्तेः
अथवोपस्थितत्वाल्लाघवाच्चविजातीययागसाधनव्रीहित्वादिकमेवलक्ष्यतांनत्वपूर्वसाधनत्वंनचविजातीययागेप्रोक्षणादिभिन्नासामग्रीक्लृप्तायेनतत्रा
पितदसाधनत्वमाशंक्येतइतिप्राप्तेविजातीययागसाधनत्वेनोद्देश्यतास्वीकारेपिव्रीहित्वादिकंनोद्देश्यतावच्छेदकेनिवेशतेतत्रयुक्तैर्वक्ष्यमाणत्वादितिश्या
माकादिष्वपिप्रोक्षणादिकंसिध्यत्येवपरंतुविजातीययागसाधनत्वेननोद्देश्यतासंभवतिप्रोक्षणादिकंविनापिदेवतोद्देशेनद्रव्यत्यागरूपस्ययागसामान्य
स्योत्सत्तासामान्यस्यचविशेषात्मकतामंतरेणापर्यवसानेनाग्नेयादिरूपविजातीयत्वस्यतत्रावश्यकत्वात्विशेषांतरत्वस्यतत्राभावात्तथाचव्रीह्यादिस्वरूपस्येव-
विजातीययागसाधनत्वविशिष्टस्वरूपस्यापिप्रोक्षणाद्यसाध्यत्वेनतदुद्देश्येनविध्यानर्थक्यादपूर्वसाधनत्वेनैवप्रोक्षणादिविध्युद्देश्यता। एवंप्रयाजादिवि
ध्युद्देश्यताप्यपूर्वसाधनत्वेनैवापूर्वप्रयोजकयोग्यतायाःप्रधानेजनकत्वेननप्रयाजादीनांप्रधानत्वाद्यापत्तिः। यत्तुव्रीहित्वादिनैवप्रोक्षणादिविधेरुद्दे-
श्यतातदानर्थक्यवारणायतुपश्चात्प्रोक्षणादिमद्व्रीहित्वादेरपूर्वार्थत्वंकल्पितवाक्येनेत्युक्तंतत्रव्रीहित्वादिविशिष्टकर्मकभावनायांप्रोक्षणादिसाधनस्या
योग्यतानिश्चयेनशाब्दबोधासंभवेननिषादस्थपतिन्यायानवतारात् तस्मादपूर्वसाधनत्वस्यश्यामाकादावपिसत्त्वात्प्रकृतिवत्कुर्यादिति शब्देनप्रकृति
सम्बन्धियज्जातीयार्थंयज्जातीयंकृतंविकृतिसम्बन्धितज्जातीयार्थंतज्जातीयंकुर्यादितिबोधनात् विकृत्यपूर्वसाधनश्यामाकाद्यर्थंप्रोक्षणाद्यनुष्ठा
नसिद्धिरथापूर्वप्रयोजकत्वरूपापूर्वसाधनत्वघटकानांयागत्वादीनांनिवेशआवश्यकोऽपूर्वादिकंप्रत्यनन्यथासिद्धनियतपूर्ववर्त्तितावच्छेदकरू-
पेणयागादिनिष्ठापूर्वादिसाधनत्वेनतस्यघटितत्वात्तथाचापूर्वसाधनयागसाधनप्रदेयद्रव्यसाधनावघातादिसाधनोलूखलमुसलोद्देशेनविहितं
प्राकृतंप्रोक्षणंनैवारश्चरुर्नखावपूतानामितिविहितचरौनखेषूलूखलादिस्थानीयेष्ववघातत्वविशिष्टाभावान्नप्रोक्षणादिसिद्धिरितिप्राप्तेसाधना-
स्वशक्तिविशेषरूपत्वेनाखंडत्वादवच्छेदकाघटितत्वात् साधनावच्छेदकस्ययागत्वव्रीहित्वावघातत्वादेर्नापूर्वप्रयोजकत्वशरीरेनिवेशोगौरवात्।
तत्तत्साधनताश्रयत्वेननिवेशोप्यनतिप्रसंगाच्चतस्मादपूर्वसाधनताविशेषाश्रयनिरूपितसाधनताविशेषाश्रयत्वादेरुद्देश्यतावच्छेदकस्यनखा
दिष्ववघाताद्यभावेपिवैतुष्यसाधनक्रियासाधनत्वेनानयायान्नेषुप्रोक्षणादिसिद्धिः। अथव्रीहीन्प्रोक्षतीत्यादौयागत्वावघातत्वादेरश्रुतस्यानिवेशेपि
श्रुतस्यव्रीहित्वादेस्त्यागेमानाभावोयुगपद्वृत्तिद्वयस्यविरुद्धत्वेप्यपूर्वप्रयोजकव्रीहित्वादिनैवलक्षणासंभवस्तथाचश्यामाकादिषुव्रीहित्वाद्यभावान्नप्रोक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ॰ सि॰ पदार्थाधीनत्वे स्वरूपे प्रकृष्टप्रकाशादितावत्पदार्थवैशिष्ट्यधीद्वारकत्वे इतरव्यावृत्तिफलकत्वेन प्रकृष्टप्रकाशेतरनक्षत्रादितादात्म्यधीनिवृत्तिफलकत्वेन। तावत्पदार्था
टी॰ ल॰ न्नक्षत्रादितादात्म्यज्ञानानिवृत्तिः सर्वानुभवसिद्धेत्याह अन्यथेति लक्ष्यं तेलक्षणया बोध्यते गंगासम्बन्धिन एव लक्ष्यत्वेन ज्ञातत्वात्तद्देवलक्षणया बोध्यत इति भावः वैयर्थ्या
५५ दिति। व्रीह्यादिस्वरूपस्य प्रोक्षणाद्यसाध्यत्वेन तत्साध्यकभावनायां साधनत्वेन प्रोक्षणादिनिबंधनं व्यर्थं भावनाभाव्यं प्रतिसाधनत्वपर्यवसानार्थं हि भावनां प्रति
साधनत्वेन विधिरिति भावः वैयर्थ्यादपूर्वसम्बन्धित्वलक्षणायामिति योजना व्रीहीणामपूर्वसम्बन्धित्वे मानमाह व्रीहिभिर्यजेतेत्यादिवाक्यसिद्धेति यागस्वरूपेऽ
नर्थकत्वादुक्तवाक्येनाप्यपूर्वसाधनयागमुद्दिश्य व्रीहिविधानाद्यागद्वारापूर्वसम्बन्धित्वं लभ्यते तथा चापूर्वस्य प्रोक्षणादिशून्यव्रीहिप्रयोज्ययागेन सिद्धेर्माना
भावेनापूर्वसम्बन्धित्वविशिष्टमुद्दिश्य प्रोक्षणादिसाधनकभावनाविधिर्नैव्यर्थ इति भावः वस्तुगत्या व्रीहित्वादीति प्रदेयनिष्पादकतत्तत्क्रियाद्वारकस्यापूर्व
प्रयोजकत्वस्य लक्ष्यतावच्छेदकत्वाद्व्रीहीणामेव तद्वत्त्वेन लक्ष्यते इति भावः प्रोक्षणावघातादीनां व्रीहित्वादिविशिष्टमुद्दिश्य विधानमपूर्वसाधनत्वविशिष्टमुद्दि

न स्वरूपमात्रस्य ज्ञेयत्वेपि स्वरूपज्ञानस्य तावत्पदार्थाधीनत्वे सत्येव तावत्पदार्थेतरव्यावृत्तिफलत्वेन सर्वपदानां सफलत्वात् अन्यथा संशयाद्यनिवृ
त्तेरनुभवसिद्धत्वात् ननूत्तरस्य प्रकृष्टत्वादिविशिष्टबोधपरत्वाभावे तात्पर्यं तोयः कश्चिच्चंद्र इत्येवावबोधनाद्वस्तुनोपस्य कस्यापि चंद्रत्वं स्यात् तात्पर्यं
विषये चायं चंद्र इति लक्ष्यलक्षणरूपोद्देश्यविधेयविभागाभावेन चंद्रबुभुत्साया अनिवृत्तिः कश्चंद्र इति प्रश्नस्योत्तरं च न स्यादिति चेत् न यथा
हि गंगासंबंधित्वविशिष्टे तात्पर्याभावेपि वस्तुगत्या गंगासंबंध्येव तीरं गंगापदेन लक्ष्यते यथा वा व्रीहीन् प्रोक्षतीत्यादौ व्रीह्यादिस्वरूपे प्रोक्षणा
दिविधानवैयर्थ्यात् व्रीहिभिर्यजेतेत्यादिवाक्यसिद्धापूर्वसंबंधित्वलक्षणायामपि वस्तुगत्या व्रीहित्वाद्याश्रयीभूता एव व्यक्तयो व्रीह्यादिपदे
र्लक्ष्यंते तथा प्रकृते प्रकृष्टप्रकाशपदाभ्यां वस्तुगत्या स्वाश्रयीभूतैव व्यक्तिर्लक्ष्यते न तु या काचिदिति विशिष्टतात्पर्याभावेपि न पूर्वोक्तदोषः॥६

स्य वा आद्ये श्यामाकचर्वादौ व्रीहित्वाद्यभावात्प्रयोजकाभावेन प्रोक्षणादिलोपः द्वितीये तु श्यामाकादीनामप्यपूर्वसाधनत्वात्प्रोक्षणादीनामूहः यद्यपि हि प्रकृतौ य रम॰
स्य यत्सम्बन्धः श्रुतस्तस्य विकृतावन्यथाभावेन तत्सम्बन्धज्ञानमूहस्तथापि प्राकृतापूर्वीयया दृशोपकारविशिष्टोद्देशेन प्रकृतौ यद्विहितं वैकृतापूर्वीयतादृशो २२५
पकारविशिष्टोद्देशेनातिदेशे स सैव सन्निधत्ते अन्यथाऽग्न्यादिपदयुक्तस्यैवं मंत्रस्यादृष्टादिप्रयोजनविशिष्टसूर्यादिदेवतोद्देशेनातिदेशे सौर्यादौ सूर्यादिपदस्याग्न्यादिपदस्थानेऽग्न
ये त्वा जुष्टमित्यादिमंत्रेषूहो न स्यात् वैकृतापूर्वीयप्राकृतोपकारविशिष्टोद्देशेनातिदेशे तु प्रकाश्यत्वरूपप्राकृतोपकारविशिष्टसूर्यादिदेवताया अग्न्यादिपदेन साधयितुमश
क्यत्वादग्न्यादिपदस्थाने सूर्यादिपदाहसिद्धिरत एवोपकारपृष्ठभावेनैव पदार्थानामतिदेश इति दशमे वक्ष्यते तस्मात्प्राकृतापूर्वीयया दृशया दृशोपकारः येन येन साधितः
वैकृतापूर्वीयतादृशतादृशमुपकारं तेन तेन साधयेदित्येवंरूप एवातिदेश ऊहप्रयोजकः तत्रारादुपकारकप्रयाजादिस्थलेपि यद्यप्युद्देश्यसमभिव्याहारो नास्ति तथापि प्रकरणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रातिपदिकार्थतावच्छेदकत्वस्य चंद्रपदार्थतावच्छेदकत्वस्य प्रातिपदिकार्थत्वनियतत्वेन चंद्रपदार्थत्वव्याप्यत्वेन अप्रातिपदिकार्थे चंद्रपदार्थभिन्ने तदवच्छेदकत्वस्य चंद्रपदार्थतावच्छेदकत्वस्य योयत्पदार्थतावच्छेदकः सतत्पदार्थ इतिसामान्यतोनियमः पदानां विशिष्ट एव शक्तिरन्यथा शक्यान्यस्वशाब्दधीप्रकारत्वानुपपत्तेरितिभावः दुर्वारमेवेति ननु चंद्रपदार्थतावच्छेदकं चंद्रत्वं जातिरूपमेव परं तु लक्षणावाक्यं चंद्रपदवाच्यत्वं प्रकृष्टप्रकाशाश्रये ऽवगाहते न तु चंद्रपदवाच्यतावच्छेदकत्वं प्रकृष्टप्रकाशे इतिचेन्न तथा सति लक्षणवाक्यस्यानुवादकत्वापत्तेः तेजस्त्वाद्युपहिते चंद्रपदवाच्यत्वस्य पूर्वं ज्ञातत्वात्प्रकृष्टप्रकाशानुपलक्षितेपि चंद्रपदवाच्यत्वस्य निराकरणासंभवाच्च अथा प्रकृष्टप्रकाशो न चंद्रपदवाच्य इत्यत्र तात्पर्यमिति चेन्न पदद्वये पि लक्षणापत्तेरप्रकृष्टप्रकाशस्य चंद्रत्वस्य चंद्रपदवाच्यत्वेन बाधाच्च तस्माद्दूटो ज्ञात इत्यादौ घटत्वादेर्ज्ञाततावच्छेदकत्वमिव लक्षणावाक्ये प्रकृष्टप्रकाशादेश्चंद्रादिपदवाच्यतावच्छेदकत्वं लभ्यते विधेयतावच्छेदके उद्देश्यतावच्छेदकावच्छिन्नत्वभानस्य व्युत्पत्तिसिद्धत्वात्तथा च वाच्यतावच्छेदकत्वेन तस्यावश्यं वाच्यत्वं दुर्वारमिति तदंगीकारेण चंद्रः प्रकृष्टप्रकाश इत्यादिलक्षणवाक्येनान्योन्याश्रयवाच्यत्वविशिष्टलाक्षणिकत्वे न सहप्रयोगोपपादनापेक्षया मन्मतसिद्धश्चैक

प्रातिपदिकार्थतावच्छेदकत्वस्य प्रातिपदिकार्थत्वनियतत्वेनाप्रातिपदिकार्थे तदवच्छेदकत्वस्य वक्तुमशक्यत्वात् तथा च प्रकृष्टप्रकाशस्य प्रातिपदिकार्थतावच्छेदकत्वे प्रातिपदिकार्थत्वं दुर्वारमेव ननु पृथिवीत्ववती पृथिवीत्यादौ पृथिवीत्वस्य विधेयेन पृथिवीप्रातिपदिकार्थत्वेन नानन्वयः पृथिवीत्वस्य पृथिवीप्रातिपदिकार्थत्वात् सहप्रयोगस्तु पृथिवीशब्दस्य तद्व्यवहर्तव्यतापर इति तत्र व्यभिचार इति चेत न पृथिवीशब्दार्थत्वेन पृथिवीत्वजातिविशिष्टमजानतः पृथिवी पदेन जातेरुपस्थित्यभावादनन्वय एव स्यादिति पृथिवीत्वजातिविशिष्टे पृथिवीशब्दार्थत्वग्रहोऽवश्यं।

देशपरत्वमादाय मुख्यार्थपरत्वेन लक्षणवाक्यस्याखंडार्थत्वमुचितमिति भावः। ननु पृथिवीत्ववती पृथिवीत्यादिनान्योन्याश्रयेकार्थक। (१प्रागेव श्रोतुर्वक्तव्यः॥६ त्वस्य सर्वसम्मतत्वादेकपदस्य स्ववाच्यत्वविशिष्टपरत्वेनैव सहप्रयोग उपपादनीयस्तथा च पृथिवीत्वविशिष्टे पृथिवीपदवाच्यत्वविशिष्टान्वये पृथिवीत्वे वाच्यतावच्छेदकत्वस्य व्युत्पत्तिवलाल्लाभेन वाच्यतावच्छेदकस्य वाच्यत्वनियमाद्विशेषणीभूत पृथिवीत्वे वाच्यत्वविशिष्टान्वयेपि न क्षतिरिति लक्षणवाक्यस्याखंडार्थत्वनियमे व्यभिचार इत्याशयेन शंकते ननु पृथिवीति ननु पृथिवीपदस्य स्ववाच्यताविशिष्टपरत्वोक्तिर्न युक्ता मुख्यार्थयोरेवान्वयसंभवान्न त्वन्न मुख्यार्थयोरन्वयेवाच्ये उद्देश्यतावच्छेदकरूपेण विधेयतायेन निराकांक्षत्वभिया मुख्यार्थस्त्यज्येत स्वरूपतो हि पृथिवीत्वं विधेयतावच्छेदकं पृथिवीत्वत्वेन तदुद्देश्यतावच्छेदकं तत्राह सहप्रयोगस्त्विति सहप्रयोगो हीत्यर्थः प्रकृते त्यादिः। तद्व्यवहर्तव्यतापरः पृथिवीशब्दवाच्यतापर एव पृथिवीत्वत्व विशिष्टरूपेणाप्युद्देश्यत्वे पृथिव्यन्वयो निराकांक्ष एवातएव गुणानां गुणत्वाभिसम्बन्ध इत्यत्राप्यनाकांक्षत्वमुक्तं गुणवद्गमानादावतः पृथिवीपदस्य स्ववाच्यताविशिष्टपरत्वमावश्यकं प्रकृते इति भावः। उपस्थिस

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० सि० टी० ल० २६

णादिसिद्धिरितिप्रासेव्रीहित्वादिनिवेशं विनैव तत्तत्साधनताविशेषनिवेशेऽनतिप्रसंगाद्व्रीह्यादिनिष्ठसाधनताविशेषलाभार्थमेव व्रीह्यादिपदोपादानात्तन्निवेशे मानाभावः यव
पिव्रीहियवनिष्ठयोः साधनत्वयोर्गुणाङ्गेदस्तथाप्यपूर्वप्रयोजकताविशेषाश्रयप्रदेयानिरूपितायातन्नव्यापारनिष्ठसाधनताघटितप्रयोजकतातत्त्वेनोद्देश्यतावच्छेदकलाघवे
ष्वपिप्रोक्षणविधिलाभ इति नव्यरीत्या चरितेष्वधिकरणेषु नवमप्रथमे स्थितं। लक्ष्यलक्षणभावाभावेपीति। विशेष्यविशेषणभावरूपोयः पराभिमतो लक्षणवाक्यार्थीनो
लक्ष्यलक्षणधर्मस्तदभावेपीत्यर्थः तदुभयप्रतिपादकपदाभ्यां चंद्रत्वविशिष्टस्य प्रकृष्टप्रकाशत्वविशिष्टस्य च प्रतिपादकपदाभ्यां। एकस्वरूपस्येति। कश्चंद्र इति प्रश्नस्य प्र
कृष्टप्रकाश इत्येवोत्तरं प्रश्नवाक्यस्थचंद्रादिपदानुषंगेणैवोत्तरवाक्यार्थबोधस्य व्युत्पत्तिसिद्धत्वात् अनुषक्तस्यापि चंद्रादिपदस्य प्रश्नवाक्यस्थचंद्रादिपदसमानविष
यकत्वं तथैव व्युत्पत्तेस्तथा च परमते चंद्रत्वादिविशिष्टस्यैव मन्यते सुहृच्चंद्रव्यक्तेः प्रश्नविषयत्वादुत्तरवाक्येपि विषयत्वं तस्य च पूर्वज्ञातनिष्ठविषयतात्वेनोद्देश्यतात्वमि
वाज्ञाननिवर्त्तकतावच्छेदकविषयतात्वेन विधेयतात्वमपि युक्तं नहि विशेष्यतात्वमुद्देश्यतात्वव्यापकं पृथिव्यां गंध इत्यादौ पृथिव्यादिवि षयतायां व्यभिचारात् नचोद्देश्य

अयं चंद्र इति लक्ष्यलक्षणभावाभावेपि तदुभयप्रतिपादकपदाभ्यामुपस्थितस्यैकस्वरूपस्यैवोद्देश्यविधेयभावसंभवेन बुभुत्सानिवृत्तेरुत्तरत्वस्य
चसंभवात् निष्प्रकारस्यापि ज्ञानस्य संशयादिनिवर्तकत्वं प्रागुपपादितं तदेतच्चिः कृष्टप्रश्नोत्तरे तावच्चंद्रप्रातिपदिकार्थमात्रविषये चंद्रप्रातिपदिका
र्थश्च प्रकृष्टप्रकाशाश्रयीभूतः साधारणी विशेष्यभूता व्यक्तिः नतु प्रकृष्टप्रकाशविशिष्टा प्रकृष्टप्रकाशश्चंद्र इति सहप्रयोगानुपपत्तेः विशेष्यव्य
क्तिश्चाखंडेत्यखंडार्थतैव ननु गामानयेत्यत्र गामुद्दिश्यानयनविधानाद्यथा गोत्वस्योद्देश्यतावच्छेदकत्वादानयनेनानन्वयेपि प्रकारत्वं तथा प्रकृ
तेपि प्रकृष्टप्रकाशस्य चंद्रप्रातिपदिकार्थत्वेनानन्वयेप्युद्देश्यतावच्छेदकत्वात् प्रकारत्वं दुर्वारं नहि गामानयेत्यत्र गोत्वं विनान्वय इति चेन्न ॥ ५

तात्वं विधेयतानिरूपितत्वव्याप्यं विषयतानां ——— निरूप्यनिरूपकभावस्य सांसर्गिकविषयताशालिज्ञानस्थल एव सर्वसंमतत्वेनाखंडबोधस्थले तदभावेप्युक्तलक्ष
णोद्देश्यतात्वस्यापह्नोतुमशक्यत्वादिति भावः बुभुत्सानिवृत्तेरुत्तरत्वस्य चेति। बुभुत्सा स्वविषयबोधेनैव निवर्त्या स च प्रकृते मुहूर्त एवेति स एव निवर्त्तकस्तज्जनकत्वादेव च वाक्य
मुत्तरमिति भावः आश्रयीभूता। उपलक्षिता न तु प्रकृष्टप्रकाशश्चंद्र इत्यादौ चंद्र इत्यस्य प्रकृष्टप्रकाशविशिष्टार्थकत्वे सहप्रयोगानुपपत्तेरखंडार्थकत्वमुक्तं तद्युक्तं चंद्र इत्यस्य
चंद्रप्रातिपदिकवाच्यार्थकत्वसंभवेन सहप्रयोगोपपत्तेरखंडार्थकत्वे मानाभावादिति शंकते ननु गामानयेत्यादि। आनयनविधानात् आनयनकर्मत्वविधानात् कर्मत्व
स्य प्रत्ययार्थत्वेन विशेष्यत्वेपि विधेयत्वं गुणानां गुणत्वाभिसम्बन्ध इत्यादावभिसम्बन्धस्यैव बोध्यं उद्देश्यतावच्छेदकत्वादिति आनयनकर्मतान्वितगोव्यक्तौ प्रकारत्वा
त्। आनयनेन आनयनकर्मत्वेन प्रकृष्टप्रकाशस्येति विधेयेनेति शेषः। प्रातिपदिकार्थत्वेनेति चंद्रप्रातिपदिकार्थस्य तादात्म्येन विधेयत्वेपि तदर्थत्वस्यापि तच्छरीर
गवेशेन विधेयत्वोक्तिः दुर्वारमिति। तथा च प्रकृष्टप्रकाशविशिष्टे चंद्रपदार्थत्वविशिष्टमुत्तरवाक्यजबुद्धौ विशेषणमिति सा नाखंडविषयकेति भावः ॥ ॥

राम० २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैयधिकरण्यापत्तेः व्यावृत्तिप्रश्नस्यव्यावर्त्तकबोधकोत्तरस्यचसाक्षाद्विषययोर्भेदाद्वैयधिकरण्यमितिभावः श्रुतार्थत्यागापत्तेः कश्चंद्र इतिप्रश्नस्यजिज्ञासितश्चंद्र इत्यर्थकत्वेनश्रुतत्वाज्जिज्ञासितव्यावर्त्तकधर्मयुक्तश्चंद्र इत्यर्थकत्वेश्रुतार्थत्यागापत्तेः। एवंप्रथमेपिजिज्ञासितव्यावृत्तिः कश्चंद्र इतिप्रश्नार्थोनश्रुत इतिबोध्यंलिंगस्यबलवत्त्वादिति। यद्यपिप्रकृतेलिंगवाक्ययोरेकविषयकत्वेननविरोधस्तथापिवाक्यस्यलक्षणायाप्रवृत्तौलिंगज्ञानाधीनवह्निस्मृतेरपेक्षाया आवश्यकत्वेनलिंगलिंगिसम्बन्धज्ञानजानुमित्याकांक्षोच्छेदे नवाक्यप्रवृत्तिरितिप्रथमप्रवृत्तत्वेनबलवत्त्वंनव्याहतमितिभावः असंकीर्णचंद्रस्वरूपसिद्धौ विपर्ययविरोधिचंद्रस्वरूपज्ञाने कल्पनीयमिति। कश्चंद्र इतिप्रश्नोऽसाधारणचंद्रधर्मवैशिष्ट्यबोधकस्ताहृशोत्तरकत्वात् योयोयद्धर्मवैशिष्ट्यबोधकोत्तरयुक्तःप्रश्नःसतद्धर्मवै।

यदात्तुतत्तत्व्यावृत्तेर्वक्तुमशक्यतामवगत्यव्यावर्त्तकधर्मवैशिष्ट्यमेवपृच्छतितदासुतरांप्रश्नोत्तरयोर्विशिष्टपरत्वमितिनिरस्तंप्रथमेप्रश्नोत्तरयोर्वैयधिकरण्यापत्तेःद्वितीयेश्रुतार्थत्यागापत्तेःप्रथमेपिश्रुतार्थपरित्यागःस्थितएवनचानन्यगत्याश्रुतार्थपरित्यागाभ्युपगमः गत्यंतरस्योक्तत्वात् ननुप्रश्नोत्तरयोर्वैयधिकरण्यापत्तेर्यदिस्वरूपेलक्षणातदावह्निप्रश्नेधूमोस्तीत्युत्तरेवन्हौलक्षणास्त्विति चेन्नधूमोस्तीतिवाक्येनाहत्यशक्त्यालिंगेबोधितेततएववन्हिबोधोपपत्तौतात्पर्यानुपपत्ति। कल्प्यलक्षणायाअयोगात्श्रुतिलिंगाधिकरणन्यायेनवाक्यापेक्षयालिंगस्यबलवत्त्वाच्चप्रकृतेचासंकीर्णचंद्रस्वरूपसिद्धौवाक्यातिरिक्तप्रमाणाभावेनवैषम्यात् ननुकिंलक्षणश्चंद्र इत्यस्यासाधारणधर्मविषयकस्यकतमश्चंद्र इत्यस्यजातिविषयकस्य अनयोःकतरश्चंद्र इत्यस्यजातिगुणक्रियाभिःपृथक्करणरूपनिर्द्धारणविषयकस्यप्रश्नस्योत्तर इवात्रापिप्रतिवचनेलक्षणोक्तेः प्रश्नेपिप्रकृष्टप्रकाशोऽप्रकृष्टप्रकाशोवेतिधर्म्मवाचकंपदंकल्पनीयंतत्सूचककिंशब्दप्रयोगाच्चेतिचेत् नवन्हिप्रश्नेधूमोस्तीति प्रतिवचनदर्शनेनप्रतिवचनोक्तत्वस्यप्रष्टुःबुभुत्सितत्वेऽतंत्रत्वात् अथतत्रबुभुत्सितबोधोपयुक्तत्वान्नदुक्तिःप्रकृतेपिलक्षकतयापिनोपयोगइतिकेनतुभ्यमभ्यधायिकिंलक्षणइत्यादिप्रश्नतथात्वेतद्वाचकपदवत्त्वस्योपाधित्वात् क्वचिद्दर्शनमात्रस्याप्रयोजकत्वाच्चकिंशब्दस्यबुभुत्सासूचकत्वेनतस्यधर्म्मबुभुत्सानियतत्वाभावाच्चएवंचप्रश्नेधर्म्मवाचिपदाभावात्तदनुरोधिन्युत्तरेधर्मवाचकंपदंस्वरूपपरमेव॥

शिष्ट्यबोधकोयथाकिंलक्षणश्चंद्र इत्यादिप्रश्न इत्यनुमेयमित्यर्थःतत्सूचकेति। उक्तविकल्पसूचकेत्यर्थः अतंत्रत्वात् अव्याप्यत्वात् लक्षकतया असंडबोधोपयुक्तवैशिष्ट्यबोधविषयतयाकिंलक्षणइत्यादिप्रश्नतथात्वेकिंलक्षणश्चंद्र इत्यादिप्रश्नवदसाधारणधर्मबोधकत्वानुमाने उपाधित्वादिति।नचकिंशब्दस्योक्तविकल्पसूचकत्वेन धर्मवाचकपदवत्त्वात्साधनव्यापकउपाधिरिति वाच्यंकिंशब्दस्यजिज्ञासितचंद्रस्वरूपवाचकत्वेनस्वरूपेपिविकल्पसूचकत्वेपिधर्मविकल्पासूचकत्वात् तदिदमुक्तंबुभुत्सासूचकत्वेनेतिस्वरूपबुभुत्सासूचकत्वस्यापिसंभवेनेतितदर्थः तदनुरोधिनीति। प्रश्नापेक्षयाचरमत्वेनप्रश्नबोधितबुभुत्सानिवृत्तिंप्रतिशेषत्वेनचोत्तरवाक्यंप्रश्नापेक्षयादुर्बलमतएवाकाशस्तल्लिंगादित्यधिकरणेप्रश्नवाक्यस्थत्वेन लोकपदस्यप्राबल्येनतदनुसारेणाकाशादिपदंब्रह्मार्थकमिति अस्यलोकस्यकागतिरित्याका पईदितिविनाकोनिर्णीतमितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰ सि॰ ।प्रकृत्यर्थेतराहृत्तित्वेनभावप्रत्ययबोध्यतेइतिव्युत्पत्तिग्रहेसत्येवभावप्रत्ययादर्थबोधइतिपृथिव्याःपृथिवीप्रकृत्यर्थतज्ज्ञानस्यपूर्वमनुत्पत्तौनपृथिवीत्वपदार्थज्ञानसंभवइ
टी॰ स॰ तिभावः।इत्याद्यर्थइतिपृथिवीत्वपदेउक्तजातित्वेनलक्षणयालभ्येइतिशेषः नपृथिवीपदवाच्यमिति ननूक्तजातित्वोपहितेपृथिवीपदवाच्यत्वमस्त्येवउक्तजातित्ववि
पृ॰ शिष्टेतदनन्वयस्तुदृष्टएव अन्यथापृथिवीत्वत्वविशिष्टेतदनन्वयएवदोषस्त्वेनकुतोनोक्तइतिचेन्नउक्तजातित्वस्यसत्ताद्रव्यत्वादिसाधारण्येनतदुपहितस्यतद्वा
१७ च्यत्वाभावात् नचगंधवदन्यावृत्तिगंधव्यापकसमवायीपृथिवीपदवाच्यइत्यर्थसंभवात्तादृशव्यापकधर्मेपिवाच्यत्वान्वयइतिवाच्यंतादृशधर्मोपस्थित्यभावेनतद
संभवात्।तादृशधर्मेघटसमवेतत्वादिविशिष्टत्वादिनावाच्यतावच्छेदकत्वशंकासंभवेनपृथिवीसामान्यस्यपृथिवीपदवाच्यतापर्यवसानाच्चअयतादृशधर्मस्य।
स्वरूपतोवाच्यतावच्छेदकत्वबाधेनतथापर्यवसानमितिचेन्नस्वरूपतउद्देश्यतावच्छेदकधर्मस्यत्वेएवतथाबोधस्यव्युत्पन्नत्वात्पदद्वयजहल्लक्षणापेक्षयास्व।

तथाचवचनवैफल्यमित्यनन्यगत्याजलादिव्यावृत्तगंधसमानाधिकरणजातिमतीपृथिवीत्याद्यर्थेपर्यवसितमुत्तरंगंधसमानाधिक
रणजातिमत्त्वादिकंचन पृथिवीपदवाच्यमितिकथंनानन्वयः व्यवहर्तव्यतालक्षणयासहप्रयोगोपपादनंचायुक्तंव्यवहर्तव्यतायांहिजहल्लक्षणातत्र
चस्वार्थहानिः स्वरूपेतुजहदजहल्लक्षणातत्रस्वार्थान्वयइतिस्वरूपेजहदजहल्लक्षणायाएवोचितत्वात् तदुक्तंव्याप्तेश्चसमंजसमि
त्यधिकरणेभाष्यकृद्भिः लक्षणायामपि सन्निकर्षविप्रकर्षौभवत इति ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्रकिमोंकारस्यदृशामुद्गीथ
मित्यर्थः किंवोद्गीथावयवमोंकारमितिवीक्षायांगौण्यांवृत्तौस्वार्थहानेरवयवलक्षणैवज्यायसीसन्निकृष्टत्वादितितत्रनिर्धारितंएतेनधर्मिणःशब्दस्यसा
मान्यतोज्ञातत्वान्नक्षत्रादिभ्योव्यावर्त्तकधर्मस्यव्यावृत्तेश्चघटादौप्रागेवज्ञातत्वाद्विशिष्टविषयेएवप्रश्नोत्तरेतत्रपदव्यावृत्तिवैशिष्ट्यमेवप्रष्टुःसाक्षाद्बु
भुत्सितंतदापितत्तद्व्यावृत्तेःसमासहस्रेणापिवक्तुमशक्यतयावन्हिबुभुत्सायांधूममिवव्यावर्त्तकधर्मवैशिष्ट्यमेवाभिधत्तेनहिवन्हिबोधार्थस्यधूमोस्तीतिवा
क्यस्यनधूमेतात्पर्यंनवायागाक्षेपकस्ययदाग्नेयइत्यादिवाक्यस्यद्रव्यदेवतासंबंधे॥ (१)ज्ञार्थत्वस्यैवयुक्तत्वाच्चेतिभावः यत्तुपृथिवीपृथिवीशब्दार्थइत्यजानतोप्याप्तोप

देशेनपृथिवीत्वंपृथिवीत्वपदार्थइतिधीसंभवइतितत्तुच्छंपृथिवीत्वपदात्पृथिवीत्वत्वेनबोधोहिनसमुदायशक्त्याप्रसक्त्यानंत्यप्रयोगेनतदभावात्किंतुइतरादिशक्तिभिर्भा
वप्रत्ययेनेतराद्युपस्थितौपृथिव्योःशक्तिग्रहाधीतपृथिव्युपस्थितौचपृथिव्यन्यासमवेतत्वस्वरूपेणबोधस्तथाचतयोःशक्तिमजानतोपीतिकथं। अथसमुदा राम॰
यशक्तिभ्रमात्तथासंभवस्तथापिविशेषदर्शिनांतदसंभवएव।पृथिवीपदस्यस्ववाच्यत्वविशिष्टेलक्षणामंगीकृत्यापिदूषितंसेवायुक्तेत्याह व्यवहर्त्तव्यतेतिपृथि २२७
वीपदवाच्यतेत्यर्थः। सन्निकर्षविप्रकर्षौयुक्तत्वायुक्तत्वेस्वार्थहानेरिति। सिंहोवालइत्यादौसिंहादिपदस्यक्रूरत्वशूरत्वादिनेव ओमितिपदस्यप्राशस्त्यविशे
षेणगौण्यावृत्त्याबोधकत्वेमुख्यार्थहानिरितिभावः। अवयवलक्षणा। उद्गीथावयवत्वेनलक्षणासन्निकृष्टत्वात् उद्गीथमुख्यार्थघटितार्थधीप्रयोजकत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तु तमेव विदित्वेत्यादौ तत्पदं सहस्रशीर्षत्वादिविशिष्टरूपपरमित्यादि तत्र तत्पदस्य तद्बोधकत्वेपि तदन्याविषयकज्ञानस्य मोक्षहेतुत्वलाभेनाखंडार्थत्वस्यै र्यात् प्रपंचोपशमः स आत्मा स विज्ञेय इत्यादिना तुरीयस्य ज्ञेयत्वोक्तेश्च सामान्यव्याप्तावपि विशेषतः साध्यसिद्ध्यर्थं विशेषतो हेतुज्ञानावश्यकत्वाद् खंडमात्रनिष्ठ त्वसाध्यसिद्ध्यर्थं अखंडप्रश्नोत्तरत्वरूपहेतुमत्ताज्ञानस्य पक्षे वाच्यतया स्वरूपासिद्धिरित्याह। एवमित्यादितात्पर्यविषयस्य मुख्यतात्पर्यविषयस्य विवक्षि तत्वादिति तदर्थमात्रमुख्यतात्पर्यकत्वं साध्यतया विवक्षणीयमित्यर्थः नमुख्यत इति द्वारतया वांतरतात्पर्यत्वस्यैव तदिदमाह असाधारणेति उपायत्वेने ति सत्यत्वादिधर्मवैशिष्ट्यधीद्वारकस्यैवाखंडज्ञानस्य मोक्षहेतुत्वेन सत्यत्वादिधर्मप्रश्नोपियुक्त इति भावः कतर आत्मेत्यस्य पूर्वमैतरेयकोपनिषदि कोय मात्मेति प्रश्नस्य सत्तात्वस्वरूपमात्रविषयकत्वात् कतर आत्मेत्यस्य जघन्यत्वेन मुख्यतात्पर्याविषयजातिविषयकत्वनिर्णयोऽत एवोत्तरवाक्ये येन वा पश्य ति येन शृणोतीत्यादिना दर्शनादिकं चिन्मात्ररूपेण येन घटितं तदात्मकस्वरूपमिति निर्णीतं न हि दर्शनादिकं जातिमदात्मघटितं। एवं कतम आत्मेति वा

एवं सामान्यव्याप्त्यव्यभिचारेपि तद्बलादेतत्पक्षीकृत्याखंडार्थत्वसाधने अखंडार्थप्रश्नोत्तरत्वादिति पर्यवसितहेतावसिद्धेरनुद्धारादिति चेन्नैष दोषः तात्पर्यविषयस्यैवार्थत्वेन विवक्षितत्वात् यथा हि धर्मवाचकपदवत्वेप्युत्तरस्य न धर्मे मुख्यतस्तात्पर्यं तथा प्रश्नेपि तद्वाचकतमादिप्रत्यय सत्त्वेपि न मुख्यतस्तत्परत्वं असाधारणात्मस्वरूपस्य मुख्यतो बुभुत्सितस्योपायत्वेन तदुपयोगात् आत्मस्वरूपबोधस्यैव पुरुषार्थत्वात् न च स र्वस्याप्युत्तरस्य प्रश्ननिर्द्धारितधर्मिनिष्ठानिर्द्धारितैकधर्मपरत्वाद्धि रूढो हेतुरिति वाच्यं अनिर्द्धारितनिर्द्धारणत्वेनैवोत्तरतोपपत्तौ तादृग्धर्मपरत्वस्यो त्तरत्वाप्रयोजकत्वेन नियमासिद्धेः ननु कथं स्वरूपमात्रपरस्य निर्द्धारकत्वलक्षणवाक्यतादिति गृहाण न चैवमुत्तरजन्यज्ञानस्य निष्प्रकारकतया कथं सप्रकारकसंशयनिवर्त्तकत्वमिति वाच्यं निष्प्रकारकत्वेपि संशयनिवर्त्तकताया उपपादितत्वात्॥ वाजसनेयवाक्यस्य पूर्वमात्मैवास्य ज्योतिर्भवत्यात्मनै वायं ज्योतिषास्ते पल्ययते इत्यत्र अस्तमित आदित्य इत्यादिपूर्ववाक्योक्तस्वप्ने ज्योतिःशब्दितव्यवहारप्रयोजकत्वेन चिन्मात्ररूपात्मस्वरूपस्योक्तत्वेन मन आदावा त्मस्वरूपत्वविप्रतिपत्तिजसंशयनिरासायोक्तस्य कतम आत्मेत्यादेर्व्यवहारप्रयोजकचिन्मात्रविषयकत्वं न हि जातिविशिष्टात्मचिद्व्यवहारप्रयोजिकाः किंतु भसत्वा। पादकाज्ञानाभावोपहितेत्यसकृदुक्तं अत एव स एष नेति नेत्यात्मा स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष आनंदो जर इत्याद्युत्तरवाक्येष्वमुद्धात्मान मुक्त्वा अभयं वै ब्रह्म भवति य एवं वेदेत्युक्तमिति ध्येयं। यत्तु पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं नारायणं महाज्ञेयं विश्वात्मानं परायणमित्यादितैत्तरीयश्रुतेः सह स्रशीर्षं देवं विश्वाख्यं विश्वसंभवमित्याद्यनुवाकपूर्वोक्तत्वेन सहस्रशीर्षत्वादिमद्देवमुमुक्षुज्ञेयमेकधेत्यादिकं तु धर्मधर्मिभावादिभेदनिषेधकमिति तत्र सत्यत्वादेरि व सहस्रशीर्षत्वादेरपि द्वारत्वेनैवोपयोगसंभवेन धर्मधर्मिभावादिभेदनिषेधविषयकत्वेन संकोचे मानाभावान्नात्र काचन भिदेत्यादिना भेदसामान्यनिषेधाच्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आ॰ सि॰ टी॰ ल॰ उ॰ १८

।उपपादितत्वेनेति स्वरूपस्याज्ञातत्वेप्यसंकीर्णस्वरूपज्ञानेच्छासंभवादिनेत्यादिः व्यवहारकर्त्तव्यताव्यवहर्त्तव्यता तज्ज्ञानाज्ञानाभ्यामित्यादि॥ तज्ज्ञानेतद्व्यवहारस्यसंभवेन व्यवहर्त्तव्यताज्ञापनंव्यर्थंतद्ज्ञानेविशेषणाज्ञानेनतद्विशेषितव्यवहारज्ञापनमशक्यमित्यर्थः।लक्षणाबीजाभावात् व्यवहर्त्तव्यलक्षणाबीजाभावात् अन्यद्यप्रकृष्टप्र।

स्वरूपबुभुत्साया उपपादितत्वेनलक्षणाबीजाभावाच्चप्रश्नवाक्यस्थंचंद्रपदंतदसाधारणधर्म्मलक्षकंयत्तुलक्षणवाक्यंचंद्रव्यवहारकर्त्तव्यतावैशिष्ट्य परं अतोनाखंडार्थता चंद्रव्यवहारस्तुचंद्रपदविशेषितोव्यवहारः नतु चंद्ररूपार्थविशेषितइतितज्ज्ञानाज्ञानाभ्यांवैयर्थ्यबोधनाशक्यतादोषौनभवतः नच द्वंद्वव्यवहारस्यवशक्तिग्राहकोस्तुकिंलक्षणवाक्येनेतिवाच्यंउपायस्यउपायांतरादूषकत्वादितितच्चप्रश्नोत्तरवैयधिकरण्यापत्तेरुक्तत्वात् प्रश्नवाक्यस्थचंद्र शब्देलक्षणाबीजाभावात् असाधारणंचंद्रस्वरूपमज्ञात्वा तत्रचंद्रशब्दविशेषितव्यवहारवैशिष्ट्यस्यज्ञातुमशक्यत्वात्तज्ज्ञापनस्यावश्यकत्वेनतेनैववाक्यप्रामा ण्योपपत्तेर्व्यवहारकर्त्तव्यतापरत्वेमानाभावात् अतएवोक्तंमानांतरसिद्धप्रकृष्टप्रकाशवैशिष्ट्यमखंडसिद्धावुपायमात्रमितिअस्मिन्ज्योतिर्मंडलेकश्चंद्र इतिप्र॥ श्नसमयेप्रत्यक्षेणैवअन्यदापिप्रकारांतरेणतस्यज्ञातत्वादन्यथातस्यानुवाद्यत्वानुपपत्तेः चंद्रस्वरूपेतुज्ञातेप्यसंकीर्णज्ञानाभावाद्बुभुत्सोपपादितैवेतिप्रथमानु मानमनाविलंद्वितीयानुमानेपिनाप्रसिद्धविशेषणत्वबाधसत्प्रतिपक्षसाध्यवैकल्यादयोदोषाः तथाहिसाध्यंतावद्ब्रह्मप्रातिपदिकार्थमात्रनिष्ठत्वंब्रह्मप्रातिपदिका र्थविशेष्यनिष्ठत्वंअन्यथाब्रह्मपदस्ययौगिकत्वेनसखंडार्थत्वप्रसंगात् प्रातिपदिकार्थविशेष्यमात्रपरंभवतीतिसामान्यव्याप्तौदृष्टांतेनसाध्यवैकल्यमपिब्रह्मप्रा तिपदिकार्थमात्रविशेष्यनिष्ठत्वंहिअखंडार्थत्वमेवतत्प्रश्नोत्तरत्वहेतुव्युत्पादनमपिपूर्वोक्तप्रकृष्टादिवाक्यन्यायेनैवेतिनासिद्धिर्वाधोप्रश्नोत्तरवैयधिकरण्या पत्तिरूपविपक्षबाधकसध्रीचीनतयासत्प्रतिपक्षाप्रयोजकत्वोपाधीनामनवकाशः नचसत्यादिरूपप्रतिवचनेप्रश्नस्यकश्चंद्रइतिवदश्रवणादुत्तरानुसारे णप्रश्नवाक्येकल्पनीयेधर्मविषयकमेवतत्कल्प्यतेबाधकाभावात् तथाचासिद्धिरितिवाच्यंब्रह्मविदाप्नोतिपरंएकधैवानुद्रष्टव्यमित्यादिवा॥ क्यबलात् सत्यत्वादिवैशिष्ट्याविषयकस्यैवब्रह्मविषयकवेदनस्यमोक्षजनकत्वात्तदतिरिक्तबुभुत्साविरहेणतद्विषयकप्रश्नवाक्यस्यकल्पयि तुमशक्यत्वेनकश्चंद्रइतिवत् किंब्रह्मेत्येववाक्यंकल्प्यतइतिनासिद्धिः ननुकतमआत्मेत्यत्रकतरः सआत्मेत्यत्रचत्वंपदार्थप्रश्नोवाबहूनांजा॥ तिपरिप्रश्नेडतमच् द्वयोरेकस्यनिर्द्धारणेडतरजितिसूत्राभ्यांनिर्णीतजात्याद्यर्थकतमादिपदप्रयोगात्तत्प्रतिवचनेयोयंविज्ञानमयइत्यादौपक्षेत्वद भिमतहेतोरसिद्धिः नचयद्यत्प्रश्नोत्तरंतदखंडार्थमितिनब्रूमः किंतुयत्यत्प्रश्नोत्तरंतत्तदर्थमितिवाच्यं॥१काशवैशिष्ट्यस्येंद्रियासन्निकर्षकालेप्रकारांतरेण। अनुमानादिनाचंद्रः प्रकृष्टप्रकाशविशिष्टस्तमोनक्षत्रादिभिन्नत्वादित्यनुमानेन। चंद्रस्यप्रकृष्टप्रकाशइतिशब्दादिनाचप्रमीयतेइतिभावः।अनुवाद्यत्वेति। व्यवहर्त्तव्यंप्रतिप्रकृष्टप्रकाशादेरुद्देश्यत्वस्यावश्यंवाच्यत्वेनानुवाद्यत्वमावश्यकंज्ञातमुद्दिश्याज्ञातंविधीयतइतिस्थितेरितिभावः सामान्यव्याप्ताविति पूर्वोक्तरी

[तिः स्फुटैव ज्ञानजनकत्वात् अवधारणात्॥]

राम॰ २२८

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टत्वेपीत्यपिनाव्यक्तिमात्रंपदशक्यंजातिस्तुतत्त्वावच्छेदकमात्रंलक्ष्यत्वाभावद्वशक्यत्वाभावेप्यवच्छेदकस्यभानसंभवः उक्तंचएकंद्विकंत्रिकंचेत्यादिनाव्यक्तिमात्रा
स्यैवनामार्थत्वमितिनव्यमतंसंचितंनीलंचलमित्यादिनाम्नागुणकर्मप्रतीतेराह द्रव्यादिप्रातिपदिकादितिजिज्ञासान्यथानुपपत्त्येतियद्यपिनीलत्वादिविशेषरूपेणसंदेहा
द्विशेषरूपेणगुणादेर्नाभिधेयतातथापिविशेषजिज्ञासांप्रतिसामान्यतोज्ञानस्यहेतुत्वात्तदुपपत्तयेसामान्यतोगुणादिकमभिधेयमितिभावः सामान्यज्ञानात् गुणादि
सामान्यज्ञानात्तथाचगुणत्वकर्मत्वादिविशिष्टमिवसंख्यात्वादिविशिष्टमपिननामार्थइतिभावः।वचनविभक्त्यादिनाएकवचनद्वितीयादिविभक्तिभिःपदार्थमात्रेति।अन्वयांशे
ऽज्ञाताशक्तिःप्रयोजिकेतिकुब्जशक्तिवादस्त्विष्टः। अनाकांक्षितत्वेनेतियन्नुतमेवविदित्वेत्यादेःमुहुर्ज्ञानान्मोक्षइतिबुद्धेसत्यादिवाक्येविशेषणस्यानाकांक्षितत्वसिद्धिस्तस्याचस
त्यांतमेवेत्यादेस्तथावोधकत्वसिद्धिरित्यन्योन्याश्रयइतितन्नुच्छं तमेवेत्यादेःफलवाक्यत्वेनप्रथमप्रवृत्तत्वादाकांक्षोत्थापकत्वेनोपजीव्यत्वाच्चवलवत्त्वेनतदनुरोधेनसा
त्यादिवाक्येविशेषणासंसर्गस्यावांतरतात्पर्यविषयत्वकल्पनेपिमुख्यतात्पर्यविषयत्वाकल्पनात् अतएवकतरःसआत्माकतमआत्माअयंवावसत्वात्मातेकतमोभग

यत्तुपंचकत्वादिकंप्रातिपदिकार्थस्योक्तंतदनंगीकारपराहतंयुक्तिविरुद्धंचद्रव्यादिप्रातिपदिकाद्गुणकर्मणोरप्राप्तेः अन्यथाद्रव्यमित्युक्तेनीलंपीतं
वाचलतिनवेतिसंदेहोनस्यात् नचजिज्ञासान्यथानुपपत्त्यासामान्यतस्तदुक्तावपिविशिष्यानभिधानात्संदेहइतिवाच्यंद्रव्यत्वाद्याक्षिप्तसामान्यज्ञानादे
वजिज्ञासोपपत्तेःसंख्याकर्मत्वादीनांवचनविभक्त्यादिनैवप्राप्तेश्चअन्विताभिधानरूपैकदेशिमतमपिनयुक्तिसहंअन्वयस्याकांक्षादिसहकारिवा
क्यात् पदार्थमात्रशक्तादेवसिद्धेः नचप्रातिपदिकार्थमात्रपरस्यकथमेकदेशपरत्वंविशेषणस्यानाकांक्षितत्वेनप्रागेवतदुपपादनात् नचाप्रयो
जकत्वं स्वरूपमात्रबुभुत्साप्रवृत्तत्वरूपविपक्षबाधकस्योक्तत्वात् ननुसत्यादिवाक्येसत्तुविशेषणेषुसस्तुतिकविधिवाक्यप्राशस्त्यइवविं
शेषणार्थेपिरक्तपटन्यायेनाकांक्षोत्थापनीया॥ एवंइत्यादिप्रश्नानांजातिविषयकाणांसत्त्वेपिकेनेषितंपततिमनःकेनप्राणःप्रथमःप्रैतियुक्तःकेनेषितां
वाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्तिअचेतनमिदंशरीरंकस्यैषखल्वीदृशोमहिमायेनैतद्विधमेतत्चेतनवत्प्रतिष्ठापितंप्रचोदयिता वास्यकोभगवन्कुतोहवा
इमाःप्रजाःप्रजायंतेकुतएषप्राणोजायतेकस्मिन्नुखंभवतिकस्मिन्सर्वेसंप्रतिष्ठिताभवंतीतिक्वासौपुरुषइतिक्वैषःएतद्बालाकेपुरुषोशयिष्ट क्वैतदभूत् कुतएतद
गात् कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंकोयमात्मावयंयमुपास्महे इत्याद्यनंतवाक्यानांमुक्तफलवाक्यानुकूलमुद्दविषयकत्वेनवलवत्त्वात्तदनुसारेणकत
रादिवाक्यानामपिमुद्दमुख्यतात्पर्यकत्वकल्पनात् तत्त्वंपदार्थशोधकोत्तरवाक्यानांमुद्दविषयकत्वमव्याहतंसस्तुतिकेति स्तुत्यर्थवादसहितेत्यर्थः अस्तुतिकेविधौ
वलवदनिष्टासाधनत्वरूपप्राशस्त्यस्याक्षेपलभ्यत्वेपिसस्तुतिकेविधौप्राशस्त्येशाब्दीआकांक्षेतिभावः रक्तपटन्यायेनेति।यथारक्तःपटोस्तीत्यादौरक्तान्वयं
विनावाक्यार्थसमाप्तिसंभवेपिरक्तपदवैयर्थ्यविरहायरक्तवैशिष्ट्यंशेष्याकांक्षाकल्प्यतेतथासत्यत्वाद्यन्वयंविनातत्संभवेपिसत्यादिपदावैयर्थ्यायतत्रसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२

अ·सि· अध्ययनत्वादिविशिष्टकर्माविषयकत्वात् अध्ययनत्वकृतिकर्मत्वाद्युपलक्षितव्यक्तिस्वरूपमात्रविषयकत्वात् तत्तदर्थकं तत्तन्मात्रार्थकं स्वार्थो जातिः द्रव्यं व्यक्तिः। लिंगं॥
टी·ल· स्त्रीत्वादिः। अस्मदेकदेशिमते अस्माकं तत्त्ववादिनां मायावादिनां चैकदेशिमते अन्वितस्येति प्राभाकरमते कार्यान्वितमस्मदेकदेशिमते चेतरपदार्थान्वितमर्थ इ।
उ· तिवोध्यं न स्यादिति किंतु चंद्रत्वादिपरत्वं स्यादिति शेषः यौगिकत्वेनेति। धातोरुत्कर्षरूपवृद्धिः प्रत्ययस्य त्वाश्रयोर्थः ब्रह्मप्रातिपदिकार्थविशेष्यांशेतिनामहत्ति।
१९ ज्ञानाधीनस्मृतिमुख्यविशेष्येत्यर्थः इत्यत्रेति। पाणिनिसूत्रे इति शेषः लिंगाद्यविशिष्टेति आदिपदात्संख्याद्यविशिष्टलाभस्तथा चासंसृष्टनाम्नालक्षणयोपस्थापितंप्र

ननु यदि प्रश्नादुत्तरमधिकविषयं न स्यादुत्तरमेव न स्यात् प्रश्न एवोत्तरं स्यादिति चेत् न प्रश्नादनधिकविषयत्वेपि असाधारणधर्मवाचकपदव त्वेन निर्विचिकित्सधर्म्मिप्रतिपादकत्वेन वोत्तरत्वसंभवात् अत एव प्रश्नो नोत्तरं तत्प्रयोजकरूपविरहात् न च किं करोति किमानेयमित्यादिप्र श्नोत्तरे अध्ययनं करोति गामानयेत्यादौ व्यभिचारः नहि तत्राध्ययनत्वगोत्वादित्यागेन लक्षणया कर्मादिमात्रपरत्वमिति वाच्यं अत्रहि न कृ त्यानयनयोः प्रश्नः किंतु कृतिकर्म्मानयनकर्म्मणोः अन्यथा किं करणं किमानयनमित्येव पृच्छेत् तथा च प्रश्नोत्तरयोरध्ययनत्वादिविशि ष्टकर्म्माविषयकत्वात् यत् यत् प्रश्नोत्तरं तत्तदर्थकमिति सामान्यव्याप्तौ व्यभिचाराभावात् एवं सति सत्यादिवाक्यार्थो ब्रह्मप्रातिपदिकार्थमा त्रं तन्मात्रप्रश्नोत्तरवाक्यार्थत्वादित्यादिन्यायदीपावलीस्थमप्यनुमानं साधु न न्वेकप्रातिपदिकार्थमात्रप्रश्नोत्तरत्वेन एकप्रातिपदिकार्थमा त्रपरत्वेपि कथमखंडार्थत्वं पंचकस्य त्रिकस्य वा वैयाकरणमते प्रातिपदिकार्थत्वात् तदुक्तं स्वार्थो द्रव्यं तथा लिंगं संख्या कर्म्मादयोपि च। ना॥ मार्थपंचकं प्राहुराद्यं त्रिकमथापर इति प्राभाकरमते स्वदेकदेशिमते वान्वितस्यैव प्रातिपदिकार्थ——त्वाच्च अभिहितान्वयवादिमतेपि जातिविशिष्टा या एव व्यक्तेः प्रातिपदिकार्थत्वपक्षे प्रातिपदिकार्थस्यैव विशिष्टत्वाच्च जातावेव शक्तिर्व्यक्तिस्त्वाक्षेपलभ्येति मते प्रातिपदिकार्थमात्रपरत्वेन विशेष्यचंद्रादि व्यक्तिपरत्वं न स्यात् ब्रह्मपदस्य यौगिकत्वेन सुतरामत्र प्रातिपदिकार्थस्य विशिष्टत्वादिति चेत् न ब्रह्मप्रातिपदिकार्थविशेष्यांशमात्रपरत्वस्य साध्यत्वात् तथा च प्रातिपदिकार्थस्य विशिष्टत्वेप्यखंडार्थत्वसिद्धिः प्रातिपदिकार्थलिंगपरिमाणवचनमात्र इत्यत्र लिंगादेरपि प्रातिपदिकार्थत्वेन तद्ग्रहणवैयर्थ्यमाशंक्य प्रा तिपदिकार्थपदस्य लिंगाद्यविशिष्टस्वरूपमात्राभिधायकतया समाधानस्याभियुक्तैरुक्तेश्च॥ राम· २२९

॥ १ यमयापि निरूढलक्षणयोपस्थाप्यत इति सोयमित्यादौ संसर्गाविषयकशा॥ व्दबोधः पाणिन्यादिसंमतः तदुक्तं च संक्षेपशारीरके भेदो भिन्नश्चातिरेकोतिरिक्तो भेदो भिन्नः संविदः स्वप्रकाशादित्येतस्मिन्विद्यते नार्थभेदो वेदांतानामप्यखंडस्त॥ यार्थः। एवं तावदखंडवस्तुविषये शब्दान्वयो दर्शितो लोके दृष्टनयेन पाणिनिवचोप्यस्यैव संसूचकं येनायं संस्मरति प्रकृत्यभिहिते हूस्सादिके केवले तन्मात्रे प्रथमेति सूत्रवचसैराद्यांविभक्तिं मुनिरिति। भेदत्वावच्छिन्नेतस्य संबंधाभावात् प्राभाकरमते स्वप्रकाशत्वस्य संवित्त्वरूपत्वात्तदवच्छिन्नादौ तत्सम्बन्धाभावादखंडार्थत्वं अभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुब्रह्मणीत्यादि अग्निहोत्रादिवाक्यमिवनेहनानेत्यादिकमलक्षणावाक्यंतदप्यखंडार्थकंस्यादिदंतसामान्यस्यत्वयातथास्वीकारादितिभावःमहातात्पर्येति तथाचाखंडमुख्य
तात्पर्यकत्वंवेदसामान्यएवमयोच्यतेतत्रापितदिष्टमितिभावः।उदरमंतरंकुरुतेइतिउत अपिअरं अल्पंअंतरंभेदंकुरुतेजानातीत्यर्थःसर्वतोनवच्छिन्नेति सहृत्यभा।
वप्रतियोगित्वरूपपरिच्छेदस्याभावोभेदादिसत्यत्वेनसंभवतीत्यर्थःलक्षणायाखंडार्थत्वेइतिच्छेदः नतद्विरोधेनेत्यादि।ऐक्यादिविरोधात सत्यादिवाक्यस्ययोमुख्य
स्यार्थत्यागस्त्वदभ्युपगतःसननस्यादित्यर्थः कल्पितजातिरूपस्यप्रपंचसाधारण्येनकल्पितस्यस्वकालावाध्यत्वस्यस्वरूपेणापारमार्थिकत्वाविशेषितरूपेणलक्षणावा
क्योपस्थितमनंतादिपदमखंडार्थमित्याशयेनसामान्यतोलक्षणावाक्यस्थितेत्युक्तं यत्तुसगुणपरत्वंसर्वत्रैववेदांतइति निर्गुणपरत्वंनाद्यापिसिद्धमिति तन्नके

ननुब्रह्मणिधर्मद्वालक्षणवाक्यमस्तितदप्यखंडार्थंस्यादितिचेतन्‌· अवांतरतात्पर्यमादायचेत्तदाब्रह्मपरत्वस्यैवाभावात्‌ महातात्पर्यमादायचे
दिष्टापत्तेः किंचैकधैवानुद्रष्टव्यमित्याद्यनेकाकारनिषेधकवाक्यमुदरमंतरंकुरुतइत्यादिभेदनिषेधकवाक्यंकेवलोनिर्गुणश्चेतिगुणनिषेधकमेकमे
वाद्वितीयमितिद्वितीयमात्रनिषेधकवाक्यंचबाधकंतथा सर्वतोनवच्छिन्नवस्तुपरानंतशब्दब्रह्मशब्दौच नचतेषामैक्यभेदाभावादिविशिष्टार्थ
परत्वेवेदांतमात्रस्याखंडार्थतासिद्धिःसत्यशुद्धान्यमिथ्याविशिष्टार्थपरत्वेप्रामाण्यायोगइतिवाच्यऐक्यभेदाभावादीनांस्वरूपत्वेनविशिष्टपर।
त्वस्यैवाभावात्‌ भेदाभावादेः कल्पितप्रतियोगितयाकल्पितत्वेतुसत्यादिपदवद्विशिष्टार्थाभिधानद्वारास्वरूपपरत्वेनप्रामाण्योपपत्तेस्तन
चैवंतेषांलक्षणयाऽखंडार्थत्वेनतद्विरोधेनविशिष्टार्थस्यसत्यादिवाक्यस्यमुख्यार्थत्यागः विशेष्यपरस्यविशिष्टपरेणाविरोधादितिवाच्यंद्वारत
योपस्थितस्याप्यैक्यभेदाभावादेर्विशिष्टार्थविरोधितयामुख्यार्थत्यागसंभवात्‌ नचद्वारतयोपस्थितैक्यादेर्मिथ्यात्वे।नसत्यत्वादिधर्मपारमार्थ्य
विरोधितासत्यत्वेचापसिद्धांतइतिवाच्यंभिन्नत्वेसतिसत्यतायामेवापसिद्धांतात्‌नचाभेदद्वारत्वानुपपत्तिःकल्पितधर्मताकत्वेनद्वारत्वसंभवात्‌नचात्रसत्य
त्वादेर्द्वारत्वेनोपादानात्तेषामेवैतद्विरोधइतिवाच्यंसत्यत्वादेःकल्पितजातिरूपस्यद्वारतयास्वरूपेणोपादानेपिपारमार्थिकत्वाकारेणानिषेधकानामविरोधात्‌
एतेनब्रह्मानंतपदयोरपिबाधकत्वंव्याख्यातं॥१केवलोनिर्गुणःवृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वंततोयदुत्तरतरंतदरूपमनामयंयएतद्विदुरमृता
स्तेभवंत्यथेतरेदुःखमेवापियंतीतिद्वेविद्येवेदितव्येपराचैवापराचतत्रापराऋग्वेदइत्यादि अथपरायया तदक्षरमधिगम्यतेयत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः।
श्रोत्रमपाणिपादमित्यादिश्रुतेःएवंसततयुक्तायेभक्तास्त्वांपर्युपासतेयेचाप्यक्षरमित्यादिगीतावाक्यात्‌ प्रत्यस्तमितभेदंयत्सत्तामात्रमगोचरंवचसामात्मसंवेद्यंतज्ज्ञानं
ब्रह्मसंज्ञितमित्यादिनतद्योगयुजाशक्यंनृपचिंतयितुंयतःअतःस्थूलंहरेरूपंचिंत्यंइतिविष्णुपुराणात्‌संचिंतयेद्भगवतश्चरणारविंदंइत्यादिमुक्त्वाश्रयंयर्हिनिर्विषयंविरक्तंनि।
र्वाणमृच्छतिमनःसहसायथार्चिःआत्मानमत्रपुरुषोऽव्यवधानमेकमन्वीक्षतेत्यादिसगुणभजनोपक्रमकभक्त्यात्यसंगःसदसत्यनात्मनिस्यान्निर्गुणेब्रह्मणिचांजसारतिरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ॰ सि॰ टी॰ ल॰ उ॰ २०

आकांक्षणीयाभावे आकांक्षणीयाभावस्यैव दर्शनादिति। काकवंतश्चैत्रगृहा इत्यादौ काकाद्यन्वयांशे आकांक्षाभावदर्शनादित्यपि बोध्यं तत्र काकपदलक्ष्योत्तरणत्वस्य धर्मतया तदन्वयाकांक्षासंभवेपि सत्यादिवाक्ये सर्वपदलक्षणीयस्वरूपस्यासंताभिन्नत्वेनान्वयासंभवान्न तदाकांक्षासंभव इति ध्येयं व्यावृत्तिबोधमात्रेण न सत्यादिरूपा प्रकृष्टप्रकाशव्यावृत्तिधीमात्रेण तत्सार्थकत्वेति। प्रकृष्टादिपदसार्थकत्वेत्यर्थः स्वरूपज्ञानमात्रेण स्वरूपात्मकलक्षणस्य व्यावृत्तिं विनानुपपत्तिज्ञानमात्रेणार्था द्व्यावृत्तिबोध इत्यस्य अंतःकरणवृत्तिभेदेनैकस्यापि लक्ष्यलक्षणाभाव इत्यस्य च पूर्वमुक्तत्वात् प्रकृष्टप्रकाशश्चंद्र इति वाक्यजधीविषयत्वे विशिष्टस्य स्वरूपत्वानुपपत्त्या स्वरूपस्य प्रकृष्टप्रकाशव्यावृत्तिसिद्धिस्तथा च तादृशधियः प्रकृष्टप्रकाशत्वादिवैशिष्ट्यधीहारकत्वात् प्रकृष्टपदमावश्यकमिति भावः ब्रह्मविदित्यादि ब्रह्मवि

उक्तं हि आकांक्षणीयाभावआकांक्षाया अभाव इतीति चेत् न सत्यादिवाक्ये विशेषणे सत्यपि न तज्ज्ञोचराकांक्षाकल्पनं प्रकृष्टप्रकाशश्चंद्र इत्यत्र विशेषणे सत्यपि कश्चंद्र इति स्वरूपमात्राकांक्षादर्शनात् न च तत्रापि तत्कल्पनं तत्कल्पनं विनापि व्यावृत्तिबोधमात्रेणैव तत्सार्थकत्वोपपत्तेः व्यावृत्तिविशेषबोधश्च विशेषणपरत्वाभावेपि तद्वारकस्वरूपज्ञानमात्रेणैवोपपद्यते ननु सप्रकारकज्ञानस्यैव मोक्षहेतुतया ब्रह्मविदाप्नोति परमित्यर्थेन य एवं विद्वानमृत इह भवतीति श्रुत्या यो वेद निहितं गुहायामित्युत्तरवाक्येन च मुमुक्षोः सप्रकारकस्यैव धर्मिज्ञाने साध्ये बुभुत्सोचितेति चेत् न निष्प्रकारकज्ञानस्यैव स्वरूपोपलक्षणोपलक्षिताधिष्ठानज्ञानत्वेन भ्रमादिनिवृत्त्या मोक्षहेतुताया उपपादितत्वेन तदनुरोधाद्ब्रह्मविदित्यादेः सप्रकारकब्रह्मज्ञानपरतायां मानाभावात् य एवं विद्वानित्यस्याप्येवंप्रकारत्वं नार्थः किंत्वेवंप्रकारोपलक्षितत्वमेकधैवेत्याद्यनुसारात् न चैवं सगुणवाक्यस्यापि ब्रह्मबुभुत्सायां कर्मकांडस्यापि कर्मबुभुत्सायां वैद्यकादिशास्त्रस्यापि औषधादिबुभुत्सायां अखंडब्रह्माखंडकर्माखंडौषधादिपरत्वं स्यादिति वाच्यं न हि वयं बुभुत्साप्रवृत्तवाक्यत्वमात्रेणाखंडार्थत्वं ब्रूमः किंतु स्वरूपमात्रबुभुत्साप्रवृत्तवाक्यत्वेन न च तत्रापि स्वरूपमात्रबुभुत्सा विशिष्टपरत्वे बाधकाभावात् तत्रापि चेल्लक्षणवाक्यादौ तथा तद्देष्टापत्तेश्च न च तर्हि सगुणवाक्यानां सत्यशुद्धान्यमिथ्याविशिष्टार्थपरत्वेन प्रामाण्यायोगः कर्मकांडवद्व्यावहारिकप्रामाण्याविरोधात्॥

दित्यादिवाक्यस्य योऽर्थोऽर्थापत्तिस्तया एवमित्यादिश्रुत्या यो वेदेत्यादिवाक्येन च मुमुक्षोः सप्रकारकज्ञानमेव बुभुत्सेत्यर्थः परप्राप्तिर्नाम उत्कृष्टाभिन्ने स्वस्मिन्नज्ञाननिवृत्तिस्तत्साधनं चोत्कृष्टब्रह्माभिन्ने स्वस्मिन्नज्ञानं तथा चोत्कर्षविशिष्टविषयकाज्ञानस्य निवृत्तेस्तादृशज्ञानं विनानुपपत्तेः सप्रकारकज्ञानस्यैव मोक्षहेतुता प्रयुक्ताया ब्रह्मविदित्यादिश्रुत्यर्थापत्तिर्यच्च तादृशहेतुतारूपेण स्वार्थेन घटिता एवमित्यादिश्रुतिर्यच्च तादृशहेतुतारूपेण स्वार्थेन घटितं यो वेदेत्यादिवाक्यं तेन सप्रकारक एव ज्ञाने मुमुक्षोर्जिज्ञासेति भावः। विशिष्टपरत्वेति प्रश्नवाक्यस्येत्यादिः बाधकाभावादिति चंद्रादौ प्रकृष्टप्रकाशत्वादेरिव धर्मादौ तत्तद्विशेषस्य मानांतरसिद्धत्वाभावेन तद्विशिष्टपरत्वमेव तत्रेति भावः यदि तु को धर्म इत्यादि धर्मादिस्वरूपमात्रबुभुत्साप्रवृत्तवाक्ये तदापाद्येत तर्हि तदिष्टमलौकिकश्रेयःसाधनं धर्म इत्यादिलक्षणवाक्यस्योक्ते

साधनत्वाद्युपलक्षितपरत्वसंभवादाह तत्रापीति॥

राम॰ २३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपि घटादेरप्युक्तप्रतियोगित्वं तथापि व्यवहारकाले उक्तप्रतियोगित्वेन निश्चितं यत्तदन्यत्वं न चयेन सम्बन्धेन यत्र यत्प्रकारकशाब्दधीस्तेन सम्बन्धेन स्वाधि-
करणतन्निष्ठाभावप्रतियोगित्वेन निश्चितं यत्तदन्यत्वमेव वाच्यमन्यथा भ्रमानुव्यवसायसमानविषयकवाक्यस्य भ्रमविषयविशिष्टज्ञानांशे प्ययोग्यतापत्तेस्त-
था च सम्बन्धघटितायोग्यतानाखंडार्थवाक्य इति वाच्यं भ्रमविषयस्य मिथ्यात्वनिश्चयोत्तरमुक्तापत्तेरिष्टत्वात्सम्बन्धनिवेशे प्रयोजनाभावात् न चैवं भ्रमविषयो
मिथ्येति वाक्यमप्ययोग्यं स्यादिति वाच्यं तात्पर्यविषयपदेन विधेयस्योक्तत्वादुक्तस्थले मिथ्यात्वस्यैव विधेयत्वेन तस्योक्तप्रतियोगित्वेनानिश्चितत्वेनादोषात् व-
स्तुतः पदानां यादृशसमभिव्याहारस्य धीर्यादृशशाब्दधीहेतुः स एव तस्या आकांक्षा योग्यतातु शाब्दत्वावच्छिन्नेन ‾‾ हेतुर्बाधितविषयेपि कलहादौ शाब्दबोधोदया-
त्तदनंगीकारेपि विशिष्टधीसामान्ये बाधस्य विरोधित्वादेव बाधितस्थले शाब्दबुद्ध्यभावसिद्धेः न च जनितयादृशबोधकं यद्वाक्यं तस्मात्तादृशबोधांतरापत्तिवार-
णायपत्यदस्यये न पदेन विना यादृशान्वयबोधाभाववैशिष्ट्यं तत्तादृशबोधं प्रत्याकांक्षेत्यावश्यकमिति वाच्यं समानाकारशाब्दबोधं प्रति शाब्दबोधस्य प्रतिबंध-
कत्वादेव तद्वारणात् न च योग्यताप्रमायाः शाब्दप्रमात्वावच्छिन्नं प्रति हेतुत्वात् शाब्दधीसामान्येपि योग्यताधीहेतुरिति वाच्यं शाब्दप्रमात्वस्यार्थसमाजग्रस्तत्वे-
न कार्यतानवच्छेदकत्वात् तदीयप्रमासामान्ये विशेष्यसम्बन्धतज्ज्ञानत्वादिना हेतुत्वसंभवाच्च आसत्तिस्तु आचार्यैश्चैव स्वप्रयोज्यपदार्थोपस्थितिसम्बन्धेना-

अथवाऽन्वयस्य भेदघटितत्वनियमाभावेनाभेदसंसर्गमादायाकांक्षादिनिर्वाहः कर्त्तव्यः॥

॥ एकपदार्थस्याप्यखंडस्य तात्पर्य्यविषयत्वमपीनानुपपन्नं ॥ ॥ ॥ ॥

कांक्षाहेतुत्वादेव पदाप्रयोज्यपदार्थोपस्थित्या न शाब्दबोधः यत्तु शाब्दबोधानुकूलार्थोपस्थितिरासत्तिरित्ययुक्तं शब्दः पर्वतो गुणोऽग्निमानित्यादौ पदज्ञानत्वे-
न शाब्दबोधानुकूलाशब्दपदार्थस्य शब्दपदस्योपस्थितिमादायातिव्याप्तेरिति तन्न यादृशशाब्दबोधे स्वप्रयोज्ययद्यत्पदार्थोपस्थितिसम्बन्धेनाकांक्षाज्ञा-
नं हेतुस्तादृशबोधे तादृशाकांक्षाज्ञानप्रयोज्यतत्तदर्थोपस्थितिरासत्तिरित्यर्थलाभाय शाब्दबोधानुकूलेत्युक्तेः शब्दो गुण इति शाब्दबोधे शब्दगुणपदार्थोप-
स्थितिसम्बन्धेन शब्दो गुण इत्यानुपूर्वीज्ञानस्य हेतुत्वेपि तदभावे नोक्तस्थले तत्प्रयोज्यशब्दगुणपदार्थोपस्थितेरप्यभावेन तादृशबोधानुकूलासत्ति-
लक्षणातिव्याप्तुक्तेरसंगतत्वात् उक्तस्थले शब्दो गुण इत्यानुपूर्वीज्ञानसत्त्वे तु तत्प्रयोज्योपस्थितेरपि सत्त्वेन तस्य लक्ष्यत्वेनादोषात् एवं चावांतर-
वाक्यार्थबोधे समूहालंबनतावदर्थस्मृतिरेव महावाक्यार्थबोधे त्ववांतरवाक्यार्थानुभवो प्यासत्तिरिति ध्येयं परमते न्वयस्य संसर्गरूपस्य भेदानिय-
तत्वेन तदनुसृत्याहाथवेति। अभेदसंसर्गमिति। अखंडार्थबोधे स्वरूपात्मकाभेदस्य सांसर्गिकविषयत्वाभावेपि परमते स्वरूपे तस्य तत्त्वं सं-
र्गावगाहिबोधस्वीकारेण तस्य सांसर्गिकविषयत्वरूपान्वयत्वसंभवेन स्वरूपे स्वरूपस्यान्वयाननुभावकत्वादिरूपाकांक्षादिबोध्यमिति भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि· टी·ल· उ· २१

द्वे विद्ये वेदितव्ये इति चाथर्वणी श्रुतिः परया त्वक्षरप्राप्तिर्ऋग्वेदादिमया परा यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः इत्यथर्वणश्रुतेः॥ परयात्त्वक्षरप्राप्तिर्ऋग्वेदादिमयापरा यत्तदव्यक्तमजरमचिंत्यमजमव्ययं अनिर्देश्यमरूपंच पाणिपाद्याद्यसंयुतं विभुं सर्वगतं नित्यं भूतयोनिमकारणं व्याप्याव्याप्यं यतः सर्वं तद्वै पश्यंति सूरयः तद्ब्रह्म तत्परं धाम तद्धेयं मोक्षकांक्षिणामिति विष्णुपुराणाच्च निर्गुणस्य मुमुक्षुज्ञेयत्वेनश्रुतेस्तत्परत्वावश्यकत्वात् येन विना। यत्पदाव्यवहितोत्तरत्वप्रकारकस्वविशेष्यकज्ञानं विना यस्य यत्पदज्ञानस्य स्वार्थान्वयाननुभावकत्वं तत्पदार्थप्रकारकस्वार्थविशेष्यकशाब्दबोधाभाववत्त्वं तदेव तत्पदाव्यवहितोत्तरत्वं तादृशबोधाभाववत्त्वं च तस्य परस्स तादृश्यबोधे आकांक्षा तत्राद्यं ज्ञातं द्वितीयं स्वरूपसत्कारणं एकपदार्थत्वादियस्य यस्संसर्गः पन्निष्ठस्य प्रतियोगिव्यधिकरणस्य संसर्गाभावस्याप्रतियोगी तस्य तत्र शाब्दबोधे साऽयोग्यतेत्यर्थः शब्द आकाशीय इत्यादावाकाशस्य शब्दनिष्ठा

ननु अथ कस्मादुच्यते ब्रह्मेति बृहंतो ह्यस्मिन् गुणा इत्यादिश्रुत्या महद्गुणत्वाद्यमनंतमाहुरित्यादिस्मृत्या च ब्रह्मानंतपदयोः सगुणवाचित्वेन निर्वचनात्कथं ताभ्यां विरोध इति चेन्न उक्तश्रुतिस्मृत्योः सगुणप्रकरणस्थितब्रह्मानंतशब्दार्थविषयत्वेन लक्षणवाक्यस्थितब्रह्मानंतशब्दार्थनिर्वचनपरत्वायोगात् ननु इमे हेतवः प्रतिकूलतर्कपराहताः तथाहि पक्षदृष्टांतलक्षणमैक्यपरवाक्यं यदि संसृष्टार्थं न स्यात्तर्हि वाक्यमेव न स्यात् आकांक्षायोग्यतासत्तिमत्त्वाभावात् आकांक्षा हि अभिधानापर्य्यवसानं तच्च येन विना यस्य न स्वार्थान्वयानुभावकत्वं तस्य तदेवापर्य्यवसानं सन्निधिस्त्वव्यवधाने नान्वयप्रतियोग्युपस्थितिः योग्यता चैकपदार्थसंसर्गे अपरपदार्थनिष्ठात्यंताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं नैतत्त्रयं संसर्गाविषये संभवतीति नैष दोषः अखंडार्थेप्येतत्त्रितयसंभवात् तथाहि निराकांक्षयोरपि यत्किंचिदन्वयानुभावकतया तात्पर्य्यविषयान्वयाननुभावकत्वमेवाकांक्षा वाच्या तथा चान्वयांशो व्यर्थः येन विना यस्य तात्पर्य्यविषयाननुभावकत्वमित्येतावन्मात्रस्यैव सामंजस्यात् तात्पर्य्यविषयश्च क्वचित्संसृष्टः क्वचिदखंड इति न विशेषः अतः सा तात्पर्य्यविषयाखंडार्थानुभवजननात्प्राग्वेदांतवाक्येप्यस्त्येव आसत्तिरप्यव्यवधानेन शाब्दबोधानुकूलार्थोपस्थितिमात्रं न त्वन्वयप्रतियोगित्वविशेषितपदार्थोपस्थितिः गौरवात् सा च संसर्गाबोधकेप्यस्त्येव योग्यतापि तात्पर्यविषयाबाध एव न त्वेकपदार्थसंसर्ग इत्याद्युक्तरूपा यत्र बाधिताबाधितसंसर्गद्वयसंभवस्तत्र बाधिते तात्पर्य्यविषयकेऽतिव्याप्तेः तात्पर्य्यविषयाबाधश्चाखंडार्थत्वेपि सुल ॥ राम· २३१

भावप्रतियोगित्वं न त्वाकाशसंसर्गस्य। सेकान्वितजलस्य संसर्गो न सेकनिष्ठाभावाप्रतियोगीति तत्र पयसा सिंचतीति वाक्ये न योग्यता। निराकांक्षयोः। घटः कर्मत्वमितिपदयोः। यत्किंचिदन्वयानुभावकतया अभेदरूपान्वयानुभावकतया तथा च तयोरेकपदव्यतिरेकप्रयुक्तमपरपदस्य भेदान्वयाननुभावकत्वमस्तीति अभेदान्वय इव भेदान्वयेपि साकांक्षता स्यात् न च यदन्वयाननुभावकत्वं उक्तप्रयुक्तं तदन्वयं प्रति तत्साकांक्षत्वमित्येवोच्यतामिति वाच्यं यदन्वये तात्पर्यं नास्ति तत्रापि साकांक्षतापत्तेस्तात्पर्यविषयपदन्वये इत्यस्यावश्यकत्वात् तात्पर्यविषयाबाध इति स्वाश्रयनिष्ठाभावप्रतियोगियद्यत्तदन्यत्वं तात्पर्यविषयनिष्ठं योग्यता बाधितस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निश्चत्यूहेति अप्रामाण्यशंकाशून्येत्यर्थः। तात्पर्यनिश्चयरूपेण विचारफलेनोक्तशंकाबीजस्य तात्पर्यसंशयस्योच्छेदेनेनोक्तशंकेति भावः। व्यावृत्ताकारेण ज्ञातः। स्वरूपनिश्चयनाश्या
ज्ञानविषयः। प्रमेयतया अज्ञाननाशकज्ञानविषयतया असाधारणज्ञापनेति सत्यत्वादिसंशयनाशकज्ञानजनकलक्षणादिज्ञानेत्यर्थः। विधेयता चेति। विवेचितमनुपदमे।

नापि विचारविध्यनुपपत्तिः विचारस्य वेदांततात्पर्यनिश्चयादिफलकतया निश्चत्यूहनिष्प्रकारकब्रह्मज्ञानार्थत्वोपपत्तेः आपातदर्शनस्याप्रतिबद्धत्वेनाज्ञाना-
निवर्तकत्वात् शुद्धब्रह्मविषयाणामधिकरणानामप्यारंभोनानुपपन्नः विषयादिपंचकसंभवात् व्यावृत्ताकारेण ज्ञातो हि विषयः ब्रह्म च तथा भवत्येव विषयस्वरूप
निर्धारणाधीनं च प्रयोजनं न निर्धारणे सप्रकारकत्वमपेक्षते निष्प्रकारे वस्तुनि स्वरूपनिर्धारणत्वाव्याघातात् अद्वैताद्युपलक्षिताखंडार्थज्ञानं च निर्धारणं तदधी-
नं च प्रयोजनं मुक्तिरेव पूर्वपक्षसिद्धांतौ च कल्पितप्रकारालंबिनौ संशयोपि कल्पितसमानधर्मधीजन्मैवेति नानुपपत्तिः अत एव प्रथमाध्यायतृतीयपादीयाधिक-
रणानामनारंभ एव प्राप्तः विषयादिपंचकाभावात् विशिष्यज्ञातो हि विषयः साधारणधर्मधीजन्यश्च संशयः मिथ्यासत्यैकप्रकारालंबिनौ च पूर्वपक्षसिद्धांतौ एकप्र-
कारेण निर्धारणाधीनं च प्रयोजनं तच्च पंचकं निर्विशेषे कथं स्यादिति परास्तं उक्तरीत्योपपत्तेः न च ब्रह्मविदाप्नोति परमिति सामान्यतो ज्ञातत्वात् सत्यादिवाक्य-
वैयर्थ्यापत्तिः असाधारणस्वरूपज्ञानार्थत्वेन साफल्यात् न च सत्यत्वादिविशिष्टे तात्पर्याभावे तात्पर्यतो यत्किंचित् ब्रह्मेत्येव बोधनाद्येकस्यापि
ब्रह्मत्वं स्यात् इदं ब्रह्मेति लक्ष्यलक्षणरूपोद्देश्यविधेयविभागाभावाच्चेति वाच्यं लक्षणस्वाभाव्यात् वस्तुगत्या तत्स्वरूपलाभस्य प्रागेवोक्तत्वात् एकस्मिन्नपि कल्पि-
तोद्देश्यविधेयभावसंभवाद् प्राप्तविधेयमात्रपरत्वाद्वाक्यस्य नाखंडार्थत्वव्याघातः ननु स्वरूपेण ज्ञातस्य विधेयस्योद्देश्यसंसृष्टतयैव बोधनीयत्वं वाच्यं तथा च सखंडा-
र्थतैव उक्तं हि किं चिद्धि धीयते नूनं वाक्येनेति सत्यं स्थितिः सत्यज्ञानादिवाक्येन कथ्यतां किं विधीयत इति नैष दोषः असाधारणस्वरूपस्य प्रमेयतया विधेयत्वात् सत्यत्वा-
दिद्वारकस्वरूपज्ञानेनासाधारणज्ञापनपर्यवसानात् द्वारफलाभ्यामप्राप्तप्रापणसंभवात् तथा चोद्देश्यताविधेयताचस्वरूपमात्रपर्यवसन्नैवनन्वेवं सत्यादिपदानां ल-
क्षणा न स्यात् अशक्यासदृशान्वयप्रतियोग्युपस्थितिरूपायास्तस्या असंभवात् तद्बीजस्यान्वयानुपपत्तेश्चात्राभावादिति चेन्न वृत्त्या हि पदार्थोपस्थितिर्न तु सैव वृत्तिर-
तो नोक्तरूपा लक्षणा किं तु शक्यसंबंधः स च प्रकृतेप्यस्त्येव उपस्थितिरूपत्वेपि लक्षणायास्तात्पर्यविषयानुकूलोपस्थितिरेव सा नोक्तोपस्थितिरूपा अतात्पर्यविष-
यतादृगुपस्थितौ गतत्वात् नापि बीजानुपपत्तिस्तात्पर्यानुपपत्तेरेव बीजत्वात् नापि सत्यादिपदानां पर्यायतापत्तिः वाच्यार्थभेदात् सत्यत्वं ह्यस्मन्मते त्रिकाला-
बाध्यत्वं परमते कुंभादिसाधारणी परजातिः सत्यपदप्रवृत्तिनिमित्तं ज्ञानपदानंदपदयोरपि अस्मन्मते अंतःकरणवृत्त्युपधानलब्धभेदचिदानंदविशे-
षानुगते ज्ञानत्वानंदत्वे॥२९॥वैतत्। अशक्येत्यादि अशक्योऽसदृशोयोन्वयप्रतियोगी तदुपस्थितेरित्यर्थः। गोण्या वृत्तेर्वारणाय सदृशेति अंतःकरणेत्यादि। इंद्रिय
सन्निकर्षादिजन्यवृत्त्युपहिततहितचित्त्वं ज्ञानत्वं चंदनादिविषयत्वक्संयोगजन्यवृत्त्युपहितचित्त्वमानंदत्वं तादृशचिद्गतजातिविशेषो वा ते इति भावः॥९ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्रेदमपिबोध्यंयेनवाक्येनयत्रयद्वैशिष्ट्यावगाहिशाब्दानुभवोजन्यतेतद्द्वारकबोधेतद्वाक्यतद्गताकांक्षायोग्यतासत्तिहेतुत्वनियमेमानाभावस्तथाचधूमोस्तीत्यादिवाक्यस्य वह्न्यादिबोधइवसत्यादिवाक्यस्यापिसत्यत्वादिवैशिष्ट्यविषयकशाब्दानुभवद्वारकाखंडार्थबोधेपिनतद्धेतुत्वमेतावांस्तुविशेषः प्रथमस्यानुमितित्वेनतदजन्यत्वंद्वितीयस्यपदल- क्षणाज्ञानजन्यत्वेनशाब्दबोधेपिसंसर्गाविषयकत्वेनतत्संसर्गशाब्दबोधस्यैवतत्स्वीकारात्।विशिष्टार्थेपदवृत्तिज्ञानस्यैवाकांक्षादिसहकारिकत्वकल्पनात्शुद्धवाक्यार्थानुभवे तुतत्तात्पर्यज्ञानादिसहकृतस्यशुद्धलक्षणाज्ञानस्यैवहेतुत्वंनिराकांक्षादौमृद्घटइत्यादौचशुद्धलक्षणाज्ञानस्यकदाचित्सत्त्वेपिपदविशेषसमभिव्याहारज्ञानजन्यशाब्दबोध

यत्रह्यसाधारणस्वरूपेणैकःपदार्थोज्ञातस्तत्रपदार्थान्तरविशिष्टःसप्रतिपाद्यतेयत्रतुनतथाज्ञातस्तत्रसनशक्यःपदार्थान्तरैर्विशेष्टुमितिसएवप्रति पाद्यस्तत्रैववाक्यपरिसमाप्तेःप्रकृष्टत्वसत्यत्वादेस्तत्तद्द्वारकस्वरूपबोधेनव्यावृत्तिभेदउपयोगादितिनवाक्यत्वानुपपत्तिलक्षणप्रतिकूलतर्कपराहतिः। ननुसंसृष्टार्थत्वंनचेत्तदावेदांतानांनिर्विषयत्वापत्तिरखंडवाक्यार्थस्यस्वप्रकाशचिन्मात्रस्याविद्याद्यध्यासाधिष्ठानत्वेनतत्साक्षित्वेनचनित्यसिद्धत्वादिति चेत् नअनाद्यविद्योपहितत्वेनारोपात्स्वतःसिद्धस्यापिप्रमाणवृत्तिमंतरेणाविद्यानिवर्त्तकत्वाभावात्प्रमाणवृत्तेश्चाविद्यानिवृत्तिफलोपहितत्वान्नका प्यनुपपत्तिः नचबाधकंविनामुख्यार्थत्यागायोगःप्रतिकूलतर्कःएकरसत्वादिप्रतिपादकश्रुतीनामप्यखंडार्थपरत्वेनबाधकत्वाभावादितिवाच्यंद्वारतयोप स्थितस्यापिबाधकतायाउक्तत्वात् ननुवेदांतवाक्यजन्यज्ञानंनिष्प्रकारकंचेत्ज्ञानमेवनस्यात्ज्ञानस्येच्छादितुल्यतयासविषयत्ववत्सप्रकारकत्वस्या पिनियमात् कंचित्प्रकारंविनावस्तुनोबुद्ध्यावनारोहाच्चेतिचेन्नव्याप्त्यसिद्धेः तार्किकादिभिरपिनिर्विकल्पकज्ञानाभ्युपगमात् शब्दवाच्यत्वंतुकंचित्प्रका रमंतरेणसंभवतिनवेतिवादिनोविवदंतेतच्चास्माभिर्ब्रह्मणोनाभ्युपेयते आकाशादिपदवत् कंचित्प्रयोगोपाधिमादायतदपिसंभवत्ये वनचशाब्दत्वेनसविकल्पत्वसाधनंस्वरूपोपलक्षणज्ञानाजन्यत्वस्यस्वरूपपरवाक्याजन्यज्ञानत्वस्यचोपाधित्वात् ज्ञानत्वस्यैवशाब्द- त्वस्यापिसविकल्पकत्वव्याप्यत्वग्रहेमानाभावाच्चनचवेदांतानामबुभुत्सितार्थत्वापत्तिः धर्म्मिणः प्रागेवज्ञानात्तत्रबुभुत्साविरहा- दितिवाच्यंस्वरूपस्यज्ञातत्वेप्यसाधारणस्वरूपबुभुत्सायाउपपादितत्वात्॥

११ स्वद्वारीभूतस्यसहकारिणोविरहेणनाखंडार्थबोधइतिदिक्।बाध कत्वाभावादितिस्वरूपमात्रबोधस्यविशिष्टस्वरूपबोधाविरोधित्वमितिभावः आकाशादिपदवदित्यादि।शब्दाश्रयत्वंयथानाकाशादिपदशक्यंतद्विनाप्यशब्दद्रव्यान्यद्रव्यत्वा दिनातत्पदात्शाब्दबोधोत्पत्तेःनानाव्यक्तिष्वनुगतधर्मंविनाशक्यत्वग्रहासंभवेनव्यक्तिनानात्वस्थलएवधर्मेशक्यत्वस्यसार्थक्याच्चकिंतुतदुपलक्षितव्यक्तिस्तथात्रिकाला बाध्यत्वाद्युपलक्षितमेवसत्यादिपदशक्यंसंभवतीतिलक्षणाज्ञानंविनैवाखंडानुभवसंभवःपरंतुनास्माकंतत्राग्रहइतिभावःशाब्दत्वेनेतिसत्यादिवाक्यजज्ञानेइत्यादिः स्वरूपोपलक्षणज्ञानेतिधर्मिस्वरूपमात्रस्योपलक्षणंस्ववैशिष्ट्यधीद्वाराबोधकंयत्सत्यत्वादितद्वैशिष्ट्यज्ञानेत्यर्थः।स्वरूपपरवाक्येतिधर्मिस्वरूपमात्रपरवाक्येत्यर्थःतादृशो

CC-0. In Public Domain. Digitization by eGangotri

यत्तुसत्यत्वादेरुपहितगतस्यशुद्धेपिसम्बन्धस्वीकारेशुद्धस्यसत्यादिपदवाच्यतासंभवेनतल्लक्ष्यत्वानुपपत्तिःउपहितेसत्वस्यश्रौतपदवाच्यत्वेत्रिकालावाध्यत्वरूपसत्वंब्रह्म णिश्रौतमितिसिद्धांतभंगःतात्विकसत्त्वस्यसत्यपदावोध्यत्वेनतद्बोध्यसत्त्वस्यलक्षणत्वासंभवइतितन्नलक्षणांविनानिष्प्रकारकवोधासंभवेनलक्षणावश्यकत्वात्त्रिकालावाध्यत्वं ब्रह्मणिश्रौतमितिसिद्धांतस्यायमर्थःयत्श्रुतिजन्येनसत्यत्वाद्युपलक्षितशुद्धब्रह्मज्ञानेनशुद्धब्रह्मण्यनृतादिसंशयनिवृत्तिरिति।सत्यादिपदेनशक्त्यावोध्यसत्त्वस्यालक्षणत्वंतुम।

एतेनशुद्धादन्यत्रसत्यत्वाद्यसंभवात्सत्यादिवाक्यस्यलक्षणयाखंडार्थत्वेशुद्धेसत्यत्वादेरभावात्पर्यायत्वंदुर्वारमितिपरास्तंस्वरूपमात्रपरत्वेपिनपदांतर वैयर्थ्यंव्यावृत्तिभेदवोधनेनसाफल्यादितिचोक्तमेवनचव्यावर्त्तकस्यसत्यत्वादेस्तात्पर्यतोऽसमर्पणेव्यावृत्त्यसिद्धिरितिवाच्यंगभीरायांनद्यांघोषःप्रतिवसती त्यत्रयथातीरेतात्पर्य्येपिनद्यामगभीरव्यावृत्तिरभिधावलाल्लभ्यतेतात्पर्य्यविषयागभीरनदीतीरव्यावृत्ततीरबुद्धावुपायत्वात्तथात्राप्यभिधावलात्सत्यत्वा दिविशिष्टेतात्पर्याभावेप्यापाततस्तत्प्रतीतिमात्रेणैवव्यावृत्तिसिद्धिस्तात्पर्यविषयानृतादिव्यावृत्तस्वरूपसिद्धावुपायत्वस्यतुल्यत्वात्नचनद्यादिपदलक्ष्येतीरादा वनदीत्वादिवत्सत्यादिपदलक्ष्येपिब्रह्मण्यसत्यत्वाद्यापत्तिः जहल्लक्षणानभ्युपगमात् यदिहितीरादौनदीत्वादिवद्ब्रह्मण्यपिसत्यत्वादिकमभि धावलान्नप्रतीयेततदैवंस्यात् नत्वेवमस्तिनद्यादौनदीत्वादिवत् सत्त्वादेर्ब्रह्मण्ये वप्रतीतेःनचैवंनिर्धर्मकत्वव्याकोपःव्यावहारिकस्यधर्मस्यसत्त्वे पित्वसमानसत्ताकधर्म्मविरहेणतदुपपत्तेःवाचकानामपिलक्षकत्वमन्यानुपरक्तस्वरूपभानायेत्यन्यत्तदुक्तंकल्पतरुकृद्भिःसत्तादीनांतुजातीनांव्यक्तितादा त्म्यकारणात्लक्ष्यव्यक्तिरपिब्रह्मसत्तादिनजहातिनइतिगोर्नित्योगौरनित्यइत्युभयत्राप्येकदेशान्वयार्थंलक्षणाभ्युपगमेपिजातिव्यक्त्योरुभयोरपितार्किके र्गोपदार्थत्वाभ्युपगमाच्च नन्वौपनिषदेपुरुषेधर्म्मानप्रत्यक्षेणप्राप्ताःकिंतुतत्त्वावेदकेनवेदेनतथाचकथंव्यावहारिकाइतिचेत्नवेदस्यापाततःप्रतीतानाम पिवेदतात्पर्य्यविषयत्वाभावादतात्त्विकत्वोपपत्तेःतात्पर्यविषयेहिवेदस्यप्रामाण्यंयत्रचतस्यप्रामाण्यंतदेवतात्विकमितिनियमात्नचवेदस्यातत्परत्वमात्रेणकथं व्यावहारिकत्वंवाध्यत्वेनचेत्प्रस्तरेपियजमानत्वंव्यावहारिकंस्यात्यजमानत्वस्यतत्रानध्यासादव्यावहारिकत्वेशुक्तिरूप्यादेर्व्यावहारिकत्वापत्तिरितिवाच्यंवे दतात्पर्याविषयत्वेनातात्विकत्वेस्थितेतत्त्वावेदकबाध्यत्वव्यावहारिकावेदकबाध्यत्वाभ्यांव्यावहारिकप्रातिभासिकव्यवस्थोपपत्तेःनचतत्त्वावेदकस्यविशेष्य मात्रपरत्वान्नबाधकत्वंविशेषणबुद्धिद्वारकत्वेनतन्मात्रपरस्यापिबाधकत्वसंभवात्॥ २ न्मतेइष्टमेवलक्षणायातद्बोध्यस्यैवलक्षणत्वात्।लक्षणाभ्युप गमेपीतितार्किकाणांमतेपिविशिष्टस्यशक्यत्वाद्विशिष्टान्वयस्यमुख्यत्वाच्चशक्तिज्ञानकार्यतावच्छेदकंविशिष्टान्वयबोधत्वमित्येकदेशीभूतव्यक्तिमात्रान्वयोलक्षणा यैवजातिमात्रान्वयस्तुसुतरांलक्षणयाव्यक्तिविशेषणत्वेनशक्त्योपस्थितस्यव्यक्तिनैरपेक्ष्येणान्वयावोधादितिभावःतात्पर्यविषयेमुख्यतात्पर्यविषयेप्रामाण्यंतात्विकप्रा माण्यंविशेषणबुद्धिद्वारकत्वेननिर्धर्मत्वादिवैशिष्ट्यधीद्वारकत्वेन॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वभावलब्धेति। परमतेज्ञानानंदयोः स्वतएवभेदइत्यर्थः। सत्तायाः सत्तारूपपरजातेः ब्रह्मलक्षणत्वायोगःकल्पतरूक्तेर्ब्रह्मलक्षणत्वमयुक्तमितिभावः।जा
तित्वव्यपदेशात्।कल्पतरौपरजातित्वव्यपदेशात् त्रिकालाबाध्यत्वमेवेति त्रिकालबाधविषयत्वाभावस्याधिकरणीभूतसत्तारूपत्वेनतत्स्वरूपासत्तेतिभावः
तस्यत्रिकालाबाध्यत्वोपलक्षितसत्त्वस्वरूपस्य अनृताश्रितत्वाभावेनेति।त्रिकालाबाध्यत्वस्येत्यादिः त्रिकालाबाध्यत्वोपलक्षितसत्त्वरूपस्यस्वरूपलक्ष।
णस्येतिशेषः। तद्व्यावर्त्तकत्वसंभवात् अनृतव्यावर्त्तकत्वसंभवात् स्वरूपलक्षणायत्स्वरूपंतदितरव्यावर्त्तकमतउक्तोपलक्षितसत्त्वस्यब्रह्मरूपतयातदन्यव्या
वर्त्तकत्वंयुक्तमितिभावः।नन्वेवंसत्यपदेनैवलक्षणसमर्पणेत्वन्मतेआनंदादिपदंव्यर्थमित्याशंकापूर्वोक्तंस्मारयत्यानंदत्वादीति।धर्मिसमसत्ताकभेदस्याश्रयस

परमतेतुस्वभावलब्धभेदज्ञानानंदनिष्ठेअपरजातीप्रवृत्तिनिमित्तेतथाचलक्ष्यार्थाभेदेपिनपर्यायताशंकाननुकुंभाद्यनुगतसत्तायाब्रह्मल।
क्षणत्वायोगः मिथ्यासत्यानुगतसामान्याभावात् तयाचानृताद्यावृत्त्यसिद्धेः त्रिकालाबाधत्वंब्रह्मणिश्रौतमितित्वन्मतहानापत्तेश्चेतिचेत् नब्रह्म
णः सर्वाधिष्ठानतयातद्रूपसत्तायाःसर्वानुस्यूतत्वेनजातित्वव्यपदेशात् कल्पितधर्मत्वमादायब्रह्मव्यक्तिकत्वाच्चतच्चसत्त्वंत्रिकालाबाध्य
त्वमेवेतिनतस्यश्रौतत्वहानिः तस्यानृतंप्रत्यधिष्ठानत्वेपि अनृताश्रितत्वाभावेनतद्व्यावर्त्तकत्वसंभवात् आनंदत्वादिकल्पितजातिसाहित्येनल
क्षणोक्तिः परीत्या नच धर्मिसमसत्ताकभेदंविनैवौपाधिकभेदमात्रेणाकाशत्वादेरिवज्ञानत्वादेरपिजातित्वायोगइतिवाच्यं ज्ञानत्वादी
नांधर्मिसमसत्ताकभेदवदुपहितवृत्तित्वात् तर्हिशुद्धस्यकथंज्ञानत्वादिलक्षणं नहिगंधोजलस्यलक्षणमितिचेत् नोपहितवृत्तित्वे
प्युपधेयवृत्तित्वानपायात् तदुक्तंसत्यत्वादिविशिष्टशबलब्रह्मवाचिनांसत्यादिपदानांशुद्धेब्रह्मणिलक्षणेति नचानृतस्वरूपेशबले
सत्यत्वायोगः योगेवाततोनानृतव्यावृत्तिरितिवाच्यंशबलेहिसत्यतास्यैवयत् परमार्थसत्संसर्गेणप्रतीयमानेतस्मिन्सत्यशब्दसंग।
तिग्रहः तदुक्तंसंक्षेपशारीरके आकाशादौसत्यतातावदेकाप्रत्यङ्मात्रेसत्यताकाचिदन्यातत्संपर्कात् सत्यतातत्रचान्याव्युत्पन्नोयंस।
त्यशब्दस्तुतत्रएवमानंदादिपदेष्वपिद्रष्टव्यंतथाचकथंतेषांनानृतादिव्यावर्त्तकत्वं॥ ((मसत्ताकभेदं।स्वंभेदः लक्षणंउपलक्षणंजात्युपलक्षितव्यक्ति

स्वरूपस्यैवसिद्धांतेलक्षणत्वात् परीत्यावेदं एका।स्वकालाबाध्यत्वरूपाकाचिदन्यात्रिकालाबाध्यस्वरूपत्वरूपा।तत्र।आकाशादौअन्या।त्रिकालाबाध्यस्वरूप
तादात्म्यरूपाव्युत्पन्नः गृहीतशक्तिकः तत्रउक्ततादात्म्यवतितत्रप्रथमद्वितीयसत्यत्वाभ्यांसत्यस्यसत्यंसत्यंचानृतंचसत्यमभवदित्यादिश्रौतप्रयोगोपपादनेपिलोके
व्यवहारात् शक्तिग्रहस्त्रिकालाबाध्यसद्रूपात्मकेएवघटःसन्नित्यादौतत्त्वेनैवलोकेघटादेःप्रत्ययात्।सदेवसोम्येदंसत्यंज्ञानमित्यादिवाक्येतुसत्यादिपदेनोक्तरूपा
त्मकत्वेनोपहितब्रह्मणःशक्त्याबोधनेपिलक्षणयाशुद्धब्रह्मबोधकत्वंतावतानोपहितस्यमिथ्याभूतस्यत्रिकालाबाध्यसद्रूपतातवोक्तसद्रूपात्मकत्वेनशुद्धेपिवर्त्तमाने
नोपलक्षितस्यशुद्धचिद्रूपलक्षणस्यानृतव्यावर्त्तकत्वासंभवइतिभावः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।सोरोदीघदरोदीत्तद्रुद्रस्यरुद्रत्वंयदश्रुवशीयततद्रजतमभवदित्याद्यर्थवादार्थोबाधितत्वात्प्रातीतिकरूपानृतस्तथापिनतद्वाक्यमप्रमाणंउक्तार्थस्यतात्पर्यवि षयीभूतस्तुतिद्वारत्वेपितात्पर्याविषयत्वादेवंमुख्यतात्पर्यविषयीभूताखंडब्रह्मधीद्वारत्वेपिव्यावृत्तेर्मुख्यतात्पर्याविषयत्वेनव्यावहारिकास्तस्याः बोधनेपिसत्या दिवाक्यंतात्त्विकप्रमाणमेवउक्तार्थवादार्थस्यतुव्यावहारिकमानबाधितत्वेनतदंशेऽवांतरतात्पर्यस्याप्यभावेननव्यावहारिकप्रामाण्यमितिभावः अन्यावि षयकस्य सत्यंनवेत्यादिसंशयानात्मकस्य अन्याज्ञाने संशयोच्छेदे अन्यज्ञानप्रतिबंधद्वारेण लक्षणाजन्यज्ञाने उक्तसंशयरूपत्वविघटनद्वारेणाय। द्यपिवाक्यंशक्त्यासत्यत्वादि वैशिष्ट्यमात्रबोधकंतथापितात्पर्ये संशयादिदोषात् तेनसत्यत्वादितदभावकोटिकसंशयोजायतेतथाचसत्यत्वादिवैशि। ष्ट्यनिश्चयरूपद्वाराभावाद्प्रामाण्यशंकाशून्यमखंडज्ञानंनजायतेविचारादिनातूक्तदोषनिवृत्तौसत्यत्वादिवैशिष्ट्यनिश्चयाद्यावृत्तिनिश्चयेनेतरव्यावृ त्ताखंडज्ञानमुक्तशंकाशून्यंजायतइतिव्यावृत्तिधीप्रयोजिकयासत्यत्वादिवैशिष्ट्यधीसामग्र्यासंशयानात्मकज्ञानजननाद्व्यावृत्त्यासंशयानात्मकज्ञा।

नचव्यावृत्तिज्ञानस्यधर्मिधीसाध्यत्वेनवैपरीत्यापातः धर्मविशिष्टधर्मिज्ञानसाध्याया व्यावृत्तेःशुद्धधर्मिज्ञानेद्वारत्वांगीकारात् नचशाब्देअर्थे आर्थिकस्यद्वारत्वमनुपपन्नं अन्यथानीलमुत्पलमित्यादेरप्यनीलव्यावृत्तिद्वारास्वरूपमात्रपरत्वंस्यादितिवाच्यंनीलमुत्पलमित्यादौस्वरूपमात्रबोधे तात्पर्याभावाच्छाब्देर्थेआर्थिकापेक्षाविशिष्टार्थतात्पर्यात्अत्रतुस्वरूपमात्रेतात्पर्यंतच्चार्थकार्थस्यद्वारत्वंविनानुपपन्नंनचविशेषस्यत्व। न्मतेऽभावात् किंप्राग्ज्ञातंव्यावृत्त्याज्ञापनीयमितिवाच्यं अन्याविषयकस्यस्वरूपज्ञानस्यभ्रमविरोधिनःसाध्यत्वातनचैवमन्याज्ञाने द्वारत्वं अन्यज्ञानप्रतिबंधद्वारेणशुद्धज्ञानएवद्वारत्वसंभवात्नचव्यावृत्तिज्ञानस्यैवस्वरूपज्ञानंद्वारमस्तुतस्याभिधाबललब्धविशिष्टज्ञानादेवसि

नंसाध्यतइतिव्यवहारः। अथवावाक्यंलक्षणयाखंडबोधकमप्युक्तदोषसहकृतंनतथाकिंतुसत्यत्वादिसंशयजनकमुक्तरीत्याव्यावृत्तिनिश्चयेतुखंड। बोधकंअथवाअन्याविषयकस्येतिकः स्वार्थेतथाचाप्रामाण्यसंशयरूपान्याविषयस्याखंडविषयकवृत्तिज्ञानस्यसाध्यत्वादित्यर्थः। व्यावृत्त्यनिश्चयेऽखंडज्ञा नमप्रमात्वेनसंदिह्यते इतिव्यावृत्तिनिश्चयोऽसहकृताखंडज्ञानेद्वारमितिभावः विशिष्टज्ञानादेवेति यद्यप्यखंडज्ञानोत्तरमपिधीविशेषविषयत्वाभ्या मखंडस्यपक्षत्वेहेतुतासंभवेनव्यतिरेकव्याप्त्याव्यावृत्तिधीःसंभवत्येवसत्यत्वादिवैशिष्ट्यज्ञानस्यव्यावृत्तिबोधफलकत्वास्वीकारेपिसत्यत्वाद्युपलक्षिता खंडधीद्वारामिथ्यात्वादिसंशयनिवृत्तिफलकत्वात्तत्सत्यादिपदवैयर्थ्यमतएवनिवर्तनीयाशाधिक्येननपदांतरवैयर्थ्यमित्युक्तंतथापिव्यावृत्तिद्वारापर्यव स्यतीतिप्राचीनोक्तिरपिनिरवद्येतिभावः अतएवाखंडज्ञानेप्रकृत्यव्यावृत्तेःशाब्दबोधफलत्वेनतद्विषयत्वादितिअखंडस्याप्यंतः करणवृत्तिभे देनलक्ष्यलक्षणाभावइतिचोक्तंनहिव्यावर्त्यव्यावर्तकभावाद्न्योलक्ष्यलक्षणाभावइतिध्येयं।। ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि· विषयसिद्धौप्रस्तरस्तुतिरूपविषयसिद्धौ अनुपायत्त्वादिति तत्सिद्धिपेटिकान्यायेनयजमानकार्यसाधकत्वस्ययजमानपदलक्षितस्यप्रस्तरेज्ञानमेव तदुपायइ
टी·ल· तिभावः। अनृतत्वस्येति ब्रह्मण्यनृतव्यावृत्तेर्मिथ्यात्वेब्रह्मणिप्रतीतस्येत्यादिः पदतदर्थादावितिनगनागादिपदेषुविभुषुध्वनिधर्मह्रस्वत्वदीर्घत्वादिविशिष्ट
उ· विशेषणेप्यवांतरतात्पर्याभ्युपगमाद्यायजमानःप्रस्तरइत्यादौतुनविशेषणेऽवांतरतात्पर्यंतात्पर्यविषयसिद्धावनुपायत्वात् महातात्पर्यविषयसिद्ध्युपायेह्यवांतर
२४ तात्पर्यमितिसर्वंसिद्धं ननुव्यावृत्तयःसत्यामिथ्यावानाद्यःव्यावर्त्तकानामपिसत्यत्वापत्तेःव्यावहारिकाणांपारमार्थिकव्यावृत्त्यसाधकत्वात्नांत्यःशुक्तेःशुक्तितोव्यावृत्तेर्मि
थ्यात्वेशुक्तित्वस्यशुक्तिसमसत्ताकत्ववदनृतव्यावृत्तेर्ब्रह्मणिमिथ्यात्वेऽनृतत्वस्यब्रह्मसमसत्ताकत्वापत्तेरितिचेत् नउभयथाप्यदोषात् तथाहिव्यावृत्तेर्ब्रह्माभिन्नतया
पारमार्थिकत्वेपिव्यावर्त्तकंपारमार्थिकमितिकुतः नहियत्पारमार्थिकबोधकंतत्पारमार्थिकमितिनियमोस्तिबोध्यबोधकयोःसमसत्ताकत्वस्यपदतदर्थादौव्यभिचारेणप्रा
गेवनिरस्तत्वात् दोषाप्रयुक्तभानत्वस्यसत्यत्वप्रयोजकत्वात् नापिव्यावृत्तिबोधकंव्यावृत्तिसमसत्ताकमितिनियमःस्वप्नांगनादेरपिस्वजन्यसुखापेक्षयासुखांतरव्यावृ-
त्तिबुद्धिजनकत्वात्कारणस्यकार्यव्यावर्त्तकत्वात् साचव्यावृत्तिस्त्वमतेपारमार्थिकोवममतुमतेव्यावहारिकीसर्वथापिप्रातिभासिकव्यावर्तकापेक्षयाधिकसत्ता
कैवनचव्यावृत्तेर्ब्रह्माभिन्नत्वेब्रह्मपदेनैवतल्लाभादितरपदवैयर्थ्यंसामान्यतस्तत्सिद्धावप्यनृतादिव्यावृत्त्याकारेणतत्सिद्धेःसाफल्यात् एवमज्ञानादिव्यावृत्तीनामन्यो-
न्याभेदेसत्यपदेनैवचारितार्थ्यमित्यपास्तं तत्तदाकारेणसिद्धेस्तत्तत्पदंविनानुपपत्तेः नचैवंसत्यत्वज्ञानत्वादिधर्माणामपिव्यावृत्तिवत्ब्रह्माभिन्नतयापारमार्थिकत्व
मस्त्वितिवाच्यं इष्टापत्तेःतद्वद्व्यावृत्तेःसत्यत्वे नकोपिदोषःव्यावृत्तेर्मिथ्यात्वपक्षेपिनानृतत्वस्यब्रह्मसमसत्ताकत्वापत्तिःएकबाधकबाध्यत्वस्योभयत्रापितुल्यत्वात्व्यावृत्तिबा
धकाबाध्यस्यैवप्रतियोगिनोव्यावृत्त्यधिकसत्ताकत्वंनत्वेकबाधकबाध्यस्यापिकल्पितरजतव्यावृत्तेःकल्पितरजतेमिथ्यात्वेपितदपेक्षयातस्याधिकसत्ताकत्वाभावात्अ
धिकंमिथ्यात्वमिथ्यात्वोपपादनेद्रष्टव्यं ननुतत्त्वजिज्ञासुंमुमुक्षुंप्रतिमिथ्याबोधनायोगः नचानृतत्वादिभ्रांतिनिवृत्त्यर्थंतत् अधिष्ठानब्रह्मतत्त्वसाक्षात्कारेणैवतन्निवृ-
त्तिसंभवेभ्रांत्यंतरोत्सादनायोगात् नहिवल्मीकेस्थाणुरयमितिभ्राम्यतःपुरुषोयमित्युपदिश्यतइतिचेत् ननिवर्त्तकाधिष्ठानतत्त्वसाक्षात्कारएवतस्योपायत्वात्स्थूला
रुंधतीन्यायेनपूर्वपूर्वभ्रमनिवृत्तयेकाल्पनिकोपदेशस्यपंचकोशस्थलेदर्शनाच्चयथाचात्मनिकल्पितेनब्राह्मण्येनाशंकिताब्राह्मण्यभ्रांतिर्निवर्त्ततेतथाव्यावहारिकाव्या
वृत्त्याप्रातिभासिकानृतादिभ्रांतिर्निवर्ततेनचासद्व्यावृत्तेर्व्यावहारिकत्वेअनपोदितप्रामाण्येनासद्वाइदमग्रआसीदितिवाक्येनासत्त्वस्यपारमार्थिकत्वप्रसंगःनेहनानेत्य राम·
नेनतस्यनिषेधात् असद्वाइत्यादेरन्यपरत्वस्यप्रागेवदर्शितत्वाच्चतथाचमीमांसकमते अनृतस्याप्यर्थवादार्थस्यसत्येप्राशस्त्यइवमिथ्याभूतानामपिव्यावृत्तीनांसत्येब्र २३४
ह्मणिद्वारत्वेनबोधनंयुक्तं उक्तंहिसत्येब्रह्मणिसत्यादिशब्दाव्यावृत्तिद्वारापर्यवस्यंतीति·॥ २ तयाप्रातीतिकत्वेपितदर्थस्यतदभावइतिभावः मिथ्याबोधनायोगः॥
मिथ्याभूतायाव्यावृत्तेर्बोधनमयुक्तं अनृतस्यापीति·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथापंचप्रयाजानामदृष्टरूपकार्यभेदात्समुच्चयएककार्यस्यान्येनोत्पादेमानाभावादेवंदृष्टरूपकार्यभेदेपिअंगानांसमुच्चयोऽतएवांजनाभ्यंजननामकसत्रेगोग्गुलत्वे नभातःसवनेभ्यंजतइत्यादिनोक्तंगोग्गुलवाद्यभ्यंजनंप्राकृतस्यनवनीताभ्यंजनस्यननिवर्त्तकत्वंकिंतुनवनीताभ्यंजनंस्नेहनार्थंगोग्गुलवादिकंतुरूक्षीकरणार्थमितिदृष्टकार्यभेदा त्समुच्चयइतिदशमचतुर्थेसिद्धांतितंआनंदादयःप्रधानस्येतितृतीयाध्यायस्यसूत्रस्यायमर्थःयत्रशाखायामानंदादिपदानामन्यतमंनश्रूयतेतत्रापितदुपसंहर्त्तव्यंय तस्तत्प्रधानस्यब्रह्मणोनृतादिव्यावृत्तस्वरूपस्यप्रतिपत्त्युपायइति अस्थूलत्वादीनामिति ब्रह्मणः प्रतिपत्त्युपयोगिनामित्यनुषज्यतेअक्षरधियामित्यादेरपि तृतीयाध्यायस्यसूत्रस्यायमर्थः बृहदारण्यकेएतद्वैतदक्षरमित्युपक्रम्योक्तत्वेनाक्षरधियोऽस्थूलत्वादयअक्षरस्यधीर्येभ्यस्तेक्षरधियः तेयत्रयत्तदद्रेश्यमा ग्राह्यमित्यादौनश्रूयंतेतत्रापितेषामवरोधउपसंहारःसामान्यात्प्रपंचमात्रनिषेधेनब्रह्मप्रतिपादनस्यसर्वत्रसमानत्वात्।तद्भावात् अथपराययातदक्षरम।

नसमुच्चितानांद्वारत्वेनसफलत्वात् प्रधानस्यब्रह्मणः प्रतिपत्त्युपयोगिनामानंदादीनांभावरूपाणामानंदादयःप्रधानस्येत्यनेनअस्थूलत्वादीनाम भावरूपाणामक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तमित्यनेनचसूत्रेणनिर्गुणब्रह्मप्रतिपत्तावेवसर्वशाखासूपसंहारस्यप्रतिपा। दितत्वेनद्वारसमुच्चयस्यैवेष्टत्वात् ननुसगुणेब्रह्मण्युपासनार्थंभवतुशाखांतरीयगुणोपसंहारःनिर्गुणब्रह्मप्रमितौतुकिंशाखांतरीयगुणोपसंहारेणस त्यादिपदानांप्रत्येकंलक्षकत्वेनलक्ष्यब्रह्मबोधनेप्रत्येकमेवसमर्थत्वात् सत्यत्वादेश्चप्रत्येकंलक्षणत्वात् नहिप्रकृष्टत्वादिकमिवसत्यत्वादिकमतिव्याप्तमिति चेन्नप्रकृष्टप्रकाशयोरिवसत्यादिपदानामपिकुमतप्राप्तातिव्याप्तिनिवृत्त्यर्थंसमुच्चयापेक्षणात् नह्यनृतव्यावृत्तिबोधनंविनाविज्ञानमानंदंब्रह्मेत्यत्रशून्य वादव्यावृत्तब्रह्मसिद्धिःएवमेकैकपदाभावेसर्वत्रातिव्याप्तिरूहनीयातथाचसत्यत्वादिकमनृतादिव्यावृत्तिद्वाराशून्यवादादिव्यावृत्तब्रह्मसिद्धेरुपायःनच व्यावृत्तिःकिंब्रह्मविशेषणत्वेनबोध्यास्वतंत्रावाआद्येसखंडार्थत्वंद्वितीयेब्रह्मजिज्ञासुंप्रतितदुपदेशोसंगतइतिवाच्यंव्यावृत्तिर्यद्यपिविशेषणतयैवा र्थिकबोधेभासतेतथापिनशाब्दबोधेसखंडार्थत्वंयश्चार्थादर्थोनसचोदनार्थइतिन्यायात् तदुक्तंवार्तिककारैःमानांतरादपोहस्तुनशाब्दस्तेनसम्मत

धिगम्यतेयत्तदद्रेश्यमित्यादिवाक्येष्वक्षरस्यप्रतिपाद्यतयाभावात् सत्त्वात् औपसदवत् यथाजामदग्न्येऽहीनेपुरोडाशिनीषूपसत्सुचोदितासुपुरोडाशप्रदानमंत्राणा मग्नेर्वेहोत्रंवेरध्वरमित्येवमादीनामुद्गातृवेदोत्पन्नानामध्वर्युभिःसंबंधोभवतिपुरोडाशप्रदानस्याध्वर्युकर्तृकत्वादंगानांचप्रधानतंत्रत्वात्तदुक्तंपूर्वमीमांसायांगुणमु ख्यव्यतिक्रमेतदर्थत्वान्मुख्येनवेदसंयोगइत्यत्रतथेहाप्यक्षररूपप्रधानतंत्राणामस्थूलत्वादीनांयत्रक्वचिदुत्पन्नानांसर्वत्रविद्यमानेनाक्षरेणप्रधानेनसम्बन्धइ तिलक्षणत्वात्।लक्षणीभूताखंडस्वरूपस्यस्ववैशिष्ट्यज्ञानाधीनव्यावृत्तिधीद्वाराबोधकत्वात्।सत्यत्वादिकंसत्यत्वाद्येकैकमात्रेणोक्तद्वाराबोधितंशून्यवादव्यावृत्ते ति।शून्यवादोत्थितप्रतिपत्त्यानृतत्वेनसंदिह्यमानंयत्तदन्येत्यर्थःउक्तव्यावृत्तिबोधोत्तराखंडज्ञानस्यैवोक्तसंशयनिवर्तकत्वमितिभावःअपोहःअनृतादिव्यावृत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।ब्रह्मज्ञानस्यान्याविषयकत्वंव्यावृत्तिधियेत्युक्तंतच्चयुक्तंयदिहिप्राचीनेब्रह्मज्ञानेऽन्यविषयकत्वंसंभाव्यतेतदाचरमस्यब्रह्मज्ञानस्यतदभावोव्यावृत्तिधि
यावाच्या नचप्राचीनमप्यन्यविषयकत्वेनसंभाव्यते अविद्यातत्कार्यनिवृत्तिस्वरूपयोग्यस्यैवाविद्यातत्कार्याविषयकत्वादित्याशयेनशंकते नचप्रा
चीनइति। निवर्त्तकत्वाभावात्। निवृत्तिस्वरूपयोग्यत्वस्याप्यभावात् नाविद्यानिवर्त्तकं नाविद्यानिवृत्त्युपधायकंप्राचीनमित्यादिःतथाचनिवृत्त्युप
धायकस्यैवसत्यत्वादिवैशिष्ट्यनिश्चयाधीनव्यावृत्तिनिश्चयाधीनत्वेनव्यावृत्त्यविषयकत्वनियमःप्राचीनंतुनिवृत्तिस्वरूपयोग्यमप्यन्यविषयकंसं
भाव्यतइतिचरमस्यातथात्वनियमायव्यावृत्तिबुद्धिरवश्यापेक्षणीयेतिभावः असाक्षात्कारत्वादिति।साक्षिसम्बद्धविषयत्वमात्रेनसाक्षात्कारत्वंकिं
तुभ्रमत्वेनागृह्यमाणत्वविशेषितंतदितिभावः। ननुतत्प्राचीनंनतुतत्प्राचीनतुल्यंतुल्यत्वमन्यविषयकत्वेनतथाचतस्यान्याविषयकत्वायव्यावृ
त्तिधीरपेक्षणीयेतिभावः।यत्तुप्राचीनेइत्यादिशंकायाव्याख्यानंद्वारीभूतव्यावृत्तिज्ञानात्प्राचीनेसत्यत्वादिवैशिष्ट्यज्ञानत्वाभिमतेब्रह्मज्ञानेऽविद्याका।

नचप्राचीनेब्रह्माज्ञाननिवर्त्तकब्रह्मापरोक्षज्ञानेतदज्ञानकार्यस्यान्यस्यभानायोगःब्रह्ममातिपदिकार्थबुभुत्सायामेवैतद्वाक्य प्रवृत्तिरि
तिस्वप्रक्रियाविरोधश्चेतिवाच्यंब्रह्मापरोक्षज्ञानंहितत्स्वरूपंवातद्वृत्तिरूपंवाआद्येनान्यभानानुपपत्तिस्तस्याविद्यानिवर्त्तकत्वाभावात् वृत्तिरू
पमप्यापातदर्शनंनाविद्यानिवर्तकंतस्यासाक्षात्कारत्वात्॥ साक्षात्कारत्वेपिप्रतिबद्धत्वाद्वाविचारजन्यंतुफलीभूतंभवत्यविद्यानिवर्त्तकं
नतुतत्प्राचीनमितिकिमनुपपन्नंननुसत्यशब्देनासद्व्यावृत्तिद्वारायद्बोधितंतदेवज्ञानादिपदैरज्ञानादिव्यावृत्तिद्वाराबोध्यमितिपदांतर
वैफल्यंनचद्वारविकल्पःसत्यादिपदानांनित्यवच्छ्रवणात्एकस्मिन्प्रयोगेव्रीहियवयोरिवैकस्मिन्वाक्येसत्याद्यनेकपदोपादानायोगात्अनृ
तत्वादिभ्रांतिनिवृत्तिरूपदृष्टकार्याणांभिन्नत्वेनव्रीहियवादिवद्विकल्पप्रयोजकस्यैककार्यत्वस्याप्यभावाच्चेतिचेत्॥ (र्थभानायोगस्तस्यैवाविद्यानिवर्त्त

कत्वसंभवात्तथाचाविद्यानिवर्त्तकमुत्तरज्ञानमंगीकृत्यतत्रव्यावृत्तिधीसाध्यत्वस्वीकारोव्यर्थइतितन्नशोभतेसत्यत्वादिवैशिष्ट्यबोधोत्तरज्ञानस्यैवानृतत्वादिसंशयनिवर्त्तकत्वे
नानुभवसिद्धत्वेनतदनुत्तरज्ञानस्यानुपयुक्तत्वात् किंचसत्यत्वादिवैशिष्ट्यधीत्वेनाभिमतंसत्यादिवाक्यजज्ञानंतत्कथंब्रह्माविद्यानिवर्त्तकंअथपदार्थाज्ञाननिवर्त्तकत्वमेव
तत्रप्रकृतेउक्तमितिवाच्यंतथाप्यविद्याकार्यसामान्यस्यतद्विषयत्वासंभवोक्तिर्नयुक्तैवकथंवासत्यादिवाक्यजज्ञानस्यापरोक्षत्वमुक्तमितितस्मात् स्पष्टमसिप्रतारकःद्वारवि
कल्पःद्वारीभूतबोधसाधनसत्यादिपदानांवैकल्पिकमुपादानंनित्यवच्छ्रवणात्।नित्यानुष्ठीयमानात् शिष्टानांसत्यज्ञानादिसकलपदविचाररूपात्श्रवणात् एकवा
क्येसत्याद्यनेकपदानामेकबोधार्थशिष्टानांयदुपादानंप्रतिसंधानरूपंतदयोगात्। अथवानित्यवद्वाशब्दादियोगंविनैवश्रवणात् पाठात् ननुवाशब्दादियोगं
विनापिएकप्रयोजनकानांविकल्पस्वीकारादविकल्पनियामकत्वंन।वाशब्दाद्यभावस्येत्यतआहानृतत्वादीति।भिन्नत्वेनेति॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

तथासतीत्यादि प्रत्येकपदज्ञाप्यत्वस्यप्रत्येकार्थेपिसत्वेनप्रत्येकार्थमात्रसंम्बन्धितीरं तीरत्वेनरूपेणतद्विषयकापिशाब्दधीः स्यान्नतुनियमेनविशिष्टार्थसम्बन्धितीरं तीरत्वेनगाहमानेतिभावः। नचसत्यमित्यादिसत्यंज्ञानमित्यादितैत्तिरीयवाक्येआनंदपदनैरपेक्ष्येणविज्ञानमानंदंब्रह्मेतिबृहदारण्यकवाक्येचसत्यपदनैरपेक्ष्येण ब्रह्मलक्ष्यकत्वात्कथंतुल्यतेतिभावः वृत्तिद्वयविरोधेनेतिनचविशिष्टतीरत्वरूपेणलक्षणास्वीकारेणगंभीरत्वादिनाशक्तयधीनवोधानंगीकारान्नेदंयुक्तमितिवाच्यंवि शिष्टतीरत्वरूपेणलक्षणायांहिगंभीरायामित्यादौविशिष्टरूपेणैववोधस्यानुभूयमानत्वंसाधकं। तथाचसाधकवलादेवशक्त्यावोधितस्यगंभीरनदीसम्बन्धित्वस्यलक्षणा योपस्थिततीरेन्वयोस्तुकिंविशिष्टगुरुरूपेणलक्षणाया।युगपद्वृत्तिद्वयविरोधोपिवाक्यलक्षणान्यस्थलएवेत्यापत्तिस्तथाचप्युत्पत्तिभेदकल्पनेगौरवमित्यत्रविरोधाय

नचतत्रापिप्रत्येकंलक्षणा तथासति गभीरतीरनदीतीरादिलाभेनविशिष्टतीरबुद्धिर्नस्यात नचतत्रगभीरनदीपदयोर्विवेहसत्यादिपदानांपरस्परम न्वयबोधकत्वंतन्मतेनास्तीतिवाच्यंसकस्मिन्ब्रह्मणिद्वारीभूतस्यपरस्परार्थान्वयबोधस्यसत्यादिपदैर्मिलिताजननात्उत्तरकालएवलक्षणायाःस्वंड बोधस्याभ्युपगमात् नचसत्यंज्ञानंविज्ञानमानंदमित्यादौअन्योन्यानपेक्षाणांसत्यादिपदानांब्रह्मलक्षकत्वदर्शनात्कथंगभीरायामित्यादितुल्यन्याय तेतिवाच्यंयत्रवस्तुगत्यागंभीरनद्यभिप्रायेणैवनद्यांघोषइत्युक्तंतत्रपरस्परनिरपेक्षलक्षकत्वस्यगभीरायामित्युक्तौचमिलितलक्षकत्वस्यदर्शनात्गु णोपसंहारन्यायेनद्वारसमुच्चयस्यस्थापितत्वाच्चनचपरस्परपदसाहित्येनतत्रगभीरनदीसंबंधितीरंलभ्यतेअन्यथात्वेकैकसंबंधिप्रकृतेत्वधिकलाभो नपदांतरेणापीतिवाच्यंतत्रापियुगपद्वृत्तिद्वयविरोधापत्यागंभीरनदीतीरत्वेनलक्षणानभ्युपगमात् वस्तुगत्याविशिष्टसंबंधिनः प्रत्येकपदादपिलाभा त् अथविसिष्टबुद्धिद्वारत्वाद्वारत्वाभ्यांविशेषःप्रकृतेपिसतुल्यएवननुगभीरायामित्यत्रापिनमिलितेलक्षणा किंतुनदीपदएवपरस्परसाहित्येनविशि ष्टवोधानंतरंस्वज्ञाप्यविशिष्टसंबंधिनिलक्षणासंभवात् स्वज्ञाप्यसंबंधएवहिलक्षणालाघवात् नतुतद्विशेषःशक्यसंबंधःगौरवात् तथाचपदद्वयेलक्ष णालक्षणाद्वयंवानयुक्तंएवंचवृत्तेःपदद्वृत्तित्वनियमोपिसंगच्छतइतिचेतनैतत्सारंस्वज्ञाप्यसंबंधोहिलक्षणेतित्वयोच्यतेतज्ज्ञाप्यंप्रकृतेविशिष्टंतज्ज्ञा पकत्वंचोभयोःसाधारणमितिकथंनदीपदएवलक्षणानगभीरपदे विनिगमकाभावात्॥ ११सेत्यस्यतात्पर्यात्यदितुविशिष्टतीरत्वेनवोधेनियमाभावस्तदाकेव लतीरत्वेनवोधस्यलेगंभीरायांनद्यांघोषः नद्यांघोषइत्यनयोरविशेषःस्थितएवेतिभावः। प्रत्येकपदादपीति तीरत्वेनतीरविशेषस्यतात्पर्यादिनाधीसंभवः द्वारत्वाद्वारत्वा भ्यामितिगभीरनदीरूपविशिष्टस्यधीर्गंभीरायामितिपदस्यसत्वेतीरत्वेनतीरविशेषधीद्वारंतदसत्वेतुसानतथेत्यर्थःतुल्याइति नद्यांघोषइत्यत्रापिवस्तुगत्यागंभीरनदीसम्ब न्धिनोलाभसंभवेनदृष्टांतदूरवदार्ष्टांतिकेपि विषयतोधिकालाभःप्रयोजनतस्तुदृष्टांतेधिकालाभेपिदार्ष्टांतिकेभूम्नयवादादित्यावृत्तवहुप्रसिद्ध्याधिकलाभउक्तएवेतिध्येयं स्वज्ञाप्यविशिष्टेति। विशिष्टवाक्यार्थेतात्पर्येनेवपदेनापिज्ञाप्यंतदइतिभावःननुपदस्यैवलक्षकत्वनियमेसशक्यसम्बन्धएवलक्षणासंभवतिवाक्यार्थस्यनसशक्यस्तत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ॰सि॰ परिशिष्टे सत्यादिपदेषु विशेषणमिति सत्यत्वादीनिति शेषः निषेधपदानामिति तथा चानंत इति अस्थूलादीनामुपलक्षणमिति भावः ननु मिथ्यात्वाद्य
टी॰ल॰ भावरूपसत्यत्वादिवैशिष्ट्यज्ञानस्याप्यनृतत्वादिसंशयनिवर्तकत्वात्तन्मात्रद्वारकाखंडज्ञानेनापि शून्यवादव्यावृत्तं ब्रह्म सिध्यतीत्यनृतादिव्यावृत्तिनिश्चय
उ॰ स्य द्वारत्वं व्यर्थं ज्ञानत्वादिवैशिष्ट्यज्ञानस्यैव जडत्वादिसंशयविरोधित्वं संभवतीति ज्ञानादिपदस्यापि व्यावृत्तिधीद्वारत्वं व्यर्थमेवमनंतपदस्यापरिच्छिन्न
२६ बोधकत्ववत्सत्यत्वादिपदमप्यनृताद्यन्यबोधकमिति साक्षात्स्वार्थविशेषणता याः सत्यादिपक्षेष्वपि संभव इति चेन्न अनृतत्वस्य स्वाधिकरणावृत्तिस्वान्यूनसत्ता
कात्यंताभावप्रतियोगित्वं प्रमानिवर्त्यत्वं सदसद्विलक्षणत्वमित्यादिरूपतया तदभावरूपसत्यत्वस्यापि नानात्वेन एकविधसत्यत्ववैशिष्ट्यज्ञानेप्यन्यवि
धानृतत्वसंशयानिवृत्तेस्तन्निवृत्तये तत्तदनृतत्वविशिष्टव्यावृत्तिवैशिष्ट्यज्ञानमेकविधसत्यत्वहेतुकमवश्यं वाच्यं सर्वसत्यत्वानामेकदा सत्यपदेनाबोधनात् तन्

नचार्थिकेनापि विशेषणेन ब्रह्मणः सखंडत्वापत्तिः निर्द्धर्मकत्वादिश्रुतेर्विशेषणस्य धर्म्यसमानसत्ताकत्वेन सखंडत्वाप्रयोजकत्वात् न चानंतशब्देन
तद्व्यावृत्तेः साक्षादेव बोधनान्न तस्या आर्थिकत्वं तथा चानंतपदस्य सखंडार्थत्वं स्यादिति वाच्यं यद्यपि तत्रानंतोंतवद्वस्तुव्यावृत्त इत्येव विशेषणं स्वार्थार्पणप्र

णाड्या तु परिशिष्टे विशेषणमिति तैत्तरी

यवार्त्तिकोक्तदिशा विधिपदानां स्वार्थार्पणप्रणाडिकया ऽर्थादितरनिवृत्तिबोधकत्वं निषेधपदानां तु साक्षादिति स्थितं तथापि द्वारभूते ज्ञाने सखंडार्थ
त्वेपि परमतात्पर्यविषयज्ञाने नाखंडार्थत्वव्याघात इत्यसकृदुक्तं एतदेवोक्तमानंदबोधाचार्यैः लक्ष्यार्थभेदाभावेपि व्यवच्छेद्यविभेदतः विज्ञाना
नंतपदयोः पर्यायत्वं व्यर्थता न हीति एवं पदे लक्षणेति पक्षे समाहितं केचित्तु वाक्ये लक्षणामाहुः न पदे तथा हि यथा गभीरायां नद्यां घोषः इत्यत्र गभीरनद्योः परस्परम
न्वयबोधानंतरं विशिष्टार्थसंबंधितीरं लक्ष्यते तथा प्रकृते परस्परविशिष्टार्थबोधानंतरं तत्संबंध्यखंडं लक्ष्यते तथा च न वैयर्थ्यं ॥ एकसत्यत्वस्यैव सर्वानृतव्यावृत्ति एम॰

व्याप्यतया ग्रहात्तज्ज्ञानमेव सर्वानृतत्वविरोधीति वाच्यं तादृशग्रहाभावकाले तदसंभवात् किंच सत्यत्वादिवैशिष्ट्यज्ञानं मिथ्यात्वव्याप्यस्यागंतुकदोषजन्यधीविषयत्वस्यवै २३६
शिष्ट्यज्ञानेन न विरोधि सत्यत्वादिर्हेतुकमुक्तविषयत्वविशिष्टान्यत्वज्ञानं तु तद्विरोधीति तदवश्यकमत एव ज्ञानत्वादिहेतुकव्यावृत्तिधीरपि नव्यर्थाज्ञानाद्यन्यत्वव्याप्यदृश्य
विशेषत्वज्ञाने ज्ञानत्वादिवैशिष्ट्यज्ञानस्याविरोधित्वात् अथवा परमते सत्यत्वादेरिव तुल्ययुक्त्यानृतत्वादेरपि जातित्वादेकवैशिष्ट्यधीर्नापरवैशिष्ट्यविरोधिनी तथा चा
नृतत्वजडत्वानानंदत्वादिजातिविशिष्टसंशये सत्यत्वादिहेतुकमुक्तविशिष्टभेदज्ञानस्यैव निवर्तकत्वात्तदावश्यकमिति दिक् । अन्वयबोधानंतरमिति उक्तान्वयबोधविनोक्त
विशिष्टार्थवाक्यज्ञाप्यत्वाभावेन स्वज्ञाप्यसम्बन्धरूपलक्षणायास्तीरे ज्ञातुमशक्यत्वादुक्तान्वयबोध आवश्यक इति भावः विशिष्टार्थसम्बन्धितीरं लक्ष्यते । तीरत्वेन रूपेण
वस्तुगत्या गभीरनदीसंबंधितीरं लक्ष्यते एवं च मुद्दं ब्रह्मवस्तुगत्या विशिष्टवाक्यार्थसम्बन्धि लक्ष्यत इति दृष्टांतसादृश्यमत एव वक्ष्यते गभीरनदीतीरत्वेन लक्षणानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचद्वितीयपक्षेवाक्यस्यसुवंतत्वाभावेनलक्ष्यार्थबोधकत्वानुपपत्तिः अर्थवत्वेननाम्नोपितस्यतीररूपार्थेनाभेदेनक्रियान्वयीअयोग्यत्वात्तापिभेदेनअव्युत्पत्ते रितिवाच्यंतीरवृत्तावेवलक्षणास्वीकारेणवाक्यस्यद्वितीयांतत्वसंभवेनाभेदान्वयस्यक्रियायांसंभवात्।यत्रतुनद्वितीयांतत्वसंभवोयथागंभीरयानद्याहृत्साज निताइत्यादौतत्रनदीत्याद्यंतएवलक्षणास्वीकारान्नासाधुत्वंनवानन्वयःएषैवरीतिरर्थवादवाक्येपिलक्ष्यकेबोध्यातत्रापिहिभावनारूपक्रियामेवान्येषामिववा लवदनिष्टाननुबंधित्वरूपप्राशस्त्यस्याप्यन्वयःप्रथमपश्चादेवधात्वर्थेप्रथममेववाकरणेतिकर्तव्यताविशिष्टायांभावनायांतदन्वयाद्विशेषणीभूतयोःकरणेतिक र्तव्यतयोस्तदन्वय इतिध्येयं।मरणानुमानमिति।मद्गमनारंभोत्तरंप्रतीयमानमेतस्याजन्मपूर्वंशरीरप्राणवियोगरूपमरणपूर्वकंशरीरप्राणयोगेसतिशरीरग्रह णासमर्थस्यशरीरग्रहणात्वात्सम्मतवदित्यनुमानं।अनिष्टसाधनत्वमाक्षिप्यतइतिविषभोजनंनतृप्तिरूपेष्टस्यसाधनंनचेष्टांतरस्यमरणहेतुत्वात्किंतुशत्रुगृ

ननुअत्रजन्मनामरणानुमानंतेनचतत्साधनीभूतायागतेरकर्त्तव्यतानुमानमित्यनुमानपरम्परैवनलक्षणाअनन्यलभ्यस्यैवशब्दार्थत्वात्नहिधू मोस्तीतिवाक्यंवह्निलक्षकंविषमित्यादावपिविषभोजनस्येष्टसाधनतोक्त्याशत्रुगृहान्नभोजनस्यानि ष्टसाधनत्वमाक्षिप्यतेयद्वा आप्तस्यप्रमाणविरुद्धोप देष्टृत्वेनकोपोनुमीयतेतत्रचप्रसक्तशत्रुगृहान्नभोजनस्यहेतुत्वंकल्पयित्वातत्राकर्त्तव्यानुमानंनलक्षणेतिचेन्नैतत्साधु·जन्मनामरणाक्षेपेपितन्मरणेग मनस्यहेतुत्वानाक्षेपात् शतवर्षानंतरंजरादिनापितदुपपत्तेः तथाचप्रियामरणहेतुत्वंगमनस्यलक्षणांविनानावगंतुंशक्यंनापिप्रियामरणहेतुत्वेनग मनस्याकर्त्तव्यत्वानुमानंप्रियामरणहेतोरपितत्त्वेनाज्ञानदशायांगुरुनिर्देशाद्वा आत्मत्राणार्थेवाकुलापकीर्त्तिपरिहारार्थंवाकर्त्तव्यत्वदर्शनेनव्यभि चारात्तथाचगमनस्यप्रियामरणहेतुत्वतादृशस्यचाकर्त्तव्यत्वमित्युभयमपिलक्षणाधीनंजन्मनिर्देशस्यचप्रकृतेनुपयोगात्तेनप्रकृतोपयोगिन्यगमने तात्पर्यंज्ञाप्यतेसमुदायस्यतथाचसमुदायएवलक्षणानप्रत्येकपदेप्रत्येकंतात्पर्यज्ञापकाभावात् तथाचनात्रानुमितिपरंपरानवाप्रत्येकपदेलक्षणा॥

हभोजनस्यप्रसक्तस्यदुःखसाधनत्वंसंभावितमितिशत्रुगृहभोजनद्वारामृतत्वप्रतिसंधानजन्यदुःखस्यानुत्पादरूपेष्टस्यतस्मात्तादृशदुःखोत्पादरूपबलवदनिष्ट साधनंशत्रुगृहभोजनंविनाविषंभुंक्ष्वेतिवाक्यमाप्तोक्तमनुपपन्नमित्याक्षिप्यतेअथवाविषमित्यादिवाक्यंशत्रुगृहभोजनप्रसक्तावुच्यमानंसावधारणंविषभोजनमे वबलवदनिष्टसाधनत्वेसतीष्टसाधनंनतुशत्रुगृहभोजनमित्यर्थकमितितदर्थकत्वंतस्यशत्रुगृहभोजनेबलवदनिष्टसाधनत्वंविनानुपपन्नमित्याक्षिप्य तइत्यर्थः।प्रकृतेप्रियावाक्येऽनुपयोगात्गमनंमास्त्वितीच्छंत्याःप्रियायास्तात्पर्यविषयत्वायोग्यथाश्रुतार्थकत्वात्प्रकृतोपयोगिनिप्रियातात्पर्यविषयत्वयोग्येननुवि ज्ञानब्रह्मचेद्वेदतस्माच्चेन्नप्रमाद्यतिशरीरे[illegible]पाप्मनोहित्वासर्वान्कामान्समश्नुतेइत्यादौवेदविज्ञानब्रह्मवेदनादेःपापनाशादौवृष्टिश्चेद्भवेत्तदासुभिक्षंभवेदित्यादौलोकेचा वृष्ट्यादेःसुभिक्षादौचेत्शब्देनहेतुताबोधनात् प्रकृतेपिगमनस्यजन्मनिहेतुत्वंबोध्यतेजन्मनाचमरणमनुमीयतेनमरणप्रयोजकत्त्वेनगमनस्याकर्त्तव्यत्वानु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२५

अ·सि· परंपरयास्वाश्रयनदीसंयोगाभिन्नः निम्नरूपनदीद्रव्यवाचित्वेनेति निम्नत्वेननदीवाचित्वेनेत्यर्थः गंभीरंनद्यामपिस्वज्ञाप्यतावच्छेदकंगंभीरत्ववैशिष्ट्यस्य
टी·ल· त्वेनतत्संयोगरूपः साक्षात्सम्बन्धस्तदीरेस्तीतिभावः। विभक्त्यर्थानन्वयइति नदीपदोत्तरविभक्त्यर्थस्यगंभीरपदलक्ष्येऽनन्वयः प्रत्ययानांस्वप्रकृत्यर्थान्वित
उ· स्वार्थबोधकत्वादितिभावः। नैयायिकैरिति। विशेषणविभक्तेः साधुत्वार्थकत्वमुक्त्वायद्वाविशेषणविभक्तिरभेदार्थिकेतिशब्दमणौउक्तंसंभवत्यर्थसाधुत्वेप
२७ दसाधुत्वमयुक्तमित्यतआह यद्वेतीति मिश्रैस्तदवतारितं। प्रत्येकमन्वयस्यभावनान्वितप्रत्येकविभक्त्यर्थकारकेषु आरुण्यादिरूपनामार्थान्वयस्य अरुणा
धिकरणेतिज्योतिष्टोमेश्रूयतेअरुणयापिंगाक्ष्याएकहायन्यासोमंक्रीणातीति तत्रपिंगाक्ष्यादिपदद्वयस्यजातिवचनत्वासंभवेनविशिष्टद्रव्यवाचित्वंतच्चद्रव्यद्वयं
सामानाधिकरण्यादेकं अरुणापदस्यतुआकृत्यधिकरणन्यायेनजातिवदनुगताखंडोरुणगुणोवाच्यः सचनक्रयार्थोऽमूर्त्तत्वेनक्रयेसाधनत्वासंभवात्किंतु
वाक्यंभित्वाप्रकरणेनप्राकरणिकक्रियामात्रेयद्यपितत्रापिनसाक्षात्साधनत्वममूर्त्तत्वाद्द्रव्यपरिच्छेदकत्वेनतत्रान्वयेचएकहायन्यादिपरिच्छेदकत्वेनक्रय
भावनायामेवनिवेशोयुक्तएकवाक्यत्वानुरोधात् तथापिएकस्मिन्नुक्तवाक्येएकहायन्याविधेयत्वेनानुवाद्यत्वासंभवात् वाक्यांतरविहितप्राकरणिकद्रव्यमनूद्यारु

नचगाभीर्येणसहतीरस्यपरंपरयासंबंधोनद्यासाक्षात् संबंधएवविनिगमकइतिवाच्यं निम्नंगभीरंगंभीरमितिकोशाद्गभीरपदस्यनिम्न
रूपनदीद्रव्यवाचित्वेनसाक्षात्संबंधस्यापिसाधारणत्वात् नचविशेषणविभक्तेः साधुत्वार्थत्वाद्गभीरपदलक्षणायांविभक्त्यर्थानन्वयइतिवाच्यंवि
शिष्टबोधसमयेगभीरपदस्यविशेषणपदत्वेपिविशिष्टसंबंधिलक्षणासमयेविशेष्यपदत्वात्विशेषणविभक्तेःसाधुत्वार्थकत्वमित्यप्यसंबद्धं अभेदार्थ
कत्वस्यनैयायिकैःप्रत्येकमन्वयस्यचमीमांसकैररुणाधिकरणसिद्धस्याभ्युपगमात्एवमन्यदपिवाक्यलक्षणोदाहरणमनुसंधेयं गङ्गा गङ्गायांमिवेत्यांतेत्यादि
विषभुंक्ष्वेत्यादिच·॥
ण्यविशिष्टद्रव्यंलक्षणयारुणापदेनोपस्थाप्यद्रव्यमात्रस्यप्राप्तत्वेपितद्वाराप्रकृतक्रियायामारुण्यंविधीयते इति प्राप्तेक्रयाः
न्वितभावनायामारुण्यरूपमुख्यार्थस्यैवान्वयोस्तुप्राकरणिकक्रियामात्रेउक्तद्रव्यस्यलक्षणावाक्यभेदयोरन्याय्यत्वात् अमूर्तस्यापितस्यद्रव्यपरिच्छेदद्वा
राकरणत्वसंभवादन्यथाद्रव्यद्वाराप्यमूर्त्तस्यकरणत्वासंभवात् तथाचप्रथमम्एकहायनीपिंगाक्षीपदार्थयोरिवारुण्यस्यापिकरणकारकान्वयद्वाराभावना
यामेवान्वयेपिएकहायनीपरिच्छेदद्वाराक्रयोद्देशेनारुण्यस्यपश्चाद्विधिकल्पनात् सोमादेर्यागादाविवारुण्यस्यक्रयेगतेतितृतीयप्रथमेर्थैकत्वेद्रव्यगुणयोरै
ककर्म्यान्नियमः स्यादित्यधिकरणेस्थितं। वाक्यार्थैकत्वसंभवेएकहायनीद्रव्यारुण्ययोरेकक्रयागतत्वादेकहायन्यामेवारुण्यंशास्त्रार्थोनतुप्राकरणिकद्रव्यमात्रे
इतिनियमइतिसूत्रार्थः यत्तुवाक्यलक्षणानयुक्तासाहिनदीस्यंतेनद्यामित्यंतेवानाद्येतस्याप्रकृतित्वेनतदर्थेसुवर्थस्यानन्वयात् अतएव नांत्येसुवर्थेसुव
र्थस्यानन्वयाच्चेतिमण्यादावुक्तं तन्नुच्छं। आद्येसमुदायस्यत्वस्यार्थवत्त्वेननामत्वात् द्वितीयेपिसुपमात्रार्थयोरनन्वयेपिसमुदितवाक्यार्थस्यान्वयेनादोषात्·॥

राम·
२३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदाभ्रमादिशून्यत्वस्य निश्चेतुमशक्यत्वाद्धातुवैषम्यादिनाहृदुभ्रमादिशंकासंभवात् प्रत्युतप्रमाणविरुद्धवक्तृत्वेन भ्रमाद्यनुमानसंभवात् भ्रमादिनाऽको
पाहेतुत्व भ्रमादिनाहेतोरिवेति। हेतुत्वेनाज्ञायमानत्वरूपेणसादृश्यंबोध्यं अप्रसक्तेत्यादिशत्रुगृहे भोक्तव्यमयेतिज्ञापित आप्तोवदतितर्हिविषंभुंक्ष्वेतितत्र
शत्रुगृहभोजनेविषभोजनसादृश्यपरत्वंज्ञायतेयथामारितास्तद्वयंकृष्णमथुरांपदिगच्छसीत्यादौकृष्णस्यमथुरागमनेगोपीमारणसादृश्यपरत्वंसादृश्यंचा
कर्तव्यत्वेनतत्प्रयोजकेनवलवदनिष्टसाधनत्वेनवेत्यन्यदितिभावः नन्वेवंपदेक्वापिलक्षणानस्यात्तत्राह तथाचपदार्थेतियद्दिनानुपपन्नत्वेनयत्संसृष्ट
तयाचयद्भाव्यतेतस्यतत्संसृष्टतयैवतेनकल्प्यत्वात्पदसंसृष्टतयालक्षणांविनानुपपन्नत्वेनचगृहीतंलक्ष्यार्थतात्पर्यंयत्पदसंसृष्टत्वेनैवलक्षणांकल्पय
तिवाक्यसंसृष्टतयातथागृहीतंतत् वाक्यसंसृष्टत्वेनताकल्पयतीतिभावः। अर्धमंतर्वेदिवहिरिति गृहेचैत्रस्येतिशेषः वेदइति यूपमानंप्रकृत्योक्तइतिशेषः॥
लक्षणेति आद्येयस्मिन् गृहस्यप्रदेशेस्थितस्यचैत्रस्यार्धंगृहांतरर्धंगृहवहिस्तिष्ठतितादृशप्रदेशेलक्षणाद्वितीयेपियस्मिन्देशेमीयमानयूपस्यार्धंवेदेरंतर

आप्तकोपहेतोरपिभ्रमादिनाप्रियामरणहेतोर्विवकर्त्तव्यत्वदर्शनेनतत्रापिव्यभिचाराच्चतथाचाऽप्रसक्तप्रतिपादनेनप्रसक्तवारणेतात्पर्यंज्ञात्वाते
नाकल्पितपदविभागेसमुदायएवलक्षणांकल्पयतिनतुप्रत्येकपदेतत्रतत्रविशिष्यतात्पर्यज्ञापकाभावात्तथाचपदार्थेतात्पर्यान्वयानुपपत्तिभ्यांलक्षणा
पदेवाक्यार्थेतद्वाभ्यामनुपपत्त्यालक्षणावाक्ये वाक्यार्थान्वयानुपपत्त्यनिबंधनत्वंचलक्षणायाःपदवृत्तित्वसाधनेउपाधिरित्यवधेयंएवमेवार्द्धमंतर्द्धवहि
रित्यादौलोकेअर्द्धमंतर्वेद्यर्द्धंबहिर्वेदीतिवेदेपिवाक्यएवलक्षणानचतत्राप्यर्द्धस्यांतस्त्वेसत्यर्द्धस्यबहिष्ठेनांतरालानुमानंनलक्षणेतिवाच्यंछिन्नेगृहेंतरा
लराहित्येपितदूपदर्शनेनव्यभिचारात्यथाकथंचिदनुमानसंभवेक्व सर्वत्रशब्दप्रमाणोच्छेदापाताच्च॥ ऐर्धंतद्बहिश्चभवतितस्मिन्देशेलक्षणेत्यर्थअर्धस्यार्धावच्छे
तद्द्वयानुपपत्तेरुपिपाठः२
देनांतस्त्वेगृहांतर्वर्त्तित्वे अर्धस्यार्धांतरावच्छेदेनवहिष्ठेनगृहवहिस्थतेनांतरालानुमानं।गृहस्यांतर्वहिर्देशयोरंतरालदेशस्याधेयतासम्बन्धेनचैत्रेपक्षेनुमानमित्यर्थः
। तथाचाग्नेयोष्टाकपालइत्यादौद्रव्यदेवतासम्बन्धेनानुमितयागविधानवत् यूपमानाद्युद्देशेनानुमितांतरालदेशविधानमितिभावः आद्यवाक्याभिप्रायेणदोषमाहृ छि
न्नेइति। यत्रभित्तिश्छिद्रिश्चभग्नोभंगावच्छेदेनचचैत्रोस्तितत्रापितादृशप्रयोगात्तत्रांतरालदेशस्यैवाभावात्तदनुमानासंभवः वाक्यद्वयमप्यभिप्रेत्यदोषमाह यथाकथंचि
दिति।होतुरंतर्वेद्येकः पादोभवतिवहिर्वेद्येकइतिदर्शपौर्णमासयोःश्रुतंयूपमानंप्रकृत्यज्योतिष्टोमेश्रुतंअर्धमंतर्वेदिमिनोत्यर्धंवहिर्वेदीतितत्रांतर्वेदिदेशाए
वएकपादयूपार्धागतया विधीयतेअथवा अंतर्वेदिवहिर्वेदिशब्दलक्षितदेशविशेषोहोत्रवस्थानंयूपमानंचोद्दिश्यविधीयतइतिसंशयेलक्षणायामानाभावा
त्प्रथमःपक्षःतथाचयादांतरार्धांतर्योर्वे हर्वेदिदेशस्यार्थातप्राप्त्यावहिर्वेदीत्याद्यनुवादइतिप्राप्तेआद्योदाहरणेदार्शिकवेदेर्हविरासादनार्थायाएकपादोहेशे
नविधावेकत्वस्योद्देश्यविशेषणत्वेनअविवक्षापत्त्यावहिर्वेद्येकइत्यनुवादायोगात्तत्रापिविधित्वेवाक्यभेदापत्तेरगत्याद्वितीयपक्षाश्रयणं॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ॰ सि॰ टी॰ ल॰ उ॰ २८

गमनं न कार्यस्य नाश्यमानेष्टाधिके शृ—हेतुत्वे सतीष्टनाशप्रयोजकत्वादित्यनुमाने गुरुनिर्देशादिस्थले भिया रूपान्नाश्यमानेष्टादधिकस्य गुरुनिर्देशाकरणजन्य पापानुत्पादरूपेष्टस्य प्रयोजकत्वेन गमने—हेतुत्वभावादिति चेन्न विज्ञानमित्यादौ हि चेत् शब्देन विज्ञानब्रह्मवेदनाद्यन्वयव्यतिरेकव्यापकान्वयव्यतिरेकप्रतियोगित्वरूपस्य विज्ञानब्रह्मवेदनादिनिमित्तकत्वस्य पापनाशादौ लाभात् तां विज्ञानादौ तद्धेतुतालाभः। गच्छेत्यादौ तु यदि गच्छसि तदा गच्छेत्यर्थकत्वेन चेत् शब्दस्यानवश्यकत्वमात्रद्योतकत्वेनोक्तार्थकत्वाभावः। किंचास्तां ते गमनं कांतपंथानः संतु ते शिवा इत्यादौ चेत् शब्दाभावेपि गमन—स्याकर्तव्यत्वप्रतीतेस्तदर्थं तद्गते गमनस्य जन्महेतुत्वबोधः कथं। कथं वोक्तहेतुत्वमत्यपि तत्त्वेनाज्ञायमानेन गमनेन व्यभिचारः तत्त्वेन प्रमितत्वस्य हेतुत्वेपि प्रारब्धकर्मवशात् ज्योतिःशास्त्रादिना मरणस्यावश्यकत्वनिश्चयाद्धूक्रियमाणे तथा प्रमिते गमने व्यभिचार एवेति दिक्। ननूक्तरीत्या व्यधिकरणमप्यनिष्टसाधनत्वं विषभक्षणनिष्ठस्य इष्टसाधनत्वस्य उपपादकत्वात् तेन आक्षेप्तुं शक्यमेवान्यथानस्यानुपपन्नत्वात् तत्राह तेन विनापीति इष्टसाधनतया बलवदनिष्टाननुबंधीष्टसाधनतया विषभक्षणस्येष्टसाधनत्वं तत्समानाधिकरणेनानिष्टसाधनीभूताभावप्रतियोगित्वेनाप्युपपद्यते इष्टं हि व्यायामादेः श्रमरूपानिष्टसाधनस्यापि बलवत्तरानिष्टसाधनीभूताभावप्रति

॥ एवं विषं भुंक्ष्वेत्यत्रापि विषभोजनेष्टसाधनत्वेन शत्रुगृहान्नभोजनानिष्टसाधनत्वं नाक्षेप्तुं शक्यते व्यधिकरणत्वात् तेन विनाप्युभयोरपीष्टसाधनतयोपपत्तिसंभवाच्च न हि येन केन चित् यत् किंचिदाक्षिप्यते किंत्वनुपपद्यमानेनोपपादकं नाप्याप्तत्वे सति प्रमाणविरुद्धोपदेष्टृत्वेन कोपानुमानं कोपेन च तद्धेतौ शत्रुगृहान्नभोजने कर्तव्यतानुमानं आप्तस्यापि पित्रादेर्भ्रमादिना विनापि कोपं प्रमाणविरुद्धोपदेष्टृत्वदर्शनेन व्यभिचा

योगित्वेनेष्टसाधनत्वं तथा च विषभक्षणाभावे जीवने सति राजदैवाद्युपहितमप्युक्तं बलवदनिष्टं मम निश्चितमाप्तेन विषं भुंक्ष्वेत्युक्तमिति निश्चयात् विषभक्षणं मरणाभावद्वारकानिष्टसाधनीभूताभावप्रतियोगित्वेनोक्तानिष्टानुत्पादरूपेष्टप्रयोजकं शत्रुगृहभोजनमपि शत्रुसंतोषद्वारा शास्त्रवोच्छेदरूपेष्टसाधनमत एव बलवदनिष्टाजनकमिति निश्चेतुं शक्यत्वाद्व्यधिकरणमनिष्टसाधनत्वं नोपपादकत्वेन कल्प्यं समानाधिकरणस्य तत्संभवे व्यधिकरणस्य तत्कल्पनाया अन्याय्यत्वादिति भावः यत्तु विषं भुंक्ष्वेति वाक्यं शृण्वन् कल्पयति विषभक्षणानिष्टमिष्टसाधनत्वं शत्रुगृहभोजननिष्टादिष्टसाधनत्वादुत्कृष्टं तदवधिकत्वेनाप्तेनोच्यमानत्वात् यद्यदवधिकत्वेनाप्तोक्तं तत्तत उत्कृष्टं यथा संमतं तस्य च तत उत्कर्षो बलवदनिष्टसाधनत्वसामानाधिकरण्यमेव नान्यादृशस्य संभवात् तेन च शत्रुगृहभोजननिष्ठेष्टसाधनत्वेऽपकर्षो बल—वदनिष्टसाधनत्वरूप आक्षिप्यत इति तत्तुच्छं हेत्वसिद्धेः न हि विषं भुंक्ष्वेति वाक्यमिष्टसाधनतायास्तुल्कर्षं बोधयति मानाभावेन लक्षणाद्यकल्पनात् उक्तरीत्योभयोरपि बलवदनिष्टासाधनत्वसंभवेनोत्कर्षे तात्पर्याग्रहाच्च भ्रमादिनेति न च भ्रमप्रमादादिशून्यत्वरूपाप्तत्वस्य भ्रमादिमति विरहान्न व्यभिचार इति वाच्यं। भ्रमादिमत्यपि कदाचित् तच्छून्यतानपायात् यदा भ्रमादिशून्यत्वे सति बाधितार्थवक्तापः सतः

CC-0. In Public Domain. Digitization by eGangotri

भागशब्दस्यस्वत्वास्यदद्रव्यांशे उपधावत्तेश्चाश्रयणारूपत्यागोद्देश्यत्वादौ मुख्यत्वेनो क्तार्थयोराधुनिकत्वकाराणापेक्षयावाक्यतात्पर्यानुपपत्त्याससुदित।
वाक्य एव प्राशस्त्यलक्षणायायुक्तत्वात् देवताप्रसादस्याध्वरमीमांसकानामलीकत्वेनतन्मतेतत्रतात्पर्यासंभवात् प्रसादहेतुत्वस्यविध्यनपेक्षितत्वेनवि
धिनात्वेकवाक्यत्वादित्यादिनोक्तैकवाक्यत्वभंगापत्तेश्चअथोक्तहेतुत्वेनविध्यपेक्षितवलवदनिष्टाननुवंधित्वस्याक्षेपान्नोक्तदोषइतिचेत्त्ववलवद
निष्टाननुवंधित्वंविनाप्युक्तहेतुत्वोपपत्तेः तात्पर्यविषयेबोधेलीकार्थभानासंभवस्यतावताप्यनुद्धाराच्चसोरोदीदित्यादौशक्तिलभ्यवाक्यार्थस्यसर्वसंमता
लीकत्वेनतात्पर्याविषयत्वात् तदन्यवाक्यार्थस्यवाक्यलक्षणापेववाच्यत्वाच्चकार्यस्यान्वयानुपपत्तिरिति। प्राशस्त्यंविनाकर्मणः कार्यत्वानुपपत्त्याकर्म
द्वारापूर्वस्यापिकार्यत्वानुपपत्त्याकार्यान्वयानुपपत्तिरित्यर्थः। प्राभाकरमतेनकार्यस्याभिधेयत्वभट्टमतेप्रवर्त्तनादिरूपाभिधेयान्वयानुपपत्तिर्बोध्या।
अथवायथाश्रुतअर्थवादार्थस्यक्वचित्प्रमाणत्वेनक्वचिद्बाधितत्वेनक्वचिद्विध्यनपेक्षितत्वेनक्रियारूपाभिधेयस्यतत्रान्वयानुपपत्तिरिति सर्वमतसाधार
णोऽर्थः प्रकृतेसत्यादिवाक्ये अभिधेयान्वयविषयंशक्यार्थमात्रबोधस्थले अन्वयसामान्यविषयंशक्यलक्ष्यबोधस्थलेस्वरूपमात्रविषयंप्रकृतप्र

नचलिङाद्यभिधेयकार्यस्यान्वयानुपपत्तिस्तत्रलक्षणाबीजमस्तिप्रकृतेचसर्वपदानांलक्षकत्वादभिधेयान्वयानुपपत्तिर्नास्तीतिवाच्यंके
नतुभ्यमभाणयभिधेयान्वयानुपपत्त्यालक्षणेतिकिंतुतात्पर्यानुपपत्त्यातच्चतात्पर्यमभिधेयान्वयविषयमन्वयसामान्यविषयंस्वरूपमात्रवि
षयंवेतिनकश्चिद्विशेषः अन्यथायष्टीः प्रवेशयेत्यत्रलक्षणानस्यात् नचभोजनप्रयोजनकप्रवेशनस्ययष्टिष्वन्वयानुपपत्तिरेवास्तीतिवाच्यं
एवमपिप्रवेशनविशेषतात्पर्यग्रहएवोपजीव्यइतितदनुपपत्तिरेवलक्षणाबीजमस्तु॥ २१ काशादिवाक्येप्रवेशनविशेषेति प्रवेशनत्वरूपेणाप्र
वेशनविशेषेतात्पर्यगृहीत्वैवतदन्वयानुपपत्तिर्ग्राह्याअन्यथाप्रवेशनांतरेतात्पर्यग्रहे उक्तप्रवेशनान्वयानुपपत्तेरकिंचित्करत्वात् तथाचोपजीव्यत्वात्ता
त्पर्यमेवानुपपन्नं लक्षणाकल्पकमस्तु। नचतत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यापेक्षयाभिधेयान्वयस्यलघुत्वात्तदनुपपत्तिरेवतत्कल्पिकेतिवाच्यं तत्प्रमाश
क्तत्वरूपतात्पर्यस्याभिधेयान्वयापेक्षयागुरुत्वाभावात्प्रमात्वस्यजातित्वात् प्रत्युतवेदविश्वादिपदाभिधेयस्यातिगुरुत्वेनाभिधेयान्वयस्यैवतात्पर्यापेक्षयागु
रुत्वात्तद्वाक्यपदव्यक्तिषुतत्तदर्थतात्पर्यानुपपत्तेर्निवेशेपिनगौरवंआक्षेप्यसमानाधिकरणाक्षेपकस्यवाच्यतयागंगापदादेःपदांतराभिधेयान्विता
र्थकत्वस्यानुपपत्तेरेवत्वयावाच्यत्वात् नन्वर्थवादेषुप्राशस्त्येसत्यादिवाक्यस्य चाखंडेतात्पर्यानुपपत्तिधीर्हेतुरस्तुलाघवात्नतुशक्तिलभ्यार्थानामन्वयानुप
पत्तिधीगौरवात् गंगायांघोषइत्यादावपि गंगापदेतीरतात्पर्यस्यानुपपत्तिधीर्हेतुरस्तुनतुघोषान्वितार्थकत्वस्यगौरवात्। राजायातीत्यादौराजपदस्यराजकार्य
कारिण्यामत्योहितासीपगवत्वादिगुणतत्स्वरूपेणलक्षणातत्रगमनान्वितार्थकत्वस्यानुपपत्तिधीरेवहेतुः नन्वक्तरूपविशिष्टपरत्वस्यगौरवात्तत्राह॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

३।४। न च यद्यप्यंतर्वेदि वहिर्वेदि रूपार्थद्वयविधौ वाक्यभेदः एवं सकविशिष्टापरं च न शक्या विधातुं शक्यंकारकयोर्भावनायामेवान्वयेन मिथोनन्वयात्तथापिलक्ष
टी.ल. णायैकविशिष्टापरं विधीयतां देशविशेषलक्षणापेक्षयात्तल्लक्षणापदद्वयार्थघटितत्वेनन्यायत्वादितिवाच्यं अंतर्वेदिर्वहिर्वेदिर्वाविशेषणमित्यस्याविनिग
म्यत्वे लक्षणाद्वयेन लक्ष्यद्वयेविध्यापत्त्या वाक्यभेदस्यापरिहारात् द्वितीयोदाहरणेपि सौमिकाः वेदिदेशत्वेन प्रधानतदंगार्थत्वस्यस्थापितत्वेन तु त्वन्यायत
२९ यातदंगादिसाधारणस्यवाच्यत्वादन्यथाग्नीषोमीयांगप्रयाजपशुपुरोडाशहविरासादनादौवेदिप्राप्त्यसंभवात् यूपार्धद्वयेपिवेदेः प्राप्तत्वेन सकार्धोद्देशेन विधानेप
रिसंख्यापत्तेर्नचवाक्ये न प्रकरणागम्यसर्वार्थत्वं वेदेर्बाध्यत इति वेदेर्यूपार्धद्वयांगत्वानवगमान्नपरिसंख्येतिवाच्यं षड्विंशत्यरिमाणार्थवादस्य इयतिशस्याम
हे कर्तुमित्यस्य सर्वार्थत्वज्ञापकत्वेन तद्बाधानुपपत्तेः तथा च यूपार्धांतरार्थत्वनिषेधस्य यूपार्धार्थत्वस्य च विधेयत्वेन शाब्दपरिसंख्यया त्रैदोष्यं तद्वरं देशविशे
षैकलक्षणैव। न च यूपार्धोद्देशेन वहिर्वेदिर्विधीयतेऽर्धांतरे च वेदेः आप्तत्वेनार्धमंतर्वेदीत्यनुवाद इति लक्षणानयुक्तेति वाच्यमनुवादवैयर्थ्यापत्त्या लक्ष
णावश्यकत्वादत एव समुदितवाक्ये लक्षणापदे लक्षणायां पदांतरवैयर्थ्यात् विनिगमकाभावाच्चेति तृतीयसप्तमेस्थितं तदनुपपत्तेरिति प्राशस्त्यरूपल

एवं च ब्रह्मजिज्ञासापदेन विचारो लक्ष्यत इति विवरणकारोक्तं यज्ञायुधिपदेन यजमानो लक्ष्यत इति संक्षेपशारीरकोक्तं च वाक्यलक्षणयोपपन्नं
ब्रह्मजिज्ञासायज्ञायुधिशब्दयोः सुवंतत्वलक्षणापदत्वेपि शक्तत्वलक्षणाभावेन शक्यसंबंधरूपायालक्षणाया अयोगात् स्वज्ञाप्यसंबंधरूपातु लक्षणा यौगिकप
दसमुदायेपि वाक्यस्थानीये नानुपपन्ना अत एव वायुर्वैक्षेपिष्ठा देवतेत्यादावर्थवादेपि प्राशस्त्यप्रतिपत्तये वाक्य एव लक्षणांगीकार्या प्रत्येकपरात्तदनुपपत्तेः
न च तत्र कर्मणि क्षिप्रदेवताप्रसादहेतुत्वरूपतत्पदार्थसंसर्गबोधकत्वमेव न तु तदन्यप्राशस्त्यलक्षकत्वमिति वाच्यं पदार्थमात्रसंसर्गबोधे वायुः शीघ्रतम इत्ये
एवमित्यपिपाठः २
२) वधीः स्यान्न कर्मप्राशस्त्यविषया सा स्यात्
स्यार्थतात्पर्यस्य लक्षणां विनानुपपन्नस्य वाक्यनिष्ठत्वेन ज्ञानात् वाक्यनिष्ठत्वेनैव लक्षणाकल्पकत्वं न तु प्रत्येकपदनिष्ठ
त्वेनेति भावः तत्पदार्थसंसर्गेति। वायुर्वा इत्याद्यर्थवादगतपदार्थानामेकसंसृष्टापरेत्यर्थः न तु तदन्येति। क्षिप्रदेवताप्रसादहेतुत्वमेव प्राशस्त्यं प्रत्येकपदशक्त्यैवल
भ्यत इति भावः इत्येवधीरिति वायव्यं श्वेतमालभेत भूतिकाम इति विधेर्वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यर्थवादस्त राम.
त्र वायुः शीघ्रतमस्तं स्वेन स्वकीयेन श्वेतपशुरूपेण भागेन यजमानः उपधावति यजते स इष्टो वायुरेनं यजमानं प्रति भूतिं कर्मफलं प्रापयतीत्यर्थः स चाध्वरमीमांसक २३९
मते चेतनदेवतात स्फलदातृत्वादेरलीकत्वाद्बाधितोपि वलवदनिष्टाजनकत्वरूपप्राशस्त्यधीद्वारं भवति सोरोदीदित्यादिवाक्यार्थवत्पदितृत्कार्थद्वारोक्तप्राशस्त्यल
क्षकत्वं नोच्यते तदा प्रत्येकपदशक्यवायुशीघ्रतम इत्याद्युक्तार्थस्यैव धीः स्यात् न तु क्षेपिष्ठदेवताप्रसादहेतुत्वरूपस्य तदुक्तकर्मप्राशस्त्यस्यापि प्रसादहेतु।
त्वस्याशब्दार्थत्वात् अथ भागधेयेन श्वेतपशुद्रव्यकयागेनोपधावति प्रसादयतीति व्याख्यानसंभवात्तस्य शब्दार्थत्वमिति चेन्न।

CC-0. In Public Domain. Digitization by eGangotri

लाक्षणिकानुभावकत्वेदोषं वक्तुमन्विताभिधानवादं प्राभाकरसंमतं व्युत्पादयति तथाहि पदानामित्यादि पदार्थोपस्थितेः शाब्दबोधोपधायकार्थस्मृतेः ।
स्मृत्यंतरसाधारण्यायाः । पदाजन्यस्मृतिसाधारणरूपेण शाब्दबोधहेतोः । तद्वैजात्यकल्पने पदाजन्यस्मृतिव्यावृत्तरूपेण तस्याः शाब्दधीहेतुकल्पने ।
अर्थाध्याहारः द्वारमित्यादेःपिधानादिरूपार्थकल्पनं नपदाध्याहारः नपिधेहीत्यादिपदकल्पना साधुत्वार्थं स्पृह यत्यादियोगेसत्येव साधुत्वायनियो ।
ज्यलाभार्थमिति यागेस्वर्गकामनियोज्यकत्वज्ञानस्ययागविशेष्यकस्वर्गकामकार्यत्वान्वयबोधंप्रतियोग्यतारूपस्वर्गसाधनत्वान्वयबोधेयोग्यताज्ञान ।
त्वात् नियोज्यान्वयबोधायस्वर्गकामपदाध्याहारः यजेतेति लिङ् यदिकार्यवाचीनस्यात्तदास्वर्गकामपदसमभिव्याहृतोनस्यादितितर्केणैव लिङः का ।
र्यवाचकत्वासिद्धेः तत्कामनियोज्यकत्वशाब्दबोधस्यतत्कामवाचकपदयोगंविनाननुभूयमानत्वेनार्थाध्याहारेणतदनिर्वाहात् नियोज्यत्वंचकामनाविशिष्ट
स्यममेदंकार्यमितिबोधजनकत्वंतथाचविश्वजिद्यागविशेष्यकोक्तधीजनकः स्वर्गकामनाविशिष्ट इतिशाब्दबोधोनियोज्यान्वयबोधः ननुस्वर्गकामकर्त्तृ

स्यादेतदभिहितान्वयवादेमाभूदनुपपत्तिरन्विताभिधानवादेतुभवति तथाहिपदानामन्वयानुभवजननसामर्थ्यमेवशक्तिरित्युच्यते ए
कैकपदार्थोपस्थितिस्तुस्मृतिरूपानशक्तिसाध्याएकसंबंधिज्ञानादपरसंबंधिस्मरणस्यहस्तिपकादिसाधारणत्वात् अन्वयानुभवजन
नसामर्थ्यरूपस्यचमूलसंबंधस्यविद्यमानत्वात् अतएवपदशक्त्यसाध्यत्वात्पदार्थोपस्थितेःस्मृत्यंतरसाधारण्यात्तद्वैजात्यकल्पनेचमानाभा
वादर्थाध्याहारएवास्तितिबाधकेनपदाध्याहारः पुष्पेभ्यः इत्यत्रसाधुत्वार्थंस्पृहयतिपदस्यविश्वजितायजेतेत्यत्रनियोज्यलाभार्थंस्वर्गकामपदस्यसौर्ये
चरावतिदेशमात्रेःअग्नयेजुष्टंनिर्वपयामीतिमंत्रेप्रकृतौवाचकपदवत्तयाङ्क्षेपकारेअग्निपदबाधेनवाचकपदलाभायसूर्यपदस्याध्याहारेपिपदार्थ
स्मरणायवावाक्यार्थानुभवायवातदनपेक्षणात् शाब्दत्वंचपदजन्यान्वयानुभवत्वेनैवनपदजन्योपस्थितिजन्यान्वयानुभवत्वेनगौरवात्॥ कर्त्तृत्वमेवयोग्यता

स्तु इतिचेन्नकामनाविशेषणामुपलक्षणंवानांत्योनुगतानतिप्रसक्तस्योपलक्ष्यतावच्छेदकस्यासंभवात् नाद्यःकृतिसमवायित्वस्यकामनायांबाधात् कृतिजनकत्व ।
स्य प्रकृतेकर्त्तृत्वरूपत्वेतुकामनायागुरुमतेसाक्षात्कृत्यजनकत्वात्तस्यांबाधः कृतिकारणीभूतंयन्ममेदंकार्यमितिज्ञानंतत्रलिंगतावच्छेदकविधयाकामनाप्रयो ।
जिकाकाम्यसाधनतालिंगककृतिसाध्यताज्ञानस्यगुरुमतेकृतिहेतुत्वात्तथाचकृतिप्रयोजकत्वनिवेशेकृतिसाध्यताधीद्वारातज्ज्ञानस्यवाच्यत्वात् प्रथमंत
दृशधीजनकत्वंकामनायामवश्यंज्ञातव्यमितितदेवयोग्यतेतिध्येयं वाचकपदवत्तयाक्षेपकारेत्सीयपदशक्त्याधीनबोधरूपोपकारजनकतयाक्षेप्त उपकारएव
भावेनपदार्थानामतिदेशात्प्रकृत्यपूर्वसाधनदेवताप्रतिपदशक्तिज्ञानजन्यबोधरूपोपकारस्यप्रकृतौक्लृप्तस्यसौर्यापूर्वसाधनसूर्यदेवतोद्देशेनातिदिष्टस्याग्निपदेनासं ।
भवात् सूर्यपदोह इतिभावः तदनपेक्षणादिति। तथाचशाब्दबोधजनकतापदाजन्यस्मृतिसाधारणरूपेणैवक्लृप्तानव्याहतेतिभावःशाब्दत्वंशाब्दत्वजात्याश्रयधीविषयत्वं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ॰ से॰ विनिगमनाविरहेणेति उक्तविशिष्टपरत्वानुपपत्तिज्ञानस्योक्तस्थले हेतुत्वज्ञापकयुक्त्यभावेनेत्यर्थः व्यवस्थितविकल्प इति उक्तस्थले उक्तार्थकत्वस्य स्थलांतरे तदर्थपर।
टी॰ ल॰ तस्यानुपपत्तिधीहेतुरिति व्यवस्थितविकल्प इत्यर्थः स्मारकसम्बन्धेनेति स्मारकरूपसंबंधेनेत्यर्थः एकसंबंधिज्ञानं। स्मारकत्वान्योयः स्मार्यस्य संयोगादिः संबंधस्तद्विशिष्टज्ञानं तथा
उ॰ दर्शनात् स्मार्यहस्त्यादिसंयोगादिनाज्ञाततया स्मारकत्वदर्शनात् अंगीकार्यमिति। प्रातीतिकविषयज्ञानस्य तथात्वमंगीकृतमित्यपि बोध्यं स्मृतेस्तत्तावगाहित्वनियमेन तत्ता।
३०

विनिगमनाविरहेण द्वयोरपि व्यवस्थितविकल्पेप्यस्माकं न क्षतिरित्यवधेयं ननु सर्वपदानां लक्षकत्वे वाक्यार्थानुभवो न स्याल्लाक्षणिकस्याननुभावकत्वादिति चेत् न लाक्षणिकत्वेप्यनुभावकत्वोपपत्तेः शक्तत्वेन ह्यनुभावकत्वं न तु तच्छक्तत्वेन गौरवात् लाक्षणिकमपि किंचिच्छक्तमेव भट्टाचार्यैर्वाक्यार्थस्य सर्वपदलक्ष्यत्वाभ्युपगमाच्च तथा ह्यभिहितान्वयवादे पदैः स्वशक्तिवशात् पदार्था अभिधीयंते न तु स्मार्यंते स्मार्यस्मारकसंबंधातिरिक्तमूलसंबंधकल्पनापत्तेः एकसंबंधिज्ञानं ह्यपरसंबंधिस्मारकं न तु स्मारकत्वमेव संबंधः हस्तिपकादिषु तथादर्शनात् अत एवोक्तं परमप्यधिकाभावात् स्मारकाच्च विशिष्यत इति अज्ञातज्ञापकत्वाभावाच्चानुभावकं संबंधांतराभावाच्च न स्मारकं किंतु शक्त्याज्ञातज्ञापकमिति स्मारकसदृशमित्यर्थः स्मृत्यनुभवातिरिक्तं च ज्ञानं प्रमाणबलादायातमंगीकार्यमेव पदार्थज्ञाने तत्तानुल्लेखाच्च तत्तोल्लेखनियमभंगेनान्नतत्प्रमोषकल्पने चातिगौरवात् तथा च पदजन्यस्मृत्यनुभवविलक्षणज्ञानविषयीभूताः पदार्था अभिहिता इत्युच्यंते तादृशाकांक्षाद्यनुसारेण स्वान्वयमनुभावयंतीति वाक्यार्थो लक्ष्यत इत्युच्यते पदेन यद्बोध्यते तच्छक्यं पदार्थेन यद्बोध्यते तल्लक्ष्यमिति नियमात् अत एवोक्तं वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितमिति यद्यपि पदाभिहितपदार्थस्मार्यत्वं तीरादौ लक्ष्यत्वं वाक्यार्थे तु तदनुभाव्यत्वमिति विशेषः तथापि पदार्थबोध्यत्वमादाय लक्ष्यत्वव्यपदेशः अत एव पदार्थेन पदार्थलक्षणायां पूर्वसंबंधज्ञानापेक्षा तस्य स्मार्यत्वात् वाक्यार्थलक्षणायां तु न तदपेक्षा तस्यानुभाव्यत्वेन पूर्वसंबंधज्ञानानपेक्षत्वात् पदार्थलक्षणायां पूर्वसंबंधज्ञानमेव वाक्यार्थलक्षणायामाकांक्षादिकमेवेति परस्परनिरपेक्षमुभयं नियामकं अतोऽपूर्वे वाक्यार्थे शक्यसंबंधितयाज्ञातुमशक्ये कथं लक्षणेत्यपास्तं पदार्थलक्षणाया एव तथात्वात् एवं च पदशक्तेः पदार्थोपस्थितावेवोपक्षयादुपस्थितानां च पदार्थानामन्वयानुभावकत्वात् सर्वपदलाक्षणिकत्वेपि न वेदांतवाक्यानामन्वयानुभावकत्वानुपपत्तिः॥ एम॰

शक्यसंबंधत्वात् २

नुल्लेखादपि न स्मृतित्वमित्याशयेनाह पदार्थज्ञानेति तादृशा उक्तज्ञानविषया अनुभावयंतीति उक्तज्ञानस्यानुभवहेतुत्वात्तद्विषयेषु तदुपचारो बोध्यः अतीताना २४०
गतार्थानां हेतुत्वासंभवात् जातिरूपस्य पदार्थस्य नित्यत्वेन तदभिप्रायेण चेदं। लिंगस्येव ज्ञानसंबंधेनार्थस्य हेतुत्वं वा बोध्यं अविद्यमानस्यापि तेन सम्बन्धेन हेतुत्वं विवेचितमेव वेदांतवाक्यानामिति प्रत्येकरूपेण पदानामननुभावकत्वेपि एकपदसमभिव्याहृतपदांतरत्वरूपाकांक्षा — ज्ञानविधया वाक्यज्ञानमनुभावकं ये न रूपेण लक्षणा तेन रूपेणानुभावकत्वास्वीकारेण लाक्षणिकानुभावकत्वमयुक्तं वक्ष्यमाणदोषाभावादिति भावः

CC-0. In Public Domain. Digitization by eGangotri

वार्त्तिककाराणांत्विति।अभिहितान्वयवादित्वेनेतिशेषः॥श्रुतेर्बलवत्वेनतयाविनिउक्तमंत्रोनलिंगेनविनियुज्यतइतितदन्यमंत्रपरतयासौत्रमंत्रपदंव्याचष्टेश्रुत्यविनियु
क्तेष्विति।विनियोगोऽभिधानसामर्थ्यरूपलिंगाभिहितार्थरूपबर्हिश्छेदनादिकर्मकभावनांप्रतिकारकत्वेनबोधःतच्च।अनुभावकत्वरूपंचनजघन्यइतिछेदःशब्दसामर्थ्या
त् शब्दस्यानुभावकत्वरूपात् ननुमुख्यार्थानुभावकत्वेनलिंगेनविनियुक्तोपिमंत्रोऽमुख्यार्थबोधकत्वेनलिंगेनपश्चाद्धिनियुज्यतांतत्राह तावतेति तथाचाकांक्षाशांतेर्नपश्चा
द्विनियोगइतिभावः॥मुख्यसम्बन्धःमुख्यार्थज्ञानद्वारकममुख्यार्थबोधकत्वं।नलिंगंनलिंगतयाविनियोजकंअनेकेषामितिमुख्यार्थनानात्वेतुमुख्यार्थविशेषविनियोगेतात्प
र्यग्राहकमेवनियामकंतदभावेतुनानामुख्यार्थविनियोगइष्टएवेतिभावः चरमत्वान्मुख्यार्थोपस्थित्युत्तरमुपस्थितत्वात्।नन्वनेकेषांमुख्यसम्बन्धत्वेतदाश्रयविशेषेतात्पर्य

वार्त्तिककाराणांतुपदार्थोपस्थितेःपदशक्तिसाध्यत्वात्तदर्थंसर्वत्रपदाध्याहारांगीकारेपिनामधेयान्वयेव्युत्पत्त्यंतराश्रयणमस्त्येवतथाचस्वयमे
वव्युत्पादितंनामधेयाधिकरणइत्यलंप्रसक्तानुप्रसक्त्याप्रकृतमनुसरामः॥एवंस्थितेलाक्षणिकमप्यन्वयानुभावकंचेदन्वयानुभवजननसामर्थ्यमेवश
क्तिरितिलाक्षणिकस्यापितद्वत्वान्मुख्यजघन्यविभागोनस्यात् तथाचलिंगाधिकरणविरोधः तत्रहिवर्हिर्देवसदनंदामीत्यादिमंत्राणांमुख्येजघन्ये
चार्थेलिंगाद्विनियोगउत् मुख्यएवेतिसंशय्योभयोरपिशाब्दत्वादुभयत्रापिविनियोगइतिप्राप्यमुख्यएवेतिराद्धांतितंअर्थाभिधानसंयोगान्मंत्रेषुशे
षभावःस्यात्तस्मादुत्पत्तिसंबंधोऽर्थेननित्यसंयोगादिति अर्थाभिधानसामर्थ्यरूपाद्धिलिंगातश्रुत्यविनियुक्तेषुवर्हिर्देवसदनंदामीत्यादिमंत्रेषुशेषभावोवि
नियोगःस्यात् तच्चसामर्थ्यंमुख्येनजघन्ये शब्दसामर्थ्यादुपस्थितोह्यर्थोमुख्यमिवाव्यवहितोभवतीतिमुख्यउच्यतेमुख्य र्थसंबंधादुपस्थितस्तु
जघन्यमिवव्यवहितोभवतीतिजघन्यउच्यतेतथाचजघन्येऽर्थेविनियोगंब्रुवतापितदुपस्थितयेमुख्योपस्थितिर्वक्तव्यातथाचोत्पत्ति संबंधःस्वभावस
बंधोऽर्थाभिधानसंबंधएवविनियोजकःस्यात्तस्यार्थनियतत्वात् तावतैवस्वाध्यायविधेश्चरितार्थत्वात् मुख्यसंबंधस्तुनलिंगंअनेकेषांमुख्यसंबंधित्वे
नार्थानियमाच्चरमत्वाच्चेतिसूत्रार्थः अतएवमुख्यसंभवेलक्षणानोपादेयेतिसर्वतंत्रसिद्धांतः॥पदवृत्तिर्हिशक्तिःपदार्थवृत्तिश्चलक्षणासाचवहुप्रकारेत्यन्यत्॥

ग्राहकमेवतद्धिनियोगेनियामकंतदसत्वेतुनानामुख्यार्थेष्वपिविनियोगइष्यतां।नचचरमत्वंलक्ष्याविनियोगनियामकमितिवाच्यंशक्तिसम्बन्धेनमुख्यार्थस्येवशक्यसंयोगादि
रूपलक्षणासम्बन्धेनलक्ष्यार्थस्यापिपदसम्बन्धितयातयोर्द्वयोरपिपदेनप्रथममुपस्थितिसंभवादतआहातएवमुख्येति।ननूक्तरीत्यातादृशसिद्धांतएवानुपपन्नस्तत्राह पद
वृत्तिर्हीतिपदार्थवृत्तिरितिशाब्दबोधानुकूलस्मारकत्वप्रयोजकमूलसंबंधोवृत्तिःसचपदेऽनुभावकत्वमर्थेतुशक्यरूपेलक्ष्यार्थसंयोगादिरित्यर्थःतथाचगंगादिपदेतीरादेःसंयु
क्तशक्तिकत्वादिरूपगुणसम्बन्धनिश्चयोपदानजातस्तदापिशक्त्याप्रवाहोपस्थित्युत्तरंप्रवाहस्यतीरसम्बन्धित्वेनज्ञानात्तीरोपस्थितिसाशाब्दबोधात्पदज्ञानस्यनलक्ष्यस्मारकत्वंकिं
तुशक्यार्थज्ञानस्यअतएवशक्यादशक्योपस्थितिर्लक्षणेतिवृद्धतार्किकाःअशक्योपस्थिति येनेतिबहुव्रीहिणाशक्यमाश्रित्येत्यर्थकपंचम्या येनेतिप्रयोजकस्यार्थततीययाचाशक्यो
पस्थितिप्रयोजकस्यशक्यनिष्ठस्याशक्यसम्बन्धस्यलक्षणात्वमुक्तं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.सि. अन्यैः प्राचीनतार्किकादिभिः प्रत्यक्षोपस्थितानां प्रत्यक्षाद्युपस्थितानां तेन स्मृत्यादिविषयनाम्नामप्यन्वयः अगृहीतसंगतिके। अगृहीतशक्तिके शक्ति
दी.ल. ग्रहं विनाशक्यसम्बन्धज्ञानं नेतिभावः ननु विभक्तिवैयर्थ्यपरिहाराय चैत्रादिपदे तद्घाचलक्षणावश्यकी अन्यथा चैत्रादिनामोत्तरप्रथमादिविभक्तेर्विशेष
पु. णविभक्तित्वेनाभेदस्य तदर्थत्वेन तस्य नामार्थेतरेऽन्वयासंभवात् एवमुद्भिदेत्यादिवेदे ततीयार्थकरणत्वस्य भावनां प्रति उद्भिदादिनाम्न्यसंभवात्। यागप
३१ रिच्छेदद्वारा तत्संभवेऽपि यागनिष्ठकरणतावोधकत्वेनोद्भिदेत्यस्य यजिसामानाधिकरण्यभंगापत्तेरित्याशंक्य विभक्तेः प्रकृते पदसाधुत्वनिर्वाहकत्व
मात्रं न तु विवक्षितार्थकत्वमिति सदृष्टान्तं सयुक्तिकं चाह घटः पट इत्यादि। व्युत्पत्त्यंतरकल्पनादिति। यत्र नामार्थे चैत्रादिनाम्नो वाच्यतासम्बन्धेनान्वयस्त।
न्नामसमानविभक्तिकत्वं तत्रापेक्ष्यते अत एव हिमालयो नाम नगाधिराजः हिरण्यपूर्वकं शिपुं प्रचक्षते इत्यादि यथाश्रुतमेव संगच्छते यत्र तु तत्त्वे उद्भि।
दादिनामान्वयस्तत्र तु समभिव्याहृत ततीयाद्यंतत्वं तत्रापेक्ष्यते अत एवाग्निहोत्रं जुहोतीत्यादौ द्वितीयाद्यंतमपि साधु यथा चाव्यय निपातान्य नामार्थयो

अत एव योग्यतावच्छेदकस्य छिद्रेतरत्वादेः पदानुपस्थितस्यापि पदजन्यान्वयानुभवविषयत्वात् शाब्दत्वं अन्यैरप्यनुकूलत्व प्रतियोगित्वादीनां
तथात्वाभ्युपगमात् एवं च चैत्रोयमित्यादौ लोके उद्भिदा यजेत पशुकाम इत्यादौ च वेदे प्रत्यक्षोपस्थितानामेव चैत्रोद्भिदादिपदानां नामत्वेनान्वयः अ
न्यथा चैत्रपदवाच्योयमुद्भित्पदवाच्येन यागेनेत्यादिकल्पने लक्षणाप्रसंगात् अगृहीतसंगतिकेपदे तदयोगात् घटः पटो नेत्यत्र नञन्वय इव चै
त्रोयमित्यादिनामधेयान्वयेऽपि विभक्त्यर्थद्वारत्वानपेक्षणे व्युत्पत्त्यंतरकल्पनात् नञन्वये विभक्त्यर्थापेक्षायां जितमद्वैतवादिभिः नीलं सुगंधि महदुत्प
लमितिवत् घटपटनञर्थानामभेदान्वयोपपत्तेः नामधेये विभक्त्यर्थापेक्षायां वेदे नामधेयत्वं न सिद्ध्येदिति जितं पूर्वपक्षिणा सोमेन यजेतेत्यत्रेव
मत्वर्थलक्षणयोद्भिदा यजेतेत्यादावपि विशिष्टविधित्वोपपत्तेरुभयत्र लक्षणायास्तुल्यत्वेऽपि प्रवृत्तिविशेषकरत्वेन विधित्वस्यैवौचित्यात्॥ ॥

रेवाभेदान्वयनियमात्तन्नञर्थेऽभेदान्यसम्बन्धेन नामार्थान्वयस्तथा नामोपस्थाप्ययोरेवाभेदान्वयनियमान्नामानुपस्थाप्यस्य नाम्नो नामार्थान्वय इति भावः अभेदा।
न्वयेतिनञ् तत्र प्रथमाविभक्तेः पदसाधुतायावश्यं वाच्यतया विशेष्यविभक्तिजातीयविशेषणविभक्तेरभेदार्थकत्वव्युत्पत्त्या च घटो भेदाभिन्नपदाभिन्न इति बोधा। एप.
पत्तिः प्रतियोगित्वानुयोगित्वे तु न प्रथमार्थः तत्कल्पनापेक्षया विभक्त्यर्थनैरपेक्ष्येण शाब्दबोधं प्रत्युक्तनञ्घटितसमभिव्याहारज्ञानस्यैव हेतुत्वौचित्यादन्य। २४१
थाविभक्त्यर्थघटितार्थबोधे तद्धेतुत्वस्य प्रतियोगित्वादौ प्रथमाशक्तेश्चकल्पने गौरवादिति भावः विशिष्टविधित्वोपपत्तेरिति। सोमविशिष्टस्येवोद्भिद्द्रव्यविशिष्टस्य
यागस्य विधित्वोपपत्तेरित्यर्थः उभयत्र उद्भिदादिपदवाच्ये उद्भिदादिद्रव्यविशिष्टे च प्रवृत्तिविशेषकरत्वेन। नामधेयपक्षे नाम्नः संकल्पाद्युपयोगेऽपि द्रव्यवि।
शिष्टविधिपक्षे यागस्वरूपनिर्वाहकत्वेनाभ्यर्हितद्रव्यविशेषानुष्ठानप्रयोजकत्वेन विधित्वस्य द्रव्यविशिष्टविधित्वस्य॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावादिकमित्यादिपदस्यायमर्थः सत्यादिपदानामखंडार्थानुभावकत्वेप्यन्विताभिधानमभिहितान्वयश्च नविरुध्यते आकांक्षादिभिर्यादृशानुभवो जायते तज्जननानुकू
लायाः शक्तेः पदनिष्ठायाः अन्विताभिधानरूपत्वात् पदाभिहितार्थनिष्ठाया अभिहितान्वयरूपत्वादित्यादि तर्कैरित्यादिसत्यादिवाग खंडार्थानुमाध्वांतविनाशिनी र
विशिष्टाभेदस्य विशिष्टेभेदविरोधिसंसर्गस्य तेन देशकालवैशिष्ट्यस्यापि वस्यमाणस्य संग्रहस्तस्यापि स्वाश्रय भेदविरोधित्वात् सोयमित्यादौ वाक्ये तत्तादेरुप
लक्षणत्वविशेषणत्वं वा आद्येपि उपलक्षणत्वविशेषणान्यतमात्रं उपाधिसाधारणं स्वोपस्थाप्य धर्मांतरस्येवोक्तवाक्यजधीविषयत्वं न तु स्वस्यत्वेवं रूपंवाउ
भययापि लक्षणावश्यकत्वेनाखंडलक्षणैवोपहितोपलक्षितलक्षणाभ्यां युक्ता विशेषणत्वं ह्यभ्यर्हितमन्यथा लोहितोष्णीषाइत्यादौ लौहित्यादेरविशेषणत्वाप
त्तिरभ्यर्हितत्वं च विशेषणत्वेनान्वयस्येव शक्तिज्ञानसाध्यत्वादित्यादिकं ज्ञानकार्ये विषयहेतुत्वव्यवस्थापनप्रसंगादौ प्रपंचितं द्वितीये विशिष्टयोर्नामार्थयोरभेदश
ववाक्यार्थो मुख्यस्तथापि प्रकृते तदसंभवाल्लक्षणायास इत्यस्य तद्देशकालयोरित्यर्थकत्वादयमित्यस्यैतद्देशकालयोरित्यर्थकत्वाद्देशकालसम्बन्धप्रकारकधीरे

एवं तत्त्वमस्यादिमहावाक्यपक्षकानुमानमपि निर्दोषं न च सोयं देवदत्त इत्ययं दृष्टांतः साध्यविकलः विशिष्टाभेदस्य बोधयितुमशक्यत्वात् तथाहि
किमत्र तद्देशकालविशिष्टे एतद्देशकालवैशिष्ट्यं प्रतिपाद्यते एतद्देशकालविशिष्टे वा तद्देशकालवैशिष्ट्यं तद्विशेषणयोरैक्यं वा तद्विशिष्टयोरैक्यं
वानाद्यः तद्देशकालवैशिष्ट्यस्य प्रत्यक्षत्वेनानुद्देश्यत्वात् तत्कालादेरिदानीं सत्त्वापत्तेश्च न द्वितीयः एतत्कालादेरन्यदा सत्त्वापत्तेः न तृतीयः
बाधात् अत एव न चतुर्थोपि विशेषणस्य भिन्नत्वेन विशेषणविशेष्यतत्संबंधात्मकस्य विशिष्टस्य भिन्नत्वात् अतिरिक्तत्वेपि विशेषणभेदेन
विशेष्यभेदेन च तद्भेदनियमात् तथा चोभयविशेषणपरित्यागेन विशेष्यमात्रमभिन्नं बोध्यत इति सिद्धमखंडार्थत्वं॥ ॥

वं विशिष्टयोरभेदबोधकस्य विशेषणमात्रयोरभेदबोधकत्वमपि संभवति विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्यबाध इति न्यायादतस्तादृशबोध
कत्वमपि वितर्कयति। तथाहि किमत्रेति। तद्विशेषणयो स्तद्देशकालरूपविशेषणयोः अप्रत्यक्षत्वेनेति प्रत्यक्षेणायज्ज्ञातं तदुद्देशेनाज्ञातं ज्ञापयितुं सोयमि
त्युच्यते तद्देशकालविशिष्टत्वं तु न प्रत्यक्षमिति न तेन रूपेणोद्देश्यत इति भावः अनुद्देश्यत्वात् उद्देश्यतानवच्छेदकत्वात्। तत्कालादेरिति उद्देश्यतावच्छेद
कीभूतस्य विशेषणस्य समानकालीनत्वसम्बन्धेन विधेयान्वयित्वेनेत्यादिः समानकालीनत्वसम्बन्धेन स्वविशेष्यान्विताऽन्वयिन एव विशेषणत्वमन्यथा प्रचरणका
ले लौहित्याभावेपि विशेषणत्वं लौहित्यस्य स्यादिति लोहितोष्णीषा ऋत्विजः प्रचरंतीति शास्त्रार्थानुष्ठानं स्यादत एव व्यावृत्तिबुद्धिकाले विशेष्योपरक्तं विशेषणमि
त्यादिनाचार्यैर्विशेषणादिलक्षणमुक्तं एवं च विशेषणादीनामन्यथा लक्षणं भ्रांतैरेव परैरुक्तमिति भावः अत एवेत्युक्तहेतुं विवृणोति विशेषणस्येति भिन्नत्वात्
अभेदान्वयायोग्यत्वात् तथा च विशिष्टयोरभेदान्वये विशेषणयोरपि तदावश्यकत्वेन बाध इति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मं·सि· टी·ल· ३२

यथाश्रुतेपरसंबंधिवृत्तिज्ञानप्रयोज्यस्यपदार्थज्ञानस्यशाब्दधीहेतुत्वंनतुशाब्दधीहेतुपदार्थज्ञानमेववृत्तिरित्यसंगतेः पदसंबंधित्वंतुपदतच्छक्यान्यतरनिष्ठत्वमितिभावः वस्तुतोलक्षणायाःपदवृत्तित्वेपिलाघवाच्छक्त्याबोधकत्वरूपंसामर्थ्यंविनियोजकंनतुशक्यसम्बन्धेनबोधकत्वरूपमितिबोध्यंलाक्षणिकपदेनेतितस्याह्लिंगाधिकरणविरोधपरिहाराये त्यादिःन्यायादिति। इतिवाच्यमितिशेषः शक्यस्येवेति। सत्यादिपदानामित्यादिः सत्यत्वादिविशिष्टविषयकानुभवेविशेष्यतयाशुद्धात्मनोपिभानान्शुद्धात्मानुभावकत्वंसत्यादिपदानामस्त्ये वेतिजहदजहल्लक्षणान्यलक्षणास्थलएवलाक्षणिकमननुभावकमितिभावः अभिहितघटना अभिहितान्वयमताश्रयणे स्मृतिसमबुद्धियुगं। ———— ।स्मृतिसह शाब्दनद्वयमी अन्विताभिधाने। अन्विताभिधानमताश्रयणेपुनःपरदृशिस्मृतियुग्मं। पूर्वंशाब्दबोधात्पूर्वपदेइतिहिवचनंयुगादिपदंचाविवक्षितार्थकंतेनसत्यादिवाक्येषुनानापदज्ञानज

परदृशिशुद्धात्मनि१

लाक्षणिकपदेनान्वयप्रतियोग्युपस्थितौकृतायां पदवशिष्टंशक्तंपदंतदेवान्वयानुभावकंअर्थवादपदानांसर्वेषांलाक्षणिकत्वेपितदेकवाक्यतापन्नंविधिपदमेवानुभावकंविधिनात्वेकवाक्यत्वात्स्तुत्यर्थेनविधीनांस्युरितिन्यायात् तथाचसत्यादिपदानांसर्वेषामपिलाक्षणिकत्वेकथमन्वयानुभवोपपत्तिरिति॥ नैषदोषः शक्यस्यैवान्वयानुभावकत्वाभ्युपगमात् लक्षणात्वेकदेशत्यागमात्रायनत्वशक्यार्थोपस्थितयेगौर्नित्यइत्यादिवत् अतएववाचकानामेव स्वार्थेलक्षणेयमित्युक्तंप्राक् ननुजहल्लक्षणाभ्युपगमेकथमन्वयानुभवःशक्यैकदेशस्यापितत्राभानात् तथाचोक्तंसंक्षेपशारीरकेसाभासाज्ञानवाचीयदिभवतिपुनर्ब्रह्मशब्दस्तथाहंशब्दोहंकारवाचीभवतितुजहतीलक्षणातत्रपक्षे इति अस्मिन्पक्षेऽन्विताभिधानवादानभ्युपगमाद्दोषः पक्षद्वयाश्रयणंतुजहदजहल्लक्षणापक्षएव तथाचदर्शितंतत्रैव अभिहितघटनायदातदानींस्मृति समबुद्धियुगंपदेविधत्तः परदृशिपुनरन्विताभिधानेपदयुगलात् स्मृतियुग्ममेवपूर्वमिति तत्त्वप्रदीपिकाकृदादयस्त्वभिहितान्वयपक्षमेवोररीचक्रुः सर्वथापिसिद्धांतानुकूलत्वादितिनकिंचिदवद्यंतार्किकमतस्योभयपक्षबहिर्भावादिकंचवेदांतकल्पलतायांव्युत्पादितमित्युपरम्यते॥ इतिसत्याद्यवांतरवाक्याखंडार्थतोपपत्तिः॥२॥६

न्यज्ञानलाभः अत्रपरदृशिस्मृतिप्रयोजकोऽनुभावकत्वरूपोमूलसम्बन्धः स्मृतिसमबुद्धिप्रयोजकशक्तिश्चपरदृशिजहल्लक्षणायांनसंभवतीतिजहदजहल्लक्षणापक्षएवतदुभयोक्तिरितिभावः ननुविशिष्टबोधेशुद्धविशेष्यभानानभ्युपगमपक्षेकथमन्विताभिधानपक्षाश्रयणंविशिष्टानुभावकेसत्यादिपदेशुद्धात्मानुभावकत्वानियमेनजहदजहल्लक्षणावश्यदसाधारण्येनाननुभावकत्वनियमादित्यतआह। तत्त्वप्रदीपकेतिसर्वथा। विशिष्टबोधेविशेष्याभानपक्षेपिननूक्तरीत्याभिहितान्वयान्विताभिधानपक्षयोर्व्युत्पादनंनयुक्तंतार्किकादिमतस्यतदप्रवेशापत्तेस्तथाहिनाद्यपक्षेतत्प्रवेशः तार्किकादिमतेपदानामनुभवप्रयोजकशक्तिस्वीकारेणतस्याएवमूलसंबंधत्वसंभवेनार्थस्मारकत्वसंभवात् नाप्यंतेतार्किकादिभिरन्विताभिधानपक्षस्यदूषणात् उक्तंहिमणिकारादिभिर्यद्यपिपदजन्योनुभवोऽन्वितार्थविषयकस्तथाप्यन्वितस्वार्थशाब्दधीत्वेननपदजन्यताकिंतुस्वार्थशाब्दत्वेनेतिनान्विताभिधानंयुक्तमितितत्राहतार्किकेति। तथाचोक्तापत्तिरिष्टेतिभावः॥

राम· २४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यभिज्ञाप्रत्यक्षस्यापीति। सुतरामिति नीलो घट इत्यादौ सप्रकारके तु नीलत्वघटत्वाद्युपहितयोरभेदस्येव भेदस्यापि सत्त्वेनात्यंताभिन्नार्थकत्वं पदयोर्नेति न सुतरां उपपद्यत इति भावः शब्दवृत्तेरिति अखंडतात्पर्याधीनलक्षणयैवाखंडविषयकत्वमित्यभिमानः तात्पर्यानुपपत्त्या शब्दस्येव बाधान्यथानुपपत्त्या प्रत्यक्षस्याखंडविषयत्वा शयेनाह नन्वत्यनपेक्ष्यत्वेपीति बाधस्य विशेषणयोरभेदबाधस्य प्रतिबंधकतया इदंत्वाद्युपहिताभेदविषयकत्वे तदुपलक्षितभेदधीनिवर्त्तकत्वासंभवेन चेति शेषः प्राधान्याद्विशेष्यत्वात्॥ अत्यंताभिन्नयोः विशेष्यविशेषणत्वासंभवः नच शुद्धरूपेण विशेष्यमपि भेदाभावत्वस्वरूपेण विशेषणत्वमास्तामिति वाच्यं भेदाभावत्ववि शिष्टस्यात्यंताभेदरूपत्वाभावात् व्यक्तिस्वरूप एव तद्भेदाभावत्वस्य कल्पिततया तद्विशिष्टस्य पावद्व्यक्तिसत्त्वं सर्वत्राभावात् ब्रह्मणि तद्भेदाभावत्वविशिष्टस्य मोक्षे।

प्रत्यभिज्ञाप्रत्यक्षस्याप्यभिज्ञाद्वयोपस्थितस्वरूपातिरिक्ताविषयत्वेपि उभयोपस्थितिद्वारकाभेदबोधनेन भ्रमनिवर्त्तकत्वं तत्समानार्थं च वाक्यमेतदिति न विशिष्टपरं यथा चाभिज्ञाद्वयात् प्रत्यभिज्ञाया विषयवैलक्षण्याभावेपि द्वारविशेषनिबंधनज्ञानगतवैलक्षण्यादेव फलभे। दस्तथा स्मृतिरूपायास्तदिदंपदार्थोपस्थितेरनुभवरूपस्य वाक्यार्थबोधस्य एवं च भिन्नप्रवृत्तिनिमित्तयोरेकार्थबोधपरत्वं सामानाधि करण्यमिति प्राचां वचोपि निष्प्रकारके सुतरामुपपद्यते ननु सोयमिति प्रत्यभिज्ञा तावन्नाखंडार्थविषया तत्र प्रत्यक्षे शब्दवृत्तेर्लक्षणा या अभावात् तत्तेदंतोल्लेखित्वेन तत्र निष्प्रकारत्वस्यानुभवपराहतत्वात् तदनुल्लेखित्वे त्वभिज्ञातो वैलक्षण्यानुपपत्तेः तथा च शाब्दप्रत्य भिज्ञापि तथा स्वप्रत्यभिज्ञावगतस्य परं प्रतिबोधनादिति चेत् नन्वत्यनपेक्षत्वेपि प्रत्यक्षस्य विशिष्टाभेदविषयत्वे बाधस्य प्रतिबंधकतया स्वरूपाभेदमात्रविषयत्वात् अभेदश्च न प्रकारः स्वरूपतया प्राधान्यात् तत्तेदंतयोरपि न प्रकारताभासमानाभेदरूपवैशिष्ट्यप्र। तियोगित्वाभावात् अतएव न तस्यास्तत्तेदंतोल्लेखिता तदभिलापे तु निरंतरोत्पन्नाभिज्ञाद्वयादेव तथोल्लेखव्यवहारात्॥ ९ ॥

विरहात् किंच व्यक्तिस्वरूपमात्रज्ञानस्यैवोक्तरीत्याभेदधीनिवर्त्तकत्वात् व्यक्तिस्वरूपमेवाभेदः प्रकारो वाच्यः स च विशेष्य एव अतएव वक्ष्यते ऽनु पदं भे दविरहश्च न कश्चिद्धर्मः किंतु स्वरूपमिति भासमानाभेदरूपवैशिष्ट्येति तत्तेदंत्वयोः संसर्गस्याभासमानतया अननुभवात् अखंडाभेदरूपं वैशिष्ट्यभासमा नतया वाच्यं तत्प्रतियोगित्वं च न तत्तेदंत्वयोरित्यर्थः यत्तु परिणममानस्य देवदत्तादेरुत्तरकालोपलक्षितस्य न पूर्वकालोपलक्षितस्वरूपेणात्यंताभेद इति तत्तुच्छं यावत्कालमध्यस्थ एकएव परिणामस्तावत्कालमध्ये तत्तेदंत्वयोः संभवात्। अतएव उक्तक्रमेण तत्तेदंत्वयोः प्रकारत्वासंभवाद्विशेष्यत्वस्य चाननुभवात्। तस्याः प्रत्यभिज्ञायाः न तत्तेदंतोल्लेखिता तत्तेदंत्वविषयकत्वसामान्याभावः तदभिलापे प्रत्यभिज्ञाभिलापे तथोल्लेखव्यवहारात् तत्तेदंताबोधकशब्दप्रयोगात् त था च यदुपलक्षितं यत्र ज्ञाने विषयस्तद्बोधकशब्देनापि तदभिलप्यत इति भावः॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि· टी·ल· ३२

केवकथेति दंडकुंडलाभ्यामुपहितौनात्यंतभिन्नौ अमिलितयोरेवोपाध्योरत्यंतभेदकत्वात् तत्त्वेदंताभ्यामुपहितावप्यत्यंतभिन्नौ परस्परकालासत्त्वादिति भावः एक
कालानवस्थानेति। यत्तु तत्तानंतदेशकालसम्बन्धरूपा किंतु पूर्वानुभवध्वंसस्तस्यैव तद्देशकालाविरोध इति तत्र पूर्वानुभवकालीनातत्तेत्यनुभवविरोधात् तावतापि तत्।
देशकालविशिष्टोयमित्यत्रविरोधानुद्धाराच्च। समानमिति दंडीत्यादावुपहितइवप्रकृतेप्युपलक्षितेलक्षणया तयोरभेदबोधनमित्यर्थः विशिष्टतात्पर्यात् उपहितयोरभे।
दतात्पर्यात्॥ इत्यादिसंशयविपर्ययेतितत्तेदंतोपलक्षितयोर्भेदावगाहिसंशयविपर्ययेत्यर्थः अतएवतत्तोपलक्षितप्रतियोगिकभेदरहितेत्यादिवक्ष्यतेतथाचभेदबुद्धौतत्तेदं
तयोरुपलक्षणत्वात्तन्निवर्तकाभेदबुद्धावपितयोस्तद्युज्यतेतत्रभेदबुद्धौतयोरप्रकारीभूतयोरपिप्रतियोगितावच्छेदकत्वेनसम्बन्धतयापदिभानंयदिवावच्छिन्नत्वाविशेषितप्र
तियोगितावस्तुगत्यातत्तेदंतोपलक्षितव्यक्तिमात्रनिष्ठासंसर्गतयाभात्युभयथापिप्रतियोग्यनुयोगिनोःशुद्धयोर्भेदबुद्धौभानात्तन्निवर्तकताशुद्धयोस्तयोरभेदज्ञानत्वेनशुद्धयो।
श्चनविशेषणविशेष्यताअसंताभेदेविशिष्टप्रमाविरहादित्यखंडविषयकत्वेननिवर्तकतात्पर्यावसानंविवेचितंचेदं तत्रैवेति।उपहितभेदधीनिवर्तनायोपहितयोरभेदपरत्वे

तदुक्तंअविरुद्धविशेषणद्वयप्रभवत्वेपिविशिष्टयोर्द्वयोः घटतेनपदैकतातदानतरांतद्विपरीतरूपयोरितियदा दंडीकुंडलीत्यादौदंडकुंडलादेरेक
देशकालावस्थितत्वेनाविरोधेपिनतद्विशिष्टयोरैक्यंविशेषणयोरप्यैक्यापत्तेः तदाकैवकथासोयमित्यत्रतत्तेदंतयोरेककालानवस्थाननियमेनप
रस्परविरुद्धत्वात्तद्विशिष्टयोरैक्यस्यलक्षणयैवबोधनंतूभयत्रापिसमानंलाक्षणिकत्वेपिदंडीकुंडलीत्यादौविशिष्टतात्पर्याच्चाखंडार्थत्वव्यवहा
रः सोयमित्यत्रतुअयंसनवा अयंनैवसइत्यादिसंशयविपर्ययविरोधिज्ञानविषयीभूताभेदमात्रस्यबुभुत्सितत्वेनतत्रैवतात्पर्यादखं
डार्थत्वंनह्यन्यस्मिन्बुभुत्सितेन्यत् प्रतिपादयितुमुचितमित्युक्तंतत्तेदंतोपस्थितिद्वारकाभेदबोधस्यैवभेदभ्रमविरोधितयानान्यतरपदवैय

प्रकृतवाक्यस्यव्यावहारिकप्रामाण्यहानिस्त्वादृष्टाभेदस्यप्रातीतिकत्वादतएवतज्ज्ञानस्याज्ञानानिवर्तकत्वेननभेदधीनिवर्तकत्वंउपहितयोर्भेदस्यव्यावहा
रिकत्वेनब्रह्मज्ञानमात्रनिवर्त्यत्वाच्चनचसंशयस्यसधर्मितावच्छेदकत्वानुरोधेनेदंत्वभानमावश्यकमितिवाच्यंआपाततब्रह्मज्ञानादौव्यभिचारेणतस्यतदनि
यमात् अखंडव्यक्तेः तत्प्रतियोगिकभेदस्यचाखंडव्यक्तौविशेष्यत्वसंभवेनोक्तभेदत्वस्यैवधर्मितावच्छेदकत्वाच्चनचभेदांशेकिंचिद्रूपेणैवप्रतियोगिनोभानं सम·
नस्वरूपत इतिवाच्यंतथानियमेमानाभावात्परैरपिभेदलौकिकप्रत्यक्षएवतथास्वीकारात्।शुद्धव्यक्तेः स्वस्मिन् भेदकल्पनेतदसंभवात् अथास्यभेदज्ञा २४३
नस्याहार्यत्वात्राभेदज्ञाननिवर्त्यत्वमितिचेत्भ्रांतोसि अविद्यानिवृत्तातत्कार्यनिवृत्तौत्वदीयाहार्यादिपरिभाषायाअप्रयोजकत्वात्रचकिंचिद्रूपेणजातीतरस्यविशे
षणत्वनियमादिदंत्वादिनैवव्यक्तिभानमितिवाच्यंइदंत्वस्यापिइदंव्यक्तिस्वरूपतयाकिंचिद्रूपेणविशेषणत्वापत्तेःशाब्दनिर्विकल्पकस्यमन्मतेविषयविशिष्टतया।
साक्षिभास्यत्वेनतथानियमाभावाच्चनकेवलंशाब्दबोधस्येयंरीतिः किंतुप्रत्यक्षस्यापीतिदृष्टांतेनाखंडार्थत्वंसंभावयति·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भ्रमप्रतीतेति। भ्रमाय प्रतीतेत्यर्थः भ्रमोपलक्षणात्तया भ्रमपूर्वं प्रतीतेति भावः स्वरूपमात्रज्ञानस्येति महावाक्ये हि जीवत्वसर्वज्ञत्वोपहितयोरभेदो न विषयः तस्य भेदसहिष्णोरपि बाधितत्वेन तदसहिष्णोः सुतरां बाधितत्वान्न हि उपहितयोरभेदस्तात्त्विकः नेह नानेत्यादिश्रुत्यादिना उपहितयोरेवमिथ्यात्वेन तत्त्वासंभवात् तथा च भेदस्य व्यावहारिकत्वेनाभेदस्य प्रातीतिकत्वात् वाक्यस्य व्यावहारिकप्रामाण्यमपि न स्यात्। नापि जीवत्वोपलक्षिते नेशत्वोपहितस्याभेद ईशत्वादिविषयकत्वेनाप्रामाण्यापत्तेः। तयोरभेदस्यातात्त्विकत्वाभावेन मुख्यसामानाधिकरण्यहानेश्च किंतु जीवत्वेशत्वोपलक्षितयोरभेदः स च स्वरूपमात्रमिति पूर्वोक्तरीत्या तन्मात्रज्ञानमेव महावाक्यजमिति भावः। शंखेत्यादि न चानुमानप्रत्यक्षयोर्विषयाभेदे पि करणवैजात्यात् कार्यवैलक्षण्यमिति वाच्यं निर्दोषेंद्रियसन्निकृष्टे शं

तदस्फुरणे च तद्बुभुत्साद्यनुपपत्तिः तत्त्वंपदार्थशोधकेनावांतरवाक्येनैवोपपत्त्या महावाक्यवैयर्थ्यं च एकपदेनोपपत्त्यानेकपदवैयर्थ्यं च भ्रमकालज्ञाताधिकाप्रतिपत्तेर्महावाक्याद्भेदभ्रमनिवृत्तिश्च न स्यादिति चेत् न चैतन्यस्य नित्यसिद्धत्वेपि सार्वज्ञाद्युपलक्षितस्वरूपज्ञानस्याज्ञानादिनिवर्तकस्य साध्यत्वात् न चैवं सप्रकारकता तत्तादिवत् सार्वज्ञ्यादीनामन्वयबोधाप्रकारत्वात् उपायांतरेणैतादृशज्ञानासंभवाच्च नोपदेशवैयर्थ्यादयो दोषाः भ्रमप्रतीतभेदाश्रयतावच्छेदकप्रतियोगितावच्छेदकद्वयोपलक्षितस्वरूपमात्रज्ञानस्य भेदभ्रमनिवर्तकत्वेन विषयावैलक्षण्येपि फलवैलक्षण्यात् शंखश्वैत्यविषयत्वे तुल्येपि तदनुमानानिवर्त्यपीतभ्रमस्य तत्प्रत्यक्षनिवर्त्यत्वदर्शनात् अत एवोक्तं विवरणे अभिज्ञातः प्रत्यभिज्ञायास्तावन्न प्रमेयतो विशेषः अभिज्ञयाज्ञातस्यैव देवदत्तैक्यस्य प्रत्यभिज्ञयापि ग्रहणात् नहि देवदत्तस्य स्वैक्यमभिज्ञायां न भाति न च तस्यैक्यांतरमस्ति यदनभिज्ञातं प्रत्यभिज्ञायते ननु एकस्य कालद्वयसंबंधः प्रत्यभिज्ञागोचर इति चेन्न एकैकोकालद्वयसंबंधस्याभिज्ञाद्वयादेव सिद्धेः तस्मात् कालद्वयसंबंधिपदार्थैक्यविषयत्वे द्वयोरप्यविशिष्टे प्रत्यभिज्ञाया एव कालद्वयपरामर्शित्वेन पदार्थभेदभ्रमनिवर्तकत्वं नाभिज्ञायाः एवं तत्त्वमसीति वाक्यस्य सत्यादिवाक्यात्तत्पदाच्च प्रमेयावैलक्षण्येपि धर्मद्वयपरामर्शित्वेन भेदभ्रमनिवर्तकत्वात्प्रामाण्यं उक्तं च कात्यायनेन सिद्धंतु निवर्त्तकत्वा

खश्वैत्यादावनुमित्यादेरपि पीतत्वादिभ्रमनिवर्त्तकत्वात्। सामग्रीवैजात्यस्यैव कार्यवैलक्षण्ये नियामकत्वेनादोषात्। शंकते एकस्येति। ((दिति॰ ॥ द्वयादेवेति। एककालेन विशिष्टे उपहिते वा कालांतरवैशिष्ट्यं तु न प्रत्यभिज्ञायामपि विषयो वक्तुं शक्यो बाधादिति हृदयं धर्मद्वयेति जीवत्वब्रह्मत्वेत्यर्थः उक्तं चेति शब्दानां नित्यत्वे सिद्धेति ते व्याकरणस्य ज्ञाततज्ज्ञापकत्वेनाप्रामाण्य माशंक्य मृजादिधातुना मृजन्नित्यादेः साधुत्वनिश्चयसंभवेपि मार्ष्टीत्यादीनामसाधुत्वभ्रमनिवर्त्तकत्वरूपप्रयोजनसत्त्वेन प्रामाण्यं सिद्धमेवेत्यर्थकं सिद्धंत्वित्यादिकमुक्तं बृहद्विस्तरवार्तिके। तद्वत् ज्ञाततज्ज्ञापकत्वेपि भ्रमविशेषनिवृत्तिरूपप्रयोजनसत्त्वात्। तत्त्वमस्यादिप्रामाण्यमिति भावः॥ ॥ ६ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰सि॰ तत्रतदिदंशब्दरूपाभिलापेतत्त्वेदंत्वोपलक्षितेव्यक्तिमात्रेलक्षणावश्यकीअन्यथाभिलप्यज्ञानेनतदभिलापसमानविषयत्वव्याघातादित्याशयेनाह तत्रे
टी॰ल॰ तिएवंचतत्तेदंताभ्यांजानामीत्यनुव्यवसायोपिव्याख्यातस्तत्रार्पितयोरूपलक्षणयोरभिलापात् सर्वत्रयएवंवेदाहं ब्रह्मास्मीति आत्मानमेवावेदहंब्रह्मास्मीतिआ
उ॰ त्मानंचेद्विजानीयादयमस्मीत्यादिवेदेसोयमितिलेकेच सप्रकारकत्वेति अभिज्ञाप्रत्यभिज्ञयोरित्यादिः ज्ञानमात्रेति। श्रोतव्युभुत्सितज्ञानत्वेनैवोपदेशहेतुतानतूपदे
३४ शान्यूनानतिरिक्तविषयकज्ञानत्वेन ननुतत्तेदंत्वयोर्विशेषणत्वमादायविशिष्टयोरभेदएववाक्यार्थः विशेषणत्वंतुनस्वविशेष्यान्वितान्वयित्वशब्दोऽनित्यइत्या
दौशब्दत्वादावव्याप्तेर्नापिविधेयान्वयकालेविद्यमानत्वं दंडीभविष्यतीत्यादौदंडादावव्याप्तेः गृहनिष्ठकाकादावतिव्याप्तेश्च। नापिविधेयान्वयप्रतियोगितावच्छे
दकत्वंप्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकत्वंवाअवच्छेदकत्वमन्यूनानतिरिक्तदेशकालत्त्ववायदृत्तयाज्ञातेएवतात्पर्यविषयेतरान्वयत्वंवाआद्येसात्वादिमान्

तत्रचलक्षणालब्धपदैवसर्वत्रचनिर्विकल्पकाभिलापइयंगतिः नचाभिज्ञाया अविशेषः सप्रकारत्वनिष्प्रकारत्वाभ्यामेवविशेषात् फल
वैलक्षण्यंतूक्तमेव अतएवतत्तोपलक्षितप्रतियोगिकभेदरहितेइदंतोपलक्षितदेवदत्तस्वरूपेतात्पर्याद्यथाज्ञानमुपदेशोप्युपपद्यतेभेदविरहश्च
नकश्चिद्धर्मः किंतुस्वरूपमेवतदेवचैक्यमित्युच्यतेनचायमस्तिनियमःस्वेनयथावगतंतथैवपरंप्रतिवाच्यमिति समूहज्ञानेनापिश्रोत
बुभुत्सितेकदेशोपदेशदर्शनात् ज्ञानमात्रसाध्यत्वाद्बुभुत्सानुसारित्वाच्चोपदेशस्यएवंचविशिष्टविषयादपिज्ञानादखंडोपदेशोपपत्तिःविशे
षणोपलक्षणादिविवेकस्त्वान्यत्रस्पष्ट इतिनेहप्रतन्यते तथाचनदृष्टान्तःसाध्यविकलः एवंतत्त्वमस्यादिमहावाक्येपिबोद्धव्यं ननुचिन्मा
त्रस्यचिन्मात्रेणसहाभेदबोधनेइष्टापत्तिरप्रसक्तप्रतिषेधश्चअभेदश्चेत्स्वरूपमेवतस्यस्वप्रकाशतयानित्यसिद्धत्वेनोपदेशवैयर्थ्य॰॥ ५॥

गौरित्यादौसास्नादौतत्संभवेपिगौः शुक्लइत्यादौतदभावात् द्वितीयेतुतत्तादेरप्यसत्तंतद्वृत्तयाज्ञातएवेदमार्थान्वयात् उपलक्षणत्वंतुनतत्तादेरस्तियदुपस्थापित
धर्मान्तरवत्तयाज्ञातएवविधेयस्यविधेयवदन्यव्यावृत्तेर्वाबोधस्तस्यैवोपलक्षणत्वात्। नहिकाकोपस्थापितसंस्थानविशेषवत्तयाज्ञातएवदेवदत्तगृहस्सतदितरव्या राम॰
वृत्तेर्वाधीरिवततोपस्थापितदेहसंस्थानविशेषवदिदमर्थस्यतदन्यव्यावृत्तेर्वाधीर्देहसंस्थानविशेषवदिदमर्थतदन्यव्यावृत्त्योःप्रत्यक्षसिद्धत्वेनवाक्येनतद्बोधनवैय २५४
र्थ्यापातादित्यतआह विशेषणोपलक्षणादीति। अन्यत्रप्रथमपरिच्छेदेस्पष्टःमयाविवेचितःस्वविशेष्यान्वितेयत्रयदन्वेति तदंशेतद्विशेषणांशब्दत्वादिकंतुअनित्यत्वाद्यं
शेनविशेषणंनवाभविष्यत्वाद्यंशेदंडादि किंतु अनित्येतरव्यावृत्तिबुद्ध्यंशेशब्दइतरस्माद्व्यावृत्तइत्यादिबोधेस्वविशेष्यान्वयिनिव्यावृत्तिबुद्धिविषयत्वेशब्दत्वस्यैककालीन
तसम्बन्धेनान्वयात् तथाचतत्तादिकमुपलक्षणमेवनानाव्यक्तिगतस्योपलक्षणस्यधर्मान्तरोपस्थापकत्वनियमेप्येकव्यक्तिगतस्यतदभावात्धर्मस्यधर्मिणोवोपस्थितिद्वारा
स्वाविषयकंस्वाश्रयस्ययज्ज्ञानंयेनजन्यतेतस्मिन्स्वाश्रयस्यज्ञानेतस्योपलक्षणत्वमित्यादिविवेचितमितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयविशेषणेति विषयीभूतब्रह्मांशे प्रकारीभूतधर्मेत्यर्थः ब्रह्मणि धर्मविशेषप्रकारकोपासनाविधायकत्वेनोक्तश्रुतेर्न ब्रह्मणो धर्मवैशिष्ट्ये तात्पर्यमिति भावः अपूर्वत्वात् मानांतरेणाबाधितत्वादप्राप्तत्वाच्च विशेषणे तात्पर्यमिति। सत्यकामादिरूपं ब्रह्मोपासीतेति वाक्ये सत्यकामत्वादेर्द्वितीयार्थप्रकारत्वेऽन्वयात् प्रकारतायाश्च ब्रह्मविशेष्यकत्वावच्छेदेनोपासनायामन्वयात् ब्रह्मणि सत्यकामत्वादिप्रकारकोपासनायां तात्पर्येऽपि ब्रह्मणि सत्यकामत्वादिवैशिष्ट्यस्य मानांतरेणाप्राप्तत्वादबाधितत्वाच्च तत्परत्वमप्युक्तश्रुतेरस्त्वामिति भावः एकवाक्यताभंगापत्तेरुक्तोपासनापरश्रुतेर्नोक्तवैशिष्ट्ये तात्पर्यमिति सदृष्टांतमाह अपूर्वत्वेपीत्यादि मानांतरेणाबाधिताप्राप्तार्थकत्वेपि अन्यशेषस्य अन्यार्थपरवाक्यघटकस्य तत्परत्वदर्शनात् स्वीयोक्तार्थपरत्वाभावदर्शनात् होमसाधनत्वस्य होमसाधनत्वबोधकभागस्य तथैवेति जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा जुहुयात् न ग्राम्यान् पशून् हिनस्ति नारण्यान् अथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च पयसाग्निहोत्रं जुहुयादिति अग्निहोत्रे श्रुतं तत्र जर्तिलयवाग्वेत्यादिना विहितयोर्जर्तिलगवीधुकयवाग्वोरनाहुतिरित्यादिनिंदया प्रतिषेधकल्पनात् तयोर्विधिप्रतिषेधाभ्यां विकल्पः पयसेत्यादिकं तु पयोविधिः वाक्यभेदस्तु न दोषः पृथगाख्यातश्रवणादिति प्रा।

नैवं न तावत् श्रुत्या सगुणत्वसिद्धिः सगुणप्रकरणस्यायाउपास्तिविधि विषयविशेषणसमर्प्यकत्वेन तत्परत्वाभावात् न चापूर्वत्वात् सत्यकामादौ विशेषणे तात्पर्यं अपूर्वत्वेप्यन्यशेषस्य अतत्परत्वदर्शनात् यथाहि जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा जुहुयादित्यादौ जर्तिलयवाग्वादेर्होमसाधनत्वस्य अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेति निंदायाश्चाजक्षीरेण जुहोती।तिविध्येकवाक्यतयाऽतत्परत्वं तथैवात्राप्युपपत्तेः निर्गुणप्रकरणस्यायास्तु अद्वितीयब्रह्मप्रतिपत्त्यनुकूलनिषेधापेक्षितविषयसमर्पकतया अन्यथासिद्धेः॥

प्तेजर्तिलयवाग्वेत्यादेः विधित्वेपि अनाहुतिरित्यादिकं न विकल्पतात्पर्यकं तद्धि नापि पयोविधिवत्वेनैव व्रीहियवन्यायेन विकल्पसिद्धेः किंतु न हि निंदान्यायेन पयःस्तुतिपरं वस्तुतस्तु जर्तिलयवाग्वेत्याद्यपि न विधिः किंतु पशुनिंदाद्वारेण पयःस्तुतिपरः वा शब्दं विनापि व्रीहियवन्यायेन विकल्पबोधसंभवेन वाशब्दस्यान्यथा वैयर्थ्यात् तस्माद्धि यथा भुंक्ष्व विष्णुमपूजयित्वा वा न भुंक्ष्व विषभोजनं मरणाहेतुः विष्णुं पूजयित्वा भुंक्ष्वेत्यादाविवान्यनिंदापादनद्वाराऽन्यस्तुतिपरं प्रथमवाक्यमिति पयोविध्येकवाक्यतापन्नमेव जर्तिलादिवाक्यमिति दशमाष्टमे स्थितं तथा च तद्वदुपासनाविध्येकवाक्यत्वाय विशिष्टोपासनापरमेव सगुणवाक्यं न तु ब्रह्मणि गुणवैशिष्ट्यपरमिति भावः। अजक्षीरेण जुहोतीति वाक्यं तु शाखांतरीयं अनाहुतिर्वै जर्तिलाश्च गविधुकाश्चेत्यजक्षीरेण जुहोतीत्यापस्तंबशाखायां पाठात्। उक्तं च संक्षेपशारीरके यथा त्वजक्षीरविधेः समीपइति॥ निर्गुणप्रकरणस्यायाः। यः आत्मापहतपाप्मेत्यादि सत्यकामः सत्यसंकल्पः सोन्वेष्टव्य इत्यस्याः विषयसमर्पकतया प्रतियोगिसमर्पकतया॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ॰सि॰ अन्यथाभेदविरहत्वरूपैकत्वभाने नतुसोयमितीति सोयमितिधीप्रतिबंधकयुक्तायांतत्सामग्र्यांसत्यांकालद्वयसम्बन्धिस्वरूपज्ञानंजायतामितीच्छयाजायमानस्यसोयमि
टी॰ल॰ तिज्ञानस्यैनेकत्वंविषयःवस्तुतएककालविशिष्टेतदुपहितेवाकालांतरविशिष्टस्यतदुपहितस्यवाभेदाभावसम्बन्धेनेवभेदाभावप्रकारकंज्ञानमपिनसंभवतिवाधादित्यादिवोध्यं
उ॰ पदाभावादिति।एकवचनस्यतुसंख्येवार्थःतावेतावित्यादावेकवचनस्याप्यभावइतिभावः उपाधिभेदभिन्नेर्थेऐक्यप्रतिपादकत्वात्भिन्नोपाध्युपहितवाचकस्यघटकत्वामार्थयो
३५

स्यादेतत् अभिज्ञयावस्तुतएकस्मिन्कालद्वयसंबंधस्येवदृत्ताभेदस्यग्रहणेपिप्रत्यभिज्ञयैकस्मिन्कालद्वयसंबंधइतिवाकालद्वयसंबंध्येकइतिवाग्रहणे
नप्रमेयतएवभेदः नहीदमितिज्ञानंवस्तुतःशुक्तौशुक्त्यभेदग्राह्यपिइयंशुक्तिरितिज्ञानवदिदंत्वशुक्तित्वाधारएकइत्याकारं अन्यथातुफलतोपिविशेषो
नस्यात् कालद्वयपरामर्शस्यभेदभ्रमेपिसत्त्वात्एवंतत्त्वमसीत्यत्रापीति उच्यतेनहिप्रत्यभिज्ञायामेकंप्रकारइतिकस्यचिन्मतं तस्यस्वरूपत्वेनविशेष्यत्वा
त् अभेदस्वरूपविषयत्वेतुल्येतत्तेदंतोभयप्रकारिकासेतितवमतंनिष्प्रकारिकैवेतिममएकत्वंचनैकत्वसंख्यागुणादावभावात् तज्ज्ञानस्यभेदभ्रमा
विरोधित्वाच्चकिंतुभेदविरहरूपंस्वरूपमित्युक्तं अन्यथातदभिलापवाक्यमपिसोयमेकइतिस्यान्नतुसोयमितिसोयमितिवाक्येत्वैक्यस्यप्रकारत्वंत
त्प्रतिपादकपदाभावादेवदूरनिरस्तंभेदभ्रमेकालद्वयपरामर्शेपिभ्रमप्रतीतभेदाश्रयतावच्छेदकेत्यादिनिरुक्तफलवैलक्षण्यमुपपन्नमेव अतए
वउपाधिभेदभिन्नोर्थोयेनैकः प्रतिपाद्यते तदपिस्यादखंडार्थमहत्वं कुंभखंवयथेत्यादिकल्पतरूक्तं घटाकाशोमहाकाशइत्युक्तेरेवैक्यधीर्यथेतिवा।
र्तिकोक्तंचनिरवद्यं तथाचतत्त्वमसिमहावाक्यमखंडार्थं उपाधिभेदभिन्नेर्थे ऐक्यप्रतिपादकत्वाद्घटखंमहाखमितिवाक्यवदित्युक्तंभवति एवंच।
सत्यज्ञानादिगीरेतत्संसर्गव्यतिरेकिणिअर्थेप्रमाणंमानत्वान्नयनादिप्रमाणवदितिचित्सुखाचार्योक्तमपिसाधुसत्यादिवाक्यमेतत्पदार्थसंसर्गव्यतिरिक्तएवार्थे
प्रमाणमितिसावधारणंसाध्यंविवक्षितंतेनसंसर्गातिरिक्तसंसर्गिण्यपिप्रामाण्यांगीकारान्नसिद्धसाधनंकंटकोद्धारस्यपूर्ववत्एवमन्येषामपिप्रयोगायथाय
घमुपपादनीयाः तस्माद्दृष्यारोदिषिमंदबुद्धेतवभ्रमादेवहिदुःखमेतत् तस्यापनोदोविहितःप्रमाणेस्तुभ्यंतुरोचेतसनेतिचित्रंमानंवेदांतवाक्यानिभिन्निर्गुणाखंडबोध राम॰
नात्निर्गुणत्वंचतस्योक्तंश्रुत्यायुक्तिसहायया इत्यद्वैतसिद्धौतत्त्वमस्यादिमहावाक्याखंडार्थत्वोपपत्तिः३कैवल्यश्रुत्याताववदात्मानिर्गुणःननुब्रह्मंतोस्यधर्माइतिश्रु २४५
त्याचब्रह्मेशानादिभिर्देवैःसमेतैर्यदङ्गिरांशकःनावसायपितुंशक्यइत्यादिस्मृत्याचब्रह्मधर्मवत्पदार्थत्वादित्याद्यनुमानैश्चस्वसमानसत्ताकधर्मवद्ब्रह्मेतिचेत्॥

रत्वंताभेदवोधकत्वात्घटःकलशइत्यादौव्यभिचारात्वाचकांतंनीलोघटइत्यादौव्यभिचारादत्तंतेति।व्यतिरेकिणिभिन्नेसावधारणमिति॥पदार्थसंसर्गनिष्ठसांसर्गिकवि
षयताशून्यप्रमाजनकत्वंसाध्यंनिर्विकल्पकमादायदृष्टांतेसाध्यंनिर्गुणाखंडवोधनात्निर्गुणाखंडवोधमादाय।मानं।प्रमाणंतर्केरित्यादितत्त्वमस्याद्यखंडार्थानुभाध्वांतवि
नाशनी॥३॥कैवल्यश्रुत्या।केवलोनिर्गुणइतिश्रुत्यास्वसमानसत्ताकधर्मवद्ब्रह्मेतिवाधर्मवद्ब्रह्मेतिवावाधकाभावेनोक्तश्रुत्यादेरुक्तधर्मवोधकत्वमित्य भिमानः
वोध्य २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतेसाध्यनिरूपणे उदाहरणोपनयवाक्ययोः तदेवदृष्टांतएव धर्मिधर्मिपदार्थः पक्षेतन्निरूपणे प्रतिज्ञानिगमनवाक्ययोः शब्दस्वभावेति उक्तशब्दस्वभावेत्यर्थः अप्रयोजकत्वादिति पर्वतोऽयंवन्हिमान् धूमाद्योयोधूमवान् सप्तुक्तवन्हिमानित्यादिवाक्यस्यानुमानानुपयोगात् येनरूपेणसाध्यंप्रतिज्ञातंतेनैवहेतुव्यापकत्वस्योदाहरणे प्रदर्शनीयतया प्रतिज्ञावाक्येपक्षरूपधर्म्यादिपदार्थघटितरूपेणोदाहरणादौ दृष्टांतरूपतद्घटितरूपेणासाध्यबोधकतेतिस्वभावोनानुमानपर्यवसायीतिभावः यत्तु प्रभादृष्टांतेनप्रमायांपक्षेस्वनिवर्त्यत्वादिविशिष्टपूर्वकत्वस्यानुमानंविवरणेक्रमसंगतमितितन्नतत्रस्वपदस्यप्रमाप्रभान्यतरपरत्वात् प्रकृतेधर्म्यादिपदस्यपक्षदृष्टांतान्यतरपरत्वेतु घटादिसमानसत्ताकधर्मवत्वादिनासिद्धसाधनमेवान्यतरज्ञानरूपब्रह्मज्ञानावाध्याप्रसिध्यादिकं अतएवस्वोपादानगोचरज्ञानादिमज्जन्यत्वस्यद्व्यणुकादौघटादिदृष्टांतेनतार्किकाद्यनुमा।

नचदृष्टांतेसाध्यनिरूपणे तदेवधर्मिपक्षेतन्निरूपणेब्रह्मैवधर्मिधर्मिपदस्वपदादीनांस्वसमभिव्याहृतपरत्वादितिवाच्यं शब्दस्वभावोपन्यासस्य अनुमानंप्रत्यप्रयोजकत्वात् स्वरूपपदस्याप्येवमेवब्रह्मपरत्वेसाध्याप्रसिद्धिः घटादिपरत्वेसिद्धसाधनंसमभिव्याहृ। तपरत्वस्यशब्दस्वभावस्यानुमानंप्रत्यप्रयोजकत्वमितिदूषणंपूर्ववत् धर्मैर्विनानावतिष्ठतइत्यस्यब्रह्मधर्मव्याप्तमित्यर्थः तथाचसिद्धसाधनंयस्मिन् कालेदेशेवाब्रह्मतत्रधर्माःसंत्येव नहिकालोदेशोवाधर्म्मरहितःमायाचित्संबंधस्यकालस्यमुक्तसहवृत्तित्वात् स्वज्ञानावाध्येत्यत्रापिपूर्ववत् स्वपदार्थविकल्पः अतएवस्वारोपितव्यावर्तकस्वज्ञानावाध्यधर्मवदितिनिरस्तंस्वज्ञानाबाध्यदुःखव्यावर्तकधर्मवदित्यत्रापिस्वपदविकल्पःपूर्ववत्दुःखव्यावर्त्तकधर्मवत्त्वेनसिद्धसाधनंवेदांततात्पर्य्यगोचरेत्यत्र अवांतरतात्पर्य्यमादायसिद्धसाधनंमुख्यतत्तात्पर्य्योक्तौचवेदांतवाक्यमुख्यतत्तात्पर्यविषयप्रकाराप्रसिध्यासाध्याप्रसिद्धेः नचयत्तद्भ्या मनुगमप्यसाध्याप्रसिद्धिः तथाशब्दानुगमस्य अनुमानंप्रत्यनुपयोगात्॥ नप्रयोजकन्यायवाक्येपिस्वपदमुक्तपक्षदृष्टांतान्यतरपरमेवानहिकालइतिननुब्रह्मधर्मशून्यंनेत्येवसाध्यंतथाचतत्रनसिद्धसाधनंमुक्तौब्रह्मणोधर्मशून्यत्वादितिचेत्भ्रांतोसिधर्मशून्यभेदस्यधर्मशून्यतात्यंताभावस्यसाध्यत्वेतस्यधर्मरूपस्यब्रह्मण्यविद्याकालेसत्त्वेनसिद्धसाधनतादवस्थ्यात्दुःखव्यावर्त्तकधर्मवत्त्वेनेतिस्वज्ञानावाध्यंयद्दुःखव्यावर्त्तकंदुःखप्रतिद्वंदितावच्छेदकमानंदत्वंब्रह्मस्वरूपंतद्वत्त्वेनेत्यर्थः।स्वज्ञानावाध्यत्वेधर्मत्वविशिष्टस्यविवक्षितेतुसाध्याप्रसिद्धिर्वोध्यानचयत्तद्भ्यामित्यादियत्तत्तत्वयोःप्राचांमतेऽनुगतत्वात्तयोर्यद्विचारविषयःसतत्तात्पर्यप्रकारवानितिसामान्यमुखीव्याप्तिर्ग्रहीतुंशक्यतइतिविशेषतोवेदांतमुख्यतात्पर्यविषयप्रकारत्वेनसाध्याप्रसिद्धिः प्रकृतेन्व्याप्तिग्रहविरोधिनीतिभावः।शब्दानुगममात्रमेतत्यत्तत्त्वयोरनुगतत्वेमानाभावादित्याशयेनाह तथाशब्देति। तयोरननुगतत्वेनव्याप्तिग्रहसंभवेप्यनुमितौविशेषतःसाध्यमानस्यावश्यकत्वात्तद्विरोधित्वंसाध्याप्रसि टिं॰ ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यप्रमेयत्वेति सगुणोपासनावाक्यप्रमेयत्वेत्यर्थः। अतिप्रसंगादितिश्रुतिप्रसक्तस्यश्रुत्यानिषेधेविकल्पस्वीकारेन कलंजंभक्षयेदित्यादिवाक्यगतकलंजंभक्षयेदि
त्यादेरपिमानांतरप्राप्तभक्षणानुवादित्वेन प्रसंजकतयाविकल्पापत्तिरितिभावः ब्रह्मधर्मीत्यादिब्रह्मनिष्ठं द्वैताभावंमंडनमतेसत्यमादायार्थांतरवारणायसर्वत्रभावरूपेति।प
दार्थत्वस्यपदवाच्यत्वरूपस्यशुद्धब्रह्मण्यसिद्धत्वादाह भावत्वात् सत्तादात्म्यप्रतियोगित्वात् घटादाविवब्रह्मणिसद्रूपेप्युक्तप्रतियोगित्वंनासिद्धमितिभावः प्रकारवत् स्वविशेष्य।

नचकिंचनेत्यादिसामान्यवाचकपदेनैवब्रह्मातिरिक्तसर्वनिषेध्योपस्थितौविशेषग्रहणमनर्थकमितिवाच्यं अलौकिकतयावाक्यप्रमेयत्वभ्रमव्युदासार्थत्वात् अतएवश्रुतिप्राप्तस्यश्रुत्यानिषेधेअहिंसावाक्यमग्नीषोमीयहिंसायाः अग्रहणवाक्यंचषोडशिग्रहणस्यअसद्वेत्यादिवाक्यंब्रह्मसत्त्वस्यभेदवाक्यंचैक्यस्यनिषेधकंस्यादितिनिरस्तंप्रकृतेश्रुतिप्राप्तत्वस्यैवअभावात् श्रुतिप्राप्तत्वंहिनतत् प्रसक्तत्वमतिप्रसंगात् तत्प्रमितत्वस्यचप्रकृते अभावात् अहिंसावाक्यस्य वैधहिंसाऽविषयत्वेनसमानविषयत्वाभावात् समानविषयत्वेग्रहणाग्रहणवद्विकल्पापत्तेः ग्रहणाग्रहणवाक्ययोस्तुसत्यपिसमानविषयत्वेएकस्याधिकबलत्वाभावेनबाध्यबाधकभावस्यअसंभावितत्वात् अन्यथाविकल्पानाश्रयणप्रसंगात् असद्वाक्यभेदवाक्ययोस्तुनब्रह्मसत्त्वैक्यनिषेधकतासत्त्वैक्यबोधकयोरेवतत्परत्वेनप्राबल्यात् नाप्यनुमानंब्रह्मणितात्त्विकधर्मसाधनायालंतथाहि ब्रह्मधर्मिसत्तासमानसत्ताकधर्मवत् उक्तसत्ताकभावरूपधर्मवद्वायावत् स्वरूपमनुवर्त्तमानधर्मवद्वातादृशभावरूपधर्मवद्वा स्वज्ञानाबाध्यधर्मवद्वातादृशभावरूपधर्मवद्वाधर्मैर्भावरूपधर्मैर्वाहीनंनावतिष्ठतेवापदार्थत्वादथवाभावत्वात् घटवत् ब्रह्मस्वज्ञानाबाध्यप्रकारवत् स्वारोपितव्यावर्त्तकस्वज्ञानाबाध्यप्रकारवद्वा अधिष्ठानत्वात् शुक्तिवत् ब्रह्मस्वज्ञानाबाध्यदुःखव्यावर्त्तकधर्मवत् दुःखानात्मकत्वात् घटवत् ब्रह्मस्वज्ञानाबाध्यप्रकारविशेष्यंसंदिग्धत्वाद्विचार्यत्वात् निर्णेतव्यत्वाद्वास्थाणुवत् ब्रह्मवेदांततात्पर्यगोचरप्रकारवत् वेदांतविचारविषयत्वात् यदेवंतदेवंयथाकर्मकांडविचारविषयोधर्मः ईश्वरः सदाऽवाप्तसमस्तकल्याणगुणः सदाप्रेप्सुत्वेसतितत्रशक्तत्वात् योयदायत्प्रेप्सुर्यत्रशक्तः सतदातद्वान्यथाचैत्रः ईश्वरः सदात्यक्तसमस्तदोषः सदातज्जिहासुत्वेसतितत्त्यागेशक्तत्वात् यश्चैवंसतथैवयथाचैत्र इत्याद्यनुमानेषुधर्मिपदस्वपदयोर्यत्किंचिद्धर्मियत्किंचित्संबंधिपरत्वेघटादिसमसत्ताककल्पि राम॰
तधर्मत्वेनसिद्धसाधनंब्रह्मपरत्वेसाध्याप्रसिद्धिः घटादिधर्मैर्ब्रह्मसमानसत्ताकत्वादेरप्रसिद्धेः॥ १ कधीविशेषणावत् स्वज्ञानाबाध्यमज्ञाननाश्यंपं। २५६

चप्रकारमादायसिद्धसाधनादाह स्वारोपितव्यावर्त्तकेत्यादि। स्वस्मिन्नारोपितात् स्वस्ययद्व्यावर्त्तकंस्वज्ञानाबाध्यंचतादृशसत्यत्वादिप्रकारवदित्यर्थः ब्रह्मयदि
तादृशप्रकारवन्नस्यात्तदाकिंचित्प्रकारकस्यभ्रमनिवर्त्तकज्ञानस्यविशेष्यंनस्यादित्यनुकूलतर्कलाभायप्रकारानुसरणं। प्रेप्सुत्वेप्राप्तीच्छावत्त्वे तत्रशक्तत्वात् तज्जनका
नुकूलशक्तिमत्त्वात् सत्ताकत्वादेरित्यादिनायावद्ब्रह्मस्वरूपमनुवर्त्तमानत्वसंग्रहः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यत्वस्येति मिथ्यात्वेसाध्ये इत्यादिः। स्वनिष्ठेत्यादि घटाभावादेः स्ववृत्तित्वमिव स्वनिष्ठात्यंताभावप्रतियोगित्वमपि नास्ति घटादिमत्त्वापत्तेः स्वस्मिन्स्वप्रतियोगिकत्वविशिष्टसत्त्वे।
घटे घटस्य संयोग इति बुद्ध्यापत्तेश्चातो दृश्यत्वादेरपि तदुभयास्वीकारादेतदत्यंताभावविशिष्टपक्षस्वरूपाभागासिद्धिर्नेति भावः उक्तरीत्या वाक्यभेदापत्तेः सगुणत्वे तात्पर्याभावेपि देव
ताधिकरणन्यायेन सगुणश्रुत्या सगुणं ब्रह्म प्रमाप्यते तावतापि शुद्धब्रह्मणो निर्गुणत्वे बाधकाभावोऽविद्याबिंबत्वाद्युपहितस्यैव सगुणत्वप्रमापणादित्याशयेनाह किंच श्रुति।
रिति अपरब्रह्मविषया शुद्धब्रह्मान्यस्य सगुणत्वप्रमापिका। तात्विकत्वेति न च तात्विकत्वस्य श्रुत्यविषयत्वेपि बाधकाभावात् श्रुत्यर्थस्य तात्विकत्वमिति वाच्यं द्वैतमिथ्यात्वश्रुतेरे

तथा च तदपि व्यावर्त्तकधर्म्मं विनाऽनुपपन्नं न तत्साधनायालं अनवस्थाभियाक्कचिद्धर्मे विश्रांतौ पदार्थत्वमपि व्यभिचार्येव न च स्वस्यैव स्ववृत्तित्वान्न।
व्यभिचारः आत्माश्रयात् न चैवं दृश्यत्वस्यापि स्वस्मिन्नवृत्त्या भागासिद्धिः स्ववृत्तित्वाभावेपि स्वनिष्ठात्यंताभावप्रतियोगित्वस्य तत्रासिद्धत्वाप्रयोजकस्या।
भावात् तस्मान्नानुमानं ब्रह्मसमसत्ताकधर्मे प्रमाणं किंच श्रुतिरपरब्रह्मविषया निर्धर्मकश्रुत्यनुरोधेन विषयभेदस्यावश्यकत्वात् न च सगुणातिरिक्तस्य परब्र
ह्मणो ह्याप्यसिद्धिः त्वत्पक्षे तात्विकगुणवद्ब्रह्मवत्तस्याभावात् किं विषयत्वं च सगुणश्रुतेरिति वाच्यं तात्विकत्वपर्यंतस्य सगुणश्रुत्या अविषयीकरणात् निर्धर्मक
त्वश्रुत्या शुद्धब्रह्मसिद्धेश्च तदुक्तं अंतरधिकरणे कल्पतरुकृद्भिः निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ये मंदास्तेनुकंप्यंते सविशेषनिरूपणैः वशीकृते
मनस्येषां सगुणब्रह्मशीलनात् तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनमिति अत एव स्मृतिसूत्राभ्यां न विरोधः न च सगुणोपरः पराणामित्यादिस्मृत्या पराद
पि परत्वं स्मर्यते तथा च कथं सगुणवाक्यानामपरविषयत्वमिति वाच्यं जडापेक्षया परः किंचिज्ज्ञस्तदपेक्षया सर्वज्ञस्य शुद्धापेक्षया अपरस्यापि परत्वात् न
च सदेव सौम्येदमग्र आसीदसद्वा इदमग्र आसीदिति श्रुती अपि परापरब्रह्मविषये स्यातामिति वाच्यं तत्रेदमिति प्रपंचस्य प्रकृतत्वेन ब्रह्मपरत्वस्य वक्तुमशक्य
तया प्रपंचस्यैव पूर्वकारणात्मना सत्त्वं कार्यात्मना असत्त्वं विषयीकुरुतः नापि ग्रहणाग्रहणवाक्ये अपि परापरयागविषये ऐंद्रवायवं ग्रहं गृह्णा
तीत्यादिवत् षोडशिग्रहणवाक्यस्य यागपरत्वेपि अग्रहणवाक्यस्य तदभावबोधकतया यागविषयत्वाभावात्॥ ११ बबाधकत्वेन सगुणत्वांशे श्रुतेर्व्याव

हारिकप्रमाणत्वात् सिद्धेः सिद्धिसंभवात् तथा च निर्धर्मकश्रुतेर्विषयांतरासंभवेन शुद्धे निर्धर्मकत्वप्रमापकतेति भावः अंतरधिकरणे अंतस्तद्धर्मोपदेशादित्यधि
करणे। आविर्भवेत् अपरोक्षीभवेत् तथा च चित्तैकाग्र्यद्वारा उपासनावाक्यस्य शुद्धाविर्भावतात्पर्यकत्वात् शेषभूतसगुणवाक्येन निर्गुणवाक्यबाधकमिति शुद्धान्यत्र स
गुणत्वप्रमापकं तदिति भावः कार्यात्मना अभिव्यक्तिनामरूपात्मना असत्त्वमनभिव्यक्तत्वं अत एव ततो वै सदजायतेति शेषेण यस्मादभिव्यक्तत्वोक्तिः विषयत्वाभावादिति न
च ग्रहणवाक्यस्य यागविषयकत्वेपि अग्रहणवाक्यं ग्रहणशून्ययागविषयकमस्त्विति वाच्यं ग्रहणवाक्यप्रमितयागप्रतिषेधपरत्वसंभवे ग्रहणशून्ययागविषयकत्वेमाना
भावात् अपूर्वयागे ग्रहणस्याप्राप्तत्वेन तन्निषेधवैयर्थ्यात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामान्यमुखीव्याप्तिस्थले हि सामान्यरूपेण गृहीतव्याप्तिकस्य हेतोर्विशेषरूपेण पक्षे ज्ञानाद्विशेषरूपेण साध्यानुमितिरिति तु ध्येयं न हि निर्द्धर्मकतायामिति मयायुक्तौ का-
लसम्बन्धानंगीकारान्मां प्रति त्वदनुमानं मन्मते सिद्धसाधनग्रस्तमिति भावः हेत्वसिद्धिरिति सत्तादात्म्यप्रतियोगित्वादिकमपि तदुपहिते ब्रह्मणि न तु शुद्ध इति भावः न च
वेदांततात्पर्यविषयत्वेन पक्षत्वान्नासिद्धिरिति वाच्यं उपहितस्य वृत्तिविषयत्वमते तस्यैव तात्पर्यविषयत्वात्। स्वामिन्नेत्यादि। अवाप्तिस्तादात्म्यरूपा वाच्या तथा चात्म-
ताभेदेपि त्वन्मते तादात्म्यांगीकारान्न गुणानां धर्मत्वसिद्धिरिति भावः त्वयापीति। अपि नाम यथापि वक्तुमशक्यत्वं बोध्यं न चोत्तरकालानुवृत्तत्वया नित्येष्वपि प्रेप्साशक्तिश्च
संभवति मतद्वयेपीति वाच्यं तावता कालमात्रे गुणासम्बन्धसिद्धावपि मोक्षे तदसिद्धेः यत्कालानुवृत्तत्वया योयत्प्रेप्साशक्तिमान् स तदा तद्वानित्येव हि व्याप्तिः चर-
मवृत्तिपर्यंतं जीवस्य चरमवृत्तिपर्यंतं ईश्वरस्येति शेषः सामर्थ्याभावेनेति अविद्यासंबंधादिकं स्वनिष्ठमीशेन न त्यक्तुं शक्यते जीवनिष्ठेन तत्त्वज्ञानेनैव समुच्छे-

ईश्वरः सदावाप्तसमस्तकल्याणगुण इत्यत्र कालं व्याप्य आप्तगुणत्वस्य अस्माभिरप्यंगीकारात् न हि निर्द्धर्मकतायां सत्यां कालसंबंधोस्ति किंच शुद्ध-
स्य पक्षीकरणे हेत्वसिद्धिः उपहितस्य पक्षीकरणे अर्थांतरं स्वाभिन्नाप्तसमस्तकल्याणगुणत्वेन सधर्मकत्वायोगाच्च सिद्धसाधनाच्च कल्याणगुणाना-
मानंदादीनां नित्यत्वेन तत्प्रेप्सायास्तत्र सामर्थ्यस्य च त्वयापि वक्तुमशक्यत्वाच्च अत एव प्रेप्सादिकं प्रज्ञानघनत्वादिति निरस्तं सदासक्तसमस्तदोषत्वे सा-
ध्ये चरमवृत्तिपर्यंतं तत्त्यागे सामर्थ्याभावेन हेत्वसिद्धेः यदा तु तत्सामर्थ्यं तदा त्यक्तदोषत्वमिष्टमेव प्रकारवत्त्वादौ साध्ये प्रयोजकत्वमपि न चाधिष्ठानत्वसं-
दिग्धत्वाद्यनुपपत्तिरेवानुकूलस्तर्कः अधिष्ठानत्वे हि स्वारोपितव्यावर्त्तकवत्वं तत्र कल्पिताकल्पितसाधारणमित्युक्तत्वात् स्वज्ञानाबाध्यत्वविशिष्ट-
धर्मं विना तस्यानुपपत्त्यभावात् संदिग्धत्वमपि व्यावर्त्तकेन कल्पितेनाकल्पितेन वा रूपेण अनिश्चिततयैवोपपद्यत इति तस्यापि नानिश्चितस-
त्यधर्मं विनानुपपत्तिः एवं दुःखानात्मकत्वं दुःखव्यावर्त्तकस्वरूपतयैवोपपन्नं कदाचिद्वक्तव्यमन्यथा अनवस्थानापत्तेः न हि व्यावर्त्तकधर्मोपि के-

द्यत्वात्। यं प्रति हि यदज्ञानमावृणोति तदीयज्ञानेनैव तदज्ञानं तत्प्रयुक्तं चोच्छिद्यते यदा। जीवस्य तत्त्वधीकाले इष्टमेवेति जीवेश ((वलान्वयी येन स्ववृत्तिः स्यात्॥
त्वाविद्यादेः जीवनिष्ठतत्त्वज्ञानेनोच्छेदादिति शेषः प्रकारवत्त्वादौ स्वज्ञानाबाध्यप्रकारवत्त्वादौ स्वारोपितव्यावर्त्तकवत्वं स्वारोपिताद्यावर्त्तकस्तदन्यूनसत्ताको योध- त्म॰
र्मस्तद्वत्वं अनवस्थानापत्तेः। व्यावर्त्तकधर्मेष्वपि व्यावर्त्तकधर्मांतरं तत्रापि तदंतरमित्यनवस्थापत्तेः। ननु कस्यचिद्व्यावर्त्तकस्य स्ववृत्तित्वस्वीकारान्नानवस्था तत्राह २४७
न हीति। केवलान्वयीति केवलान्वयित्वान्यथानुपपत्त्या त्वया मेयत्वादेः स्ववृत्तित्वं स्वीकृतं मया तु केवलान्वय्येव न स्वीक्रियते मेयत्वे मेयत्वांतरं स्वीकृत्य मेयत्वेन रूपेण मे-
यसामान्यस्य केवलान्वयित्वं बोध्यते व्यावर्त्तकं शुक्तित्वादिकं तु न तथापि केवलान्वयीति न स्ववृत्ति घटाभावादेः स्ववृत्तित्वमपि व्याहतं आलोके आलोक इत्यादिवत् घटाभावे घटा-
भाव इत्यादेरपि प्रातीतिकाधेयत्वविषयकत्वात् अन्यथा राहोः शिर इत्यादेरपि प्रतियोगिसमानसत्ताकसम्बन्धभानत्वापत्तिः ऐक्ये सम्बन्धस्येवाधेयत्वस्यापि असंभवस्तु स्पष्टः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एतेन एषणात्यागात् पूर्वमसतो महिम्नो नित्यत्वायोग इति परास्तं लक्षणापत्तिरिति नच ब्रह्मकर्मकं मुख्यमध्ययनवेदनं च ब्रह्मकर्तृकमेवेति न लक्षणेति वाच्यं मुख्यत्वमध्य
यनादिपदशक्यत्वमुत्कृष्टत्वं वा नाद्यस्तस्य पदवाच्यत्वाप्रयोजकत्वात् आद्ये तु व्यासादिकर्तृकाध्ययनवेदनयोरपि मुख्यत्वेन ब्रह्ममात्रलाभाय व्यासादिव्यावृत्तरूपेणाव
श्यकत्वात् अन्यथा पाचकादिपदमुख्यार्थत्वमपि ब्रह्मभिन्ने न स्यात् मौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति श्रुतब्रह्मविन्मात्रस्यैव मु
ख्यब्राह्मणत्वोक्तेश्च नच ब्राह्मणा विविदिषंतीत्यनेन बहुवचनांतेनोक्तस्य ब्रह्मविद एकवचनांतेनोक्त्यसंभव इति वाच्यं ब्रह्मविदो बहुत्ववैशिष्ट्याविवक्षायामेकवचनांत
प्रतिपाद्यतासंभवात् अन्यथा क्वाप्येकवचनं न प्रयुज्येत तस्मात्तमेतं वेदानुवचनेन एतमेव विदित्वा मुनिः एतमेव प्रव्राजिनः अयमात्मायं लोकम स एव नेति नेत्यात्मेत्यादिपूर्ववाक्यो

नच सर्वस्य वशीत्यादौ ब्रह्मणः प्रकृतत्वेन तद्गतगुणपरत्वमिति शंक्यं योयं विज्ञानमयः प्राणेष्वित्यादिवाक्योक्तजीवस्वरूपानुवादेन ब्रह्मस्वरूपता
बोधनपरत्वेन ब्रह्मगतगुणपरत्वाभावात् ब्राह्मणपदस्य तदधीते तद्वेदेति सूत्रविहिताणंतस्य ब्रह्मवित्प्रतिपादकतया ब्रह्मपरत्वे लक्षणापत्तेश्च
किंच सगुणवाक्यानामौपाधिकगुणविषयत्वेन स्वाभाविकनिर्धर्मकत्वश्रुतेर्न विरोधः नचौपाधिकत्वस्य सोपाधिकाध्यस्तरूपत्वे श्रुत्यप्रामाण्या
पत्तिः वक्ष्यमाणसत्यत्वश्रुतिविरोधः उपाधिकल्पितरूपत्वे तु उक्तनित्यत्वश्रुतिविरोधः अंतःकरणादिरूपोपाधिसृष्टेः प्रागेव ऐक्षितृत्वादिश्रुतेरु
पाध्यसंभवश्चेति वाच्यं मायाविदर्शितमायानुवादिवाक्यवत् स्वतोभ्रमजनकत्वाभावेन अप्रामाण्यानापत्तेः सत्यत्वश्रुतेरन्यथा नेष्य
माणत्वात् नित्यत्वश्रुतेरन्यथार्थस्योक्तेः सृष्टेः पूर्वमंतःकरणाभावेपि अविद्याया उपाधेः सत्त्वाच्च न चौपाधिकत्वे स्वाभाविकी ज्ञानबल
क्रिया चेत्यनेन न विरोधः अस्मदादाविव भौतिकौपाधिकत्वाभावेन योगिष्विव योगार्जितत्वाभावेन स्वाभाविकत्वोक्तेः नच संकोचकाभावो निर्गुणवाक्य
स्यैव संकोचकत्वात् नच स्वाभाविकज्ञानसमभिव्याहारविरोधः सार्वज्ञ्यादिरूपाविद्यापरिणतस्यैव ज्ञानपदेन विवक्षितत्वात् बाधकसत्त्वासत्त्वाभ्यां सम
भिव्याहारेपि वैरूप्यांगीकरणात् यावको ब्राह्मणा इतिवत् किंच सगुणवाक्यानां न गुणसत्यत्वबोधकत्वं सत्यत्वस्यापदार्थत्वात् नच नित्यत्वोक्तिसामर्थ्याद्वि
षयाबाधलक्षणस्य प्रामाण्यस्यौत्सर्गिकत्वात्सत्यः सोस्य महिमेत्यादिश्रुतेः स्वरूपतश्च तत्सिद्धिरिति वाच्यं प्रथमस्यान्यथासिद्धेरुक्तत्वात्॥ क्तेः मुख्यत्वमेव एव नित्यो

महिमेत्यस्यार्थ इति भावः सोपाधिकाध्यस्तरूपत्वे सोपाधिकेध्यस्तरूपत्वे उपाधिकल्पितरूपत्वे उपाधिना जनितत्वरूपत्वे स्वतो भ्रमेति प्रामाण्यस्यैवाप्रामाण्यस्यापि मानांतराग्र
हीतविषयकत्वघटितत्वमिति भावः अन्यथा नेष्यमाणत्वात् व्यावहारिकसत्यपरत्वेन वक्ष्यमाणत्वात् भौतिकोपाधिकत्वेति भूतपरिणामोपाधिकृतत्वेत्यर्थः अस्मदादेर्ज्ञानेच्छादिकं
भौतिकमनःपरिणामो नेशस्येति भावः सामर्थ्यादिति। अविनाशित्वरूपनित्यत्वं मिथ्याभूतस्यानुपपन्नं ज्ञाननिवर्त्यत्वादिति भावः स्वरूपतः गुणानां ब्रह्मस्वरूपाभिन्नत्वात् भ्रमज
नकदोषासत्त्वे सर्वं ज्ञानं साक्षिग्राह्यप्रमात्मकमन्यथा सर्वत्र ज्ञाने प्रमात्वसंशयापत्तेर्ज्ञानोत्पत्तिज्ञप्तिनियामकस्यैव लाघवेन प्रमोत्पत्तिज्ञप्तिनियामकत्वादिति तर्कस्त्वयोत्सर्गशब्दे

२ अ॰ सि॰ टी॰ ल॰ उ॰ ३८

नचग्रहणाभावनित्यानुवादेनापूर्वयागपरत्वमितियुक्तं यदेव हि ग्रहणवाक्ये विधीयते तस्य प्रतिषेधोऽग्रहणवाक्ये मुख्यार्थः निर्गुणवाक्ये तु अद्वैतश्रुतिविरोधान्न प्रतिषेधपरत्वं। किंतु प्रतिषेधोपलक्षितस्वरूपपरत्वमिति बोध्यं प्रतिपादकेति आनंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यादिश्रुतीत्यर्थः वाक्याविरोधः सगुणनिर्गुणवाक्ययोरविरुद्धविषयक। त्वं अनित्यत्वमात्रमिति। निर्गुणश्रुत्येत्यादिः असिद्धेरिति श्रुत्येत्यादिः गुणसत्यताबोधकश्रुतेरन्यथानयनस्य वक्ष्यमाणत्वेन श्रुत्या गुणसत्यत्वासिद्धिरिति भावः ननु समानुमानादि ना गुणसत्यत्वसिद्धिस्तत्राह उपायांतरेति समानमिति ममापि निर्गुणवाक्यस्य कैवल्यदशायां निर्गुणत्वबोधकत्वेन स्वावच्छेदककालावच्छेदेन स्वसमानाधिकरणात्यंताभावप्रतियोगित्वरूपमिथ्यात्वस्य सगुणत्वे बोधकत्वाभावेऽपि विद्वान्नामरूपाद्विमुक्त इत्यनेन ज्ञाननिवर्त्यत्वरूपस्यानुमानेनोक्तप्रतियोगित्वादिरूपस्य मिथ्यात्वस्य बोधनात् सगुण

नन्वेवमसन्नेव स भवति असद्ब्रह्मेति वेद चेदिति श्रुतिरपि नासत्त्वसिद्ध्यर्था किंतु शून्यतापत्तिरूपपरममोक्ष—— परेति स्यात् इति चेन्न शून्यताया अपुरुषार्थत्वात् आनंदावाप्तिरूपमुक्तिप्रतिपादकविरोधाच्च यद्वा इदानीं सगुणं दशांतरे निर्गुणमिति वाक्याविरोधः न चैतावता अनित्यत्वमात्रं गुणा। नां न त्वदभिमतमिथ्यात्वसिद्धिरिति वाच्यं त्वदभिमततात्त्विकत्वस्याप्यसिद्धेः उपायांतरानुसरणं च समानं यत्तु ब्रह्मेदानीं सत् दशांतरे त्वसदित्यापद्येतेति तन्न दशांतरे निर्गुणत्ववदसत्त्वस्याबोधनेनाप्रसंगात् न च ज्ञानं नित्यं क्रिया नित्या बलं नित्यं परात्मनः एष नित्यो महिमा ब्राह्मणस्येत्यादि। श्रुत्या ब्रह्मज्ञानादीनां नित्यत्वप्रतिपादनात् सगुणत्वमिति वाच्यं ज्ञानादीनां स्वरूपतया गुणतासिद्धेः स्वरूपातिरिक्तानां तु चरमसाक्षात्कारपर्यंतस्थायितया नित्यत्वोपचारात् अपाम सोमममृता अभूमेत्यादौ अमृतशब्दस्य आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति पौराणिकोक्तामृतत्वपरत्ववत् अत एव एष नित्यो महिमेत्यादिवाक्यस्य तैत्तिरीयशाखागतस्य नित्यगुणपरत्वमिति निरस्तं बृहदारण्यकगतस्य तु स एष। नेति नेतीति वाक्यप्रतिषिद्धसर्वोपाधिकरूपस्य महिम्नः त्यक्तसर्वैषणपुरुषगतस्य प्रतिपादनेन ब्रह्मगतगुणपरत्वाभावात्॥ ९ ६ ९॥

ते मिथ्यात्वसिद्धिरित्यर्थः न च तर्हि दशाविशेषे निर्गुणत्वाश्रयणं व्यर्थं मिथ्या सगुणत्वदशायामपि तात्त्विकनिर्गुणत्वसंभवादिति वाच्यं त्वत्परितोषाय सगुणवाक्य राम॰
स्य निर्गुणवाक्याबाध्यत्वस्वीकारात् विद्वानित्यादिवाक्यानुमानाद्यविरोधाय सगुणवाक्ये व्यावहारिकं प्रामाण्यं न तु तात्त्विकमिति तु स्थिरमेवेति भावः। अबोधनेन तात्पर्य २४८
तोऽप्रतिपादनेन। तद्धैक आहुरसदेवेदमग्र आसीदित्यादि कं तु कथमसतः सज्जायेतेत्यनेन दूषणार्थमनुवाद इति भावः ज्ञानादीनां। ज्ञानमहिमादीनां स्वरूपातिरिक्तानां
क्रियाबलादीनां क्रियाकृतिः जगद्धारणानुकूलप्रयत्नस्तस्यैव वक्ष्यमाणनित्यत्वसंभवात् बलं विचित्रकार्यानुकूलशक्तिः वाक्यप्रतिषिद्धेति पूर्ववाक्यप्रतिषिद्धेत्यर्थः पुरुषगतस्य
पुरुषेऽभिव्यक्तस्य एतद्स्मै वै तत्पूर्वे विद्वांसः प्रजां न कामयंते इत्यादि तेह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति श्रुत्यात्याभिव्यक्ति।
मतिपुरुषेत्यक्तैषणात्वोक्तेरात्मस्वरूपमहिम्नस्त्यक्तैषणपुरुषाभिव्यक्तत्वमिति भावः॥ ९ ६ ९॥

सर्वथाप्युपकारनैरपेक्ष्येण साधनानामनतिदेशादुपकारस्य वैतुष्यस्य कृष्णलेष्वसंभवात्तत्साधनावघातस्याप्यनतिदेश इति दशमप्रथमे स्थितं ननु न कृष्णलो-
दाहरणं युक्तं यदि हि कृष्णलस्य प्रदेयं प्रति प्रकृतित्वं स्यात्तदाग्नेययागप्रदेयपुरोडाशप्रकृतिव्रीहिधर्माणामवघातादीनामतिदेशः संभाव्येत घृते श्रपयतीत्यत्र हि घृताधिकरणा-
कादिसंयोगमात्रं विधीयते विक्लित्त्यभावेन मुख्यश्रपणासंभवात् तत एव चरुशब्दः कृष्णलद्रव्यकयागे अग्निसंयोगिद्रव्यकत्वसादृश्याद्गौणः सन्नाग्नेयप्रकृतित्वसाध-
कविशदत्वसादृश्यापोद्बलक इत्यष्टमे उक्तं तादृशं च श्रपणं कृष्णले चरुरूपद्रव्यान्तरं नोत्पादयति मानाभावात् । न च व्रीहिधर्माणामनतिदेशे निर्वपेदित्युवा-
दानुपपत्तिरिति वाच्यं प्राकृतविहितनिर्वापाभावेपि लौकिकार्थिकतत्सत्त्वे नानुवादसंभवात् तथा च कृष्णलस्य प्रदेयत्वेन प्रदेयधर्माणां पर्यग्निकरणादीनां
प्राप्तावप्यवघातादीनामप्रसक्ततया वैतुष्यादिफलाभावप्रयुक्तो न तद्बाध इति चेत्सत्यं तथापि कृष्णलस्य प्रदेयप्रकृतित्वं कृत्वा चिंतेयं तथा च स्थलांतरे तत्फ-
लं बोध्यं तद्यथा सवनीयहविरंतर्गतलाजाख्यपरिवापे लाजाप्रकृतित्वेन प्राप्तव्रीहीणां वैतुष्यासंभवादवघातस्य बाधः वैतुष्यं हि प्रकृतौ प्रदेयपाकसाधन-
प्रयोजकं प्रकृते च तस्य प्रदेयपाकविरोधित्वेनासंभवः स तुषद्रव्यस्यैव भर्जनेन लाजानिष्पत्तेः भर्जनोत्तरमपि नखादिना वितुषीकरणं नावघातेन लाजात्व-
व्याघातापत्तेः । तस्मात्पाकसाधनवैतुष्यासंभवेन तत्रावघातबाध इति बोध्यं तार्तीये तृतीयाध्यायोक्ते अप्राप्तबाधे श्रुत्यादिना शीघ्रप्रवृत्तेन मंत्रादेर्विनि-

एवं तार्तीयेपि अप्राप्तबाधे गार्हपत्यमिति द्वितीयाश्रुत्यनुसारेणेंद्रशब्दयुक्तमंत्रलिंगस्य गार्हपत्ये गौणत्वादिकमेव व्याकरणेपि
परेण पूर्वस्य नित्येनानित्यस्येत्यादि बाध उक्तः तत्रापि संकोचः ॥ २२ ॥ एव

योगेनाकांक्षाशांत्या लिंगादेरप्रवृत्तिरप्राप्तबाधः तदुक्तं न्यायरत्नमालायां क्लृप्तस्य शास्त्र-
स्य तु कल्पनं यन्निरुध्यते मूलनिकृंतनेन क्लृप्तेन शीघ्रेण फलापहारादप्राप्तबाधं तमुदाहरंति गार्हपत्यमितीति ऐंद्र्या गार्हपत्यमुपतिष्ठत इति वाक्यगतेत्य-
र्थः इंद्रशब्दयुक्तमंत्रलिंगस्य । कदाचन स्तरीरसि नेंद्र सश्चसि दाशुष इत्यस्या ऋचो र्थबोधकत्वस्य गार्हपत्ये गौणत्वादिकं । इंद्रपदस्येंद्रसदृशत्वरूपेण गा-
र्हपत्ये गौण्या वृत्त्या संपादनीयत्वमादिपदादिदि परमैश्वर्य इति धातुपाठाद्योगवृत्त्या संपादनीयत्वं संभवति हि गार्हपत्यस्याप्यन्यापेक्षयैश्वर्यत्वं श्रुति लिं-
गाधिकरणं तु प्रथमपरिच्छेद एव चर्चितं परेणेति यद्यप्यतुल्यबलयोर्विरोधे पूर्वेणापरस्यापि बाधः यथा सुग्लइत्यादौ श्याद्व्यधेत्याकारांतलक्षणो णप्रत्य-
यमनुपसर्गे सावकाशत्वात् दुर्बलं परमपि बाधित्वा आतश्चोपसर्गे इति पूर्वः कप्रत्यय एव भवति तथापि तुल्यबलयोर्विरोधे परेण पूर्वस्य बाधः यथा वृ-
क्षाभ्यामित्यत्र सुपि चेति दीर्घत्वं सावकाशं वृक्षेष्वित्यत्र बहुवचने झल्येदित्येत्वं सावकाशं वृक्षेभ्य इत्यत्रोभयोर्विरोधे परेणैत्वेन दीर्घत्वस्य पूर्वस्य बाधः
यद्यपि तुल्यबलयोः सत्प्रतिपक्षवदन्योन्यकार्यविघातकत्वमेव युक्तं न त्वेकस्यापरकार्यविघातकत्वं तथापि विप्रतिषेधे परं कार्यमिति वचनबलात्परं का-
र्यमिति बोध्यं अत एवोक्तवचनस्य महाभाष्ये प्राप्तप्रापकत्वरूपाविधायकतोक्ता नित्येनेति रंधयतीत्यत्र रधिजभोरचीति नुम् कृताकृतप्रसंगित्वान्नित्यः अत उपधाया इति वृद्धि-
रनित्या नुमि कृते अकारस्यानुपधात्वादप्राप्तेः अत्र पूर्वोपि नुमेव भवतीति नित्येनानित्यस्य बाधः ॥ ❦ ॥

CC-0. In Public Domain. Digitization by eGangotri

अ॰ सि॰ सच्चव्यवहारकालावाध्यविषयकत्वरूपप्रमात्वस्य तथात्वव्यवस्थापकत्वस्यैव व्यवहारकालीनप्रवृत्त्यादिप्रयोजकत्वात्तथाचनत्रिकालावाध्यविषयकत्वमसि
टी॰ ल॰ द्धिरित्याहोत्सर्गाख्यतर्कस्येति अविरोधादिति अनेनैवस्वरूपाभिन्नत्वहेतुरप्यपास्तः स्वरूपाभिन्नगुणस्यतात्विकत्वेनेष्टत्वादितिवोध्यं अत्रसत्यंज्ञानमित्यादौ॥
उ॰ तत्रैवसगुणवाक्य इव अतात्विकविषयकत्वं अन्यश्रुतिविषयसत्तान्यूनसत्ताकविषयकत्वं यथाश्रुते आत्माविषयकश्रुतिमात्रस्यमयाऽतात्विकविषयक
३९ त्वस्वीकारात्मांप्रतिकर्मकांडश्रुतेरतात्विकाविषयकत्वनिदर्शनस्यानुपपत्तेः। शास्त्रविरोधे शास्त्रस्यमानांतरेणविरोधे उभयप्रामाण्यस्य शास्त्रतद्विरुद्ध
र्थकमानयोः प्रामाण्यस्य प्राप्तबाधइति। प्राप्तस्यप्रवृत्तस्यप्रामाण्यस्ययद्विषयांशे प्रामाण्यनिश्चयोयस्य विशेषदर्शनस्याभावात्तेन विशेषदर्शनेन
तद्विषयांशे तद्प्रामाण्यनिश्चयः प्राप्तबाधः लिंगादेस्त्वप्रवृत्तस्यैवश्रुत्यादिनातद्विषयांशेऽप्रामाण्यनिश्चयः चोदकस्य अतिदेशशास्त्रस्य। कृ
ष्णलाद्याविति। उपकारप्रत्यभावेनसाधनातिदेशादवघातादौप्रकृतौ कृप्तस्यवैतुष्यादिरूपदृष्टोपकारस्यकृष्णलादावसंभवेनावघातवर्जंप्रकृति
वत् कुर्यादितिसंकोचः प्राजापत्यंघृतेचरुंनिर्वपेत् शतकृष्णलमायुष्काम इति विहितेषुस्वर्णमाषरूपकृष्णलद्रव्यकचरुष्ववघातोस्तिनवेति

उत्सर्गाख्यतर्कस्यव्यवहाराबाधमादायोपपादितत्वात् सत्यः सोस्यमहिमेत्यादौमहिम्नः स्वरूपरूपत्वादविरोधात् धर्मत्वेतुब्रह्मसाक्षा
त्कारेतरानिवर्त्यत्वगुणयोगेनसत्यपदप्रवृत्त्युपपत्तेः नचैवंसत्यंज्ञानंतत्त्वमसीत्यादिश्रुत्युक्तब्रह्मसत्त्वैक्यादिकमपितात्विकंनस्यादितिवा
च्यं निर्गुणश्रुतिविरोधस्यात्रतत्रैवाभावात् ननुश्रुत्योर्विरोधेनैकस्य अतात्विकविषयकत्वं शास्त्रविरोधेसंकोचविकल्पादिना उभयप्रामाण्य
स्यपूर्वतंत्रेव्याकरणेचनिर्णीतत्वात् तथाहिदशमाध्यायस्थेप्राप्तबाधेप्रकृतिवत्कुर्यादित्यादिरूपक्लृप्तस्यचोदकस्यकृष्णलादाववघातवर्जमित्या
संशयेवैतुष्यरूपप्राकृतोपकारासंभवेपिप्रकृतिवत् कुर्यादित्यतिदेशप्रामाण्यायादृष्टोपकारकल्पनसंभवेनातिदेशादव ((दिरूपः संकोचएव॰ ॥१
घातोस्त्येवेति प्राप्तेपरशुनाच्छिंद्यादित्यादाविव शतकृष्णलेनायुः कुर्यादित्यादावपिकरणगतोपकारएवप्रथममाकांक्षोदयादुद्घमननिपातनादेः परशा राम॰
विवोपकारविशेषस्यशतकृष्णलेप्राप्तिंविनातदाकांक्षाशांत्यसंभवादुपकारविशेषस्यैवविकृतिषुप्रथममतिदेशः पश्चादेवतत्साधकाकांक्षायामुद्य २४९
मननिपतनादौहस्तादेरुपदेशइवावघातादेरतिदेशः एवंविकृतिभावनया प्रथमंप्रकृतिभावनोपस्थितौतद्व्यवहितान्वयित्वेनोपकारस्यैवप्रथ
मोपस्थितिरूपः सन्निधिरेवंप्रधाननिष्ठायाः फलाद्यनुकूलयोग्यतायाः साधनाकांक्षायामेवातिदेशस्तत्साधनत्वंचसाक्षात्पदार्थानांनास्त्येवस्वाग्नि
कत्वात् किंतुदृष्टादृष्टोपकारद्वारेत्युपकारस्यैवसाक्षात्प्रधानगतयोग्यताजननेयोग्यत्वमित्याकांक्षासन्निधियोग्यत्वरूपोपकारस्यैवप्रथममतिदेशः पश्चात्तत्साधनाकां
क्षयापदार्थातिदेशोऽथवापदार्थविशिष्टोपकाराणामेकदैवातिदेशः परशुनाच्छिंद्यादित्यादावपिसाधनविशिष्टोद्यमननिपातनादाविवप्रकृतेपिविशिष्टे आकांक्षासंभवात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा च यद्यपि नार्षेयं वृणीत इत्यादाविव विकल्पस्यान्याय्यत्वात्पर्युदास एव नतौ पशौ करोतीत्यत्रार्थः संभवति अथैवं पशुप्रकरणस्थनतौ पशाविति वाक्यानुधावनमाचार्याणां पर्युदाससिद्ध्यर्थमग्रे व्यर्थमिति चेन्न उक्तयुक्तेरिव पशुप्रकरणस्थोक्तवाक्यस्यापि पर्युदाससाधकत्वमित्याशयात् तथापि अग्नये आज्यस्यावदीयमानस्यानुब्रूहि सोमायाज्यस्यावदीयमानस्यानुब्रूहि अग्नये आज्यं प्रस्थितं प्रेष्य सोमायाज्यं प्रस्थितं प्रेष्य होतायक्षदग्निराज्यस्य जुषतां हविर्होतर्यजेत्यादिप्रैषाणां पशुप्रकरणे आम्नानात्तेषां च लिंगादाज्यभागमात्रांगत्वात् तत्कारणवानां शतपथब्राह्मणे सोमेग्नीषोमीयपशुप्रकरणे उत्तमं जुहूप्रयाजमिष्ट्वा ध्रुवामेवाग्रेभिधारयति तस्या हि प्रथमावाज्यभागौ यक्ष्यन्भवतीत्युक्तत्वात्पशुप्रकरणे कृताकृतावाज्यभागाविस्यापस्तंबोक्तेश्चाज्यभागयोरपि पशौ करणप्रतीतेस्तदंशे तिदेशप्रवृत्तेरावश्यकत्वेन विकल्पस्यापरिहार्यत्वात् पर्युदासलक्षणायां मानाभावेन प्रतिषेध एव नतौ पशाविति वाक्यार्थ इति ध्येयं इत्युक्तमिति तत्रापि संकोच एवेति शेषः उक्तपर्युदासप्रतिषेधशास्त्राभ्यामपि अतिदेशशास्त्रस्य विधिशास्त्रस्य च संकोच इत्यर्थः सर्वथा बाधायोगे दृष्टोक्तिं प्रमाणमाह तथा चोक्तमिति।

प्रकृतिवत् कुर्यादाज्यभागौ तु न कुर्यादिति वाक्यभेदेन प्रसज्यप्रतिषेधार्थकत्वमेव युक्तं तत्र पशावाज्यभागयोरन्येनाप्रसक्तेः शास्त्रप्रसक्तस्य सर्वथा बाधायोगाद्विकल्प इत्युक्तं तथा चोक्तं को हि मीमांसको ब्रूयाद्विरोधे शास्त्रयोर्मिथः एकं प्रमाणमितरत्त्वप्रमाणं भवेदितीति चेत् न तत्र शास्त्रयोः प्रामाण्ये समानकक्षतया एकतरस्य आत्यंतिकबाधायोगात् संकोचेन विकल्पेन वा पाक्षिकं प्रामाण्यमाश्रितं इह त्वेकतरस्य तत्परतया प्रबलत्वात् इतरस्य चातत्परत्वेन दुर्बलतया वैषम्यात् यत्तु नतौ पशौ करोतीत्यादौ विकल्प उक्तस्तत्र पशुप्रकरणस्थस्य पाशुकप्रकृतिवद्वैकवाक्यतया पर्युदासार्थत्वात् दर्शपौर्णमासप्रकरणस्थस्य तु पशावाज्यभागौ नस्तः अत्र तौ स्त इति स्तुत्यर्थत्वान्न वा

अप्रमाणं सर्वथाऽप्रमाणं समानकक्षतयेति। अतिदेशशास्त्रस्य कल्पनीयत्वेपि नार्षेयं वृणीत इत्यादिप्रत्यक्ष ((त्तिकार्यैर्विकल्पस्वीकृतेपि न दोषः॥

श्रुतिसमकक्षत्वमुक्तं श्रुतेरार्षेयवरणप्रसंजकातिदेशसापेक्षप्रवृत्तिकत्वेनातिदेशोपजीवकत्वादिति भावः संकोचेन विषयसंकोचेन पाक्षिकं संकुचितविषयघटितं तत्परतयेति पश्चात्प्रवृत्तत्वादेरप्युपलक्षणमिदं अपच्छेदाधिकरणादौ पश्चात्प्रवृत्तत्वादेर्बलवत्ताबीजस्योक्तत्वाद्विकल्पः प्रतिषेधमूलकविकल्पः प्रकरणस्थस्येति नतौ पशावित्यस्येति शेषः दर्शपूर्णमासयोरेतच्छ्रूयते तत्र कः प्रसंगो यत्सोमे स्यादित्यादिग्रंथेन हि भाष्यकारैर्न सोम इति वाक्यस्यैव पर्युदासार्थत्वं निराकृतमन्यथा तत्र कः प्रसंगो यत्पशौ सोमे च स्यादित्युच्येत तस्मात्पशावपि नतौ पशावित्यस्य श्रवणं मन्यंते भाष्यकारा एवं सूत्रकारस्यापि नतौ पशावित्यत्र पर्युदासनिरासेन तात्पर्यं किंतु न सोम इत्यत्र अत एवापूर्वे चार्थवादः स्यादित्येव सूत्रितं अपूर्वे विकृतिभिन्ने सोमे न सोम इति वाक्यं अर्थवाद एव स्यान्न प्रतिषेधस्य पर्युदासस्य वा बोधकमित्यर्थः ननु नतौ पशाविति वाक्यस्य पशुप्रकरणस्थत्वेप्युक्तप्रैषमन्त्रबलादेव विकल्पावश्यकत्वेन पर्युदासलक्षणायां मानाभावेन प्रतिषेधार्थकत्वावश्यकत्वात्पर्युदासार्थक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰सि॰ इत्यादीत्यादिनांतरंगेणवहिरंगस्यवाधः यथा अशिश्रिपदडुद्रुवदित्यादावंतर्भूतिचङ्पेक्षत्वादियङुवङावंतरंगौवहिर्भूतणिजपेक्ष—त्वादहिरं
टी॰ल॰ गंलघूपधलक्षणंगुणंवाधेतेतत्रापिसंकोचइतिअत्रेदंवोध्यंव्यक्तिमात्रस्यपदार्थत्वपक्षेप्रतिव्यक्तिसौत्रविधेर्भेदात्तत्तव्यक्त्युद्देशेनप्रवृत्तयोःशास्त्रयोर्व्यक्त्यंतरेप्रवृत्त्यभावात्
उ॰ परेणपूर्वस्यसर्वथावाधएवनसंकोचः यथाजुहतात् त्वमित्यत्रपरत्वात्तातङि कृतेस्थानिवद्भावेनप्राप्तंधित्वंनभवति अतएवाहुर्वैयाकरणाःसकृद्गतौविप्रतिषे
४० धेयद्वाधितंतद्वाधितमेवेतिअथास्मिन्पक्षेपूर्वसूत्रानारंभएवानुमीयतेविद्वत्तंचेतन्महाभाष्यादावितिचेन्नतथाप्यप्राप्तवाधः सर्वात्मनास्थितएव एवंकदा
चनेत्यादिमंत्रे इंद्रशब्दस्यमुख्यार्थत्यागः सर्वथावाधएवयथाचतत्रगौणाद्यर्थपरत्वंस्वीक्रियतेअध्ययनविधिगृहीतवेदमात्रामात्रस्याप्यवैयर्थ्या
त्तथानिर्गुणश्रुत्यात्रह्मगुणवैशिष्ट्यांशेतात्त्विकप्रामाण्यात् प्रच्यावितस्यापिसगुणवाक्यस्यसगुणत्वेनब्रह्मोपासनपरत्वंब्रह्मणिव्यावहारिकगुणवै
शिष्ट्यपरत्वंवास्वीक्रियतएवेतिसाम्यप्रकृतिवत् कुर्यादार्षेयवरणवर्जमितिआर्षेयवरणभिन्नप्राकृतांगजातेनमहापितृयज्ञरूपायांविकृतेरुपकुर्यादि
त्यर्थः।एकवाक्यतयापदैकवाक्यतयाआर्षेयवरणव्यतिरिक्तस्यनार्षेयंवृणीतइतिवाक्यलक्षितस्यप्रकृतिवत्कुर्यादितिवाक्यार्थेप्रवेशः तेननञर्थधात्वर्थस्यप्र।

दशमेविकृतिभूतमहापितृयज्ञप्रकरणस्थेनार्षेयंवृणीतइत्यादिवाक्येप्रकृतिवत्कुर्यात् आर्षेयवरणवर्जमितिमहापितृय
ज्ञीयप्रकृतिवच्छब्दैकवाक्यतयापर्युदासार्थत्वमेवेत्युक्तंयत्रतुप्रकृतिभूतदर्शपौर्णमासप्रकरणस्थाज्यभागविधायकवाक्यसन्निहितेनतौपशो
करोतीत्यादौपाशुकप्रकृतिवच्छब्दैकवाक्यतायोगेनपर्युदासार्थकत्वासंभवात्।।एकवाक्यतयान्वयस्याव्युत्पन्नत्वेपिनक्षतिः नार्षेयंवृणीतइ
त्यत्रोक्तलक्षणायांमानाभावात् प्रतिषेधएवतथाचार्षेयवरणतदभावयोर्विकल्पइतिप्राप्तेः षोदोषदुष्टविकल्पापेक्षयोक्तलक्षणायाएवयुक्तत्वात्प
र्युदासएवनञ् समासाभावस्तुपाणिनेर्विभाषाग्रहणादुपपन्नएवव्यासस्समासयोरैक्यार्थाच्च अतएववावचनानार्थक्यमितिकात्यायनोक्तमनादेयंवाक्य
विशेषस्यसमासस्यैवनामसंज्ञेतिनियमादार्षेयंवृणीतइत्यस्यानामत्वेनतेनसहनञ् समासाप्राप्तेश्चेतिदशमाष्टमेस्थितं प्रकरणस्थाज्यभागविधायके राम॰
ति।प्रकरणस्थंयदाज्यभागविधायकंतदित्यर्थः।एकवाक्यतायोगेन एकवाक्यतायाअयोगेनस्वसमभिव्याहृतपदार्थएवपदार्थस्यान्वयात्भिन्नप्रकरणस्थ २५०
वाक्यार्थेआज्यभागान्यरूपस्यनञर्थस्यनान्वयसंभवइतिभावः वस्तुतस्तुतत्रतस्यान्वयासंभवेपिचतुर्धाकरणवाक्ययोरिवदूरस्थयोरप्युक्तवाक्य
योः सामान्यविशेषरूपाभ्यामेकस्यवाक्यार्थस्यवोधकत्वेनैकवाक्यतासंभवति अतएवातिदेशवाक्यस्यसंकोचोपिसिध्यतिदर्शपौर्णमासप्रकरणस्थ
वाक्येनाज्यभागान्यप्राकृतानांकर्त्तव्यतावोधकेनतत्रैवातिदेशस्यविशेषरूपेणतत्तदंगकर्त्तव्यतावोधकस्यतात्पर्यग्रहादतएवतादृशपर्यु
दासवाक्येआख्यातपदसत्त्वेनोक्तरूपमेकवाक्यत्वंस्वीक्रियतेअन्यथाआख्यातवैयर्थ्यापत्तेर्नहोतारंवृणीतइत्यादौतुसमुदायेलक्षणायाआवश्यकत्वेननत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नतुतात्विकार्थान्तरविषयत्वं तात्विकार्थान्तरविषयकोक्तश्रुतिरितिनार्थः उपदेशेत्यादि अथयदतः परोदिवोज्योतिर्दीप्यतेइत्यत्रज्योतिः शब्दवाच्यंत्र ह्मैवनतुतेजः त्रिपादस्यामृतंदिवीतिपूर्ववाक्येब्रह्मणएवोक्तत्वादितिसिद्धांतिनेदिवीतिपूर्वनिर्देशात्परोदिवइत्यत्रपूर्वोक्तंब्रह्मनप्रत्यभिज्ञायतइत्याशंक्य समाहितमुपदेशेत्यादिसूत्रेवृक्षाग्रादितिपरइतिशेषः नाचेतनइतीति अचेतनेतदारोपेपिप्रातीतिकंतद्वाच्यंतथाचव्यावहारिकेक्षणपरत्वेसंभवतिप्रा तीतिकपरत्वंनयुक्तमित्यपिबोध्यंएतेनप्रातीतिकपुच्छत्वादिकंपुच्छादिपदार्थइतित्वद्व्याख्यादोकुतोनोक्तंनहितादृशपुच्छत्वंप्राधान्यविरोधीत्यप्यपास्तं। माश्रयादिरूपव्यावहारिकार्थपरत्वेसंभवतितात्पर्यायोग्यप्रातीतिकार्थत्वासंभवात्सगुणश्रुतेस्तुव्यावहारिकसगुणत्वपरतासंभवतिनिर्गुणश्रुतेः प्रबलायाविरोधादितिध्येयंसगुणवाक्यस्यगुणप्रकारकोपासनापरत्वेपिनगुणवैशिष्ट्यपरत्वंवाक्यभेदापत्तेरित्युक्तमिदानींसगुणवाक्यंगुणनिषेधक

नतुतात्त्विकार्थान्तरविषयत्वं उपदेशभेदादित्यादौदिविदिवइतिसप्तमीपंचमीभ्यामाधारत्वावधित्वयोःप्रतीतेःउपदेशभेदेननपूर्वनिर्दिष्टब्र ह्मणःप्रत्यभिज्ञानमस्तीतिप्राप्तेएकस्मिन्नपिश्येनेवृक्षाग्रेश्येनः वृक्षाग्रात्श्येनइतिनिर्देशदर्शनात्एकस्मिन्नेवब्रह्मणिउभयरूपाविरोधइत्यर्थःन तुतात्त्विकार्थान्तरपरत्वंनचारोपितमीक्षणंप्रधानेसंभवतियोग्यतामादायैवारोपदर्शनात् नहिराजामात्येराजत्वारोपइतिस्तंभादावपितदा रोपः तथाचचेतनएवदृष्टेक्षितृत्वदर्शनाच्चेतनेब्रह्मणिआरोपोयुज्यतेनाचेतनइतिनसिद्धांतक्षतिः किंचनिषेध्यसमर्पकतयैकवाक्यतयै वप्रामाण्यसंभवेनवाक्यभेदेनगुणप्रापकतायुक्ताअतएवनकोहिमीमांसकइत्यादिनाविरोधः नन्नुमृड्मृदेत्यादेर्यथानत्वासेडितिनिषे धनिषेधत्वंतद्वत् सगुणवाक्यानामपिनिर्गुणवाक्यबाधकत्वंकिंनस्यादितिचेत् नदृष्टांतेपर्युदासाधिकरणन्यायेनमृडमृदेत्याद्युत्तरत्वरहि तसेट्क्त्वाप्रत्ययकित्त्वनिषेधपरत्वेनैकवाक्यतयावाक्यभेदेननिषेधनिषेधकत्वाकल्पनात्नचप्रकृतेपिपर्युदासार्थकत्वंनेतिनेतीतिवीप्सायाःप्रसक्त सर्वनिषेधकतयाविशेषपरिशेषायोगेनपर्युदासस्याश्रयितुमशक्यत्वात्॥१॥वाक्यापेक्षितगुणरूपप्रतियोग्यनुवादरूपत्वेननसगुणत्वपरमित्याहकिंचेति॥

अतएवगुणनिषेधपरत्वेनसगुणवाक्यस्यप्रामाण्यस्वीकारादेवपर्युदासाधिकरणेति अपितुवाक्यशेषःस्यादन्याय्यत्वाद्विकल्पस्यविधीनामेकदेशःस्यादित्यनेन पर्युदासाधिकरणीयसिद्धांतस्तत्रेणवाक्यभेदापादकविकल्पस्यान्याय्यतादतिदेशवाक्यादिरूपविधीनांनार्येयंहणीतइत्यादिवाक्यंशेषस्तदेकवाक्यतादिसुक्तंप्रकृ तेपिमृडेत्यादेर्निषेधनिषेधपरत्वेमृडाद्युत्तरक्त्वाप्रत्ययेकित्त्वनिषेधरूपस्यनिषेध्यस्यप्रसक्तेर्नक्त्वेत्यादिनावाच्यतयाशास्त्रेणैवनिषेध्यनिषेधयोरुभयोःप्राप्तौवि कल्पापत्त्यावाक्यभेदाच्चहोतारंवृणीतइत्यस्यहोतृवरणाभिन्नद्वयमृडेत्यादेर्मृडाद्युत्तरवर्त्तिभिन्नेलक्षणयैकवाक्यता अतएवब्राह्मणेभ्योदधिनदेयंकौंडिन्यायदेयमिति वाक्ययोःकौंडिन्यवाक्यस्यकौंडिन्यभिन्नेलक्षणयाएकवाक्यत्वमितिभावःप्रकृतेसगुणवाक्येपर्युदासार्थकत्वंसार्वज्ञ्यादिगुणान्यस्यनिर्गुणश्रुतिनिषेध्यगुणान्यायेनोल

CC-0. In Public Domain. Digitization by eGangotri

एकवाक्यत्वानुरोधेनपर्युदासार्थकत्वस्यैवयुक्तत्वादाज्यभागभेदस्यप्राकृतांगेषुप्रकृतिवच्छब्दोपस्थापितेषुशक्त्यैवनञाबोधनसंभवेनभिन्नलक्षणाया
अनावश्यकत्वाच्चतथाचप्रतिषेधेननविकल्पः। किंतुपर्युदासेनेत्याचार्याणामाशयोऽथवोक्तपर्युदासवाक्यस्यैकवाक्यतासमर्थत्वेनबलवत्त्वात्तदनुसारेणोक्तम्
त्राणामुत्कर्षः स्तुतिपरत्वंवेतिभावः। यत्तुभाष्यटुप्टीकातंत्ररत्नशास्त्रदीपिकाधिकरणमालासूक्तवाक्यस्यपशुप्रकरणस्थत्वंनोक्तमितितदप्रामाणिकमिति। तत्रवि
त्रंशुकशारिकादिवदूहापोहाक्षमस्ययथाकरणितंवदतस्तथैववक्तुंयुक्तत्वात्सर्वतंत्रस्वतंत्रैर्हिभामतीकारकल्पतरुपरिमलकारैःसाभाव्यापत्तिरूपपत्तेरि।
त्यधिकरणेपशुप्रकरणस्थंनतौपशौकरोतीतिवाक्यंप्रतिषेधार्थकमुक्तंप्राभाकरास्तुतद्वाक्यंपर्युदासार्थकमाहुरितितदधिकरणेकल्पतरावुक्तंहानौतूपा
यनेत्यधिकरणेपिपशुप्रकरणस्थोक्तवाक्यप्रमितप्रतिषेधानुवादकत्वंदर्शपौर्णमासप्रकरणस्थोक्तवाक्यस्येतिमूलेउक्तमुपपत्तिस्तूक्तैवतत्रास्माभिर्नचै
तत्सर्वंत्वादृशेनवराकेनापलपितुंशक्यंअथैवंवार्त्तिककारादिभिर्नानाशास्त्रदर्शिभिःकिमितितन्नोक्तमितिचेत्शृणुरेमूढन्यायपटुत्वादनार्थेवार्त्तिककारादयः

उभयत्रतात्पर्यसत्त्वेनविशेषात् यत्त्वत्रापिविकारशब्दान्नेतिचेत् नप्राचुर्यात् उपदेशभेदान्नेतिचेत् नउभयस्मिन्नप्यविरोधात् गौ
णयसंभवादित्यादौशास्त्रयोर्विरोधेतात्त्विकार्थांतरपरतोक्तानतारोपितार्थता अन्यथेक्षत्याद्यधिकरणेषुसिद्धांतसाधकानामीक्षणा
दीनांसांख्याद्यभिमतप्रधानाद्यावारोपसंभवेनप्रधाननिराकरणादिनसिध्येदितितन्नविकारशब्दादित्यादौनविरोधेनतात्त्विकार्थां
तरत्वमर्थः किंतुस्वप्रधानेब्रह्मणि अवयवत्वासंभवेनपुच्छपदमुपचरितमित्यर्थः तदुक्तंटीकायांपुच्छेधिकरणइतिगौणयसंभवादि
तिपूर्वपक्षसूत्रेपिआत्मनआकाशःसंभूतइतिश्रुतिस्तुगौणीआकाशोत्पत्तिकारणासंभवादित्यर्थः॥१ प्रकृतास्तत्रयद्यपिपशुप्रकरणेतद्वाक्यम

स्तितथापितत्रतन्नास्तीतिकृत्वाचिंतयादर्शपूर्णमासप्रकरणस्थवाक्यमेवविचारितंतत्फलंचयत्रविकृतौनिषेधवाक्यंनास्तितत्रप्रतिषेधार्थकत्वलाभइ
तिनिखिलतर्काटवीसंचारपंचाननानामाचार्यप्रभृतीनामेवशास्त्रार्थनिर्णयेधिकारोनत्वादृशांपरोपदेशमात्रगतेशरणानांभीरुफेरूणां।पठंतिहिवृद्धाः
मधुसूदनसरस्वत्यापारंवेत्तिसरस्वतीपारंवेत्तिसरस्वत्यामधुसूदनसरस्वतीति उभयत्रविधिप्रतिषेधशास्त्रयोः तात्पर्यसत्त्वेनस्वार्थेतात्पर्यसत्त्वेनविशेषा
त् स्वार्थपरापरनिर्गुणसगुणवाक्यापेक्षयासर्वथाबाध्यबाधकभावविरहरूपाद्विशेषात्पर्युदासपक्षेपीदंबोध्यं अत्रापिब्रह्ममीमांसायामपि।नतात्त्विका
र्थांतरपरत्वमर्थः तात्त्विकार्थांतरपरंपुच्छपदमितिनोक्तसूत्रार्थः उपचरितमिति आधारत्वरूपगुणयोगेनगौणमित्यर्थः तच्चाधारत्वंकल्पितमितिनतात्त्विका
र्थकताएवमग्रेपिबोध्यंतथाचविज्ञानमयादन्योंतरआत्मानंदमयइत्यादिब्रह्मपुच्छंप्रतिष्ठेत्यंतवाक्येविकारशब्दात्पुच्छरूपावयववाचिशब्दयोगाद्ब्रह्मशब्देन
प्रधानीभूतब्रह्मार्थकइतिचेन्नप्राचुर्यात्पुच्छपदस्यान्नमयादिपर्यायेषुप्रचुरत्वात्पुच्छपदमुक्तंनतुब्रह्मणिपुच्छरूपावयवत्वविवक्षयाप्रतिष्ठाशब्दयोगेनपुच्छेपदस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेत्वन्तरमाह तात्पर्यपरिज्ञानप्राप्तत्वे इत्यादि। अनीर्णीततात्पर्यकाद्वैतवाक्यादिनैव निर्गुणप्राप्त्या वाक्यान्तरेणानुवादोऽव्यर्थ इति भावः न चेति नहीत्यर्थः तटस्थलक्षणद्वारा सर्वसाक्षित्वादिवैशिष्ट्यधीद्वारा उपात्ते श्रुतिबोधिते तदत्यागमात्रेण श्रुतिजन्यज्ञानस्य तदंशे प्रमात्वस्वीकारमात्रेण व्यवहारदशायामत्यागो व्यावहारिकप्रमात्वं व्यावहारिकत्वोपपत्तेरिति निर्गुणश्रुतिस्तु व्यावहारिकगुणबोधकश्रुत्या न विरुध्यते यत्तु अपूर्वत्वाद्येकैकस्यापि तात्पर्यलिङ्गत्वात् मानान्तराप्राप्तत्वरूपापूर्वत्वसत्त्वात्सगुणत्वे श्रुतितात्पर्यं दुर्वारमिति तदेकैकस्य लिङ्गत्वनिरासेन पूर्वमेव निरस्तं अतात्पर्यादिति विशिष्टविधायकवाक्यस्य विशेषणे तात्पर्याभावेऽपि कल्पितेन विशेषण

तात्पर्यपरिज्ञानप्राप्तत्वे निषेधार्थमनुवादायोगात् ननु साक्षी चेताः केवलो निर्गुणश्चेत्यादिना द्रष्टृत्वादिगुणविधानान्नेतेन तन्निषेधः तदर्थं च सगुणवाक्यं नानुवादकमन्यथा सार्वज्ञ्यादेर्व्यावहारिकत्वमपि न स्यात् नहि निषिद्धे ब्रह्महननादाववान्तरतात्पर्यं न चौपनिषदस्य ब्रह्मणः सार्वज्ञ्यादिकमनुमानादिसिद्धमिति चेत् न अविद्यासिद्धसाक्षित्वाद्यनुवादेन तटस्थलक्षणद्वारा ब्रह्मपरतया गुणपरत्वाभावाद्गुणनिषेधकतोपपत्तेः न च निषिद्धे ब्रह्महननादाववान्तरतात्पर्याभाववदत्रापि तदभावे सार्वज्ञ्यं व्यावहारिकमपि न स्यादिति वाच्यं देवताविग्रहादौ विधिस्तुतिद्वारतयोपात्ते प्रमाणान्तरप्राप्तिविरोधयोरभावात् तदत्यागमात्रेण तत्सिद्धिवदत्रापि निषेधौपयिकतयोपात्तस्य सार्वज्ञ्यादेर्मानान्तरादप्राप्तस्य व्यावहारिकप्रमाणानिषिद्धतया व्यवहारदशायामत्यागमात्रेण व्यावहारिकत्वोपपत्तेः ब्रह्महननादिकं तु मानान्तरप्राप्तमिति विशेषः न च तद्बोधकत्वं तत्तात्पर्यनियतं विशिष्टविधेर्विशेषणबोधकत्वेऽपि विशेषणे अतात्पर्यात् विशिष्टस्यातिरेकात् अन्यशेषतयोपात्तेऽपि सार्वज्ञ्यादौ तात्पर्ये वाक्यभेदापत्तेः न च तर्हि उपासनायाः कार्यत्वे विध्येरात्मत्व एव च उभयत्रापि तात्पर्यमात्मोपास्त्यादिके विधावितिस्मृतिविरोध इति वाच्यं देवताधिकरणन्यायेनोभयसिद्धिपरत्वादुभयत्र तात्पर्ये स्मृतेरप्रमाणत्वात् यः सर्वज्ञ इत्यादावुपासनाप्रकरणस्थत्वाभावेऽपि तटस्थलक्षणद्वारा ब्रह्मप्रतिपादनेतात्पर्येण विशेषणे अतात्पर्यात् अन्यथा एकविज्ञानेन सर्वज्ञानप्रतिज्ञाविरोधापत्तेः न चात्मेत्येवोपासीतेत्यत्राद्वैतस्यापि उपास्यत्वेन उपासनाशेषतया अद्वैतासिद्धिः स्यादिति वाच्यं अनेन ह्येतत्सर्वं वेदेत्युत्तरवाक्यस्थविदिसमानार्थतया उपास्तिशब्दस्य क्रियावाचकत्वाभावात् न च ज्ञाने विधिस्तस्य निराकरिष्यमाणत्वात् न च विधिश्रुत्यानर्थक्यं वाह्यविषयात्परावर्त्य चित्तस्य प्रत्यगात्मप्रवणतासंपादकत्वात् ॥

२ विधिना विशेष्ये विशेषणवैशिष्ट्यसिद्धिरत एवानेकविध्यन्तरप्रसवसमर्थैकविशिष्टविधिप्रसादेनानेकगुणविधानमित्यनेन विशिष्टविध्यन्यथानुपपत्त्या कल्पनीयविधिभिर्विशेषणानां सिद्धिरित्युक्तं पौर्णमास्यधिकरणे वार्तिके प्रतिज्ञेति यः सर्वज्ञ इत्यादि पूर्वं कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातमिति श्रुतीत्यर्थः अद्वैतस्यापीति एवकारेणात्मस्वरूपमात्रस्योपास्यत्वमिति भावः अनेन ह्येतत्सर्वं वेदेति बृहदारण्यके स एष इह प्रविष्ट इत्यनेन ब्रह्मणः कार्योपाधिषु प्रतिबिम्बरूपेण प्रवेशमुक्त्वा तं न पश्यन्त्यकृत्स्नो हि स इत्यनेन संसारदशायां दृश्यमानस्य प्राणनवदनादिक्रियाविशिष्टात्मनः परिच्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰सि॰ नेतिनेतीतिवीप्सायाइतिशब्देनवीप्सितेनसर्वनाम्नासर्वस्यप्रसक्तस्यनिषेधोन्यथावीप्सावैयर्थ्यंनचोपदेशस्यस्त्वेनाप्युपपन्नावीप्सानसगुणश्रुतिबाधिकेतिवाच्यंनहु
टी॰ल॰ पदेशोवीप्साविनानघटतेयेनसानन्यथाकिंचसगुणवाक्येसगुणत्वनिर्णयेवीप्सायाःसंकोचःस्यान्नस्यत्पास्तनायांनिषेधेवातात्पर्येणैकवाक्यत्वान्नोक्तनिर्णयइत्युक्तं
उ॰ एतेनब्राह्मणायदधिनदेयंकौण्डिन्यायदेयमित्यत्रेववीप्सापिसंकुच्यतामित्यपास्तं।दृष्टान्तेकौण्डिन्यादिवाक्यस्यपर्युदासपरत्वंविनैकवाक्यतासंभवेपिदार्ष्टा
४२ तिकेतत्संभवेनवैषम्यात् निषेधद्योतकेति विश्वंसत्यमित्यत्रसत्यपदशक्यस्यत्रिकालाबाध्यतादात्म्यवतोविश्वस्मिन्तादात्म्यंबुध्यतेनतुविश्वस्मिन्मिथ्या
त्वस्यासत्ताभावोमिथ्याभूताद्भेदोवाउक्ततादात्म्यंतुमिथ्यात्वस्यैवव्याप्यंनतुसद्रूपतायाः येनसाऽनुमीयेतद्वासुपर्णेत्यादौतुद्वित्वंबुध्यतेनतुभेदः येनाभेदनि

यत्तुजगत् कर्तृत्वेनास्मिन्प्रसार्वज्ञ्यादेर्निषेधायानुवादश्रुतेनज्ञानज्ञाननिवर्त्यत्वेनजगदारोपाधिष्ठानत्वेनसत्यएवेदंसर्वमात्मैवेदंसर्वमिति
श्रुतेनजीवब्रह्मणोःसार्वात्म्येनचास्मिन्प्रंविश्वमिथ्यात्वंब्रह्मसत्त्वंजीवब्रह्मैक्यंचविश्वंसत्यमित्यनेनअसद्वाइदमित्यनेनद्वासुपर्णेत्यनेनच
निषेद्धुंनेहनानेत्यनेनसत्यंज्ञानमित्यनेनतत्त्वमसीत्यनेनचानूद्यतइतिस्यादितितन्नविश्वंसत्यंद्वासुपर्णेत्यत्रचनिषेधद्योतकपदाभावेननिषेधक
त्वासंभवात् असद्वाइत्यत्रतुनञःसत्त्वेपिनामपदसमभिव्याहृतत्वेननिषेधकत्वाभावात् द्वासुपर्णेत्यस्यपैंगिरहस्यब्राह्मणेबुद्धिजीवपरतयाव्याख्या
तत्वेनजीवब्रह्मभेदाबोधकत्वात् फलतोनिषेधत्वोपपादनेदृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्तथाहिसार्वज्ञ्यस्यनिषेधप्रतियोगितयामिथ्याभूतत्वेपिनाक्षेपा
नुपपत्तिरारोपितेनाप्याक्षेपकजगत्कर्तृत्वनिर्वाहादास्मिन्प्रविश्वमिथ्यात्वब्रह्मसत्त्वजीवब्रह्मैक्यानांनिषेधेतुज्ञाननिवर्त्यत्वादीनांत्र
याणामाक्षेपकाणामसंभवःस्यात् सत्यस्यज्ञानादनिवृत्तेः असत्यस्यअधिष्ठानत्वायोगात् भेदेसार्वात्म्यायोगाच्च एतेनअद्वैतश्रुते।
निर्गुणश्रुत्यंतरस्यवातात्पर्यपरिज्ञानप्राप्तनिर्गुणत्वमेवसगुणवाक्येननिषेद्धुंनिर्गुणवाक्येनानूद्यतइतिनिरस्तं॥(षेधःस्यादितिभावःनिषेधकत्वाभावा।

त्सत्त्वनिषेधकत्वाभावात्सत्त्वसंसर्गाभावःशुद्धब्रह्मणिस्वीक्रियतएवेत्यपिबोध्यं नचसम्भेदबोधएवममेष्टइतिवाच्यंत्रिकालाबाध्यतादात्म्यवद्भेदस्यमयापिशुद्धब्रह्म
णिस्वीकारात् ननुद्वासुपर्णेत्यादौअन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्यइत्यनेनजीवस्वरूपस्ययोक्तृत्वकथनादेवार्थात्जीवाभेदनिषेधोलभ्यतेएवंसत्त्वविशिष्टभेदबोधका राम॰
दसद्वेत्यस्मादर्थात्सत्त्वनिषेधःएवंविश्वंसत्यमितिवाक्यादपिमिथ्यात्वनिषेधःतत्राह फलतइति अर्थादित्यर्थःआरोपितेनव्यावहारिकेननिषेधेधर्मिसमानस २५२
त्ताकनिषेधे। अयोगाच्चेति जीवत्वविशिष्टाद्भेदस्यार्थिकत्वेपिजीवत्वोपलक्षितस्वरूपाद्भेदोनार्थिकःएवंसत्त्वसंसर्गनिषेधोब्रह्मणीष्टएवमिथ्यात्वनिषेधा।
त्तुप्रपंचेनार्थात्संभवतिनहितादात्म्यमैक्यंयेनत्रिकालाबाध्यतादात्म्यानुपपत्त्यामिथ्यात्वनिषेधसिद्धिःकिंतुभेदव्याप्यःसंबंधविशेषइत्याद्यपिबोध्यं।एतेननिषेधवा
क्यापेक्षितप्रतियोगिसमर्पकत्वेनैकवाक्यतासंभवेवाक्यभेदस्यान्याय्यत्वेन॰ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचानेनह्येतदित्यादिवाक्यमात्मोपासनयासर्वोपासनफलाप्तातयासर्वमुपासितमित्युपचर्यत इतिवाच्यमुपचरितार्थस्यायुक्तत्वादात्मनः सर्वस्वरूपत्वेन तज्ज्ञा
नात्सर्वज्ञानरूपस्यार्थस्यमुख्यत्वात् कीर्त्तिश्लोकंविन्दते इत्यनेनसर्वोपासनाफलानुक्त्यासर्वोपासनाफलकत्वकल्पनस्याप्रामाणिकत्वात् तथाचाज्ञाननिवृत्ति।
रूपदृष्टार्थकात्मस्वरूपज्ञानबोधकत्वेनसर्वविज्ञानप्रतिज्ञानुसारित्वेनच आत्मानमेवावेदहंब्रह्मास्मीतियोदेवानांप्रत्यबुध्यतत्तदेवतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे
हंमनुः यएवंवेदाहंब्रह्मयदेतन्मनुष्याविद्युरितिज्ञानवाचकशब्दानामुपसंहारस्थानामेवप्राबल्यमुपासनायास्तु अदृष्टार्थकत्वेनतद्बोधकत्वादुक्तप्रतिज्ञाननुसा
रित्वाच्चोपक्रमस्यमुपासीतेतिदुर्बलमुचितमितिभावः व्यतिहार इतिसूत्रे व्यतिहारोविशिंषंतिहीतरवदितिसूत्रेवाच्यवाक्यार्थैतिह्यरीभूतेत्यादिः तथाचनोपासना

यत्तुगुणोपसंहारपादे आनंदादयःप्रधानस्येतिसूत्रे आनंदंब्रह्मेत्यादिश्रुतानामानंदादीनां व्यतिहार इतिसूत्रेतद्योहमिति श्रुत्युक्तस्यजीवे
ईश्वरत्वस्यईश्वरेवाजीवत्वस्यउपास्यतयोक्तत्वादुत्तरतापनीयादौनिर्गुणोपास्तेरुक्तत्वेपियथानंदादेरैक्यस्यनिर्गुणत्वस्य चसिद्धिः तथास
त्यकामत्वादेरपितात्विकतास्त्वितितन्न आनंदादय इतिसूत्रेणलस्याखण्डवाक्यार्थसिद्ध्यर्थं वाच्यवाक्यार्थोपसंहारस्यक्रियमाणत्वेन उपास्य
त्वानुपपत्तेः व्यतिहारसूत्रेचतद्योहंसोसौयोसौसोहमित्युक्तस्यजीवेईश्वराभेदध्यानस्येश्वरेवाजीवाभेदध्यानस्योपासनाप्रकरणपठितश्रुत्यु
क्तस्यजीवेश्वराभेदःसगुणोपासनरूपेणापिदृढीकर्त्तव्य इत्येवंपरतयाऐक्यस्यउपासनाविषयत्वेपिनसत्यकामत्वादिवत्तात्विकत्वंनचैक्य
वत्सत्यकामत्वादीनांतात्विकतावा अनुपासनाप्रकरणस्थतत्परवाक्यबोधितत्वाबोधितत्वाभ्यांविशेषात् उत्तरतापनीयादौचश्रुतोपास्तेर्ज्ञान
परत्वात् उपास्तेर्विशिष्टविषयत्वेननिर्विशेषविषयत्वाभावात् यत्तुयथाध्यानार्थेपिसत्यकामादिगुणोपदेशेतद्गुणईश्वरःप्रसिध्यतितद्वदै
क्यमितिभाष्यपर्यालोचनयाऐक्यवत् सत्यकामादिसिद्धिरितितन्नतत्रसगुणोयस्यसईश्वरःप्रसिद्ध्यतीत्यर्थः नतुगुणस्यापिप्रसिद्धिः निर्गुणश्रुत्य
नुसारेण अतद्गुणसंविज्ञानबहुव्रीहावेवतात्पर्यात् तथाचैक्यसिद्धावीश्वरस्यनिदर्शनत्वंनतुगुणस्यएवमेव॥ २२ विषय आनंदादिरितिभावः जीवेश्वरा।

भेदःजीवत्वेश्वरत्वाभ्यामुपलक्षितयोरभेदःरूपेणाद्वारेणादृढीकर्त्तव्यः विपरीतभावनानिवृत्तिद्वारकनिश्चयविषयीकार्यः इत्येवंपरतयाइत्येवंप्रयोजनकत्वेनभाष्याद्युक्ततया
विषयत्वेपीत्यादितथाचादृष्टार्थकोपासनायांतात्पर्येयुक्तदृढीकारस्याप्यानुषङ्गिकादृष्टफलस्यतत्रभाष्याद्युक्तदृढीकारस्यचैक्यविषयकत्वंविना असंभवादुपासनाविष।
योपिऐक्यंतत्परतत्त्वमस्यादिवाक्यबोधितत्वात्तात्विकंसत्यकामत्वादिकन्तुतद्बोधितत्वात्तात्विकमित्यर्थः श्रुतोपास्तेर्देवाहवैप्रजापतिमब्रुवन् अणोरणीयांसमित्या
देः भाष्येतिव्यतिहारसूत्रस्यभाष्येत्यर्थः ईश्वरस्यईशत्वोपलक्षितचिन्मात्रस्यनिर्द्धर्मकत्वश्रुत्यनुसारेणेशत्वोपहितेप्यतात्पर्यात्तद्वाचकपदाभावाच्च अन्वाचय
शिष्टंतादात्म्यदार्ढ्यंभवन्नोपेक्षामहेसत्यकामादिगुणोपदेशइवतद्गुणेश्वरसिद्धिरितिटीकायामन्वाचयशिष्टपदंप्रकृतोपयुक्तार्थकथनेनगृह्णाति॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्त्वेननदृर्शनस्यात्मस्वरूपदर्शनत्वाभावमुक्त्वात्मेत्येवोपासीतेत्यनेनशुद्धात्मनोपरिच्छिन्नस्योपासनमुक्त्वा अत्रह्येतेसर्वएकीभवंतीत्यनेनतस्यसर्वाधिष्ठानत्वेनतत्र सर्वमेकतांप्रतिपद्यतइति उक्त्वाकृत्स्नत्वरूपमपरिच्छिन्नत्वमुपपाद्यतदेतत्पदनीयमस्यसर्वस्यअनेनह्येतत्सर्वंवेदेत्यनेनोक्तात्मज्ञानेनसर्वज्ञानादुक्तात्मैवज्ञेयोनान्य इत्युक्तं तन्नपूर्वेनपश्यन्तीत्यनेनपश्चात्तदेतत्पदनीयं अनेनसर्वंवेदेत्यनेनचज्ञानसंदर्शनादुपासीतेतिमध्यममपिज्ञानपरमितिभावः यत्तुप्राणादिनामानिपरमेश्वरस्यसर्वगुणपूर्णतांनवदंतीतितैःस्वनोपास्यआत्मशब्दस्तुतस्यतां वदतीतितेनसउपास्यइतिप्रकृतवाक्यार्थोनएवतदेतत्पदनीयमस्यसर्वस्येत्यनेनप्राणनादिगुणस्यसर्वस्यात्मापदनीयआश्रयइत्युक्तं अनेनह्येतत्सर्वंवेदयथाहवैपदेनानुविन्देदेवंकीर्तिंश्लोकंविंदत्तेयएवंवेदेत्यनेनचसर्वोपासनाफलहेतुरात्मोपासनासर्वोपासनाफलप्राप्त्या। चात्मोपासनयासर्वमुपासितंभवतीत्युक्तमितितन्न आत्मशब्दस्यसर्वगुणपूर्णतावाचकत्वेमानाभावात् यच्चाप्नोतियदादत्तेयच्चात्तिविषयानयं। यच्चास्यसंततोभाव। स्तेनात्मापरिकीर्तितइत्यैतरेयभाष्याद्युक्त्यासर्वाप्त्यादिगुणवाचकत्वेप्येवकारेणकेवलात्मस्वरूपोक्त्यागुणपूर्णत्वोक्त्यसंभवात् ज्ञानस्यैवपूर्वंपश्चाच्चोक्तेःपूर्वंप्रदर्शितत्वेनतदाहुर्यद्ब्रह्मविद्ययेत्याद्युत्तरसंदर्भस्यब्रह्मविद्याविवेचनेनचोपासनापरत्वाभावात् अतएवसंपूर्णवाक्यस्यशुद्धात्मतात्पर्यकत्वेनयथाहवैपदेनेत्यादिकंन फलपरंशुद्धात्मज्ञानस्यसर्वफलविरोधित्वाच्चकिंतुतिधेयशुद्धात्मस्तुतिपरं·पर्यालोचनयेतियएवंवेदाहंब्रह्मास्मीतिसइदंसर्वंभवतितस्यहनदेवाश्चनाभूत्याईशतेआ

अथयोन्यांदेवतामुपास्तइत्याद्युत्तरवाक्यपर्यालोचनयाभेददर्शननिंदापरतयाउपास्तिपरताशंकैवनास्तिनचोपक्रमानुसारेणउपसंहारनयनं अनेनह्येतत्सर्वंवेदेत्येकविज्ञानेनसर्वविज्ञानप्रतिज्ञानविरोधेनोपसंहारस्यैवप्राबल्यात् ॥ २२

त्माह्येषांसभवति अथयोन्यांदेवतामुपास्तेन्यो हमस्मीतिनसवेदयथापशुरेवंसदेवानामित्यादितस्मादेषान्तन्नप्रियंयदेतन्मनुष्याविद्युरित्यन्तवाक्येआत्मज्ञानस्यासर्वभावरूपपरिच्छेदनिवृत्तिफलमुक्त्वाताद शफलंप्राप्तुंविहन्तुंदेवाअपिनसमर्थाः अतउक्तफलवान् देवानामात्मभूतोयदातुभेदेनकिंचित् देवमुपास्तेतदातस्यात्मज्ञानप्राप्तौदेवाविघ्नमाचरन्ति आत्मज्ञानस्यदेवपरिचारकमूढावस्थातीतत्वात् अतएवमुक्तेश्चबिभ्यतोदेवामोहेनापिदधुर्नरान्तैकर्मसद्युक्ताःप्रावर्ततेदिवानिशमितिभाल्लविब्राह्मणमुक्तार्थकं इत्येवमर्थस्योक्तत्वेनभेदघटितोपासनानिंदाद्वारा ऐकात्म्यज्ञानस्तुतिपरमुक्तवाक्यमितिभावः अन्यांदेवतामुपास्तेइत्यनेनभेदघटितोपासनानिंदाद्वारेणोपक्रमस्यैनात्मेत्येवोपासीतेत्यनेनोक्तमात्माभिन्नत्वेनेश्वरोपासनंस्तूयतेनतु ऐकात्म्यज्ञानमुपक्रमस्योपासनातस्याःप्रतीतेस्तथाचोपक्रमस्यप्राबल्यादुपसंहारस्येयए। वंवेदेत्यादौवेदेत्यादिपदमुपासनापरतयानेयमुपासनायाएवासर्वभावनिवृत्तिःफलंतत्राहनचोपक्रमेति।प्राबल्यादितितंनपश्यंतीत्यस्यैवोपक्रमत्वेनोपक्र। ————ममात्रप्राबल्याश्रयणेपिनक्षतिरित्यपिबोध्यम् ॥ ※ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपासनस्यज्ञानान्यवृत्तिविशेषस्यभ्रमत्वेपिज्ञानत्वव्याप्यप्रमात्वाभावेपिप्रकृतेपिसगुणोपासनावाक्येपि तथात्वोपपत्तेः सगुणोपासनायाः प्रमात्वाभावेपु
क्तवाक्यजज्ञानस्यप्रमात्वेनसगुणासिद्ध्युपपत्तेः ब्रह्मणः सगुणब्रह्मणः मणित्वस्येवेति मणिप्रभायां मणित्वं यथामिथ्यातथासगुणब्रह्ममिथ्येत्यस्याभावेने
त्यर्थः निर्विशेषविषयतयेति अभ्युपेत्येदमुक्तमुत्तरतापनीयादौ श्रुतौपास्तेर्ज्ञानपरत्वादुपास्तेर्विशिष्टविषयत्वेननिर्विशेषविषयत्वाभावादितिपूर्वमुक्तत्वा
त् मणिप्रभायामित्यादिनायदुक्तं तत् दूषयतिसगुणेति ईक्षतिकर्मेतिसूत्रे ईक्षतिकर्मव्यपदेशात्सइतिसूत्रे अर्थः विषयः परं पुरुषमिति यद्येकमात्रमभिध्यायी
तसतेनैवतूर्णमेवजगत्यामभिसम्पद्यत इत्यादि यः पुनरेतंत्रिमात्रेणेमित्येतेनैवाक्षरेणेतिपूर्ववाक्यं बोध्यं। तद्विरोधइति उपास्तेर्विशिष्टविपयकत्वेननिर्विशेषवि
षयकत्वाभावादितिभवदुक्तविरोधइत्यर्थः विशिष्टस्यैवेतित्रिमात्रेणेत्येतस्योक्तप्रश्नोपनिषत्गतोपासनावाक्यएवोक्तत्वात् एतद्वैसत्यकामपरं चापरं चब्रह्मयदों

नापिब्रह्मासिद्धिरुपासनस्यभ्रमत्वेपि शब्दाज्ज्ञायमानस्य(ज्ञानस्य)प्रमात्वादितिवाच्यं प्रकृतेपि तथात्वोपपत्तेः मणिप्रभायां मणित्वस्येवब्रह्मणो
मिथ्यात्वाभावेन ध्यानस्यापि सत्यब्रह्मविषयत्वाच्चेति तन्न सगुणोपास्तेर्विशिष्टविषयत्वेन भ्रमत्वेपि निर्गुणोपास्तेर्निर्विशेषविषयतयाभ्र
मत्वाभावात् एवमेव शाब्दसगुणनिर्गुणज्ञानयोरपि सगुणवाक्यस्यविशेष्यांशसत्यविषयत्वेपि विशेषणांशासत्यविषयत्वात् अतएवब्र
ह्मविषयशाब्दधीजन्यस्यतदपरोक्षधीजनकस्य ब्रह्मध्यानस्य अब्रह्मविषयत्वे श्रवणादीनामपि तथात्वापत्तिरितिनिरस्तं तेषां विशिष्टा
विषयत्वात् उपास्तेश्चविशिष्टविषयत्वात् न चेक्षतिकर्मेतिसूत्रे ईक्षतिध्यानयोरेकः कार्यकारणभूतयोः अर्थऔत्सर्गिकं तत्त्वविषयत्वं।
तथेक्षतेरितिभामत्यां परात्परं पुरिशयं पुरुषमीक्षत इतीक्षतिकर्मणः परब्रह्मणएव परं पुरुषमभिध्यायीतेति अभिध्यातव्यत्वेनोक्त्वात त
द्विरोधइतिवाच्यं त्रिमात्रोंकारालंबनोपाधिविशिष्टस्यैव ध्येयत्वोक्त्या शुद्धविरोधाभावात् विशेष्यांशमादायेक्षतिसमानकर्मत्वोपपत्तेश्चय
तु ऐक्याद्युपासनस्य अप्रमाप्रमाप्रवाहरूपत्वमाशंक्य सगुणोपासनसमत्वमुक्तं ॥ ९ ओंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीत्युपक्रमात् ओं

कारेणैवायतनेनान्वेतीति विद्वान् यत्तच्छान्तमजरममृतमभयं परं चेत्युपसंहाराच्चोङ्कारविशिष्टमेव परब्रह्मोक्तवाक्ये उपास्यत्वेनोक्तमिति भावः। विशेष्यांशमिति पर
पुरुषपदेनेक्षतिध्यानकर्मणोर्निर्देशादैक्यं निर्णीतं ध्यानकर्मण ओङ्कारांशे विशेषणस्यैव परपुरुषपदेन निर्देशइति विशेष्यांशस्यैवेक्षतिकर्मैक्यं ननु विशेष्यांशमादा
यतदैक्यमेकद्विमात्रोपासनाकर्मणोरपि संभवतीति तदपि भाष्यादानुच्येत तस्माद्विशे[illegible]यतदैक्याकिरमुक्तेति चेद्भ्रान्तोसि नहि एकद्विमात्रोपासनयोः पर
पुरुषेक्षणं फलयुक्तमेकमात्रोपानस्य मनुष्यलोके तपोब्रह्मचर्यश्रद्धापूर्वकमहिम[illegible]द्विमात्रोपासनस्य सोमलोके पुनरावृत्तिसहितविभूत्यनुभवस्य च फलत्वेनोक्तत्वा
त् न चैवं ध्येयस्यैक्षणीयैक्यकथनासंभवेपि ध्येयविशेष्यांशस्य परब्रह्मताकुतो[illegible]वाच्यं नहि ध्येयविशे[illegible]विचार्यतावच्छेदकं किन्तु[illegible]वांशे विशेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थसिद्धमिति। ईशत्वोपहिते जीवत्वोपहितस्य जीवत्वोपहिते ईशत्वोपहितस्य तादात्म्यचिंतनं प्रकृते विधीयते तत एव तादात्म्यस्यानेन प्रकारेणानुचिंत्यमान त्वादिति भाष्यं जीवतादात्म्यस्येश्वरे शास्त्राद्यारोप्योपास्यत्वान्नेश्वरस्योत्कर्षनिवृत्तिरिति निकल्पतरौ व्याख्यातं तथा चोक्तचिंतनप्रवाहवशात्तयोस्तादात्म्यं दृढी भव त्जीवत्वेशत्वोपलक्षितव्यक्त्योस्तादात्म्यमर्थाद् दृढीकरोति उक्तव्यक्त्योस्तादात्म्यं विनोक्तोपहितयोस्तादात्म्यासंभवात्तत्त्वमस्यादिवाक्येनेवोक्तरीत्यार्थाद् दृष्ट क्तव्यक्त्योरैक्यं सिध्यतीति भावः कल्पतरावप्यन्वाचयशिष्टमित्यस्य पश्चात्प्रतीतमित्यर्थकथनमुक्ताभिप्रायकं बोध्यं। अतद्गुणसम्विज्ञानबहुव्रीहिः समाधिसौकर्या दुक्तः वस्तुतस्तु तद्गुणसंविज्ञानेपि न क्षतिः प्रमात्वमात्रे दृष्टान्तसंभवादेतावांस्तु भेदः यद्दृष्टान्ते निर्गुणश्रुत्यनुसारेण व्यावहारिकमेव देवताधिकरणसिद्धं सगुणत्वां शे श्रुतेः प्रमात्वं दार्ष्टान्तिके तु बाधकाभावादैक्यांशे तात्त्विकमेवार्थायतेस्तद्द्वारा श्रुतेर्वा प्रमात्वमत एवेश्वरे जीवतादात्म्यचिन्तने निकृष्टत्वप्रसंगमाशंक्य तत्किमि

अर्थसिद्धं भवन्नोपेक्षामहे सत्यकामादिगुणोपदेशात् तद्गुणेश्वरादिसिद्धिरिति टीकापि नेयानन्दानंदादिवाक्यसत्यकामादिवाक्ययोर्मानान्त राविरोधे तदप्राप्तौ च उपासनाविध्यश्रवणे निर्गुणश्रुतिविरोधे च तुल्येपि आनंदादयस्तात्त्विकाः सत्यकामत्वादयस्त्वतात्त्विका इति कथं व्यव स्थेति चेत् न आनंदादीनां ब्रह्मरूपत्वेन न निर्गुणश्रुतिविरोधाभावस्य व्यवस्थापकत्वात् न चैवं बलशक्त्यादीनामपि ज्ञानात्मको भगवान् बलात्मको भ गवानिति श्रुतेः समस्तकल्याणगुणात्मक इति श्रुतेश्च ब्रह्माभेद इति वाच्यं अस्माकमपि ब्रह्मातिरिक्तगुणसद्भावप्रद्वेषात् अभेदे गुणगुणिभावां गीकारस्य पारिभाषिकत्वात् यत्तु सगुणोपास्तेर्भ्रमत्वे निर्गुणोपास्तेरपि भ्रमतया सम्यक्फलासिद्धिर्ब्रह्मासिद्धिश्च स्यात् न च निर्गुणोपासनं प्रच पि भ्रमस्तथापि मणिप्रभायां मणिभ्रम इव सम्यक् फलप्रदं तदुक्तं स्वयं भ्रमोपि संवादी यथा सम्यक् फलप्रदः ब्रह्मतत्त्वोपासनापि तथा मुक्ति फलप्रदेति ॥ ❁ ॥

ऽ दानीं सगुणे ब्रह्मण्युपास्यमाने स्य वस्तुतो निर्गुणस्य निकृष्टता भवति कस्मैचित्फलाय तथा ध्यानं विधीयमानं न नि कृष्टतासंपादकमिति तु व्यतीहारचिंतनेपि तुल्यमित्युक्तटीकावाक्यस्य पूर्ववाक्ये उक्तार्थ एव प्रतीयते वस्तुतो निर्गुणस्य निकृष्टता वस्तुतः सगुणत्वं तच्च सगु णवाक्यान्न प्रतीयते तत्परे निर्गुणश्रुतिविरोधात् किन्तु व्यावहारिकं सगुणत्वं तद्द्वारोपितं जीवतादात्म्यं नेश्वरस्य निकृष्टता किंतु ईश्वरसत्ताकमित्यर्थ इति ध्येयं। विध्यश्रवणाद् इति गुणवाक्ये क्वचिद्विधिश्रवणेपि क्वचिद्विध्यश्रवणाद् इत्यर्थः पारिभाषिकत्वादिति उक्तश्रुतिस्तु भगवज्ज्ञानादेः स्वाभाविकत्वपरेति भावः सम्यक्फलासिद्धिः क्रममुक्तिरूपफलासिद्धिः भ्रमत्वेप्यहंग्रहोपासने व निर्गुणोपासनाप्युक्तफलदा संभवतीति तु ध्येयं संवादी मणिप्रभायां प्रवृत्तिद्वारा म णिसन्निकर्षाधीनमणिचाक्षुषप्रयोजकः सम्यक फलप्रदः मणिप्राप्तिप्रयोजकः ब्रह्मतत्त्वोपासना अहं ब्रह्मेत्युपासना मुक्तिफलप्रदेति। चित्तैकाग्र्यविपरी तभावनानिवृत्तिद्वारकाहं ब्रह्मेति वाक्यार्थनिश्चयद्वारा मुक्तिप्रयोजिकेत्यर्थः ॥ ❁ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपास्यत्वेदहरवाक्योक्तोपास्यत्वे अशक्यत्वेनेति न च बुद्धिपूर्वकारोपेणासत्यकामत्वाद्युपासनाभूताकाशेपि संभवतीति वाच्यमनारोपेणोपासनासंभवे आरोपकल्प
नेगौरवात्सत्यः सोस्यमहिमेति येनासमुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः सत्यः सोस्य महिमा न सन्नशेयं सोणीरनु चक्रदे इत्यस्या ऋचः हे इन्द्र तत्प्रसिद्धं ते त
वशवो बलं वृष्णि वर्षकं अभीष्टफलदं येन बलेन महीर्महतीरप आसमुद्रं समुद्रपूरणयोग्यमसृजः सृष्टवानसि स बलरूपोस्य समुद्रादेर्जनको महिमा सत्यः एवं चास्ये
तिषष्ठीनोपचरितार्था बलस्येन्द्ररूपब्रह्मस्वरूपत्वेयीन्द्रशब्दस्य तदर्थकत्वाभावात् न संनशे न नश्यति यं महिमानं क्षोणी पृथिव्यादि अनु चक्रदे अनुगच्छति क्रद
गताविति धातुः होममात्रेति यदाहवनीये जुहोतीति वाक्यस्यानारभ्याधीतत्वेनाविशेषात् पदे जुहोतीत्यादिविशेषविध्यविषयहोमसामान्योद्देशेनाहवनीयविधान
मिवाभीष्टदायकभगवद्बलरूपमक्रान्तमहिमसामान्योद्देशेन सत्यत्वविधानमिति भावः पूर्वचित्तय इति येन यतिभ्यो भृगवे धनेहिते येन प्रस्कण्वमाविथेति ऋक्शेषः
ब्रह्मश्रुत्येति सुवीर्यं तत्प्रसिद्धं ब्रह्मरूपं त्वा पूर्वचित्तये पूर्वेषां ब्रह्मविदां चितये ब्रह्मज्ञानाययामि आश्रयामि येन वीर्येण यतिभ्य उपरतेभ्यो यष्टृभ्यः सकाशात् आ

यत्तु अपहतपाप्मत्वादीनामुपास्यत्वे तेषां भूताकाशेपि संभवे न दहराकाशस्य ब्रह्मत्वप्रतिपादकदहराधिकरणविरोध इति तन्न चेतनध
र्मात्यन्ताभावस्य पाप्मादिविरहस्याचेतने संभवेपि कामसंकल्पादेरचेतने संभावयितुमशक्यत्वेन विरोधाभावात् यत्तु सत्यः सोस्य महिमेत्यत्र
होममात्रानुवादे आहवनीयस्यैव सद् इति श्रुत्युक्तमहिममात्रानुवादेन सत्यत्वविधानात् सार्वत्र्यादिकमपि सत्त्वं सत्यः सोस्य महिमेत्यादेरैन्द्रसू
क्तस्यत्वेपि तत्त्वायामि सुवीर्यं तत्ब्रह्मपूर्वचितय इति ब्रह्मश्रुत्या इन्द्रः सूर्यमरोचयत् इन्द्रेह विश्वा भुवनानि येमिर इत्यादि सूर्यप्रकाशादिलिं
गैश्च ज्योतिरधिकरणन्यायेन सूक्तस्य परमेश्वरपरत्वव्यवस्थितेरिति ॥ १२ इत्य भृगवे भृगुनाम्ने ऋषये धनेहिते दत्ते सति येन वीर्येण प्रस्कण्वनामानं
ऋषिमाविथ रक्षितवानसि भृगवे धनं दत्तं प्रस्कण्वश्च रक्षित इति यावत् तदैतदर्थपर्यालोचनात् ब्रह्मपदं परमेश्वरार्थकमिति भावः इन्द्रः सूर्यमिति। इन्द्रो मन्हा रो
दसी पप्रथत् शवइन्द्रः सूर्यमरोचयत् इन्द्रे ह विश्वा भुवनानि येमिरे इन्द्रे सुवानास इन्दव इति ऋक् इन्द्रः शवः शवसः स्वीयबलस्य मन्हा महिम्ना रोदसी द्यावापृथिव्यौ
पप्रथत् विस्तारितवान् सूर्यमरोचयत् स्वर्भानुना हतं सूर्यं स्वर्भानुवधेनारोचयत् इन्द्रे ह इन्द्र एव सर्वाणि भुवनानि सुवानासः सूयमाना इन्दवः सोमाश्च येमिरे इन्द्रे
णानियम्यन्त इत्यर्थः यद्यपि नात्र ज्योतिश्चरणाभिधानादिति ज्योतिरधिकरणन्यायावकाशः अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यादिवाक्ये पादोस्य विश्वा भू
तानीत्यादि पूर्ववाक्योक्तचतुष्पात् ब्रह्मपरामर्शियच्छब्दानुसारेण भौतिकज्योतिषो दिविवर्तमानत्वाप्रसक्तत्वोपलब्ध्या वाज्योतिः शब्दस्य रूढीत्यागेपि प्रकृते इन्द्रप
दानां रूढीत्यागे मानाभावात् उक्तसूर्यप्रकाशकत्वस्य वज्रिण्यपि संभवात् विश्वभुवननियन्तृत्वादेरप्यारोपेण स्तुतिसंभवाद् न्यथा संपूर्णसूक्तस्थानामनेकेन्द्रप
दानां रूढित्यागः इमा उत्वा पुरुवसो गिरो वर्धन्तु या मम पावकवर्णाः शुचयो विपश्चितो भिस्तोमैरनूषतेति ऋगर्थसंगतिश्च हे पुरुवसो वहुधन इन्द्र इमा मदीयाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सगुणप्रकरणस्येति योहंसोसावित्यादीत्यादिः विशिष्टविषयत्वाज्जीवत्वेश्वरत्वविशिष्टयोस्तादात्म्यविषयकत्वात् समन्वयस्यतात्पर्यस्यतटस्थलक्षणाकर्तृत्वादीति आरोपितंन तटस्थलक्षणमिति तुमोद्ग्रंमन्यतेगन्धादेरपि तटस्थलक्षणस्यारोपितत्वात् अपहतपाप्मत्वादीनां पापशून्यत्वादीनां वहिर्भावेनेतियद्‌ज्ञानात्संसारस्तस्यैवजिज्ञास्यतया प्रत्यग्ब्रह्मणोरैक्यमखंडानंदरूपमेवतथा पापाभावादिकं चाधिकरणस्वरूपतयातद्वकामादिकं चाप्तकामत्वनित्यतृप्तादिश्रुतेः स्वप्रकाशनिरतिशयानंदस्येशस्वरूपत्वाच्चाविद्यकमेव अतएवसोकामयतेत्यादिश्रुत्याकामनादेरतीतत्वे प्रतीयतइतिभावः। अस्वरूपत्वे

तदयुक्तंसगुणप्रकरणस्थैक्यवाक्यजन्यैक्यज्ञानस्यसगुणोपास्त्यन्तर्गततया विशिष्टविषयत्वात् स्वतंत्रै[नस्य]क्यवाक्यजन्यैक्यज्ञानस्यनिर्विशेषविषयत्वेनविशिष्टविषयसगुणोपास्तिवैषम्यात् नचैक्यादेर्विध्यविधिरूपवाक्यद्वयबोधितत्वेन ध्येयत्वज्ञेयत्ववत् सार्वज्ञ्यादेरुपास्तिविधिविषयस्यापि अविधिरूपवस्तुतत्त्वविषयः सर्वज्ञइत्यादिवाक्येबोधितत्वेनज्ञेयत्वमप्यस्त्वितिवाच्यं तटस्थलक्षणद्वारापरब्रह्मप्रतिपत्त्युपायत्वेनतत्त्वमसीत्यादेरिवतत्परत्वाभावात् अतएवब्रह्मणिकर्तृत्वादीनां आरोप्योपास्यत्वेनाग्निब्रह्मवाक्यानामिव ब्रह्मण्यपिकारणवाक्यानांसमन्वयस्यावक्तव्यत्वेनसमन्वयाद्यध्यायानारंभापात इति अपास्तंनाम्नोब्रह्मविकारतया असमन्वयेपिब्रह्मणोऽविकारतयामुमुक्षुज्ञेयत्वेनकारणवाक्यानां तटस्थलक्षणकर्तृत्वादिबोधनद्वारा तत्रैवतात्पर्यसंभवेनसमन्वयादेरावश्यकतयातदध्यायारंभसंभवात् नचयआत्माअपहतपाप्मेत्यारभ्यसत्यकामः सत्यसंकल्पः सोन्वेष्टव्यः सविजिज्ञासितव्यः इतिसत्यकामत्वादीनामपहतपाप्मत्वादिभिःसहजिज्ञास्यत्वश्रवणात् ज्ञेयत्वमितिवाच्यं अपहतपाप्मत्वादीनांस्वरूपतयाजिज्ञास्यकोटिप्रवेशेपिसत्यकामत्वादीनांस्वरूपवहिर्भावेनजिज्ञास्यत्वायोगात् तच्छब्देनतेषामपरामर्शात् यश्चित्रगुर्लंबकर्णश्चतमानयेत्यादौयोग्यविशेषणस्येवतच्छब्देनपरामर्शदर्शनात् अस्वरूपत्वेतेषामप्यपरामर्शेविशेष्यांशमात्रपरामर्शः यश्चित्रगुर्बहुधनस्तमानयेत्यादिवत् अतएवएषसर्वेश्वरएषभूताधिपतिरित्यादिधर्मानुक्त्वा तेषांतमेतंवेदानुवचनेनब्राह्मणाविविदिषंतीतिमुमुक्षुज्ञेयत्वोक्तेयः सर्वज्ञःसर्वविद्यस्यैषमहिमाऽब्रवीदित्युक्त्वातद्विज्ञानेनपरिपश्यंतिधीराइत्यपरोक्षप्रमाविषयत्वोक्तेस्तुरीयंसर्वदृक्सदेतितुरीयसर्वज्ञश्रुतेश्चसर्वज्ञत्वादीनांसत्यत्वादिसिद्धिरिति निरस्तं॥ ९ अभावस्याधिकरणस्वरूपत्वाभावपक्षेविशेष्यांशेति आत्मत्वोपहितेत्यर्थः पूर्वकल्पेतुयद्यपिविशेषणीभूतस्याभावस्यनविशिष्टरूपेणजिज्ञास्यत्वं तथापिगुरुशरीरश्चैत्रोदृष्टइत्यादौगुरुत्वोपहितशरीरस्येवाभावत्वोपहितस्यजिज्ञास्यत्वान्वयः कल्पद्वयेपिशुद्धात्मपरिचायकत्वादपहतपाप्मादिपदानिनव्यर्थानीइतिवोध्यं अतएवसस्वरूपान्यस्यसत्यकामत्वसर्वेश्वरत्वादेर्मुमुक्षुजिज्ञास्यत्वेनवक्ष्यमाणवाक्यस्यतत्पदस्यविशेष्यांशमात्रपरामर्शकत्वादेवनिरस्तमितितुरीयंसर्वदृगितिगौडपादीयवाक्यंतुसर्वविषय

कत्वादीनांज्ञानविशिष्टविषयकसगुणत्वेप्यत्वबोधकश्रुतिविरोधः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संयोगपृथक्त्वन्यायेनेति एकस्य तूभयत्वे संयोगपृथक्त्वमिति जैमिनिसूत्रमेकस्योभयार्थत्वे संयोगस्य विनियोजकप्रमाणस्य पृथक्त्वमुभयत्वं नियामकमिति शेषः त
थाहि यथैकस्य खादिरत्वस्य क्रत्वर्थपुरुषार्थत्वं च खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्वीतेति वाक्याभ्यां तथा बोधितत्वात् तथा मुक्तेः फलान्तरस्य च बोध
कवाक्याभ्यामुभयार्थतेत्यर्थः अधिष्ठान तत्त्वावगाहित्वेति स एष नेति नेतीति नेह नानास्ति किंचन शिवमद्वैतं एकमेवाद्वितीयमित्यादि श्रुत्या परमार्थस्तु भूपाल
संक्षेपात् श्रूयतां मम एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः न योगवान् न यु
क्तो भूपैनैं पार्थिवयोक्ष्यति इत्यादि स्मृत्या च केवलात्मन एव तात्विकत्वेनाधिष्ठानत्वमिति भावः अवांतरमुक्तित्वादिति सगुणस्य मिथ्यात्वेन तत्प्राप्तिरूपमुक्तेर्वि
नाशित्वं तथा च स्मृतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशंति परं पदं सूत्रं च कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् स्मृ

नचैव निर्गुणज्ञानान्मुक्तिश्रुतिरपि तथा तत्परत्वातत्परत्वाभ्यां वैषम्यात् सगुणज्ञानस्य फलान्तरश्रवणाच्च यद्यपि नास्याब्रह्मवित् कुले भवती
त्यादि फलान्तरश्रवणं निर्गुणज्ञानेऽपि स्तुत्यर्थं तयोपपादनमपि समानं संयोगपृथक्त्वन्यायेन उभयफलत्वोक्तिरपि समाना तथापि अधिष्ठा
नतत्त्वावगाहित्वानवगाहित्वाभ्यां निर्गुणसगुणज्ञानयोर्विशेषात् सगुणज्ञानजन्यमुक्तेरवान्तरमुक्तित्वाच्च नच पुण्यपापे विधूयेति सर्वकर्म
निवृत्युक्तेः परममुक्तित्वमेवेति वाच्यं अस्य ब्रह्मतत्त्वसाक्षात्कारहेत्वतिरिक्तकर्मपरत्वात् अविद्यानाशाभावाच्च परममुक्तित्वासिद्धेः नच नि
र्गुणज्ञानजन्याया अपि मुक्तेरवान्तरत्वं असन्नेवेति श्रुत्युक्तशून्यतायाः परममुक्तित्वमिति वाच्यं शून्यताया असुखरूपत्वेनापुरुषार्थत्वात्
असन्नेवेत्यादिवाक्यस्य शून्यत्वाप्रतिपादकत्वाच्च यत्तु गुणविशेषविधिसन्निहितस्य सामान्यनिषेधकस्य निष्प्रपंचवाक्यस्य विहितगुणनिषे
धकत्वं नास्तीति तन्न बाधकस्य निषेधकप्रामाण्यसमकक्षत्व एव संकोचादत्र तदभावात् ॥ ११ तेश्चेति पुण्यपापे विधूयेति यदा पश्यः पश्यते रु

क्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं । तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति मुण्डकश्रुतिः साक्षात्कारहेत्विति साक्षात्कारपूर्वमवश्याभ्युपेय
स्थितिकेत्यर्थः सगुणब्रह्मउपासनया साक्षात्कृतवतोऽपि ब्रह्मलोकावच्छिन्नभोगस्य निर्गुणसाक्षात्कारस्य चावश्यकत्वात्तद्धेतुकर्मावश्यकमिति भावः अविद्या
नाशाभावादिति उक्तरीत्या सगुणस्यापरमार्थत्वेन तज्ज्ञानं न परमार्थाज्ञानरूपबंधनिवर्त्तकमिति भावः निषेधकत्वं नास्तीति न हिंस्यादित्यस्य विहितान्यहिं
सायाइव निर्गुणादिश्रुते विहितसार्वज्ञादिगुणान्यगुणस्य निषेधकत्वमिति भावः बाधकस्य विशेषविधापकशास्त्रस्य समकक्षत्वे तात्पर्यविशेषघटितत्वा
दिरूपे साहचर्ये निर्गुणवाक्यं स्वार्थपरं सगुणवाक्यं तु न सगुणत्वपरमुपासनापरत्वस्यावश्यकत्वेनोभयपरत्वेन वाक्यभेदादिति तयोः प्रामाण्यं न सममिति भावः

२ अ॰ सि॰ टी॰ ल॰ उ॰ ४६

शस्त्ररूपा गिरस्त्वां वर्धयन्तु पावकवर्णा अग्नितुल्या विपश्चित उद्गातारः स्तोमैः स्तोत्रैर्बहिष्पवमानादिभिरभ्यनूषत अभिष्टुवंति नुस्तुतो कुटादिः एवं च स्तोत्रशस्त्र स्तूयमानत्वमिन्द्रस्यैव देवतात्वात् न परमेश्वरस्येत्यसंगतिरेवमभित्वा पूर्वपीतये इन्द्र स्तोमेभिरायवः समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यमित्यस्या ऋचि आयवः मनुष्या ऋत्विजः पूर्वपीतये प्रथमं सोमपानाय तल्लाभे वा मि अभिष्टुवंति समीचीनासः शोभना ऋभवस्त्वामेव समस्वरन् सम्यगस्तुवन् तथा रुद्राः रुद्रपुत्राश्च पूर्व्यं पुरातनं त्वामेव गृणान्त अभ्यस्तुवन् वृत्रवधे प्रहर भगवो जहि वीर यस्वेत्येवंस्वरूपया ऋचा त्वामेवस्तुतवंत इत्यर्थो प्यसंगतः नहि परमेश्वरः उक्तस्तुतिविषयः इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये इत्यादि ऋक्षु वनिनः संभजमानां वयमिन्द्रमित् इन्द्रमेव हवामहे आव्हयामः हृवैस्तूयत इति देवतातिः यज्ञस्तस्मै तद्भोगाय अध्वरे यज्ञे प्रयत्यु पक्रान्ते सति समीके सम्यक् गते संपूर्णे च यज्ञे सति धनस्य सातये लाभाय चेत्याद्यर्थानां तु परमेश्वरदेवताककर्मणि परमेश्वराव्हानसंभवेपि इन्द्रपदानां वह्नीनां रूढीत्यागो नोचित इति विश्वा भुवनानीत्यादौ विश्वादिपदसंकोचेनापरमे

तन्न। निर्गुणत्वश्रुतिविरोधेन स्वरूपमहत्त्वस्यैव सत्यत्वोक्तेः षष्ठ्या उपचरितत्वात् धर्माणामपि व्यावहारिकसत्यत्वोक्तेः न च ब्रह्म सत्त्वमपि तथासत्यस्य सत्यमिति निरतिशयसत्त्वप्रतिपादनविरोधादधिष्ठानत्वानुपपत्तेश्च न च तत एव सविशेषत्वं निर्विशेषत्वेपि तत्त्वस्योपपादितत्वात् न च पृथगात्मानमित्यादिश्रुतिषु योमामशेषदोषास्पृष्टगुणसर्वस्ववर्जितं जानात्यस्मै प्रसन्नो हं ददामि मुक्तिं न चान्यथा भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छतीत्यादिस्मृतिषु च सविशेषज्ञानादेव मोक्षोक्तेः सप्रकारकज्ञानस्यैव मोचकत्वमिति वाच्यं परमम् मुक्तिहेतुनिर्गुणसाक्षात्कारोपयोगिसत्त्वशुद्ध्युपायसगुणोपासनाविध्यर्थवादतया साक्षान्मुक्तिहेतुत्वाप्रतिपादकत्वात् ॥ ःः ॥

श्वरेन्द्रपरत्वमेव प्रकृतसूक्तस्य युक्तमत एव तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये इत्यत्र सुवीर्यं त्वां प्रति तद्ब्रह्म अनुरूपं यामि याचामि प्रार्थयामि वाकारलोपश्छान्दसः पूर्वचित्तये सर्वेषामनुप्राप्तेः पूर्वमन्नलाभायेति माधवीयभाष्यव्याख्यातं तथापि परोक्तमनुसृत्याह तन्नेति निर्गुणेति स्वरूपमहत्वेति स्वरूपस्यापि कारणत्वेनाभीष्टफलदत्वादिसंभव इति भावः स्वरूपस्याकारणत्वमते मायादिविशिष्टस्य कारणत्वात् तस्य च तात्विकत्वासंभवाद्व्यावहारिकत्वमेव सत्यपदार्थस्तथा च ज्ञानेच्छादिधर्माणामपि महिमपदार्थत्वसंभव इत्याशयेनाह धर्माणामिति तत एवेति विशेषरूपेणाज्ञातस्य सामान्यतो ज्ञातस्याधिष्ठानत्वात् सविशेषत्वमिति भावः। निर्विशेषत्वेपीति ज्ञातेपि शुद्धे अज्ञातत्वस्योक्तत्वात् कल्पितभेदेन ज्ञानत्वाज्ञातत्वसंभवाच्च निर्विशेषमप्यधिष्ठानमिति भावः हेतुत्वाप्रतिपादकत्वादिति प्रेरितारमीश्वरमात्मानं जीवं च पृथक् तदुभयविलक्षणाखंडानंदरूपेण तत्त्वमस्यादिवाक्येन ज्ञात्वेति श्रुत्यर्थः दोषास्पृष्टगुणशून्यत्वेन यज्ञभोक्तृत्वादिना चोपलक्षितं ज्ञात्वेति स्मृत्यर्थः अद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः तमेव विदित्वेत्यादिश्रुतेः विज्ञानं परमार्थो सौ द्वैतिनो तथ्यदर्शिनः ज्ञानं यथा सत्यमसत्यमन्यदित्यादिस्मृतेश्चेत्यादि पूर्वोक्तमपि बोध्यम् ॥ राम॰ २५६

CC-0. In Public Domain. Digitization by eGangotri

नवतेत्यादित्वदनुपथंकुलापमिदमात्मसुहृत् प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रिय आत्मनिचनवतरमंत्यहो असदुपासनयात्महनोयदनुशयाभ्रमंत्युरुभये कुशरीरभृतइतिभागवतदशमेवेदस्तुतिः आराममस्य पश्यंतिनतंपश्यतिकश्चनेत्यादिश्रुतयोदेहादौस्वाभाविकींरतिंत्यक्त्वा आत्मनिरतिंकर्त्तव्यांवदंतीत्याह त्वदनुपथंत्वदधीनंकुलायंकौपृथिव्यांलीयमानमिदंशरीरमात्मवत्सुहृत्प्रियवच्चरतिभातितवात्मस्वरूपस्यतादात्म्याध्यासात् त्वमिवभातितथापिउन्मुखे पूर्णानंदरूपेणभासमानेत्वयिहितेपूर्णानंदेप्रियेनिरुपाधीच्छाविषये आत्मनिनरमन्ति अहोवतकष्टं असतोमिथ्याभूतस्यदेहादेरुपासनयाहंगौरःकुलीनोगुणीत्यादिप्रत्यया वृत्त्यात्महन आत्मस्फुरणविरोधिविपरीतभावनोपचययुक्ताः यदनुशयायउक्तोपचयरूपोनुशयोयेषान्ते उरुभयेसंसारेभ्रमन्तीत्यर्थः अत्यंतासदितिननु अत्यन्तासत्त्वंप्रातीतिकत्वमलीकत्वंवानाद्यः वागधेनुत्वादेरुपास्यत्वात् नचोपास्यत्वेनविहितंयत् तदन्यप्रातीतिकत्वन्तदितिवाच्यं तदुपासनस्याप्रसक्तत्वेनानिषेध्यत्वात् अतएवनांत्यः नह्यलीकमुपास्यत्वेनविहितंयेनतदुपास्यत्वेनप्रसज्येत अथउपास्यत्वेनाविहितस्यापिदेहादेरागप्राप्तोपास्यत्वेननिषेधार्हत्वमित्युच्यतेतर्हिस्मृतेः प्रतिषेधपरत्वेनसार्थकत्वेपिसूत्रानर्थक्यंन्यायाप्रतिपादनात् नहिसूत्रंविधिप्रतिषेधरूपंकिंतुन्या

नवतरमंत्यहो असदुपासनयात्महन इत्यादिस्मृत्या अचेतनासत्यायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्यामितिसंकर्षणसूत्रेणापिनिषेधादितिचेत् नस्मृतिसूत्रयोरत्यन्तासदुपास्तिनिषेधपरतयातद्विरोधाभावात् वाचन्धेनुमुपासीतेत्यादौप्रातीतिकस्याप्युपास्यत्वदर्शनाच्च नचतत्रराग्निर्न्धेनुमिवायतीमिति श्रुत्यन्तराद्धेनुशब्दोगौणः योषितमग्निंध्यायीतेत्यत्रापिरेतोजुहूतीतिश्रुतेरेतोरूपाहुत्याधारत्वेन अग्निशब्दोगौणोभाष्योक्तरीत्या यौगिकोवानत्वारोपइतिवाच्यं आरोपेणमुख्यत्वसंभवेगौणताया अन्याय्यत्वात् ॥ ❁ ॥

यविशेषसूचनद्वाराप्रतिषेधतात्पर्यनिर्णायकमिति चेदत्रब्रूमः अत्यन्तासदित्यस्यउपास्यत्वेनविधेयत्वायोग्येत्यर्थः तत्वंचद्वेधाउपास्यत्वेनविध्यभावात् । तद्भावेपिन्यायविरोधाद्वा तथाचदेहादेरुपास्यत्वेनाविधेयत्वेप्युपास्यत्वेनरागप्राप्तत्वात् स्मृत्योपास्यत्वेननिषेध्यतासूत्रेणयत्रव्यावहारिकंप्रातीतिकंचविहितोपास्यत्वेनप्रसक्तं तत्रव्यावहारिकमेवोपास्यंशास्त्रार्थोनतुप्रातीतिकंव्यावहारिकसंभवेप्रातीतिकस्यानादेयत्वात् यथोद्गीथोपासनायामनंतत्वादिप्रातीतिकंआकाशादौनोपास्यंकिन्तुब्रह्मणिसत्यं यथावासत्यकामत्वादिकंब्रह्मण्युपास्यंव्यावहारिकंनप्रातीतिकंदेवताधिकरणन्यायेनोपासनावाक्यस्यव्यावहारिकप्रामाण्यात् एवंयत्रचेतनमचेतनंचोपास्यंविधिनाप्रसक्तंतत्रचेतनमेवोपास्यंशास्त्रार्थःश्रद्धातिशयलाभात् एवंयत्रोपास्यत्वेनयंपुरुषंप्रतियद्योग्यं यथातामसंप्रतिपरमसात्विकीविष्णुमूर्तिःसात्विकंप्रतिवातामसीभैरवविशेषादिमूर्तिस्तत्तेननोपास्यमश्रद्धादिसंभवादितिबोध्यतइतिभावः मिथ्याभूतेउपास्यत्वनिषेधपरत्वेत्वयापिवक्तुमशक्यमित्याशयेनाह वाचमितिश्रुत्यंतरादितिरात्रौधेनुसादृश्यस्यश्रुत्यन्तरेणाकथनादित्यर्थः तद्वदितिशेषः गौणःधेनुसादृश्य परः भाष्योक्तरीत्या ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपास्यत्वे अतात्विकोपास्यत्वे उपासनामात्रंनतुतात्विकत्वंविरोधाभावेनेति अनंतत्वादेरधिकरणात्मकाभावरूपत्वेननविरोधः अधिकरणानात्मकत्वपक्षे।
पिव्यावहारिकस्यसंभवेप्रातीतिकस्यनग्रहणमितिनभूताकाशे उपासनेतिभावः श्रवणमितीति तस्य ज्ञेयत्वमावश्यकमितिशेषः पूषाद्यनुमंत्रणेतिदर्शपौर्ण
मासादिप्रकरणेपठितस्यदर्शादौपूषदेवताविरहेण यथापूषदेवताककर्मणिलिङ्गेनविनियोगस्तथासत्यकामत्वादेर्ज्ञेयब्रह्मप्रकरणपठितस्यज्ञानान्वयासं
भवेनसगुणोपासनायामन्वयइत्यर्थः।स्वप्रकरणएवस्तावकत्वेनान्वयसंभवे उत्कर्षोनयुक्तः प्रतीतैकवाक्यताभंगापत्तेरित्याशयेनाहद्वादशेतितिस्र एव।
सान्हस्योपसदोद्वादशाहीनस्येतिवाक्ये अहर्गणरूपाहीनगतोपसदांद्वादशत्वेनानुष्ठानगौरवद्वारानिंद्यासान्हगतोपसत्त्रयस्यविधेयस्यतद्भावेनयथास्तु

यत्तुउपासनाप्रकरणस्थत्वमात्रेणउपास्यत्वे उद्गीथोपासनास्थस्यस एवानंत इतिश्रुतानंतत्वादेर्भूताकाश उपासनामात्रमितिसुवचत्वेना
काशाद्यधिकरणे अनन्तत्वादिलिङ्गैर्ब्रह्मत्वोक्त्ययोगइतितन्न उपासनाप्रकरणस्थत्वेपिनिर्गुणश्रुतिविरोधाभावेनतात्विकत्वांगीकारा
त् तस्यचाकाशाद्यावसंभवेनतत्तदधिकरणारम्भसंभवात् यत्तुसत्यकामत्वादेरनुपास्तिप्रकरणेश्रवणमितितन्न पूषाद्यनुमंत्रणमंत्रव
त् प्रकरणादुत्कर्षस्यद्वादशोपसत्तावाक्यवत् स्तावकत्वस्यवासंभवात् यत्तुवेधाद्यर्थभेदादित्यत्रसर्वंप्रविध्येत्यादिमन्त्राणांउपासनाप्र
करणादुत्कर्षस्योक्तत्वेनतन्न्यायेनानंतादिवाक्यस्याप्युत्कर्षः स्यात् तस्यवाक्यस्य उपास्तिपरत्वेवस्तुतत्त्वपरत्वेचसगुणवाक्यस्यापितथा
स्यादितितन्नस्वरूपपरसत्यंज्ञानमनंतमित्यादिवाक्ये अनंतत्वादेः स्वरूपएवसत्त्वेनउत्कर्षप्रयोजनाभावात् तस्यवस्तुतत्त्वमात्रपरत्वे।
नउभयपरत्वाभावाच्च उपास्तिप्रकरणस्थानंतवाक्यस्य उभयपरत्वेपिनिर्गुणश्रुतिविरोधेनसगुणवाक्यस्योभयपरत्वाभावात् नचैवंसार्व
ज्ञ्यादीनांवाग्धेनुत्वादिवत्प्रातीतिकत्वापत्तिः वाग्धेनुत्वादेर्बुद्धिपूर्वकारोपविषयतयाप्रातीतिकत्वेपिसत्यकामत्वादेरीश्वरादन्यत्रासंभवे
नबुद्धिपूर्वकारोपविषयत्वाभावात् नन्वसदुपासनानघटते नाविद्यमानंब्रुवतेवेदाध्यातुंनवैदिकाः॥

तिस्तथासगुणब्रह्मणः सत्यकामत्वा
दिनाविधेयस्यनिर्गुणात्मनः स्तुतिरितिभावः इत्यत्रसूत्रे उभयपरत्वेपितात्विकानंतत्वादौउपासनाकर्तव्यतायांच प्रमापकत्वेपि अनंततत्वादेरधिकरणीभूतब्रह्म
रूपत्वेननिर्गुणश्रुत्यविरोधादुपासनावाक्यादपिदेवताधिकरणन्यायेनतात्विकानंतत्वादिप्रमेतिभावः उभयपरत्वाभावात् तात्विकसत्यकामत्वादावुपासनाकर्तव्य
त्वेचप्रमापकत्वाभावात् यथाश्रुते उपास्तिवाक्यस्यानंतत्वादिपरत्वेवाक्यभेदापत्तेरसंगतिः बुद्धिपूर्वकेतिव्यावहारिकविषयकबुद्धिपूर्वकेत्यर्थः वागादौधेनुत्वादेर्व्याव
हारिकप्रमाणाविषयत्वात् प्रातीतिकत्वंयुक्तंसत्यकामत्वादौतुदेवताधिकरणन्यायसिद्धव्यावहारिकप्रमाणताकश्रुतिविषयत्वात्तन्नयुक्तमितिभावः नाविद्यमानमित्या

अविद्यमानंध्यातंवेदावैदिकाश्चनब्रुवतेइत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रह्मत्वनिषेधाच्चेति सत्यं ज्ञेयब्रह्मस्वरूपत्वनिषेधाच्चेत्यर्थः सगुणवाक्यं नोपास्तिसगुणत्वोभयपरमिति पूर्वेणानुषक्तेनान्वयः। अश्रौतज्ञानस्येत्यादि विदितादित्यस्य श्रुत्यमानेन न विदितादित्यर्थः अविदितादित्यस्य च सकलगुणवत्त्वाविषयकाप्राशस्त्यज्ञानविषयादित्यर्थः तथा च ज्ञेयब्रह्मणस्तदुभयान्यत्वोक्त्या श्रुत्यैव सकलगुणवत्त्वेनैव ज्ञेयं ब्रह्मेति लभ्यते एवं नेदं यदिदमुपासत इत्यत्रापि श्रुतिभिन्नेन नोपास्यं सकलगुणकत्वं विना नोपास्यं ब्रह्मेत्यर्थात् श्रुत्यैव सकलगुणकमेव ब्रह्मोपास्यमिति लभ्यत इति भावः। विदिताविदितपदयोरुक्तार्थपरत्वे लक्षणादोषात् ज्ञानकर्मैव विदितपदार्थः शक्तिलभ्यत्वात् अविदितपदं तु न तदन्यार्थकं ब्रह्मणोपि ज्ञानकर्मत्वात्

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति गुणविशिष्टस्य उपास्यस्य ब्रह्मत्वनिषेधाच्च न च अन्यदेव तद्विदितादथो अविदितादधीति श्रुतौ अश्रौतज्ञानस्याऽकात्स्न्र्येन ज्ञानस्य वा निषेध इति तदेव ब्रह्मेत्यादावश्रौतध्यानस्याकात्स्न्र्येन ध्यानस्य वा निषेधेन नोपास्यस्य ब्रह्मत्वनिषेधः अन्यथा तस्याभिध्यानादित्यादि श्रुतिविरोध इति वाच्यं अन्यदेवेत्यादौ विदितात् प्रमेयात् घटादेरविदितादप्रमेयात् शशविषाणादेर्वैलक्षण्येन स्वप्रकाशत्वप्रतिपादनपरतया त्वदुक्तार्थेऽदृष्टान्तत्वात् उपास्ये ब्रह्मत्वनिषेधेपि न तस्याभिध्यानादिति श्रुतिविरोधः अभिध्यानशब्दस्य निदिध्यासनवाचकत्वात्॥ ध्यानपरत्वेपि क्रममुक्त्यर्थत्वेन विरोधाभावात् तस्मात्साधकाभावान्निर्गुणं ब्रह्म सगुणत्वे बाधकसद्भावाच्च न चासिद्धिः मिथ्यात्वश्रुतेर्निर्गुणश्रुतेश्च बाधकत्वात् मिथ्यात्वश्रुतेर्बाधकत्वप्रकारस्य मिथ्यात्ववादेऽखण्डार्थवादे च निरासात् ननु निर्गुणवाक्यं सगुणवाक्यं च बाधते न तु सगुणवाक्यं तदिति किमत्र नियामकं न च निषेधकतया निर्गुणवाक्यं प्रबलं असद्वा इत्यादिवाक्यस्य सदेवेत्यादिवाक्यात्प्राबल्यापत्तेरिति चेत् न अपच्छेदन्यायेन प्राबल्यस्य प्रागेवोक्तेः निषेधत्वाच्च प्राबल्यं असद्वा इत्यत्रासच्छब्दस्य अनभिव्यक्तपरत्वेनाऽनिषेधत्वात् नैतन्न्यायेन प्राबल्यं। निर्गुणवाक्यस्य पुरुषार्थपर्यवसायितया तत्परत्वेन प्राबल्यात् सगुणवाक्यस्य तत्सन्निधिपठितस्य फलवत् संनिधावितिन्यायेन तदनुगुणतया नेयत्वात् न च सगुणज्ञानस्य मोचकत्वं तस्य प्रागेव निरासात् अत एव सगुणनिर्गुणत्वयोर्विरोधे न समुच्चययोगात् अनुष्ठानइव च वस्तुनि विकल्पायोगात् एकस्य प्रतीतार्थत्यागरूपे बाधे वक्तव्ये निर्गुणवाक्यस्यैव सयुक्तः न तु प्रबलस्य सगुणवाक्यस्येति निरस्तं प्राबल्यासिद्धेः न चोपक्रमाधिकरणन्यायेन अनुपजातविरोधित्वात् निर्गुणश्रुतेः प्रतियोगिज्ञानापेक्षया विलंबितत्वेन लिंगाच्छ्रुतेरिव शीघ्रगामित्वात् पदे जुहोतीति वद्विशेषविषयत्वाच्च सगुणवाक्यस्य प्राबल्यमिति वा

किन्तु प्रमायां विदेर्लक्षणया प्रमाविषयान्यपरं त्वन्मतेनञो प्रशस्तलक्षकत्वे तदर्थस्य धात्वर्थज्ञानेन्वयेन व्युत्पन्न इति तल्लक्षणानयुक्तेत्याशयेनाहान्यदेवेत्यादावितिक्रममुक्त्यर्थत्वेन क्रममुक्तिहेतुसगुणोपासनार्थकत्वेन ज्ञेयब्रह्मणो ध्येयत्वाबोधकत्वादिति शेषः साधकाभावात् सगुणसत्यत्वसाधकाभावात् सगुणत्वे सगुणसत्यत्वे निषेधत्वात् परीक्षितनिषेधत्वात् तेन निषेधाभासस्याप्राबल्येपि न क्षतिः पुरुषार्थेति परमपुरुषार्थेत्यर्थः तदनुगुणतया निर्गुणवाक्यजन्यज्ञानानुकूलचित्तैकाग्र्यादिफलकोपासना

॥ र्थं उपक्रमाधिकरणन्यायस्य ॥

परतया उपास्यसमभिव्याहृतसगुणवाक्यं तु निषेधापेक्षितप्रतियोगिसमर्पकतया ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ·सि· दी·ल· उ· ५८

नारायणादयः पंचक्रमात् पंचाग्नयः स्मृताः अदनादंगनेतृत्वान्नितरामचलत्वत इति माध्वभाष्यरीत्या असौवावलोकोगौतमाग्निरित्यादिच्छांदोग्यवाक्ये स्वर्गे
कादयः प्रतीयमानाः न पंचाग्नयः किन्तु नारायणादय इति तदर्थः यत्रेति कौंडपायिनामयने मासमग्निहोत्रं जुहोतीत्यादौ वेदे सिंहो माणवक इत्यादौ लोके च
इति शेषः निष्प्रयोजनत्वेनेति अग्निहोत्रसादृश्यार्थ काग्निहोत्रपदेन नैयमिकाग्निहोत्रधर्माणां मासाग्निहोत्रे प्राप्त्यर्थ सिंहगुणशौर्यादिप्रतीति तात्पर्यनिर्वाह
र्थ चेति शेषः कथमपि संभवे सादृश्यादिप्रतियोगितया शाब्दधीविषयत्वसंभवे अन्याय्यत्वादिति रूढार्थस्मारितगौणार्थविवक्षायां रूढार्थस्यात्यागात् यौगिकार्थस्य
चनानावयववृत्तिसापेक्षत्वेन रूढार्थापेक्षया दुर्बलत्वात् गौणार्थत्यागेन यौगिकार्थग्रहणं रथकाराधिकरणविरुद्धमिति भावः ब्रह्मादौ ब्रह्माधिकरणे। नामादौना
मादिपदार्थोषादौ गौणाइति उषाकालादिकं ध्येयस्य हरेराधार इति उपासीत उषादिकं यथाधारो भवति तथोपासीत उषाकालादौ विद्यमानः सन् हरिमुपासीतेतिया

न च गौण्युच्छेदः यत्रोपासनाया अश्रवणान्तत्रारोपस्य निष्प्रयोजनत्वेन गौण्युपपत्तेः रूढार्थस्य कथमपि संभवे यौगिकार्थत्वस्य अन्याय्यत्वाच्च
एतेन नाम ब्रह्मेत्यत्र नामाभिमानिनी चोषा तस्यां ब्रह्म हरिं स्मरेदिति स्मृत्यैव ब्रह्माधिष्ठाने नामादौ गौणो ब्रह्मशब्दः नामेति प्रथमा वचनं वसंतो मा
रुत इतिवत् सप्तम्यर्थे ब्रह्मेति प्रथमा वा पंचम्यर्थे ब्राह्मणो स्य मुखमितिवत् सुपां सुलुगिति सूत्रात् अन्यथा श्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शो
कमात्मविदिति पृष्टवंतं नामोपास्त्युक्तिरयुक्ता स्यात् प्रतिमायामपि देवतातत्त्वबुद्धित एव फलं न तु देवताऽतत्त्वबुद्धितः शिला देव इति ज्ञानस्य भौ
मइज्यधीरित्यादिना निषेधादिति निरस्तं आरोपेणामुख्यत्वसंभवे गौणत्वस्यान्याय्यत्वात् समानविभक्तिकत्वाभावे इति शब्दानन्वयप्रसंगात्।
एवं प्रतिमादावपि देवतात्वारोपेणामुख्यत्वे गौणत्वमन्याय्यमेव न च भौम इज्यधीरिति निषेधान्न तथा तस्य भौमातिरिक्तश्चेतनो देवो नास्ती
ति भ्रमव्युदासपरत्वेन आरोपानिषेधकत्वात् अनात्मोपास्तेस्तु भूमाख्य ब्रह्मोपदेष्टुमेव शाखाचंद्रन्यायेनावतारितत्वात् ॥१॥ वत् इत्थमेवोक्तस्म

तिसमानार्थतेति ध्येयं सप्तम्यर्थे इति वेत्यग्रे न्वयस्तेनोषायां हरिमुपासीतेत्यर्थः इति शब्दानन्वयस्तु अस्मिन्नेव पक्षे वक्ष्यते इति पृष्टवंतं इत्यादिना शुद्धात्मानं
पृष्टवन्तं तत्त्वबुद्धित आधारत्वबुद्धितः अतत्त्वबुद्धितस्तादात्म्यबुद्धितः चेतनो देवो नास्तीति साधुजन उपास्यो नेत्यर्थः यः स्वात्मबुद्धिः कुणपे त्रिधातुके स्वधीः
कलत्रादिषु भौम इज्यधीः यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखर इति स्मृतेः देहादिभिन्न आत्मा साधुजनाः स्वीयाः पूज्यास्तीर्थभूताश्चेत्यत्र ता
त्पर्यात् देहादिभिन्नो नात्मा साधवः स्वीयत्वपूज्यत्वतीर्थत्वशून्या इति भ्रमव्युदासपरत्वमिति भावः यथाश्रुते ध्वरमीमांसकानां चेतनदेवानंगीकारिणां मते विरोधः
न कर्हिचिज्जनेष्वभिज्ञेष्विति सर्वातेनिर्देशात् साधूनामेव स्वीयत्वादिपरत्वधीविरोधश्च स्वात्मत्वं तु तेषां न संभवतीति न तत्परत्वधीरिति ध्येयं शुद्धात्मनि नारदेन पृष्टेऽना
त्मनिर्देशो न युक्त इति यदुक्तं तत्राह अनात्मेति शाखाचंद्रेति प्रथमतः शुद्धात्मनो दुर्बोधत्वात् पश्चात्तं बोधयितुं नामाद्यवच्छिन्नात्मरूपानात्मोपास्तिः प्रथममुक्ता यथा प्र

राम: २५८

CC-0. In Public Domain. Digitization by eGangotri

यः शब्द इत्यादि किं विद्धर्मप्रकारेणोद्देश्यबोधकं यत् पदं तत्रायं न्याय इत्यर्थः लक्षणाया शुद्धलक्षणायानायं प्रवर्त्तत इति यथा प्रकृष्टप्रकाशश्चन्द्र इत्यादौ चन्द्र पदेन शुद्धव्यक्तिरेवोपदिश्यते यथा च शुद्धस्योद्देश्यत्वविधेयत्वे तथा श्रुत्यादि तमखण्डार्थवाद इति शेषः स्वतो व्यावृत्तेति शुद्धबोधकाले विशेषणबोधं विनापि तत्पूर्वं द्वारीभूतबोधविशेषणाभावेनार्थिकव्यावृत्तिधीविषयेत्यर्थः छागपशुन्यायेनेति छागस्य वपाया मेदसो नुब्रूहीति मन्त्रबलादग्नीषोमीयं पशुमालभेतेति वाक्यस्य पशुपदं यथा छागार्थकमुक्तं तथेत्यर्थः अमानत्वेन अतात्पर्येण अत्रापि त्रैगुण्यादिवाक्येपि तुल्यत्वादिति स्मादिभ्योदध्यादिरक्षणास्येष्टसाधनत्वं मानांतरेणाप्रमायकाकपदं दध्युपघातकसामान्ये लाक्षणिकं यथा निर्णीयते तथा निर्गुणश्रुत्यादेर्गुणमात्रनिषेधकत्वं प्रमायत्रैगुण्यादिपदं गुणसामान्यल

यः शब्दो यत्र प्रवृत्तिनिमित्तमर्पयन् धर्मिणमुपस्थापयति तत्रायं न्यायः यस्तु लक्षणयोपस्थापयति तत्र नायं प्रवर्त्तते न च लक्षकेणापि शब्दे नेतरव्यावृत्तमसंकीर्णमेव वस्तुस्वरूपमुद्देष्टव्यं अन्यथा यत्र क्वचन धर्मिनिषेधः स्यादिति वाच्यं गंगायामित्यादावितरनदीतीरव्यावृत्ततीर लाभवदत्रापि स्वतो व्यावृत्तवस्तुन एवोद्देश्यत्वसंभवात् किन्धर्मसमर्पणेन न च निर्गुणवाक्यस्य छागपशुन्यायेन त्रैगुण्यवर्जितं विनाः हेयै र्गुणादिभिरित्यादिविशेषोपसंहार इति वाच्यं नेति नेतीत्यादिवीप्साबलेन प्रसक्तसर्वनिषेधे प्रतीते कतिपयविशेषपरिशेषस्य कर्त्तुमशक्यत्वा दत एव काकेभ्यो दधिरक्ष्यतामितिवत् त्रैगुण्यादिनिषेधस्यैव सामान्यविषयत्वं सार्वज्ञ्यादौ श्रुतेरमानत्वेनाविरोधादत्रापि काकपदइवमानांत रानुग्रहस्य तुल्यत्वात् तथापि विशेषोपसंहारे न हिंस्यात्सर्वाभूतानीत्यस्य ब्राह्मणो न हंतव्य इत्यत्रोपसंहारापाताद्व्यर्थहिंसायां विध्यभाववत् सार्वज्ञ्यादिगुणेष्वपि विध्यभावस्य समानत्वात् निषेधसाम्योपपत्तेः अत एव धर्मान् पृथगित्यादिश्रुतेः सविशेषणे हीति न्यायेन गुणानां पार्थक्य स्यैव निषेधात्तत्समाख्यानादन्यत्रापि तथैव निषेधो युक्त इति निरस्तम् सविशेषणे हीति न्यायस्य विशेष्यबाधकावतार एव प्रवृत्तेः॥ ः ॥

क्षकं निर्णीयत इत्यर्थः। तथापि मानान्तरानुग्रहेपि विशेषोपसंहारे निर्गुणवाक्यस्य गुणविशेषनिषेधकत्वस्वीकारे उपसंहारापातादिति सर्वभूतपदं ब्राह्मणप रंस्यादिति भावः ननु अग्नीषोमीयपश्वादिवैधहिंसान्यहिंसारूप ———— व्यर्थहिंसायां विध्यभावान्न हिंस्यादिति निषेधस्तत्साधारणो युज्यते सार्वज्ञ्या दिगुणेषु तु विधिसत्त्वात्तत्साधारणत्वं निर्गुणवाक्यस्य न युक्तं तत्राह व्यर्थेति विध्यभाववत् श्रुतितात्पर्याभाववत् विध्यभावस्य श्रुतितात्पर्याभावस्य निषेधसा म्येति न हिंस्यादिति वाक्य निर्गुणवाक्यरूपनिषेधयोर्व्यर्थहिंसासार्वज्ञ्यादिगुणसामान्यविषयकतया साम्येत्यर्थः धर्मान् पृथगिति यथोदकं दुर्गे वृष्टं पर्वतेषु विधिवति एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति यथोदकं शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवतीति कठश्रुतिः पार्थक्यस्यैवेति पृथक्त्वेन गुणानद्र ष्टव्याः किन्तु ब्रह्माभिन्नत्वेनेति श्रुत्यर्थः इति पार्थक्यस्य मोक्षहेतुप्रमाविषयत्वनिषेधेन मिथ्यात्वमिति भावः तत्समाख्यानात् तत्समानार्थकत्वसंभवादन्यत्रापि शास्त्रांतरीयनिर्गु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथासिद्धेति अन्यथानेतुं शक्येत्यर्थः सगुणवाक्यस्यानपेक्षणीयत्वेन तद्बाधित्वेव निर्गुणवाक्यप्रवृत्तेरपच्छेदन्यायेन परमपुरुषार्थपर्यवसायित्वेन च प्रबलनिर्गुणवाक्यं नान्यथानेतुं शक्यमिति भावः प्रसंगादिति तथा च निषेधवाक्येन प्रतियोगिज्ञापकतया वाक्यान्तरं नापेक्षते स्वस्यैव प्रतियोग्युपस्थापकत्वात् निषेधाधिकरणे प्रतियोगिप्रसंजकतयापेक्षमाणमपि ग्रहणादिवाक्यं नाग्रहणादिवाक्यस्य सर्वथा प्रमात्वाभावे हेतुः किन्तु पाक्षिके निर्गुणवाक्यस्य उक्तप्राबल्यात् तद्वस्तु निर्विकल्पासंभवाच्च न पाक्षिकोपि सः किन्तु तदनुगुणतया सगुणवाक्यमेव नीयत इति भावः प्राबल्यादिति अन्यपरत्वात् सगुणवाक्यं न समकक्षं विशेषविषयत्वमात्रेण प्राबल्ये तु अर्थवादस्यापि न स्यादिति भावः दीक्षणीयेत्यादि यत् किंचित् प्राचीनमग्नीषोमीयात्तेनोपांशु चरंतीत्यस्य दीक्षणीयान्यत्र सावकाशत्वात् यावत्या वाचाकामयीत तावत्या दीक्षणीयामनुब्रूयादिति वाक्यं दीक्षणीयभिन्ने निरवकाशं यथा ययाकामस्वरविधायकं तथा सगुणवाक्यबोधितसार्वज्ञ्यादिगुणान्यसत्त्वादिगुणेषु निर्गुण

अन्यथासिद्धोपसंहारविषयत्वात् प्रकृते च तदभावात् सगुणवाक्यस्य प्रतियोग्युपस्थापकतया शीघ्रगामित्वेन प्राबल्ये ग्रहणवाक्यस्यापि प्राबल्यापत्त्या विकल्पाभावप्रसंगात् सामान्यविषयप्रमाणसमानकक्षस्यैव विशेषविषयस्य प्राबल्यात् प्रकृते च तदभावात् एतेन दीक्षणीयायामनुब्रूयादितिवन्निरवकाशत्वेन प्राबल्यं निर्गुणश्रुतिर्हि देवात्मशक्तिं स्वगुणैर्निगूढां दैवी ह्येषा गुणमयीत्यादिश्रुतिस्मृतिषु च सत्त्वादिगुणे सावकाशेति निरस्तं सावकाशनिरवकाशन्यायस्य समकक्षविषयत्वाच्च अत एव बहुत्वादपि न प्राबल्यं शतमप्यंधानां न पश्यतीति न्यायाच्च न च प्रवृत्तिनिमित्तापेक्षैर्ब्रह्मादिशब्दैर्धर्मिणां निर्दिश्यक्रियमाणो धर्मनिषेधं प्रति उपजीव्यतया गुणसमर्पकाणां प्राबल्यं ग्रहैकत्ववदुद्देश्यविशेषणतया प्रवृत्तिनिमित्तानामविवक्षितत्वात् न च ग्रहैकत्वन्याये उद्देश्यस्वरूपे लब्धे यदधिकं तस्यैवाविवक्षेति स्थितिः अन्यथा ग्रहत्वस्याप्यविवक्षास्यात् अतएवोक्तं हविरार्त्तिनियेमृष्यामहे हविषा विशेषणं उभयत्वं तु न मृष्यामहे इति वाच्यम् ॥ २ श्रुतेः सावकाशत्वात् सगुणश्रुतिः सार्वज्ञ्यादिगुणपरेति भावः विषयत्वाच्चेति गुणशब्दस्य रूपादिरूढस्य सत्त्वादिषु निरूढलक्षणापत्तिरप्रधानत्वरूपगुणीभूतत्वरूपेण हि सत्त्वादौ गुणपदं लाक्षणिकं न हि सत्त्वादिगुणयुक्ता माया किंतु सत्त्वादित्रयरूपेत्यपि बोध्यं। हविरार्त्तिनिये यस्योभयं हविरार्तिमार्छेत् स ऐन्द्रं पंचशरावमोदनं निर्वपेदिति वाक्यविचारे हविषा विशेषणं हविरभिन्नं विशेषणं नाशरूपार्तिमात्रस्य हविर्मात्रस्य वा सार्वदिकत्वात् निमित्तत्वासंभवेन हविर्नाशस्य निमित्तत्वसंभवाद्धविषो निमित्तीभूतोद्देश्यविशेषणत्वयुक्तमुभयत्वं तु न विशेषणं तद्विनापि निमित्तपर्यवसानसंभवात् आर्छेदित्याख्यातेनैवोभयपदं संबध्यते न तु हविःपदेन विभक्त्यंतनाम्नां परस्परान्वयात्तथा च हविःकर्तृकार्तिकर्मकप्राप्तिभावनैव निमित्तत्वेनान्वेति न तु उभयहविःकरणभावनेत्युभयत्वाविवक्षायामेव पर्यवसानाच्च उभयपदं तु दधिपयसोरेकस्यैव नाशो न निमित्तं किन्त्वन्यतरस्येति ज्ञापनायेति न व्यर्थमिति भावः॥ ः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धान्तसिद्धीतितत्त्वाद्यवाक्यस्यतत्तद्गुणविशिष्टोपासनापरत्वसिद्धीत्यर्थः वाधस्यसगुणवाक्यवाधस्यवाधात् वाधितत्वात् अप्रसिद्धविशेषणत्वंविशेषसामान्याभावस्व
रूपविशेषणाप्रसिद्धिः विशेषत्वंमेयत्वंमात्रवृत्तित्वात्सामान्यवृत्तित्वात् ब्रह्मणिविशेषस्यसंदिग्धत्वाद्दृश्यमात्रेतद्व्यापकत्वस्यानुभूतित्वाभावेनिश्चयसंभवाद्वि
शेषव्यापकाभावप्रतियोग्यनुभूतित्ववत्यनुभूतिरितिपरामर्शान्निर्विशेषत्वानुमितिसंभवेनतत्पूर्वेविशेषसामान्याभावाप्रसिद्धावपिनक्षतिरितिबोध्यं स्वव्याघात इति
निर्विशेषत्वानुमितेर्विशेषसामान्याभावविषयकत्वेविशेषसामान्याभावरूपविशेषाभावोपितद्विषयइतितत्प्रामाण्यव्याघातइत्यर्थः अवाधितविषयकत्वरू
पंप्रामाण्यंविशेषसामान्याभावस्वरूपमात्रांशेस्येवविशेषसामान्याभावत्वविशिष्टांशेतुनमयापितदंगीक्रियतइत्याशयेनाहनिर्विशेषत्वस्येतितेनरूपेणनिर्विशे

यत्त्वं तस्तद्धर्मोपदेशात् अन्तर्याम्यधिदैवादिषुतद्धर्मव्यपदेशादित्यादिसूत्रेषुधर्माणान्तत्तदधिकरणसिद्धान्तसाधकतयाआदृतत्वात्सगु
णत्वसिद्धिरिति तन्न आरोपितब्रह्ममात्रसंबंधिगुणोपादानेनसिद्धान्तसिद्ध्युपपत्तेः गुणतात्त्विकत्वऔदासीन्यात् यच्चाहिंसाऽग्नीषोमीयवाक्य
योरिवसगुणनिर्गुणवाक्ययोरपिभिन्नविषयतयाऽविरोधेसम्भवत्यपिसगुणवाक्यस्याप्रमाणत्वाभिधानंसौगतसौहृदादिति तन्ननिर्गुणवा
क्यस्यतत्परत्वेनप्रवलतयावाधस्यावश्यकत्वेपिमानत्वाभिधानस्यब्रह्मवादिविद्वेषमात्रत्वात् तस्मान्निर्गुणवाक्यवाधात्सगुणवाक्य
मतत्परं अनुभूति निर्विशेषाऽनुभूतित्वादितिव्यतिरेक्यनुमानमपिवाधकम् नचात्राप्रसिद्धविशेषणत्वंयद्यतिरेकेऽसमीहितप्रसक्तिस्तन्मान
योग्यमितिसामान्यतःप्रसिद्धेःविशेषत्वमभावप्रतियोगितावच्छेदकं। अभावप्रतियोगिमात्रवृत्तित्वाद्घटत्ववदितिविशिष्यापिसत्त्वात् नापि
स्वव्याघातःनिर्विशेषत्वस्यस्वस्वरूपत्वेनविशेषत्वानङ्गीकारात् नचस्वरूपस्यप्रागेवसिद्धेःस्यादनुमितिवैयर्थ्यम् तेनरूपेणज्ञानस्योद्देश्यत्वा
त् नापिश्रुतिवाधःप्रागेवनिरासात् प्रत्युतबहुतरश्रुत्यनुग्रहः अतएवनाभाससाम्यंनाप्यप्रयोजकत्वंभिन्नत्वेऽभिन्नत्वेसंबद्धत्वे असंबद्धत्वे
चातिप्रसङ्गानवस्थाभ्यांधर्मधर्मिभावानुपपत्तेरेवविपक्षवाधकत्वात् ॥ २१ ॥ षत्वत्वेनभिन्नत्वइत्यादिभिन्नयोर्धर्मधर्मिभावेघटपटयोरपिसस्यादित्य
तिप्रसंगः नचप्रतीत्याभावादेवतयोःसनेतिवाच्यंकदाचित्तयोरपितस्यप्रतीतेर्नेचभिन्नयोरपिसमवायादिसंबंधोधर्मिधर्मभावनियामकइतिवाच्यंभिन्नत्वेननिश्चितघ
टपटादियुग्मसामान्येधर्मधर्मित्वादर्शनाद्भिन्नत्वेनसंदिग्धगुणगुण्यादावभेदसंबंधस्यैवकल्पनात् अथभेदंविनासंबंधएवानुपपन्नोनहिस्वस्मिन् स्वयंसंबध्यतइतिचे
देवमप्यभेदसंबंधत्वानुपपत्त्याकल्प्यमानोभेदोनस्वापेक्षयातमाभासीकरोतिकिंतुस्वयमेवतदपेक्षयाभासीभवतीतिधर्मधर्मिणोरभेदोव्यावहारिकोभेदस्तुप्रातीतिको
नचैवमभेदस्तात्त्विकएवास्तु———भेदस्तुव्यावहारिकइतिवाच्यं कल्पितभेदस्यतात्त्विकसंबंधोपपादकत्वेहितद्व्यक्तिस्तद्व्यक्तिमतीत्यपिप्रमा‾स्यात्तस्माद्भेदाभेदाभ्यां
धर्मधर्मिभावोननिर्वाच्यःएवंधर्मस्यधर्म्यसंबंधत्वेसर्वंसर्वस्यधर्मःस्यादित्यतिप्रसंगःसंबंधत्वेसंबंधेपिसंबंधोवाच्योन्यथासर्वस्यसंबंधतापत्तेः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाधकाभावात् पृथग्भूतधर्मान्नद्रष्टव्याइतिनिषेधेवाधकाभावात् ब्रह्ममात्रेतिभेदनिषेधेभेद्यप्रपंचस्यापिनिषेध आर्थिकोभेद्यप्रपंचस्यभेदव्याप्यत्वेनव्यापकाभा
वेव्याप्याभावस्यावश्यकत्वादितिब्रह्ममात्रंपरिशिष्टमितिभावः वस्तुतोनेहनानेतिपूर्ववाक्येनतत्पदार्थशोधनादंगुष्ठमात्रःपुरुषोज्योतिरिवाधूमकइत्युत्तरवाक्येन
त्वंपदार्थशोधनादंगुष्ठमात्रःपुरुषईशानइतिमध्यवाक्येनोक्तंतत्त्वंपदार्थयोरैक्यंदृढीकृत्यधर्मान्नित्यादिनाजीवेशधर्मज्ञानानंदयाशुद्धयोरैक्यज्ञानंस्तुतमतएवष
योदकंशुद्धेशुद्धमित्यादिनाताद्दशज्ञानमुपसंहृतमितिधर्मसामान्यनिषेधएवतात्पर्यं। एकतरपरिशेषेतिएकमात्रपरिशेषेत्यर्थः अत्रापिधर्मान्नित्यादिश्रुतिवोध्या
भेदेप्रतियोगिनोरपिज्ञानानंदव्यक्त्योःज्ञानानंदस्वरूपयोःभेदगर्भैकतरशब्दस्येतिद्वयोरेकव्यक्तिभिन्नापरव्यक्तिवाचकस्यैकतरेतिशब्दस्येत्यर्थः तथाचज्ञाना।
नंदस्वरूपमात्रस्यात्यन्ताभेदात्तत्रएकतरेतिशब्दाप्रवृत्त्याएकतरपरिशेषइतिवक्तुमशक्यमितिभावः पूर्वमितितमीश्वराणांपरमंमहेश्वरंतंदेवतानांपरमंचदैवत

प्रकृतेचवाधकाभावात् सार्वज्ञ्यश्रुतेर्वाधकत्वनिरासात् पार्थक्यनिषेधेब्रह्ममात्रपरिशेषान्नामान्तरेणाद्वैतवादस्यैवोक्तेश्च यत्तुज्ञानानंदयोरभेदे
पिएकतरपरिशेषाभावात् अत्रापिधर्मधर्मिणोर्नैकतरपरिशेषः अन्यथानन्दस्फुरणयोरन्यतराभावान्मुक्तिरपुमर्थः स्यादितितन्न ज्ञानानन्दव्य
क्त्योरस्तिभेदगर्भैकतरशब्दस्याप्रवृत्तिःएवमेवत्वन्नयेगुणगुणिव्यक्त्योरभेदसम्भवादस्यपरिभाषामात्रत्वात् यत्तुसाक्षिचैतन्यस्यपूर्वंपश्चादपि
गुणोक्तेस्तन्मध्यस्थंनिर्गुणवाक्यमप्युपांश्रुयाजन्यायेनतदनुगुणतयानेयमिति तन्नगुणात् तटस्थीकृत्यतेषांब्रह्मपरत्वेनगुणेतात्पर्याभावा
त् अतएवनिर्गुणशब्देनगुणमात्रनिषेधोनयुक्तःसाक्ष्यादिपदेनद्रष्टृत्वादिविधानाद्व्याघातात्सङ्कोचएवेतिनिरस्तम् द्रष्टृत्वादावत्राप्यतात्पर्या
त् तथाचद्रष्टृत्वादिद्वारकब्रह्मरूपयुक्तार्थेतेषामागमस्यतत्रैवप्रामाण्यसंभवात् एवंचयुक्तोऽयुक्तश्चपत्रार्थे आगमस्यप्रतीयतेस्यात्तत्रयु
क्तएवार्थइत्याद्यस्मन्मतएवोपपन्नतरम् तस्मादुपक्रमादिन्यायानामन्यविषयत्वान्नतद्बलेनसगुणत्वसिद्धिः ॥ ११ मित्यादिवाक्येइतिशेषः

पश्चादितिएकोवशीनिष्क्रियाणांवहूनामेकंवीजंवहुधायःकरोतीत्यादिवाक्यइतिशेषः तटस्थीकृत्यद्वारीकृत्यब्रह्मपरत्वेनशुद्धब्रह्मपरत्वेनतात्पर्याभावादि
ति यद्यप्युक्तवाक्योत्तरंतमात्मस्थंयेनुपश्यन्तिधीरास्तेषांसुखंशाश्वतंनेतरेषामित्युक्तं तथापितत्रयत्पदेवेश्वरमुत्क्वाततोयदुत्तरतरंतद्रूपमनामयंयए
तद्विदुरमृतास्तेभवंत्यथेतरेदुःखमेवापियंतीत्यनेनतत्रतत्पदंत्वयापिविशेष्यमात्रपरंवाच्यमन्यथाश्वेताश्वतरएवत्ततीयाध्यायेवृक्षइवस्तब्धोदिवितिष्ठत्ये
कस्तेनेदंपूर्णमितिद्वितीयाध्यायेपित्वंस्त्रीत्वंपुमान्त्वंकुमारउतवाकुमारीत्यादिनाशुद्धज्ञानस्यैवमोक्षहेतुत्वमित्यस्योक्तिविरोधात् तमेवविदित्वातिमृत्युमेतिना
न्यःपंथाविद्यतेयनायेत्यस्यमुमुक्षुर्वैशरणमहंप्रपद्येनिष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनं अमृतत्वस्यपरंसेतुमित्यस्यचतमात्मस्थमित्याद्युक्तवाक्योत्तरवाक्यस्य रामः
विरोधापत्तेरितिभावःसंभवादितिब्रह्मान्यस्यतुवाधितत्वेनतत्रनप्रामाण्यसंभवइतिभावःअन्यविषयकत्वात्सगुणवाक्याविषयकत्वात् ॥ ॥ ॥ २६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्यावृत्तेर्ब्रह्मस्वरूपत्वेन तत्समानसत्ताकत्वाभावादाह व्यावृत्तिबोधेति इदमित्थं इदमानंदादिविशेषवत् ननु आनंदादिविशेषवत्त्वेन ज्ञानं न जिज्ञासायाः प्रयोजनं किन्तु आनंदा
दिविशेषद्वारा अनानंदादिव्यावृत्तज्ञानं तत्राह नचेन्नप्रतियोगितेति आनंदादिधर्मो नचेत्तर्हि प्रतियोगिताप्रतिद्वंद्विता अनानंदादिव्यावृत्तत्तापि ब्रह्मणि न संभवतीत्यर्थः
आरोपितेति तथा चारोपितव्यावृत्त्यादिधर्मद्वाराखंडब्रह्मधीरेव जिज्ञासायाः फलं न तूक्तधर्मप्रकारिका येन तादृशधीविषयत्वेन धर्मः सत्य उच्येतेति भावः उत्तरकाले
इति जीवन्मुक्तस्याविद्यालेशसत्त्वादिति शेषः आरोपेति भ्रमोत्पत्तीत्यर्थः अध्यासस्य अविद्याद्यनाद्यध्यासस्य तथा च रूप्यादेरिवाहंकारादेरप्यध्यासस्योत्पत्तौ अध्यस्तसा

नव्यावर्त्यसमानसत्ताकविशेषाभावेपि व्यावृत्तिबोधसमानसत्ताकधर्मेणाभिन्नत्वनिर्विशेषत्वयोरुपपत्तेः अत एव ब्रह्मणो निर्विशेषत्वे विचारविषयत्वानुपपत्तिः इदमित्थमिति ज्ञानं जिज्ञासायाः प्रयोजनम् इत्थंभावो हि धर्मोस्य न चेन्न प्रतियोगितेति निरस्तम् विचारकाले आरोपितधर्मसंभवात् विचारोत्तरकाले चेत्थमिति व्यवहारस्य स्वरूपव्यावृत्त्यादेः कल्पितपार्थक्यमादायोपपत्तेः ननु धर्मारोपार्थमेव केचन धर्माः सत्याः स्वीकर्तव्या इदंत्वादिना ज्ञात एव रूप्याद्यारोपदर्शनात्तदुक्तम् धर्मारोपोपि सामान्यधर्मादीनां हि दर्शने सर्वधर्मविहीनस्य धर्मारोपः क्व दृश्यत इति चेत् न इदंत्वादेरपि सत्यत्वासम्प्रतिपत्तेः शुद्धेप्यध्यासस्योपपादितत्वाच्च आरोप्यविलक्षणधर्मवत्त्वस्यानाद्यविद्यासंबंधेनैवोपपत्तेः अत एवाभावरूपधर्माङ्गीकारे भावोपस्तु प्रामाणिकत्वाविशेषादिति निरस्तम् स्वरूपातिरेकिणोऽभावस्याप्यनङ्गीकारात् धर्ममात्रे प्रामाणिकत्वस्य निराकृतत्वाच्च तस्मान्निर्विशेषं परंब्रह्म ब्रह्मणो निर्गुणत्वोपपत्तिः ॥ ४ ॥ ननु निर्विशेषे किं प्रमाणमिति चेत्स्फूर्त्यर्थं वा अज्ञाननिवृत्त्यर्थं वा प्रमाणप्रश्नः आद्ये स्वप्रकाशतया प्रमाणवैयर्थ्यं न च विप्रतिपन्नमात्रे स्वतःसिद्धेर्वक्तुं शक्यतयातिप्रसङ्गः अभावव्यावृत्तिबोधकप्रमाणसत्त्वासत्त्वाभ्यां विशेषात् द्वितीये उपनिषद एव प्रमाणत्वात् अत एव प्रत्यक्षमनुमानं वेत्यादिविकल्पस्य नावकाशः ननु कथं तत्रोपनिषन्मानं जातिगुणक्रियादिरूपनिमित्ताभावेन मुख्यवृत्तेरयोगात् अस्वीकाराच्च आरोपितनिमित्तविषयप्रतीतेर्निर्विशेषे प्रामाण्यायोगात् गौण्याश्च मुख्यार्थगुणयुक्ततयैव लक्षणायाश्च शक्यार्थसंबंधितावच्छेदकरूपवत्तयैव स्वार्थोपस्थापकत्वात् पदस्य अन्वयितावच्छेदकरूपेण स्वार्थोपस्थापकतया निर्विशेषवृत्तिमात्रायोगात् पदविधया वाक्यविधया चोपनिषन्मानं न निर्विशेषे संसर्गाऽगोचरत्वाच्चेति चेत् ॥

मान्यधर्मदर्शनमेव हेतुरिति न सत्यधर्मापेक्षेति भावः आरोप्यविलक्षणेति आरोप्यपूर्ववृत्तित्वादिमदि
त्यर्थः तथा चारोप्याभिन्नसत्ताकत्वं धर्मस्य नापेक्षितं किन्तु आरोप्यहेतुप्रत्यक्षादिधीविषयत्वेनारोपपूर्ववृत्तित्वादिकमिति भावः निर्द्धर्मितावच्छेदकस्यारोपस्यसं
भवादधिष्ठानगतधर्मज्ञानमपि नापेक्ष्यत इत्यपि बोध्यं तर्कैरित्यादिः ब्रह्मनैर्गुण्यसाधनं ॥ ४ ॥ विप्रतिपन्ने शब्दनित्यत्वादौ अतिप्रसंगः स्फूर्त्यर्थमानानभिधानप्र
सङ्गः अभावव्यावृत्तीति परप्रकाश्यत्वात्यंताभावपरप्रकाश्यभेदेत्यर्थः तथा च शब्दनित्यत्वादौ तादृशात्यंताभावभेदबोधकप्रमाणाभावेन स्फूर्त्यर्थमानाभिधानेपि ब्रह्मण्युक्त
मानसत्त्वेन न स्फूर्त्यर्थं मानापेक्षेति भावः ॥

तथाचसंबंधसंबंधपरंपराकल्पनेऽनवस्थास्वरूपस्यैवसंबंधसंबंधत्वे धर्मान्यसंबंध एवनकस्य्यः स्यात् धर्मस्वरूपस्यैवतत्संबंधतासंभवादितिभावः नचसं
बंधस्येत्यादि यथानवस्थाभयात् मिथ्यात्वांतरंत्वयानमिथ्यात्वेंगीक्रियते नथामयापिसंबंधस्यसंबंधांतरंनांगीक्रियतेतवतेनैवतत्रमिथ्यात्वस्येवममापितेनैव तस्यसंबं
धस्यव्यवहारइतिभावःपरिहरति अभेदवादइतिब्रह्मतद्धर्मयोर्भेदास्वीकारवतस्तवमतेइत्यर्थः अतिरिक्तस्येतिसंबंधस्येतिशेषः संबंधस्यभेदनिष्ठत्वादित्यादिः भेदकल्प
नयाधर्मधर्मिभावव्यवहारप्रयोजककल्पनयातथाचानंदादीनांब्रह्माभेदेपिधर्मधर्मिभावव्यवहारायत्वयाप्यतिरेकनामाकश्चनार्थःस्वीक्रियतेएवंचकल्पितत्वेनास्मत्सी

नचसंबंधस्यमिथ्यात्ववत्स्वनिर्वाहकत्वान्नानवस्था अभेदवादेतिरिक्तस्यवक्तुमशक्यत्वात् नचधर्माभावरूपधर्मभावाभ्यांव्याघातेनकुतर्क
तास्येतिवाच्यम् धर्माभावस्यस्वरूपतयैवसत्त्वाङ्गीकारेणव्याघाताभावात् अभेदेपिभेदकल्पनयाधर्मधर्मिभावव्यवहारस्यत्वयापीष्टत्वात् नचै
वमानन्दस्यज्ञानमात्रत्वेदुःखज्ञानमप्यानंदःस्यात्भिन्नत्वेअखण्डत्वहानिः एवमेवब्रह्मणोजगदभिन्नत्वेमिथ्यात्वापत्तिः भिन्नत्वेभेदसत्यत्वमि
त्यादितर्कबाधात्त्वदभिमतंब्रह्मापिनसिद्ध्येदितिश्रुतिबाधात्तर्काणामाभासत्वंमन्मतेसमानमितिवाच्यं दुःखज्ञानस्यवृत्तिरूपतयानन्दस्यनित्य
चिन्मात्राऽनतिरेकेऽतिप्रसंगाभावात् आरंभणाधिकरणन्यायेनब्रह्मव्यतिरेकेणजगतोऽभावात् भेदाभेदविकल्पस्यानवकाशात् सगुणश्रुते
रतत्परतयाश्रुतिबाधसाम्योक्तेरयुक्तेः निर्गुणश्रुतेस्तुतत्परतयातदनुगृहीततर्केशुष्कत्वाभावाच्चयत्तुनिर्विशेषत्वस्यभावाभावाभ्यांमूकोहमिति
वत्स्वव्याघातःयदिनिर्विशेषत्वरूपनिषेधोप्यनेनैवनिषिध्यतेतर्हीयमपिवचनक्रियामूकोहमित्यनेनैवनिषिध्यतइतिसममितितन्ननिर्विशेषत्व
स्यविशेषरूपत्वेविशेषत्वेनैवरूपेणतन्निषेधस्याद्वितीयवाक्येद्वितीयाभावरूपद्वितीयनिषेधस्येवोपपत्तेरन्यथाविशेषत्वाऽवच्छिन्ननिषेधप्र
तीतेरनुपपत्तेरभावाऽनतिरेकेतुस्वरूपाऽनतिरेकितयामूकोहमितिवत्स्ववचनव्याघाताभावस्योक्तत्वाच्चमूकोहमित्यत्रवक्तृत्वतदभावयोरेकरू
पेणनिषेधाभावाद्व्याघातोपपत्तेः ननुब्रह्मणःशून्यानिर्वाच्यव्यावर्तकविशेषाभावेतुच्छत्वमिथ्यात्वाद्यापत्तेस्तत्सत्त्वेनसविशेषत्वमेवेतिचेत॥

कृतभेदस्यैवनामांतरंकृतम्‌॰ नहिभेदनिर्वाह्योधर्मधर्मिभावोभेदान्येननिर्वहतिनवाभिन्नयोस्तात्त्विकोभेदोनिर्वहतीतिधर्मधर्मिणोःकल्पितभेदउभयसम्मतइतिभावः
विशेषरूपत्वेब्रह्मातिरिक्तत्वेअभावानतिरेकेअभावस्याधिकरणस्वरूपानतिरेकेस्वरूपेतिब्रह्मस्वरूपेत्यर्थः एकरूपेणेतिनिर्विशेषादिवाक्येविशेषत्वरूपेणवि
शेषाभावसाधारणविशेषसामान्यनिषेधबोधकत्वात् विशेषाभावरूपविशेषतात्पर्यासंभवात् तदुपलक्षिताखंडब्रह्मण्येवतात्पर्यंमूकोहमित्यत्रतुयद्यपिमूक
शब्देनवक्तृत्वशून्यंबोध्यतेतादृशशब्दोच्चारणेनचार्थादवक्तृत्वाभावोबोध्यतेतथापिवक्तृत्वतदभावसाधारणरूपेणतदुभयनिषेधोनताभ्यांबोध्यतेअतोवक्तृ
त्वाभावोपलक्षितस्वरूपेतात्पर्यकल्पकाभावाद्व्याघातएवेतिभावः तत्सत्त्वेनविशेषसत्त्वेन ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुल्यसंभवाद्वाक्यमपिहेतुर्नस्यादितिवाच्यंवाक्यज्ञानंविनोक्तबोधानुपपत्तेः औपनिषदत्वसमाख्यानुरोधात् श्रुतिजन्यत्वंविनाज्ञानस्यप्रत्यक्षादिबाधकत्वानुपपत्तेश्चगौरवमितिसप्रकारकनिष्प्रकारयोःसंशयनिवर्त्तकत्वेगौरवमित्यर्थः प्रमाणवतइति उक्तरीत्याश्रुतेर्निर्गुणबोधकत्वस्य अविद्यानिवर्त्तकत्वस्यचसिद्धतयाविद्यकसंशयादिनिवर्त्तकत्वंप्रामाणिकमितिभावः शक्तिविशेषेणसप्रकारकसाधारणेननिष्प्रकारकस्यापिसंशयनिवर्त्तकत्वस्यपररीत्यापिसंभवान्नगौरवमित्यादिकंतूक्तं। नकैरित्यादि·निर्गुणेसप्रमाणता ॥५॥ कृष्णपिंगलमिति ऊर्ध्वरेतंविरूपाक्षंविश्वरूपायवैनमइतितैत्तिरीयारण्यकश्चोक्तश्रुतिशेषः अविद्याविलक्षणेतिजडविलक्षणेत्यर्थः उपास्यपरतयेति यदेकमव्यक्तमनंतरूपमादित्यवर्णंतमसः परस्तात् तदेववर्त्ततदुसत्यमाहुस्तदेवब्रह्मपरमंकवीनामित्यादिज्ञेयब्रह्मप्रतिपादकेषुस्वप्रका

विस्तृतमस्माभिरिदंगीतानिबन्धेनचनिर्द्धारितैककोटिप्रकारकनिश्चयंप्रत्येवधर्मिज्ञानाधीनविचारस्यजनकत्वात्कथंविचारस्तथाचीनवेदान्त
वाक्यजन्यज्ञानस्यनिष्प्रकारत्वमितिवाच्यम् संशयनिवृत्तिक्षमज्ञानस्यैवविचारफलत्वात् तस्याश्चविरोधिकोटिप्रतिक्षेपकोपलक्षितधर्मिज्ञाना
दप्युपपत्तेर्नतदर्थंसप्रकारकत्वनियमः नचगौरवम् प्रमाणवतोगौरवस्यन्याय्यत्वात् नचनिर्विशेषविषयकस्यज्ञानस्यनिष्प्रकारकत्वेनिर्विशेष
त्वासिद्ध्यातत्सिद्ध्यर्थंविशेषाभावरूपविशेषविषयत्वस्यावश्यकत्वमितिवाच्यंविशेषाभावस्यस्वरूपतयातत्स्फूर्तौप्रमाणानपेक्षत्वात् अखण्डा
र्थसिद्ध्यनुकूलपृथग् ज्ञातपदार्थोपस्थितिविषयमात्रेणविशिष्टव्यवहारोपपत्तेः तस्मात्सगुणत्वेसाधकाभावाद्बाधकसद्भावाच्चनिर्गुणत्वेचत
दभावात् निर्गुणमेवब्रह्मेतिसिद्धम् ब्रह्मणोनिर्गुणत्वेप्रमाणोपपत्तिः॥५॥ एवंनिराकारमपिननु आदित्यवर्णंतमसः परस्तात्यदापश्यः पश्यते
रुक्मवर्णं ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलंविश्वतश्चक्षुःसहस्रशीर्षाइत्यादिश्रुतिभिः पश्यमेपार्थरूपाणिसर्वतः पाणिपादन्तदित्यादिस्मृतिभि
र्ब्रह्मसविग्रहंस्पष्टत्वात्पालयितृत्वात् उपदेष्टृत्वादित्याद्यनुमानैश्चविग्रहसिद्धिरितिचेत् नआदित्यवर्णमित्यस्याविद्याविलक्षणस्वप्रकाशस्वरूपप्रति
पादनपरतयोपास्यपरतयाचोपपत्तेः नचतमसः परत्वोक्त्योपासनापरत्वानुपपत्तिः उपास्यविग्रहोपलक्षितस्यतमसः परत्वोक्तेः नतुरूपविशिष्टस्यनन्वे
षोंतरादित्येहिरण्मयः पुरुषोदृश्यतइत्यत्रवर्तमानत्वेनापरोक्षज्ञानविषयत्वोक्तेरनारोप्यत्वम् नहियोषितोऽग्नित्वंदृश्यतइत्युच्यतइतिवाच्यम्॥ ॥

शपरत्वेपिसगुणोपासनावाक्येषु आदित्यवर्णत्वेनोपासनापरतयेत्यर्थः वर्त्तमानत्वेनापरोक्षज्ञानेति वर्त्तमानापरोक्षज्ञानेत्यर्थः अनारोप्यत्वमितिहिरण्मयशरीरविशिष्टस्यदृश्यत्वो
त्याहिरण्मयशरीरस्यापिदृश्यत्वलाभाद्विद्यमानस्यैंद्रियसन्निकर्षसाक्षिसम्बन्धाद्यभावेनादृश्यत्वाद्दृश्यशरीरमनारोप्यंतथाचहिरण्मयशरीरमेवादित्यवर्णमुक्तश्रुतावुपा
स्यत्वेनोच्यतइत्यादित्यवर्णशरीरस्याप्यनारोप्यत्वमितिभावः यत्तुदर्शितेइवतत्कर्मण्यपितद्द्वारावर्तमानत्वान्वयइतिहिरण्मयशरीरस्यानारोप्यत्वलाभस्तथाचादित्यवर्णवा
क्योक्तमादित्यवर्णत्वंवर्तमानहिरण्मयत्वादितुल्यत्वादितितत् नशोभतेदर्शनद्वारावर्त्तमानत्वान्वयोहिवर्त्तमानत्वान्वितदर्शनकर्मत्वान्वयः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असंदिग्धेति मानांतरेणानिश्चितेत्यर्थः नहि संबंधमित्यादिसुषुप्तीयस्य वाक्यार्थबोधस्य पूर्वपदतदर्थसंबंधज्ञानं न प्रामाणिकं न च कारणत्वेन क्लृप्तं तद्विना वाक्यार्थबोधासंभवात्तदन्यथानुपपत्तिरेव तत्र मानमिति वाच्यं सोयं चैत्र इत्यादिवाक्यं लक्षणया शक्तिभ्रमेण वा ऐक्यस्य वाक्यार्थस्य बोधे कालभेदेन ज्ञनकं तत्र च स्वघटकपदवृत्तिज्ञानजन्यपदार्थोपस्थितिसंबंधेन नोक्तवाक्यत्वरूपाकांक्षाज्ञानं हेतुः तादृशवृत्तित्वस्य शक्तिलक्षणासाधारणस्यान्यतरत्वादिरूपस्य वाच्यतयाविनिगमकाभावेन गुरुतरनानासंबंधरूपावच्छेदकभेदभिन्नहेतुतापत्तेः किन्तु स्वघटकपदशक्तिज्ञानजन्यार्थोपस्थितिविशिष्टे तादृशवाक्यार्थबोधे तादृशोपस्थितिसंबंधेन स्वघटकपदलक्षणाज्ञानजन्योपस्थितिविशिष्टे तादृशवाक्यार्थबोधे तादृशोपस्थितिसंबंधेनोक्ताकांक्षाज्ञानत्वेन हेतुता तथा च सुषुप्तपुरुषीयतादृशवाक्यार्थस्योक्तोपस्थितिविशिष्टत्वसंदेहात्तद्धेतुतया नोक्तोपस्थितिः कल्पयितुं शक्या किंतु तादृशबोधनियतपूर्ववर्तितया क्लृप्ततत्तत्कालीनज्ञानविशेषादेवैवं जात्यविशेषं कल्पयित्वा विजातीयज्ञाना

नमुख्यगौणयसंभवेपि लक्षणायाः सम्भवात् न च लक्षकपदे शक्यार्थसम्बन्धित्वावच्छेदकरूपवत्तया पदमात्रेऽन्वयितावच्छेदकरूपवत्तया चोपस्थितिनियमः संसर्गबोधकवाक्यस्य पदानामेव तथात्वात् न च संसर्गागोचरत्वे प्रमाणवाक्यत्वानुपपत्तिः असन्दिग्धाविपर्यस्तबोधकतया निर्विकल्पकत्वेपि प्रामाण्यस्याकांक्षादिमत्त्वपावाक्यत्वस्य चोपपत्तेः वृत्तिमन्तरेणापि सुप्तोत्थापकवाक्यस्येव वेदांतवाक्यस्य निर्विशेषे प्रामाण्यस्य वार्त्तिककृद्भिरुपपादितत्वाच्च तथाहि अगृहीत्वैव संबंधमभिधानाभिधेययोः हित्वा निद्रां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः। जाग्रद्वन्न हि संबंधं सुषुप्ते वेत्ति कश्चनेत्यादिना ग्रन्थेन विनापि संबंधं वाक्यस्य प्रामाण्यमुपपादितं लक्षणापक्षेपि तात्पर्यविशेषग्रहेणैवातिप्रसङ्गभंगो वाच्यः शक्यसंबंधस्यानेकत्रसम्भवात् तात्पर्यविशेषग्रहश्च पुरुषविशेषस्य भवति न सर्वस्य पुरुषगतो विशेषश्चान्तःकरणशुद्धिरूपः प्रतिबंधाभावः अन्तःकरणाशुद्धिरूपस्य पापस्य च प्रतिबन्धकत्वं ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्यादिशास्त्रसिद्धं तथा च प्रतिबन्धकक्षये विनापि संबंधं शब्दादात्मसाक्षात्कार इति निरवद्यम् ॥ २) दिविशिष्टबोधे तादृशज्ञानादिसंबंधेनोक्ताकांक्षाज्ञानहेतुत्वांतरं कल्प्यते अनंतवृत्तिज्ञानाकल्पनेन लाघवानुग्रहादिति भावः तत्त्वमस्यादिवाक्यस्य तु स्वघटकपदजन्यवृत्तिज्ञानस्य शुद्धब्रह्मण्यनंगीकारपक्षेपापविशेषरूपप्रतिबंधकसत्वे ज्ञानविशेषादिविशिष्टे अनवधारणरूपे स्वार्थबोधे ज्ञानविशेषादिसंबंधेन हेतुत्वेप्युक्तप्रतिबंधकनाशकाले तद्विशिष्टे स्वार्थबोधे तत्संबंधेन हेतुत्वांतरं कल्प्यते तादृशज्ञानविशेषादेरप्यकल्पनतया लाघवानुग्रहादित्याशयेनाह लक्षणापक्षेपीत्यादिग्रहेणानिश्चयेन न तथा चेति पापविशेषनाशस्यावश्यापेक्षणीयत्वे च संबंधवृत्तिज्ञानं तात्पर्यज्ञानं च आत्मसाक्षात्कारः साक्षात्कारस्वभाव आत्मशब्दधीः सामान्यतात्पर्यनिश्चये वाक्यार्थसंशयहेतुतात्पर्यसंशयरूपदोषोत्मारकतया निश्चयात्मके वाक्यार्थबोधे प्रयोजको न तु अनवधारणवाक्यार्थबोध इति भावः न च प्रतिबंधकाभावादेराकांक्षाज्ञानाजन्यत्वात् तद्व्यापारत्वानुपपत्तिरिति वाच्यं व्यापारत्वाभावेपि तत्समानाधिकरणत्वेन संबंधत्वसंभवान्न चैवं प्रतिबंधकाभावसंसर्गस्य विशिष्टे वाक्यार्थबोधे हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचसर्वदेशव्यापकशरीरं पश्यमे पार्थ रूपाणीत्यादिशास्त्रसिद्धं वैकुंठस्थशरीरान्तरप्राप्तिरपि एतमितः प्रेत्येत्यादिशास्त्रसिद्धेतिवाच्यं सर्वतः पाणिपादादियु क्तोपासकस्यापित्वन्मते वैकुंठप्राप्तापश्यमे इत्यादेरारोपितशरीरबोधकत्वेपि तत्सत्त्वलाबोधकत्वात्मुक्तप्राप्यशरीरस्यैवत्वन्मतेसत्यत्वौचित्यात् एवमेव आरो पितशरीरमादायसिद्धसाधनमितिनचस्पष्टपूर्वकालावच्छिन्नेशत्वेनपक्षत्वात्तत्कालावच्छेदेनसविग्रहत्वसिद्धेरुद्देश्यत्वान्नसिद्धसाधनमितिवाच्यं तथाप्यना दिमिथ्याशरीरमादाययाथीतरसंभवात् सिद्धसाधनपदस्योद्देश्यासिद्धिपरत्वात् विग्रहंविनापि स्रष्टृत्वादिसंभवेनाप्रयोजकत्वमपिबोध्यं करणस्थानीयस्येतिईश्वर स्यचक्षुरादिकरणाभावेपितत्कार्यकारित्वेनतत्स्थानीयमविद्यापरिणामरूपमीक्षणादिस्वीक्रियतेपश्यत्यचक्षुः सशृणोत्यकर्णइत्यादिश्रुत्याहितयोक्तमित्यसार्थ

अनुमानेप्येवमेवसिद्धसाधनं विकरणत्वान्नेतिचेत्तदुक्तमितिसूत्रे अविद्यापरिणामस्यकरणस्थानीयस्यांगीकारात् दविरोधात् यत्तुतत्तदेवानुप्रावि शदुब्रह्मविदाप्नोतिपरमित्यादिश्रुतिसिद्धं सर्वगतस्यब्रह्मणः प्रवेष्टृत्वंगम्यत्वंचविग्रहंविनानयुज्यत इति तन्नस्रष्टकार्याभिव्यक्तत्वस्यैवानुप्रवे शशब्दार्थत याव्यापकस्यमुख्यप्रवेशासंभवात् अतःप्राप्तस्याप्यविद्यातिरोधाननिवृत्त्यपेक्षयाप्राप्यत्वोपचारेणविग्रहानाक्षेपकत्वात् यत्तुतमे वंविद्वानमृतइहभवतियदापश्यइत्यादिश्रुतौसर्वनाम्नासविग्रहस्यैवपरामर्शात्तज्ज्ञानस्यैवमोचकत्वेसविग्रहत्वमिति तन्नसगुणविद्यायाः क्र ममुक्त्यर्थत्वेनान्यथासिद्धेः साक्षान्मुक्तिजनकत्वपक्षेतदुपलक्षितात्मज्ञानस्यैवमोचकत्वात् अतएवदेवा अप्यस्यरूपस्यनित्यंदर्शनकांक्षिणइत्या दिस्मृतिरपिव्याख्याता किञ्चविग्रहः किंभौतिकोऽभौतिकोवा अभौतिकोपिमायिकोऽमायिकोवाऽमायिकोपिब्रह्मभिन्नोऽभिन्नोवाभौतिकमायिकाव पिस्वकर्मार्जितोपरकर्मार्जितोवा आद्येसंसारित्वापत्तिः द्वितीयेइष्टापत्तिः ब्रह्मभिन्नत्वेतवापसिद्धान्तः नेतिनेतिश्रुतिविरोधः अपाणिपादइत्यादिश्रुति विरोधश्च अभौतिकाऽमायिकब्रह्माभिन्नदेहांगीकारेउक्तश्रुतिविरोधः चार्वाकमतप्रवेशश्च प्रमाणाभावश्च नचनाभ्या आसीदंतरिक्षमितिभूतकार णत्वोक्त्याऽभौतिकत्वसिद्धिः अग्निर्मूर्द्धेत्यादिश्रुतिपर्यालोचनयान्तरिक्षादीनां नाभित्वादिपरिकल्पनयाविराड्देहप्रतिपादकतयाशरीरस्यभू तकारणत्वाप्रतिपादकत्वात् ॥ ८ ॥ सोक्तसत्रेसीकारादित्यर्थः कार्याभिव्यक्तत्वस्यमनआदिकार्येषुजीवादिविशिष्टरूपेणास्फुरणस्य अतोव्यापकत्वात् स विग्रहत्वंमोक्षहेतुप्रमाविषयत्वेनविग्रहस्यतात्विकत्वात्तादृशविग्रहवत्त्वं अन्यथासिद्धेरारोपितशरीरबोधकत्वेनोपपत्तेः जनकत्वपक्षेउक्तश्रुतेर्जनकत्वबोध कत्वस्वीकारपक्षेमोचकत्वादुक्तश्रुत्यामोचकत्वबोधकत्वबोधनात् आद्येस्वकर्मार्जितत्वेद्वितीयेपरकर्मार्जितत्वे अपसिद्धांतइति ———— त्वयाविग्रहस्यब्रह्मभेदास्वीकारा दितिशेषः नेतिनेतीतिब्रह्मभिन्नस्यसत्यत्वरूपामायिकत्वेइत्यादिः ब्रह्माभिन्नममायिकं शरीरमितिपक्षंदूषयतिचार्वाकेतिजीवतद्देहयोरप्यभेदापत्त्यादेहात्मवादेपर्यव सानादित्यादिः देहेब्रह्माभेदेइदंदूषणंब्रह्मणोदेहाभेदस्तुममेष्टइतिबोध्यं प्रमाणाभावः अभौतिकत्वादौप्रमाणाभावः नाभित्वादिपरिकल्पनयेतिनाभ्यादितादात्म्यारोपेण

ऽयमर्थः तथाच नाभिरित्याद्यर्थे नाभ्याद्यादिकमिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथाचकथमनारोप्यत्वसिद्धिःकथंवाहिरणमयत्वादितुल्यत्वेनादित्यवर्णत्वादेर्वर्तमानत्वसिद्धिर्यथाकथंचित्तुल्यत्वस्यव्यभिचारित्वात् वर्तमानत्वेनश्रुतिजन्यबो।
धविषयत्वरूपस्यतुल्यत्वस्यासिद्धत्वात् प्रतीकोपासनेनामादौब्रह्माद्युपासने सगुणोपासने अहंग्रहेणसगुणोपासनेस्यादद्धेतियस्यस्यादद्धानविचिकित्सास्तीति
श्रुत्यायस्योपास्यमद्धासाक्षात्कृतंभवतिउपासनाफलंमयाप्राप्तव्यंनवेतिविचिकित्सानास्तिचतस्योपास्यप्राप्तिद्वारकमुक्तिरूपफलप्राप्तिरितिबोधनेनाहंग्रहोपास
नायामुपास्यब्रह्मसाक्षात्कारनियमोतएवविकल्पोविशिष्टफलत्वादित्यधिकरणेउपास्यसाक्षात्कारद्वारकक्रममुक्तिरूपफलविशेषात्सर्वासामहंग्रहोपासनानां।
विकल्पउक्तःतस्यैवेतितथाचतत्तद्गुणविशिष्टस्यब्रह्मणइन्द्रियसाक्ष्ययोग्यत्वेपितस्यैवाविद्यमानहिरणमयशरीरविशिष्टत्वादित्यवर्णत्वाद्याविर्भावेनातिशयेनसाक्षा।
त्कारसंभवइतिभावःवस्तुतस्तुउपासनायाज्ञानत्वाभावेपीच्छादिविषयत्वेनेवतद्विषयत्वेनारोप्यस्याविद्यमानस्यापिसाक्षिभास्यत्वादादित्यवर्णत्वहिरणमयत्वादेरा
रोप्यस्यवर्तमानदर्शनविषयत्वबोधकश्रुतिरुपपन्नानाप्यनारोप्यस्याधिकानचोपासनाविषयत्वेनदृश्यत्वोपपादनेपिस्वरूपेणविद्यमानस्यदृश्यत्वंनोपपादितमि
तिवाच्यंस्वरूपेणादृश्यत्वस्यदृश्यतइत्यनेनबोधनादितिबोध्यमेतेनहिरणमयवाक्येयएवंवेदेतिक्रियापदश्रवणादेकवाक्योपात्तवर्तमानार्थकाख्यातानामनेकका

प्रतीकोपासनेउपास्यसाक्षात्कारनियमाभावेपिसगुणोपासनेउपास्यसाक्षात्कारस्यस्यादद्धेतिश्रुतिसिद्धेननियतत्वेनतस्यैवदर्शनशब्दे
नाभिधानात् विश्वतश्चक्षुरित्यादिश्रुतिस्मृतीनांसर्वात्मकतयासर्वान्तर्यामितयाचनियम्यजीवशरीरचक्षुःपाणिशिरःप्रभृत्यनुवादित्वो-
पपत्तेःसर्वतःपाणिपादत्वादेस्तत्सम्भवात्तयाप्येवमेवचवक्तव्यत्वात् अन्यथादेशविशेषावच्छेदेनपरममुक्तिप्रतिपादनंगम्यत्वप्रवेशत्वा
द्युपपादनंचत्वदीयमसंगतंस्यात् ॥ लीननानाक्रियाबोधकत्वाद्यदायदोपासनातदातदादर्शनस्यलाभादुपासनासाध्यदर्शनमादायदृश्यतइतिश्रुति
र्नोपपादयितुंशक्यतइतिकुचोद्यमपास्तमेककालीननानाक्रियाबोधकत्वेपिक्रियाणांमिथोव्याप्यव्यापकभावाबोधकत्वंनहिपचतिपठतीत्युक्तेयदायद ॥०॥
दातदापाकइतिबुध्यतेतथाचोपास्येसाक्षात्कृतेपिआप्रायणात्तत्रापिहिदृष्टमितिन्यायेनोपासनास्वत्वादुपासनाकालेकदाचिद्दर्शनसत्त्वेनोक्तश्रुत्युपपत्तेराचार्यो
क्तसिद्धान्तस्याप्यदोषत्वाच्चयत्तुएतमितःप्रेत्याभिसंभवितास्मीत्यादिश्रुत्योपास्यरूपप्राप्तेरुपासनाफलत्वेनोक्तत्वादुपास्यशरीरमावश्यकमितितन्ननावताप्यना
रोपितशरीरस्यब्रह्मण्यसिद्धेरारोपितशरीरन्तुब्रह्मणिवक्ष्यतएवब्रह्मणासहतेसर्वेइतिस्मृत्याद्यनुसारेणोक्तश्रुतेरारोपितसगुणप्राप्तिपरत्वा — वश्यकत्वात्
असंभवादितिसर्वदेशवृत्तिपाणिपादादिवैशिष्ट्यमसंभावितंपाण्योःसर्वदेशवृत्तित्वेपादादेस्तदनुपपत्तेर्मूर्त्तयोःसमानदेशताविरोधात् अन्यथेत्यादियदीशश
रीरंसर्वदेशवृत्तिपाण्यादियुक्तंतर्हिवैकुंठादिदेशविशेषावच्छेदेनेशशरीरप्राप्तिर्मुक्तिःशरीरिणईशस्यान्तर्यामिरूपेणसर्वकार्येषुप्रवेशइत्यादित्वदुक्तिर

॥ युक्तेत्यर्थः ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रलयपर्यंतस्थायीति प्रलयास्थायीत्यर्थस्तेन श्रीकृष्णादिदेहस्य योगधारणायादग्धेत्यादिना प्रलयपर्यन्तत्वाभावलाभेपि न क्षतिः शाश्वता इत्यनेन तु उपासना।
तिशयेन तत्तज्जातीयदेहाः सर्वदा द्रष्टुं शक्याः पूर्वोत्पन्न श्रीकृष्णादिदेहस्य नष्टत्वेपि भक्तवात्सल्येन भगवता तज्जातीयदेहान्तरं जनयित्वा प्रदर्श्यते इति ज्ञापितं पर
मानन्दसंदोहा इत्यस्य विवेचनं दुःखभोगानायतनेति ज्ञानमात्रा इत्यस्य विवेचनं ज्ञानमात्रप्रधानेति आवरणशून्येत्यर्थः रघुनाथादिदेहेप्यावरणकार्यरोदनादि।
ब्राह्मणशापावैयर्थ्यसूचनायेति भावः अहिकुण्डलेत्यादि वलयाकाराहिकुण्डलाभेदेपि यथाहिकुण्डलयोर्विशेषस्य भेदस्थानीयस्य सत्त्वेनाहिः कुण्डलीति व्यव।
हारस्तथा ब्रह्मतच्छरीरयोरपि विशेषस्वीकारेण ब्रह्मशरीरीति व्यवहार इति भावः संयोगविशेषस्य तद्विशिष्टस्य वा केवलाहित्वविशिष्टाद्भेद एव संभवति अत एव
भट्टादिमते गुणाद्योर्भेदाभेदस्वीकारो घटत्वनीलत्वादिरूपभेदेन तदुपहितयोर्भेदसंभवात् प्रतीयमानत्वेनाभेदस्यापि संभवात्तथा च भेदस्यैव विशेष इति नामभे
दमात्रं अस्तु वा भेदान्यो विशेषस्तथापि ब्रह्मतच्छरीरयोर्न तत्संभवः स हि भिन्नधर्मोपहितयोरेव वाच्योन्यथा तद्व्यक्तिस्तद्व्यक्तिमतीत्यादिप्रत्ययस्यापि विशेषविष

यत्तु सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः परमानंदसंदोहा ज्ञानमात्राश्च सर्वदेत्यादौ साक्षान्नित्यत्वोक्तिविरोध इति तन्न प्रलयपर्यंतस्था
यि दुःखभोगानायतन ज्ञानमात्रप्रधानदेहपरतया तद्विवक्षितपरत्वाभावात् अत एव जडस्ततो भिन्नश्च न चानन्दरूपममृतं यद्विभाति आप्र
णखात्सर्व एवानन्दः मोदो दक्षिणः पक्षः यदात्मको भगवांस्तदात्मिका व्यक्तिः किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मक इति श्रुतेर्भेदाभा
वेप्यहिकुण्डलन्यायेन विशेषवत्त्वाद्विग्रहत्वोपपत्तिरिति वाच्यम् आत्मनो ज्ञानानन्दरूपत्वप्रतिपादनपरत्वेन विग्रहाप्रतिपादकत्वात्
विचित्रशक्तिः पुरुषः पुराण इत्यादिवाक्यस्यात्मनि चैवं विचित्राश्च हीति सूत्रस्य च मायाशक्तिवैचित्र्यप्रतिपादकत्वेनात्मशक्त्यप्रतिपाद
कत्वात् आप्रणखादित्यादेश्च लीलाविग्रहावच्छेदेन दुःखाद्यभोक्तृतयोपपत्तेः ॥ ८१ ॥ यकत्वेन प्रमात्वापातान्न च ब्रह्मत्वाद्यन्यत् शरीरत्वादिकं ब्र

ह्माभिन्नवृत्तिमानाभावात् चेष्टावदन्त्यावयवित्वं शरीरत्वमिति हि वृद्धाः ब्रह्मणि तत्स्वीकारे च निष्कलं निष्क्रियमित्यादिश्रुतिविरोधश्च न च प्राकृतांशक्रिययोः रू।
क्तश्रुत्या निषेध इति वाच्यं संकोचे मानाभावात् शरीरित्वबोधकमागतेरुक्तत्वात् सावयवत्वेन विनाशित्वाद्यापत्तेश्च वक्ष्यमाणत्वाच्चेत्याशयेन विशेषस्फुटदूषणं मत्वा
श्रुतिमुपपादयति आत्मन इत्यादि तथा च यदात्मको यत्स्वरूपेणात्यन्ताभिन्नस्वरूपो भगवानीश्वरः तदात्मिका तत्स्वरूपेणात्यंताभिन्न व्यक्तिरभिव्यक्तिरपरोक्षचिद्रूप आ
त्मा ज्ञानात्मकः ज्ञानस्वरूपात्यन्ताभिन्न ऐश्वर्यात्मको नित्यनिरतिशयानंदस्वरूपात्यन्ताभिन्नस्तथा च चिदात्माप्युक्तस्वरूपाभिन्न इति जीवब्रह्मस्वरूपयोरभेदश्रुतितात्पर्यमि
तिभावः शक्त्यप्रतिपादकत्वात्तात्त्विकशक्त्यप्रतिपादकत्वात् तथा च तद्दृष्टान्तेन तात्त्विकशरीरसाधनप्रत्याशा नेति भावः लीलाविग्रहेति तथा च प्रणखपर्यंतं सर्वो देहो दुःखानव
च्छेदक इत्येव श्रुत्यर्थोन्यथा प्रणखादिमयदेहस्यानंदरूपत्वानुपपत्तेर्विचित्रशक्तित्वं तु कार्यस्य संभावितत्वे नियामकं न त्वीशस्वरूपाभिन्नदेहस्य तस्य नित्यत्वेन शक्त्यविषयत्वादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रह्मपरतयाब्रह्मणितमः परत्वपरतया इतिश्रुत्यनुसारेणेति एकोहवैनारायणआसीन्नब्रह्मानईशानोनापोनाग्नीषोमौनइमेद्यावापृथिवीत्यादिमहोपनिषद
पिभूतभौतिकसकलकार्यस्रष्टृत्वादिकंनारायणशब्दितस्यमायावच्छिन्नचैतन्यस्यैवप्रतिपादयतिसदेवेत्यादिश्रुत्युक्तसद्रूपस्यैवनारायणशब्देनोक्तिसंभवा
त् नारंजीवसमूहोयनंनिपर्ण्यंयस्येतिव्युत्पत्तेर्नचशरीरविशिष्टेनारायणशब्दरूढ्यासदेवेत्यादिश्रुतिरेवशरीरविशिष्टपरेतिवाच्यमेकमेवाद्वितीयमित्यादिवि
रोधात् मायादेस्तुमिथ्यात्वेनतदविरोधात्मायान्तुप्रकृतिंविद्याद्ज्ञाज्ञौद्वावजावीशानीशाविति श्रुत्यादिमानेनमायादेरनादेःसिद्धत्वेप्यनादिशरीरेमानाभावाच्च अखंडे
तिजीवास्तुमायाप्रदेशरूपाविद्योपहिताःमायाविद्ययोरभेदपक्षेतुमायाविम्बत्वमेवव्यावर्त्तकंवोध्यंइदंसदेवाग्रे आसीदित्यनेनप्रपंचस्यसंस्कारभावापन्नस्यस
दात्मकतयास्थित्युक्त्यासंस्कारस्यचपरिणामिकारणमायानियतत्वान्मायावच्छिन्नत्वंचैतन्यस्यार्थाल्लभ्यतइतिवोध्यंयत्तुप्रलयेशरीरंविनाचेतनसामान्यसत्वा

तमसःपरस्मादित्यादेश्चविराट्देहोपलक्षितब्रह्मपरतयाविग्रहस्यतमसःपरत्वाप्रतिपादकत्वात् नचैकोनारायणआसीत् नब्रह्मा।
नचशंकरइतिश्रुत्यामहाप्रलयेनारायणस्थित्युक्त्यानित्यविग्रहसिद्धिःनारायणशब्दस्यसदेवसोम्येदमग्र आसीदितिश्रुत्यनुसारेण
मायोपहितब्रह्मपरत्वेनविग्रहपरत्वाभावात् नचैतावताचेतनान्तरसाधारण्यं अखण्डमायोपहितत्वस्यैवव्यावर्त्तकत्वात् नचनित्यो
नित्यानांचेतनश्चेतनानामितिविग्रहनित्यत्वाभावेविशेषोक्तिविरोधःविग्रहानंगीकारेपिस्वरूपचैतन्यमादायोपपत्तेःनापिपुराक
ल्पापायेस्वकृतमुदरीकृतमित्यादौमहाप्रलयेदेहस्यसाक्षात्स्थित्युक्त्यानित्यविग्रहसिद्धिःसर्वविकारमूलकारणविद्यायाःसंस्कारात्म
नाऽवस्थानस्योदरीकरणशब्दार्थत्वात् नचमुख्यार्थत्यागःत्वयाप्यस्यार्थस्यैववक्तव्यत्वात् अन्यथासकलस्यब्रह्माण्डस्यतदनुप्रवे
शमात्रेणप्रलयासिद्धेः॥ ११ नारायणस्यैवसत्त्वकथनमयुक्तमितितन्मोक्षात् नारायणस्यैक्षणादिपूर्वकजगत्स्रष्टृत्वादेर्वाच्यत्वेनतदर्थंतस्यै
वप्रवलयेसत्त्वोक्तेःनतुसएकाकीनरेमेतस्यध्यानांतस्यस्यतस्मिन् पुरुषाश्चतुर्दशाजायंतएकाकन्येत्यादिनाभूतेन्द्रियसृष्टिमुक्त्वातस्यललाटाअक्षःशूलपा
णिरजायतेत्युक्तेःशरीरीनारायणोजगत्कारणमितिचेन्नएकमेवेत्याद्यनुरोधेनललाटपदस्यमायापरत्वात् तदानीमुत्पन्ननारायणशरीरललाटपरत्वाद्य
उपपत्तेःकल्पमात्रस्थायित्वरूपाकाशादिनित्यत्वाद्यपेक्षयोत्कृष्टनित्यत्वादिवोधकत्वोपपत्तेःसंस्कारात्मनासर्वविकारसंस्कारविशिष्टात्मनास्वकृतंसर्वंसं।
स्काररूपेणविकृतंमायारूपोदरस्थीकृत्येतिप्रकृतार्थइतिभावःमुख्यार्थेतिउदरपदमुख्यार्थेत्यर्थःतदनुप्रवेशेतिउदरप्रवेशेत्यर्थःप्रलयासिद्धेरितिसंस्का
रात्मनाकार्यस्यकारणेवस्थानस्यैवप्रलयत्वात् संस्कारत्वापन्नस्यजगतउदरेवस्थानंनप्रलयउदरस्याकारणत्वादत्तउदरपदंविनाश्यमानाधारत्वगुणयो
गेनमायायांगौणमितित्वयापिवाच्यं मायायास्तुकारणत्वंश्रुत्यादिसिद्धमितिभावः॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

नचनित्यसुखादिसत्त्वेनजन्यसुखत्वादिनाधर्मादिजन्यत्वमिवनित्यनीलादिरूपविशिष्टविग्रहानुरोधेनजन्यनीलत्वादिनैवपृथिव्यादिजन्यत्वमितिवाच्यंगौरवात्सुखत्वादिजातिस्तुनित्यवृत्तीतितयैवधर्मादिजन्यत्वादितिभावः अन्यथा पाणिपादं चक्षुःश्रोत्रादिसामान्यस्योक्तश्रुत्यानिषेधेशृणोतिपश्यतीतिपश्यत्यचक्षुरित्यादीत्यर्थःसंकोचवदितिवस्तुतःसंकोचोनास्त्येवसुखत्वविशिष्टस्यैवनिषेधात्सुखस्वरूपस्यब्रह्मणःसुखशून्यत्वाविरोधाच्चश्रवणदर्शनयोःशृणोतिदृशिधात्वर्थयोःसाक्षित्वेतितथाचशृणोत्यादिकंश्रावणत्वादिजातिविशिष्टेशक्तमपिशब्दादिविषयकत्वरूपशक्यगुणयोगेनेशसाक्षिणिगौणमितिभावःवस्तुतश्चक्षुरादेरिवमायोपाधेरप्युक्तश्रुतिवलाच्चाक्षुषादिहेतुत्वंकल्प्यतेनतुचक्षुरादीन्द्रियं अचक्षुरित्यादिनाधर्मिग्राहकमानेनैवभगवच्चाक्षुषादेश्चक्षुराद्यजन्यत्वलाभात्प्रतिसर्गमनंतचक्षुरादिव्यक्तीनांभगवतिकल्पनेगौरवात्जीवचक्षुःसन्निकर्षेणैववाभगवच्चाक्षुषंतत्तत्पुरुषीयचाक्षुषगतवैजात्यविशेषविशिष्टेषुसन्निकर्षाणांवैजात्यविशेषैर्हेतुत्वानावश्यकत्वात् ईशचाक्षुषजनकतावच्छेदकवैजात्यस्यापिजीवचक्षुरादिसन्निकर्षस्वीकारसंभवाज्जीवचाक्षुषजनकतावच्छेदकवैजात्यस्येश्वरनिष्ठचाक्षुषहेतुत्वे

नचादुःखमसुखमित्यादौप्राकृतसुखनिषेधवदत्रापिप्राकृतावयवनिषेधपरता अन्यथाशृणोतिपश्यतीतिवाक्यशेषविरोधःस्यादितिवाच्यम् आनंदादिरूपताप्रतिपादकश्रुतिविरोधेनतत्रसंकोचवदत्रसंकोचेकारणाभावात् श्रवणदर्शनयोःशब्दरूपसाक्षित्वमात्रेणापपत्तेर्नतद्विरोधःअन्यथात्वन्मतेपिब्रह्मणिचक्षुरादिसाध्यज्ञानानंगीकारेणतद्विरोधोदुष्परिहरःस्यात् अतएवाऽरूपोऽप्राकृतश्चेतिस्मृत्यैवारूपश्रुतिगत्युक्तेःनारूपमित्यऽनेनरूपमात्रनिषेधइतिनिरस्तम् स्मृतेरुपास्यपरत्वेनज्ञेयब्रह्मप्रतिपादिकायाःश्रुतेःसंकोचेकारणाभावात्श्रुतिस्मृत्योरतुल्यवलत्वाच्चप्रस्तुतयत्तदद्रेश्यमित्यादिनापरविद्याविषयस्याविग्रहवत्त्वप्रतिपादनविरोधात् किञ्चभगवद्विग्रहोनानित्यःमहत्त्वेसतिरूपवत्त्वाद्विग्रहत्वाद्वानित्यताबोधकत्वाभिमतश्रुतेरन्यथासिद्धेरुक्तत्वात् ॥ ११ नकल्प्यमानेपिशाचादिनिष्ठेजीवचक्षुःसन्निकर्षेसत्त्वेमानाभावेनततोजीवचाक्षुषापत्त्यसंभवादितिध्येयं। गत्युक्तेरितिअप्राकृतपदसमभिव्याहारादरूपपदंप्राकृतरूपनिषेधकमितिभावःअरूपमित्यनेनअशब्दमस्पर्शमरूपमित्यादिश्रुत्या। उपास्यपरत्वेनेतिप्राकृतपदस्यभौतिकपरतयाभूतरूपशून्यात्मकोपास्य¯परत्वेनेत्यर्थःवस्तुतोभौतिकत्वनिषेधादेरभौतिकरूपशून्यस्योपास्यत्वलाभेअरूपपदंरूपसामान्यनिषेधकंतथावाप्राकृतपदेनप्राकृतविलक्षणमायोपाधिकत्वेनारूपपदेनचरूपसामान्यशून्यत्वेनोपास्यत्वमुक्तस्मृत्यालभ्यतइतिबोध्यंप्रत्युतेत्यादिद्वेविद्येपराचापराच अथपराययातदक्षरमधिगम्यतेयत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुरश्रोत्रमपाणिपादमित्यादि अशब्दमस्पर्शमित्यंतवाक्यंपरविद्यापरत्वेनविग्रहशून्यशुद्धप्रतिपादकमवश्यंवाच्यमितिभावःनित्यइतिविनाशीत्यर्थःरूपमात्रंपरमतेपरमाणवादौव्यभिचारीत्यतोमहत्त्वेसतीतितावन्मात्रमात्मादावपीतिरूपवत्त्वादितिनचाप्रयोजकत्वंरूपस्योक्तरीत्यानित्यत्वासंभवात् जन्यरूपस्याणुकरीत्याविग्रहकार्यत्वविनाशित्वसंपादकत्वात् ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुनित्यत्वादिकंब्रह्मस्वरूपंत्वयापिवाच्यमन्यथाब्रह्मणोनित्यान्यस्वभावत्वापत्तेस्तथाचविग्रहस्यापिब्रह्मस्वरूपत्वसंभवेननित्यत्वसत्यत्वादिसंभवइतिकथंतत
खण्डितमित्यत आहनित्यत्वेतिपरिभाषेतिसोपादानकद्रव्यस्यचेष्टावदन्त्यावयवित्वेनशरीरपदशक्यत्वात्तस्यचब्रह्मण्यसंभवात्तत्रशरीरनाममात्रंत्वयाकृतंनास्मद।
निष्टमितिभावः।निर्विशेषेतिनिर्विशेषप्रकरणस्थोक्तश्रुत्येत्यादिः।अरूपत्वेनेत्यादिइंद्रादेरिवेशस्यान्तर्धानशक्त्याश्रीकृष्णादिदेहस्यसदाविद्यमानस्यापिसर्वेपू
रुषान्प्रतिकादाचित्कमनुपलंभनमितिसमर्थनस्य अप्रसक्तसमर्थनत्वाच्चाक्षुषाप्रसक्तावपिचाक्षुषाभावसमर्थनत्वात् अयमन्येचहेतवोविशेषवत्त्वादिग्रह
त्वोपपत्तिरितिनचवाच्यमितिपूर्वोक्तेबोध्याः।अप्रसक्तसमर्थनेहेतुमाहारूपत्वेनचाक्षुषाप्रसक्त्येतिनीलत्वपीतत्वरक्तत्वतद्व्याप्यजात्यवच्छिन्नंप्रतिपृथिवी
त्वेनोपादनत्वान्नीलादिरूपसामान्यस्यपृथिवीजन्यत्वेनब्रह्मविग्रहेनित्यरूपंनसंभवतिनापिजन्यंतद्धिविग्रहकारणगतरूपात्पाकाद्वानाद्यस्त्वन्मतेविग्रहस
नित्यत्वात्नान्त्यः।पाकपूर्वरूपान्तरस्यवाच्यत्वेनश्रीकृष्णादिविग्रहस्यनानारूपतापत्तेर्नहिसकदाचिन्नवनीरदश्यामःकदाचिदिन्द्रनीलादिश्यामस्तथास

मोदोदक्षिणइत्यादेरानन्दमयकोशप्रतिपादकतयाब्रह्मपरत्वाभावात् नहिश्रुत्युक्तत्वमात्रेणब्रह्मणोविग्रहरूपताब्रह्मैवेदंपुरुषएवेदंसर्वमि
त्यादिश्रुत्याप्रपञ्चरूपतापि——ब्रह्मणयापद्येत स्वरूपानन्दएव नित्यत्ववदपराधीनत्वच्चविग्रहत्वकल्पनस्यपरिभाषामात्रत्वात् मन्यते।
पिब्रह्मातिरिक्तस्यब्रह्मसत्तासमानसत्ताकत्वाभिमतस्यब्रह्मणिनिषेधांगीकारात् नचनैषातर्केणमतिरापनेयेतितर्कागम्यत्वोक्त्यात्मनएव
विग्रहत्वमितिवाच्यम् निर्विशेषात्मनएवतर्कागम्यत्वोक्त्यात्मनोविग्रहत्वस्यतर्कागम्यत्वानुक्तेररूपत्वेनचाक्षुषत्वाप्रसक्त्यापिशाचादिवत्त
दन्तर्द्धानशक्त्याऽनुपलम्भसमर्थनस्याप्रसक्तसमर्थनत्वात् विग्रहपक्षेऽपाणिपादइत्यादिश्रुतिविरोधस्योक्तत्वाच्च॥ २२ तिध्यानस्याव्यवस्थितत्वा
पत्तेर्नचनवनीरदश्यामत्वादिकत्वमेवोपास्यंनवीननीरदश्याममित्यादिगौतमीयतंत्रादौतथोक्तत्वात्तथाचश्रीकृष्णादिविग्रहेएकैकजातीयरूपमेवोपास्यमिनिप्रति।
विग्रहंपाकजनानारूपस्वीकारेपिनोपासनस्याव्यवस्थेतिवाच्यमेवमपिपूर्वरूपनाशकरूपान्तरोत्पादकस्तेजःसंयोगविशेषरूपःपाकोब्रह्मणिजायतइत्यत्रनियाम
काभावात् सर्गादौजायतइतिवाच्यंतथाचरूपरसगंधस्पर्शानांचतुर्णामुत्पत्तिनाशकल्पनागौरवादनादिरूपादिविशिष्टंपूर्वदेहेविनाश्यतादृशमुत्तरंदेहंपाकोजनयतीत्येवोच्य
तामतएवरूपादिमत्त्वाच्चविपर्ययोदर्शनादितिसूत्रस्यपृथिव्यादिभूतसामान्यानित्यताप्रतिपादकस्यत्रसरेणुगतानांरूपादीनांपाकजत्वादिकल्पनापेक्षयानादिरूपादिविशि
ष्टस्यत्रसरेणोरेवपाकजत्वादिकल्पनंयुक्तमित्यादितर्कपरतासूत्रमुक्तावल्यामस्माभिर्व्याख्याता अतएवचैकैकाएवनीलारुणादिव्यक्तयइतिमीमांसकाः।एवंचकृष्णायदेवकी
पुत्रायोक्तोवाचब्रह्मण्योदेवकीपुत्रोब्रह्मण्योमधुसूदनः।चिन्मयेस्मिन्महाविष्णौजातेदशरथेहरौरघोःकुलेखिलंराति राजतेयोमहीस्थितइत्यादिश्रुतयः।प्रकृतिंस्वामधिष्ठायसं रामः
भवामिधर्मसंस्थापनार्थायसंभवामियुगेयुगेतदात्मानंसृजाम्यहंजन्मकर्माभिधानानिसंतिमेङ्गसहस्रशः।बहूनिमेव्यतीतानिजन्मानितवचार्जुनेत्यादिस्मृतयश्चनबाध्यंते ॥ २६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मावाइदमेकएवाग्रआसीन्नान्यत् किंचनमिषत् एकोहवैनारायणआसीन्नब्रह्मानईशानोनापोनाग्नीषोमौनइमेद्यावापृथिवीननक्षत्राणिनसूर्यइत्यादिश्रुतिभिः प्रलयेसकलकार्यसंस्कारायेहितमायावच्छिन्नचिन्मात्रसत्तामुक्त्वासईक्षतलोकानुसृजाइतिसइमाल्लोकानसृजतसोकामयतइत्यादिनातस्यध्यानात्स्यस्येत्या दिपुरुषाश्चतुर्दशाजायन्तेत्यादिपंचतन्मात्राणिमहाभूतानीत्यादिनाचसर्वलोकघटितप्रपंचसृष्टेरुक्तत्वात् यतोवाइमानिभूतानिजायन्तेयत्प्रयन्त्यभिसंविशंतिसु षुप्तिकालेसकलेविलीनेएतस्मादात्मनःसर्वेलोकाःसर्वेवेदाःसर्वेदेवाःसर्वाणिभूतानिव्युच्चरंतीत्यादिश्रुतेर्भूतत्वावच्छेदेनब्रह्मजन्यनाश्यत्वकल्पनेलाघवाद्भौ तिकवैकुंठलोकेमानाभावात् अनादित्वेनश्रुतियुक्तिसिद्धमायादिभिन्नजडत्वावच्छेदेनलाघवात् ब्रह्मोपादानकत्वात् सोपादानकमात्रस्याविद्यकत्वेनाविद्यानाशनाश्य त्वाज्जडसामान्यस्यविनाशित्वमित्युक्तवाक्यस्थंनित्यादिपदमवान्तरप्रलयस्थपरमितिभावःतर्कैरित्यादिःब्रह्मणआकारखण्डनं ॥६॥ भगवत् विग्रहस्यानित्यत्वमिथ्या त्वादियोगेपिव्यवहारकालेतदुपासनासंभवेननतत् फलचित्तशुद्ध्यादिकंयस्यदेवेपराभक्तिर्यथादेवेतथागुरौतस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनःधर्मःसत्यदयो

वंशीविभूषितकरान्नवनीरदाभात्पीताम्बरादरुणबिम्बफलाधरोष्ठात् पूर्णेंदुसुन्दरमुखादरविंदनेत्रात्कृष्णात्परंकिमपितत्त्वमहंनजाने १ ननुनि र्विशेषंचेद्ब्रह्मतर्हिब्रह्मैवैकंज्ञानात्मकमानन्दात्मकमद्वितीयंनित्यंसाक्षिचेतितेनोपपद्यते तथाहितत्रतावत् ज्ञानत्वंकिंजातिविशेषोवा १ साक्षाद्व्य वहारजनकत्वंवा २ जडविरोधित्वम्वा ३ जडान्यत्वंवा ४ अज्ञानविरोधित्वम्वा ५ अर्थप्रकाशात्मकत्वम्वा ६ पराङ्गीकृतम्वा ७ नाद्यःवृत्तिप्रतिबिंबितज्ञाना भासेषुतत्सम्भवेप्यखण्डरूपब्रह्मज्ञानेतदयोगात् नद्वितीयःफलोपधानस्यसुषुप्त्यादावभावात् शक्त्यादिरूपस्वरूपयोग्यताया अपिमुक्तावभावात् ॥ ७ ॥ नतृतीयःस्वरूपज्ञानस्यनित्यत्वेनतद्विरुद्धस्यजडस्यनित्यनिवृत्त्यापातात् नचतुर्थःसत्यंज्ञानमित्यादावनृतव्यावृत्तेरार्थिकत्वोक्तिविरोधात् नपञ्चमःअज्ञा नस्यनित्यनिवृत्त्यापातात् नषष्ठःमोक्षेऽन्यार्थोल्लेखाभावात्स्वरूपोल्लेखेचस्वविषयत्वापातात्नसप्तमःपराङ्गीकृतजातेर्व्यवहारहेतुत्वादेर्वात्वन्मतेऽसंभवा

पेतोविद्यावातपसान्विता।मद्भक्त्यापेतमात्मानंनसम्यक्प्रपुनातिहीत्यादिश्रुतिस्मृत्युक्तमव्याहतंगुरुसेवाफलवत् नहिगुरुदेहोपिनित्यादिरूपःपरसम्मतइत्याशये। नजीवन्मुक्तोप्याचार्यःपूर्वसंचितभजनवासनयाश्रीकृष्णंस्मरतिवंशीत्यादि अर्थप्रकाशात्मकत्वमितिप्रकाशत्वमप्रकाशविरोधित्वमप्रकाशत्वंचाज्ञानतमोन्यतर। त्वंतथाचालोकेतिव्याप्तेरर्थेति अर्थविषयकेत्यर्थकं अखण्डरूपब्रह्मेतिनिर्धर्मकैकव्यक्तिरूपब्रह्मेत्यर्थःसुषुप्त्यादावितितथाचवृत्तिप्रतिबिम्बितस्यैवोपधाय कत्वाज्जाग्रत्स्वप्नयोरपिशुद्धेतदभावादसंभवःएवंस्वरूपयोग्यतापक्षेपिव्याख्येयःतद्विरुद्धस्याज्ञानतत्कार्यस्यतथाचजडविरोधित्वंजडनाशकत्वंप्रतिबिम्बि तएवनशुद्धइत्यसंभवःअनृतव्यावृत्तेर्जडव्यावृत्तेःअज्ञानस्येति तथाचवृत्तिप्रतिबिम्बितस्यैवाज्ञाननाशकत्वमितिभावःउल्लेखोविषयित्वंयद्यपिजडान्यत्वोप लक्षितस्वरूपत्वमपिलक्षणंसम्भवंत्येव अतद्व्यावृत्तेरिवजडव्यावृत्तःशाब्दत्वेपिक्षतिविरहात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ·सि· महत्त्वस्यापिरूपसमानाधिकरणस्यजन्यत्वनियमात् जन्यमहत्त्वेचस्वाश्रयावयवस्यमहत्त्वंवहुत्वंप्रचयोवाहेतुःघटादौकपालादिमहत्त्वात् त्रसरेणौद्व्यणुकवहुत्वात् तू
टी·ल· लपिंडादावयवप्रचयान्महत्त्वोत्पत्तेस्तथाचविग्रहेमहत्त्वोत्पत्तिंप्रतितावदन्यतमहेतुत्वावश्यकतयासावयवत्वेनविग्रहेजन्यत्वंतेनचविनाशित्वमावश्यकमितिभा
उ· वःसाधनव्यापकत्वादितिविग्रहेप्राकृतत्वस्यसंदिग्धत्वेपिपरंप्रतिनायंसंदिग्धोपाधिरनुकूलतर्काणामुक्तत्वेनपक्षीयव्यभिचारसंशयस्यसंदिग्धोपाधिकार्यस्याप्रयो
५६ जकत्वादितिभावःसावयवत्वात् अवयवोपादानकत्वात् उक्तत्वादितिब्रह्मणपोदेवकीपुत्रइत्याद्युक्तश्रुतिस्मृतिरूपोत्पत्तिनाशवोधकविरोधइत्यपिवोध्यंतंतूनामेवतं
तूनामपितथाचपटादाविवविग्रहस्यापिमध्यमपरिमाणवत्त्वेनपरिणामिकारणरूपावयववत्त्वमनुमीयतेअन्यथाविग्रहइतिपरिभाषामात्रापातादंत्यावयवविशे

नचप्राकृतत्त्वमुपाधिःसाधनव्यापकत्वात् [illegible]पिननित्यत्वंनचश्रुतिवलात्कश्चित्सावयवोपिनित्यःश्रुत्यन्यथासिद्धेरुक्तत्वात् नन्ववयव
उपादानंचेद्ब्रह्मविग्रहेनास्त्येव एक[illegible]गगनात्मादौव्यभिचारःतयोरप्येकदेशसत्त्वात् नचोपादानातिरिक्तस्यैकदेशस्यैवाभावः उपादान
तंत्वऽन्यहस्तवितस्त्यादिपरिमाणस्यैकदेशस्यपटादावनुभवादितिचेत् नउपादानतन्तूनामेवहस्तवितस्त्यादिपरिमाणवतामनुभवात् गगनादौसंयो
गित्वादिनायदेकदेशसाधनंतदिष्टमेव अस्माभिस्तत्रसावयवत्वानित्यत्वयोरंगीकारात् यत्वात्मनिसुखदुःखयोर्देशभेदेनप्रतीतेरेकदेशसाधनम्
तन्नसुखदुःखयोरंतःकरणगततयातद्गतत्वाभावात् नचगौरनाद्यन्तवतीत्यादिश्रुत्याअनादिनित्यायाअपिप्रकृतेःसत्त्वरजस्तमोरूपैकदेशदर्श
नाद्व्यभिचारइतिवाच्यम् प्रकृतौनित्यत्वाभावादविद्यातिरिक्तप्रकृतेरभावाच्च नचाविद्यायामेवव्यभिचारःतस्याअप्यनित्यत्वेनव्यभिचाराभावात् नचजीवा
वानामपिद्रोणंवृहस्पतेर्भागंद्रौणिंरुद्रांशसंभवंदुर्वासाःशङ्करस्यांशइत्यादिनांशोक्तेःयस्यायुतायुतांशांशेविश्वशक्तिरवस्थितापरब्रह्मस्वरूपस्यप्रणमा
मितमव्ययंविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदित्यादिनेश्वरस्यापयंशोक्तेर्जीवेशयोर्व्यभिचारइतिवाच्यम् आत्मनोंशस्यौपाधिकतयास्वाभाविकत्वाभा
वात् त्वन्मतेजीवानामणुरूपतयास्वाभाविकांशाभावेनकाल्पनिकांशस्यैववक्तव्यत्वात् एतेनभगवल्लोकादेरपिनित्यत्वमपास्तम् नचान्येहिवैष्णवालोकानि
त्यास्तेचेतनात्मकाःमत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतमित्याद्यागमविरोधःतस्यावान्तरप्रलयस्थत्वपरत्वात् तस्मान्निर्गुणंनिराकारंब्रह्मेतिसिद्धम् ब्रह्म

षएवविग्रहपदवाच्यइत्युक्तत्वादितिभावःअंगीकारादितितार्किकादिमतेतुतत्रसंयोगित्वादौमानाभावःगवाक्षजालादौतुत्रुटयएवचाक्षुषाःनतुतेषांगगनसंयोगाइति
वोध्यंऔपाधिकतयेतितथाचद्रोणादिशरीरावच्छिन्नंवृहस्पत्यादिशरीरावच्छिन्नमनोजन्यमनश्चक्षुरादिकंतदुपाधिकआत्मैववृहस्पत्याद्यंशःप्रदीपवदावेशस्तथाहि
दर्शयतीतिसूत्रेकायव्यूहस्थलेउपासनामाहात्म्येनमनश्चक्षुराद्यंतरसृष्टेरुक्तत्वात् एवंमायापरिणाममनआद्युपाधिकहिरण्यगर्भादिरूपेणेश्वरस्यवहुभवनस्यश्रु रामः
त्युक्तत्वाद्धिरण्यगर्भादयस्तदंशाइतिव्यवहारइतिभावःचेतनात्मकाःआवरणवाहुल्यशून्यातस्योक्तागमस्यनित्यादिपदस्यअवान्तरेति ॥ ❁ ॥ ❁ ॥ २६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरुपाधिकेष्टत्वरूपत्वात् अन्येच्छानधीनेच्छाविषयत्वयोग्यत्वरूपत्वात् उक्तयोग्यत्वं च सुखत्वं तद्विशिष्टं वृत्तिविशेषावच्छिन्नचिद्रूपं वोध्यं ननु ज्ञानत्वानंदत्वयोः कादाचित्कत्वे जगत्कारणत्वादिवदस्वाभाविकत्वमिति चेन्न इष्टत्वात् एवमपि जगत्कारणत्वं तटस्थलक्षणमानंदत्वाद्युपलक्षितव्यक्तिर्लक्षणाया वोध्या स्वरूपलक्षणमिति सिद्धान्ताव्याघातात् जगत्कारणत्वादेः शुद्धेनंगीकारपक्षे ज्ञानत्वादेः शुद्धनिष्ठस्य तत्तोवै लक्षणयसंभवाच्च सुखशेषत्वात् सुखव्यंजकत्वात् तथा चान्ये ।- च्छानधीनेच्छाविषयत्वं तत्रासिद्धं सुखाभिव्यक्तीच्छयातस्येष्टत्वात् सुखविशेषत्वादिति पाठे यदा दुःखाभावोपलब्धिस्तदा सुखविशेषोपलब्धेः सुखविशेष एव दुःखाभावत्वरूपेणेच्छाविषय इत्यर्थः अभावस्याधिकरणात्मकत्वमतेप्याह विरोधिभावान्तरेति प्रतियोगिशून्यभावेत्यर्थः तथा च ताहृशभावस्यात्मरूपत्वे लक्ष्यत्वमनात्मरूपत्वे च निरुपाधीच्छाविषयत्वाभावादेवनातिव्याप्तिरिति भावः इच्छापाये उक्तयोग्यतापाये इष्टत्वोपलक्षितेति उक्तयोग्यत्वविशिष्टरूपवाच्यार्थद्वारानंद

आनन्दत्वस्य निरुपाधिकेष्टत्वरूपत्वात् न च दुःखाभावेतिव्याप्तिः दुःखाभावस्यापि सुखशेषत्वात् अभावस्य विरोधिभावान्तरत्वाभ्युपगमात् न च मुक्ताविच्छापाये आनन्दापायापत्तिरिष्टत्वोपलक्षितस्वरूपस्यानपायात् उपलक्ष्ये च तदवच्छेदकसत्वस्यातंत्रत्वात् न च निरुपाधिकेष्टत्वं स्वाभाविकमौपाधिकं वानान्त्यः ब्रह्मण आनन्दरूपत्वाभावापत्तेः आद्ये ज्ञानातिरेकि तदनतिरेकि वा आद्ये सखण्डत्वापत्तिः द्वितीये आनंदपदवैयर्थ्यमिति वाच्यम् ज्ञानानंदपदयोरभेदेपि कल्पितजातिभेदनिवन्धनप्रवृत्तिकतया पदद्वयप्रयोगस्य व्यावृत्तिभेदेन साफल्यात् एतेन विषयानुल्लेखिज्ञानमेवानन्द इत्यपि युक्तम् ज्ञाने विषयोल्लेखनियमस्य प्रागेव निरासात् एवं चानन्दत्वस्य सुनिरूपतया न तन्न्यायेन जगतश्च सदात्मकत्वापादनमिति किञ्च जगति सदाद्यात्मकत्ववाधकं दृश्यत्वादिकं न त्वानंदे तस्य दृगनतिरेकात्। एतेन निरुपाध्यनुकूलत्ववेदनीयं सुखं मतं निर्विशेषमवेद्यं च कथं ब्रह्म सुखात्मकमिति निरस्तम् ॥

ऽ पदलक्ष्येत्यर्थः अनपायादिति तथा चानंदपदवाच्यस्य मुक्तावपाय इष्ट एव तत्लक्ष्यस्यैवाविनाशित्वादिति भावः उपलक्ष्य इति उक्तलक्ष्ये इत्यर्थः तदवच्छेदकेति उक्तलक्ष्यतावच्छेदकेत्यर्थः ज्ञानातिरेकि ज्ञानत्वभिन्नं सखण्डत्वापत्तिरिति मोक्षेप्यानंदत्वस्य वाच्यतया सत्यत्वेन सत्यधर्मवत्वापत्तिरित्यर्थः वैयर्थ्यमिति अपिः शेषः तेन ज्ञानत्वरूपानंदत्वस्य मोक्षेपि वाच्यत्वेन सत्यधर्मापत्तिरपि लभ्यत इति तदनुक्त्यानन्यूनत्वं जातिभेदेति ज्ञानत्वानंदत्वरूपजातिद्वयेत्यर्थः तथा च ज्ञानत्वानंदत्वयोर्नाभेदः किन्तु तदुपलक्षितव्यक्त्योरिति भावः विषयानुल्लेखिज्ञानं स्वसमसत्ताकोविषयसम्बन्धो यत्र तदन्यो ज्ञानपदप्रयोगविषयः दुःखज्ञानमपि चिदात्मकत्वादानंद एव अत एव तत्कालेपि चिद्रूपात्मनि मा न भूवं किन्तु भूयासमिति परमप्रेमा अथवा दृश्याघटितस्वरूपत्वमर्थस्तथा च दुःखविषयकत्वघटितस्य नानंदत्वं किन्तु चिदंशस्येति भावः आनंदे आनंदस्वरूपे आनंदत्वविशिष्टरूपं तु दृश्यत्वान्मिथ्यैवेति भावः ज्ञानेचैतन्ये विषयोल्लेखनियमस्य विषयसंबंधसमसत्ताकत्वस्य दृश्यघटितत्वस्य वा निरुपाध्यनुकूलत्ववेदनीयं अन्येच्छानधीनेच्छाविषयत्वेन वेद्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ·सि टी·ल· उ· ५७

तथापि ज्ञानान्यत्वरूपजडत्वस्य ज्ञानत्वघटकत्वेऽन्योन्याश्रयाद्विद्यानत्वप्रयुक्तान्यतरत्वादिरूपं जडत्वं तद्घटकं वाच्यं तथा च तदपेक्षया लाघवादर्थप्रकाशत्वमेव लक्षणं युक्तमित्याशयेनाहार्थप्रकाशत्वमिति अर्थव्यवहारजनकतावच्छेदकवत्त्वं अर्थेच्छाजनकतावच्छेदकवत्त्वमिति यावत् उक्तावच्छेदकं च ज्ञानत्वजातिः सा च तत्तदर्थस्यासत्त्वापादकाज्ञानविरोधिचैतन्यवृत्तिश्चैतन्यस्य तद्विरोधित्वं च घटादावविद्यमानसुखादौ च तदाकारवृत्तिविशिष्टत्वेन विद्यमानसुखादौ च तद्विशिष्टत्वेन विद्यमानसुखादावपि वृत्त्यंगीकारे तु वृत्तिविशिष्टत्वेनैव तद्बोध्यं यद्यप्युक्तजातिर्विशिष्टचिन्निष्ठा ज्ञाधातुवाच्यतावच्छेदिका तथापि तद्विशिष्टाभिन्नायाः ज्ञानपदत्वस्य व्यक्तेर्मुक्तौ सत्त्वेन ज्ञानस्वरूपमविनाशीत्याशयेनाह मुक्ताविति तत्संसृष्टप्रकाशत्वस्य अर्थप्रकाशस्वरूपस्य ननु आत्मनो वेद्यत्वाभावे मोक्षे वेदितुरभावेऽपि च

अर्थप्रकाशत्वमेव ज्ञानत्वं मुक्तावर्थाभावेऽपि तत्संसृष्टप्रकाशत्वस्य कदाचिदर्थसंबंधेनाप्यनपायात् अत एवार्थप्रकाशरूपत्वं ज्ञानत्वं ब्रह्मणः कथं अन्यार्थाभाववतो मोक्षे स्वेन स्वस्याप्यवेदनादिति निरस्तम् नन्वानन्दत्वं जातिविशेषो वा १ अनुकूलतया वेदनीयत्वं वा २ अनुकूलवेदनत्वं वा ३ अनुकूलत्वमात्रं वा ४ ज्ञानात्मकत्वमेव वा ५ दुःखविरोधित्वं वा ६ दुःखाभावोपलक्षितस्वरूपत्वं वा ७ परांगीकृतं वा ८ नाद्यः अखण्डस्वरूपानन्दे तदभावात् न द्वितीयः मोक्षे वेदितुरभावादात्मनोऽवेद्यत्वाच्च किञ्चानुकूल्यं किञ्चित्सापेक्ष्यं न चान्यं प्रति तद्युक्तमिति स्वं प्रत्येव वक्तव्यत्वेन सविशेषत्वापातात् अत एव न तृतीयः किञ्च वेदनस्वभावादधिकस्यानुकूल्यस्य स्वाभाविकत्वे सखण्डत्वापातः औपाधिकत्वे कदाचिदानन्दनिवृत्त्यापातः न चतुर्थः उक्तरीत्यानुकूल्यासंभवात् अत एव निरुपाधीष्टत्वमानन्दत्वमिति निरस्तम् न पंचमः दुःखादिज्ञानस्याप्यानन्दत्वापातात् विषयानुल्लेखिज्ञानं तथेति चेत् न ज्ञानस्य सविषयत्वनियमात् विज्ञानमानन्दं ब्रह्मेत्यादौ विज्ञानपदेनैव दुःखव्यावृत्तिसिद्धावानन्दपदवैयर्थ्यापाताच्च न षष्ठः विरोधस्य निवर्तकत्वादिरूपत्वे दुःखस्य नित्यनिवृत्त्यापत्तेः तादात्म्यायोग्यत्वरूपत्वे घटादावप्यानन्दत्वापातात् विज्ञानमानन्दं ब्रह्मेत्यादौ दुःखव्यावृत्तेरार्थिकत्वोक्त्ययोगाच्च न सप्तमः वैशेषिकमोक्षे त्वदुक्तस्य दुःखाभावे सत्यपि आनन्दाभावेनापुमर्थत्वस्य त्वन्मोक्षेऽप्यापातात् नाष्टमः परांगीकृतस्य निरुपाध्यनुकूलवेदनीयत्वादेस्त्वन्मतेऽसंभवात् यदि त्वानंदत्वादेर्दुर्निरूपत्वेऽपि तदधिकरणं ब्रह्माबाध्यमानन्दाद्यात्मकं च तर्हि सत्यत्वादेर्दुर्निरूपत्वेऽपि तदधिकरणं जगदबाध्यं सदात्मकं च स्यादि

॥ इति ॥

न क्षतिरनुकूलतया प्रकाशमानत्वस्य वाच्यत्वात् तत्राह किं चानुकूल्यमिति सविशेषत्वापातादिति मोक्षेऽपि स्वप्रतियोगिकानुयोगित्वस्य स्वस्मिन् वाच्यतया प्रतियोगित्वानुयोगित्वरूपसत्यविशेषापातादित्यर्थः आनुकूल्यासंभवादिति सुखस्वरूपत्वमनुकूलत्वं मोक्षे सुखत्वजातेर्विषयसंबंधजन्यवृत्तिविशेषावच्छिन्नचिद्वृत्तेरभावेऽपि तदुपहिताभिन्नस्वरूपमस्त्येवेति न दोष इति बोध्यं दुःखव्यावृत्तिसिद्धाविति ज्ञानपदानन्दपदाभ्यां ज्ञानात्मकबोधनेऽपि ज्ञानपदस्य जडव्यावृत्तौ आनंदपदस्य दुःखव्यावृत्तौ तात्पर्यं कल्प्यते पदद्वयसार्थक्यानुरोधादिति न दोष इति तु ध्येयं। ननु दुःखतत्साधनान्यस्वरूपत्वं दुःखविरोधित्वं वैषयिकसुखतत्साधनयोरपि रागादिद्वारा दुःखसाधनत्वात् शुद्धचित एवोक्तस्वरू

इत्यानन्दविज्ञानमिति ॥

रामः

CC-0. In Public Domain. Digitization by eGangotri

तस्यद्वितीयाभावस्य अप्रामाणिकत्वेतात्त्विकमानावेद्यत्वेस्वप्नेत्यादियथास्वप्नेप्रतीयमानंनिगरणमिवतत्कर्मापिप्रातीतिकंव्यावहारिकस्याजादेस्तदानींप्रत्यायकसन्निक
र्षाद्यभावात् तथाद्वितीयंतदभाववन्मिथ्यादृश्यत्वादितिभावः श्रुतितात्पर्येति अद्वैतंज्ञात्वामुच्यत इत्यादौश्रुतिजन्यधीविषयत्वादिरूपेविशेष्यीभूतब्रह्मान्वितेनन्वि
तत्वेसत्येवद्वैताभावस्योपलक्षणत्वंवाच्यमन्यथाविशेषणत्वापत्तेस्तथाचमानान्तरागम्यस्यतस्यश्रुत्यविषयत्वेसिद्धिर्नस्यादितिभावः अनुद्देश्यत्वात् श्रुतिमुख्यता
त्पर्याविषयत्वात् नन्वेवंद्वितीयाभावप्रकारकप्रमांविनातद्द्वारकस्याखंडार्थबोधस्यानुपपत्तिर्नचसार्वज्ञ्यादाविवद्वैताभावेपिदेवताधिकरणन्यायेनप्रमासंभवइति
वाच्यंसार्वज्ञ्यादेरुपासनादिवाक्यार्थानपेक्षितत्वेनतात्पर्याविषयत्वेपिद्वितीयाभावस्याखण्डवाक्यार्थापेक्षितत्वेनतत्रतात्पर्यावश्यकत्वात् द्वितीयाभावप्रकारकबो

अस्तुवाद्वितीयाभावोपलक्षितस्वरूपत्वमद्वितीयत्वम् तस्याप्रामाणिकत्वेपितत्प्रतियोगिनोद्वितीयस्यस्वप्नोपभुक्तनिगरणादाविवप्रामाणिकत्वा।
नापत्तेः एतेनद्वितीयाभावस्यप्रागभावादित्वेद्वितीयस्यानित्यत्वमात्रंस्यान्नतुमिथ्यात्वं अत्यन्ताभावत्वेतूपलक्षणत्वाऽनुपपत्तिः सदातनत्वात् श्रुति।
तात्पर्यविषयत्वादिकार्यानन्वयित्वेनोपलक्षणत्वेऽत्यन्ताभावासिद्धिः एवंचद्वैताभावस्तात्त्विकश्चेत्तेनस्यात्सद्वितीयता अतात्त्विकश्चेद्वैतेनसद्वितीय
त्वमापत्तेरितिपरास्तम् स्वरूपातिरेकेणत्प्रमाया अनुद्देश्यत्वात् तद्बोधस्यावान्तरतात्पर्येण यथाकथंचित्संभवात् तात्त्विकत्वेब्रह्मानतिरेकात् अतात्त्वि
कत्वेस्वप्ननिगरणन्यायस्योक्तत्वात् उपपादितंचैतद्विस्तरेणप्रागितिशिवं ननुब्रह्मण एवयन्नित्यत्वमभिमतंतत्किंसर्वकालसम्बंधित्वंवाकालावच्छे
दराहित्यंवाध्वंसाप्रतियोगित्वंवा उभयावधिराहित्यंवा नाद्यो अविद्यायांकालेचातिव्याप्तेः अविद्यायाः सर्वकालोपादानत्वेनतत्सम्बन्धनियमात् इदानी
मेवनान्यदेत्येवंरूपतदवच्छेदरहितत्वाच्च नतृतीयः ध्वंसेऽतिव्याप्तेः नचध्वंसोपिध्वंसप्रतियोगी———प्रतियोग्यनुन्मज्जनंतुप्रागभावनिवृ
त्तिरूपस्यघटस्यनिवृत्तावपिप्रागभावानुन्मज्जनवद्युक्तमितिवाच्यम् एवंसतिमोक्षेप्यात्मान्यस्यकस्यचिद्ध्वंसस्यवक्तव्यतयालाघवार्थमाद्यध्वंस
नित्यतायाएवयुक्तत्वात् नचध्वंसस्यनित्यत्वेपिभावेषुब्रह्मैवनित्यमितिवाच्यंनिष्प्रतियोगिकत्वेनभावस्यध्वंसत्वादेरपिनित्यत्वावश्यंभावा
॥ त्॥

धाभावेहिशुद्धबोधादपिनद्वितीयत्वधीनिवृत्तिरितितादृशबोधआवश्यकस्तथाचाग्नेयोष्टाकपालइत्यादिवाक्यस्ययागानुमितितात्पर्यकत्वेपिद्रव्य
देवतासंबंधइवधूमोस्तीत्यादेर्वह्न्यनुमितितात्पर्यकत्वेपिधूमसंबंधइवाद्वैतवाक्यस्याखण्डतात्पर्यकत्वेप्युक्तबोधेवान्तरतात्पर्यमावश्यकमित्यत आहतद्बो
धस्येतियथाकथंचिदितिव्यावहारिकप्रमात्ववतः द्वैतसामान्याभावधीद्वारकाखण्डबोधस्यद्वैताभावादिरूपस्यसर्वद्वैतबाधकत्वेपितदुत्पत्तिपूर्वंव्यावहारिकप्रमा
त्वसंभवतीतिभावः कालेचेतियद्यपिकालस्यस्वात्मककालासम्बन्धित्वान्नेदंयुक्तं तथापिपरमतेत्यन्ताभेदेपितादात्म्यसम्बन्धस्वीकारात् मन्मतेतुरूपान्तरेणास्व
स्मिन्नपिकालेकालसम्बन्धाद्योजनीयंसर्वकालोपादानत्वेनसर्वजन्योपादानत्वेन अविद्याचित्संवन्धरूपमहाकालाधारत्वेनचेतिशेषः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमप्रेमास्पदत्वेन अन्येच्छानधीनेच्छाविषयत्वेन उपहितस्येति शेषः वेदनाभावेनवेद्यत्वाभावेन अनुपपत्तेरितितथाचोक्तविषयत्वमेवलक्षणं संभवतीतिवेद्यत्वाभावेपिनक्षतिरितिभावः विशेषणमित्यादि विशेषणमुपलक्षणं वायोद्वितीयाभावः सप्रामाणिकस्तत्त्वावेदकमानवेद्यश्चेत्तदाब्रह्मणः सद्वितीयत्वं तेनैवस्यात् यदिद्वितीयाभावउक्तमानावेद्यस्तदाप्रपंचरूपस्तत्प्रतियोगीसत्योवाच्योभावाभावयोरेकमिथ्यात्वेपरसत्यत्वनियमात्तथाचब्रह्मणस्तात्त्विकप्रपंचवत्त्वापत्तिरित्यर्थः धर्मादेरिति ब्रह्मणोधर्मः सार्वज्ञ्यादि आदिपदात् ब्रह्मकार्यवियदादिस्तस्येत्यर्थः सद्वितीयत्वाभावात्तात्त्विकद्वितीयवत्त्वाभावात् तथाचविशेषणत्वपक्षेनदोषः ब्रह्मणितत्स्वरूपाभावस्यापिद्वितीयाभावत्वरूपेणकल्पितेनविशेषणत्वसंभवात् अद्वैतंज्ञात्वामुच्यतइतिवाक्यार्थविशेष्यीभूतब्रह्मान्वितज्ञानेद्वैताभावस्याप्यन्वयसंभवेनविशेष

परमप्रेमास्पदत्वेनवेद्यत्वात् सुखवेदनभेदाभावाद्वेदनाभावेनाऽसुखत्वापादनाऽनुपपत्तेः नन्वऽद्वितीयत्वंद्वितीयाभावविशिष्टत्वंतदुपलक्षितत्वं वा उभयथापिविशेषणमुपलक्षणं वाद्वितीयाभावः प्रामाणिकश्चेत् तदातेनसद्वितीयत्वापत्तिरप्रामाणिकश्चेत्तदाद्वितीयेनसद्वितीयत्वापत्तिः नचाभावेद्वितीयेपिनभावाद्वैतहानिः अभाववद्दृश्यस्यधर्मादेरप्येवंप्रामाणिकत्वेवाधकाभावादिति चेन्नप्राभाकररीत्याद्वितीयाभावस्याधिकरणानतिरिक्तत्वेनप्रामाणिकत्वेपितेनसद्वितीयत्वाभावात् नचैवमनुपलब्धेः पार्थक्येनप्रमाणत्वोक्तेरयुक्तिः प्रमेयानतिरेकादितिवाच्यं अतिरिक्ताभाववादिमतएवतदुक्तेः अतिरिक्ताभावाऽनभ्युपगमेप्यभावत्वप्रकारकज्ञानेतत्प्रामाण्योपपत्तेश्चनचानृतत्वावृत्तेरपिब्रह्ममात्रतयाभेदसत्यत्वापत्तिरिष्टापत्तेः अनृतनिरूपितत्वंपरमनृतंमिथ्यात्वान्मिथ्याभेदोब्रह्माभिन्नतयासत्यएवेति नचप्राभाकरमतेप्रतियोगिमदधिकरणाव्यावृत्त्यर्थंकैवल्यादिविशेषोऽवश्यमधिकरणेवक्तव्यस्तथाचसएवाभावोन्यथातेषामप्यनुपपत्तिरेवेतिवाच्यम् यस्मिन्कदापिनप्रतियोगिसंबंधः तस्मिन्स्वरूपस्यापाभेदएवकैवल्यम् यस्मिंश्चकदाचित्सोपितस्मिन्प्रतियोगिमदधिकरणकालभिन्नकालावच्छिन्नमधिकरणमितिनकैवल्यस्याधिकरणातिरेकः नचानुपपत्तिरितिनचैवंगुणगुण्यभेदवादिमतेशौक्ल्यादेरिवशक्त्यादेरपिभावस्वरूपधर्मस्यब्रह्माभेदोस्त्वितिवाच्यं शक्त्यादिनासहाभेदग्राहकमानाभावात् ॥ ऽ॥ णत्वंसंभवत्येवशुद्धब्रह्मज्ञानेब्रह्माभिन्नत्वेनद्वैताभावत्वरूपस्यविषयस्वरूपान्वयसंभवान्नचैवमपिद्वैताभावत्वविशिष्टस्यविशेषणत्वासिद्धिर्दोषइतिवाच्यंद्वैताभावत्वोपहितस्यैवविशेषणत्वसंभवादवान्तरबोधमादायविशिष्टस्यापिविशेषणत्वसंभवाच्चेतिभावः तेषांप्राभाकराणांकैवल्यंकैवल्यविशेषणकार्यकारितथाचकैवल्यंतत्रनोपादेयमितिभावः अधिकरणमिति अवच्छिन्नान्तमात्रस्य प्रतियोगिमदधिकरणेपिसत्त्वाद्दाहाधिकरणमितिप्रतियोगिशून्यत्वेनप्रतीयमानमधिकरणमित्यर्थः अभेदग्राहकेति अत्यंताभेदग्राहकेत्यर्थः तथाचभेदाभेदस्वीकारेपिशक्त्यादीनांसत्त्वेद्वैतश्रुत्यनुपपत्तेर्मिथ्यात्वमेवात्यंताभेदेतुनमानमस्तीतिनत्वदिष्टसिद्धिरितिभावः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्ष्यधीनेति साक्षिमात्राधीनेत्यर्थः तत्र हेतुः प्रातीतिकेति चक्रकेति साक्षिणः अविद्यासिद्धौ तत्कार्यत्वेनाविद्यावृत्तेः सिद्धिस्तस्यां च सत्यामविद्यावृत्त्युपहितत्वेन साक्षिनिर्वचनमिति वृत्तेरुपाधित्वे चक्रकमविद्याया उपाधित्वे तु अन्योन्याश्रय इति भावः साक्षिणोऽविद्यया तद्वृत्त्या वोपहितरूपत्वात्तज्ज्ञाने तज्ज्ञानस्यापेक्षणोपि तयोर्ज्ञानं न साक्षिविषयकज्ञानापेक्षं साक्षिस्वरूपत्वात् नापि साक्षिण उत्पत्तौ अविद्या अविद्योत्पत्तौ वा साक्षी अपेक्ष्यते तयोरनादित्वात् नापि अविद्यावृत्तिसाक्षिणोरेकोत्पत्तावन्यापेक्षा समसमयत्वात् नाप्युपहितरूपः साक्षी उपाध्याश्रितो येन स्थितावपेक्ष्यास्यादुपाधेः स्वोपहितचिदाश्रितत्वेपि उपहितचित्तः शुद्धचित्येवाश्रितत्वादित्याशयेनाह्योत्पत्तौ स्थितीति विशेषः अणुः असर्वगतः ननु वृत्तिद्वारा बुद्ध्युपाधिकस्येदमंशावच्छिन्नचिदभेदात्साक्षिवेद्यत्वं तत्राह चक्रकेति अन्यथा ब्रह्मवेद्यत्वेनैवं जीववेद्यत्वेन तु ब्रह्मणः साक्षित्वेपि विषयावच्छिन्नब्रह्मचित्ता सह जीवस्य वृत्तिद्वारकाभेदसंपत्त्या जीवस्यापि साक्षिता पतिरनवच्छिन्नानंदस्तु जीवं प्रत्यावृतत्वान्न भातीत्यत आह ब्रह्मे:

न चोपाधेरपि साक्ष्यऽधीनसिद्धिकप्रातीतिकाविद्याकार्यत्वेन चक्रकाद्यापत्तिः उत्पत्तिज्ञप्तिप्रतिबन्धस्याभावात् अविद्यातदुपाधिकद्रष्टृत्वयोरुभयोरप्यनादित्वात् ननु साक्षी जीवकोटिर्वा ब्रह्मकोटिर्वा उभयानुगतं चिन्मात्रं वा नाद्यः जीवो बुद्ध्युपाधिकोऽणुरिति पक्षे इदमंशावच्छिन्नचिद्विद्यस्य शुक्तिरूप्यस्य साक्षिवेद्यत्वायोगाच्चक्रकाद्यापातात् अज्ञानोपाधिकः सर्वगत इति पक्षेप्यज्ञानस्यापि साक्ष्यऽधीनसिद्धिकत्वेनान्योन्याश्रयात् न द्वितीयः ब्रह्मण एव साक्षिवेद्यदुःखादिधीर्न तु जीवस्येति वैपरीत्यापातात् अन्यथानवच्छिन्नानन्दधीरपि जीवस्येति स्यात् ब्रह्मचैतन्यं घटादिप्रकाशकमिति मते अज्ञानाभिभवद्वारा तस्य जीवचैतन्याभेदाभिव्यंजकान्तःकरणवृत्तिवत्तादृशवृत्त्यभावाच्च न तृतीयः ईश्वरेणेव चिन्मात्रेणापि संसारिदुःखस्य तज्ज्ञतत्वेन ग्रहणेपि यज्ञागोमुक्तस्तस्य चिन्मात्रस्य दुःखाद्युल्लेखरूपोपप्लवापातात् सुप्तमैत्रं प्रति मैत्रीयाज्ञानादेर्मैत्रीयतयेव जाग्रच्चैत्रीयदुःखादेरपि चैत्रीयतया सुप्तमैत्रं प्रति प्रतीतिप्रसङ्गे नमैत्रेणैतावन्तं कालं दुःखं नावेदिषमिति परामर्शायोगादिति चेत् ॥ ॥

नितादृशवृत्त्यभावादज्ञानाभिभवद्वाराभेदव्यंजकमनोवृत्तेः सुखाद्यावभावात् तथा च यथा चरमवृत्तिं विनानवच्छिन्नानंदांशे आवरणनिवृत्त्या जीवं प्रति न तद्भानं तथान्तःकरणवृत्तिं विना सुखादेरविद्यावृत्तिविषयस्यापि आवरणानिवृत्त्या जीवं प्रति न सुखादिभानं अथ सुखाद्यावावरणाभावान्न तज्ज्ञाने मनोवृत्त्यपेक्षा तर्हि जीवस्येव घटादौ वृत्तिद्वारा सुखादौ स्वतः संबंधात् साक्षित्वसंभवेन ब्रह्मणः साक्षित्वोक्तिरयुक्ता अथ चक्रकादिदोषवारणार्थं ब्रह्मण एव साक्षित्वं इति चेन्न जीवस्याप्युक्तरीत्या ब्रह्माभेदेन साक्षित्वावश्यकत्वेन चक्रकादितादवस्थ्यादिति भावः वस्तुतो जीवरूपेण साक्षित्वास्वीकारेण न पराभिमतचक्रकादीति नेदं युक्तं उपप्लवापातादिति नेदं युक्तम् उपप्लवो हि न दुःखविषयकत्वमात्रमीश्वरस्यापि तत्त्वात् किंतु यं प्रति दुःखादौ मिथ्यात्वमावृत्तं तत्त्वे सति दुःखादिसंबंधित्वं तच्च नेमुक्तभागस्येति ध्येयं मैत्रीयतयेवेति दृष्टान्तो न युक्तः सुप्तप्रत्यज्ञानमात्रभानेपि मैत्रीयत्वाद्यभानात् ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंपरिभाषायामपिब्रह्मण एवध्वंसप्रागभावरूपावधिद्वयराहित्यमित्युक्तावपि असिद्धेरितिमुक्तौ जन्यस्यकस्यचित्सत्त्वेपिब्रह्मण एवोक्तनित्यत्वसंभव इतिभावः अन्तावधिरहितस्य अविनाशिनः विशेषणान्तरस्येतियेनविशेषणेनमुक्तावविनाशिनोब्रह्मान्यस्यासत्त्वसिद्धिस्तदन्यस्येत्यर्थः सिद्धेर्नित्यपदेनब्रह्मणिसिद्धिस्वी॰ कारात् उक्तासत्त्वंतु अद्वितीयादिपदेनैवसिध्यतीतिभावः अथवाविशेषणान्तरस्य उभयावधिराहित्यान्यविशेषणस्यसिद्धेर्मुक्तौब्रह्मान्यस्मिन्सिद्धेः मुक्तौकस्यचिदवि॰ नाशिनः सिद्धावप्युभयावधिरहितस्यनसिद्धिरितिब्रह्मण्येवोक्तनित्यत्वसिद्धिरितिभावः असिद्धेरितिपाठेविशेषणान्तरस्यपूर्वावधिराहित्यस्यैव अविनाशिषुब्रह्म भिन्नेष्वसिद्धेरितिव्याख्येयं अतएवब्रह्मण्येवनित्यत्वन्तस्योक्तरूपत्वादेवइष्टत्वादितिएवंचध्वंसाप्रतियोगित्वमात्रमपिनित्यत्वंब्रह्मणिसंभवतिध्वंसस्यध्वंसाप्रति योगित्वपक्षएवोभयावधिराहित्यरूपंतदितिभावः स्वरूपस्यब्रह्मणः तथाचाधिष्ठानीभूतब्रह्मैवध्वंसस्यध्वंसः तत्त्वज्ञानाजन्यध्वंसएवहिसूक्ष्मावस्थारूपोजायते तत्त्वज्ञानप्रयुक्तस्तुध्वंसोधिष्ठानस्वरूपंनचाधिष्ठानेध्वंसत्वांगीकारेध्वंसत्वविशिष्टस्याधिष्ठानंध्वंसत्त्वांतरविशिष्टमधिष्ठानंध्वंसएवन्तस्यापिध्वंसत्त्वांतरविशिष्टं

नचतुर्थः एवंपरिभाषायामपिब्रह्मण एवनित्यत्वमित्येतत्फलस्यमुक्तावन्याभावस्यासिद्धेरितिचेत् नचतुर्थपक्षस्यक्षोदसहत्वात् नचान्ता॰ वधिरहितस्यब्रह्मान्यस्यमुक्तावसत्त्वं नसिद्धमितिवाच्यं विशेषणान्तरस्यैवासिद्धेः अतएवकालेकालापरिच्छिन्नेध्वंसेवाऽध्वंसयोगिनिनित्ये सतिकथंनित्यंब्रह्मैवेतिमतंतद्वेतिनिरस्तम् कालस्याप्याविद्यकत्वेनान्तावधिमत्त्वात् ध्वंसस्याप्यध्वंसप्रतियोगित्वेप्याद्यावधिमत्वाच्च नचता वतासद्वितीयत्वंतात्त्विकस्यद्वितीयस्यैवमप्यभावात् नचैवमतात्त्विकत्वेध्वंसनिवृत्तिरिष्टत्वात् नचप्रतियोग्युन्मज्जनम् तादृग्ध्वंसोपल क्षितस्वरूपस्यैवविरोधित्वात् प्रागभावस्यप्रतियोगिध्वंसाविवननुकथंदृग्रूपस्यब्रह्मणः साक्षाद्द्रष्टृत्वरूपंसाक्षित्वं साक्षाद्द्रष्टरिसंज्ञायामित्य नुशासनादितिचेन्न अविद्यातत्कार्यान्यतरप्रतिफलितचैतन्यस्यैवसाक्षित्वात् तथाचदृग्रूपस्याप्युपाधिनाद्रष्टृत्वं॥ ६ तत्सइत्यनवस्थाचरमतत्त्वज्ञा नोत्तरन्तन्नाशकाभावश्चेतिवाच्यंतत्त्वज्ञानोत्तरन्ध्वंसत्त्वविशिष्टस्यास्वीकारात् तत्त्वज्ञानात्पूर्वमेवतत्प्रयुक्ततावच्छेदकत्वेनाधिष्ठानेध्वंसत्त्वस्यकल्पनात् विवेचि तमेतत् तत्त्वधीफलनिरूपणप्रस्तावेननुदृग्रूपत्वमेवसाक्षित्वंवाच्यंनद्रष्टृत्वंतत्राह साक्षात् द्रष्टरीति अविद्याप्रतिबिंबितचित्साक्षीयद्वा अविद्योपहितस्यनसाक्षित्वं॰ तस्यव्यवहारकालेनाशाभावेनतन्नाशरूपस्यसंस्कारस्यासंभवात् किन्तु अविद्यावृत्तिनाशात् तदुपहितस्यनाशसंभवादविद्यावृत्तिप्रतिबिंबितचिदेवसाक्षीत्याशये नाहाविद्यातत्कार्यान्यतरेतिउपाधिनेतिवृत्तिप्रतिबिंबितरूपेणद्रष्टृत्वपक्षेवृत्तिविषयावच्छिन्नचिद्रूपेणदर्शनत्वंपरोक्षस्थलेपिवृत्तिद्वाराविषयसंबंधचित्तएवप्र काशकत्वात् यद्यप्यविद्याप्रतिबिंबितचित्तोविद्याकार्याश्रयत्वेनाविद्याकार्यावच्छिन्नचिद्रूपदर्शनाश्रयत्वेपि अनादिविषयावच्छिन्नचिद्रूपदर्शनाश्रयत्वेमानाभावः ए वंवृत्तिप्रतिबिंबितचितोपि अविद्याप्रतिबिंबितचिद्भेदात्तथापिसर्वत्रवृत्तिप्रतिबिंबितनिष्ठंदर्शनसंबंधित्वमेवद्रष्टृत्वमव्याहतम्॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिकार्यजनीतिननु आद्यक्षणसम्बन्धरूपजनिर्न ब्रह्मनिष्ठा अथस्वावच्छिन्नायाकार्यजनिस्तद्धेतुत्वं वाच्यं तथापिकार्यसंयोगादिमतिनिमित्तकारणे अतिव्याप्तिरितिचे
न्नऽस्वतादात्म्यवत् कार्यहेतुत्वस्यविवक्षणात् सत्यत्वापत्त्येतिब्रह्ममात्रोपादानकत्वानुपपत्त्याचेत्तिशेषः केवलब्रह्मपरेतिउभयोः समोपादानत्वे ब्रह्मणोपिपरिणामित्वेननिर्वि
कारश्रुतिः केवलं ब्रह्मनपरिणमते अन्यपरिणामिनासह एककार्यरूपेणपरिणमत एवेत्येवंपरेतिभावः विशिष्येति ——— केवलं ब्रह्मेवकेवलामायापिनपरिणमत
इतिकेवलपरिणामित्वनिषेधोब्रह्मण्येवेत्ययुक्तमितिभावः ननु पारमार्थिकत्वसंबंधः प्रातीतिकोजगति प्रतीयुते पादानसंबंधेन तत्र भ्रमसंभवात्तत्राह ब्रह्मस्वभावस्येतिधी
पारमार्थिको
ननु निर्विशेषं चेद्ब्रह्म कथं तदेव निमित्तमुपादानमित्यभिन्ननिमित्तोपादानकत्वं जगतः विकारवत्कारणस्यैवोपादानत्वात् ब्रह्मणोऽविकारत्वात् अन्यथा
निर्विकारोहरः शुद्ध इत्यादिश्रुतिविरोधापत्तिरिति चेन्न परिणामितयोपादानत्वाभावेपि विवर्ताधिष्ठानतयोपादानत्वसंभवात् विवर्ताधिष्ठानत्वं च विवर्त
कारणाज्ञानविषयत्वमेव तदुक्तं वार्त्तिककृद्भिः अस्य द्वैतेन्द्रजालस्य यदुपादानकारणं अज्ञानं तदुपाश्रित्य ब्रह्मकारणमुच्यत इति न चोपादानलक्षणा
भावः आत्मनि कार्यजनिहेतुत्वस्यैवोपादानलक्षणत्वात् तस्य च परिणाम्यपरिणाम्युभयसाधारणत्वात् ननु ब्रह्मैवोपादानमुताज्ञानमपि आद्ये सत्यो
पादानत्वे सत्यत्वापत्त्याऽज्ञानोपादानकत्वकल्पनविरोधः द्वितीये सूत्रद्वयस्य रज्जुप्रतीवब्रह्माऽज्ञानयोः समप्राधान्येनवोपादानत्वे निर्विकारश्रुतिस्तु
केवलब्रह्मपरेतिविवक्षितमुत मायाशक्तिमद्ब्रह्मोपादानं निर्विकारश्रुतिस्तु तदनुपरक्तब्रह्मविषयेतिविवक्षितम् उत मायाद्वारा ब्रह्मकारणं स्रग्विवं तंतुद्वा
रा पटं प्रति निर्विकारश्रुतिस्तु अद्वारिकविकारनिषेधिकेति विवक्षितं। नाद्यः उभयोः समतयैव विकारित्वेन ब्रह्मणो विशिष्य निर्विकारत्वोक्त्ययोगात् सितासि
तसूत्रारब्धपटे सितासितत्ववज्जगति पारमार्थिकत्वानिर्वचनीयत्वयोरापातात् ब्रह्मस्वभावस्य पारमार्थिकत्वस्योपादेये धीमात्रस्थत्वेऽविद्यास्वभावस्या
निर्वाच्यत्वस्यापि धीमात्रस्थत्वापातात् तन्मात्रोपादानकत्वस्य सत्त्वप्रयोजकत्वेऽनिर्वाच्यत्वस्याप्यभावप्रसंगात् तन्मात्रोपादानकत्वाभावात् द्वितीये ब्रह्म
णो मायाख्य हेतूपरागमपेक्ष्य विकारित्वे मृदादिवत्परिणामित्वापत्तिः विशिष्टे ब्रह्मत्वे निर्विकारश्रुतिविरोधः अब्रह्मत्वे ब्रह्मणः कारणत्वासिद्धिः विशिष्टस्य मृदा
दिवद्धर्मिसमसत्ताकरूपान्तरापत्तिरूपपरिणामाद्विवर्तमतहानिश्च न च विशिष्टापेक्षया परिणामित्वं शुद्धापेक्षया विवर्तत्वमिति वाच्यं शुद्धे विवर्तार्थमारो
पितविकारस्यावश्यकत्वेन निर्विकारश्रुतेस्तत्परत्वाभावप्रसंगात् ॥ ११ मात्रस्थत्वे प्रातीतिकसंबंधप्रतियोगित्वे ननु शुद्धब्रह्मणो कारणत्वमिष्टमेव तत्रा
ह विशिष्टस्य मृदादीतिविवर्तार्थमिति शुद्धापेक्षया विवर्तत्वमित्यस्य शुद्धं विवर्तोपादानाविद्याविषय इत्यर्थः तथा चाविद्याविषयत्वस्य शुद्धे स्वीकारे तन्नाशरूपो विकार
स्तत्रैव वाच्यस्तथा च निर्विकारश्रुतिः शुद्धस्य विकारनिषेधिकेति न युक्तमिति भावः आरोपितविकारस्येति आरोपितो विकारो नाशो यस्य तादृशस्याविद्याविषयत्वादिना
शस्येत्यर्थः यथाश्रुते मायोपहितस्यैवोपादानत्वेन विवर्तकार्यवत्त्वेन शुद्धे विवर्तकथनासंगतेः परमते आभासस्यालीकत्वेनानाभासधूमगतधूमत्वस्यायोगात् ॥ ❀ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत् पक्षोक्तदोषेति शुद्धब्रह्मणो बुद्ध्युपाधिकस्य वा साक्षित्वपक्षे त्वदभिमतदोषेत्यर्थः तथा तत्पक्षयोरपि दोषो नास्त्येवेति भावः चैत्रदुःखग्रहणेति चैत्रीयतया दुःखग्रहणेत्यर्थः तत्तज्जीवचैतन्याभेदेनाभिव्यक्तस्य तत्तद्दुःखादिभासकतयेति स्वतो वृत्तिद्वारा वा तत्तज्जीवाभेदस्य तत्तद्दुःखादिरूपविषयावच्छेदेन संपत्त्या तदवच्छेदेनानावृत्तत्वं प्राप्तस्य शुद्धचैतन्यस्य तद्भासकतयेत्यर्थः तथा च चैत्रीयदुःखादेश्चैत्रीयतया भासकत्वमिष्टमेव चैत्रं प्रति तत्सत्त्वात् सुप्तमैत्रं प्रति चैत्रीयतया भासकत्वं तु न संभवति पुरुषान्तरीयदुःखादेः पुरुषान्तरं प्रत्यावृत्तत्वेन प्रमाणवृत्तिं विना तं प्रति साक्षिमात्रस्याभासकत्वात्तं प्रति चैत्रदुःखादिभासकत्वमित्यस्य हितं प्रत्यनावृत्तचैत्रदुःखादिसंसृष्टत्वमित्यर्थः समसमयेति चाक्षुषादिवृत्तावेव विषयहेतुत्वं न तु अविद्यावृत्तौ प्रत्यक्षवृत्तिमात्रे विषयहेतुत्वे न तस्या अपि दुःखादिविषयजन्यत्वे तु स्वाविषयकाविद्यावृत्त्या स्वोत्पत्तिकाले दुःखादेर्ज्ञातैकसत्त्वं न हि स्वविषयकवृत्त्युपहितं चैतन्यमेव साक्षी वृत्तौ तदसंभवात् घटाद्यविषयकाविद्यावृत्त्युपहितचित्तो घटादिकं प्रति साक्षित्वात् यत्तु सुखादिसमकालोत्पन्नायामपि वृत्तौ तदुत्पत्तिद्वितीयक्षण एव प्रतिबिंबोत्पत्त्या तदुत्पत्तिक्षणे न साक्षिसिद्धिरिति तन्न वृत्त्युत्पत्ति

न शुद्धब्रह्मातिरिक्तस्य बुद्ध्युपाधिकजीवातिरिक्तस्य च साक्षिणोऽङ्गीकृतत्वेन तत्पक्षोक्तदोषाभावात् तथा चाविद्यावृत्तिप्रतिफलितं चैतन्यं साक्षी सुप्तावप्यविद्यावृत्तिस्वीकारस्य प्रागुक्तेः न चान्योन्याश्रयः प्रागेव निरासात् शुद्धस्य साक्षित्वाभावेन मुक्तोपप्लवापाताभावात् यत्तु सुप्तमैत्रे चैत्रदुःखग्रहणापत्त्या एतावन्तं कालं दुःखं नावेदिषमिति परामर्शविरोध उक्तः तन्न साक्षिणः सर्वजीवसाधारण्येऽपि तत्तज्जीवचैतन्याभेदेनाभिव्यक्तस्य तत्तद्दुःखादिभासकतयातिप्रसङ्गाभावात् यच्च सुखादेः स्वानन्तरभाव्यविद्यावृत्तिप्रतिफलितचिद्वेद्यत्वे ज्ञातैकसत्त्वायोग इति तन्न मानसत्त्ववादिमतेऽप्यस्य समानत्वात् न हि तन्मते ज्ञातैकस्थितिकत्वातिरिक्तं ज्ञातैकसत्त्वमस्ति दुःखादिसमानसमयोत्पन्नवृत्त्यापि ज्ञातैकसत्त्वोपपत्तेश्च तस्माज्ज्ञानानन्दैकरूपमद्वितीयं नित्यं साक्षि च ब्रह्मेति सिद्धम् ब्रह्मणो ज्ञानत्वानन्दत्वाद्वितीयत्वनित्यत्वसाक्षित्वोपपत्तिः ॥ ७ ॥

क्षण एव प्रतिबिंबोत्पत्तेः। वृत्त्यवच्छिन्नचित एव साक्षित्वं कुत उक्तमिति चेत् अविद्यावृत्त्यभावकाले साक्षित्वाभानात् तथाप्यविद्यात्वनिवेशे गौरवमिति चेन्न: न हि साक्षात्कारत्वेन हेतुत्वादिकल्पनायामवच्छेदककोटावविद्यात्वनिवेशो येन गौरवमपि तु चैतन्येनावृत्तविषयसंबंधोऽविद्यावृत्तिदशायामेवेति तत्र सोपाधिरुच्यते मनस्तु न सुषुप्ताविति नोपाधिरयं सूक्ष्मरूपेण तत्रापि तदिति चेन्न सूक्ष्मरूपे मनस्त्वसत्त्वे मानाभावान्न हि तदा मम मन इत्यनुभूयते अथ मनस्तत्सूक्ष्मावस्थान्यतरत्वेनोपाधितास्त्विति चेन्न साक्षिव्यवहारविषये गौरवापत्तेरथैवमविद्यैवोपाधिरस्तु इति चेन्न साक्षिनाशस्य संस्कारत्वानुपपत्तेरतोऽपि मनस्तत्संस्कारान्यतरन्नोपाधिर्जाग्रति घटादिज्ञानोत्तरं तदुपहितनाशानुसारात् वस्तुतो अविद्योपहितचिदेव साक्षी युक्तो लाघवात् वृत्तिनाशस्यैव संस्कारत्वसंभवान्न च वृत्तेः स्वविषयकत्वाभावेन तन्नाशस्य तद्विषयकत्वानुपपत्तिरिति वाच्यं तन्नाशस्य तदविषयकत्वेऽपि संस्कारसामान्यस्यैव वृत्तिस्मारकत्वसंभवात् तर्कैरित्यादि ब्रह्मणो ज्ञानतादिकं ॥ ७ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधर्म्यांतरमाह अनाभासेति दृष्टान्ते धूमे सत्यधूमविषयकसंस्कारेणासत्यधूमस्यस्यूतेरसत्यधूमस्यारोप इति सत्यधूमसंस्कारजधीविषयत्वं तयोरस्तीति भावः सत्यरू
पापत्तिमत् परिणामीत्यादि परिणामिशब्दार्थो यतः सत्यरूपापत्तिमान् अतोसत्यकार्ये उपादानतपातदपेक्षानास्ति असत्यकार्यं हि स्वस्वरूपमापद्यमानमुपादानमेवा
पेक्षते इति भावः तद्भावो रूप्यादिकार्यभावापत्तिः इत्येवेति मन्मते सत्यरूपापत्तिमान्न परिणामिशब्दार्थः परिणामिन इव परिणामस्याप्यसत्यत्वात्तथा च सत्यरूपापत्ति
मदपेक्षानास्तीति वृद्धोक्तेर्यथाश्रुतो नार्थः किंतु स्वविषयकाज्ञाननिरपेक्षोपादानापेक्षा रूप्यादौ नास्तीत्येवार्थ इति भावः ननु स्वविषयकाज्ञाननिरपेक्षस्योपादानस्या

तस्याविशेष्येतात्विकविकाराभावपरत्वे —— विशिष्टेविकारोक्त्ययोगः तत्त्वतो निर्विकारे आरोपितविकाराविरोधात् न तृतीयः अंशोस्तन्तुं प्रतीवब्र
ह्मणोऽनादिमायां प्रत्युपादानत्वाभावादिति चेत् न उभयापरिणामित्वेन तयोः कारणत्वांगीकारात् न च तत्पक्षोक्तदोषावकाशः उभयोः परिणामिता।
याकारणतानङ्गीकारात् किन्त्वज्ञानस्यैव अत एवासाधारण्येन निर्विकारत्वमपि न ह्यविद्यासाहित्येपि ब्रह्मपरिणामते किन्तु विवर्त्तत इति न चावि।
द्यापरिणामत्वेपि सत्यत्वापत्तिः परिणाम्युपादानसमसत्ताकत्वरूपस्य सत्यत्वस्य परिणामत्वनिर्वाहकत्वात् ब्रह्मसमसत्ताकत्वाभावेन तदपेक्षयाप
रिणामत्वाभावात् स्वसमानसत्ताकविकाराहेतुतया निर्विकारत्वोपपत्तेश्च न च सत्योपादानत्वे सत्यत्वापरिणाम्युपादानधर्माणामेव मृत्त्वसुवर्णत्वा
दीनां कार्येऽन्वयदर्शनात्सत्योपादानत्वेप्यसत्यत्वोपपत्तेः न च सत्यासत्यधूमानुगतधूमत्वस्येव सत्यासत्यानुगतोपादानत्वस्यैकस्याभाव इति वाच्य।
म् स्वनिष्ठकार्यजनिहेतुत्वस्योक्तत्वात् न हि सत्यत्वासत्यत्ववैधर्म्यसाधर्म्यविरोधि अन्यथा किंचिद्धि धर्मस्यैव साधर्म्यविरोधित्वे साधर्म्यकथोच्छेदापत्तिः
अनाभासविषयसंस्कारजन्यज्ञानविषयत्वादेराभासानाभाससाधारणस्य दृष्टत्वात् तेपि सत्वाच्च नन्वऽविद्योपादानकत्वकल्पनानयुक्ता ब्रह्मण एव रूप्याकाशा
द्युपादानत्वसम्भवात् अविद्यान्वयव्यतिरेकस्य निमित्ततामात्रेणान्यथासिद्धेरिति चेत् न घटकुण्डलादेः परिणाम्यपेक्षादर्शनेन गगनादावप्यविद्यायाः परि
णाम्युपादानत्वस्यावश्यकत्वात् न चासत्यस्य रूप्यादेः सत्यरूपापत्तिमत्परिणाम्यपेक्षानास्तीति न सर्वत्रोपादेये —— तदपेक्षानियम इति वाच्यम् स्वविषय
काज्ञानानपेक्षस्य तद्भाव इत्येव सत्यरूपापत्तिपदेन विवक्षितत्वात् न हि ब्रह्माज्ञानस्य रूप्यादिभावापत्तौ स्वविषयकाज्ञानं व्यवधायकमस्ति किं च विकारित्वे
नाप्यविद्याया उपादानत्वकल्पनम् न च ब्रह्मण एव तात्विकविकारसम्भवान्न तत्कल्पनमिति वाच्यम्॥ २ पेक्षा मिथ्याकार्ये नास्तीत्यपि त्वया वक्तुमशक्यं त्व
न्मते मिथ्याभूताकाशादौ तादृशोपादानरूपाज्ञानापेक्षणात्तत्राह नहीति ब्रह्माज्ञानस्य शुद्धचिदज्ञानस्य रूप्यादिभावापत्तौ प्रातीतिककार्यरूपापत्तौ व्यवधायकं अ
पेक्षणीयं तूलाज्ञानस्य रूप्याद्युपादानत्वपक्षे तु ब्रह्माज्ञानपदं ब्रह्माभिन्नतदवच्छिन्नचिदज्ञानपरं तथा च रूप्यादावपि स्वविषयकाज्ञाननिरपेक्षाज्ञानोपादानक
त्वेन मिथ्याकार्ये स्वविषयकाज्ञानानपेक्षमुपादानं नापेक्षणीयमिति न वाच्यं किंतु तत्र तादृशं विवर्त्तोपादानं नापेक्षणीयमित्येव वाच्यमिति भावः ॥ ❁ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिर्वाहादिति अज्ञानपरिणामस्यतु अज्ञाननाशकज्ञाननिवर्त्यत्वेनमिथ्यात्वनिर्वाहइतिभावः नतुरूप्यादेरुपादानमज्ञानंनतत् समसत्ताकंप्रतीतिव्याप्यसकालत्वघटित
प्रातीतिकत्वाभावात्तत्राह समानसत्ताकत्वंचेति सत्त्वद्वैविध्येन पारमार्थिकसत्त्वंसत्त्वेनव्यवहारविषयत्त्वंचेतिद्वैविध्येननतु घटादौमृदादेरुपादानत्वदृष्टावपिरूप्यादौपरि
णामिकत्वनेमानाभावः नचकार्यत्त्वादिहेतुर्मानमनुकूलतर्काभावात्तत्राह तस्मादिति अविद्यायाउपादानत्वस्यावश्यकत्वादित्यर्थः कार्यत्वावच्छिन्नंप्रतिकर्त्तृत्वेनहेतु।

तद्विषयकाज्ञानपरिणामत्वव्यतिरेकेणविकारेऽतात्त्विकत्वानिर्वाहात् किंचकार्यापेक्षितस्वसमानसत्ताकोपादानत्वेनाप्यविद्योपादानत्वम् समानसत्ता
कत्वंचरूप्यस्थलेसत्त्वद्वैविध्येनवाब्रह्मज्ञानेतरवाध्यत्वरूपप्रातिभासिकत्वमादायवोपपद्यते तस्माद्रूप्यतत्तादात्म्योरविद्यापरिणामत्वमेव एतेनेदंरूप्य
मितिप्रतीतेरूप्य तत्तादात्म्ययोरविद्याविकारत्वेपीदमोरूप्यरूपापत्तिरूपोविकारः कथंइदंरूप्यरूपमापन्नमित्यप्रतीतेः आरोपितस्यारोपंविनाऽयोगा
दितिनिरस्तं रूप्याकारपरिणताज्ञानाधिष्ठानचैतन्यावच्छेदकमात्रतयेदमोरूप्यापत्तेरनंगीकारात् यत्तुकिमिदमुपादानत्वम् रूपान्तरापत्तिप्रतीतिंप्र
तिविषयत्वंवारूपान्तराभेदधीविषयत्वंवाकार्याभेदधीविषयत्वंवानाद्यः असिद्धेः शुक्तीरूप्यभावमापन्नाब्रह्माऽऽकाशभावमापन्नमित्यप्रतीतेः नद्वि
तीयः तत्त्वंपदार्थयोः क्षीरनीरयोर्गुडगोलयोश्चोपादानोपादेयतापत्तेः नतृतीयः सदृशेसन्निहितेनिमित्तेपिकार्याभेदभ्रमसंभवेनातिव्याप्तेरिति तद
नुक्तोपालंभनतयापास्तम् यदपिभ्रमाधिष्ठानत्वेनब्रह्मणोनोपादानत्वं अतीतासत्तोरनुपादानयोरपिभ्रमाधिष्ठानत्वदर्शनात् भ्रमाधिष्ठानेपिशुक्त्या
दावुपादानताव्यवहाराच्चेति तन्न चैतन्यस्यैवाधिष्ठानत्वेनातीतादेरनधिष्ठानत्वात् किंचनहिव्यवहाराभावमात्रेणावस्तुव्यतिरेकः वृक्षादिषुपृथि
वीतिव्यवहाराभावेपिपृथिवीत्वसत्त्वात् यत्तुमायोपादानमीश्वरोनिमित्तंशुद्धंब्रह्माधिष्ठानमितिपक्षे अभिन्ननिमित्तोपादानत्वाभावेनतत्त्वमतेतदर्थ
स्यप्रकृत्यधिकरणादेरनुपपत्तिरिति तन्न एकस्यैवाविद्योपहितत्वेनोपादानत्वस्याविद्यापरिणामेच्छाकृत्याद्याश्रयत्वेननिमित्तत्वस्यापिसंभवा
त् ब्रह्मणोजगदुपादानत्वोपपत्तिः॥ ८॥ नन्वेवंकुलालादिवदुपादानगोचरप्रयत्नादिमत्त्वंकर्त्तृत्वमुक्तंस्यात् तच्चकार्यस्यकल्पितत्वे न घटते
कुलालादेरकल्पितंप्रत्येवकर्त्तृत्वदर्शनात् कल्पितंचरूप्यादिकंप्रतिभ्रान्तस्यान्यस्यवाकर्त्तृत्वादर्शनाच्चेतिचेत् नकुलालकार्यघटादावप्यकल्पि
तत्वासम्प्रतिपत्तेस्तंप्रत्येवकर्त्तृत्वदर्शनात्कल्पितरूप्यादेरप्यकर्त्तृकत्वासिद्धेश्च तत्रापिसाक्षिणएवकर्त्तृत्वात्॥ २) त्वादाद्यकार्येईश्वरस्यैवकार्यत्वावच्छिन्नंप्र

तिपरिणामित्वेव्यावहारिककार्येव्यावहारिकपरिणामित्वेनप्रातीतिककार्येप्रातीतिकपरिणामित्वेनहेतुत्वाद्रूप्यादावविद्योपादानत्वमावश्यकमितिभावः तत्तादात्म्ययोः तद
वच्छिन्नतादात्म्ययोः इदमाद्यवच्छेदेनरूप्यादिकंरूप्याद्यवच्छेदेनेदमादितादात्म्यंचभ्रमस्थलेविद्यापरिणामइतिभावः तर्कैरित्यादि॥ब्रह्मोपादानतास्थितिः॥ ८॥ अदर्शनात्
सर्वसाधारणदर्शनाभावात्। साक्षिणएवेतितथाचोपादानगोचरकार्यानुकूलज्ञानवत्त्वमेवकर्त्तृत्वमितिसाक्षिणोरूप्यादिप्रयोजकेच्छाकृतिविरहेपितत्कर्त्तृत्वमक्षतमितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदर्शनमात्रेणसर्वपुरुषसाधारणादर्शनविरहमात्रेणाचतुर्थपक्षस्यचतुर्थपक्षान्तर्गतस्यकार्यानुकूलज्ञानकत्वस्य अतएवसत्त्वांशपरिणामेत्यादिनाज्ञानमात्रंकर्तृत्वंवस्य
तेसत्त्वांशपरिणामेति। अधिष्ठानत्वसामर्थ्यात् नसार्वज्ञ्यलाभोयेनत्वदुक्तंदूषणंस्यात् किंन्तुमायावृत्तिरूपंयत् कार्यानुकूलज्ञानंतद्वत्त्वरूपकर्तृत्वसामर्थ्यादितिभावः तत्रैकेरि
त्यादिब्रह्मणोविम्बकर्तृता॥९॥ सूत्रप्रकृत्यर्थविहितेतिसूत्रेणोपादानेविहितेत्यर्थः स्थितिलयेतिब्रह्मणिस्थितिर्हिब्रह्मसत्तास्फूर्तिग्राहित्वं तच्चब्रह्मणउपादानत्वंविनानु

नह्यदर्शनमात्रेणकर्त्रपलापः त्वन्मतेपिसर्वज्ञकर्तुरसिद्ध्यापत्तेः एतेनाधिष्ठानत्वंनकर्तृत्वं एवंसत्यतिरिक्तोपादानत्वाभावेनकर्तृत्वोपादानत्वयोः सामा
नाधिकरण्योक्त्ययोगात् नापिभ्रान्तवदध्यासद्रष्टृत्वंभ्रान्तस्यप्रेक्षापूर्वकमारोपितकर्तृत्वस्याभावात् नापिमायाविवद्व्यामोहकत्वमेवकर्तृत्वम् व्यामोहनी
यजीवादर्शनेव्यामोहकत्वाभावात् तद्दर्शनेभ्रान्त्यापत्तेः व्यामोहकत्वस्याप्यारोपितत्वेनान्योन्याश्रयाच्चनामरूपेव्याकरवाणीतिश्रुत्यनुपपत्तेश्चनहिमायावीग
जादिकंकरवाणीतिसंकल्प्यकरोतिकिन्तुदर्शयामीतिसंकल्प्याऽदर्शयतिपक्षत्रयेपिजन्मादिसूत्रेअर्थलब्धसार्वज्ञ्यादिस्फोरणार्थशास्त्रयोनित्वादितिसूत्र
मितियत्परमतंतद्भङ्गः स्यात् भ्रमाधिष्ठानत्वादिनासार्वज्ञ्यालाभात् नाप्युपादानगोचरप्रयत्नादिमत्त्वंकल्पितंप्रतितदयोगात् तस्मादधिष्ठानेतथाभ्रान्तेभ्र
मकेचनकर्तृतालौकिकीकृतिमत्तातुनदृष्टारोपितंप्रतीतिनिरस्तम् अभिमत   चतुर्थपक्षस्यसमर्थितत्वात् यत्तूक्तंतृतीयपक्षेव्यामुग्धजीवद्रष्टृत्वेभ्रा
न्तत्वापत्तिरितितद्दूषणमेवभ्रान्तिज्ञस्याभ्रान्तत्वात् यदपिमायाविनःसङ्कल्पपूर्वककर्तृत्वाद्दर्शनेनव्याकरवाणीतिश्रुत्यनुपपत्तिरितितन्नतादृशसङ्कल्पा
दर्शनस्यमायाविन्यसम्प्रतिपत्तेः यदप्युक्तंजन्मादिसूत्रार्थसिद्धसार्वज्ञ्यस्फोरकंशास्त्रयोनित्वादितिसूत्रमितिपरमतभंगःस्यादितितन्नमायावित्वेपिसत्त्वमा
णमायिकविश्वाकारमायासत्त्वांशपरिणामाधारतयासार्वज्ञ्यलाभात् तस्माद्ब्रह्मणोनिमित्तत्वमुपादानत्वंचब्रह्मणोजगन्निमित्तत्वोपपत्तिः॥९॥ यतोवाइमा
निभूतानिजायन्तइतिश्रुतौजनिकर्तुःप्रकृतिरितिसूत्रप्रकृत्यर्थविहितपंचमीश्रुत्यायत्प्रयंत्यभिसंविशंतीतिस्थितिलयाधारत्वलिंगाच्चोपादानत्वसिद्धिः तदै
क्षतव्याकरवाणीतिईक्षणाद्याधारतयाकर्तृत्वसिद्धिश्च अथवृत्तौपुत्रात्प्रमोदोजायतइत्यादावनुपादानेपिपंचमीदर्शनात् प्रकृतिपदंहेतुमात्रपरमित्युक्तं
न्यासेपीदमेवाश्रित्यासतिप्रकृतिग्रहणेउपादानस्यैवापादानसंज्ञास्यात्प्रत्यासत्तेः नेतरस्यप्रकृतिग्रहणात्कारणमात्रस्यभवतीतिप्रकृतिपदमनुपादानेप्य
पादानसंज्ञासिद्ध्यर्थमित्युक्तम्॥ \\ पपन्नंनिमित्तगतधर्मग्राहित्वस्यकार्येष्वदृष्टत्वात् अथवास्थितिस्तादात्म्यंलयोपिउपादानेसंस्काररूपेणस्थितिरितिस्थि

तिलयौब्रह्मणउपादानत्वेलिङ्गेइतिभावः वृत्तौकाशिकादिवृत्तौइदमेवाश्रित्येतिजनिकर्तुर्हेतुरित्येवशब्दलाघवादुच्यतांइतिशंकांउक्तवृत्तिग्रंथेकृत्वेत्यर्थः प्रकृति
ग्रहणइतिसतिहेतुग्रहणइतिशेषःप्रत्यासत्तेः तादात्म्यरूपान्तरंगात् षष्ठ्यर्थसंबंधात् जनिकर्तुरितिषष्ठ्याकार्यस्यतादात्म्यरूपांतरंगसंबंधबोधनाद्धेतुपदादुपादा
नमेवलभ्यतेतिभावः कारणमात्रस्येतिप्रक्रियतेकार्यमनेनेतिव्युत्पत्त्याकारणमात्रंप्रकृतिपदेनबोध्यते॥ ॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लघुहेतुपदंत्यक्त्वा प्रकृतिपदग्रहणस्यैवज्ञापकत्वात् प्रकृते प्रकृतिपदं नोपादानरूढं नवा षष्ठीतादात्म्यार्थेतिभावः यत्तु प्रत्यासत्तेर्मुख्यहेतुत्वात् तथा च हेतु
पदस्य मुख्यहेतौ संकोचः कारणमात्रस्येति तथा च प्रकृतिपदं कारणसामान्ये लाक्षणिकमिति तन्न उभयसंकोचलक्षणयोरन्याय्यत्वात् अयं जनिकर्तुः प्रकृतिरित्य
यं योगः सूत्रं अवक्तुं अकर्तुं यथा भीत्रार्थानां भयहेतुरित्यादिसूत्राण्यकर्तुं शक्यानि तथा जनिकर्तुः प्रकृतिरिति सूत्रमप्यकर्तुं शक्यमित्यपि नासूच्यते ध्रुवमपाये
पादानमिति अपाये विश्लेषे यत् ध्रुवमवधिभूतं यतो विश्लेषस्तदिति यावत् तदपादानसंज्ञमित्यर्थः प्रत्याख्यातमिति अपायपदेन विभागस्योक्त्या वृक्षात् पत्रंप
ततिइत्यत्र यथा पंचमी तथा अव्यवहितोत्तरक्षणसंबंधस्य ततपदेनोक्त्या तदेकदेशाव्यवहितोत्तरत्वनिरूपकरूपावधेर्ध्रुवपदेन वक्तुं शक्यत्वात् कारण।
समूहस्य तदवधित्वेपि समूहसमूहिनोरभेदोपचारात् कारणमात्रेपि तत् संभवात् गोलोमभ्यां दूर्वाजायंते इत्यत्रापि पंचमीसंभवः यद्यप्यन्यथासिद्धस्यापुक्तावधि
त्वमस्ति तथाप्यनन्यथासिद्धत्वस्यापि निवेश्यत्वाद्दण्डरूपाद्घट इत्यादेर्नापत्तिस्तथा च दण्डाद्घटो जायत इत्यादौ घटं प्रत्यनन्यथासिद्धदण्डघटितो यः समूहस्तदव्य
वहितोत्तरसंबंधाभिन्नाया उत्पत्तिः तद्वान् घट इति दण्डात् घट इत्यादौ ———— जायत इत्यादिक्रियाध्याहारावश्यकत्वे तु ताद्दृशाव्यवहितोत्तरत्वमेव पंचम्य।
र्थः तस्यैव धात्वर्थोत्पत्तिघटकक्षणेन्वयेनेष्टार्थलाभात् वस्तुतस्तु प्रयुक्तत्वमेव पंचम्यर्थस्तस्यैवापायपदेन तन्निरूपकस्य ध्रुवपदेन चोक्तिसंभवात् अस्ति

महाभाष्येपि अयमपि योगः शक्योऽवक्तुं गोलोमाजलोमाविलोमभ्यो दूर्वाजायंते अपक्रमंति तास्तेभ्य इत्यादिना लोमादीनां दूर्वादी
न्प्रत्यवधित्वात् ध्रुवमपायेऽपादानमित्यनेनैवापादानसंज्ञासिद्धेरिदं सूत्रमनारंभणीयमिति सूत्रं प्रत्याख्यातम् ॥ ❁ ॥

च घटादाविव तदुत्पत्तावपि दंडादिप्रयुक्तत्वमिति दंडात् घट उत्पद्यत इत्यस्य दण्डात् घट इत्यस्य च प्रामाण्यमिति ध्येयं ननु अपायशब्देन विभागस्य ध्रुवश
ब्देन तदवधित्वस्य चोक्त्या जनीत्यादिसूत्रसार्थक्ये उक्तप्रयुक्तत्वादिसाधारणापक्रमणोक्त्या तत् खण्डनमनुचितमिति चेन्न वृक्षात्पततीत्यादौ वृक्षाद्यवधि
कविभागप्रतीत्या विभागस्येव कपालाद्घट इत्यादौ कपालाद्यवधिकप्रयुक्तताप्रतीत्या प्रयुक्तत्वस्याप्यपायशब्देन वक्तुं शक्यत्वाज्जनीत्यादिसूत्राभावेपि निर्वा
ह इत्यत्र भाष्यकारतात्पर्यात् अत एव शक्यते वक्तुमित्युक्तं अन्यथा नोच्यत इत्येवोक्तं स्यात् न च यतो वा चो निवर्त्तंते अप्राप्येत्यादौ शक्तिरूपप्राप्त्यभावेन यत्र।
विषये शक्तिप्रयुक्तबोधकत्वाभाववत्त्यो वाच इत्याद्यर्थस्तथा चोक्ताभावादेरप्यपायशब्देन वाच्यत्वादुक्तप्रयुक्तत्वमपि तेनोच्यतामिति वाच्यं जनीत्यादिसूत्रसार्थ
क्यायोक्तप्रयुक्तत्वान्यस्यैवापायशब्देनोक्तेर्युक्तत्वात्तथा च विभागमात्रं नापायशब्दार्थः किन्तूक्ताभावादिरपीति जनीत्यादिसूत्राकरणं शक्यत्वेन भाष्ये ज्ञापितं न।
तु तदकरणमेवाभिप्रेतमत एव लोमादिभ्यो दूर्वादीनामपक्रमणं लौकिकप्रतीतिमात्रानुसारेण भाष्ये उक्तं वैशेषिकसांख्यादिदर्शनेषु तदस्वीकारादिति कैय।
टे उक्तमुभयत्रैलोकानामपक्रमणपदप्रयोगो लक्षणयेतिभावः ॥ ❁ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ·सि· टी·ल· उ· ६३

४धा

एवंच प्रकृतिरित्युपादानरूढसौत्रपदादुपादानतानिरूपितप्रयुक्तत्वरूपार्थे जनीत्यादिना पंचमीविधानान्निमित्तनिरूपितप्रयुक्तत्वे सूत्रान्तरेण पंचमीविधाने पि विनिगमकाभावाद्यतो वा इमानि भूतानि जायन्त इत्यादौ निमित्तोपादानताभ्यां निरूपितप्रयुक्तत्वयोः पंचम्यर्थत्वं दुर्वारमित्यस्मदिष्टसिद्धिः लोमादिष्विति उपादाने ष्वित्यादिः कार्यस्य दुर्वाद्युपादेयस्य यद्यपि विभागरूपापक्रमणावधावेव अपक्रामतो न प्रतीतिः प्रयुक्तत्वरूपापक्रमणस्य निरूपकरूपावधौ तु प्रयुक्तत्व-स्य प्रतीतिरंगीक्रियत एव तथानुभवादिति सिद्धान्तः स्फुट एव तथापि समनानन्तरमाह विलादिति निष्क्रामतः विभागानुकूलव्यापारोत्पत्तिकालावच्छिन्नस्य विभागात् पूर्वं स्थूलकालव्यापिव्यापारोत्पत्तिकालस्य प्रदर्शनाया ह दीर्घभोगस्येति तत्र विले अवच्छिन्नतया संयुक्ततया उपलब्धिः प्रत्यक्षमुत्पत्त्युत्तरक्षणेष्वित्यादिस्तथा च विभागोत्पत्तेः पूर्वं विले भोगिन इवोत्पत्तेः प्रयुक्तत्वस्य चापक्रमणस्योत्तरकालमेव लोमादौ दूर्वादेः प्रत्यक्षमुत्पत्त्यादिकाले तु दूर्वादेः प्रत्यक्षं नास्त्येव चक्षुराद्यसंयोगादिति भावः उत्पत्तिक्षणे लोमादौ दूर्वाद्यस्तीति परोक्षधीस्तु पूर्वोक्तरीत्यैव समाधेयेति ध्येयं यत्तु भोगिनो ग्रावच्छेदेन विलासंयोगरूपस्यापक्रमणस्य सत्त्वेपि मूलावच्छेदेन विलसंयोगाद्यथा विले उपलब्धिस्तथा दूर्वादेः स्वपरिणामिलोमादिभागसंबंधतया प्रतीयमानस्यापि लोमादिभागान्त रावच्छेदेन लोमादिसंबं

कैयटेप्यपक्रमणानवधित्वे लोमादिषु कार्यस्य प्रतीतिर्न संभवतीत्याशंक्य विलान्निष्क्रामतो दीर्घभोगस्य भोगिनः अवच्छिन्नतया तत्रोपलब्धिवत्कार्यस्यापि दूर्वादेस्तत्रोपलब्धिरित्यवधित्वमेव तत्रोपपादितम् ततश्च मतद्वयेपि जनिकर्तुः प्रकृतिरित्यनेनोपादान एव पञ्चमीति नियमो न सिद्ध्यतीति चेत् मैवम् पशुना यजेतेत्यादौ पशुपदस्य पशुमात्रवाचकत्वेपि च्छागस्य वपाया इति वाक्यशेषानुसारेण पशुविशेषपरत्ववदत्रापि कारणमात्रार्थत्वेप्युपादानपरत्वोपपत्तेः ॥ २१ धाभावरूपापक्रमणमिति कैयटसमाधानवाक्यार्थ इति तन्न वृक्षावस्थितिकाले चलत्यपि पत्रादौ वृक्षाच्चलतीत्याद्यप्रयोगेण वृक्षादिसंयोगाद्यसमानकालीनस्य वृक्षाद्यसंयोगादेरेवापायपदार्थतया वाच्यत्वेन विलादिसंयोगादिकालीनस्य विलाद्यसंयोगादेरपायपदार्थत्वाभावात् मतद्वयेपीति वृत्तिकारमते प्रकृतिपदस्य कारणसामान्यपरत्वाद्भाष्यकारमते जनीत्यादिसूत्राकरणेन कारणसामान्येपि पंचमीसंभवान्नोपादानस्यैवापादानसंज्ञेति भावः यद्यप्युक्तरीत्योपादानतानिरूपितप्रयुक्तत्वस्य पंचम्यर्थता जनीत्यादिसूत्रसिद्धेति भाष्यसम्मतं तथापि परभ्रमभञ्जनस्य त्यापि समाधानं सुकरमित्याशयेनाह मैवं पशुनेति कारणमात्रार्थत्वेपि प्रयुक्तत्वरूपेण प्रयुक्तत्वबोधकत्वेपि मात्रपदादुपादानतानिरूपितप्रयुक्तत्वरूपेणाबोधकत्वव्यवच्छेदः अपि ना उक्तरीत्योपादानतानिरूपितप्रयुक्तत्वेन बोधकत्वस्य प्रामाणिकत्वात् कारणमात्रार्थकत्वमसिद्धमिति सूचितं उपादानपरत्वेति प्रयुक्तत्वरूपेणोपादानतानिरूपितप्रयुक्ततापरत्वेत्यर्थः वक्ष्यमाणवाक्यशेषेणेत्यादिः अथवा कारणमात्रार्थत्वेपि यतो वेत्यादौ पंचम्या विभाषा गुणेस्त्रियामित्यत्र गुण इत्यस्योपलक्षणत्वेन अगुणेपि पंचमीविधानात् प्रयुक्ततामात्रबोधकत्वेपि उपादानपरत्वोपपत्तेर्जनीत्यादिनोपादानतानिरूपितप्रयुक्तत्वरूपेणाबोधकत्वोपपत्तेरित्यं च नप

रामः

CC-0. In Public Domain. Digitization by eGangotri

ननु यतो वेत्यादौ न हेतुपंचमी येन जनीत्यादिनोपादानीयप्रयुक्तत्वार्थः स्यात् किंतु ध्रुवमित्यादिनावधौ पंचमी तथा च वृक्षाद्विभजत इत्यादौ विभागे वृक्षनिष्ठावधितानिरू
पकत्वस्येवोक्तवाक्ये भूतोत्पत्तौ ब्रह्मनिष्ठावधितानिरूपकत्वस्य लाभस्तत्राह अवधिपंचमीति अवधिपंचमीस्वीकारे इत्यर्थः ब्रह्मनिष्ठावधितानिरूपकत्वं ब्रह्मनिष्ठप्र
योजकतानिरूपकत्वरूपं वाच्यमन्यस्य दुर्वचनत्वात्तथा च प्रयोजकतानिरूपकत्वस्य प्रयुक्तत्वपर्यवसितस्य पंचम्यर्थस्य शृंगादित्यादौ निमित्तीयस्य लाभेपि यतो वेत्या
दौ वाक्यशेषेणोपादानीयस्य लाभ इति भावः सोकामयतेत्येतत् शाखान्तरस्थिते ति सोकामयत बहु स्यामित्येतच्च शाखान्तरस्थितं तदैक्षत बहु स्यामिति वाक्यं चे
ति समाहारद्वंद्वः यथाश्रुते तु आत्मन आकाश इत्यस्यैव सोकामयतेत्यस्यापि तैत्तिरीयस्थत्वाद्संगतेः सामानाधिकरण्यस्य ब्रह्म तत् सृज्याभेदस्य। नास्येति अस्यो
क्तसामानाधिकरण्यस्य मुख्यव्यादायेति अपंचीकृतसमष्टेरेव सृष्टिः पूर्वमुक्ता सच्चेत्यादिना तु पंचीकृतसमष्टेर्न च पंचीकृतेषु प्रवेशालाभ इति वाच्यम पंचीकृतेषु

अवधिपंचमीपक्षे शृंगाच्छर इत्यादौ शृङ्गादिपदस्य नियामकाभावान्निमित्तपरत्वेपि प्रकृते नियामकत्वेन निमित्तपरत्वाभावात् अत एवात्मन आ
काशः संभूत इत्यादावपि प्रकृतिपंचमी सच्चत्यच्चाभवदिति वाक्यशेषेण सोकामयतेत्येतच्छाखान्तरस्थितवाक्येन च प्रतीतसामानाधिकरण्यस्य
नियामकत्वात् न च स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवदित्यादिश्रुत्या सदादिभवना
स्य जगत्सृष्टितदनुप्रवेशानंतरभावित्वेन जगत्सृष्टितानुपपत्तौ परमेश्वरस्य सत्त्वादिगुणाभिव्यक्तिपरत्वेन ब्रह्मोपादानत्वे नास्य प्रामाण्यं अन्यथा
कथमभवदित्युक्तं स्यात् न हि शुक्ती रूप्यमभवदित्युच्यत इति वाच्यम् सदादिभवनस्यैव जगत्सृष्टिरूपतया तदानन्तर्याभावात् तदनुप्रविश्येत्य
स्य मुख्यव्यादायेति वदुपपत्तेः न चेदं सर्वमसृजतेत्यनेन पौनरुक्त्यम् निमित्तत्वमात्रभ्रान्तिव्युदासपरत्वात् यच्च शुक्ती रूप्यमभवदित्यनुभवाद
र्शनमुक्तम् तच्छुक्तेरनुपादानत्वप्रयुक्तमिति तद्दर्शनस्य व्युदासपरत्वादनुदाहरणत्वात् न च मूर्त्तामूर्त्तप्रपंचस्य सत्त्यदाभ्यामेवोक्तत्वेन निरुक्ता
दिपदवैयर्थ्यमित्याशंक्य संग्रहविवरणरूपतयोपपत्तेः ॥ २१ प्रवेशोक्त्यैव तल्लाभाद पंचीकृतानामेव पंचीभावात् अत एवेदं सर्वमसृजतेत्यपिनानु
पपन्नम पंचीकृतानामेव सर्वात्मकत्वादिति ध्येयं भ्रान्तिव्युदासेति सामानाधिकरण्येन ब्रह्मणः कार्यतादात्म्यलाभाद्भ्रान्तिव्युदास इति भावः अनुदाहरणत्वादिति व्यु
दासपरत्वादित्यत्र हेतुः प्रयुक्तमिती त्यंतमनुदाहरणत्वादित्यत्र हेतुः मूर्त्तामूर्त्तेति मूर्त्तं पृथिव्यप्तेजांसि अमूर्त्तं वाय्वाकाशौ संग्रहविवरणेति सत्त्यत् शब्दाभ्यां सं
क्षेपेणोक्तं निरुक्तादिपदैर्विवरणं विस्तरेण कथनं क्रियते तथा हि भाष्यं निरुक्तं देशकालादिविशिष्टतयेदं तदित्युक्तं तद्विपरीतमनिरुक्तं निलयनमाश्रयस्तद्विप
रीतमनिलयनं विज्ञानं चेतनं विपरीतमविज्ञानं सत्यं व्यावहारिकमनृतं मृगतृष्णादिकमिति तथा च मूर्त्तामूर्त्तयोर्निरुक्तत्वानिरुक्तत्वादिविवेचनं निलयनत्वं स्वा
न्य सर्वव्याकृताश्रयत्वमाकाशस्यैव सर्वभुवनाश्रयत्वं वा ब्रह्माण्डस्यैवेति बोध्यम् ॥ ॐ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ॰सि सृज्यसाहचर्यं। सृज्यात्मनाभवनं संकल्पमाहेतिसोकामयतेत्यादेः परमतेयमर्थः स आनंदमयः नियामकस्वीयनानारूपैर्नियम्येष्ववस्थानमकामयत ततश्च नि
टी॰ल॰ यम्यानिविनोक्तावस्थानासंभवेननियम्यानिभवंत्वित्यालोचनरूपं तपः कृतवान् ततइदंसर्वमसृजत ततस्तदनुप्रविश्यनियामकरूपैरधिष्ठायसदादिरूपोभवत्
उ॰ सत्त्वादिगुणैरभिव्यक्तोभवत् सत्त्वगुणाः श्रीमहत् प्राणेभ्योन्यत्रावसादनकर्तृतानियामकरूपस्सत्त्वगुणाः निरुक्तत्वंसुवाच्यत्वं अनिरुक्तत्वंदुर्वचत्वंनिलयनत्वंसर्वा
६४ धारत्वंनदभावो अनिलयनत्वं विज्ञानत्वंसर्वत्वंसत्यत्वंसाधुत्वं तयोरभावो अविज्ञानत्वानृतत्वे सत्यमभवत् इत्यनेनसत्त्वादयईश्वरगुणाः साधुरूपा इत्युक्तं तथाच
श्रीमहत् प्राणेभ्यो अन्येषु अवसादनकर्तृत्वात् नियामकत्वात् सुवाच्य कर्तृत्वात् सत्यत्वनिरुक्तत्व गुणवानीशः स्वयंदुर्वचत्वादनिरुक्तः स्वयंसर्वाधारत्वात् सर्वज्ञत्वा
त् साधुत्वात् निलयतत्वज्ञानत्वसत्यत्वगुणवानीशः अन्यत्रतद्विपरीतकर्तृत्वादनिलयनोपिज्ञानोनृतइतिभावः तदुक्तं परकीयतेतिरीयकभाष्ये। अवसादसुवाच्य

ननुसोकामयतबहुस्यामित्यादिवाक्यंनसृज्यसाहचर्यमाह येनतत्सामानाधिकरण्यमीश्वरस्य प्रतीयेत किन्तु परमेश्वरस्याजायमानोबहुधाविजा
यते यदेकम व्यक्तमनंतरूपमित्यादिश्रुतिसिद्धतत्तदनन्तपदार्थप्रेरकानन्तरूपैर्बहुभावसङ्कल्पमाह नचस्वस्यानन्तरूपैर्बहुभावंसंकल्पेदं
सर्वमसृजतेतिजगत्सर्जनानुपपत्तिर्नियामकरूपैर्बहुभावस्यनियम्यसापेक्षत्वान्नियम्यंसर्वेस्रष्टा नियामकरूपैः प्रवेशोत्त्युपपत्तेः अन्यथास्या।
मितिसत्त्वोक्तिर्नस्यात् सृष्टेः प्रागंतःकरणाभावेनतद्विशिष्टाहमर्थाभावेनोत्तमपुरुषानुपपत्तिश्चस्यादितिचेत् नस्यामित्यनेनसुखीस्यामित्यादि
वज्ञावित्त्वोक्तौ तदनुपपत्त्यभावात् अन्यथासंकल्पविषयत्वानुपपत्तेः सिद्धइच्छाविरहात् इदमेवचबहुपदस्यसृज्यपरत्वेविनिगमकंनिया
मकरूपाणांतवापिमतेईश्वराभिन्नतयासिद्धत्वात् तथाचेच्छायानियम्यएवत्वन्मतेपिपर्यवसानात् तथाचेच्छायास्तेजः प्रभृतिविषयत्वेन
बहुस्यामितिसंकल्पयतेजः प्रभृतिसर्जनमगुरुः स्यामितिसंकल्प्यशिष्यसंपादनादिवदितिनिरस्तम् ॥ २॥ त्वदीर्वच्याधारसाधुताः प्रकृतिप्राणतोन्य
त्रकुर्वंस्तन्नामकोहरिः अतोनियामकश्चेतिसदानंतादवाच्यतः अनिरुक्तंनिलयनंसर्वाधारत्वतोहरिरितिननु तत्तन्नियम्यनियामकत्वविशिष्टबहुरूपेष्विच्छात
त्रविशेष्यांशसिद्धत्वेपिविशेषणास्यासिद्धत्वान्नदोषः तत्राह तथाचेच्छायानियम्यइति। नियामकत्वस्यशक्तिविशेषरूपस्यापिसिद्धत्वेनियम्येषुकार्येष्वेवेच्छाविष
यत्वंत्वयापिवाच्यमितिभावः विषयत्वेनेतिइतिनिरस्तमित्यनेनान्वयः एवंसच्चत्यच्चेत्यादिनासत्त्वादिगुणाभिव्यक्तिकथनमप्युक्तम्। अवसादकर्तृत्वनियामक
त्वादेः शक्तिविशेषस्यशक्तीभूतकार्यकालीनत्वस्यैवाभिव्यक्तित्वेनकार्योत्पत्तिकथनेनैवतल्लाभात् त्वदीयतैत्तरीयभाष्येत्यच्चानिरुक्तंविज्ञानंतथानिलयनंमहान्
सत्यंप्राणस्तथाश्रीश्चस न्निरुक्तंतथानृतं। अविज्ञानंनिलयनमित्यनेनत्यदादिशब्दैर्महत्त्वस्यसत्यशब्देनप्राणस्यसदादिशब्दैः श्रियश्चोक्तत्वेनतद्विरोधाच्च। अथेश्व राम:
रस्यैवसत्त्वादिगुणाईश्वरसंबंधान्महदादावपितद्व्यवहारइतिचेन्नतथापिमहदादिपरत्वेईश्वरेगुणाभिव्यक्तिपरतायोगात् योगेवामहदादिपरत्वोक्तेरुन्मत्तप्रलापत्वात् ॥ ॥ २७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संभवेनेति अनुच्चारयितर्य्यपि चैत्रेहं सुखीतिज्ञातायमितिप्रयोगादनुच्चारयितर्यपीश्वरेहंपदप्रयोगोन्यथातथात्वापि स्पष्टेः पूर्वंनियामकनानारूपैर्वहुभावसंकल्पस्याहं
पदेनोल्लेखायोगादथतवनित्यशरीरेणोच्चारणान्तर्हिममाप्याकाशादिसृष्टेः पूर्वमशरीरवाचात्तदुपपत्तिः संकल्पस्यैववाचोप्यविद्यापरिणामत्वसंभवादतः करणंतुनाहंपद
प्रयोगनिमित्तंपरकीयेपितत्रतदापत्तेरितिभावः आदीनामितितत्तेजऐक्षततदपोसृजततिस्रोदेवताइत्यादिवाक्यैरितिशेषः प्रतिपादकतेजआदिपदैरैक्षतेत्यादिपदयुक्तते
जआदिपदैः तस्यैवेतिसत्तपस्तप्त्वाइदंसर्वमसृजतेत्यादिश्रुतेरितिशेषः। अकुरुतेतिसत्त्वेति अकुरुतेतिकर्तृत्ववललभ्यपूर्वसत्त्वेत्यर्थः ब्रह्मणइतिहेतोरुत्पत्तावन्वयस्त

यच्चोक्तमुत्तमपुरुषानुपपत्तिरिति तन्नतादृशाविद्यापरिणामविशिष्टे अहमितिप्रयोगसंभवेनोत्तमपुरुषोपपत्तेः एवमेवतत्तदैक्षतवहुस्यामित्याद्यत्रमा
नंवोध्यं ननुच यत्तेजः प्रभृतिसृज्यन्तदात्मनाहित्वयावहुभावोवाच्यस्तेषान्तुतेजआदीनामीक्षितृत्वस्पष्टत्वदेवतात्मत्वश्रवणात्तानिचेतनानिनचचे
तनंप्रत्युपादानंनामेतिचेत् सत्यम्सृज्यानामीक्षितृत्वाद्यसम्भवेनेक्षणादिकर्तृप्रतिपादकतेजआदिपदैस्तेजआद्यवच्छिन्नआत्मावोध्यतेपूर्वपूर्वका
र्यावच्छिन्नस्यतस्यैवोत्तरोत्तरकार्यनिमित्तत्वात् तथाचावच्छेदकेतेजआदौनचैतन्यनिवन्धनदोषावकाशः असद्वाइदमग्रआसीत्ततोवैसदजायत
तदात्मानंस्वयमकुरुतेत्याद्यप्युक्तार्थेप्रमाणंनचात्मनः करणेअकुरुतेतिसत्त्वोत्त्यनुपपत्तिः आकाशाद्यात्मनाक्रियमाणत्वेपिस्वरूपेणसत्त्वोप
पत्तेः एतदर्थमेवात्मानंआकाशाद्यात्मनाअकुरुतेत्य श्रूयमाणोर्थः कल्प्यते एवंतदात्मानंसृजाम्यहमित्यादिस्मृतिष्वधर्मस्यापकृशरीराद्यात्मने
तिव्याख्येयंनच ततोवैसदजायतेतितच्छब्दोपातब्रह्मणः प्रपंचोत्पत्तेः प्राक्सिद्धत्वात्तदात्मानमितिव्यर्थमितिवाच्यम् निमित्तत्वेपूर्ववाक्येनलब्धे
पिउपादानत्ववोधनेनास्यापिसफलत्वात् ननुयदुक्तंब्रह्मण्येवस्थितिलयश्रवणाद्ब्रह्मोपादानमिति तन्नऊर्णनाभौतंतुनिमित्तेतंतुलयस्यदर्शना
त् तत्रहियथापुत्रंप्रतिपितृदेहधातोरुपादानत्वेपिनपितातदुपादानम् किन्तुनिमित्तमात्रम् तथाऊर्णनाभिधातोस्तदुपादानत्वेपितस्यनिमित्तत्वमेव
ब्रह्मणोपिऊर्णनाभिवदेवसंहर्तृत्वस्ययथोर्णनाभिश्रवणाच्चेतिचेन्न यद्यपिऊर्णनाभेर्नतंतूपा दानत्वंतस्मिन्नष्टेपितंतूपलम्भात् किन्तुतद्भुक्ताहारस्यैव त
थापितत्रनतंतोर्लयः किन्तुवहिष्टस्यान्तः प्रवेशमात्रं अतएवयथोर्णनाभिः सृजतेगृह्णते चेत्युक्तम् नचब्रह्मणस्तन्न्यायेनसंहर्तृत्वोक्त्यातद्वदेवतदस्ति
तिवाच्यम् तज्जलानित्यादिनातत्रलयश्रवणात् तिरोभावमात्रेचतस्यनिदर्शनत्वात्सर्वसाम्यस्यदृष्टान्तत्वाप्रयोजकत्वात् तद्भूतयोनिमितियोनिश्रुत्याचोपा

लिरित्यादिना ३

याचसदेवेत्यादिनानभिव्यक्तनामरूपात्मकब्रह्मणउक्तत्वेनततइत्यादौतत्पदेनतत्परामर्शात्तादृशब्रह्महेतुकप्रपंचोत्पत्ते — रुक्तत्वात् तदात्मानमित्यादिव्यर्थमितिभावः ऊर्णना
भिधातोः लालारूपस्यनष्टे अदृष्टे तंतुतादात्म्येनोर्णनाभेरप्रत्यक्षेपितंतुप्रत्यक्षादित्यर्थः उपादानस्यकार्यतादात्म्यावश्यकत्वात्तदप्रतीत्यानात्रोपादानत्वमितिभावः यथाश्रुतेगो
लोमादीनांनाशेपिदूर्वादिदर्शनादनुपादानतापत्तेरसंगतिः लयः संस्काररूपेणस्थितिः तज्जलानितिसर्वंखल्विदंब्रह्मतज्जलानितिश्रुतौतस्मात् ब्रह्मणोजायतइतितज्जंतस्मिंल्ली

॥ शानत्रय ॥

यतइतितत्त्वं तेनाभिजीवतीतितदइदसपृः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योनिष्ठइतियोनिष्ठइन्द्रसदने अकारितमान्नृभिः पुरुहूतप्रयाहि। असोयथानोविताद्वृधेचद्दोवस्वनिममदृश्वसोमैरित्यस्यहेपुरुहूतइन्द्रतेसदनायउपवेशनार्थयोनिः
स्थानमकारितंयोनिंप्रतिआप्रयाहिनृभिर्मरुद्भिःसहयथानोस्माकमवितारक्षकोसःभवसिवृधेवर्द्धनायभवसिवसूनिददःददासितथासोमैरस्मदीयैर्ममदःमादयेत्यर्थः
निमित्तेउपवेशनक्रियानिमित्तिस्थानइतियावत्।तथातत्रस्थानइवप्रकृत्तेनिमित्तेप्रयोगःमहत्त्वपरिमाणंमहत्त्वसंख्याप्रचययोनिइत्यत्रवैशेषिकोक्तौमहत्त्वादिनि
मित्तकारणकार्यकतयाप्रयोगादितिभावः।मुख्यस्तुशब्दस्वरसादितिशब्दस्यस्वरसादर्थांतरेनुपपत्तिप्रतिसंधानंविनैवयोर्थःप्रतीयतेसमुख्यस्तत्सम्भवेर्थांतरंनयु।
ह्यतेमुख्यार्थेन्वयानुपपत्त्यादिमूलकलक्षणाकल्पनेगौरवादित्यर्थःमुख्यार्थेतिअर्थांतरेनुपपत्यादिज्ञानंविनैवोपादानेप्रयोगात् तदेवमुख्यार्थोनिमित्तकारणस्यलादौ
तुकारणत्वाधारत्वादिगुणयोगात्प्रयोगोतएवयोनिश्चहिगीयतइतिसूत्रेणभगवताव्यासेनतथासूचितमितिभावः तत्रुएकविज्ञानश्रुतेर्ब्रह्मणःसर्वदृश्यस्वरूपत्वात्त।

नचयोनिष्ठइन्द्रसदनेइत्यादौनिमित्तेपियोनिशब्दप्रयोगान्नतेनोपादानतासिद्धिःमुख्यस्तुशब्दस्वरसादितिन्यायेनकदाचिदन्यत्रकथंचिन्निमित्ते
तत्प्रयोगेप्यौत्सर्गिकमुख्यार्थत्यागस्यप्रकृतेऽयोगात् एकविज्ञानेनसर्वविज्ञानश्रुतिरपिउपादानत्वेमानम् यथाचनसादृश्यप्राधान्याभ्यामुपपत्तिस्त
थोक्तंप्राक् सर्वंखल्विदंब्रह्मेतिसामानाधिकरण्यश्रुतिरपितत्रमानम् नचसर्वंसमाप्नोषिततोसिसर्वइतिस्मृत्याऽन्यथाव्याख्यातत्वान्नतत्रमानतेति
शंक्यं अधिष्ठानतयासर्वव्यापित्वस्यसर्वशब्दप्रयोगनिमित्तत्वादन्यथाकाशेपिसर्वपदप्रयोगापत्तेः अनुपादानत्वेप्रकृत्यधिकरणविरोधापत्तेश्चो
पादानत्वम् श्रुत्यनुगृहीतानुमानमप्यत्रविवरणोक्तमध्यवसेयम् तथाहिमहाभूतानिसद्वस्तुप्रकृतिकानिसत्स्वभावानुरक्तत्वेसतिविविधविकारत्वात् मृ
दनुस्यूतघटादिवदितिनचविवर्तमत्तेउपादानत्वानुपपत्तिःसत्प्रधानप्रकृतित्वेनार्थांतरतावाआदावेवतदुपादानत्वस्यस्थापितत्वात् प्रकृतेःसत्त्वा
भावस्यप्रसाधितत्वेनार्थांतरानवकाशाच्चनचखण्डोगौर्मुण्डोगौरितिगोत्वानुरक्तखण्डादौव्यभिचारःतदनुरक्तत्वेसतितद्विकारत्वादित्यत्रतास्य
र्यात् सदतिरिक्तगोत्वाद्यनभ्युपगमाच्च ॥ २ त्वानात्तत्ज्ञानमितिनार्थःकिन्तुसर्वदृश्यसद्रूपादिनाब्रह्मसादृश्याद्ब्रह्माधीनत्वाद्वातत्ज्ञानात् तज्ज्ञानमित्यर्थस्त

थाचकथमुपादानत्वसिद्धिस्तत्राहयथाचेतिविवेचितमेतत्श्रुतिदूषणोद्धारे अधिष्ठानतयासर्वव्यापित्वस्य अधिष्ठानत्वहेतुकस्यसर्वतादात्म्यस्यनिमित्तत्वात् निमि
त्तत्वेनोक्तस्मृत्याव्याख्यातत्वात् आप्नोषीत्यनेनैवसंबंधमात्रलाभसंभवेनतादात्म्यलाभार्थमेवसंपदोक्तेरितिभावः अन्यथातादात्म्यान्यसंबंधस्योक्तनिमित्तत्वेप्रकृत्य
धिकरणेतिप्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधादित्यधिकरणेत्यर्थःमहाभूतानिकार्याणिसद्वस्तुप्रकृतिकानिसत्स्वरूपोपादानकानिव्यभिचारःयद्यदनुरक्तंकार्यंत
तदुपादानकमितिसामान्यव्याप्तौतदनुरक्तत्वेसतिसत्स्वरूपतादात्म्यवत्त्वेसति।तद्विकारत्वात्सत्स्वरूपकार्यत्वात् अनभ्युपगमादितितथापिगुणाद्यात्मकेद्रव्ये राम:
तदनुपादानकत्वाद्विशेष्यदलंगुणादेरपिसत्स्वरूपत्वेतुदृश्यात्मकस्यब्रह्मणोदृश्यानुपादानकत्वात्दण्डादिकार्येव्यभिचाराद्विशेषणमितिबोध्यम् ॥ ॥ २७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वत्रसद्रूपसंवंधस्यप्रतीतेःसम्बन्धान्तरवाधात्तादात्म्यरूपत्वात् पराभ्युपगतसमवायस्थलेतादात्म्यस्यैवप्रामाणिकत्वात् ब्रह्मणिनिमित्तकारणत्वस्यत्वयापिवाच्यत्वा
त् कार्यतादात्म्यवत्कारणत्वरूपमुपादानत्वंब्रह्मणिदुर्वारमित्यनुकूलतर्कोवोध्यः। अतएवयद्यत्तादात्म्यवत्त्वेसतियत्कार्यंतत्तदुपादानकमितिव्याप्तौयत्कार्यत्वनिवे।
शादेव। अत्रेदानीमितिप्रतीत्याएतद्देशकालावच्छिन्नासत्त्वोपादानकत्वसिद्धिःशंकितुंशक्यानतुसामान्यतोसत्त्वोपादानकत्वसिद्धिरुक्तासत्त्वस्यसर्वदेशकालवृत्त्य।
त्यन्ताभावप्रतियोगित्वरूपत्वादत आह असन्नश्रृङ्ग·मितिप्रतीतेरयातत्त्वंविवृणोतिद्वितीयेतियत्स्वभावाननुरक्तत्वंयत्तादात्म्यशून्यत्वंयत्तादात्म्येनाप्रतीयमानत्व
स्मानाद्यःस्वरूपासिद्धेः। अन्त्यमभिप्रेत्याहकपालस्वभावेति। अप्रतीतेःकपालाद्घटइत्यजानानपुरुषस्याप्रतीत्तेः। तथाजानानस्यतथाप्रतीतिवदानंदात्जगत्जा

अतएवसन्घटइतिवदत्रेदानीमसन्घटः असन्नश्रृङ्ग·मित्यादिप्रतीत्यनुसारेणघटनृश्रृङ्गादेरसदुपादानत्वापत्तिरितिनिरस्तम् नापिब्रह्मनद्द
व्योपादानंचेतनत्वाच्चैत्रवत् जगन्नानन्दप्रकृतिकं तत्स्वभावाननुरक्तत्वाद्यद्यत्स्वभावाननुरक्तंनतत्तत्प्रकृतिकं यथा घटस्वभावाननुरक्तंप
टादिनघटोपादानकमित्यादिनासत्प्रतिपक्षत्वं व्याप्तिपक्षधर्मतयोरापातप्रतीत्यासाम्येपिश्रुत्यनुग्रहेणस्थापनायांवलवत्त्वात् द्वितीयानुमा
नेकपालस्वभावाननुरक्ते——घटेव्यभिचारःकपालंघटइत्यप्रतीतेःनचमृत्त्वेनतदनुरक्तत्वमस्तीतिवाच्यम् सत्त्वेनात्राप्यनुरक्तत्वस्यसमानत्वात्
एवंचजगदभिन्ननिमित्तोपादानकंप्रेक्षापूर्वजनितकार्यत्वात्सुखदुःखादिवदित्यभिन्ननिमित्तोपादानत्वंब्रह्मणःसिद्ध्यति न च व्यर्थविशेषण
त्वं प्रेक्षापूर्वकत्वात्कार्यत्वादितिहेतुद्वयतात्पर्यात् नचत्वन्मतेदुःखादीनामंतःकरणोपादानकत्वेनसाध्यवैकल्पमितिवाच्यम् अस्मन्मतेतेतः
करणस्यपरिणाम्युपादानत्वेप्यंतःकरणरूपेणपरिणताज्ञानाधारतयाविवर्त्तोपादानत्वस्यानपायात् कार्यत्वादितिहेतौसर्वकार्यनिमित्तका
लघटसंयोगस्योभयवादिसंप्रतिपन्नस्यदृष्टान्तस्यलाभाच्चनचजगदुपादानंनकर्तृद्रव्योपादानत्वात् जगत्कर्त्तावानद्रव्योपादानंकर्तृत्वात्कुलाला
दिवदित्यादिनासत्प्रतिपक्षत्वम् श्रुतिविरोधेनहीनवलत्वात् आद्यानुमानेजडत्वस्यद्वितीयानुमानेसर्वान्तर्यामित्वस्यचोपाधित्वात् वाधोन्नीततया
पक्षेतरत्वेपिदोषत्वात् तस्माद्ब्रह्मजगदुपादानंकर्तृचसिद्धम् ब्रह्मणोजगदुपादानत्वेप्रमाणोपपत्तिः॥ १०॥ २१ नानस्यानंदाज्जगदित्यपिधीरस्येवेतिहेत्वसिद्धि

रितिभावःप्रेक्षापूर्वकत्वात्जन्यतासंवंधेनप्रेक्षाविशिष्टत्वात् एतेनप्रेक्षाकालीनप्रागभावप्रतियोगित्वस्यप्रेक्षाकार्यत्वस्यवाहेतुत्वेकालीनेतिप्रेक्षेतिवाव्यर्थमितिपरास्तंउपा
धित्वादितिपक्षमात्रनिष्ठाभावप्रतियोगित्वान्नानयोरुपाधित्वंयत्रयत्रोपाध्याभावस्तत्रनसाध्यमितिव्यतिरेकव्याप्त्यभावाच्चनहिपक्षेसाध्याभावोममनिश्चितःजडत्वसा
मत्तिसाध्याव्याप्तेश्चेतिचेद्धान्तोसिसत्प्रतिपक्षेसत्प्रतिपक्षान्तरस्यव्यर्थत्वात् व्यभिचारोन्नायकतयादूषकत्वेतुपक्षमात्रनिष्ठाभावप्रतियोगित्वंनप्रतिकूलंसाध्यव्यापक
त्वेनगृह्यमाणोपाधेर्व्यभिचारेणहेतौसाध्यव्यभिचारोन्नयनसंभवात् जडत्वंतुचिदन्यत्वरूपंतुच्छेप्यस्त्येव। वाधोन्नीततयापक्षेतरत्वेपीतिवन्हिरनुष्णःकृतकत्वादित्यादे

वन्हीतरत्वादिस्तत्तुल्यतयेत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि· यथा चतत्र साध्यव्यापकताग्राहकस्तर्को स्तिहेतौ च साध्यव्याप्यताग्राहकस्तर्को नास्ति तथा प्रकृतोपाधौ अस्तिहि अकर्त्ता यदि जडो न स्यात् कर्त्ता न स्यात् चेतनस्य कर्तृ
टी·ल· त्वनियमात् जगदनुपादानं यदि अनंतर्यामि न स्यात्तदा जगदुपादानं स्यादंतर्यामिण एव सर्वानुस्यूतत्वेन विवर्त्तोपादानत्वादित्युपाधौ साध्यव्यापकताग्राहकतर्कः
उ· नास्ति च द्रव्योपादानत्वादि हेतावकर्तृत्वादि व्याप्तिग्राहकस्तर्को मृदादेरचेतनत्वादिनाकर्तृत्वाद्यभावेपि ब्रह्मणः कर्तृत्वादौ बाधकाभावात्तथा च पक्षेतरत्वस्यानु
६६ पाधित्वं न कुलधर्म इति भावः तर्कैरित्यादि॥ ब्रह्मोपादानताप्रमा ॥१०॥ नावेद्यस्य नाप्रमेयस्य तद्धेदनार्थं मनोध्यासानुकूलतद्वेदनार्थं। अन्योन्याश्रयात् मनोध्यासे स
तिप्रमाणरूपा वृत्तिस्तस्यां चाधिष्ठानज्ञानतया कारणीभूतायां सत्यां मनोध्यास इत्यन्योन्याश्रयात् स्वप्रकाशतयातदनपेक्षमित्यादि तस्याध्यासस्यापेक्षा यत्र ता
दृशमधिष्ठानमेव न तु तद्गोचरप्रमाणवृत्तिर्यतो धिष्ठानं स्वप्रकाशमित्यर्थः यद्यपि मन आद्यध्यासे अधिष्ठानगोचराविद्यावृत्तेर्हेतुत्वसंभवेन नान्योन्याश्रयस्तथा
प्यनवस्थास्त्येव तादृशवृत्त्यध्यासे वृत्त्यन्तराध्यासहेतुत्वस्य वाच्यत्वात् स्वप्रकाशत्वोक्तौ तु नानवस्था वृत्तेरध्यासहेतुत्वाभावात् अधिष्ठानानावरणस्यैवाध्या

नन्नु परिणाममानाविद्याधिष्ठानत्वेनोपादानत्वं वाच्यम् अधिष्ठानत्वं तु नावेद्यस्य तद्धेदनार्थं प्रमाणापेक्षायामन्योन्याश्रयात् न च स्वप्रकाश
तया तदनपेक्षमेवाधिष्ठानमिति वाच्यम् स्वप्रकाशताया वक्तुमशक्यत्वात् तथाहि किमिदं स्वप्रकाशत्वं वृत्त्यव्याप्यत्वं वा फलाव्याप्यत्वं वा
अवेद्यत्वे सत्यऽपरोक्षव्यवहारविषयत्वं वा तद्योग्यत्वं वा तद्योग्यत्वात्यंताभावानधिकरणत्वं वा नाद्यः ब्रह्मण्यप्यावरणभंगाय चरमवृत्ति
व्याप्यत्वात् न द्वितीयः अतीतादौ नित्यातीन्द्रिये चातिव्याप्तेः न तृतीयः सुषुप्त्यादौ व्यवहाराभावेनाव्याप्तेः न चतुर्थः योग्यत्वरूपधर्मस्य मो
क्षकाले अभावेन तदा ब्रह्मण्यव्याप्तेः नापि पञ्चमः अनधिकरणत्वस्यापि धर्मत्वेन मोक्षदशायां तस्याप्यभावेनाव्याप्तेः ॥ ॥

सहेतुत्वात् पूर्णानंदस्यावृतत्वेपि चिदंशेनावरणसत्त्वेनाध्यासोपपत्तेराधारतावच्छेदकरूपेणाहि अधिष्ठानानावरणमध्यासहेतुर्नत्वविद्याविषयरूपेणोत्यवि
द्योपहितत्वादिरूपेणानावरणात् मन आद्यधासोत्पत्तिरर्थसंस्कारहेतुत्वेनाविद्यावृत्तेरध्यासापेक्षणीयत्वेनानवस्था तादवस्थ्यमिति चेन्न एवं हि मास्तु वृत्तिरवि
द्याया अविद्योपहितचित्त एव साक्षित्वस्यावरणविशेषाभावे संस्कारहेतुत्वस्य च संभवात् वस्तुतो ज्ञानाध्यासे ज्ञानगोचरसंस्कारहेतुत्वे मानाभावेन वृत्त्यध्यासे सं
स्कारस्याहेतुत्वान्नोक्तानवस्था किं चोक्तानवस्थायाः प्रामाणिकत्वेनादोषत्वेपि स्वप्रकाशत्वमावश्यकमन्यथा प्रमाणवृत्तिनैरपेक्ष्येणाविद्यावृत्तिमात्रेणाधिष्ठा
नस्य प्रकाशानुपपत्तेरित्याशयेन प्रमाणवृत्तिनिरपेक्षव्यवहारविषयत्वव्याप्यं स्वप्रकाशत्वं व्यवस्थापयितुं वितर्कयति किमिदमिति यद्यपि चतुर्थपक्षेपि नाव्या
प्तिर्लक्ष्यैलक्षणसत्त्वस्यैवाव्याप्तित्वात् ब्रह्मणि तूक्तयोग्यत्वस्य कदाचित् सत्त्वेन तदसंभवात्तथापि स्वप्रकाशत्वस्य ब्रह्मण्यस्वाभाविकत्वे ब्रह्मणो स्वप्रकाशत्व राम:
स्वभावत्वं स्यादतः स्वप्रकाशत्वस्य ब्रह्मस्वरूपत्वलाभाय पंचमपक्षमेवांगीकरोति ॥ २७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पंचमपक्षस्येतिवस्तुतः प्रमाणावृत्तिंविनापिव्यवहार्यत्वायस्वप्रकाशत्वमुच्यतेतस्यचब्रह्मस्वरूपत्वाभावेपिव्यवहारदशायांसत्त्वेनैवोपपत्तिरितिचतुर्थपक्षोपियु
क्त एवेतिध्येयं अव्याप्तिः स्वप्रकाशत्वस्वरूपत्वानुपपत्तिः व्यवहारवदितितवभेदाभावेपिविशेषस्यभेदस्थानीयस्यगुणत्वादिव्यवहार इवममकल्पिततादात्म्यस्य
लक्षणत्वव्यवहारेप्रयोजकत्वात् वस्तुतोलक्षणवाक्यस्यमन्मतेखंडार्थत्वेनार्थोपस्थितिद्वारकभेदधीजनकधीविषयत्वेनलक्षणत्वस्यव्यवहारः स्वप्रकाशत्व
रूपेब्रह्मणिनानुपपन्न इतिध्येयं कथमितितदत्यंताभावस्वरूपस्याधिकरणत्वाप्रसिध्यातदनधिकरणत्वंननिवेश्यं

किंतुतदत्यंताभावत्वविशिष्टस्यानधिकरणत्वं तच्चब्रह्मणिबाधितं तादृशविशिष्टाधिकरणत्वात् नचतस्यापिमिथ्यात्वात्त
दभावस्वरूपरूपंलक्षणमव्याहतमिति वाच्यं योग्यत्वात्यन्ताभावस्वरूपस्यैवलक्षणत्वसंभवादितिभावः योग्यत्वविरोधीतियोग्यान्यवृत्तित्वविशिष्टेत्यर्थः व्यावहारि

अतएवनतादृगनधिकरणत्वोपलक्षितत्वमपितत् तस्यापिधर्मत्वेनमुक्तावभावादितिचेत् नपंचमपक्षस्यैवक्षोदसहत्वात् नचमोक्षेऽव्याप्तिः अनधि
करणत्वस्यस्वरूपतयातदापिसत्त्वात् नचस्वरूपत्वेलक्षणत्वानुपपत्तिः त्वन्मतेब्रह्माभिन्नानन्दादेर्गुणत्वव्यवहारवत्त्वरूपभूतेप्यनधिकर
णत्वेलक्षणत्वव्यवहारात् नचत्वन्मतेयोग्यत्वमपिब्रह्मणिमिथ्येतितदत्यंताभावोपिवाच्यः तथाचकथंतदत्यन्ताभावानधिकरणत्वमितिवाच्यं।
योग्यत्वविरोध्यत्यन्ताभावस्यविवक्षितत्वात् स्वाश्रयनिष्ठात्यंताभावस्यमिथ्यात्वप्रयोजकस्यस्वाश्रयनिष्ठत्वेनैवाविरोधित्वात् यद्वाव्यावहारिकात्य
न्ताभावोविवक्षितः ब्रह्मणिचयोग्यत्वात्यन्ताभावस्यब्रह्मरूपत्वेनतात्विकत्वात् नाप्यवेद्यत्वानिरुक्तिः फलाव्याप्यत्वस्यैवतत्त्वात् आवरणभङ्ग
चित्तएवफलत्वात् नचैवंघटादेरपिवृत्तिवेद्यतयाफलविषयत्वाभावाद्रूप्यसुखादेरप्य परोक्षव्यवहारयोग्यतयाविशिष्टलक्षणस्यातिव्याप्तिरिति
वाच्यम् घटादौफलव्याप्यत्वस्यसमर्थितत्वात् रूप्यसुखादौसाक्षिभास्यतयाऽपरोक्षव्यवहारेपिप्रमाणजन्यापरोक्षवृत्तिविषयत्वाभावात् तथाचफ
लाव्याप्यत्वसमानाधिकरणतद्वत्त्वस्यपर्यवसिततयासकलदोषनिरासात् ॥ २ ॥

केतिव्यावहारिकस्वरूपकेत्यर्थः ब्रह्मरूपत्वेनेति उक्ताभाववद्विशिष्टरूपेणव्याव
हारिकत्वेपीत्यादिः। तात्विकत्वातात्विकस्वरूपकत्वात् नचोक्तात्यंताभावस्वरूपमेवलक्षणमस्त्वितिवाच्यमुक्तात्यन्ताभावस्वरूपस्ययदनधिकरणत्वं तस्यैवलक्षणत्वा
त् ब्रह्मस्वरूपस्यात्यन्ताभावस्वरूपस्याधिकरणत्वाप्रसिध्यैवतस्यलक्षणघटकत्वात् तएवतदादायपलक्षणासम्भवोक्त्यादिकंतवभ्रान्त्यैवनचैवंव्यावहारिकस्वरूपकेतिविशे
षणमपिव्यर्थमितिवाच्यं अधिकरणत्वनिरूपकतयावस्तुगत्याव्यावहारिकस्वरूपस्यनिवेशोनतुव्यावहारिकत्वेनेतिभावादितिभावः भंगेचितः नाशोपहितचित्तः समर्थित
त्वादितिजानातिभात्योः सकर्मकाकर्मकत्वाभ्यांभिन्नार्थकत्वेनघटोभातीत्यादौफलविषयोघट इत्यर्थात् सुखादौवृत्त्यभावेपिसाक्षात् क्रियमाणत्वप्रतीत्याचित्तोजगदुपादा
नत्वेनजगत्तादात्म्यात्तस्यैवविषयताशब्देनव्यवहारात् फलविषयत्वस्यघटादौसमर्थितत्वादित्यर्थः तथाचसुखादावुक्ताभाववत्त्वेचसमानाधिकरणतद्वत्त्वस्यसमानाधिकरणो
क्तविषयत्ववत्त्वस्यसमानाधिकरणत्वस्येति पाठे विशेषणस्येति शेषः तथाचेत्यस्यो
क्तविषयत्वेचेत्यर्थः ॥

अनुमित्यादिविषयत्वस्य सुखादावपि सत्त्वाद् परोक्षेत्युक्तं यद्यपि विद्यमानसुखाद्यनुमितिरप्यपरोक्षा तथापि यत्प्रमाणाजन्यत्वम् परोक्षताव्याप्यं न तत् प्रमाणाजन्यत्वविव
क्षयेन्द्रियजन्यवृत्तिविषयत्वं पर्यवसितं वोध्यं शुद्धेपि घटादिचाक्षुषादिविषयत्वान्नाव्याप्तिरथवा प्रमाणावृत्तियोग्यत्वं स्वाज्ञातत्वनाशकवृत्तिविषयत्वं विवक्षितं स्वाज्ञा
तत्वं स्वस्याभानापादकमज्ञानं विद्यमानसुखादौ तु तदप्रसिद्धं नित्यातीन्द्रिये तन्नाशकवृत्तिरप्रसिद्धेति वोध्यं तस्येत्यादि मूलाज्ञानस्य शुद्धचिन्निष्ठत्वात्तन्नाशस्यापि तन्निष्ठ
त्वेन शुद्धस्य फलीभूतशुद्धाविषयत्वमिति भावः गर्भत्वादिति ननु शुद्धेपि फलत्वेन भेदोस्त्येव उपहितकेवलयोर्भेदस्य सिद्धान्ते स्वीकारात्तथा च शुद्धस्य फलत्वोपहिततादात्म्य
मव्याहतमिति चेत् सत्यं तथापि विषयतात्वरूपाखण्डधर्मस्योक्ततादात्म्येमानाभावः भास्यानुयोगिकस्य भासकचित् प्रतियोगिकतादात्म्यस्यैव भासकतानियामकत्वेन
विषयतात्वादुपादानचित्प्रतियोगिकतादात्म्यस्य दृश्यमात्रे घटादावध्यस्तत्वेपि शुद्धचिति फलस्य तादात्म्यानध्यासात् शुद्धचित एवं फलत्वोपहिते तदध्यासात् शुद्धस्य स्व

न च ब्रह्मणोपि वृत्तिप्रतिविम्बितचिद्रूपफलभास्यत्वेनासम्भवः तस्य फलरूपत्वेन तद्विषयत्वाभावात् न च चित्सुखाचार्यैस्तत्स्वभावस्यापि स्फुरण
स्य तद्विषयत्वमित्युक्तेरसंभवः तस्याचार्यवचसस्तत्प्रयुक्तव्यवहारविषयतया तद्विषयत्वोपचारनिवन्धनत्वात् अयमत्र निष्कर्षः वृत्तिप्रतिवि
म्बितचिज्जन्यातिशययोग्यत्वं वृत्त्या तत्प्रतिफलितचिता वाऽभिव्यक्ताधिष्ठानचिद्विषयत्वं वा फलव्याप्यत्वं चिज्जन्यातिशयश्चानावरणभंगो नापि
व्यवहारो विवक्षितः किन्तु भग्नावरणचित्संवन्धः स च घटादावस्ति नात्मनि संवंधस्य भेदगर्भत्वात् एवमुक्तचिद्विषयत्वमपि भेदघटितं घटादावस्ति
नात्मनीति स्थितं प्रतिकर्मव्यवस्थायाम् नाप्यपरोक्षव्यवहारो दुर्लभः अपरोक्ष इति शब्दप्रयोगस्यैव विवक्षितत्वात् न चालौकिकप्रत्यक्षविषयध
र्मा धर्मादौ तादृशव्यवहारयोगितयाऽतिव्याप्तिः योगजधर्मातिरिक्तालौकिकप्रत्यासत्तेरनंगीकारात् तस्यापि स्वयोग्ये व्यवहित एव सामर्थ्यापादकत्वा
त् न तु धर्मादौ तदुक्तम् यत्राप्यतिशयो दृष्ट इत्यादि ॥ २१ प्रकाशत्वेन फलविषयतां विनापि व्यवहारसंभवात् अत एव विषयत्वाभावादित्युक्तं मूले अत एव च
वेद्यनिष्ठस्त्वसावस्मिन् दर्शने इति वौद्धाधिकारे उक्तं अस्मिन् वेदांतनये पूर्वोक्ते दर्शने असौ विषयतारूपः सम्बन्धो वेद्यनिष्ठस्तु दृश्यनिष्ठ एव न तु चिन्निष्ठः चितः स्वप्र
काशत्वेनैव व्यवहार्यत्वात्तत्प्रतियोगिकस्याध्यस्तनिष्ठस्याध्यासिकतादात्म्यस्यैव विषयतात्वादिति भावः तथा च संवंधस्य भेदगर्भत्वादित्यत्र योगित्वमित्यनेनोक्तसंवं
धस्य केवलचिद्भेदव्याप्यविषयतारूपत्वादित्यर्थः आवरणाभिभवोपहितचिद्विषयत्वं योगित्वान्ते न विवक्षितमिति भावः अथवा योगित्वान्ते नोक्तसम्बन्धस्य भेदगर्भ
त्वात्केवलचिद्भेदव्याप्यत्वात्तथा च स्वावच्छिन्नावरणनाशोपहितचित्तादात्म्यं विवक्षितमन्यथा रूप्यादेरपि शुक्त्याद्यवच्छिन्नावरणाभिभवोपहितचित्तादात्म्येन फ
लव्याप्यतापत्तेरेवं च घटादेरावरणाभिभवावच्छेदकत्वेनोक्ततादात्म्येपि शुद्धब्रह्मणि तदभावेन तद्भेदव्याप्यमुक्ततादात्म्यमिति तस्य फलाव्याप्यत्वमिति भावः एव
मित्यादिग्रन्थे प्युक्त एव भावः नन्वपरोक्षव्यवहारस्य योग्यत्वमुक्तविषयतारूपं तदा वकुंशकं यद्युक्तव्यवहारः सुवचः स एव दुर्वचस्तत्राह नाप्यपरोक्षेत्यादि ॥ ॐ ॥

प्रामाणिकेति भ्रमाजन्येत्यर्थः व्यर्थविशेषणत्वेति घटादिवारकस्यावेद्यत्वविशेषणस्य व्यर्थत्वेत्यर्थः असंभवेति उक्तस्वप्रकाशत्वलक्षणस्यासंभवेत्यर्थः संगच्छत एवे
ति तथा च व्यवहर्त्तृनिवेशस्य निष्फलत्वादुक्तयोग्यतामात्रं निवेश्यमिति भावः व्याहतमिति ब्रह्मणीत्यादिः तदपरोक्षव्यवहारे ब्रह्मविषयके अपरोक्ष इति शब्दप्रयो
गे हेतुत्वाद्व्यवहारविषयत्वेनापेक्षितत्वात् पटो परोक्ष इत्यादौ पटादाविव ब्रह्मापरोक्षमित्यादावपि ब्रह्मणि स्फुरणतादात्म्यं विषयत्वेनापेक्षितमिति भावः जनक
त्वे विषयत्वे स्वस्मिन् व्यवहारजनकत्वं स्फुरणमपरोक्षमिति व्यवहारविषयत्वं स्वभावभेदात् घटोपरोक्ष इत्यादौ स्फुरणतादात्म्यं चिदपरोक्षेत्यत्रापरोक्षविद्यक्तिमा।

एतेन कस्त्वापमपरोक्षव्यवहारो नामापरोक्षज्ञानजन्यो वाऽ परोक्षवस्तुविषयो वा अपरोक्ष इत्याकारो वा नाद्यः धर्मादावप्यपरोक्षयोगिज्ञानानुव्यव
सायव्याप्तिज्ञानजन्यव्यवहारसत्त्वेनातिव्याप्तेः न द्वितीयः वस्तुन आपरोक्ष्यमपरोक्षज्ञानविषयत्वं चेत् आत्मनोपि घटादिवद्वेद्यत्वापातात् अ
परोक्षव्यवहारविषयत्वं चेत् वस्तुव्यवहारयोरापरोक्ष्येऽन्योन्यसापेक्ष्यतयाऽन्योन्याश्रयात् न तृतीयः निराकारशुद्धब्रह्मविषयस्याखंडार्थनिष्ठ
वेदांतव्यवहारस्यापरोक्ष इत्याकारायोगादिति निरस्तम् व्यवहारपदेनाभिवदनस्य विवक्षितत्वेन चरमवृत्तेस्तदनाकारत्वेपि क्षत्यभावात् न चानु
पलब्धिगम्यतयाऽवेद्येऽभावेऽपरोक्ष इति लोकव्यवहारसत्त्वेनाऽतिव्याप्तिः प्रामाणिकव्यवहारस्य विवक्षितत्वात् नन्वपरोक्षव्यवहारयोग्यत्वं
न तावत्सर्वान्प्रति चैत्रज्ञाने मैत्रस्य तदभावात् नापि ज्ञानं प्रति तस्याऽव्यवहर्त्तृत्वात् नापि ज्ञानाश्रयं प्रति ज्ञानस्य चित्तोनाश्रितत्वादिति चेत् न प्रमा
तारं यं कंचित्प्र त्येवापरोक्षव्यवहारयोग्यत्वं विवक्षितं प्रमाता चाहमर्थ एव सर्वसंमतः यत्तूक्तं चैत्रस्य ज्ञाने मैत्रस्याव्यवहार इति तस्य चैत्रज्ञान
निमित्तको मैत्रस्याव्यवहार इति वार्थः चैत्रज्ञानविषयको मैत्रस्याव्यवहार इति वार्थ आद्ये चैत्रज्ञानेन मैत्रस्याव्यवहारेपि स्वज्ञानेनैव घटे ब्रह्मणि
चापरोक्षव्यवहारसंभवेन व्यर्थविशेषणत्वासंभवयोरभावात् द्वितीये चैत्रज्ञानेताद्दग्व्यवहाराभावेपि क्षत्यभावात् अस्माकमपि हि चितिरेव स्वप्रका
शा न तु चैत्रज्ञानत्वेन व्यपदिश्यमानवृत्त्युपहितचिदपि वृत्तेरस्वप्रकाशत्वात् एवं च सर्वप्रमातृन्प्रति ताद्दग्व्यवहारविषयतायोग्यत्वमपि संगच्छत एव
नन्वेवं वेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वं तद्योग्यत्वं च व्याहतं तदपरोक्षव्यवहारे तद्विषयकस्फुरणस्य हेतुत्वादिति चेत् न अन्यत्र तद्विषयस्य तद्व्यव।
हारजनकत्वेपि स्फुरणस्य स्वाविषयस्य स्वस्मिन्व्यवहारजनकत्वं स्वभावभेदात् न च घटादावपि तथैवास्तु तेषामस्फुरणरूपत्वेन तद्विषयत्वं विना नियाम

त्रं विषय इति विषयभेदस्य व्यवहारे स्वीकारात् साक्षादपरोक्षाद्ब्रह्मेति श्रुत्या स्फुरणतादात्म्याघटितस्यापरोक्षत्वस्य ब्रह्मण्युक्तत्वादिति भावः नियामकांतराभावात् तद्व्यवहारस्य
विषयान्तराभावात् चैतन्यमपरोक्षमिति व्यवहारस्याखण्डचिन्मात्रविषयकत्वमेव पदयोः सामानाधिकरण्यविशेषात् तत्रद्वारीभूतोपि बोधः चैतन्ये स्फुरणत्वप्रकारकोन
तु स्फुरणविषयत्वप्रकारकः घटो परोक्ष इत्यादेर्व्यवहारस्याप्युक्तहेतोरखंडार्थत्वेपि तत्र द्वारीभूतधीर्घटादौ स्फुरणत्वप्रकारत्वासंभवेन स्फुरणविषयत्वप्रकारिकैवेति भावः।

ननुतथापिचित्तःस्वविषयत्वमावश्यकमन्यथातदाकारवृत्त्यभावकालेतद्व्यवहारासंभवात् तार्किकादिभिर्ज्ञानव्यवहारंप्रतिज्ञानज्ञानत्वेनहेतुत्वस्वीकारादत एवतै रनुव्यवसायःस्वीक्रियतेतत्राह तार्किकेति। कल्पनात् कल्पनोचित्यात् तथाचानुव्यवसायस्वीकारो व्यर्थोव्यवसायस्यस्वप्रकाशत्वसंभवात् अतएवप्राभाकरै स्तथैवोच्यतेनहिव्यवहारकारणांतरेसतिज्ञानसत्वेज्ञानव्यवहारोविलंबतेइतिभावः विषयभेदेनज्ञानव्यवहारयोर्नकार्यकारणभावोयेनोक्तगौरवंकिन्तुविष यतयाव्यवहारेविषयतयाज्ञानत्वेनहेतुताइत्याशयेनशंकतेनन्वनवस्थेतित्यागोपपत्तेरितिमन्मतेपिविषयतयाव्यवहारेअसत्वापादकाज्ञानानिरूपकत्वस्यतद्व्य क्तित्वेनविशेषणतासंबंधेनहेतुत्वसंभवात् पूर्णानंदरूपस्योक्ताज्ञाननिरूपकत्वेपिचिद्रूपस्यतदनिरूपकत्वेनतत्रेदानींव्यवहारसम्भवात् चित्तःचिद्विषयत्वा

तार्किककल्पितस्यानुव्यवसायस्यापि घटज्ञानज्ञानत्वापेक्षयालघुना घटज्ञानव्यवहारहेतुत्वकल्पनाच्च नन्वनवस्थाभियास्फुरणान्तरान ङ्गीकारात्तस्यैवस्वविषयत्वमस्तु अन्यत्ररूपस्यतद्विषयत्वस्यनियामकस्यत्यक्तुमयुक्तत्वात् अन्यथाप्रमेयत्वस्यस्ववृत्तित्वंविनैवस्वत एवप्रमेयमितिव्यवहारजनकत्वोपपत्त्याकेवलान्वयित्वभंगप्रसंगइतिचेत् नानवस्थयास्फुरणान्तरत्यागवदभेदेभेदनियतस्यविषयवि षयिभावस्यायुक्ततयात्यागोपपत्तेः प्रमेयत्वादौकेवलान्वयित्वभंगस्येष्टत्वाच्च नचैवंगतिरपिग्रामेइवस्वस्मिन्नपिस्वकार्यं —— करोत्विति वाच्यम् भेदाविशेषात्तन्तुरिवमृदपिपटंकरोत्वित्यस्याप्यापत्तेः स्वभावभेदेनपरिहारश्चसर्वत्रसमानः यद्वाचिदविषयस्वरूपत्वमेवस्वा प्रकाशत्वंचिदन्यस्यसर्वस्यचिद्विषयत्वात् तुच्छस्यनिःस्वरूपत्वेननातिव्याप्तिशंकानाप्यसंभवः स्वात्मनिवृत्तिविरोधेन छिदायाअ च्छेद्यत्ववत्स्वस्यस्ववेद्यत्वायोगात् नचैवंमिथ्यात्वानुमितेरप्यस्वविषयत्वापत्तिरितिवाच्यम् स्वपरसाधारणस्यैकस्यविषयतानिया मकस्यतत्रसत्त्वेनविशेषात् अतएवच्छिदादौपरशुसंयोगोनस्वपरसाधारणइतिस्वस्मिन् वृत्तिविरोधः तथाप्रकृतेनचतर्हिच्छिदा कार्यस्यच्छिदायामिवचिज्जन्यव्यवहारस्यचित्यनापत्तिरितिवाच्यम् फलदर्शनस्यैवच्छिदापेक्षयास्वभावभेदनियामकत्वात् ॥ ॐ ॥

भावेसतिविरहादितिभावः निःस्वरूपत्वेनसत्त्वेनप्रतीत्यर्हतारूपशून्यत्वेनतथाचस्वरूपपदंसत्त्वेनप्रतीत्यर्हार्थकमितिभावः यथाश्रुतेतुच्छस्यतुच्छमेवस्वरूपमित्य संगतिः स्वात्मनिस्वस्वरूपेवृत्तिविरोधेनस्वप्रतियोगिकसंबंधविरहेणएकस्येतिब्रह्मज्ञानान्याबाध्यत्वेसतितुच्छब्रह्मान्यत्वस्येतिशेषः तथाचैकरूपेणसंबंध प्रतियोगित्वानुयोगित्वयोरभावेप्युक्तरूपेणविषयतासंबन्धेनुयोगित्वंमिथ्यात्वानुमितित्वेनचप्रतियोगित्वमव्याहतमितिभावः छिदादौछिदांच्छिनत्ती त्यादौपरशुसंयोगोच्छिदाकर्मत्वंस्वपरसाधारणः छिदात्वान्यरूपेणस्वस्मिन् छिदायांवृत्तिविरोधः छिदांप्रत्यकर्मत्वंफलदर्शनस्येतिच्छिदायांतत्कार्यप्रत्यक्षा दिकंस्यादेवंद्वैधीभावादिकार्यंतुनतत्रभवतिनहिसर्वंचित्कार्यंचितिभवतिचिज्जन्यस्यघटादिव्यवहारस्यचित्यभावात्तस्मात्फलदर्शनमेवनियामकमितिभावः ॥ ॐ ॥

CC-0. In Public Domain. Digitization by eGangotri

स्वव्यवहारेत्यादि स्वव्यवहारे स्वान्यसंविदपेक्षं यत्तदन्यत्वमित्यर्थः ननु स्वातिरिक्तसंविदपेक्षत्वं चित्यपि वर्तते व्यवहारमात्रे सत्त्वापादकाज्ञानाभावव्यक्तित्वेन हेतुत्वात् तदुपहितस्य चिद्रूपत्वेपि शुद्धचिदन्यत्वादत आह स्वावच्छिन्नेति स्वविषयकेत्यर्थः तथा चोक्तोपहितचित्तः शुद्धचिद्विषयकत्वात् लक्षणं शुद्धचित्यक्षतमिति भावः उपपत्त्या उक्तप्रथमलक्षणोपपत्त्या स्वाभिमतेति अवेद्यनिष्ठेत्यर्थः स्वरूपत्वस्य उक्तानधिकरणत्वोपलक्षितस्वरूपस्य इत्थं चोक्तयोग्यत्वोपलक्षितस्वरूपस्यापि लक्षणत्वं संभवतीति ध्येयं। तर्कैरित्यादि स्वप्रकाशत्वलक्षणम्॥ ११॥ प्रमाणाभावः स्वप्रकाशत्वे मानाभावः साध्याप्रसिद्धिरिति वेद्यत्वस्य ब्रह्मणि संदेहात् घटादौ च निश्चयात् तदभावस्यानिश्चयात् शुक्तिरूप्यादौ तु विशेष्यदलस्यानिश्चयात् उक्तात्यन्ताभावानधिकरणत्वरूपे विशेष्यदले वेद्यत्वाभावसमानाधिकरण्यं निश्चेतुमशक्यमिति भावः विशेष्यदलवत्त्वेन निश्चिते घटादौ वेद्यत्वनिश्चयेपि तस्य घटो वेद्यत्वाभावसमानाधिकरणो वा नित्यादिधीविरोधि

यद्वा स्वव्यवहारे स्वातिरिक्तसंविदनपेक्षत्वं स्वावच्छिन्नसंविदनपेक्षत्वं वा स्वप्रकाशत्वं न च स्ववेद्यत्वेप्युपपत्त्या स्वाभिमतस्वप्रकाशत्वासिद्धिः स्ववेद्यत्वस्य बाधितत्वेन तदाद्योपपत्त्यभावात् ननु स्वप्रकाशत्वधर्मस्य तात्त्विकत्वेऽद्वैतव्याघातः अतात्त्विकत्वेऽस्वप्रकाशत्वस्यैवतात्त्विकत्वापत्त्या तत्साधकानुमानादेर्बाध इति चेत् न स्वरूपत्वस्योक्तत्वात् न च परेषामिष्टवेद्यत्वविरोधि स्वरूपस्य परैरनङ्गीकारात् स्वप्रकाशलक्षणोपपत्तिः॥ ११॥ न च प्रमाणाभावः अनुभूतित्वहेतोर्व्यतिरेकिण एव प्रमाणत्वात् नन्वत्र साध्याप्रसिद्धिः न च वेद्यत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगिधर्मत्वादित्यनुमानेन सामान्यतः प्रसिद्धिरिति वाच्यम् अवेद्यत्वप्रसिद्धावपि विशिष्टसाध्याप्रसिद्धेस्तदवस्थत्वात् न चानुभूतित्वेनापि तावदेव साध्यं वेद्यत्वस्य वृत्तिव्याप्यत्वरूपत्वे तदभावस्य चरमवृत्तिव्याप्यानुभूतौ बाधात् फलव्याप्यत्वरूपत्वे तु तदभावस्य मम घटादौ तव धर्मादौ शुक्तिरूप्यादौ च पक्षभिन्ने प्रसिद्धत्वेनासाधारणानैकान्तिकतापत्तेः अस्वप्रकाशत्वरूपत्वे प्रतियोग्यप्रसिद्ध्याऽप्रसिद्धिरेव॥

ऽ त्वेपि उक्तात्यन्ताभावानधिकरणत्वमवेद्यत्वसमानाधिकरणमिति निश्चयाविरोधित्वादुक्तनिश्चयसंभवेन स्वप्रकाशत्वव्यतिरेकव्याप्तिनिश्चये बाधकाभावात् नहि उक्तात्यंताभावानधिकरणत्वमवेद्यत्वासमानाधिकरणमिति निश्चयोस्ति घटाद्यवच्छेदेन तत्सत्त्वेपि ब्रह्मावच्छेदेन तदसत्त्वात् ब्रह्मावच्छेदेन सामानाधिकरण्यनिश्चयसंभवात् न च ब्रह्मण्यवेद्यत्वसंशये ब्रह्मावच्छेदेनोक्तसामानाधिकरण्यस्यापि संदिग्धत्वेन निश्चयासंभव इति वाच्यं तावतापि अवच्छेदकविशेषानंतर्भावेन निश्चये बाधकाभावात् शब्दादिनोक्तसामानाधिकरण्यस्य ब्रह्मावच्छेदेनापि निश्चयसंभवात् प्रत्यक्ष एव ग्राह्यसंशयप्रतिबन्धकत्वस्य प्राचीनसम्मतत्वादिति तु विभावनीयं विशिष्टसाध्येति किंचिन्निष्ठाभावप्रतियोगित्वनिश्चयेपि विशेष्यदलाधिकरणे ब्रह्मणि घटादौ वा वेद्यत्वस्याभावानिश्चयात् विशेष्ये विशेषणसामानाधिकरण्यं न निश्चितमिति भावः प्रसिद्धत्वेन निश्चितत्वेन असाधारणानैकांतिकतेति निश्चितसाध्यवद्व्यावृत्तत्वरूपासाधारण्यात्मकानैकांतिकते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैव यतो व्यावर्त्तते तदवच्छेदेन व्यभिचारः धर्मत्वहेतावत्यन्ताभावप्रतियोगित्वव्यभिचारः अत्र अत्यन्ताभावप्रतियोगित्वावच्छेदेन व्यभिचारः धर्मत्वं हेतावुक्तव्यभिचारः। अनुभूतित्वहेतौ श्चिद्विषयत्वाभावरूपसाध्यवत्तेन निश्चिताद्व्यावृत्तिरूपमसाधारण्यं नास्तीति सूचयति चिदन्यमात्रवृत्तीति व्यभिचार इति यन्निष्ठात्यंताभावप्रतियोगित्वन्तत्रेत्यादिः प्रतियोगिन्येवात्यंताभावेति प्रतियोगिनिष्ठात्यन्ताभावेत्यर्थः। प्रतियोगितयेति अत्यन्ताभावप्रतियोगित्वे इति शेषः। केवलान्वयित्वाभावात् अन्यन्ताभावप्रतियोगित्ववत्त्वात् तथा च प्रतियोगिविरोधिन एव साध्याभावस्य व्यभिचारघटकत्वादत्यंताभावप्रतियोगित्वेन समानाधिकरणस्तदभावो न व्यभिचारसंपादक इति भावः यत्तु अबाधितो यः स्वाश्रयनिष्ठात्यन्ताभावस्तत् प्रतियोगित्वस्य मिथ्यात्वरूपत्वाद्यत्राबाधितः स्वात्यन्ताभावस्तत्रात्यंताभावप्रतियोगि

किञ्चात्यन्ताभावप्रतियोगित्वं कुतश्चिद्व्यावर्त्तते चेत्तत्रैव व्यभिचारो न चेदत्र व्यभिचार इति चेन्न चिद्विषयस्वरूपत्वरूपं स्वप्रकाशत्वमनुभूतित्वेन यदा साध्यते तदा वेद्यत्वं चिद्विषयत्वमेव चिदन्यमात्रवृत्तिपक्षः अन्यन्ताभावप्रतियोगिस्वरूपत्वं साध्यं यथा च वृत्तिप्रतिफलितचिद्विषयता घटादौ न ब्रह्मणीति तथोपपादितमिति नासाधारण्यबाधौ नाप्यत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावप्रतियोगित्वे व्यभिचारः अत्यंताभावप्रतियोगित्वस्य मिथ्यात्वेनात्यंताभावप्रतियोगिन्येवात्यंताभावप्रतियोगितया यन्निष्ठात्यंताभावप्रतियोगित्वं तस्य केवलान्वयित्वाभावात् न चैवं ब्रह्मणि चिद्विषयत्वेऽपि तदत्यन्ताभावोपपत्त्यार्थान्तरम् घटादावप्येवं साध्यसत्त्वे नासाधारण्यं चेति वाच्यम् चिद्विषयत्वविरोध्यत्यन्ताभावप्रतियोगिस्वरूपत्वस्य साध्यत्वान्नार्थान्तरासाधारण्ये घटादौ तयोः सहावस्थित्याऽविरोधात् ब्रह्मणि विरोधात् न च तर्हि विरोधित्वांशमादाय पुनरप्रसिद्धिः वेद्यत्वं विरोध्यत्यन्ताभावप्रतियोगि अत्यंताभावप्रतियोगित्वात् घटवदिति प्रसिद्धिसंभवात् यदा त्ववेद्यत्वे — सत्यपरोक्षव्यवहारयोग्यत्वरूपं स्वप्रकाशत्वं पूर्वानुमाने साध्यं तदा फलव्याप्यत्वरूपं वेद्यत्वं पक्षः अपरोक्षव्यवहारयोग्य किंचिन्निष्ठात्यन्ताभावप्रतियोगित्वं साध्यं तथा चापरोक्षव्यवहारयोग्यत्वसमानाधिकरणावेद्यत्वस्य सामान्यतः प्रसिद्धानाप्रसिद्धविशेषणत्वासाधारण्ये अत्यन्ताभावप्रतियोगित्वं किंचिन्निष्ठात्यंताभावप्रतियोगीत्यादिविकल्पनिबंधनदोषः परिहृत एव॥ ९९ तस्य बाधितत्वात् धर्मत्वहेतोस्तत्र व्यभिचारस्तदवस्थ इति रोदनं तन्मंदभाग्यात् अत्यंताभावप्रतियोगित्वस्य व्यवहारिकस्यैव धर्मत्वेनानुमेयतया तदाश्रये तद्विरोधिनस्तदत्यन्ताभावस्यास्वीकरेणाव्यभिचारात् साध्यत्वात् चिद्विषयत्वे साध्यत्वात् पुनरिति चिद्विषयत्वानधिकरणवृत्तित्वरूपोक्तविरोधित्वस्य निश्चयासंभव इति भावः विरोध्यत्यन्ताभावप्रतियोगीति प्रतियोगित्वं स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वं चेत्तुभयसंबन्धेनात्यन्ताभाववदित्यर्थः एतेन कस्य चिद्विरोधित्वनिवेशे उद्देश्यासिद्धिः स्वविरोधित्वनिवेशे स्वत्वाननुगमः चिद्विषयत्वविरोधित्वनिवेशे प्रसिद्धिरित्यादि परास्तं प्रतियोगीत्यादीति प्रतियोगिनवा आद्ये यन्निष्ठाभावप्रतियोगितत्र द्वितीये उक्तप्रतियोगित्वे व्यभिचार इत्यर्थः ॥ ❁ ॥ ❁ ॥ ❁ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेनवेद्यत्वेत्यन्ताभावप्रतियोगित्वानुमानेनवेद्यत्वानधिकरणादिप्रसिद्धिसंभवेन। एतद्घटान्यत्वेसतीत्यादि। एतद्घटान्यत्वसमानाधिकरणंयद्वेद्यत्वंतदनधिक
करणादन्यइत्यर्थः पटादौहृष्टांतेपक्षस्वरूपादुक्तानधिकरणाद्भेदमादायसाध्यप्रसिद्धिः पक्षेतुसाध्यस्यपर्यवसानंनपक्षाद्भेदमादायवाधात्॰ नापिपटादेर्भेद
मादायतस्योक्तानधिकरणरूपत्वाभावान्नाप्यतीन्द्रियाद्भेदमादाय अपरोक्षप्रमाणवृत्तिविषयत्वसमानाधिकरणस्योक्तानधिकरणत्वस्यसाध्येनिवेश्यत्वेनवक्ष्य
माणत्वात् किन्तुब्रह्मस्वरूपादुक्तानधिकरणाद्भेदमादायतद्घटान्यस्यब्रह्मणश्चोक्तानधिकरणत्वंवेद्यत्वानधिकरणत्वादेवेति तत्रानुमानपर्यवसानंनचोक्ता
नधिकरणत्वेनभेदोनसाध्यःपक्षस्याप्युक्तानधिकरणत्वेनवाधात् उक्तानधिकरणप्रतियोगिकभेदस्तुउक्तानधिकरणकुड्योभयत्वादिनाभेदरूपोपीतिनब्रह्म
वेद्यत्वपर्यवसानमितिवाच्यंतत्पर्यवसानार्थैवस्वप्रतियोग्यवृत्तिभेदस्यसाध्यत्वादितिभावः पदार्थत्वात् पदजन्यधीविषयत्वात् विषयत्वादितियावत् तस्यउक्तान
धिकरणत्वस्य अत्रसत्त्वंतानुक्तौपरेणवेद्यत्वानधिकरणाप्रसिद्धिरुद्भाव्येत्यतस्तदुक्तंउक्तसाध्यानधिकरणत्वसाध्यकानुमानमाशंक्यनिषेधतिनचेत्यादि। पदार्थत्वा

एतेनायंघटः एतद्घटान्यत्वेसतिवेद्यत्वानधिकरणान्यःपदार्थत्वादित्यादिमहाविद्ययापिसाध्यप्रसिद्धिः नचवेद्यत्वानिरुक्तिःचिदविषयत्वमात्र।
स्यस्वप्रकाशत्वरूपत्वेचिद्विषयत्वस्यैववेद्यत्वरूपत्वात्प्रथमपक्षेतुफलव्याप्यत्वमेववेद्यत्वं नचतद्यतीन्द्रियान्यत्वेनार्थान्तरंसिद्धसा
धनंवा अपरोक्षव्यवहारविषयत्वसमानाधिकरणस्यैवतस्यविवक्षितत्वात् नचायंघटएतद्घटान्यत्वेसतिवेद्यत्वानधिकरणान्यत्वानधि
करणंपदार्थत्वादितिप्रकरणसमतासुत्यादिरूपानुकूलतर्कसद्भावेनस्थापनाया अधिकवलत्वात् प्रतिपक्षनिवन्धनसाध्यसंदेहेपिसं
शयरूपसाध्यप्रसिद्धेरनिवारणाच्च॥ १२ त् एतत् घटत्वात् तथाचव्यतिरेकीहेतुर्यथाश्रुते पटादौव्यभिचारात् एतद्घटत्वसमानाधिकरण
त्वेनवान्यत्वान्तंविशेषणीयन्तेनयथाश्रुतेपिनव्यभिचारः अप्रसिद्धप्रतियोगिकस्याप्यभावस्यपरैःस्वीकारादेतद्घटत्वविशिष्टस्यान्यत्वेतस्याप्रसिद्धावपिनक्ष
तिः नचपूर्वानुमानंप्रतिविशिष्टाभावसाध्यकानुमानेनसत्प्रतिपक्षइतिवाच्यमेतत् घटत्वरूपविशेषणवतिविशिष्टाभावज्ञानस्यविशेष्याभावविषयकत्वादे
कविशेषवाधेसामान्यधीजनकसामग्र्याविशेषांतरधर्मप्रकारकधीजनकत्वात् यत्तुएतद्घटत्वेसतीत्येवात्रपाठः नतुएतद्घटान्यत्वेसतीति तथाचसत्यंतं
वेद्यत्वविशेषणमितिनपटादौव्यभिचारइतितत् नशोभते एतद्घटान्यत्वविशिष्टवेद्यत्वानधिकरणत्वघटितसाध्यकपूर्वानुमानेएतद्घटत्वविशिष्टवेद्यत्वानधि
करणत्वघटितसाध्यकानुमानेनसत्प्रतिपक्षासंभवात् पूर्वानुमानसाध्यविरोधिसाध्यकानुमानस्यैवसत्प्रतिपक्षत्वात् अथनायंसत्प्रतिपक्षःकिन्तुपूर्वानुमानसमा
भासइतिचेन्नत्वदीयमूलेउक्तानुमानमुक्त्वाइतिप्रकरणसमत्वादित्युक्तेस्तस्मान्मौढ्यंस्वीयंसाधुप्रकटितंत्वयासंशयरूपेतिनचसंशयरूपप्रसिद्ध्याविशेषणतावच्छे
दकानिश्चयेनसाध्यतावच्छेदकविशिष्टवैशिष्ट्यवोधात्मकव्याप्तिज्ञानासंभवइतिवाच्यंविशेषणतावच्छेदकनिश्चयस्यविशिष्टवैशिष्ट्यधीहेतुत्वाभावस्योक्तत्वात् ॥॰॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानुपहि ३

असिद्धिः स्वप्रकाशत्वसाधकानुभूतित्वासिद्धिः अनुभूतेरेकव्यक्तिकत्वेन जातिमत्त्वासंभवात् कल्पितभेदेन व्यक्तिभेदेपि वृत्त्युपहितचित्येवानुभवत्वसत्त्वेन शुद्धेत
दभावादसिद्धिः शुद्धेपीति उपहितवृत्तेः शुद्धेपि वृत्तिरविरुद्धेतिभावः अनतिरिक्तार्थकत्वात् अनतिरिक्तकालकार्यकत्वात् अभावादिति उपहितचित्तोप्यात्मस्वरूप
स्वप्रकाशाभिन्नत्वेन तत्र न व्यभिचार इतिभावः तत्र परोक्षानुभवे चित्वरूपेति उपहितचिन्मात्रवृत्तीत्यर्थः यथाहि उक्तस्वरूपातकं लक्षणं ज्ञानविशेषविषयत्वा
दिरूपेण शुद्धान्यत्वात् शुद्धस्य लक्षणं तथोपहितेपि तत्तादात्म्यसत्त्वात्तस्यापि लक्षणं शुद्धोपहितभावेन तादात्म्यस्यैव प्रकृते लक्षणतावच्छेदकसंबंधत्वात्॥ व
स्तुतस्तु अनुभूतिपदजन्यधीविशेषविशेष्यत्वस्य अनुभवान्याविशेष्यकविशेष्यत्वपर्यवसितस्य हेतुत्वं भवतीति न कापि शंका व्यभिचारवारणाय विशेष्यकान्तं अ
नुभवत्वं च आत्मरूपत्वं विषयत्वमात्रं परमते आत्मत्वादावपीति विशेष्यत्वं हेतुः चिन्मात्रविषयकधीस्तु परस्य न प्रसिद्धेति तद्विषयत्वं न हेतुरिति बोध्यं श्रुत्यनुग्रहे

नाप्यसिद्धिः अनुभूतित्वजातेः कल्पितव्यक्तिभेदमादाय शुद्धेपि सत्त्वात् न च जातेर्द्धर्मिसमसत्ताकभेदवद्व्यक्तिसापेक्षत्वनियमः जात्यन्यूनसत्ता
कभेदवद्व्यक्तिसापेक्षतयैवातिप्रसङ्गनिरासे धर्मिसमसत्ताकभेदवद्व्यक्तिसापेक्षत्वस्य गौरवकरत्वात् समत्वस्यान्यूनानतिरिक्तार्थकत्वात् न चा
नुभाव्याभावेऽनुभूतितायोगः कदाचिदनुभाव्यसत्त्वेनैव तदुपपत्तेः अन्यथा आसीदित्यादिवाक्यजन्यज्ञानस्याननुभूतित्वापत्तेः न चानु
भूतित्वं विपक्षाद्व्यावृत्तमनुभूतिशब्दवाच्यानात्मनि सत्त्वादिति वाच्यं अनात्मन्यनुभूतिशब्दवाच्यत्वस्यैवाभावात् वृत्तौ ज्ञानपदस्येवानुभू
तिपदस्य गौणत्वात् अतएव परोक्षानुभवस्य पक्षत्वे बाधः अपरोक्षस्य पक्षत्वे तत्र व्यभिचार इति निरस्तम् चित्त्वरूपानुभूतित्वस्य विवक्षि
तत्वात् न चाप्रयोजकत्वम् श्रुत्यनुग्रहसत्त्वात् न चापरोक्षानुभवमप्यपरोक्षतो जानामीत्यात्मनो वेद्यत्वग्राहिणा प्रत्यक्षेण मामहं जानामीति प्र
त्यक्षेण तदात्मानमेवावेदिति श्रुत्या च बाध इति वाच्यम् आद्यस्य साक्ष्यनुभवस्य वृत्तिरूपगौणानुभवविषयत्वात् न च जानामीति ज्ञप्तिविषयत्व
मेवानुभूयत इति वाच्यम् अहमर्थस्य ज्ञप्त्याश्रयत्वायोगेन ज्ञानपदस्य वृत्तौ गौणत्वात् दुःखं जानामीत्यादावपि दुःखाकाराविद्यावृत्तेरेव विवक्षितत्वा

तिन दृष्टेर्द्रष्टारं पश्येः येनेदं सर्वं विजानाति तं केन विजानीयादित्यादि श्रुत्यनुग्रहे इत्यर्थः। व्यवहारं प्रति न वृत्तिविषयत्वं प्रयोजकं विद्यमानसुखादौ तत्कल्पने गौरवात् नापि चि
द्विषयत्वं वृत्तिं विनापि घटादौ तदापत्तेः नापि असत्त्वापादकाज्ञानानिरूपकत्वे सति चिद्विषयत्वं विशेष्यवैयर्थ्यादिति चित्तः चिद्विषयत्वे वृत्तिसापेक्षव्यवहारकत्वे च मानाभावः तत्त्व
ज्ञाननाश्यतावच्छेदकं चिद्विषयत्वं चिदन्यत्वं तु चिद्विषयत्वान्नातिरिक्तं लाघवादित्यादि तर्का अपि बोध्याः जानामीतीति द्वितीयांत्त आत्मनो वेद्यत्वग्राहिणा मामहं जानामीत्या
कारकेण चकारः शेषः तथा चापरोक्षानुभवं जानामीत्यनेन मां जानामीत्यनेन च प्रत्यक्षेण श्रुत्या च बाधो न चेति वाक्यार्थः वृत्तेरेवेति सुखादौ वृत्त्यनंगीकारपक्षेपि न दोषः
असत्त्वापादकाज्ञानानिरूपकत्वाधिकरणत्वप्रयोजकचित्त एव जानात्यर्थत्वेन प्रतिकर्मव्यवस्थायामुक्तत्वेन सुखाद्यवच्छिन्नचिद्रूपेणोक्तप्रयोजकचित्तस्तेन रूपेण स्फूर्त्तित्वात्साक्षिविषयत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमर्थविषयत्वादहमर्थगोचरवृत्तिविषयकसाक्षिरूपत्वात् चैत्रापरोक्षव्यवहारयोग्यज्ञप्तेर्विषयत्वं साध्यं उक्तयोग्यतावच्छेदकं तु चैत्रं प्रत्यपरोक्षविषयत्व-मिति ज्ञापनाय परोक्षेत्युक्तं चैत्रं प्रत्यपरोक्षत्वं च चैत्रनिरूपिताज्ञानशून्यत्वं तथा च चैत्रीयाज्ञानशून्यज्ञप्तिविषयत्वमेव साध्यं पूर्वानुमाने तु अज्ञाननाशोपहितज्ञप्तिविषयत्वमिति भेदः यद्यपि ज्ञप्तिविषयत्वमात्रसाधनेनापि ज्ञप्तिरूपचिद्विषयत्वानुमाने सत्प्रतिपक्षता भवत्येव तथापि परमते नुभूतेर्नानात्वेन चैत्रीया-द्यपरोक्षज्ञप्तेर्विषयत्वेनैव साध्यपर्यवसानं किञ्च यद्यपरोक्षज्ञप्तिविषयो न स्यात्तदापरोक्षव्यवहारविषयो न स्यादिति तर्कस्यापरोक्षत्वान्तर्भावेनैवावतारः परमते अपरोक्षव्यवहारे परोक्षज्ञप्तिविषयत्वस्य प्रयोजकत्वादिति तदन्तर्भावेनैव साध्यमुक्तं। चैत्रीयानुभूतौ नोक्तज्ञप्तिविषयत्वं तदीयेन्द्रियसन्निकर्षानाश्रयत्वान्मनसो

द्वितीयस्य चाहमर्थविषयत्वात् तदनात्मत्वस्योक्तत्वात् श्रुतेश्चोपनिषज्जन्यवृत्तिरूपवित्तिविषयत्वावगाहितया चिद्विषयत्वस्य फलव्याप्यत्वस्य वाऽविषयीकरणात् नाप्यनुभूतिः स्फुरणाविषयः अपरोक्षव्यवहारविषयत्वात् घटवच्चैत्रीयानुभूतिः चैत्रापरोक्षव्यवहारयोग्याऽपरोक्षज्ञप्तिविषयः चैत्रापरोक्षव्यवहारविषयत्वात् घटवत् चैत्रीयाभूतिः चैत्रापरोक्षव्यवहारयोग्यापरोक्षज्ञप्त्यऽविषयो नावतिष्ठते चैत्रं प्रत्यप्रकाशमानत्वरहितत्वात् चैत्रेच्छावदिति सत्प्रतिपक्षत्वम् स्फुरणप्रयुक्तव्यवहारशालित्वरूपस्य विषयत्वस्य मयाप्यङ्गीकारेणासिद्धसाधनात्तदन्यस्य स्वस्मिन्वृत्तिविरोधेन वाधात् जडत्वस्योपाधित्वाच्च परवेद्यत्वेऽनवस्थानात् स्ववेद्यत्वस्य विरुद्धत्वात् ननु स्वस्मिन्स्ववेद्यत्वं कथं विरुद्धं न तावत्स्वजनकेन्द्रियासन्निकृष्टत्वात् स्वाजनकत्वाद्वा नित्यचिद्विषयत्वस्य तद्द्वयं विनैव घटादौ सत्त्वात् नापि विषयविषयिभावसंबंधस्य द्विष्ठत्वात् अतीतारोपितात्यंतासतां ज्ञानदर्शनेन तस्योभयानिष्ठत्वात् नापि क्रियाकर्मत्वयोर्विरोधात् कृत्यादिविशेषस्य कार्यत्वादिदर्शनात् नापि विषयिणो विषयत्वे कर्तुः कर्मत्वापातः मिथ्यात्वानुमित्यादेर्विषयिण्या एव विषयत्वदर्शनात् मामहं जानामीत्यनुभवदर्शनेन च तद्वात्मानमेवावेदिति श्रुत्या च कर्तुः कर्मत्वाविरोधात् एवं च न परसमवेतक्रियाफलशालित्वं कर्मत्वं किं तु क्रियाविषयत्वादिकं तच्चाभेदेप्युपपाद्यमिति चेत् मैवम् ॥ ॐ ॥

निन्द्रियत्वादित्याशंक्य नित्यस्य साक्षिण एवस्वस्वेतरविषयकत्वसंभवान्मैवमित्याशयेनाह चैत्रेत्यादिना अवतिष्ठत इति तथा चानुभूतिसत्ताकाले सर्वदा तत्रापरोक्षज्ञप्तिविषयत्वात् सा नेन्द्रियसन्निकर्षजन्येति भावः जडत्वस्येति वाधोन्नीतत्वस्योक्तत्वेन पक्षेतरत्वरूपत्वेपि न क्षतिः स्वाजनकत्वात् स्वं प्रति विषयविधयाजनकत्वासंभवात् संबंधस्य संबंधसामान्यस्य आरोपितात्यंतासत्तामिति यद्यपि मन्मते आरोपितं विद्यमानमेव तथापि परमते तस्यात्यंतासत्त्वात् परस्य प्रकृते तदुक्तिर्नासंगता न चात्यंतासतः पृथगुक्तिः तथाप्यसंगतेति वाच्यं, सविकल्परूपद्विविधज्ञानविषयत्वप्रदर्शनार्थं तयोक्तत्वात्तथा चज्ञानकालावच्छेदेन तद्विषयत्वस्य तत्रासंभवः नहि तदसंबंधः काल स्तदवच्छेदको नापि तत्कालानवच्छिन्नं तद्विषयत्वं तत्र संभवति सार्वदिकत्वापत्तेरिति भावः ॥ ॐ ॥ ॐ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेदनियततयेति अन्यथातद्व्यक्तिःसंयोगादिसंबंधेनस्वविशिष्टेत्यपिप्रमास्यात् तद्व्यक्तिनिष्ठयासंयोगादिप्रतियोगितयानिरूपितमनुयोगित्वंनतद्व्यक्ताविति
तितुविषयत्वेपितुल्यमितिभावःस्वात्मानंस्वमात्रंस्वविषयत्वेस्वमात्रविषयकत्वेसुखप्रयोजककृतित्वादिनाकृत्युद्देश्यतादिस्थलेतुस्वभिन्नसाधारणधर्माव
च्छिन्नकृत्यादेर्विषयत्वंस्वस्मिन्नविरुद्धंनहितत्रविषयतायाःप्रतियोगित्वमुक्तकृतित्वादिनाकिन्तुतत्तत्कृतित्वादिनातथाचभिन्नधर्मावच्छिन्नयोर्भेदेनसंबंधप्र
तियोगित्वानुयोगित्वयोर्नासंभवःएतेनसुखप्रयोजककृत्युद्देशेनदेवताराधनादौयाकृतिस्तस्याःसुखहेतुत्वेमानाभावेपिसुखप्रयोजकत्वात्स्वयमपिविषयःएवं
सदिच्छाभवेदितीच्छायायत्नादौचेच्छैवस्वयमपिविषयइत्यादिपरास्तंननुचितोप्यावरणाभावाद्युपहितचितोभेदात्तद्विषयत्वमास्तांतथाचचिद्विषयत्वानुमानंप्रत्यु
पहितचिद्विषयत्वानुमानेनसत्प्रतिपक्षतेतिचेन्नअधिष्ठानीभूतशुद्धचित्प्रतियोगिकस्याध्यस्तानुयोगिकस्यतादात्म्यस्यैवाध्यासिकसंबंधशब्दितस्याध्यस्तसामा
न्यभासकतानियामकत्वंपटादौत्वधिष्ठानस्यतादात्म्यमध्यस्तंनत्वधिष्ठानेपटादेरतएवसाक्षिणोपिघटाद्यधिष्ठानचिदैक्यापत्यातद्द्वाराभासकत्वमतएवतस्यैवविष

विषयविषयिभावस्यसंबंधत्वेनभेदनियततयास्वस्मिन्स्ववेद्यत्वस्यविरुद्धत्वात् नह्युक्तातीतादिस्थलेभेदोनास्तिअतएवकृतिःकृत्यंत
रंप्रतिइच्छाइच्छान्तरंप्रतिव्यवहृतिर्व्यवहृत्यन्तरंप्रतिअभिधाऽभिधान्तरंप्रत्येवविषयोनतुस्वात्मानंप्रतीतिनस्वविषयत्वेकिंचिदुदाह
रणमस्तिननुगत्यादौगत्यन्तराविषयत्वेपिवस्तूनांविचित्रस्वभावत्वात् कृत्यादौकृत्यंतरादिविषयत्ववदनुभूतेरपिस्वविषयत्वमस्तुअन्यथास्व
स्मिन्व्यवहारजनकत्वमपिनस्यात् व्याप्तिज्ञानानुमित्यादेःस्वाविषयत्वेसर्वोपसंहारवतीव्याप्तिरनुमितिमिथ्यात्वंचनस्यादितिचेन्नव्यवहारोपपाद
नार्थंस्वविषयत्वस्वभावकल्पनापेक्षयास्वाविषयत्वेपिस्वव्यवहारजनकस्वभावत्वमेवकल्प्यतांलाघवात्तावतैवतदुपपत्तेः॥)) यतात्वंतथाचोपहितचितो

ध्यस्तत्वेनतत्राध्यस्तंशुद्धचितातादात्म्यमुपहितचितोभासकतानियामकंनतुशुद्धचितःनचैतादृशनियमेमानाभावादुपहितनिष्ठंतादात्म्यमपिशुद्धभासकमास्तामितिवा
च्यंदृक्प्रतियोगिकःसंबंधोयदनुयोगिकस्तत् भासकइत्यस्यसर्वसम्मतत्वादतीतादावप्यध्यस्तसंबंधस्वीकारात्दृक्चमन्मतेशुद्धचिदेवनचोपहितनिष्ठंशुद्धस्यतादात्म्यंशु
द्धनिष्ठमितितत्सत्वेपिचिद्विषयत्वानुमानंनिष्प्रतिपक्षमित्याचार्यभावात् अतएवातीतादिज्ञानस्थलेपिअतीतादिविषयस्यसूक्ष्मरूपेणसत्त्वात्तन्निष्ठमेवचिद्विषयत्वंत
ज्ञासकतानियामकमत्यंतासतितुनचितोनवाविकल्पस्यविषयत्वंकिन्तुविकल्पस्यैवतदाकारत्वमित्युक्तंअतएवबौद्धाधिकारेमन्मतेस्थित्वोदयनाचार्यैरुक्तंपरमार्थतो
नानुभवस्यविषयेणसंबंधःसंवृत्यात्गगनस्येवगंधर्वनगरेस्त्येवसचयथानैयायिकैर्व्यवस्थाप्यतेतादृशोवेद्यनिष्ठस्त्वसावस्मिन्दर्शनेइतिविशेषःअविद्यैवहित
थातथाविवर्ततेयथानुभवीयतयाव्यवह्रियतइतितथातथाविवर्ततेअनुभवप्रतियोगिकसंबंधानुयोगितयाघटोज्ञायतेसाक्षात्क्रियतेइत्यादिव्यवह्रियतेतदत्रानुभवरू
पशुद्धचित्प्रतियोगिकंतादात्म्यंयन्निष्ठंतद्भासकतानियामकमितिस्पष्टमेवेतिध्येयंव्याप्तिज्ञानानुमित्यादेःयद्यदभिधेयंतन्मेयमित्यादिज्ञानस्यदृश्यंमिथ्येत्याद्यनुमितेःसोपसंहारवतीतिसर्वाभिधेयादिघटितेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं आवरणाभिभवोपहितचिद्भिन्नचित्सम्बन्धप्रयोजकचिद्रूपसाक्षात्कारक्रियाफल ५॥
अवच्छेदकैक्येति वस्तुत उक्तज्ञानादेः स्वाविषयकत्वेपि न क्षतिर्नहि व्याप्तिज्ञानस्य यावान् हेतुस्तद्धानेवा परोक्षो विषय इति नियमोस्ति तथा च स्वस्मिन् न संबं
ध इति सामान्यतो नियमेपि न दोषः न चैवं स्वाविषयकज्ञानस्य कथं सर्वाभिधेये व्याप्तिग्राहकत्वं सर्वदृश्ये मिथ्यात्वग्राहकत्वं चेति वाच्यं स्वाविषयकत्वेपि अभिधे
यत्वावच्छेदेन यत् किंचिदभिधेयं व्याप्तिविषयकतया दृश्यत्वावच्छेदेन यत् किंचित् दृश्ये मिथ्यात्वविषयकतया च उक्तव्याप्तिज्ञानरूपमभिधेयं न मेयव्याप्यं
मिथ्यानुमितिरूपं दृश्यं सत्यमिति धीविरोधित्वेनोक्तग्राहकत्वव्यवहारादिति ध्येयं क्रियाकर्मत्वविरोधात् क्रियास्वरूपकर्मत्वयोर्विरोधात् स्ववेद्यत्वं चिद्रूपसा
क्षात्कारफलव्याप्यत्वेन साक्षात्करोति धात्वर्थतावच्छेदकत्वेन वोक्तसंबंधस्यैव तादृशक्रियाकर्मतारूपत्वात्तदाश्रयत्वेनैव घटं साक्षात्करोमीत्यादौ घटादेः कर्मता।
व्यवहाराच्च तस्य च शुद्धचित्यभावात् भावे वा घटादिप्रत्यक्षस्यापि शुद्धचितं साक्षात्करोमि इत्यापत्तेः शुद्धचिति न तादृशफलव्याप्यत्वं ननु यथा मिथ्यात्वानुमित्या।
दिक्रियायां सकर्मकत्वं दृश्यत्वाद्युपहितरूपेण कर्मत्वेपि रूपान्तरेण क्रियात्वात् तथोक्तसंबंधप्रयोजकतावच्छेदकविशेषोपहितरूपेण क्रियात्वेपि शुद्धचिद्रूपेण
कर्मत्वमास्तां तत्राह मिथ्यात्वेति तथा चोपहितक्रियाया अनुपहितरूपेपि कर्मत्वं क्वापि न दृष्टं नहि संयोगजनकत्वोपहितस्य क्रियात्वेपि तदीयानुपहितरूपस्य तत्क

व्याप्त्यऽनुमित्यादेस्त्ववच्छेदकैक्याभावात्तथात्वमित्युक्तत्वाच्च एवं च क्रियाकर्मत्वविरोधादपि न स्वस्मिन्स्ववेद्यत्वं मिथ्यात्वानुमितेश्च न स्व
कर्मता परोक्षस्याकर्मत्वात् यत्तूक्तं कर्तुरेव कर्मत्वं तदयुक्तम् उदाहृतमिथ्यात्वानुमित्यादेरकर्मकत्वात् मामहं जानामीत्यादौ साक्षिणः कर्तृ
त्वादहमर्थस्य कर्मत्वात् तदात्मानमित्यादौ चाहमर्थस्य कर्तृत्वाच्चित्कर्म अभेदे तद्व्यादर्शनात् अतएव न भेदघटितकर्मलक्षणपरित्यागः क्रि
याविषयत्वं तु न कर्मत्वम् आसनादिक्रियाया अपि आधारादिविषयत्वेन सकर्मकतापत्तेः॥ मेत्वमस्तीति शुद्धचिद्रूपेणापिनोक्तकर्मत्वमिति।

कर्तुरनुपहित ३

भावः अकर्मत्वादिति विवेचितमिदं प्रति कर्मव्यवस्थायां। क्रियायाः कर्मताविरोधित्वं कर्मत्वानाश्रयत्वं कर्मत्वासामानाधिकरण्यं च परसमवेतक्रियाजन्यफलशा
लित्वं कर्मत्वमित्यनेन स्वभिन्नसमवेतक्रियाजन्यफलशालित्वस्यैव कर्मतात्वेनाभियुक्तैरुक्तत्वात्तथा च ज्ञप्तौ कर्तृत्वादपि चितो न कर्मत्वं न च साक्षिरूपेण कर्तृत्वेपि
शुद्धरूपेण कर्मत्वमिति वाच्यं शुद्धेपि कर्तृत्वाध्यासात् उपहितस्वरूपेपि कर्मत्वादर्शनादित्याशयेन परोक्तं ज्ञप्तौ कर्तुः कर्मत्वं दूषयितुमाह यत्तूक्तमिति अकर्मक।
त्वादिति कर्तुरित्यादिः यथाश्रुतेऽनुमित्यादेरकर्तृत्वादप्रसक्तप्रतिषेधः चित् कर्मेत्युपहितचित्कर्म यथाश्रुते शुद्धस्योक्तसंबंधरूपकर्मत्वासंभवः अथवा चित्क
र्म शुद्धचितं वेदान्तवाक्यजन्यवृत्तिविषयरूपं गौणं कर्म न तु ज्ञप्तिं प्रत्युक्तकर्मेति भावः भेदघटितेति स्वभिन्नसमवेतक्रियानिष्ठं यद्धातुवाच्यत्वं तदवच्छेदकं यत्तज्ज
न्यफलं तत् शालित्वरूपेत्यर्थः स्वपदं फलशालिपरं मध्यस्थं तत्पदं क्रियापरं ननु क्रियाजन्यफलशालित्वमेव कर्मत्वमस्तु तथा च कर्तुरपि ज्ञप्तिक्रियाजन्यसं।
स्कारादिमत्वेन कर्मत्वसंभवः तत्राह क्रियाविषयत्वमिति क्रियाजन्यफलवत्त्वमित्यर्थः आधारादिविषयत्वेन ॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आधारादिनिष्ठफलजनकत्वेन संयोगविशेषादिरूपासनादिक्रियाया आधारादिनिष्ठध्वंसादिजनकत्वमस्त्येवेति भावः मानानपेक्षसिद्धेः मानाप्रयुक्तव्यवहा
रकत्वस्य एवं प्रसंगः व्यवहारप्रसंगः नृशृंगादावस्तीति व्यवहार आपाद्यते नृशृंगादिशब्दप्रयोगमात्रमिच्छादिकं वा न द्वितीयः तत्रेष्टसाधनताज्ञानादिसामग्रीस
त्वेन तस्येष्टत्वात् न तृतीयः इष्टसाधनत्वादिज्ञानस्य नृशृंगादावभावात् इति मनसि कृत्वाद्यं निरस्यति तदसत्त्वव्यावृत्तिफलकेति तस्य च शृंगादेरसत्त्वव्यावृत्तिरस्तित्वं त
द्ग्राहकेत्यर्थः असति असत्त्वापादकाज्ञानाभावोपहितचित्त्वग्राहकप्रमाणं नास्तीति भावः नन्वेवं पूर्णानंदरूपमस्तीत्यपि व्यवहारो न स्यादुक्तचित्संबंधस्य घटादावभावेनो
क्तसम्बन्धोपहिताधिष्ठानचित्संबंधस्यैवास्तित्वरूपत्वेन तत्त्वया वाच्यत्वात् पूर्णानंदरूपे च तदभावात्तत्राह प्रकृते चेति पूर्णानंदरूपे चेत्यर्थः न तु चिद्रूप इत्यर्थः वृत्तिं वि
नापि चिदस्तीति व्यवहारेण वृत्तिविषयतेत्याद्यसंगतेः वृत्तिविषयतामात्रेण वेदांतवाक्यजन्यवृत्तिविषयतामात्रेण उक्तचिदेवोक्तव्यवहारविषयो न तु तत्सम्बन्धः अ

अथावेद्यत्वेऽवेद्यत्वसाधकप्रमाणवेद्यत्वावेद्यत्वाभ्यां व्याघातात् वेदान्तानां ब्रह्मणि प्रामाण्यायोगः ब्रह्मविचारविधिवैयर्थ्यम् ब्रह्माज्ञाननिवृत्त्ययो।
योग इत्यादिप्रतिकूलतर्कपराहतिरिति चेत् न चिद्विषयत्वं फलाव्याप्यत्वं वाऽवेद्यत्वं तस्य तत्साधकप्रमाणाजन्यवृत्तिवेद्यत्वेन व्याहत्यभावात्
वृत्तिविषयत्वमात्रेणैव वेदांतप्रामाण्यविचारविध्यज्ञाननिवृत्तीनां संभवाच्च एतेनाज्ञाननिवर्तकत्वमात्रेण वेदान्तप्रामाण्ये आत्मनोऽसिद्धिप्रसंग इति निरस्त
म् आत्मनः स्वतःसिद्धत्वात् ननु स्वत इत्यस्य स्वेनैवेत्यर्थे स्वविषयत्वापत्तिः प्रमाणं विनेत्यर्थे उपायान्तरस्यानुपन्यासेनासिद्ध्यापत्तिः अन्यथा नृशृंगादे
रपि सिद्ध्यापात इति चेत् न मानानपेक्षसिद्धेरेव स्वतःसिद्धिशब्दार्थत्वात् न च नृशृंगादेरेवं प्रसंगः तदसत्त्वव्यावृत्तिफलकप्रमाणाभावात् प्रकृते च वृ
त्तिविषयतामात्रेण तत्सत्त्वात् सिद्धिरूप आत्मनि सिद्ध इति व्यवहारस्य सिद्धिप्रयुक्तव्यवहारविषयतया गौणत्वात् न चैवं मुक्तौ वेद्याभावे वित्तित्वानुपप
त्तिः अनुभूतिन्यायस्यात्रापि सुलभत्वात् न च स्वाविषयत्वे —— स्वविषयकसंशयनिवर्तकत्वायोगः स्वमहिम्नैव स्वधर्मिणि व्यवहारवत्संशयादि
विरोधित्वोपपत्तेः न चाननुगमः तव विषयतायामिवाननुगतस्यैव नियामकत्वात् ॥ ९९

तत एव ब्रह्मास्तीत्यादौ लकारः साधुत्वार्थ इत्युक्तमिति भावः अथवा ननु।
चिद्रूपेऽपि कस्यचिन्नास्तित्वशंकासंभवादस्तित्वग्राहकप्रमाणवेद्यत्वं चिद्रूपे वाच्यं तथा च प्रमाणफलव्याप्यत्वदित्यत आह प्रकृते चेतिः चिद्रूपे चेत्यर्थः मात्रेणेत्यन्तेन फ
लविषयत्वव्यवच्छेदः न्यायस्य कदाचित् फलविषयकत्वेनोपपत्तेः स्वमहिम्ना अज्ञानाभावोपहितस्वमहिम्ना व्यवहारवत् अस्तित्वादिव्यवहारवत् संशयादीति।
अस्ति न वेत्यादिसंशये नास्त्येवेत्यादिनिश्चये चेत्यर्थः अस्तित्वादिव्यवहारे विषयतया प्रयोजकत्वमिव नास्तित्वादिविषयकसंशये विषयाभावसंपादकतया तादृशचित्प्रयो
जिका उक्तसंशयाद्यवज्ञानोपहितचित एव विषयत्वादिति भावः अननुगमः चितिरुक्ताज्ञानशून्यचित् तदन्यत्र तु तादृशचित्तादात्म्यमस्तीति व्यवहारे नास्तित्वादिसंश
याद्यनुत्पादे च उक्तरीत्या प्रयोजकमित्यननुगमः तव सर्वत्रोक्ततादात्म्यस्य तथा प्रयोजकत्वं वदतः विषयतायामुक्ततादात्म्ये यथा तदभावात्तत् स्वरूपमेव प्रयोजकमित्यन

CC-0. In Public Domain. Digitization by eGangotri

तथाचचितिचित्तादात्म्यमुक्त्वाप्यननुगमोनहातुंशक्यइतिभावः वस्तुतश्चिदस्तीत्यत्रघटोस्तीत्यादौवासत्त्वापादकाज्ञानानिरूपकत्वमेवानुगतोविषयः चिद्भातीत्यत्राज्ञानशून्यचित् घटोभातीत्यादौचतदवच्छेदकत्वंविषयः यत्तुचिदादिशब्दप्रयोगेचिदिच्छादौचचित्स्वरूपंकारणंघटादिशब्दप्रयोगेघटादीच्छादौचचित्तादात्म्यमितिकारणाननुगमः चितश्चिद्विषयत्वेतुविषयतासंबंधेनशब्दप्रयोगादौचित्तादात्म्यंहेतुरितितन्न चितश्चिद्विषयत्वेपि असत्त्वापादकाज्ञानानिरूपकत्वमनुगतंतद्धेतुरित्युक्तत्वात् इष्टसाधनताज्ञानादिनाशब्दप्रयोगोपपत्तौतत्रोक्तहेतुत्वाभावाच्चयदनुभूतत्वंघटवन्नवेत्यादौमनआदिकंस्फुरतिनवेत्यादौचसंशयादावुक्तयोः प्रतिबन्धकत्वाननुगमोदोषइतितन्न उक्तसंशयादेरप्यननुगतत्वादर्थसंशयत्वाख्यविषयिताविशेषसंबंधेनज्ञानत्वेनप्रतिबंध्यतातर्हितत्राप्युक्तानिरूपकत्वत्वेनप्रतिबंधकतासंभवात्। उद्भूतावयवभेदः समुदायिभिन्नत्वेनाज्ञातः समुदायोप्यभेदेनउपचरितः समुदायोज्ञानविशेषविषयः उपलक्षणस्यचैत्रत्वरूपेणोपलक्ष-

स्वकर्मत्वाभावेपिस्वनिर्वाहकतयास्वस्मिन्व्यवहाराद्युपपत्तेश्च नचस्वनिर्वाहकपदेननिर्वहणक्रियाकर्तृत्वकर्मत्वोक्त्याविरोधः स्वातिरिक्तनिर्वाहकानपेक्षत्वमात्रेणस्वनिर्वाहकत्वोपचारात् स्वयंदासास्तपस्विनइत्यादौस्वातिरिक्तदासाभावमात्रेणस्वदासत्वव्यपदेशवत् नचस्वनिर्वाहकाध्ययनविधिदीपप्रभादौस्वस्मिन्कार्यकरत्वंस्वविषयत्वेनव्याप्तमित्यत्रापितथेतिवाच्यं अध्ययनविधावेकावच्छेदकमात्रेणात्माश्रयानवकाशात् दीपप्रभादौस्वविषयत्वासिद्धेः तदुक्तंखंडने गाङ्कुटादिभ्यइत्यत्रबहुव्रीहिः स्वाविषयेकुटेपिसकार्यंकरोतितथेहापीति नचोद्भूतावयवभेदः समुदायः समासार्थइतिकैयटोक्तरीत्याकुटघटितसमुदायएवबहुव्रीहिविषयः सचवैयाकरणानांमीमांसकानांचशक्त्याऽन्येषांलक्षणयेत्यन्यदेतत् यथाचैत्रशालीयाआनीयन्तामित्यत्रोपलक्षणस्यापिचैत्रस्यस्वशालास्थस्यसतच्छब्दविषयत्वम् तथाकुटस्यापिपुटादिवदन्यपदार्थभूतसमुदायांतर्गतस्यबहुव्रीहिविषयत्वोपपत्तेः तथाचदृष्टान्तासिद्धिरितिवाच्यम् स्वाविषयइत्यस्यौत्सर्गिकविषयान्यपदार्थभिन्नइत्यर्थकत्वंतथाचस्वपदार्थसंबंधादन्यत्रैवस्वपदार्थेपियथातत्रफलम् तथास्वसंबंधादन्यत्रैवस्वस्मिन्नपिचित्फलमित्यत्रदृष्टांतपर्य-

णस्यतच्छब्दविषयत्वेहेतुमाह स्वशालास्थस्येति औत्सर्गिकेत्यादि औत्सर्गिकोयोबहुव्रीहिविषयोर्थस्तदन्यस्मात्पदार्थाद्भिन्नइत्यर्थकत्वमित्यर्थः विशिष्टान्वयस्यौत्सर्गिकत्वेनकुटघटितः समुदायऔत्सर्गिकस्तदन्यः पदार्थः कुटाद्यघटितः समुदाय अतद्गुणसंविज्ञानबहुव्रीहिपदलभ्यत्वज्ञापनायतस्यपदार्थत्वोक्तिस्तदन्यत्वंकुटस्यास्त्येवेतिभावः ननुतद्गुणसंविज्ञानत्वस्यैवमुख्यत्वाद्बहुव्रीहिविषयत्वंकुटस्यास्तीत्यतद्गुणसंविज्ञानलभ्यार्थभिन्नत्वकथनंव्यर्थमित्यत्राह स्वपदार्थेति बहुव्रीहिघटककुटपदार्थेत्यर्थः संबंधात् कुटज्ञानोत्तरपाठविशेषजन्यज्ञानविषयत्वात् अन्यत्रकुटादिपरप्रत्ययेस्वपदार्थेकुटपरप्रत्ययेतत्रगाङ्कुटादिभ्यइति सूत्रेफलंङित्वविधानंकुटज्ञानोत्तरोक्तज्ञानविषयत्वेनरूपेणकुटावृत्तिनाकुटस्याबोधेपिकुटत्वरूपेणकुटस्यविशेषणतयाबोधेनतदुत्तरप्रत्ययेपिङित्वविधानमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचकुटसाधारणेन एकज्ञानविषयत्वेन कुटस्यापि ग्रहणसंभवेन कुटव्यावृत्तोक्तरूपेणावबोधोक्तिरयुक्तेति वाच्यं अतद्गुणसंविज्ञानस्थले कुटव्यावृत्तरूपेणैवबोध
स्य वाच्यत्वात्तद्गुणसंविज्ञानस्थलेपि तद्दौचित्यात् नह्युक्तस्थलयोर्भिन्नरूपाभ्यामन्यपदार्थधीकृतो विशेषः किन्तु कुटस्योपलक्षणत्वविशेषणत्वकृत इति भावः यत्तु
आदिपदघटितो बहुव्रीहिस्तद्गुणसंविज्ञान एवेति तत्तुच्छं जक्षित्यादयः षडित्यादौ व्यभिचारात् एकज्ञानविषयत्वेन कुटसाधारणेनैव कुटस्य बोधेपि न दृष्टान्तासंग
तिरित्याशयेनाह स्वविषयेति समुदायप्रयोजकरूपेण समुदायान्तर्गतत्वस्वरूपेण यद्वा ननु कुटविशेषत समुदायनिवेशं न उक्तरीत्या कुटव्यावृत्त ———
रूपेण कुटादीनां कुटत्वरूपेण विशेषणत्वेन कुटस्य च बोधोस्तु किं कुटसाधारणरूपेण तत्राह स्वविषयव्यतिरेकेणेति बहुव्रीहिघटककुटपदार्थाघटितेनेत्यर्थः
समुदायिताप्रयोजकरूपेण कुटत्वेन तथा च ज्ञान ——— विशेषविषयत्वरूपसमुदायस्य तद्व्यक्तित्वेन लाघवेन निवेशात् कुटस्यापि विशेषणत्वेन तत् साधारणरू

स्वविषयव्यतिरेकेण समुदायप्रयोजकरूपेण विषयत्वेपि समुदायिताप्रयोजकरूपेण विषयत्वात्स्वाविषयत्वोक्तेर्वा नन्वेतावता स्वस्मादन्यव्यवहारजनने तद्विषयत्वं स्वस्मिन्स्वाभेद एवेति पर्यवसितोर्थः स चायुक्तः पश्चादन्यत्रैवायं नियम इत्यस्य सर्वत्रसुवचत्वात् स्वाभेदे सत्यपि स्वविषयद्वेषस्मिन्विषयत्वव्यतिरेकेण द्वेषइच्छाविरोधित्वस्याज्ञाने स्वावरकत्वस्य स्मृत्यादिरूपे परोक्षज्ञाने स्वव्यवहारजनकत्वस्य मैत्रचैतन्ये सुषुप्तौ चैत्रचैतन्येन पारमार्थिककाल्पनिकभेदयोराहित्येपि तद्व्यवहारजनकत्वस्यादर्शनाच्च आत्मानं जानामीत्यात्माभिन्नज्ञाने स्वविषयत्वानुभवाच्चेति न तर्हि द्वेषादौ स्वाभेदेपि स्वविषयत्वादर्शनात्प्रकृतेपि तथा न स्यात् अथ व्यवहाररूपफलदर्शनात् प्रकृत एव स्वाभेदस्यान्यत्रादृष्टमपि स्वविषयतानियामकत्वं कल्प्यत इति चेत् तर्हि व्यवहाररूपफलदर्शनादन्यत्रैव स्वाभेदस्य स्वकार्यजनकतानियामकत्वं न द्वेषादौ तथा फलादर्शनादिति समः समाधिः न चात्र गृहीततद्विषयत्वस्य तूष्णींत्यागे सर्वत्रैव संग इति वाच्यं तद्विषयत्वत्यागबीजस्य बाधककत्वस्य प्रागेवोक्तत्वात्सर्वत्र तस्याभावात् यत्तूक्तं मैत्रचैतन्य इत्यादि ॥

पेणावबोध आवश्यकः इति भावः अतद्गुणसंविज्ञानस्थले रूपान्तरेणावबोधे अ
नुभवविरोधेपि परोक्तिमनुसृत्येदमुक्तं एवं च यथा समुदायिताप्रयोजककुटत्वरूपेणाज्ञाने उक्तधीविषयत्वेन ज्ञानात् कुटे कार्यं तथा शुद्धचिद्रूपेणाज्ञानेपि प्रमातृत्वा
दिरूपेणाज्ञानात्प्रमात्रादाविव शुद्धं वित्तिव्यवहारादिर्न हि शुद्धमात्रे व्यवह्रियते किंतु विशिष्टचिद्व्यवहारे शुद्धं विषयः यदा तु अहं ब्रह्मेत्यादिः शुद्धमात्रव्यवहारः तदा त
द्विषयिणी वृत्तिरप्यस्तीति दृष्टान्तभावः स्वाभेदः प्रयोजक इति शेषः स्वाभेदे सत्यपीत्यादि विरोधित्वस्य अदर्शनादित्यग्रेणान्वयः एवमग्रेपि तथा च द्वेषादेः स्वविषये
यथेच्छाविरोधित्वादिकं न तथा स्वाभेदे सत्यपि स्वस्मिन्नित्यर्थः तत्र हेतुः विषयत्वव्यतिरेकेणेति स्वविशेषत्वव्यतिरेकेणेत्यर्थः तद्व्यवहारेति सुषुप्त चैत्रचैतन्यव्यव
हारेत्यर्थः मैत्रचैतन्य इत्यनुषज्यते ज्ञाने साक्षिणि जनकतानियामकत्वं जनकव्याप्यत्वं अज्ञानविशेषानिरूपकत्वादेरेव तत्तत्कार्यहेतुत्वेनोक्तत्वात् ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मैत्रचैतन्यइत्यस्यमैत्रेचैतन्येचैत्रचैतन्यव्यवहारजनकत्वापत्तेः अभावादसंभवात् त्वज्ज्ञानमित्यादिवेद्यत्वानधिकरणत्वस्यदृष्टान्तेऽभावात् सत्यंतंवेद्यत्वविशेषणं अवेद्यत्वानधिकरणत्वस्यदृष्टान्तेपरैरस्वीकारात् सत्यन्तमवेद्यत्वविशेषणमाह त्वदपरोक्षेत्यादि एवमग्रेपिसत्यंतंचिदविषयत्वेविशेषणं तर्कैरित्यादि अनुभूतेरवेद्यता॥१२॥ विमतंज्ञानंमामहंजानामिइत्याकारकंज्ञानं ज्ञानांतरवत् घटादिज्ञानवत्नस्वाश्रयविषयकमिति अत्रविषयत्वंसमवायान्यसंबंधेनाश्रयत्वं औष्ण्यादेरपिस्वदाह्यैकालिकादिसंबंधेनाश्रयत्वसत्वान्नसाध्यवैकल्पंस्वाश्रयविषयकान्यत्वसाध्यस्यजन्यसमवेतोष्णस्पर्शावृत्तित्वात्पराभ्युपगतपरमाणुसमवेतोष्णस्पर्शोदृष्टांतो

तन्नभेदकविरहकालेमैत्रचैतन्यइत्यस्यैवाभावात् साक्षिचैत्रन्येनव्यवहारापादनस्येष्टत्वात् यदिचसंस्कारात्मनावस्थितान्तःकरणंतदापिभेदकंतदाभेदस्यैवसत्वाच्चयत्तूक्तमात्मानमित्यादितदपिन अहमर्थाश्रितवृत्तिरूपज्ञानविषयत्वस्यैवतत्रानुभवात्न चघटःस्वप्रकाशोघटत्वादित्याभाससाम्यम प्रयोजकत्वपरिहारेणपरिहृतत्वात् घटेस्फुरणाभेदतद्विषयत्वयोरभावेव्यवहाराभावप्रसंगेनसाम्याभावाच्चनन्वनुभूतिपदेनवृत्तेःपक्षत्वेबाधःतदन्यस्याश्रयासिद्धिरितिचेत् नवृत्तेर्जडतयाऽप्रकाशकत्वेप्रकाशत्वंयत्रविश्राम्यतितस्यैवपक्षत्वात् प्रतिकर्मव्यवस्थायामेववृत्त्यतिरिक्तानुभवस्यसाधनाच्च एवंचत्वदीयापरोक्षव्यवहारयोग्यंतज्ज्ञानंत्वदीयापरोक्षव्यवहारयोग्यत्वेसतिवेद्यत्वानधिकरणंज्ञानत्वान्मदीयज्ञानवत् विवादपदानिज्ञानानिघटज्ञानान्यत्वेसतिवेद्यत्वानधिकरणानिज्ञानत्वात् घटज्ञानवदित्यपिसाधुनचत्वज्ज्ञानंत्वदपरोक्षव्यवहारयोग्यत्वेसत्यवेद्यत्वानधिकरणंज्ञानत्वान्मदीयज्ञानवत् पटज्ञानंघटज्ञानान्यत्वेसतिचिदविषयत्वानधिकरणंज्ञानत्वात् घटज्ञानवदितिचयथायोग्यं प्रकरणसमतेतिवाच्यम् विपक्षबाधकस्योक्तत्वेनस्थापनाया अधिकबलत्वात् अनुभूतेःस्वप्रकाशत्वोपपत्तिः॥१२॥ एवंचचिदभिन्नस्यात्मनोपिस्वप्रकाशत्वंचिद्रूपत्वात्साधनीयम् यथाचनात्मनिचिद्रूपत्वासिद्धिस्तथोपपादितमुपपादयिष्यतेचश्रुत्यानचविज्ञाताप्रज्ञातेतिश्रुतिविरोधःवक्ष्यमाणानेकश्रुतिविरोधेनतस्यावृत्तिरूपज्ञानाश्रयत्वपरत्वात् यत्तुविद्यासागरोक्तंविमतं ज्ञानंभिन्नाश्रयविषयकंज्ञानत्वात् ज्ञानान्तरवत्विमतंनस्वाश्रयविषयकंगुणत्वात् अग्नेरौष्ण्यादिवदितिस्वप्रकाशत्वसाधनतत्परीत्या अस्मन्मतेस्वप्रकाशेज्ञानत्वस्यात्मन्यभावात् तादृग्ज्ञानेगुणत्वाभावाच्च॥ २ बोध्यः आत्मसमवेतसंख्यादिदृष्टान्तलाभायादिपदं इत्थंचनित्यवृत्तिगुणत्वंहेतुरन्यथाजन्यसमवेतगुणोव्यभिचारात् परमाणुस्तुनदिगुपाधिःसर्वदेशगतत्वात् किन्तुजन्यमेवतेनदिक्कृतविशेषणत्तयोष्णस्पर्शाश्रयत्वरूपविषयत्वस्यपरमाणौसत्वेपिनसाध्यवैकल्पंयद्वास्वविषयत्वस्वदाह्यत्वान्यतरवत्त्वंविषयत्वं प्रकृतेग्राह्यंउष्णस्पर्शज्ञानान्यतरत्वंहेतुस्तेनगुणान्तरस्यदाह्याप्रसिद्धावपिनक्षतिःस्वप्रकाशेआत्मनीतियोजना ननुज्ञानाभिन्नस्वरूपत्वमेवहेतुस्तथाचवृत्त्यवच्छिन्नचिद्रूपज्ञानाभिन्नत्वेनशुद्धात्मनिनासिद्धिस्तत्राहतादृक्ज्ञानइतिशुद्धात्मनीत्यर्थःगुणत्वाभावात् पराभ्युपगतगुणत्वस्याभावात् तथाचप

औषपचिदन्यतरत्वहेतुत्वेपिसिद्धसाधानं शुद्धात्मनां आश्रयाप्रसिध्यास्वपदाग्राह्यत्वात् स्वाश्रयविषयकादन्यस्मात् भेदस्यतत्रसत्वात् परंप्रतिपक्षाप्रसिद्धिश्च अ
हमनहंवेतिधर्मितावच्छेदकविषयकत्वंविषयिताविशेषरूपसंशयत्वव्यापकंनेतिधर्मितावच्छेदकंनोक्तमिदंत्वादिकंवातद्बोध्यंविपर्ययव्यतिरेकनिर्णयौविभज
ते अन्यएवेतितथाचाहमर्थभेदनिर्णयोविपर्ययः अहंत्वात्यन्ताभावनिर्णयोव्यतिरेकनिर्णयइतिभावः चिदचिद्ग्रंथिरूपतयामिथस्तादात्म्यापन्नचिदचिद्रूपतया
स्फुरणार्थकत्वात् । प्रत्यक्षत्वार्थकत्वात् तमोनिवर्त्तकतयेतिउद्भूतानभिभूतरूपवन्महालोकत्वेन तमोनिवर्त्तकत्वाद्रूपस्यापितमोनिवृत्तिप्रयोजकत्वादित्यर्थः त
त्तद्विषयेतत् प्रयोज्यतमोनाशवत्त्वरूपतद्विषयताश्रयेतदवच्छेदेनतमोमध्येजातस्यवह्न्यादेः स्वोत्पत्तिद्वितीयक्षणेस्वसंसृष्टतमोनाशकत्वात् तद्रूपस्यापितद्वो

मामहंजानामीतिप्रत्यक्षस्यवृत्तिविषयतयोपपादितत्वेनविरोधाभावात् नचाज्ञानइवस्वाश्रयविषयत्वोपपत्त्याऽप्रयोजकत्वमितिवाच्यंवेद्य
त्वे आत्मनोवेदनाभावादज्ञानदशायामात्मनिसंशयविपर्ययव्यतिरेकनिर्णयप्रसंगात् नचात्मन्यहमनहंवेतिकश्चित्सन्दिग्धेऽन्यएवेतिवा
विपर्ययस्यतिनाहमितिवाव्यतिरेकंनिर्णयतीत्यस्वप्रकाशत्वेबाधकत्वात् नचत्वन्मतेसन्देहाद्यविषयस्याहमर्थस्यानात्मत्वात् तदन्यस्मिन्छ
ब्दैकगम्यात्मनिसंदेहादिसत्त्वादप्रयोजकत्वंतदवस्थमेवेतिवाच्यं अहमर्थस्यचिदचिद्ग्रंथिरूपतयाऽहंत्वावच्छेदेनाचिदंशेसन्देहाद्यभा
ववच्चिदंशेपिसन्देहाद्यभावात् नचशब्दजान्तःकरणविषयतद्वृत्तौव्यभिचारिज्ञानत्वमिति तस्यस्फुरणार्थकत्वात् नचद्वितीयहेतोस्तेजोरूप
स्यघटइवस्वाश्रयेपितमोनिवर्तकतयातद्विषयेव्यभिचारः रूपस्यज्ञानादिवत्स्वविषयत्वाभावात् अत्रायंपुरुषःस्वयंज्योतिरित्यादिश्रुतिरप्यत्र
प्रमाणंतथाहि अस्तमितआदित्येयाज्ञवल्क्येत्यादिनाकिंज्योतिरयंपुरुषइत्यन्तेनज्ञानसाधनालोकाद्यभावेजीवस्यकथंस्फुरणमित्युक्ते आ
त्मैवास्यज्योतिः ———— स्वयंज्योतिरित्यादिनास्वातिरिक्तानपेक्षतयास्वप्रकाशत्वमुक्तम् नचात्मशब्दस्यपरमात्मपरत्वंपूर्ववाक्ये आत्मनि
नाडीसंबंधप्रतिपादनादुत्तरवाक्येचकतमआत्मायोयंविज्ञानमयःप्राणेष्वित्यादिपर्यालोचनयासन्दंशन्यायेनजीवपरत्वात् ॥ ॐ ॥

ध्यंरूपस्यजन्यवृत्तिरूपस्यज्ञानादिवदित्यादिज्ञानेष्णास्पर्शादौसाध्यस्थितयेपादृशविषयत्वंनिवेशितंतदभावात्तदनिरूपकत्वादित्यर्थः अभावे। अभावव‌त्स्वप्न
कालेस्फुरणंस्वाप्नविषयभानंइत्युक्तेजनकेनैवंपृष्टेइत्यादिनेतियाज्ञवल्क्योक्तेन अत्रायंपुरुषःस्वयंज्योतिरित्यतेनेतिशेषः परमात्मपरत्वमितिस्वप्नेनशारीरम
भिप्रहत्यासुप्तःसुप्तानभिचाकशीतिशुक्रमादायपुनरेतिस्थानंहिरण्मयःपुरुषएकहंसइत्यादिश्रुत्याशारीरशब्दितजीवस्यकार्याक्षमत्वंस्वप्नेसंपाद्यपुनस्तेनसहपर
मात्मनःप्रबोधेआगंतत्वबोधनादितिशेषः पूर्ववाक्ये अथैतयोरेषास्मृतिःसंचरणीयेषाहृदयादूर्द्ध्वानाड्युच्चरतीत्यादिवाक्ये एतयोरिन्द्रत्वेनोक्तंतेजसस्यतत्पत्नीत्वेनोक्तान्यस्यचसं
चरणीस्मृतिःजाग्रत्स्वप्नयोःसंचारसाधनमार्गरूपाप्रतिपादनादितिकिंज्योतिरयंपुरुषइत्यादिवाक्येपि आत्मपदपर्य्यायेणपुरुषपदेनजीवस्यैवोक्तेरित्यपिबोध्यं। पर्यालोचनयेति॥

CC-0. In Public Domain. Digitization by eGangotri

आत्मशब्देन पूर्वोक्तस्यस्समानः सन्नुभौलोकावनुसंचरतीत्यादिनावस्थात्रयसंबंधमौपाधिकमनूद्यस यत् किंचित्तत्रपश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययमित्यादिना नत् शून्यतोक्तेर्जीवएवात्मशब्दार्थः यत्तुसंचरतीत्यस्यसंचारयतीति पश्यतीत्यस्यदर्शयतीति अर्थस्तथा च परमात्मासंचारयित्रत्वादिनानपापभागित्युक्तवाक्यार्थ इतितत्तुच्छंणिजध्याहारेमानाभावादीशस्यपापप्रसक्तेः तन्निषेधायोगाच्च एवं चस्वप्नेन शारीरमित्यादौ शारीरंशरीरमभिप्रहत्यनिश्चेष्टीकृत्यालुप्तचिद्रूपत्वेनासुप्तः सुप्ता नवासना परिणामसूक्ष्मविषयान् अभिचाकशीतिप्रकाशयति शुक्रमिन्द्रियगणमादायस्थानन्तत्तद्गोलकमेतीत्यर्थो जीवपरत्वेणुपपन्नईशपरत्वेएतीत्यस्य आगम यतीतिणिजध्याहारापत्तिश्चेतिबोध्यं अप्रसक्तेः द्युभ्वाद्यधिकरणत्वाप्रसक्तेः साधारण्यादितिक्षेत्रज्ञ आत्मपुरुषइत्यनेनजीवइव आत्मायत्नोधृतिर्बुद्धिःस्वभा वोब्रह्मवर्ष्म चेत्यनेनब्रह्मण्यपिरूढेः समलात् यच्चाप्नोतिपदादत्तेयच्चातिविषयानिह यच्चास्यसंततोभावस्तेनात्मापरिकीर्तित इतिनैरुक्तव्युत्पत्तेरपिजीवेशा नुगतात्मस्वरूपनिष्ठत्वेनसमलादित्यर्थः विरोधादितिविनैवाध्याहारमुपपत्तेरध्याहारोनयुक्तः आदित्यादेरिवेशस्यासाधारणहेतुत्वाभावात्तदुक्तिर्नयुक्तानिद्रा धातुवैषम्याद्यसाधारणहेतुसत्त्वेनात्मान्यहेतुव्यवच्छेदासंभवादेवकारासंगतेश्च न चात्माज्योतिरेवेत्ययोगव्यवच्छेदस्तदर्थइतिवाच्यंविशेष्यसंगतैवकारस्यान्य

नचद्युभ्वाद्यधिकरणन्यायेनात्मशब्दस्यतत्रैवमुख्यत्वंप्रधानाद्यनात्मनिराकरणार्थतयास्वशब्दादित्यात्मशब्दोहेतुत्वेनोक्तः नतुमुख्यत्वाभि प्रायेणजीवस्याप्रसक्तेः मुख्यत्वस्योभयसाधारण्याच्च अतएवात्रायंपुरुषः स्वयमित्युपसंहारस्यास्येतिपदानुषङ्गेणायमीश्वरोजीवस्यस्वय स्य मेवज्योतिर्ज्ञानहेतुरित्येवंपरत्वंनिरस्तम् उक्तन्यायेनोपक्रमविरोधात् ॥ १ ॥ योगव्यवच्छेदएवमुख्यत्वादर्थज्योतिषिविशेषस्यार्थभेदंकिंज्यो तिरित्यंतेनपृष्टत्वात्तात्मैव विशेषणंतथा च ज्योतिषिपरमात्मतादात्म्यायोगव्यवच्छेदोर्थइतिचेन्नविशेषतावच्छेदकावच्छेदेनैवायोगव्यवच्छेदस्यशंखःपांड रएवेत्यादौविशेषणसंगतैवकारार्थत्वात् प्रकृतेज्ञानसाधनस्वरूपज्योतिष्ट्वावच्छेदेनपरमात्मतादात्म्यायोगव्यवच्छेदवाधान्निद्राधातुवैषम्यादेरप्युक्तज्यो तिष्ट्वात् विशेष्यतावच्छेदकसामानाधिकरण्येनयोगव्यवच्छेदस्तु अत्यंतायोगव्यवच्छेदशब्देनव्यवह्रियमाणःक्रियासंगतैवकारस्थलेनीलंसरोजंभवत्येवे त्यादावेवव्युत्पत्तिसिद्धस्तस्मात् जाग्रत्ज्ञानस्याज्ञातविषयकत्वेनाज्ञाननिवर्तकत्वेनप्रमात्वात् वागादिप्रमाणसापेक्षत्वाच्चाक्षुषादिरूपत्वेनादित्याद्यालोकसा पेक्षत्वाच्चतत्साधनंप्रमाणमादित्यादिकंचसंभवतीतिव्यवहारविरोध्यप्रकाशविरोधित्वरूपंज्योतिष्ट्वमादित्यवागादेरुक्तमादित्यादेस्तमसीववागादेरज्ञानेउ क्तविरोधिनिविरोधित्वात् स्वप्नेतुसाक्षिरूपज्ञानमुक्तसापेक्षत्वाभाववदितिनोक्तसाधनमुक्तज्योतिः किंतुसाक्षिरूपआत्मैवेत्याशयेनोक्तज्योतिष्ट्वतिआत्मान्य तादात्म्यमेवकारोव्यवच्छिनत्तितथाचस्वाप्नवस्तुषुव्यवहारविरोध्यप्रकाशविरोधीसाक्ष्येवनतदन्य आदित्यादिरितिवाक्यार्थः ज्योतिषिद्विविशेषस्यस्पष्टत्वेपिउत्तरवाक्ये ज्योतिषोविशेष्यत्वंनावश्यकं आत्मनिज्योतिर्विशेषणबोधेनाप्युक्तप्रश्ननिवृत्तिसंभवात् पूर्वनिर्दिष्टेविशेष्यत्वस्यौत्सर्गिकत्वात् अथवास्वप्नोक्तज्योतिष्ट्वावच्छेदेनात्म

तादात्म्यायोगव्यवच्छिन्नतिधेयं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ॰सि॰ प्रवृत्तिवत्त्वन्मतेबोधकत्ववत्। अत्र मन्मत्ते तमोविरोधित्वेन व्यवहारविरोध्यप्रकाशविरोधित्वेन विरोधिन्यपि इत्यपिनांधकारविरोध्यादिसमुच्चयः आदित्यज्यो
टी॰ल॰ तिरित्याद्युक्त्वा आदित्येनैवज्योतिषास्ते पल्ययते कर्म कुरुते इत्यादिना आदित्यादेरासनादिरूपव्यवहारप्रयोजकत्वोक्त्या प्रयोजकत्वस्य च प्रकृते प्रयोजकीभूता
ल॰ प्रकाशाभाववत्त्वरूपत्वेनोक्तविरोधित्वविशिष्टस्य ज्योतिःशब्दार्थत्वं श्रुत्यैव दर्शितमिति भावः दुर्विवेकतया स्वयंज्योतिःशब्दार्थस्य बाधिततया सुविवेकत
७५ या अबाधिततया आत्मैवास्य ज्योतिरित्युपक्रमानुरोधात् स्वयमेव ज्योतिर्यस्येति विग्रहादात्मान्यतादात्म्यशून्यज्योतिःसामान्यकत्वं स्वयंज्योतिःशब्दार्थः स च जा
ग्रद्दशायामात्मनि बाधितः आदित्यादेरपि तदा ज्योतिष्टेन तत्रोक्तशून्यत्वाभावादिति भावः षष्ठ्या स्वयमेव ज्योतिरस्येति विग्रहघटकषष्ठ्या विषयत्वोक्तेरुक्तज्योतिः
सामान्यविषयत्वेन रूपेण बहुव्रीहिणा बोध्यत इति भावः स्वयंदासो यस्येति विग्रहेपि यथा स्वाभिन्नपरिचारकपरिचार्यत्वरूपेण स्वयंदासपदं न बोधयति स्वस्य स्वक

नच वाचैवायं ज्योतिषास्त इति ज्योतिःशब्दस्य ज्ञानसाधने प्रयोगादत्रत्यज्योतिःशब्दस्यापि ज्ञानसाधनपरत्वं न तु ज्ञानपरत्वमिति वाच्यम् लौ
किकज्योतिषि रूढस्य ज्योतिःशब्दस्य वाचिज्ञानसाधनत्वेन प्रवृत्तिवदत्रापि तमोविरोधित्वेन रूपेण ज्ञानविरोधिन्यपि प्रयोगसंभवात् नच स्वप्र
काशपरत्वे सदा स्वप्रकाशत्वेन श्रुतावत्रेत्यस्य वैयर्थ्यम् जाग्रदवस्थायामादित्यादिज्योतिःसम्भवेन दुर्विवेकतयाऽस्यामवस्थायां सुविवे
कतयाऽत्रेति विशेषणसाफल्यात् न चास्येति षष्ठ्या विषयत्वाभिधानम् स्वयंदासा इत्यादाविवानन्यवेद्यत्वपरत्वात् न चामुख्यार्थत्वापत्तिः
मुख्यविषयासंभवेनेष्टत्वात् न च प्रदीपादौ स्वविषयत्वेन स्वप्रकाशत्वव्यवहारः सजातीयप्रकाशाप्रकाश्यप्रकाशत्वस्यैव तत्रापि व्यवहा
रनिदानत्वात् अत एव न घटादावप्रकाशेऽतिप्रसंगः विवरणानुमानानि च आत्मा स्वप्रकाशः स्वसत्तायां प्रकाशव्यतिरेकविधुरत्वात् प्रकाशा
श्रयत्वात् प्रकाशकर्तृत्वात् प्रदीपवत् नन्ववेद्यत्वं चेत्साध्यं तदा साध्यवैकल्यं सजातीयप्रकाशाप्रकाश्यत्वं चेदर्थान्तरं घटादाविवास्वप्रकाशत्वे
ऽप्युपपत्तेः ज्ञानप्रभानुगतप्रकाशत्वासिद्धिश्चाज्ञातैकसति दुःखादावाद्यहेतोर्व्यभिचारः द्वितीयतृतीययोस्त्वन्मते आत्मनः प्रकाशत्वेनासिद्धिरिति चेत् ॥

र्तृकपरिचरणक्रियाकर्मत्वाभावात् परसमवेतक्रियाफलस्य कर्मतात्वात् किन्तु स्वान्यपरिचारकापरिचार्यत्वेन तथोक्तविषयत्वेन बहुव्रीहिणा न बोध्यते वा
धात् किन्त्वनन्यवेद्यत्वेन तच्च स्वान्यतादात्म्यशून्यज्योतिःसामान्यप्रयुक्तव्यवहारसामान्यकत्वं स्वपरविषयकवृत्तिज्ञानादिरूपस्वनिष्ठव्यवहारसामान्यप्रयोज
कसामान्ययुक्तशून्यं यस्य तत्त्वमिति यावदित्याशयेनाह स्वयंदासा इति अमुख्यार्थत्वेति आत्मज्योतिर्घट इत्यादावात्माभिन्नज्योतिर्विषयत्वेन बोधाद्वि——
——षयत्वघटित एव मुख्यार्थ इति भावः इष्टत्वादिति आदित्यज्योतिर्घट इत्यादावादित्यज्योतिःप्रयुक्तव्यवहारविषयत्वेन बोधादुक्तव्यवहारविषयत्वरूपेण रामः
पि निरूढलक्षणास्येवेति सोपि मुख्यार्थ एवं त्वेपातुमंदप्रज्ञेन यदितस्यामुख्यत्वमुच्यते तथापि मुख्यार्थासंभवात्तद्ग्रहणं युक्तमिति भावः ॥ ॥ ॥ २८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्रकाश्यत्वस्येत्यादि। अस्वप्रकाशत्वेनार्थांतरमुक्तं अस्वप्रकाशत्वं चवेद्यत्वं तत्रात्मान्यस्य जडत्वेन तद्वेद्यत्वस्य वक्तुमशक्यतया स्ववेद्यत्वमेवात्मनि वाच्यं तच्च
वाधितं तद्बाधस्य पृथगवेक्षणे गौरवानुसंधाने तु स्ववेद्यत्वाभाववत्त्वेन पक्षो विशेष्य इति भावः सजातीयप्रकाशाप्रकाश्यप्रकाशत्वमिति चिद्रूपत्वालोकत्वान्यतररू
पेणास्वसजातीयो यः तदप्रकाश्यत्वे सति प्रकाशत्वमित्यर्थः प्रकाश्यत्वं च तमोनाशविषयत्वयोरन्यतरवत्त्वं साजात्यं भेदगर्भं तथा च स्वभिन्नालोकजन्यतमोनाशव
तो भिन्नत्वं स्वभिन्नचिद्विषयाद्भिन्नत्वं चेत्यन्यतरवत्त्वे सति प्रकाशत्वं निर्गलितार्थः आलोकचितोः स्वभिन्नेति विशेषणं तेन स्वात्मकालोकजन्यतमोनाशवत्त्वेपि नालो
के साध्यवैकल्यं ज्ञानस्य परेशज्ञानांतरविषयत्वस्वीकारात्तद्भेदत्वेनैव निवेशः तथा च स्वपदं द्वितीयभेदप्रतियोगिपरं एवं च परमते चिद्विषयत्वसामान्याभावस्याप्रसिद्ध
त्वेपि योपदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति सामान्यतो व्याप्त्या चितिस्वविषयत्वस्यान्यचैतन्यविषयत्वयोरभावाभावाभ्यां चिद्विषयत्वसामान्याभाव
सिद्धिः तदिदमाह स्वाप्रकाश्यसजातीयाप्रकाश्यत्वेनेति। स्वाविषयत्वस्य स्वान्यचिद्विषयान्यत्वस्य च सिध्येत्यर्थः। अवेद्यत्वस्य चिद्विषयत्वस्य ननु तथापि चिदन्यवि
षयत्वं न निषिद्धं तत्राह विजातीयस्येति वृत्तिज्ञानादेरित्यर्थः अप्रकाशत्वादिति तथा च तद्विषयत्वेपि न स्वप्रकाशत्वहानिरिति भावः अथवा पटादाविवाप्रकाशरूपत्वेन

नस्वप्रकाश्यत्वस्य वाधितत्वया तदप्रकाश्यत्वेन पक्षस्य विशेषिततया वार्थान्तराभावात् सजातीयप्रकाशाप्रकाश्यप्रकाशत्वमेव साध्यम्
एवं च न घटादिवदस्वप्रकाशत्वेनोपपत्तिः स्वाप्रकाश्यसजातीयाप्रकाश्यत्वेनावेद्यत्वस्य लाभात् विजातीयस्याप्रकाशत्वात् ज्ञानप्रभानुग
तं च प्रकाशत्वमावरणाभिभावकत्वं तच्च ज्ञानस्य चित्त्वेनान्यत्र तेजोविशेषत्वादिनेत्यन्यदेतत् आवरणत्वं चाज्ञानतमसोरर्थव्यवहारप्रतिबन्ध
कत्वमनुगतमेव तच्चाज्ञानस्य साक्षात्तमसो ज्ञानप्रतिनिषेधद्वारेत्यन्यदेतत् न च दुःखे व्यभिचारः तस्याद्यक्षणे प्रकाशव्यतिरेकसत्त्वात् प्रकाशत्वे
((नविशेषणाच्च॥

साध्यपर्यवसानं माभूदिति प्रकाशत्वं साध्ये दत्तमित्याशयेनाह विजातीयेति अभिभावकत्वं अभिभावकस्य स्वरूपत्वं ज्ञानस्य केवलचितः स
त्वेन आवरणाभिभावकप्रमारूपाया अवच्छिन्नचितः स्वरूपत्वेन ज्ञानप्रतिषेधद्वारा चाक्षुषप्रतिबंधद्वारा आद्यक्षण इति यस्य स्वव्यवहारप्रतिबंधकाभावः स्वका
लत्वव्यापकस्तत्त्वरूपो हेतुर्दुःखादौ नास्तीति भावः आद्यक्षणोत्पन्नवृत्त्यावरणनाशात् द्वितीयादिक्षण एव दुःखादिव्यवहारप्रतिबंधकाभाव इति मत्तेनेदं युक्तं भास्व
ररूपादौ व्यभिचार इति तन्न दुःखादाविव तत्राप्याद्यक्षणावच्छेदेनाप्रकाशात्सन्निकर्षाद्यधीनवृत्त्यभावकाले अज्ञाततासत्त्वाच्च नन्वेवमालोके साधनवैकल्यं त
त्रापि वृत्त्यभावकाले ज्ञाततासत्त्वादर्थस्य व्यवहारप्रतिबंधकाभावः स्वनिष्ठतमोभावाज्ञातताभावयोरन्यतररूपो ग्राह्यः न च तथापि अंधकारोत्पन्नालोके प्रथमक्ष
णे तमःसत्त्वात्साधनवैकल्पमिति वाच्यं सौरालोकमध्योत्पन्नालोके दृष्टान्तत्वसंभवादिति चेन्न तदीयभास्वररूपादौ व्यभिचारात्तत आह प्रकाशत्वेनेति प्रकाशत्व
मात्रमंधकारे युगपदुत्पन्नालोकद्वये व्यभिचारि एकजन्यतमोनाशस्यापरत्रसत्त्वात्तदोदलान्तरमिति भावः॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ॰ सि॰ प्रतिबिंबस्य साक्षिरूपप्रकाशस्य बिंबाधीनतया बिंबस्वरूपशुद्धचित्साध्यतया तथा च प्रकाशं प्रतिकर्तृत्वं हेममसाधारणसाधनत्वमिति भावः तदाश्रितत्वेन बिंब
टी॰ ल॰ स्वरूपशुद्धचिदाश्रितत्वेन चकारः शेषः बिंबज्ञानहेतुत्वेति बिंबस्वरूपशुद्धचिन्निष्ठहेतुत्वेत्यर्थः उक्ताश्रयत्वकर्तृत्वयोरित्यादिः। स्वानंतरेत्यादि स्वकालोत्तरोत्प
उ॰ न्नस्वप्रकाशकोनेत्यर्थः न चादित्ये स्वकालोत्तरोत्पन्नस्वज्ञानरूपप्रकाशकत्वेन साध्यवैकल्यं शंक्यं स्वकालोत्तरोत्पन्नस्वीयतमोनाशहेतुकान्यत्वं स्वकालोत्तरोत्प
७६ न्नव्यवहारहेतुप्रकाशस्वरूपकान्यत्वं चेत्यन्यतरवत्त्वस्य साध्यत्वात् स्वपदानिभेदप्रतियोगिपराणिउत्पन्नान्तं हेतुविशेषणं सिद्धसाधनमिति मन्यते नित्यसाक्षि
ण एवात्मव्यवहारहेतुप्रकाशत्वेन घटादेरेव स्वकालोत्तरोत्पन्नोक्तस्वरूपकत्वादिति भावः घटादिविषयकज्ञानस्य घटात्मादिविषयकानुमित्यादेः तथा च घटा
दाविवात्मन्यनुमित्यादिस्वरूपप्रकाशस्योत्पत्तेस्त्वयास्वीकारान्न सिद्धसाधनं मन्यते त्वनुमित्यादेर्वृत्तिरूपत्वेन न प्रकाशस्वरूपत्वं प्रकाशस्वरूपत्वं च प्रकाशत्वोप
हितामिन्नरूपकत्वं तच्च न वृत्त्यवच्छिन्नचितिकिन्तु शुद्धचिति वस्तुतस्तु स्वव्यवहारेण न निवेश्यते किन्तु व्यवहारमात्रं तथा च घटादिज्ञानस्यैवात्मकालोत्तरोत्पत्त्या सि।
द्धसाधनोद्धार इति भावः स्वानधिकरणादिनादौ स्वज्ञानाभावे सति स्वव्यवहारविरहाद्याघइत्यतः स्वगोचरज्ञानं विशेषयति स्वसमानाश्रयस्वसमानकालेति स्वगोचरत्वा

नापि द्वितीयतृतीययोरसिद्धिः परारीत्या तयोरुक्तेः प्रतिबिंबस्य बिम्बाधीनतया तदाश्रितत्वेन बिम्बज्ञानहेतुत्वोपपत्तेश्च अत एवात्मास्वा
नन्तरोत्पत्तिकप्रकाशाश्रयो न प्रकाशाश्रयत्वादादित्यवदित्यपि साधुन च सिद्धसाधनम् घटादिविषयकज्ञानस्य त्वयापि जन्यत्वस्वीकारा
त् आनंदबोधोक्तं च विवादाध्यासितासंवित्स्वसमानाश्रयस्वसमानकालस्वगोचरज्ञानविरहप्रयुक्तव्यवहारविरहवती न भवति संवित्वा
दनन्तरव्यवह्रियमाणसंविद्वत्॥ ९ ॥ दियुक्तं ज्ञानस्वरूपं तदभावप्रयुक्तो यस्य व्यवहाराभावस्तदन्यत्वं साध्यं यद्यपि कालान्तानुपादाने प्य।
स्मदभिमतं सिध्यत्येव तथापि गुरुमते ज्ञाने सति तस्मिन् तदाश्रये च न तत् समानाधिकरणं ज्ञानान्तरं स्वीक्रियते तदभावे तद्व्यवहारादर्शनात् तदीयत्वेनैव स्व
स्वाश्रययोर्व्यवहारसंभवात्। अतीतादिज्ञाने तु ज्ञानान्तरं स्वीक्रियत एव तदभावे तद्व्यवहारदर्शनात् तथा च तन्मतमाश्रित्यैतदनुमानमिति कालान्तमुपात्तं
एवं च दीपस्य स्वस्वेतरद्व स्वस्वाश्रययोरपि तमोविरोधित्वाद्यथा व्यवहारप्रयोजकत्वं तथा ज्ञानस्य स्वस्वाश्रययोरज्ञानविरोधित्वात् तादात्म्यसमवायसंब।
न्धसत्त्वादिति तयोर्ज्ञानान्तरस्वीकारे गौरवं न च व्यवहारविषयत्वं प्रतिज्ञानविषयत्वस्येव ज्ञानतादात्म्यादेरपि प्रयोजकत्वकल्पने तत्रापि गौरवमिति वाच्यं ज्ञा
नतादात्म्यसमवाययोर्ज्ञानज्ञानिव्यवहारहेतुताद्वयकल्पनापेक्षया ज्ञानज्ञानिविषयकानामनंतकोटिज्ञानान्तराणां कल्पने महागौरवात् ज्ञानतद्विषयतदा रामः
श्रयेषु व्यवहारविषयत्वप्रयोजिकाया एकस्याः शक्तेः संभवेन व्यवहारमात्रे तद्धत्त्वेनैकहेतुत्वाच्चेत्यादित्कर्बोध्याः॥ ॥ ॥ ॥ २८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानाविषयत्वसिद्धिरित्यपास्तं गुरुमतेनैवैतदनुमानात् ज्ञानस्वरूपस्याश्रयस्वीकारेण २॥
एतेन ज्ञानस्वरूपस्यैव प्रकृते पक्षत्वात्तस्य च ज्ञानांतरगोचरत्वेपि चिन्मात्ररूपतदाश्रयत्वाप्रसिध्या तदन्यस्यैवोक्तविरहवत्त्वेन तत्र साध्यपर्यवसानमिति नत
स्य ज्ञानांतराविषयत्वपर्यवसानात् परवेद्यते त्यादिज्ञानं ज्ञानान्तरेणैव विषयी क्रियते न तु स्वेनेति स्वीकुर्वन्ति तार्किकादयस्तान् प्रत्युक्तानुमानप्रवृत्तेरित्य
र्थः साक्षिज्ञानं स्वस्वान्यविषयकमिति स्वीकुर्वाणां माध्वं प्रत्याह स्वाविषयत्वेति साकल्येत्यादि साकल्येन वेद्यत्वं घटादौ न ब्रह्मणि तद्गुणकर्मणामानंत्यादिति ब्र
ह्मणि तदभावपरा श्रुतिरित्यर्थः कारणाभावादिति साकल्येनापि ब्रह्म स्ववेद्यमेवान्यथा तस्य सर्वज्ञताहानेर्जन्मकर्माभिधानानि संति मेंग सहस्रशः। न शक्य
न्ते नु संख्यातुमनन्तत्वान्मयापि हि इति भागवतादिकन्तु जन्मादीनामानंत्यात् कथनायोग्यत्वपरं अन्यथानन्तेष्वपि ईश्वरीयसमूहालंबनधीसंभवेनानन्त
त्वहेत्वसङ्गतेः न चेश्वरेण तदीयजन्मा——————दीनां साकल्येन ज्ञेयत्वसम्भवेपि जीवाज्ञेयत्वपरा श्रुतिरिति वाच्यं विज्ञातारमरे केन विजानीयात् येनेदं स
र्वं विजानाति तं केन विजानीयादित्यादि निर्गुणप्रकरणस्थवाक्यानामीश्वरजन्माद्यज्ञेयतापरत्वासम्भवात् केनेत्यादिना जीवेश्वरसाधारणवेद्यतामात्रस्याक्षेपा

न च स्ववेद्यत्वेनोपपत्त्यासिद्धसाधनं अस्य परवेद्यत्वाङ्गीकर्त्रविषयत्वात् स्वाविषयत्वरूपपक्षविशेषणमहिम्ना तत्रानभिमतप
र्यवसानात् अवेद्यत्वं तु ब्रह्मणः श्रुतिसिद्धमेव न च साकल्येनावेद्यत्वपरा संकोचे कारणाभावात् एतेन ज्ञाततालिंगानुमेयत्वेऽहं
सुखीति वदहं जानामीत्यपरोक्षानुभवविरोधः गुरुमतेऽयं घट इत्यस्यैव स्वविषयत्वे स्वजनकेन्द्रियसन्निकर्षाश्रयत्वप्रसङ्गः व्यव
सायानुव्यवसाययोः पार्थक्यानुभवविरोधश्चन्यायमतेऽनुव्यवसायस्यापि परवेद्यत्वेन ज्ञानस्य प्रत्यक्षात्मविशेषगुणत्वेनेच्छादि
वदवश्यवेद्यत्वात् ज्ञानधारानुभवापत्तिर्विच्छेदे चरमस्य निष्प्रमाणकत्वापत्तिः सामान्यप्रत्यासत्तेरभावात् ॥ ❁ ॥ ❁ ॥

च तस्मात् सगुणं न वेद्यमिति वा जीवेन न वेद्यमिति वा संकोचे कारणाभावात् शुद्धचिदवेद्यत्वपरा श्रुतिरिति भावः ज्ञाततालिङ्गानुमेयत्वे इति घटो घटे घटत्वप्रकार
कज्ञानविषयो घटवृत्ति घटत्वप्रकारकज्ञाततावत्वात् ज्ञाततोक्तज्ञानजन्या उक्तज्ञाततया इत्याद्यनुमितिमात्रविषयत्वे इत्यर्थः प्रत्यक्षाविषयत्वे सत्युक्तानु
मितिविषयत्व इति यावत् प्रत्यक्षात्मविशेषगुणत्वेन प्रत्यक्षयोग्यात्मगुणत्वेन विशेषत्वस्य व्यर्थत्वात् रूपादीनां प्रत्यक्षयोग्यत्वेप्यवश्यावेद्यत्वादात्मेति
अवश्यवेद्यत्वात् अवश्यं प्रत्यक्षत्वात् चाक्षुषादिसामग्र्या मानसादिप्रतिबंधकत्वकल्पनं तु न युक्तं चाक्षुषादिकालेप्यहं सुखीत्याद्यनुभवात् चाक्षुषादेरे
वमानत्वादिसंभवेन गौरवस्याप्रामाणिकत्वात् जातिसांकर्यस्यादोषत्वाच्चाक्षुषत्वादेर्विषयिताविशेषत्वसंभवाच्च निष्प्रमाणकत्वेति स्वकाले स्वाधिकरणे
निश्चयाभावात् संदेह इत्यर्थः तेन कालांतरे कार्यादिलिंगकानुमानादिसम्भवेपि न क्षतिः ननु आत्मवृत्तित्वादिसामान्यलक्षणायाः पूर्वसत्त्वेन तया चरमज्ञान
मुख्यविशेष्यकमात्मवृत्तिप्रत्यक्षं ज्ञायत इति नोक्तसन्देहस्तत्राह सामान्येति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञातैकसत्त्वात् स्वज्ञानव्याप्यस्वकालकत्वात् तेनाभिन्नत्वात् तद्भेदशून्यत्वात् योनित्यज्ञानभेदशून्यः सनित्यज्ञानविषयो यथेश्वरज्ञानमिति व्याप्तिर्भेदाभावे हेतु
माह यावद्द्रव्यभाविनेति पाकजरूपादेः संयोगादेश्च पूर्वसिद्धे विद्यमानेपि द्रव्ये उत्पत्तिविनाशदर्शनेन द्रव्याद्भेदेपि जलपरमाणवादौ रूपादेरिवात्मनि साक्षिज्ञानस्यो
त्पत्तिनाशाभावेन न भेदोमानाभावात् धर्मधर्मिभावादिकन्तु भेदस्थानीयेन विशेषेणोपपद्यतइति पराभिमानः स्वत्वप्रकारकेति। तत्तदात्मवृत्तित्वप्रकारकेत्यर्थः स
होत्पन्नेति न च सन्निकर्षस्य पूर्वमभावात्तस्योत्पत्तिकाले प्रत्यक्षोत्पत्त्यसम्भव इति वाच्यं मनः सन्निकर्षविलंवेन मानसप्रत्यक्षविलम्बादर्शनात् मानसप्रत्यक्षस्य
सन्निकर्षजन्यत्वे मानाभावः तथा च तत्पुरुषसमवेतस्य पुरुषांतरे आपत्तिवारणाय तत्पुरुषसमवेतसामान्ये तत्पुरुषत्वेन हेतुतायाइव मानसविषयसामा
न्ये पुरुषत्वेन हेतुतायाः कल्पनात् उक्तसामग्र्याश्च सुखादिजनकसामग्रीसहकारेणैव फलोपधायकत्वकल्पनात् सुखाद्युत्पत्तिकाले तत्प्रत्यक्षमुपपद्यतेन

एवं च व्यवसायसुखादिगोचरं स्वविषयं नित्यमेव ज्ञानं सिध्यति स्वविषयतायां च न स्वजनकसन्निकर्षाद्यपेक्षा ईश्वरसर्वविषयनित्यज्ञानवत्
तथा चैवं प्रयोगः चैत्रसुखदुःखादिकं चैत्रीयनित्यापरोक्षज्ञानविषयः तंप्रति ज्ञातैकसत्त्वात् यद्यं प्रति ज्ञातैकसत् तत्तंप्रति तादृग्ज्ञानविषयः
यथेश्वरप्रयत्न इति नित्यज्ञानसिद्धौ तत्स्वविषयं नित्यज्ञानत्वात् स्वव्यवहारेऽन्यानपेक्षत्वात् स्वसंशयादिविरोधित्वाच्च ईश्वरज्ञानवदिति तस्मा
दात्मनो नित्यगुणाभूतज्ञानं स्वविषयत्वरूपस्वप्रकाशत्ववत् आत्मापि तद्विषयः यावद्द्रव्यभाविना तेनाभिन्नत्वात् मामहं जानामीत्यनुभवादात्म
स्वरूपासंवित्स्वविषयास्वजन्यव्यवहारविषयत्वात् उक्तासम्वित्स्वविषयिणी स्वसमानाधिकरणस्वत्वप्रकारकस्वविशेष्यकसंशयविरोधि
त्वात् उक्तविशेषणावद्विपर्ययविरोधित्वाद्वेति निरस्तम् आद्यानुमाने साक्षिरूपापरोक्षनित्यज्ञानविषयत्वेन सिद्धसाधनम् सहोत्पन्नज्ञाने
नापि ज्ञातैकसत्त्वोपपत्त्या ज्ञानगतनित्यतापर्यन्तसाधने तस्यासामर्थ्यं च न च चैत्रस्य तादृग्ज्ञानाभावे सुप्तोत्थितस्य परामर्शानुपपत्तिः सं
स्कारेणातदुपपत्तेः नित्यज्ञानस्य परामर्शविरोधित्वाच्च स्वविषयत्वानुमाने च दृष्टांतासिद्धिः ॥ ९९ च जन्यमात्रवृत्तिजातित्वेन मानसत्वस्याव

श्यं जन्यतावच्छेदकत्वेन तेन रूपेणापि पुरुषादिकार्यत्वस्यावश्यकत्वात्तादृशसामग्र्याः सुखादिसामग्रीसहकारित्वमेव कल्प्यतां किं मानसविषयत्वेन कार्यत्वा
कल्पनयेति वाच्यं व्यधिकरणधर्मद्वयावच्छिन्नप्रतिक्षप्तहेत्वोर्मिथः सहकारित्वाभावादतीतादिसुखे मानसवारणासम्भवाच्च अथानंतज्ञानकल्पने गौरवात्
सुखादिज्ञानं नित्यमिति चेन्न तथा सति गुरुमतरीत्या व्यवसायस्यैव स्वविषयकत्वौचित्यात्तद्दोषोद्धारस्योक्तत्वात् तावतापि नित्यतायां ज्ञातैकसत्त्वस्य व्यवस्था
पकत्वालाभादिति भावः तादृक्ज्ञानाभावे नित्यज्ञानाभावे परामर्शानुपपत्तिरिति स्वप्ने प्रत्यक्षजनकसन्निकर्षाभावेन स्वप्ने गजादिकं मपासाक्षात्कृतमिति स्मरणा
नुपपत्तिरित्यर्थः संस्कारेणाजन्यज्ञानजन्येन विरोधित्वादिति ज्ञाननाशस्यैव लाघवेन संस्कारत्वस्वीकारान्नित्यज्ञानस्य संस्कारद्वारकस्मरणविरोधित्वमिति भावः ॥

ईश्वरेपीति ईश्वरज्ञानंहिमन्मतेईश्वरस्वरूपमेवमायावृत्त्यवच्छिन्नचिद्रूपंवा आद्येतद्विषयस्तदन्यद्वेवहिती येतुनैकावृत्तिःसर्वविषयिकाकिन्तुभाविष्वनुमिति
र्भूतेषुस्मृतिर्विद्यमानेषुप्रत्यक्षरूपातयाचतासांस्वाविषयकत्वेपिवृत्त्यन्तरेणैवतततद्ग्रहणमितिभावःनैकंनियामकंनैकंव्यापकं अननुगतमेवेतिस्वनिष्ठेतद्विष
यत्वेस्वाभेदोदुःखादिनिष्ठतत्सामानाधिकरण्यादिकंनानैवव्यापकमित्यर्थः अननुगतमिति अनुगमप्रकारोप्युक्तःतर्कैरित्यादि आत्मावेद्यत्वरक्षणं॥ १३॥ निर्द्ध
र्मकतयाधर्माघटिततयाअवेद्यतयाशक्तिज्ञानसहकृतप्रमाणावेद्यतयाब्रह्मसत्यादिश्रुतितात्पर्यविषयःउक्तावेद्यतांसाधयनिवाच्यमितिप्रवृत्तिनिमित्ताभावात्
प्रवृत्तिनिमित्ताघटितत्वात्।मुख्यार्थस्येति अन्यस्येतिशेषः ननुवाच्यभेदोपहितमवाच्यपदमुख्यार्थस्तत्संबन्धरूपालक्षणाशुद्धेपिसम्भवत्येवेत्याह भावेवेतिवाश

ईश्वरेपिस्वविषयकनित्यज्ञानासिद्धेरप्रयोजकत्वाच्चस्वाविषयत्वेपिव्यवहारादेरुपपादितत्वाच्च किंचैवैत्रनित्यज्ञानस्याविषयत्वेनैकं नियामक
मीश्वरज्ञानस्यन्यायमतेवस्तुत्ववत्सर्वविषयत्वापत्तेःनाप्यभेदःदुःखादावभावात् नापिसमानाधिकरण्यत्वं आत्मन्यभावात् धर्मादौतत्सद्भा
वाच्चेत्यननुगतमेववाच्यम् तथाचकिमपराद्धंव्यवसायस्वप्रकाशत्ववादिनागुरुणा अन्यत्रसन्निकर्षस्यनियामकत्वेपिस्वस्मिन्नभेदस्य
सम्भवात् पार्थक्यानानुभवानुभवरूपस्यानुभवकलहस्यत्वन्मतसमानत्वात् तस्माद्व्यवहारएवाननुगतंकारणमस्तुतत्प्रयोजकानुगमार्थं
किमितिनिर्बन्धःपश्चादप्यननुगमएवपर्यवसानात् एवंचनस्वविषयत्वरूपंस्वप्रकाशत्वंकिंत्ववेद्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वमितिसिद्धम्।
आत्मनःस्वप्रकाशत्वोपपत्तिः॥१३॥ निर्द्धर्मकतयाऽवेद्यतयाचब्रह्मानन्दादिपदलक्ष्यंनवाच्यंप्रवृत्तिनिमित्ताभावादितिनन्ववाच्यशब्देनोच्यतेचेद्वा
च्यत्वसिद्धिर्लक्ष्यतेचेत् अवाच्यत्वरूपमुख्यार्थस्याभावात्कथंलक्षणाभावेवाब्रह्मनावाच्यंकिन्तुतीरवत् अवाच्यरूपमुख्यार्थसम्बन्धिमात्रमिति।
स्यात्मुख्यार्थहीनस्यापिब्रह्मलक्षकत्वेघटपटपदमपिघटलक्षकंस्यादितिचेत् न अवाच्यरूपमुख्यार्थाभावेपिनञ्समभिव्याहृतवाच्यशब्देनवा।
च्यत्वात्यंताभावबोधनद्वारास्वरूपेलक्षणयैवपर्यवसानात्॥ ऽे द्रोनास्यायांसाचोक्तोपहितमपितदादिपदवाच्यत्वान्नावाच्यमित्येवंरूपामुख्यार्थहीन
स्यब्रह्मण्यमुख्यार्थवाचकस्यमुख्यार्थाभावेपीति शक्यार्थाभावेपीत्यर्थः वाच्यत्वात्यन्ताभावेतिवाच्यत्वस्यात्यन्ताभावोयतइतिव्युत्पत्त्यावाच्यभेदेत्यर्थः तथाचा
वाच्यपदस्यसमासत्वेनतद्वाच्यरूपमुख्यार्थाभावेपितत्प्रतिपाद्यविशिष्टार्थसंबंधरूपालक्षणाशुद्धेसंभवत्येवनहिस्वशक्यसंबंधएवलक्षणा अर्थवादेषुगमीर
पामित्यादौचतदसंभवात् किंतुस्वबोध्यसम्बन्धःनचवाच्यभेदोपहितंनावाच्यपदप्रतिपाद्यंतदादिपदेनान्विताभिधानादिपक्षेवक्ष्यमाणरीत्यावाच्यादिपदे
नवाच्यत्वादितिवाच्यंतदादिपदस्यलाघवेनघटत्वादिविशिष्टशक्तत्वात् अन्विताभिधानादिपक्षेपि अन्वितभेदत्वादिनानञादिपदशक्यतानतुवाच्यान्वितभे
दत्वेन अघटमित्यादौघटान्वितभेदत्वेनापिशक्यत्वापातात् तथाचवाच्यभेदस्वरूपस्यापिब्रह्मणोवाच्यभेदत्वविशिष्टरूपेणावाच्यत्वमस्त्येवेतिभावः॥ ❀ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अखण्डपदेतिवाचकगंगापदेत्यर्थः मुख्यार्थावश्यंभावेतिगंगादिपदवाच्यावश्यंभावेत्यर्थः तादृशस्थलेमुख्यार्थस्य तेरेवलक्ष्यस्मारकत्वात्तदवश्यंभावइतिभाव इष्टत्वात्तात्पर्यविषयस्य शुद्धत्वेनलक्ष्यत्वविशिष्टाघटितत्वेनेष्टत्वात् यथाश्रुते लक्षणासम्बन्धस्यतज्ज्ञानाधीनधीविषयत्वस्य च शुद्धेपिसत्त्वादसङ्गतेः गौणस्यलक्ष्यत्वविशिष्टाघटितविषयकस्यननुकिञ्चिद्धर्मप्रकारिकेवलक्षणयाधीर्दृष्टातत्राह सत्यज्ञानादीति॥ व्यक्तीति। अखण्डार्थवादोक्तरीत्याव्यक्तिमात्रलक्षणेतिभावः सत्त्वादिसंबंधित्वमात्रेणसत्त्वाद्याश्रयरूपकल्पितधर्मिसंबंधित्वमात्रेणकल्पितचन्द्रत्वादिजातेः कल्पिताचन्द्रत्वादिजातिर्यत्रतादृशस्यप्रातीतिकचन्द्रादेश्चन्द्रादेः कल्पितद्वितीयचन्द्रादेरितियावत् अत्रापीतिसत्ताद्याश्रयरूपकल्पितधर्मिणः परमार्थसतिब्रह्मणिकल्पितत्वेनतत्रापिसत्ताद्याश्रयत्वव्यवहारः परमार्थतस्तु।

एवञ्चनिर्विशेषपदमपि अखण्डपदलक्षकतायामेवमुख्यार्थावश्यंभावनियमात् नन्वेवंलक्ष्यपदेनापिलक्ष्यत्वेतीरस्यागंगात्ववद्ब्रह्मणोऽलक्ष्यत्वापत्तिरितिचेन्नइष्टत्वात् सर्वथानिर्द्धर्मकत्वात् लक्ष्यव्यवहारस्य च वाच्यत्वाभावनिबंधनत्वात् तथा प्रतिपादितंप्राक् नन्वेवंलक्ष्यत्वाभावेनवाच्यत्वव्यवहारप्रसंगः गौणस्यतस्यापीष्टत्वात् सत्यज्ञानादिपदानांकल्पितधर्मवाचिनांब्रह्मरूपव्यक्तिलक्षकतयासखण्डत्वानापातात् नचसत्त्वादिधर्माश्रयतयालक्ष्यत्वाभावेमञ्चसंबंधित्वमात्रेणलक्ष्यस्यपुंसोऽमंचत्ववत्सत्त्वादिसम्बंधित्वमात्रेणलक्ष्यस्यब्रह्मणोऽसत्त्वाद्यापत्तिरितिवाच्यम् कल्पितचन्द्रत्वादिजातेः परमार्थचन्द्रव्यक्तितादात्म्येनाचन्द्रत्वाभाववदत्रापिसत्त्वाद्यभावानापत्तेः तदुक्तमलक्ष्यव्यक्तिरपिब्रह्मेति अतएवस्वप्रकाशादेरब्रह्मत्वेयद्यद्ब्रह्मतयेष्टन्तत्तदब्रह्मेतिसाधुसमर्थितोब्रह्मवादइतिनिरस्तम् यत्तुनिर्विशेषादिपदानांसमासपदतयालक्ष्यादिपदानांचयौगिकतयावाक्यतुल्यत्वान्नवाचकतेतिवक्तुमशक्यं अन्विताभिधानपक्षेतेषामपिवाचकत्वात् अभिहितान्वयपक्षेपिवाक्यएवाभिहितान्वयस्वीकारेणप्रकृतिप्रत्यययोरन्विताभिधायकत्वाद्वाक्यतुल्यस्यापिवाचकत्वात् ब्रह्मणः पदार्थसंसर्गरूपत्वेसखण्डत्वापत्त्यापदार्थत्वेवाच्यत्वापरिहारादितितन्नपदलक्ष्यत्वेप्यपदार्थत्वोपपत्तेः अखण्डत्वेपिवाक्यार्थत्वस्योपपादितत्वात् अन्विताभिधानेऽन्वितवाचकस्यापिस्वरूपेलक्षणांगीकारात्॥ ५६ ॥

नतस्यसत्ताश्रयत्वंकिन्तुत्रिकालाबाध्यरूपसत्तास्वरूपत्वमितिभावः व्यक्तिरपिब्रह्मेतिसत्तादिनजहातिनइतिशेषः अतएवस्वप्रकाशत्वाद्याश्रयत्वेनकल्पितव्यक्तितादात्म्यस्य शुद्धेपिसत्त्वादेववाक्यतुल्यत्वात् वाचकसमुदायत्वात् वाक्यएवघटमानयेत्यादिवाक्यस्थलएवअभिहितान्वयस्वीकारेणप्रकृतिप्रत्ययाभ्यामभिहिताः घटकर्मत्वादिरूपाः अर्थाः स्वान्वयंबोधयन्तीतिस्वीकारेण अन्विताभिधायकत्वात् कर्मत्वादिशक्तत्वादिशक्तत्वात् अपदार्थत्वोपपत्तेः पदावाच्यत्वोपपत्तेः वाचकस्यापीत्यपिशब्देनसमासस्यप्रकृतिप्रत्ययरूपसमुदायस्यवानवाचकत्वंमानाभावात् घटमित्यादेर्घटकर्मत्वादिशाब्दबोधानुकूलशक्तिमत्त्वंहिनान्विताभिधायकत्वंतार्किकादिभिरपिसमभिव्याहारविधयातस्योक्तधीहेतुत्वस्वीकारेणतत्स्थलेगुरुणीभूतविशिष्टिकीकारेतार्किकादिनांतत्रविप्रतिपन्नस्यसमवात्॥

CC-0. In Public Domain. Digitization by eGangotri

किन्तुद्वितीयाविभक्त्यादेरन्वितकर्मताशाब्दधीत्वावच्छिन्नानुकूलशक्तिमत्त्वंएवंनिर्विशेषादिसमासस्थलेपिनिरादिपदस्यान्विताभावादिशाब्दधीत्वावच्छिन्नशक्तित्वम
न्विताभिधायकत्वमतएवघटादिपदस्यकार्यान्वितेन्वितेवाघटादौशक्तिन्दूषयित्वाघटादिमात्रशक्तित्वंस्वमतेमणिकारादिभिःस्थापितंशक्तिवादादौ। अतएवचअन्वि
तघटत्वादिरूपेणशक्योपस्थितौसत्यामन्वयविशेषेजिज्ञासेत्यादिकंपदमात्रस्यान्वितार्थशक्तिस्वीकारेयुक्तित्वेनोपन्यस्तं। घटान्वितकर्मतात्वादिनाशक्यत्वेतु अ
न्वयविशेषान्तर्भावेनोपस्थितेःशक्त्यैवसिद्धत्वान्नान्वयविशेषेजिज्ञासोक्तिःसङ्गच्छतेतथाचक्कसमासादेःशक्तत्वंक्कवाविशेषान्विताभावादेःशक्यत्वमितिपरेषा
मौढ्यंसूचितं तर्हिशुद्धस्यैववेदान्तजन्यबोधविषयत्वे अवाच्यत्वादेर्व्यावहारिकस्यतात्विकस्यतुब्रह्मान्यस्याद्वैतश्रुतिरेवनिवारिकेतिभावः आनुषङ्गिकतया
तात्पर्याविषयत्वेपिदेवताधिकरणन्यायविषयतया अशब्दमितिसमवायेनेववाच्यत्वादिनापिसम्बन्धेनशब्दशून्यमशब्दपदार्थःविनिगमकभावात् अस्पर्श
मित्यादौवाच्यत्वादिनास्पर्शवत्त्वाद्यप्रसक्त्यानतत् सम्बन्धेननिषेधःनचतत् समभिव्याहारादशब्दमित्यादावपितथेतिवाच्यंयेनसंबंधेनधर्मेणचयद्यत् प्र

नचतर्ह्यवाच्यत्वासिद्धिःअस्वएड्ब्रह्मसिद्ध्युपायत्वेनप्राप्तस्यावाच्यत्वादेर्निवारकाभावेनानुषंगतयासिद्धेःयतोवाचोनिवर्त्ततेऽ श
ब्दमस्पर्शमित्यादिश्रुतयश्चात्रानुसन्धेयाः अवाच्यशब्दवदशब्देपिव्याघाताभावात् नचेयंश्रुतिरद्भुतत्वाभिप्रायाश्रूयमाणार्थेवा
धकाभावात् नचयतोवाचइत्यत्रापिमनसासहेतिश्रुत्तमनोवृत्तेरिवान्तःकरणवृत्तिव्याप्येब्रह्मणिवाग्वृत्तेरपिसर्वथानिषेधायोगःल
क्षणायाःस्वीकारेणशक्तिमात्रस्यनिराकरणात् लक्षणाया अप्यनंगीकारेयथाश्रुतस्यैवोपपत्तेश्चन चानन्दाद्यनेकपदामुख्यार्थता
पेक्षयानिवर्त्तन्तइत्येकृतपदार्थामुख्यत्वमेवयुक्तमितिवाच्यम् ब्रह्मणोनिर्द्धर्मकतयातत्रशक्त्यभावेनवहुत्वस्याप्रयोजकत्वात्॥ ❁ ॥

सक्तन्तेनतेनतन्निषेधस्याकांक्षित्वेनसमभिव्याहारस्याप्रयोजकत्वात् ननुजगत्कारणतादेरिवशब्दवाच्यत्वस्यनिषेधेपितस्यव्यावहारिकःसम्बन्धोब्रह्मण्या
स्तामितिचेन्नजगत्कारणत्वादौश्रुत्यनुमानादिरिववाच्यत्वेमानस्याभावात् जगत्कारणत्वादिकंविनाजगदुत्पत्तेरिववाच्यत्वंविनाकस्यचिदनुपपत्त्यभावेनत
त्रव्यावहारिकसम्बन्धेमानाभावात्। ननुअशब्दमित्यादिशब्दबोध्येब्रह्मणिशब्दनिषेधेव्याघातइत्या शंक्यशब्दवाच्यत्वनिषेधेपिलक्षणयाशब्दबोध्यत्वा
न्नैवमित्याहावाच्येतिनचेत्यादिमनसासहेत्यादिनिषेधोनमनोवृत्तिमात्रस्यकिन्त्वशुद्धमनोवृत्तेस्तथायतोवाचइत्यादिनिषेधोनवाग्वृत्तिमात्रस्यकिंतुप्राकृ
तवाग्वृत्तेरित्यर्थःप्राकृतत्वंनवेदान्तभिन्नत्वंलौकिकवाग्वृत्तेरपित्वयाब्रह्मणिस्वीकारात् तथाचशक्त्यावाग्जन्यवृत्तेरेवनिषेधइत्याशयेनाहलक्षणयाइति।
लक्षणायाअप्यनंगीकारेसुप्तोत्थापकवाक्यवत् पदवृत्तिज्ञानमनपेक्ष्यैववाक्यंब्रह्मानुभावकमितिपूर्वोक्तपक्षेब्रह्मणोनिर्द्धर्मकतयातात्पर्यविषयस्यधर्माघटि
ततयातत्रतात्पर्यविषयशुद्धबोधायशक्त्यभावेनशक्तेरसामर्थ्येन॥ ❁ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचशुद्धेऽविद्याविषयत्वादिस्वीकारेणविषयादिपदशक्यत्वेपिश्रुतितात्पर्यविषयोनिर्विकल्पकवोधोनशक्तिज्ञानसाध्यः किञ्चिद्धर्मप्रकारकवोधस्यैवतत्त्वात्
ननुतार्किकादिमतेनिर्विकल्पकस्यव्यवहाराप्रयोजकत्वेनव्यवहारमूलकशक्तिग्रहस्यशुद्धेनवतारेपिसिद्धान्तेनिर्विकल्पकस्यापिसोयमित्यादिवाक्यजवोधस्य
संशयादिनिवृत्तिद्वाराव्यवहारप्रयोजकत्वेनतन्मूलकःशक्तिग्रहःशुद्धेवक्तव्यएवतथाचतत्सत्यमित्यादिवाक्यजन्यनिर्विकल्पकवोधप्रयोज्यव्यवहारेणसत्या
दिपदानांसत्यत्वाद्युपलक्षितेशुद्धेपिघटादिस्वरूपेइवशक्तिधीसम्भवात्शुद्धमपिशक्त्यानुभूयतामितिचेन्नतावतापिशुद्धब्रह्मणःशक्त्यानुभाव्यत्वासम्भवात्
नहितत्सत्यत्वाद्युपलक्षितंकिन्तुतदन्यत् तत्रकल्पितं तथाचकार्यत्वेनघटादौशक्तिंगृहीत्वाकार्यमलौकिकमपूर्वंगुरुमतेनुभूयतां सत्यत्वोपलक्षितेतुघटादौ
शक्तिंगृहीत्वासत्यत्वाद्यनुपलक्षितंब्रह्मकथमनुभूयता ——— मनुभवेवाशुक्तिरूप्यादेरपिसत्यादिपदादनुभवापत्तिः नचसत्यत्वादिधर्मसामान्यशून्यं
शुद्धब्रह्मसत्यत्वादिनोपलक्ष्यतेकदाचि त्कतत् धर्मस्यैवतदुपलक्षणत्वात् नचशुद्धब्रह्मण्यपिशक्तिग्रहःतस्यव्यवहाराविषयत्वात्सत्यत्वाद्युपलक्षिते
शक्त्यसंभवाच्च अनेकार्थकत्वस्यान्याय्यत्वात् किंचोक्तरीत्यानिर्विकल्पकस्यापिमन्मतेसविकल्पकद्वारकत्वात् सविकल्पकोपयोगिन्याःसखण्डशक्तेःकल्पन

वाच्यत्वविरोध्यर्थद्वारैवाखण्डार्थपरतयातद्विरोधतादवस्थ्यात् अतएवकस्मादुच्यतेपरंब्रह्मेत्यादिश्रुतेःपरमात्मेतिवाप्युक्तइत्या
दिस्मृतेश्चतत्तच्छब्दवोध्यत्वमात्रेणावाच्यत्वाभिलापोनतुशक्यत्वाभिप्रायेणेतिताभ्यांनविरोधःतात्पर्यविषयोब्रह्मवाच्यंवस्तुत्वाद्ब्रह्म
स्यत्वाच्चतीरवदितिचेत् निर्धर्मकतयावाच्यत्ववाधात् तदुन्नीतसधर्मकत्वाद्युपाधिसंभवाच्चपरमार्थसदादिकंकस्यचिद्वाचकंपदत्वा
दित्यपिनकिमत्रपदत्वमनतावत्सुप्तिङन्तत्वंसमासपदस्याशक्तत्वेनराजपुरुषादौव्यभिचारात् ॥ ९९ ॥ यैवसविकल्पद्वारस्यलक्षणाधीन

निर्विकल्पकस्यनिर्वाहान्नाखण्डेव्यवहारःशक्तिकल्पकःअनन्यलभ्यार्थस्यचतत्त्वादितिभावः विरोध्यर्थद्वारैवेतिवाच्यत्वाभावद्वारैवेत्यर्थःउक्तश्रुतेरितिशे
षःअतएवउक्तश्रुतेर्वाच्यत्वविरोधित्वादेवश्रुतेःस्मृतेश्चवाच्यत्वाभिलापोउच्यतइत्यादिशब्देर्वोधकत्ताबोध्यत्वेतिनचनिवर्त्ततइत्यादौचित्तशुद्ध्यभावेप्रवृ।
त्त्यभावोर्थोथवाउच्यतइत्यत्रवोध्यत्वमात्रमर्थइत्यत्रविनिगमकाभावइतिवाच्यंशुद्धेशक्यत्वासम्भवस्योक्तत्वात् शक्त्यावोधकत्वरूपप्रवृत्त्यभावस्यैवनिव
र्ततइत्येतदर्थत्वात् वाधादिति प्रमेयघटत्वादिविशिष्टेव्यभिचारोपिवोध्यःसधर्मकत्वस्यपक्षमात्रव्यावृत्तत्वेनपर्वतेतरत्वादितुल्यत्वमाशंक्याह तदुन्नीतेति
वाधोन्नीतेत्यर्थस्तथाचवन्हिरनुष्णःकृतकत्वादित्यादौवन्हीतरत्वादेरिवसाध्यव्यापकताग्राहकतर्कसत्त्वान्नोक्ततुल्यत्वमितिभावःननुसाध्योपाध्योःकेवला रामः
न्वयित्वेननोपाध्यभावस्यसाध्याभावसाधकत्वमितिचेन्नप्रमेयघटत्वादौसाध्याभावनिश्चयात् धर्मघटिततत्त्वरूपसधर्मकत्वस्यशुद्धब्रह्मण्यभावनिश्चयेनवा। २८९
च्यत्वाभावाप्रसिद्धेस्तद्वीत्यासत्त्वेपिसाध्यव्यापकत्वेनपक्षातिरिक्तेगृहीतोपाधेरभावस्यब्रह्मणिपरामर्शस्यसत्प्रतिपक्षस्याप्रत्यूहत्वात् ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेदितिसाध्यमितिशेषः नचावयवद्वारावाचकत्वंहेतुर्वाचकत्वंसाध्यमितिवाच्यं समासादौव्यभिचारतादवस्थ्यात् वाच्यार्थतात्पर्येतिसवाच्यघटितार्थतात्पर्येत्यर्थः विषमितिनचविषभक्षणातुल्यंशत्रुगृहभोजनमित्यर्थतात्पर्यकत्वान्नव्यभिचारइतिवाच्यं उक्तवाक्यस्यशत्रुगृहभोजनमनिष्टसाधनमित्येतत्तात्पर्यकत्वेनोक्तत्वात्तादृशतात्पर्यस्यापिकदाचित्सम्भवेनव्यभिचारानपायाच्च अवाच्यशब्दस्यवाच्यसम्बंधिबोधकशब्दस्ययद्यपिसत्यादिपदवाच्यसम्बन्धिब्रह्मेतिवाब्रह्मसम्बन्धिवाचकंसत्यादिपदमितिवालक्षणांविनापिलक्षणाज्ञानंसंभवत्येव आद्येब्रह्मत्वरूपेणब्रह्मविषयकज्ञानंशुद्धब्रह्मशाब्दहेतुर्गुरुमतेशुद्धगोत्वशक्तत्वज्ञानंगोत्वविशिष्टशाब्दधीहेतुरिवद्वितीयेगोत्वादेरिवब्रह्मणोपिशुद्धरूपेणभानत्तदादिपदेनशुद्धब्रह्मसंबंधिवाचकत्वेनोपस्थितिसम्भवात् तेनरूपेणतदा

नापिशक्तत्वंसाध्याविशेषात् अवयवद्वारासमासपदेवाचकत्वंचेदिष्टमेव———— नापिसत्यज्ञानादिवाक्यंवाच्यार्थतात्पर्यवच्छब्द।
युक्तवाक्यत्वादित्यपिविषंभुंक्ष्वेत्यादौव्यभिचारात् नन्वत्रावाच्यत्वेलक्ष्यत्वानुपपत्तिः वाच्यार्थसम्बन्धित्वेनज्ञातस्यैवलक्ष्यत्वात् तज्ज्ञानं
चनशब्दभिन्नेनउपनिषन्मात्रगम्यत्वात् नापिस्वप्रकाशतयानित्यसिद्धेशब्दवैयर्थ्यात् अवाच्यशब्दस्यचलक्षकस्यैववक्तव्यत्वात् तत्रा।
पिवाच्यसम्बन्धित्वेनज्ञेयत्वेऽनवस्थेतिचेत् नतथाज्ञानमुपस्थितावुपयोगिब्रह्मस्वप्रकाशतयास्वतएवोपस्थितमितिकिन्तेन नचैवंश
ब्दवैयर्थ्यम् आवरणाभिभावकवृत्तावुपयोगात् अतएवनानवस्था तस्मात्प्रवृत्तिनिमित्तस्यसुदुर्निरूपत्वादवाच्यत्वम् तदुक्तम् दृष्टागुणक्रिया
जातिसम्बन्धाःशब्दहेतवः नात्मन्यन्यतमोह्येषान्तेनात्मानाभिधीयतेइति नचारोपितगुणाश्रयतयावाच्यतातस्यतात्पर्याविषयतयातात्पर्य
विषयेऽवाच्यत्वस्यास्थितत्वात् नचसत्यादिपदानांलक्षकत्वेसिद्धेप्रवृत्तिनिमित्ताभावस्तस्मिंश्चलक्षकत्वमितिपरस्पराश्रयः निर्विशेषवाक्ये
ननेतिनेतीत्यनेनैवनिमित्ताभावस्यसिद्धत्वात् नचनिर्विशेषवाक्यस्यस्वरूपमात्रपरत्वेप्रवृत्तिनिमित्ताविरोधोनिर्विशेषत्वविशिष्टपरत्वेचतस्यै
वसत्त्वेनिर्विशेषपदवाच्यत्वस्यैवप्रसंगइतिवाच्यं द्वारतयोपस्थितस्यस्वपरविरोधित्वात् निर्विशेषस्यवाच्यत्वासम्भवाच्चतस्मान्निर्विशेषत्वादेवजी
वब्रह्माभेदःसिद्धः भेदकासंभवात् तथाचब्रह्मणएववाच्येयोविद्वान्वाच्यतामधिगच्छतिसनिस्त्रयोनिमित्तानांविरहैः प्रतिबोध्यतामिति ब्रह्मणः शब्दा

वा०भा० ॥ ७८ ॥

दिपदशक्यत्वानंगीकारेपितद्वाचकंसत्यादिपदमित्यादिवाक्येतत्पदेनशुद्धब्रह्मत्वेनोपस्थितिसम्भवात् ब्रह्मणोपिशुद्धरूपेणोपस्थितिसम्भवात् शुद्धविशिष्टत्वेनप्रमात्रादेःसद्भानाच्च तथापिलक्षणाज्ञानंनशाब्दबोधेकारणंकिंतुशक्यज्ञानजन्यलक्ष्योपस्थितिरेवेतिपूर्वमुपपादितत्वात् तदनुसृत्याहनतथाज्ञानमित्यादि उपस्थितौ शक्यज्ञानाधीनलक्ष्योपस्थितौस्वतएवतथाज्ञानंविनैव उपस्थितंनिर्विकल्पकस्फूर्तिविषयः तत्रहेतुः स्वप्रकाशतयेतिसत्यादिपदशक्यप्रमात्राद्यंशेशुद्धस्यस्वप्रकाशस्यवैशिष्ट्यभानेनेत्यर्थः तच्चवैशिष्ट्यविशिष्टप्रमात्रादिगोचराहमाकारवृत्तिरविद्यावृत्त्यन्तरम्वेत्यन्यत् सर्वथाशुद्धविशिष्टत्वेनपूर्वाजभूतप्रमात्रादिज्ञानस्यसम्बन्धिज्ञान

विषयाशुद्धस्यनिर्विशेषत्वप्रतिपादनमितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंशब्दादिप्रमाणंविनैवशुद्धधीसम्भवेविषयेवाच्यत्वस्यविषयीभूतनिर्विकल्पकेशक्तिज्ञानाजन्यत्वस्य तत्वैरित्यादिब्रह्मणोशब्दवाच्यता॥१४॥भेदस्यघटादिनि
ष्ठभेदस्यस्वरूपत्वेघटादिस्वरूपत्वेअनपेक्षत्वापत्त्याप्रतीतौप्रतियोग्यनुयोगिज्ञानानपेक्षत्वस्यआश्रयविधयाघटाद्यनपेक्षत्वस्यचापत्त्या अनवस्थाभेदस्यघटा
दिधर्मस्यभेदान्तरन्धर्मःइत्यनवस्थासापेक्षइतिघटपटयोरभेदग्रहेभेदंप्रतिप्रतियोग्यनुयोगिभावाग्रहात् एकस्मिन्नपिदीर्घवंशादौभेदभ्रमेतंप्रतितद्ग्रहादन्वयव्य
तिरेकाभ्यांभेदधीर्भेदप्रतियोग्यनुयोगिभावधीहेतुरितिभावःतन्निरासकेतितदुच्छेदकेत्यर्थःशुष्कतर्कस्यश्रुत्याद्यनपेक्षतर्कस्यव्याप्तिसध्रीचीनतयानिर्दोषतयाइ

स्यादेतत्तदिदमयुक्तं भेदस्यप्रमाणसिद्धत्वात् नचभेदस्यस्वरूपत्वेऽनपेक्षत्वापत्त्याधर्मत्वं तथाचानवस्थास्तंभकुम्भयोःपरस्परभेदग्रहोन्योन्यभे
दग्रहेसापेक्षइत्यन्योन्याश्रयश्च एवंचभेदासिद्धिरितिवाच्यम् तत्किम्भेदेप्रतीतिरेवनास्तिकारणाजन्यावाबाध्यविषयावानाद्यःविकल्पादिकरण
रूपव्यवहारविप्लवापत्तेःनहिभिन्नतयाऽज्ञानेनविकल्पःनद्वितीयःअकारणकोत्पत्तेर्व्याहतत्वेननित्यत्वापत्त्यात्तन्निरासकमोक्षोपायाननुसर
णापत्तेःनतृतीयःउक्तशुष्कतर्कस्याबाधकत्वात् अन्यथैक्यस्यस्वरूपत्वेऽनपेक्षत्वापत्तिःधर्मत्वेऽद्वैतहानिरित्यादिनैक्यबुद्धिरपिबाधितविष
यास्यात् नचममअद्वैतखण्डकस्यपरपक्षमात्रंखण्ड्यमितिवाच्यम् स्वपक्षसत्त्वेपितद्वत्तथात्वेममापितथात्वाविरोधात् नचममपरपक्षखण्डन
मात्रेणस्वमतभूतैक्यसिद्धिःममापितावन्मात्रेणस्वमतभूतभेदसिद्धिसंभवात् नचमांप्रतिभेदखण्डनमात्रनियोगममैवद्वैतखण्डकत्वमिति
वाच्यम् मांप्रत्यप्यैक्यखण्डनमात्रनियोगसम्भवात् मध्यस्थस्यसत्वदनधीनत्वाद्स्वव्याघातकैरेवत्वयैक्यंदूष्यमितियदातदाऽस्वव्याघातकैरेव
त्वयाभेदोदूष्यइत्यपिस्यादितिमैवम् नहिवयंभेदप्रतीतेःस्वरूपंकारणंवापलपामःकिन्तुबाधितविषयत्वंब्रूमःव्याप्तिसध्रीचीनतयाऽशुष्कैस्तर्कै
रनन्यपरयाश्रुत्यास्मृत्याचभेदस्यबाधितत्वात् विषयभेदादिनाप्रत्यक्षविरोधस्यपरिहृतत्वेनश्रुत्यादावुपचरितार्थत्वाभावात् यत्तुभेदस्याप्येवं
निरासःनचाभेदखण्डनयुक्तीनांस्वस्यस्वाभेदेपिनसिद्धेदिति स्वव्याघातादाभासता भेदखण्डनयुक्तीनामपिभूषणयुक्त्यभेदेनस्वव्याघातकतापाः
समानत्वादिति तन्नभेदखण्डनयुक्तीनां तत्त्वतोभेदनिवारकत्वेपिव्यावहारिकभेदस्यानिराकरणेनस्वाव्याघातकतोपपत्तेःनचैवंब्रह्मण्यनृतभेदा
स्यतत्त्वतोनिषेधेतत्रतत्तादात्म्यापत्तिःघटेकल्पितघटान्तरभेदभ्रमस्थलेतत्तादात्म्यादर्शनात् ॥ २ दृष्टापत्तिमूलशैथिल्यादिदोषशून्यत्वमेवतर्कस्याशुष्कत्वं
तादृशोपिश्रुत्यादिविरुद्धोहेयोतस्तदविरोधमाहानन्येतिविषयभेदादिनाप्रत्यक्षादेर्व्यावहारिकभेदोविषयःनात्रकाचनभिदेत्यादिश्रुत्यादिकंतुतात्विकत्वेनभेदंनिषेधतोसा
दिनायुक्तीनामाभासतेतियोजनास्वस्ययुक्तेःस्वाभेदेयुक्त्यभेदोभूषणयुक्तीतिभेदसाधकयुक्तीत्यर्थःतत्त्वंतात्विकत्वरूपेणनिवारकत्वेनिषेधकत्वेअथवातत्त्वतःपर्यव
सानतःस्वावतारद्वितीयादिक्षणेषुभेदोच्छेदकत्वेव्यावहारिकभेदानिराकरणेनस्वावतारक्षणरूपव्यवहारकालेभेदानुच्छेदकत्वेनघटइत्यादिकल्पितंयद्घटान्तरन्तस्य

घटेभेदभ्रमस्थलेइत्यर्थःउक्तभेदबाधेपीतिशेषः ॥

ननु घटाद्वैतदैक्यस्य तत्त्वतो निषेधे प्यधिष्ठाननिषेधान्न शून्यवाद इत्याशंक्य ब्रह्मान्यस्यैकस्य निषेध इष्ट इत्याशयेनाह किंचेति। तस्य ब्रह्मणः तदन्य इत्यादि अभे
द इत्यत्र नञर्थो भेदविरोधी भेदाभावव्याप्यादिरूपो वा भेदात्यन्ताभावरूपो वा भेदान्य एव वाच्य इत्यर्थः। भेद इति। भेदस्य विरोधिनि अत्यन्ताभावे वा तद्भेद इ।
त्यर्थः तदनन्यत्व इत्यादि तथा च बाधकधीविषयतावच्छेदकस्य भेदात्यन्ताभावत्वादेर्भेदं विनानुपपत्तेस्तत्सिद्धिरिति भावः भेदाभावग्राहिणा भेदाभावादि
ग्राहिणा प्रतियोगिविलक्षणतया भेदभेदव्याप्येन भेदाभावत्वादिना अभावस्य स्वविषयस्य औदासीन्येन भेदाभावत्वादिकमविषयीकृत्य तथा च भेदाभावत्वा
देर्बाधकधीविषयतावच्छेदकत्वमावश्यकमिति भावः यत्तु तदन्यस्तद्विरोधी तदभावो वा नञर्थः पक्षत्रयेपि दुष्परिहरो भेद इति व्यासेनोक्तं तदसंगतं भेदाभा
वादिमत्ताज्ञानस्यैव भेदान्यवत्ताज्ञानस्याबाधकत्वात्। भेदः सन् इति ज्ञाने सद्रूपं न भेद इति धीबाधकत्वेन वा तदपि संगतं बोध्यं नात्र काचन भिदेत्यादिश्रुतौ भेदाभाव

नचैवमभेदोपि तत्त्वतो निषेध्यः तर्हि स्वरूपापर्यवसाने न शून्यवादापत्तेः किन्त्व ब्रह्मातिरिक्तमैक्यमस्माकं नास्त्येव तस्य च तथा निषेधे श्रुति
विरोधः नच मम घटातिरिक्तो भेदो नास्ति तस्य निषेधे प्रत्यक्षविरोध इति वाच्यम् प्रत्यक्षस्य पारमार्थिकसत्त्वाविषयत्वेनाविरोधित्वस्य प्रागेवो
क्तत्वात् ननु भेदबाधकं न भेदविषयमेव तत्साधकतापत्तेः नाप्यभेदविषयं एवं हि तदन्यस्तद्विरोधी ———— तदभावो वा नञर्थो विष
यो वाच्यः सर्वथा च भेदो दुष्परिहरः तदनन्यत्वे तद्विरोधतदभावत्वयोरयोगात् भेदाभावग्राहिणापि प्रतियोगिविलक्षणतयैवाभावस्य ग्रहणा
च्च औदासीन्येन प्रवृत्तस्येदमिति ज्ञानवद्व्यावर्त्तकत्वाच्चेति चेन्न पारमार्थिकत्वाकारेणाभेदाभावविषयस्यैव बाधकत्वात् न च भेदे दुष्परिह
रता व्यावहारिकभेदेनैव व्यावहारिकतद्विरोधित्वतदभावयोरुपपत्तिसम्भवात् यक्षानुरूपो बलिरिति न्यायात् भेदभ्रमाधिष्ठानतत्त्वगोच
रं ज्ञानं भ्रमबाधकमित्यप्युपपन्नम् उक्तरीत्या भेदवैलक्षण्येन तद्ग्रहणोपपत्तेः ॥ ॐ ॥ ॥ स्यैव प्रमितेर्भेदाभावव्याप्यवत्ताज्ञानेपि भे

दाभावज्ञानस्यापेक्षणात् तस्यैव बाधकत्वमाह पारमार्थिकेति। व्यावहारिकेत्यादि भेदाभावादिज्ञानस्य यथा भेदबाधकता तथा भेदाभावत्वादिरूपं व्याप्यं प्र।
त्यपि बाधकत्वं व्यापकाभावे व्याप्याभावस्यावश्यकत्वेन परंपरया बाधकत्वसंभवात् तथा च भेदोच्छेदपूर्वं भेदाभावत्वं तदुपपादकं भेदाभावादेर्भेदभिन्नत्वं
चास्त्येव तदुत्तरकालं तु उपपाद्यस्य भेदाभावत्वादेरेवानपेक्षितत्वात् न तदुपपादकापेक्षेत्यपि बोध्यं। ननु भेदाभावादिज्ञानमधिष्ठानीभूतशुद्धब्रह्ममात्रा
विषयकत्वात् कथमुच्छेदकमिति चेन्न भेदमिथ्यात्वनिश्चायकत्वेनोच्छेदकत्वस्योक्तत्वात् नन्वधिष्ठानीभूतशुद्धब्रह्मधीः त्वन्मते बाधि — का तथा चाधिष्ठा
नस्य स्वसमसत्ताको बाध्य भेदाद्भेदो वाच्यस्तत्राह भेदभ्रमेति उक्तरीत्या व्यावहारिकेण वैलक्षण्येन भेदेन शुक्तिरूप्यादिभ्रमेपि चित्त एवाधिष्ठानत्वेनाधिष्ठा
नसमसत्ताको भेदः क्वापि न दृष्ट इति व्यावहारिक एव स वाच्य इति भावः॥ ॐ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायं भेद इत्यादि। अयं सद्रूप आत्मा न भेद इति धीर्भेदः सन्निति ज्ञाने बाधिका नात्र भेद इति धीरत्र भेद इत्यत्र बाधिका नायं भेद इति ज्ञानमेव भेदभ्रमानुवादेनाप्याहान्यदे वेत्यादि। अन्यत् भेदान्यत् भेदात्मना यत्प्रत्यभात् ब्रह्म भेदभिन्नमेवेत्यर्थः इति वदित्यादिवदादिना नात्र रजतमित्यस्य ग्रहणं प्रतियोगितयेति। नेदं रजतमित्यत्र भेदस्याधिष्ठानतावच्छेदकत्वेन तद्धीर्बाधिका नायं भेद इति धीस्तु न तथा शुद्धस्यैवाधिष्ठानत्वाद्भेदस्य तदनवच्छेदकत्वात् तत्तस्या भेदबुद्धौ मिथ्यात्वनिश्चायक। तस्माच्चं तच्चनानुपपन्नं भेदं भेदत्वेन केवलभेदत्वेन च बाधकबाध्यधीविषयत्वसंभवात् अत एव द्वितीयाभावत्वद्वितीयत्वाभ्यामेकस्यापि तत्त्वात् क्रियते घटो न तत् भेद इत्यस्य तद्भेदतादात्म्यभ्रमेबाधकत्वं त्वयाप्युच्यते। नात्र भेद इत्यस्य तु नात्र रजतमित्यस्येव — मिथ्यात्वनिश्चायकत्वं निःशंकमेवेति भावः। न चात्रेत्यादि। अत्र घटे पटभेदो नेति धीः पटभेदत्वेनाभावं गाहमानापि घटभेदत्वेनाभावं पटे नावगाहते तथा च पटे घटाद्भेदभ्रमं न निवर्त्तयेदिति भावः। कुत्रापीति घटे।

यत्तु नायं भेदो नास्त्यत्र भेदोऽन्यदेवं भेदात्मना प्रत्यभादित्येवमाकारकं बाधकं ज्ञानं दाच्यं नेदं रजतमितिवत् इदं च सर्वथा भेदावगाहीति कथं तत्र बाधकमिति तन्न प्रतियोगितया तद्ग्रहणास्य बाधकत्वाविरोधित्वात् न चात्र भेदो नास्तीति धीः सर्वथा न भेदाभावमवगाहत इति वाच्यम् अन्यत्र भेदसत्त्वे तद्भेदस्यात्रावश्यकत्वेनाऽत्र भेदो नास्तीत्यस्यैव कुत्रापि भेदो नास्तीत्यत्र पर्यवसानात् एवमेकमेवानेकात्मनाऽभादित्यादि बाधकमनुसन्धेयम् कोऽस्योर्व्यावहारिकभेदेन तद्वत्तयाग्रहणाच्च यथा बाधकत्वयोगस्तथोक्तमेव एतेन भेदाद्भिन्नतया स्वार्थबाधधीर्गाहितेन वा आद्ये भेदः स्थिरोऽन्त्ये तु न सा स्याद्भेदबाधिकेति निरस्तम् स्वरूपेण स्थैर्येपि तत्त्वतोऽस्थिरत्वसंभवात् एवं चात्मप्रविषयत्वादन्योन्याश्रयादेरुत्थानम् उत्थितस्य चनाभासत्वम् किंचायं देश्याभासो निर्वचनवादिनः प्रति नास्मान् वयं हि भासमानो यो भेदः स्वस्वरूपादिपक्षान्तर्भावबहिर्भावाभ्यां वाऽन्येन वा धर्मान्तरेणानिर्वाच्य इति ब्रूमः न च तर्काभासेनानिर्वाच्यत्वे ऐक्यस्यापि तत्प्रसङ्गः भेदे बाधकस्यानाभासतया उक्तत्वात् ऐक्यभेदयोः श्रुत्यनुग्रहाननुग्रहाभ्यां विशेषाच्च ननु ब्रह्म एव नृतादिव्यावृत्तिर्ब्रह्मज्ञानाबाध्याबाच्या मृन्माद्यनात्मकघटादेश्मृन्यादितः स्वज्ञानाबाध्यभे

भेदसामान्याभावधीर्घटे भेदभ्रमं साक्षान्निवर्तयंती अर्थादन्यत्र भेदभ्रमं निवर्त्तयति अन्यत्र विद्यमानस्य भेदस्य घटनिष्ठभेदप्रतियोगितान्याप्यतया व्यापकाभावेन व्याप्याभावज्ञानस्यावश्यकत्वादिति भावः। एकं ब्रह्म। अनेकात्मना मिथो भिन्नात्मना। ननु एकस्वरूपकोटेर्मिथो भिन्नप्रपंचरूपाया भ्रमभासमानकोटेर्भिन्नत्वेन ज्ञानमावश्यकं भ्रमविषयव्यावृत्तत्त्वेनाज्ञातस्याधिष्ठानस्य ज्ञानाद्भ्रमानिवृत्तेस्तत्राह कोऽसौरिति। ननु तादृशभेदस्याधिष्ठानसमानसत्ताकत्वमपेक्षितं तत्राह यथेति। उक्तमिति अन्यूनसत्ताकत्वमेव तस्यापेक्षितमिति भावः। स्थिरो बाधकविषयत्वेन प्रमितः स्वरूपेण व्यावहारिकत्वेन तत्त्वतः प्रमितभेदविषयकत्वेनान्योन्याश्रयो न दोष इति यत्परेणोक्तं तत् दूषयति। एवं चेति। अक्लृप्तेति तत्त्वतोऽप्रमितेत्यर्थः खण्डनकारोक्तसमाधिमाह किंच्चायमिति देश्याभासः पूर्वपक्षाभासः स्वरूपादीति अधिकरणस्वरूपो वा तद

॥ ...पक्षे इत्यादिनेति ॥

॥ नायं भेद इत्यादिग्रन्थे अनेकेति मिथ्यात्वमित्यादि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मघटयोरित्यादि अनृतव्यावृत्तेरधिष्ठानं ब्रह्म इति स्यात्तद्वौ बाध्येत्यर्थः अनृतत्वस्य अनृतस्य घटे घटनिष्ठायाः शून्यव्यावृत्तेरेव अतज्ज्ञानबाध्यत्वस्य घटज्ञानाबाध्यत्वस्य उभयोरावयोः समानत्वात् सप्रमाणकत्वात् न स्यादिति रूप्यतद्भेदयोः समानसत्ताकत्वात् रूप्यमिव तद्भेदोऽपि बाध्येतेति भावः विशेषदर्शनजन्यत्वेति रूप्यादिभेदज्ञानस्योक्तभेदव्याप्यशुक्तित्वादिमज्ज्ञाननिश्चयप्रयोज्यत्वेन प्राबल्यात्तदेव बाधकं। आप्तोपदेशजन्यरूप्यादिभेदज्ञानस्याप्युक्तनिश्चयप्रयोज्यत्वमस्त्येव वस्तुतो रूप्यसामान्यभेदज्ञानमेव बाधकं स च न प्रातीतिको व्यावहारिकरूप्यस्यापि तत्प्रतियोगित्वात् प्रातीतिकमात्रप्रतियोगिकस्यैव प्रातीतिकत्वात् किंचागंतुकदोषजन्यत्वं प्रातीतिकत्वे प्रयोजकं तथा च

न ब्रह्मघटयोरधिष्ठानत्वाऽनधिष्ठानत्वाभ्यां विशेषात् अनृतत्वस्य मृषात्वे तद्व्यावृत्तेरपि मृषात्वस्य युक्तत्वेन घटेऽतज्ज्ञानबाध्यत्वस्योभयोः समानत्वात्। न चैवं प्रातिभासिकरूप्यादिव्यावृत्तेरपि प्रातिभासिकत्वापत्तिः तथा च भ्रान्तिबाधव्यवस्था न स्यादिति वाच्यम् विशेषदर्शनजन्यत्वतदजन्यत्वाभ्यां बाधभ्रांतिव्यवस्थोपपत्त्या प्रातिभासिकत्वस्येष्टत्वात् न चैवं सत्यादिवाक्यस्यानृतव्यावृत्तिबोधकस्याप्रामाण्यापत्तिः तस्या आर्थत्वात् न चैवं व्यावृत्तिवन्मृषाप्रतियोगिकस्यात्यन्ताभावस्यापि मृषात्वेनाधिष्ठानज्ञानाबाध्यात्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वं न स्यादिति वाच्यम् अधिष्ठानज्ञानाबाध्यत्वस्य तत्राविशेषणत्वात् न चैवमात्मनि देहभेदस्य बाध्यत्वे देहात्मैक्यस्य मिथ्यात्वं न स्यादिति वाच्यम् भेदमिथ्यात्वस्य प्रतियोग्यैक्यामिथ्यात्वाप्रयोजकत्वस्योक्तत्वात् न च नित्यानित्यवस्तुविवेकस्य साधनचतुष्टयांतर्गतं ज्ञानं भ्रमः स्यात् तथा च तेनानित्यपरिहारेण नित्ये प्रवृत्तिर्न स्यादिति वाच्यम् हानोपादानोपयुक्तरूपावगाहिधियो व्यावहारिकप्रामाण्यशालितया व्यावहारिकहानोपादानस्य निवर्तयितुमशक्यत्वात् एतेन प्रपंचे सद्वैलक्षण्यस्य मिथ्यात्वे सद्वैक्यापत्तिः जगन्मिथ्यात्वप्रमाणानां चातत्त्वावेदकत्वापात इति निरस्तम् मिथ्यात्वनिरुक्तावुक्तोत्तरत्वाच्च एतेन भेदाद्भेदस्य भेदाभावेऽन्यतरखण्डनसाधनाभ्यामुभयखण्डनसाधने इति निरस्तम् तात्त्विकभेदाभावेऽपि कल्पितभेदेन व्यवस्थोपपत्तेः न च कल्पितेनाकल्पितकार्यप्रतिबन्धायोगः अविद्यया स्वप्रकाशरूपब्रह्मकार्यप्रतिबंधदर्शनात् कल्पितकान्तयाविश्लेषकार्यप्रतिबन्धदर्शनाच्च ननु भेदस्य व्यावहारिकसत्तार्थमपि त्वयाऽन्योन्याश्रयादिकमुद्धरणीयं परस्परसापेक्षेण व्यवहारस्याप्यभावात् न हि व्यावहारिकमृदः स्वजन्यघटसापेक्षत्वं॥ २ रूप्यभेदादिज्ञानस्य विशेषदर्शनादिप्रयोज्यत्वेन प्रमात्वादप्रातीतिकत्वेन न तद्विषयोप्यप्रातीतिको भेदसामान्यस्य मिथ्यात्वं तु दृश्यत्वादिमत्त्वान्मिथ्याप्रतियोगिकत्वं तूपोद्बलकं क्वचित्तेन ब्रह्मघटयोर्ब्रह्ममात्रस्य वा भेदोऽपि मिथ्येति बोध्यं मिथ्यात्वमिति प्रपंचस्येति शेषः अविशेषणत्वादिति प्रातीतिकात्यन्ताभावमादाय तु न व्यावहारिकस्य मिथ्यात्वे सिद्धसाधनं स्वान्यूनसत्ताकत्वेनात्यन्ताभावविशेषणात् उक्तत्वादिति। कल्पितघटाद्भेदस्य मिथ्यात्वेऽपि तदैक्यं मिथ्येत्युक्तं विवेकस्य भेदस्य अतत्त्वावेदकत्वेति अत्यन्ताभावस्य मिथ्यात्वे तत् प्रतियोगित्वरूपं मिथ्यात्वमपि मिथ्या स्यादिति भावः उक्तोत्तरत्वादिति तेषां व्यावहारिकमेव प्रामाण्यमत्यन्ताभावस्याधिष्ठानस्वरूपत्वात्तदंशे तत्त्वावेदकत्वं चेत्याद्युक्तं अकल्पितकार्येति अकल्पितं यद्ब्रह्मरूपमैक्यं तत्कार्येत्यर्थः कान्तयेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तान्योन्याश्रयादिकत्वाद्दर्शनेन ५॥
२ अ·सि· यत्तु कल्पितकान्तायाज्ञानेसत्यपि श्लेषकार्यं प्रतिवन्धकं न तु सेति तन्न कल्पितविषयकज्ञाने कल्पितत्वनियमस्योक्तत्वात् अन्योन्याश्रयाद्यापादनं अन्योन्याश्रयादेर्भे
टी·ल· दसिद्धिविरोधित्वापादनं अन्योन्याश्रयाद्यधीनापाभेदासिद्धेरापादनमिति यावत्। घटपटौ यदि भिन्नौ भिन्नत्वेन प्रतीयमानौ वा स्यातां तन्तदा स्वविशेषकभेदज्ञानप्र
उ· मात्वविरोध्यन्योन्याश्रयादिकौ स्यातामित्यापत्तिर्बोध्या तत्प्रतीतिवास्तवत्वेनेति भेदधीर्यदि वास्तवी स्यात्तदा स्वप्रमात्वविरोध्यन्योन्याश्रयादिका स्यादित्यर्थः विपर्य।
८२ यानुमानं प्रतीतेरवास्तवत्वे पर्यवसन्नं वाच्यं तथा च विषयसत्त्वेपि यथाब्रह्मधीरवास्तवी तथा भेदधीः स्यादित्यर्थान्तरमित्याशयेनाह चरमेति अन्योन्याश्रयादर्शनेन
तत्र प्रत्यये दोषाभावादापत्त्यभावात् व्यर्थविशेषणतया प्रमात्वघटितरूपेणानोक्तसाध्यव्याप्यता भेदप्रमात्वेनोक्तसाध्याभावस्यैव साधनसंभवश्चेति भावः परस्परा
श्रितमिति मृदादेर्घटादिरूपकार्यानपेक्षत्वेपि भेदधीरन्वयव्यतिरेकाभ्यां भेदधीसापेक्षत्वेनाविद्यायैव कल्प्यत्ते तथा च भेदधियं विनापि कस्याश्चिद्भेदधिय उत्प

किञ्चात्र न भेदमात्रेण तद्दर्शनमात्रेण वाऽन्योन्याश्रयाद्यापादनम् तथा सति व्यावहारिकयोरपि तयोरसिद्धिः स्यात् नापि तत्प्रतीतिवा।
स्तवत्वेन तदापत्तिः चरमदृत्स्यवास्तवत्वेपि तद्विषयवास्तवत्ववदुपपत्तेः वास्तवेऽन्योन्याश्रयादर्शनेन व्याप्त्यसिद्धेश्च न च प्रमारूपतत्प्रती
त्या तदापादनम् प्रतीतिसामान्य एवृत्त्वयाऽन्योन्याश्रयस्योक्तत्वेन प्रमात्वपर्यन्तेतन्त्रदोषाभावात् नापि तत्प्रतीतेर्धर्मिप्रतियोगिसापेक्षत्वेन त
दापाद्यन्तावतापि तत्सापेक्षत्वमात्रस्यैव निवृत्तेरिति चेन्न अस्माकमविद्यासामर्थ्यात्सर्वानुपपत्तिविधूननोपपत्तेः न हि मायायामसंभावनीयं ना
मतथा च परस्पराश्रितमपीन्द्रजालवद्दर्शयिष्यति न चेश्वरसामर्थ्यात्तादृशमपि सत्यं स्यादिति वाच्यम् उभयसिद्धमृषाभूतेन्द्रजालस्थले कारणादि
व्यवस्थोल्लंघिकार्यादिदर्शनवदन्यत्र तथा अदर्शनात् दर्शने च मृषात्व एव पर्यवसानात् आपादनं च भेदस्तत्प्रतीतिश्च यदि मायिकी न स्यात् सर्वव्य
वस्थोल्लंघिनी न स्यात् सर्वव्यवस्थोल्लंघिनी चेयं तस्मान्मायिकीति विपर्ययपर्यवसानात् मायिके व्यवस्थोल्लंघनस्य दर्शनेन व्याप्तिसिद्धेः तस्मात् स्व
त्याऽस्वव्याघातकयुक्त्या च भेदस्य बाधात् अभेदस्याबाधाच्च पटे स्वाभेदाऽस्वभेदयोर्व्यावहारिकत्वे समानेपि स्वाभेदं परित्यज्य भेद एव सर्वे यामद्वेषो ना
कारणकः सामान्यतो भेदखण्डनम् ॥१५॥

त्तिरपि भूषणं न तु दूषणं इन्द्रजालस्थले लक्षप्रकारणं विना कार्योत्पत्तिवत्। अत एव विचारकाले कारणीभू
तभेदबुद्धौ भेदबुद्ध्यन्तरापेक्षायामनवस्थाकार्यभूतभेदबुद्धेस्तद्धेतुत्वे चान्योन्याश्रय इत्यादितर्कैर्भेदस्याविद्यकत्वनिश्चयात् तस्य तात्त्विकप्रामाण्याभावेपि प्रकृत।
विचारानधिकरणरूपव्यवहारकालाबाध्यविषयकत्वेन व्यावहारिकप्रामाण्यमव्याहतमिति भावः अदर्शनादिति। यत्तु शीतातपसरित्सागरादौ मायकभिन्नेपि राम:
तदुल्लंघनं दृष्टमिति तन्तुच्छं। कालविशेषादिकारणोल्लंघनस्य तत्राभावात् दर्शने इन्द्रजालादौ तादृशव्यवस्थोल्लंघनदर्शने मायिकी अविद्योपादानिका यदि स्मि २९२
थ्या न स्यात्तदा युक्तिविरुद्धं न स्यादित्यत्र तात्पर्यं अभेदस्य ब्रह्मस्वरूपस्य स्वाभेदेति। स्वभेदाभावत्वविशिष्टेत्यर्थः। भेद एवेति। भेदघटित एवेत्यर्थः ॥ ❁ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवकाराद्ब्रह्मस्वरूपाभेदे प्रद्वेषव्यवच्छेदः भेदाभावत्वविशिष्टे तु भेदघटितत्वात् प्रद्वेषोस्त्येवेति भावः। अथवा अभेदस्य ब्रह्मस्वरूपत्वेनाबाधात् व्यावहारिकत्वे ह्वयोः समानेपि भेदे द्वेषोऽकारणाक इति यत्परेणोक्तं तन्नेत्यर्थः। श्रीः तर्कैरित्यादि भेदः सामान्यतोऽन्यथा॥ १५॥ ब्रह्मैक्यस्य चेति। प्रतीतौ सापेक्षस्येति शेषः अविद्या निवृत्तित्वादिना ज्ञानमविद्यादिधीसापेक्षमिति भावः। स्थिताविति। आश्रयप्रत्यक्षस्य जातिप्रत्यक्षहेतुत्वे मानाभावात् प्रतीतौ निरपेक्षत्वमिति भावः प्रतीताविति नीलतरत्वं नीलान्तरापेक्षयातिशयत्वयुक्तनीलत्वं। तच्च नानावस्तुघटितत्वेन विशेषणीभूतार्थज्ञानाधीनज्ञानकमिति भावः। ज्ञानस्येत्यत्र ब्रह्माभेदस्येत्यत्र च प्रतीतौ सापेक्षस्येत्यनुषज्यते। अर्थप्रकाशत्वेन ब्रह्मभेदाभावत्वेन च ज्ञानमर्थादिज्ञानाधीनमिति भावः कालसापेक्षस्येति आख्यातार्थवर्त्तमानकालीनसत्ताप्रतीतौ उक्तकालधीसापेक्षत्वं सापेक्षत्वस्य सापेक्षरूपावच्छिन्नत्वस्य तात्त्विकनिरपेक्षत्वेति तात्त्विकं यद्ब्रह्मरूपं तेन निरपेक्षत्वेत्यर्थः आविद्यकविशिष्टरूपेणैव सापेक्षता तच्च न निरपेक्षब्रह्मेति भावः। मन्मते घटत्वादिजातिः सद्रूपब्रह्मैव तदन्या वा उभयथापि व्यक्तिसम्बन्धित्वेन तस्याः न व्यक्त्यैक्यं संबन्धस्य भे।

ननु निरपेक्षस्वरूपत्वे सापेक्षत्वानुपपत्तिरिति यदुक्तं तत्तावद्युक्तं अविद्यानिवृत्तेर्जीवब्रह्मैक्यस्य च तवमते मतद्वयेपि स्थितौ व्यक्तिसापेक्षस्य जातिमात्रस्य प्रतीतौ सापेक्षस्य नीलतरत्वादेरर्थप्रकाशात्मकज्ञानस्य ब्रह्मणि ब्रह्माभेदस्यास्ति ब्रह्मेत्यादौ कालसापेक्षस्यास्ति। त्वस्य निरपेक्षब्रह्मव्यक्त्यादिरूपतायादर्शनादिति चेत् न अविद्यानिवृत्तिजीवब्रह्मैक्ययोः प्रतीतौ सापेक्षत्वस्याविद्यकतया तात्त्विकनिरपेक्षत्वविरोधित्वाभावाज्जातिमात्रस्य व्यक्त्यभेदासिद्धिः व्यक्तिसमानसत्ताकघटत्वादौ तदभावात् व्यक्त्यसमानसत्ताकसत्तादिजातौ तु सापेक्षत्वस्य काल्पनिकत्वात् नीलतरत्वादेर्व्यक्तिरूपतासिद्धौ हेतोरभावात् ॥ ॥ ॥ ८ दनियतत्वात् किञ्च आद्ये न स्थितौ सापेक्षता अ

नाश्रितत्वात् अन्त्ये त्वाह व्यक्तिसमानेति सृष्ट्यादिकाले घटत्वादिकं जायते अनादिपक्षे वा विद्यारूपत्वे तु न जायते वा आद्ये घटाद्युत्पत्ति पूर्वं यत्र स्थिति र्घटादिकालेपि तत्रैव घटे घटत्वमित्याद्यैसम्बन्धमात्रं भाति तावतैव जातेर्व्यक्तिसापेक्षत्वे व्यक्तेरपि जातिसापेक्षता स्यात् अन्त्ये त्वविद्यापाईश्वराश्रितत्वेन सुतरां। न व्यक्त्याश्रितत्वं अतएव पक्षद्वयेपि जातेर्न व्यक्त्यैक्यं नहि पूर्वोत्पन्नस्य पश्चाज्जातविभिरैक्यं नवानादिसाद्योस्तदित्याशयेनाह तदभावादिति व्यक्त्याश्रितत्वव्यत्ययेऽस्योरभावादित्यर्थः ननु ब्रह्मैव सर्वा जातिरिति पक्षे घटः सन्नित्यादिबुद्धौ त्रिकालाबाध्यत्वरूपेण सत्ता जातिभाने विशेषणीभूतत्रिकालादिज्ञानापेक्षणात् निरपेक्षब्रह्मणोपि सापेक्षत्वमस्त्येव तत्राह व्यक्त्यसमानसत्ताकसत्तादिजातौ त्विति। व्यक्त्यसमानसत्ताकं यद्ब्रह्म तदेव सत्तादिजातिरिति पक्षे त्वित्यर्थः सापेक्षत्वस्य त्रिकालाबाध्यत्वादिरूपविशिष्टस्य ———— नीलतरत्वादेः। नीलतरत्वादिस्वरूपस्य हेतोः प्रतीतौ सापेक्षत्वस्य। नीलान्तरापेक्षयातिशयत्वादिरूपेण ज्ञाने न्यधीसापेक्षत्वेपि तत्स्वरूपनिष्ठानवच्छिन्नविषयताशालिज्ञानेन न तदिति भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि· टी·ल· उ· ८३

सापेक्षतायाः सापेक्षरूपविशिष्टतायाः तत्त्वतो निरपेक्षस्य तत्त्वतो निरपेक्षत्वस्य सामानाधिकरण्यासिध्या तत्त्वतः सापेक्षस्य सामानाधिकरण्यासिद्ध्या न तर्काभासता। भेदो यदि तत्त्वतो निरपेक्षघटादिस्वरूपः स्यात्तदा तत्त्वतः सापेक्षो न स्यात् परमते च तत्त्वतः सापेक्ष एव भेदस्तस्मान्नोक्तस्वरूपद्वित्वेऽवंरूपेण तर्कस्य ध्रीचीनता अध्यस्तं मिथ्या वाध्यं ज्ञाननिवर्त्यं तात्विकं ज्ञानसामान्यानिवर्त्यं विरोध्यनुरोधिनां विरोधित्वेन परोक्तानां भेदरूपप्रतियोगिसापेक्षत्वेन भेदाभावात्मकैक्यरूपब्र ह्मणो भेदरूपं यत्प्रतियोगि तत्सापेक्षत्वेन सापेक्षत्वव्यवहारात् जीवब्रह्मणोरभेद इत्यादौ प्रतियोगिघटितरूपेणाव्यवहारात्। वैपरीत्यं तादात्म्यस्य सप्रतियो गिकत्वेन भेदरूपप्रतियोगिघटितरूपेणाव्यवहारः असाधारणधर्मेति घटत्वादिरूपो अतिरिक्तास्वण्डधर्मो वेति भावः भेदस्येति तदपेक्षत्वेपीति शेषः अभेद

अर्थप्रकाशात्मकज्ञानस्य ब्रह्माभेदस्य च सापेक्षतायाः काल्पनिकत्वात् अस्ति ब्रह्मेत्यादावप्ये———वमेवतया च तत्त्वतो निरपेक्षस्य सामा नाधिकरण्यासिद्ध्या न तर्काभासताव्याप्तिसिद्धेः अत एवैक्यस्यासरूपत्वेः द्वैतहानिर्मिथ्यात्वे भेदस्य सत्यत्वप्रसङ्गः यत्र यदध्यस्तं तत्र त द्विरोधितज्ज्ञानावाध्यं यथा शुक्तावरूप्यत्वं यत्र परैक्यं वाध्यं तत्र तद्भेदस्तज्ज्ञानावाध्यः यथा दूरस्थवनस्य तयोर्भेद इति वा यत्र यदध्यस्तं तत्र

एय तद्विरोधि तात्त्विकं यथा ब्रह्मनृतत्वस्याध्यस्तत्वे सत्यत्वं तात्विकमिति वा व्याप्तेरिति निरस्तम् ऐक्यस्य ब्रह्माभेदानङ्गीकारात् विरोध्यनुरोधिनां स्वेषां ब्रह्मणि कल्पितत्वेन तज्ज्ञानवाध्यत्वेन व्याप्तीनामसिद्धेः नन्वैक्यस्य निरपेक्षत्वे तत्त्वंपदार्थपराणां सत्यं विज्ञानघन इत्यादीनामैक्यपरम हावाक्यैकवाक्यत्वाभावेन वैयर्थ्यं स्यादिति चेत् न ऐक्यस्य स्वप्रकाशब्रह्माभिन्नतया स्थितिप्रतीत्यादौ निरपेक्षत्वेपि लक्षितार्थभेदभ्रमनिवर्त्त कवृत्तिजनने पदार्थसापेक्षतया स्वरूपपरवाक्यानामेकवाक्यतायाः सत्त्वाद्भेदरूपप्रतियोगिसापेक्षत्वेन तत्र सापेक्षत्वव्यवहारात् न च घटः पटो नेति नञर्थस्य भेदस्यैव तादात्म्यनिषेधरूपत्वेन वैपरीत्यम् तादात्म्यस्य तन्निष्ठासाधारणधर्मरूपत्वे भेदस्याभेदानपेक्षत्वात् अभेदरूपत्वे भे ———दसापेक्षत्वेनैव तस्य तदनपेक्षत्वात् न चैतावतैक्यस्य सापेक्षत्वापत्तिः काल्पनिकस्येष्टत्वात् अत एवाज्ञानहानिवद्ब्रह्मरूपधीवद्भेदव त् स्वरूपत्वेपि भेदस्य सापेक्षत्वं हि युज्यत इति निरस्तम् तव सापेक्षत्वनिरपेक्षत्वयोस्तात्त्विकतया दृष्टान्तवैषम्यात्॥ ॥ ॥ ॥

नपेक्षत्वात् भेदाभावरूपैक्यात्मकब्रह्मानपेक्षत्वात् भेदसापेक्षत्वेन तस्य उक्तैक्यस्य तदनपेक्षत्वात् भेदप्रतियोग्यनपेक्षत्वात् ननु सापेक्षभेदप्रतियोगिकत्वेनाभे दरूपैक्यस्यापि सापेक्षत्वं तत्राह न चेति एतावता सापेक्षभेदप्रतियोगिकत्वेन इष्टत्वादिति। उक्तप्रतियोगिकत्वोपहितरूपं सापेक्षं तस्य काल्पनिकत्वेन निरपे क्षैक्यस्वरूपान्यत्वान्न दोष इति भावः। ब्रह्मरूपधीवत् ब्रह्मस्वरूपज्ञानवत्। तवेत्यादि मन्मते अज्ञाननिवृत्तिस्वरूपस्य निरपेक्षत्वेपि तदन्यकल्पितमज्ञाननिवृ त्तित्वविशिष्टं रूपं सापेक्षमिति युक्तं त्वत्तु घटप्रतियोगिकभेदस्वरूपं सापेक्षमकल्पितरूपं निरपेक्षघटादिस्वरूपमित्ययुक्तमिति भावः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमेवेति। ऐक्यस्वरूपब्रह्मणो भेदाभावत्वोपहितं सापेक्षरूपं यथा कल्पितं तथा भेदस्वरूपब्रह्मणः सापेक्षं सप्रतियोगिकत्वोपहितं रूपं कल्पितमेवेत्यर्थः श्रुतत्वेन
नात्र काचन भिदास्ति नेह नानास्ति किंचनेत्यादिश्रुत्या बोधितत्वेन ननु भेदत्वादिकल्पितरूपेण निषेध्यत्वेऽपि भेदस्वरूपस्य तदभाव इति चेन्न काचन भिदा किंचनेत्यादि
नाकेनापि रूपेण भेदस्वरूपं नास्तीत्यर्थलाभेन भेदस्वरूपविषयकत्तत्तद्धीविषयत्वादिनापि निषेधलाभात् भेदस्य ब्रह्मस्वरूपत्वासम्भवात् नहि ब्रह्मणस्तत्तद्धीवि
षयत्वेन निषेध्यत्वं भिदागतत्तत्तद्धर्मोपलक्षितस्याप्युक्तवाक्येन निषेधाच्च वस्तुतः सापेक्षतावच्छेदकसप्रतियोगिकत्वभेदत्वादिरूपेण मिथ्यात्वस्वीकारेऽस्मिद्धं नः स
मीहितमत एव प्रपंचभेदस्यात्यन्ताभावत्वादिकं ब्रह्मणि मन्मते स्वीक्रियत एव सप्रतियोगिकत्वाद्युपहितरूपस्यैव हि मिथ्यात्वसिद्ध्यर्थमस्माकं प्रयासो अत एव घटा
दिरूपे भेदे सप्रतियोगिकं भेदत्वं कल्पितमित्यादिप्रलापोऽस्मदिष्ट एव तथापि हि घटादिस्वरूपादकल्पितत्वेन त्वदभिमतादतिरिक्तं सप्रतियोगिकं घटादिभेदस्वरू
पं त्वया स्वीकृतमेव तथा च तत्रापि ततोऽतिरिक्तं सप्रतियोगिकभेदत्वान्तरोपहितं रूपं कल्पितं त्वया वाच्यमिति कथमनवस्थादिपरिहारः तत्र। भेदे अभेदश्रुतिर्ब्रह्मै
क्यबोधकश्रुतिः ऐक्यं तु ब्रह्माभेदबोधिका सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिस्तया ब्रह्मस्वरूपस्य सर्वाभेदस्य बोधनादिति भावः भेदत्वं घटादिस्वरूपं तदन्यद्वा अन्त्ये भे

नच भेदेऽप्येवमेवास्तु भेदस्य निषेधप्रतियोगितया श्रुतत्वेन ब्रह्मरूपत्वाभावात् नच तत्राभेदश्रुतिरस्ति एतेन स्वरूपे निरपेक्षस्याप्यभेदस्याभे
दत्वेन सापेक्षत्ववत्स्वरूपेण निरपेक्षस्यापि घटस्य भेदत्वेन सापेक्षत्वमस्तु अवच्छेदकभेदेन सप्रतियोगित्वाप्रतियोगित्वे अपि तद्वदिति निरस्तं
भेदस्य स्वरूपतो निरपेक्षत्वे निःप्रतियोगिकत्वे च परान्प्रतीव स्वमपि प्रत्यविशिष्टतया स्वव्याघातः नचैवमभेदस्यापि स्वान्प्रतीव परान्प्रति तथा स
ति तथात्वापत्तिरिष्टापत्तेः घटत्वादिना भेदः परं कल्पितः स्वरूपतस्तु भेद एव तथा सति परत्वं परं व्याहतं न स्वरूपत्वमपि ॥ ॥

दस्यैवातिरिक्तत्वौचित्यात् भेदत्वस्य तत्स्वरूपत्वसंभवात् अतिरिक्तभेदत्वविशिष्टरूपेण घटादेः स्वातिरिक्तत्वेन स्वधर्मत्वात् तादृशरूपनिष्ठभेदत्वान्तरविशिष्टस्यापि
ततोऽन्यत्वादनवस्थातादवस्थ्याच्च आद्ये त्वाह भेदस्येति। घटादिभेदस्वरूपभेदस्येत्यर्थः स्वरूपतः येन भेदत्वेन रूपेण सापेक्षादिकं घटादिस्वरूपादनतिरिक्तेन ते
न रूपेण परान् प्रतीत्यादि घटादिविशेषितेनेव स्वविशेषितेनापि भेदत्वेन व्यवहारविषयतासंभवेन भेदस्वरूपताव्याघात इत्यर्थः घटादिस्वरूपेण भेदत्वेन।
निरपेक्षत्वादेरावश्यकत्वेन तेन रूपेण सापेक्षत्वसप्रतियोगिकत्वाद्यसंभवात् घटो न पट इत्यादौ पटादेः प्रतियोगित्वादिभानासम्भवात् सम्बन्धान्तरस्यैव भानं।
तथा च घटस्यापि तादृशसम्बन्धभानसम्भवात् घटो न घट इत्यपि स्यादतो घटादेर्भेदस्वरूपताव्याघात इति भावः अभेदस्य ब्रह्मस्वरूपैक्यस्य स्वान् प्रति जीवान् ई
श्वरञ्च प्रति परान् प्रति अविद्यादीन् प्रति। तथात्वापत्तिः एकत्वापत्तिः ब्रह्मण्येव घटत्वपटत्वादिना भेदस्य कल्पितत्वात् घटादेः स्वरूपं ब्रह्मैवेति ब्रह्मणो घटा
द्यैक्यरूपत्वमव्याहतं घटादिभिन्नत्वं तु ब्रह्मणो व्याहतं कल्पितत्वादित्याह घटत्वादिनेत्यादि ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ०सि० यत्त्वित्यादियत्स्ववाचकशब्दवाच्यतावच्छेदकरूपेणप्रतीतौप्रतियोगिधीसापेक्षंतत्सप्रतियोगिकंस्ववाचकविषयादिपदवाच्यतावच्छेदकविषयत्वादिरू
टी०ल० पेणप्रतीतौनिरपेक्षत्वस्यघटादौभेदादौचाविशिष्टत्वात्साधारण्येनेतिवाचकविशेषणंस्वघटकरूपावच्छिन्नंप्रतीत्यर्थः तथाचभेदत्वादिविशिष्टघटकरूपा
उ० वच्छिन्नवाच्यतावच्छेदकभेदत्वरूपेणधीःप्रतियोगिज्ञानसापेक्षैवेतिभेदत्वरूपेणसप्रतियोगिकत्वमेवेतिभावः। भेदस्यस्वरूपत्वेघटादिस्वरूपत्वेतदन्यत्वा
८४ सिद्धेर्घटादिस्वरूपस्यसप्रतियोगिकत्वासिद्धिप्रसंगात् अत्रभेदत्वादिनाधीसामान्यस्यप्रतियोगिज्ञानाजन्यत्वात् प्रत्यक्षप्रतीतौतत्सापेक्षत्वंलक्षणेनिवेश्यंतथा
चाणुत्वादिरूपेणसप्रतियोगिकत्वनिरुक्त्यसम्भवःतेनरूपेणप्रत्यक्षासंभवादित्याद्यपिवोध्यंघटभेदरूपार्थाभेदेशब्दभेदमात्रेणसापेक्षत्वासम्भवः अर्थभेदस
त्वेतुशब्दोल्लेखोऽप्रयोजकस्तंविनापितदुभयप्रतीतेरित्याशयेनाहशब्दानुल्लेखइतिलयेत्यादिल॑यादिपदेनञोऽभावेपिकारणगतकार्यध्वंसत्वरूपस्येवलघु

यत्तुसप्रतियोगिकनिष्प्रतियोगिकव्यवस्थातुयत्साधारण्येनस्ववाचकप्रवृत्तिनिमित्तावच्छेदेनप्रतीतौप्रतियोगिप्रतीतिसापेक्षंतत्सप्रति
योगिकमन्यत्तनिष्प्रतियोगिकमितितन्नस्वरूपत्वेभेदस्यतदन्यत्वासिद्धेः एतेनैकस्यार्थस्यलघुत्वकठिनत्वादिनोल्लेखेननिरपेक्षत्वेप्यगुरु
त्वाद्द्रवत्वादिनोल्लेखेनसापेक्षत्वमपियथातथाघटइत्युल्लेखेननिरपेक्षस्यापिभेदइत्युल्लेखेसापेक्षत्वोपपत्तिरितिनिरस्तम् शब्दानुल्लेखेपिसा
पेक्षत्वनिरपेक्षत्वयोरनुभवाच्चलयादिवन्नअनुल्लेखमात्रेणदृष्टान्तासम्प्रतिपत्तेश्च नचैकस्यैवगमनस्यगच्छतिचलतिशब्दोल्लेखाभ्यामे
कस्यैवचप्रयत्नस्यकरोतिप्रवर्त्ततइतिशब्दोल्लेखाभ्यांकर्मसापेक्षत्वनिरपेक्षत्वयोःशब्दस्वभावप्रयुक्तिदर्शनात्तत्रापिघटभेदशब्दोल्लेखेन
सापेक्षत्वनिरपेक्षत्वेस्यातामितिवाच्यम् अर्थगतसकर्मकत्वादीनांशब्दस्वभावानधीनत्वात् प्रत्युतैकस्मिन्नेवतपधातावर्थभेदेनत
योर्दर्शनात् तपतिऋषिःतपतिपृथिवींसवितेत्यादौ ॥ ॐ ॥ ॥ कठिनादिपदेपिगुरुत्वद्रवत्वादिशून्यत्वरूपस्यसप्रतियोगिकस्यप्रतीत्या

सापेक्षत्वंतत्राप्यस्तीतिदृष्टान्तासिद्धिरित्यर्थः नचैकस्येत्यादियथागमिचल्यादीनामर्थाभेदेपिगम्यादेःकर्मवाचकपदयोगरूपाकांक्षासकर्मकत्वरूपातदर्थ
वोधकत्वोपयुक्तानतुचल्यादेस्तथाघटभेदादिपदानामर्थाभेदेपिभेदादिपदस्यार्थवोधकत्वोपयुक्तापदादित्यादिपदयोगरूपाकांक्षानतुघटादिपदस्येत्यर्थःसकर्मक
त्वादिरूपंकर्मसापेक्षत्वादिकंनकर्मवाचकपदयुक्तत्वादिरूपंशब्दनिघ्नन्त्यासतिग्रामंचलतीत्यादिपदस्यापिप्रयोगसम्भवेनचल्यादेरपिसकर्मकतापत्तेःकिं
तुतार्किकादिमतेस्वविशेषणत्वेनधातुवाच्यंयस्यफलन्तादृशव्यापारत्वंवैयाकरणादिमतेतुस्वानाश्रयवृत्तित्वस्वविवाचकधातुवाच्यफलंयस्यव्यापारस्यतत्त्वंए
वंसप्रतियोगिकत्वादिकमपिप्रतियोगिताविशेषनिरूपितानुयोगिताविशेषवत्त्वंतथाचवस्तुमाहात्म्यार्थभेदादेवसकर्मकत्वादिव्यवस्थेत्याशयेनाहार्थगतेतिस्वभा
वेति।स्वभावमात्रेत्यर्थः एकशब्दप्रतिपाद्यत्वेपिसकर्मकत्वाकर्मकत्वादिदर्शनादपिनतेषांशब्दस्वभावाधीनत्वमित्याशयेनाह प्रत्युतेति ॥ ॐ ॥ ॐ ॥

रामः
२९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंधात्वर्थइतिमतेइतिफलमेवधातुवाच्यंव्यापारस्तुआख्यातार्थइतिमंडनादिमतेफलंव्यापारश्चधातुवाच्याविति वैयाकरणादिमतेचसंयोगरूपार्थभेदात्संयोगस्यगम्यर्थस्यचल्याद्यर्थात् भेदात् मतान्तरेतार्किकादिमते उत्तरेत्यादिसंयोगानुकूलक्रियात्वेनगमिवाच्यतेत्यर्थः पूर्वेतिपूर्वदेशविभागफलक्रियात्वेनचलिवाच्यताचलेःस्पंदिसमानार्थकत्वात् स्पंदेरीषच्चलनार्थकत्वात् विभागफलकक्रियात्वस्यैवेषच्चलनत्वरूपत्वात्। पूर्वदेशविभागश्चपूर्वदेशीयात्यन्तिकविभागस्तेनक्रियामात्रस्यपूर्वदेशविभागजनकत्वेपिनदोषः अतएववैयाकरणैर्दधिस्पंदते इत्युदाहृतंपूर्वदेशाद्विभक्तमपिपुनस्तत्रैवसंयुक्तंदधितथोच्यते पूर्वविभागफलकइतिपाठेतुक्रियात्वेनैवचलिवाचितेत्यर्थःसंयोगस्यवाच्यतानवच्छेदकत्वेपिवस्तुगत्याक्रियाफलसंयोगमादाययदि सकर्मकत्वं तदाविभागमादायापितत्स्यादितिज्ञापनायफलकान्तमुक्तं यथाश्रुतेविभागस्यचलिवाच्यतानवच्छेदकत्वेनतदाश्रयस्यचलिकर्मतापत्तेरसंगतिः अनुकूलयत्नस्येतिकालसम्बन्धप्रयोजकयत्नत्वस्येत्यर्थः॥उक्तसम्बन्धरूपफलवत्त्वाद्घटादेःकरोतिकर्मता आख्यातस्यापिकरोतिनाविवरणात् तदर्थकत्वं

एवंचदृष्टान्तेप्यऽर्थभेदएवफलव्यापारत्वर्थइतिमतेसंयोगरूपार्थभेदात् मतांतरेतूत्तरसंयोगावच्छिन्नस्पन्दस्यगम्यर्थत्वंपूर्वविभागफलकस्पन्दस्यचलत्यर्थत्वम् अनुकूलयत्नस्यकरोत्यर्थत्वंयत्नमात्रस्ययत्यर्थत्वमिति नचभेदत्वमेवसापेक्षंनतुभेदइतिवाच्यम् सापेक्षतयाविशेष्यस्यैवानुभवात् अन्यथाघटप्रतियोगिकंभेदत्वमित्युल्लेखःस्यात् एतेनभावाभावस्वरूपत्वान्नान्योन्याभावतापृथगित्युक्तेनस्वरूपमात्रंभेदःकिंत्वन्योन्याभावःसचवस्तुनःसविशेषाभिन्नइत्युक्तेश्चघटादिरेवभावाभावतयाभेदइतिनिरस्तम् घटतदभावस्यत्वेभावत्वाभावत्वयोर्विरुद्धत्वेनकल्पनात्कथंतदाश्रयैक्यम् नचाविद्यानिवृत्त्यद्वैतयोरपिकथंब्रह्मैक्यमितिवाच्यम् अस्मन्मतेतत्राभावत्वस्यकल्पितत्वेनमायिकतयाविरोधाभावात् तवतुद्वयोरपितात्त्विकत्वेनविरोधस्यदुष्परिहरत्वात्॥ ११

यक्तंचेदंन्यायकुसुमांजल्यादौविवेचितंचप्रतिकर्मव्यवस्थायांविशेष्यस्यभेदस्वरूपस्यभेदत्वस्यातिरिक्तत्वानतिरिक्तत्वविकल्पादिकमपिपूर्वोक्तंवोध्यंपृथगितिसप्तम्यंतंघटान्योन्याभावत्वंघटादिभ्यःपृथक्भूतेवस्तुनिनेत्यर्थः यत्तुज्वलितिकसंतेभ्योणइतिणप्रत्ययप्रकरणेभवतेश्चेतिसूत्रस्यकाशिकायामुक्तत्वात् कर्तरिविहितणप्रत्ययांतोभावशब्दस्तथाचान्योन्यंनभवतीत्यन्योन्याभावस्तस्यभावोन्योन्याभावतान्योन्याभवनमितियावत्। तथाचान्योन्याभावस्त्वलन्तार्थइतितन्न अष्टाध्याय्यांभवतेश्चेत्युक्तसूत्राभावादतएवभवतेर्णिजंतात्पचाद्यचिसिद्धंभावपदंभावयतीतिभावइतिमहाभाष्यंतथाचभूप्राप्तावितस्यचुरादेस्तत्पदंवस्तुमात्रार्थकं।सविशेषाभिन्नइतिघटाद्यभिन्नेपितत्रघटादिभेदकार्यकारिणोघटादेर्विशेषाख्यस्यातिरिक्तपदार्थस्यस्वीकारात्तस्यसप्रतियोगिकत्वादितिभावः विरोधस्येति अतिरिक्तस्याखंडोपाधिरूपाभावत्वस्यस्वीकारेऽभावस्यैवातिरिक्तत्वमुचितंनचाभावत्वमेवैकमतिरिक्तंयुक्तमभावानामतिरिक्तानामपिनानात्वस्यवाच्यत्वादितिवाच्यं एकस्यैवाभावस्यघटादिव्यक्तिप्रतियोगिकत्वादिविशिष्टरूपेणतत्तदधिकरणसम्बन्धनियमसम्भवात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ॰सि॰ अथैवंतत्तत्प्रतियोगिकत्वविशिष्टाभावस्वरूपाणांनानात्वमागतमेवेतिचेत्तर्हितत्तत्प्रतियोगिकत्वविशिष्टाभावत्वस्वरूपाणामपिनानात्वमापास्यतिनह्य-
टी॰ल॰ भावत्वमेकंवदतोपितत्तत्प्रतियोगिकत्वविशिष्टाभावत्वानामैक्यमभावत्वस्यभावभिन्नत्वरूपत्वेतुभावेषुघटादिषुतद्विरोधइतिभावः।एतेनघटाभावाभावा-
उ॰ देर्घटाद्यन्यस्यकल्पनेगौरवाद्घटादेरेवतत्त्वादभावत्वंभावेषुकथंविरुद्धंकिञ्चघटोनपटइत्यादौभेदत्वमेवानुभूयतेनाभावत्वंतथाचभेदत्वस्यघटादौस्वीकारात्न
८५ दोषइतिपरास्तंभेदत्वस्यापिसंसर्गाभावान्यभावभिन्नत्वरूपत्वेविरोधादतिरिक्तस्वरूपरूपत्वेचभेदस्यैवोक्तरीत्यातदौचित्यात्अन्यथाघटादिरूपभेदस्यघटादावाधा-
रत्वबुद्ध्यसंभवात् तदैक्यप्रमितीतितद्भिन्नेपितदैक्यभ्रमविषयत्वसत्त्वात्प्रमितीत्युक्तंयत्रेत्यादि।यत्रघटादौयस्यपटादेस्तादात्म्याध्यासविरोधियत्ज्ञानंतत्तस्यत-
त्रपटादेर्भेदइत्यर्थःस्ववृत्तीत्यादि।स्वंभेदप्रतियोगीयन्निष्ठस्ययत्किञ्चित्धर्मस्याधारत्वाभावोयत्रतस्यतत्रसएवभेदइत्यर्थःस्वावृत्तीत्यादि।यन्निष्ठत्वशून्यस्यधर्मस्य

अतएवतत्तादात्म्यायोग्यत्वंवा तदैक्यप्रमित्यविषयत्वंवायत्रयद्दर्शनंयत्तादात्म्याध्यासविरोधितत्त्वंवास्ववृत्तियत्किञ्चिद्———
र्मानाधारनिष्ठयत्किञ्चिद्धर्मानाधारत्वस्वरूपंवास्वावृत्तियत्किञ्चिद्धर्माधारानिष्ठधर्माधारत्वरूपंवास्वरूपत्वंतद्भेदत्वम् अनाधारत्वंचाधारत्वराहित्यं।
नत्वाधारादन्यत्वमितिनान्योन्याश्रयइतिनिरस्तम्स्वरूपत्वेसापेक्षत्वानुपपत्तेःअतिरेकेऽनवस्थानात् अत्यन्ताभावान्योन्याभावयोरैक्यापत्तेःप्रमितिदर्श-
नादिघटितत्वेनचक्षुराद्यगम्यतापत्तेश्चकिंचभेदस्यघटस्वरूपत्वेतन्निरूपकप्रतियोगिनोपितत्स्वरूपतापत्तिःनहिभेदरूपमात्रंघटःकिन्तुपटप्रति-
योगिकभेदरूपइतिनन्वनायंदोषःभेदप्रतियोगिनउपलक्षणत्वेनस्वरूपतायामनन्वयात् अन्यथादुःखनिवृत्तेःपुमर्थतयादुःखस्यापिपुमर्थत्वंदो-
षाभावस्यसाधकताप्रयोजकत्वेदोषस्यापिसाधकताप्रयोजकत्वमनृतव्यावृत्त्यज्ञाननिवृत्त्योरज्ञानादिप्रकाशरूपज्ञानस्यचब्रह्मस्वरूपत्वेऽनृतादी-
नामपितद्रूपत्वमज्ञाननिवृत्तेर्मोक्षत्वेऽज्ञानस्यमोक्षत्वंचस्यात् नचलम्बकर्णादौकर्णादेर्विशेषणतयाऽन्वयदर्शनात्तत्रतथा चित्रग्वादिषुऽनन्वयात्त-
थैवकिंनस्यात् अन्यथोदाहृतस्थलेऽगतेःनचप्रतियोगिनउपलक्षणत्वेतदज्ञानेपिकाकाज्ञानेगृहज्ञानवत्तज्ज्ञानापत्तिरिष्टापत्तेःअन्यथोदाहृतागतेश्च॥

धारेनवर्त्ततेयदाधारत्वंतत्तन्निष्ठोभेदइत्यर्थःस्वरूपत्वेउक्तायोग्यत्वादेर्घटादिस्वरूपत्वेअत्यन्तेत्यादि।उक्तयोग्यत्वाद्यत्यन्ताभावस्यभेदत्वेऽत्यन्ताभावभेद-
योरैक्यापत्तिरुक्तात्यन्ताभावविलक्षणरूपेणप्रत्ययानुपपत्तिरितियावत्।विलक्षणरूपाभ्यांहिअत्यन्ताभावभेदयोर्बुद्धिरन्यथातादृशयोग्यादिभेदस्यैवतादृशयो-
ग्यत्वाद्यत्यन्ताभावत्वापत्त्यात्यन्ताभावस्यैवविलोपापत्तेःनचात्यन्ताभावस्यस्तुनिरूपत्वेनतस्यैवभेदत्वमितिवाच्यंअत्यन्ताभावस्याप्यधिकरणरूपत्वधर्मरूपत्वाभ्या-
मुक्तदोषसाम्यात्पिशाचत्वा—त्यन्ताभावस्यपिशाचभेदरूपत्वेप्रत्यक्षत्वासंभवादितिभावःचक्षुरादीतिप्रमित्याद्यनुपस्थितिकालीनचक्षुरादीत्यर्थः।नचेष्टापत्तिः रामः
प्रतियोग्यनुयोगितावच्छेदकज्ञानादिसत्त्वेप्रमित्याद्यनुपस्थितावपिभेदप्रत्ययस्यसर्वसंमतत्वात्।स्वरूपतायामिति।पटभेदोघटस्वरूपइत्यादिस्थलेइत्यादिः॥ २९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतियोगिनोनन्वयेपीत्यादि। यथाशब्दत्वस्यानित्यत्वेनन्वयेपिविशेषणत्वंतथाप्रतियोगिनोघटस्वरूपेणनन्वयेपीत्यर्थः अत्रविशेषणत्वमनुपलक्षणत्वमात्रेण
उपाधित्वेपर्यवसानात्। नहीत्यादिपटस्यभेदान्वितघटस्वरूपेन्वयात् घटस्वरूपान्वितभेदेप्रतियोगित्वरूपनिरूपकत्वाद्वाघटस्वरूपतानापाद्यतेकिंतुघट॰
स्वरूपाभेदेनप्रतीयमानोयोभेदस्तन्निरूपकत्वादित्यर्थः प्रतियोगिवदितिघटोद्रव्यमित्यादौविशेषणविभक्त्यर्थाभेदस्यघटस्वरूपस्याभेदेनघटेऽन्वयात् घटा
भेदेनाभेदस्यधीरिवघटोनपटइत्यादावपितादृशान्वयाद्भेदस्यापिघटाभेदेनधीस्तथाचयोयदभेदेनप्रमीयमाननिरूपकः सतदभिन्नइतिसामान्यतोव्याप्तिः
नचानुकूलतर्काभावः घटः पटोनेत्यादौविभक्तीनामभेदार्थकत्वात् नीलोघटइत्यादौतस्यक्लृप्तत्वात् प्रतियोगित्वानुयोगित्वयोः प्रथमार्थत्वकल्पनायांगौरवात्
भेदस्यसम्बन्धत्वेनक्लृप्तस्यप्रतियोग्यनुयोगिभ्यामभावेसम्बन्धत्वसंभवेप्रतियोगित्वानुयोगित्वयोरतिरिक्तयोः सम्बन्धत्वेगौरवात्। अतएवभट्टमतेतादात्म्य
मभावस्यसम्बन्धइत्युक्तंकुसुमांजलौ। भूतलादेरेवघटाद्यभावत्वस्यभट्टमतेस्वीकारात्तस्यघटाद्यभावाभेदेनिर्विवादः घटाद्यभावेघटाद्यभेदोपिवार्तिकादौत
र्कपादेस्पष्टमुक्तः सर्वंहिद्विविधंवस्तुनित्यंसदसदात्मकमित्यादिग्रन्थेतर्कचरणेशास्त्रदीपिकायामप्युक्तंसर्वंहिवस्तुसदसदात्मनाद्विविधन्तद्यदापत्रसद्रू

केचित्तु प्रतियोगिनोनन्वयेपिशब्दोऽनित्यइत्यादौशब्दत्वादेर्विशेषणत्वमिवात्रापिविशेषणत्वमित्याहुरितिचेत्न नहिवयंपट॰
भेदोघटस्वरूपमित्यन्वयप्रविष्टत्वेनप्रतियोगितयानिरूपकत्वमात्रेणवाघटस्यपटरूपतामापादयामः किन्तुसमानाधिकरणप्र
तीतिविषयस्वरूपंप्रतियोगितयानिरूपकत्वेनाभेदनिरूपकप्रतियोगिवत् नचाज्ञानतन्निवृत्त्यादयःसमानाधिकरणप्रतीतिविष
याभेदस्तुघटः पटोनेतिसमानाधिकरणप्रतीतिविषयः अन्यथासमानाधिकरणनिषेधबुद्धिविषयत्वंभेदलक्षणंनस्यात् ॥ २॥

पेणावर्त्ततेघटादितत्तदातत्रप्रत्यक्षादिभिरस्तीतिप्रतीयतेयत्रत्वसद्रूपेणावर्त्ततेसद्रूपेणावोधकानांप्रत्यक्षादीनामभावेनतत्प्रतीयतेभूतलेघटोनास्तीति
शारीरिकवाचस्पत्येप्रथमसूत्रेपि अयमर्थः स्पष्टः भावान्तरमभावोहिकयाचित्तुव्यपेक्षयेतितुष्याचपटाभिन्नाभेदाभिन्नत्वेनपटस्यपटाभेदवत् पटाभिन्न
भेदाभिन्नत्वाद्घटस्यपटाभेदोयुज्यतेतमांएवंघटोनपटइत्याद्यनुभवेघटादौपटाद्यभेदभानकालेएवपटादिभेदोभासमानः सुतरांमिथ्या अभेदस्तुश्रुत्यादिसि
द्धत्वात्तात्विकएवेतिभावः नचेत्यादि अज्ञाननिवृत्तिर्ब्रह्मकपालंघटनाशइत्यादिसमानाधिकरणप्रतीत्यभावात् प्रत्युतकपालेघटोनष्टः ब्रह्मण्यज्ञानंनष्ट॰
मित्यादिव्यधिकरणबुद्धेरेवसत्त्वात्न अज्ञानादेर्ब्रह्माभिन्नत्वापत्तिरितिभावः। यत्तुब्रह्मनानृतमितिप्रतीतेरनृतस्वरूपताब्रह्मणःस्यादित्यापादनंतदिष्टंम॰
न्मतेब्रह्मणोजगदभेदस्वरूपस्येष्टत्वात् भेदस्त्वित्यादिनामार्थयोरभेदान्वयस्यौत्सर्गिकत्वादभिलापाभिलप्यप्रतीत्योरेकार्थकत्वादुक्तयुक्तेस्याभेदएववि
भक्त्यर्थोनानुयोगित्वादिरितिभावः। लक्षणमिति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भट्टमतेत्वभावमात्रस्यैवाधिकरणेनाभेदान्नेदंभेदलक्षणंपरन्तु अभेदएवाभावस्यसम्बन्धःक्लृप्तत्वान्नविशेषणात्ताएवंचात्यन्ताभावप्रतियोग्यनुयोगिनोरभे
दापादनमस्मदिष्टमेवअतएवाभावमात्रमधिकरणस्वरूपंप्राभाकराणामितिध्येयंभेदस्यघटान्यस्माद्भेदस्यविदारणंस्यस्माद्भेदःनतुसर्वेवस्तूनांस्वभिन्नत्वे
पिननतत्शून्यत्वापत्तिरनेकवस्तूनामेवसंभवात्तत्राहएकाभावइतिएकंवस्तुकिंचिद्रूपेणस्थिरीकृत्यतद्घटितमनेकंवाच्यंसर्वैरूपैःसर्वत्राभेदेसत्वेतुइदमेव॥
मितिनिश्चेतुमशक्यत्वान्नानावस्तुनिरुक्त्यसंभवइतिभावःतदैक्यमपीतिशून्यातिरिक्तैकत्वंब्रह्मणःइष्टंशून्यंतुमांप्रत्यसिद्धमितिनतदैक्यापादनयुक्तमितितु
ध्येयंस्वरूपत्वेघटादिरूपत्वेभेदस्यपटादिभेदस्यस्वज्ञानेत्यादिस्वंभेदस्तज्ज्ञानाप्रतिवध्यज्ञानंयस्यताद्दृशस्वप्रतियोगिकत्वेइत्यर्थःस्वस्वरूपत्वेनेतिस्वप्रतियोगि
नइत्यादिः।भेदप्रतियोगिनःपटादेःपूर्वोक्तयुक्तिभिर्घटादिस्वरूपभेदस्वरूपत्ववाधकाभावेनेत्यर्थःपटादिभेदस्यहिपटाद्यभेदेपटादितादात्म्यधीप्रतिवंधकधीवि

एतेनपुरुषार्थेदुःखमिवब्रह्मण्यज्ञानवत्तथामोक्षेचमोहवन्नांतर्गतंकुम्भादिकंपटे तटस्थत्वेपिकुम्भादेरप्रतीतौनभेदधीःअज्ञानादेर
प्रतीतौतद्धानाद्यप्रतीतिवदितिनिरस्तंकिञ्चविदारणात्मनोभेदस्यघटस्वरूपत्वेघटस्यापिविदारणंस्यात् एवंतदवयवानामपीतिपरमा
णुरपिनैकइतिशून्यतापत्तिःएकाभावेतत्समाहाररूपानेकस्याप्यभावात्नन्वविदारणात्मकस्याभेदस्यब्रह्मरूपत्वेपारमार्थिकब्रह्म।
णोव्यावहारिकप्रातिभासिकशून्यैरप्यविदारणेतदैक्यमपिस्यात् नचजीवाभेदएवब्रह्मस्वरूपंनतुघटाद्यभेदःतर्ह्यत्रापिघटादिभ्योभेद
एवपटस्वरूपंनतुस्वस्मादितिसममितिचेत् नस्वरूपत्वेभेदस्यस्वज्ञानाप्रतिवध्यज्ञानप्रतियोगिकत्वेस्वस्वरूपत्वेनाभेदवत्स्वप्रतियोगित्व
नियमेनस्वविदारकत्वस्यावश्यकत्वात् घटधर्मेषुपटप्रतियोगिकभेदत्ववद्घटप्रतियोगिकभेदत्वस्याप्यभ्युपगमात् पटाद्भिन्नोघटइतिव
द्घटाद्भिन्नोघटइतिप्रतीतेर्वज्रलेपत्वाच्च॥ ॥ षयत्वमेववाधकंनतुपटादिप्रतियोगिकत्वंपटाद्यभेदेतत्सत्वेपिपटाद्यभेदस्वीकारात् उक्तधीविषयत्वं

चभेदभेदत्वयोर्घटादिरूपत्वेनसंभवत्येवनहिपटादिप्रतियोगिकवान्घटइतिनिश्चयःपटाद्यात्मकोघटइतिधीविरोधीतथाचाभेदस्येवभेदस्यापिस्वप्रतियोगिकत्वात्घटा
दिरूपस्यतस्यस्वभेदवत्स्वरूपंस्वविदारकत्वंसिद्धमितिभावःस्वस्वरूपत्वेइत्यत्रसत्स्वरूपत्वइतिपाठेतुअप्रतिवध्येत्यस्यावाध्येत्यर्थःतथाचभेदप्रतियोगिपटा
दिनातादात्म्यज्ञानस्यघटादिरूपस्वज्ञानावाध्यत्वेनोक्तज्ञानतादात्म्यस्यघटादाववाध्यत्वात्स्वप्रतियोगिकत्वेनघटादिरूपभेदस्योक्तंस्वविदारकत्वमितिभावः।नतुभे
दस्योक्तरीत्यास्वप्रतियोगिकत्वेसिद्धेपिघटोनघटइतिप्रतीतेर्नापत्तिर्घटस्वरूपभेदस्यघटभेदत्वेनघटधर्मतानियामकत्वस्यविशेषेनंगीकारात्तत्राहघटधर्मेष्विति॥
पटादिभेदेषुविशेषनियमितघटधर्मताकेषुघटस्वरूपेषुघटभेदत्वस्योक्तरीत्यासिद्धौविशेषेउक्तनियामकत्वस्यापाद्यत्वात्उक्तप्रतीतिर्दुर्वाराअन्यथाजलतेजःपरमाणूनांत रामः
द्धर्मरूपादीनांचैक्यंस्वीकृत्यविशेषस्यजलपरमाणुत्वस्नेहत्वादिभ्यामेवाधाराधेयत्वनियामकत्वंनतुजलपरिमाणुत्वोष्णस्पर्शत्वादिभ्यामित्याद्यपिकिंनरोचयेदितिभावः ॥ २९६

विभागात्मकत्वेनभिदात्मकत्वेनविभागस्यभिदायाःविभज्यमानेतिभिद्यमानेत्यर्थःअन्योन्याभावस्वरूपत्वइत्यादिकपालघटाद्योःकार्यकारणभावाद्यनुरोधेनभेदावश्यकत्वात्कपालादिभेदस्यघटादौज्ञायमानस्यघटादिरूपत्वात्तदाश्रयत्वस्यकपालादौसत्त्वात्कपालादिकंनकपालादिकमितिप्रमास्यादित्यर्थःघटादेरुक्तभेदाश्रयत्वेउक्तभेदतादात्म्यमेवनियामकंतच्चकपालादावप्यविशिष्टंनचविशिष्टकेवलयोस्तादात्म्यमेवतथानथाचकपालादिप्रतियोगिकत्वविशिष्टरूपेणकेवलघटस्योक्ततादात्म्यात्तत्रोक्तभेदोनतुकपालादावितिवाच्यंभेदबुद्धौहितादात्म्यत्वेनैवसंसर्गतानतुविशिष्टकेवलभावप्रयुक्ततादात्म्यत्वेनतथाचघटादौकपालादौचोक्तभेदबुद्धेस्तुल्यत्वात्प्रमात्वंदुर्वारंयत्तुययोस्तादात्म्यंतयोरन्योन्याभावास्वीकारात्कपालघटाद्योस्तादात्म्यान्नान्योन्याभावइतितत्तुच्छन्तथासतिकार्यका

यत्तुस्वस्माद्विदारकत्वेऽवयवानांविभागेनसूक्ष्मत्वमेवस्यान्नतुशून्यत्वंनहिशून्यसंयोगात्किञ्चिदुत्पन्नमितितन्नविभाजकत्वंनविदारकत्वंकिन्त्वेकत्वविरोधित्वम्तथाचैकस्याभावेऽनेकस्यसुतरामभावात्शून्यतायामेवपर्यवसानात्एतेनविदारकत्ववित्रादेःस्वसंबन्धिन्येवविदारकत्वंनतुस्वस्मिन्नितिभेदश्चैतत्स्वरूपंतदास्वंनविदारयेतकिन्त्वभेदस्यनविदारकत्वंभावव्युत्पत्त्याविदारणत्वात्तथाचस्वरूपभेदेनविदारणात्मनोघटस्यनविदारणंस्यात्स्ववृत्तिविरोधादितिनिरस्तंभेदस्यविदारणरूपविभागात्मकत्वेनविभागस्यविभज्यमानवृत्तित्वनियमेनावयवानवस्थयाशून्यतापत्तेस्तादवस्थ्यात्अतएवविभागरूपविदारणात्माभेदःकिन्त्वन्योन्याभावःधातूनामनेकार्थत्वात्तदुक्तम्कियावाचित्वमाख्यातुमेकोऽप्यर्थःप्रदर्श्यतेप्रयोगतोऽनुसर्त्तव्याअनेकार्थाहिधातवःअन्यथासंयुक्तयोर्भिन्नावितिव्यवहारोनस्यादितिनिरस्तम्अन्योन्याभावस्वरूपत्वेकपालादिरूपाश्रयप्रतियोगिकभेदस्यघटादिरूपाश्रितरूपतयास्वप्रतियोगिकभेदाश्रयत्वादेकत्वंकपालादिषुभज्यतेत्यवयवानवस्थयाशून्यतायामेवपर्यवसानात्अतएवनानेकत्वैकार्थसमवायिनाभेदेनैकत्वंनिराक्रियतेनपुनरनेकत्वनिराकरणंयुज्यतउपजीव्यविरोधादितिनिरस्तम्अनेकत्वमस्पृष्ट्वैवस्वप्रतियोगिकभेदमात्रेणैक्यविरहस्यापाद्यत्वात्॥ ॰॰ रणत्वानुपपत्तेःघटोनकपाल

मितिबुद्धेरप्यनापत्तेश्चयत्तुभेदस्यपर्याप्त्याश्रयएवतथाधीरितिनदोषइतितन्नप्रत्येककपालेपिघटरूपभेदस्यपर्याप्तिसत्त्वात्।प्रत्येककपालंघटइतिधीसत्त्वात्कपालद्वयेएवघटपर्याप्तिस्वीकारेपिकपालद्वयंनकपालद्वयमित्यापत्तेरवारणात्।एकार्थसमवायिनासमानाधिकरणेनअनेकत्वनिराकरणमेकाभावेऽनेकस्याप्यभावात्इत्यादिरूपंयुज्यतेविरोधिलक्षणायानयुज्यतेअनेकत्वमस्पृष्ट्वाअनेकत्वोपजीवकतानवच्छेदकरूपविशिष्टेनकपालघटयोर्भेदत्वंतयोरनेकत्वोपजीवकतावच्छेदकंतन्मात्रेणानेकत्वभंजतांकिंतुतदन्येनकपालादेःस्वप्रतियोगिकभेदाश्रयतात्वेनेतिनैकरूपेणोपजीविकत्वभंजकत्वेभिन्नरूपाभ्यान्तेतुसर्वसंमतेइदंरूप्यमितिज्ञानंप्रतिरूप्यविशिष्टज्ञानत्वादिनोपजीवकस्यापिज्ञानस्वरूप्यभेदप्रमात्वादिनातद्भंजकत्वादितिभावः ९॥

CC-0. In Public Domain. Digitization by eGangotri

अभेदैकार्थेत्यादि यद्धर्मविशिष्टभेदसमानाधिकरणाया एकतासातद्धर्मावच्छिन्नप्रतियोगिताकभेदविरोधिनी उक्तरीत्यातत्कपाले तत्कपालत्वावच्छिन्नाद्भेदेसति तत्कपालमेकं न स्यादनंतानि तत्कपालानि स्यान्न चेदं संभवतीति तत्कपालघटयोर्मिथ्यारूपशून्यतायाः पर्यवसानमिति भावः। विभागादीति। क्रियाजन्यविभागादीत्यर्थः इतर। विरोधितेति। तत्तत्प्रतियोगिभिन्नत्वेत्यर्थः। सर्वत्रेति। पटभेदो न घटभेद इत्यादिप्रतीत्या पटादिभेदे घटादिभेदप्रतियोगिकभिन्नतायास्त्वयापि स्वीकाराद्विभागतुल्यत्वस्य भेदत्वयानंगीकारात् कपालादौ घटादौ च स्वप्रतियोगिकभेदापत्तिर्नायुक्तेति भावः स्वरूपत्वे घटादिरूपत्वेउच्छेदात्। प्रकृतविचारोत्तरं मिथ्यात्वनिश्चयात् तथा च प्रकृत

अत एवोक्तमाचार्यैः अभेदैकार्थसमवायिन्या एकताया भेदेन विरोधादिति यदुक्तं स्वस्मिन्वृत्तिविरोधादिति तन्न विभागादिरूपव्यापारस्यानङ्गीकारात् इतरविरोधितादिरूपव्यापारस्य सर्वत्र सत्त्वात् किञ्च स्वरूपत्वे भेदस्य संशयादिर्न स्यात् धर्मिज्ञाने भेदाज्ञानाभावात्तदज्ञाने हेतोरेवाभावात् नन्वभेदस्यापि स्वरूपत्वे संशयाद्युपपत्तिस्त्वयापि समाधेयेति चाभेदत्वेनाऽज्ञानात्तथा ममापि भेदत्वेनाज्ञानात्तदिति चेन्न भेदस्य स्वरूपत्वे शून्यतापादकयुक्त्या कोटीनामेवोच्छेदात् न चाभेदस्यापि स्वरूपत्वे भेदकोट्युच्छेदस्तवापीति वाच्यम् कल्पितकोटिमादाय संशयोपपत्तेः न च तवापि भेदकसत्त्वादिकोटिः कल्पिता शून्यतापत्तेरित्युक्तत्वात् यत्तु प्राक्तैतन्ये स्वयंभाते पि तद्भिन्नस्यैकस्यानवच्छिन्नस्यानन्दस्य चाऽप्रकाशवद्धर्मिणः प्रकाशे पि तद्भिन्नस्य भेदस्याप्रकाशो भविष्यति किञ्चैकाप्रकाशे तत्र विप्रतिपत्तिर्न स्यात् तदुपदेशानर्थक्यं च स्यादिति तन्न एक्यादीनां स्वप्रकाशस्वरूपत्वे पि तस्याज्ञानतत्कार्यविप्रतिपत्त्यादीनामत्यविरोधितयात न्नोचरविरोधिवृत्तिपर्यंतमुक्तानुपपत्त्यभावात् न च तर्हि प्रत्यगर्थे पि विप्रतिपत्तिः स्यात् चार्वाकादीनान्तस्या अपि दर्शनात्तस्मादज्ञानाश्रयत्वादिना प्रत्यगर्थप्रकाशमुपजीव्यं नाविद्या आवृणोति ऐक्याद्यंशं त्वावृणोत्येवेति तत्र विप्रतिपत्त्यादयः न चैवं सादृश्यादिदोषादत्रापि भेदांश आवृत इति वाच्यम् कोऽप्यनुपपत्तेः प्रधानपूर्वकारोपवादिनस्तवतदसंभवात् यत्तु स्वरूपभेदो भेदत्वेन भासत एव प्रायः सर्वभिन्नत्वेनैव प्रतीतेः अन्यथा सर्वकोटिकः संशयः स्यात् तत्र च घटप्रतियोगिकत्वादिरूपा अनेके धर्माः सादृश्यादिवशादगृहीताः संशयविषया भविष्यंति न चानेकनिरूप्यस्य भेदस्य निरूपकानेकत्वादनेकत्वापत्तिः तादृशस्यापीश्वरज्ञानादेरनेकद्वैतनिरूप्यस्याद्वैतस्य चैक्यादर्शनात् एकनिरूप्यप्रागभावध्वंसयोरनैक्यदर्शनाच्चेति तन्न न वयं निरूपकभेदेन भेदं ब्रूमः किन्तु प्रतियोगितावच्छेदकभेदेनाभावभेदस्यावश्यकतयाऽन्यथैकघटप्रतियोगिनां चतुर्णां ध्वंसादीनामैक्यापत्तिः॥ १९ विचारोत्तरं परेषां भेदसंशयानुपपत्तिरिति भावः। वक्ष्यमाणरीत्याभेदत्वादीनामपि-

दुर्वचत्वाद्भेदत्वादिरूपेणाज्ञातत्वमित्ययुक्तमित्यपि वो ध्यं भेदकसत्त्वादीति। भेदत्वसत्त्वादीत्यर्थः शून्यतेति। भेदभेद्यप्रपंचमिथ्यात्वेत्यर्थः अत्रापि संशयस्यत्वेपि। आवृत्तो ननिश्चीयते सर्वकोटिकः इदं सर्वं न वेत्याकारकः सादृश्यादीति। घटसादृश्यादीत्यर्थः ऐक्यापत्तिरिति। प्रतियोगितावच्छेदकं तु तेषां भिद्यत एव अत्यन्ताभावे संयोगादि सम्बन्धः भेदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलक्षणव्यवहारानापत्तेरितितथाचप्रतियोगितावच्छेदकभेदेपियत्रविलक्षणव्यवहारस्तत्रैवाभावभेदोयथा ध्वंसस्य प्रतियोग्युत्तरकाले प्रागभावस्य प्रतियो-
गि पूर्वकाले भेदस्य प्रतियोग्यधिकरणेपि अत्यन्ताभावस्य प्रतियोगीसंसर्गशून्य एव व्यवहारो विलक्षणः एवंच घटभेदस्य पटेपिव्यवहारात् पटभेदस्यापिघटेपि-
व्यवहारात्तयोरपिभेदस्यावश्यकत्वात्कुड्यादिस्वरूपत्वं नच घटभेदत्वं कुड्यइवपटादावप्यस्तीतिकुड्यस्य घटपटभेदत्वमव्याहतमितिवाच्यं घटभेदादिव्यक्तेर्नाना
त्वेतदं शेकुड्यादावनुगतबुद्धिलोपापत्तेः। समनियतानांतुसंख्यापरिमाणाद्याभावानामैक्येवाधकाभावादास्तांप्रतियोगितावच्छेदकभेदेप्यभेदइतिभावः अधि
ष्ठानइत्यादि। अधिष्ठानगतोयआरोप्यविरुद्धः शुक्तित्वादिधर्मादिस्तज्ज्ञानमित्यर्थः आदिनाप्रपंचभ्रमंप्रत्यधिष्ठानस्वरूपधीविरोधित्वलाभः अधिकरणस्वरूपा
भावमतेतत्कालीनमधिकरणं अधिकरणस्यज्ञानविशेषोवाऽभावइतिलक्षणमुच्यतेतदुक्तंमणौ तत्तत्कालसम्बन्धःस्वप्रकाशतत्तज्ज्ञानंवेतितत्रतन्मतेसर्वज्ञा

नचाधिकरणरूपाभाववादिनामधिकरणभेदेनैवाभावभेदः ध्वंसप्रागभावयोरैक्यापत्तौविलक्षणव्यवहारानापत्तेः नचैवमद्वैतेप्यैक्या-
नुपपत्तिः ब्रह्मेतरत्वरूपप्रतियोगितावच्छेदकस्यैक्यात् प्रतियोगिभेदाभेदयोरतन्त्रत्वात् यदपिभेदज्ञानंनभ्रमविरोधिकिन्त्वधिष्ठानारो-
प्यविरुद्धधर्मादिज्ञानमिति तन्नशाब्दाभेदभ्रमस्यशाब्दभेदज्ञानादनिवृत्त्यापत्तेः यदपिकेश्चिदुक्तम् अदोषमूलातादृप्येणाप्रतीतौप्रतीतिः
स्वरूपभेदलक्षणं शुक्तेश्चशुक्त्यात्मनाऽप्रतीतिर्दोषमूलेतिनतत्राव्याप्तिः अदोषमूलेत्यस्ययद्यपिसप्रम्यन्तविशेषणत्वंनसम्भवति तथापिवि-
शिष्टविशेषणत्वेनतद्विशेषणत्वपर्यवसानादिति तन्नतादृप्येणाप्रतीतौ प्रतीतेरभेदसाधारण्येनादोषमूलत्वपर्यंतज्ञानंभेदव्यवहारकार-
णंवाच्यम् तत्रादोषमूलत्वंफलेकोन्वेयमितिचाक्षुषत्वंनस्यात् प्रतीतिघटितत्वात् अप्रत्ययकालेचभेदोनस्यात् किन्त्वरजतात्मनाशुक्तेःप्र-
तीतिसमयेतत्रतद्भेदस्तेनस्यात् अदोषमूलेत्यस्याभावविशेषणत्वेनाव्याप्तिवारणेऽसामर्थ्यात् ॥ २१ नानांस्वाधिकरणकालग्राहकत्वात् तत्तत्काल

स्योपाधित्वस्वीकाराद्वा आद्यपक्षःसंभवदुक्तिको द्वितीयपक्षमाह अदोषमूलेत्यादि अदोषमूलाशुक्तित्वादिरूपेणाप्रतीतेरभावकालीनाधीःशुक्तित्वावच्छिन्नप्रति-
योगिताकभेदइत्यर्थः विशेषणत्वं स्वातंत्र्येणान्वयः प्रतीतेस्तादृशप्रतीतित्वमात्रेणज्ञानस्य अभेदसाधारण्येन। भेदाव्यवहारकालसाधारण्येन। पर्यंत
ज्ञानं। विशेषितंज्ञानं। भेदव्यवहारकारणंभेदव्यवहारविषयः। अदोषमूलत्वविशिष्टोक्तधीत्वमेवभेदत्वंवाच्यमितिभावः। फलेकोन्वेयमिति। सत्यपिवि-
चारेदोषानुपलब्धि रूपेणाफलेनानुमेयंनतुचक्षुरादिग्राह्यमित्यर्थः नचादोषमूलकत्वोपहितमुक्तज्ञानंभेदइतिभेदग्रहोनादोषमूलकत्वविषयकइतिवा-
च्यं अभेदसाधारण्यतादवस्थ्यात्। अत्रज्ञानस्यस्वप्रकाशत्वेनचाक्षुषत्वसंभवेपितादृप्येणाप्रतीतेर्नचाक्षुषत्वमित्यपिबोध्यंघटितत्वादितिनस्यादित्यत्रहे-
तुःतथाचेदंसर्वदारजतभिन्नमितिप्रमानस्यादितिभावः। तत्राशुक्तौतद्भेदःरजतभेदःविशेषणत्वेनयद्वारणं तत्रासामर्थ्यादित्यर्थः ॥ ✢ ॥ ✢ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ· सि· विशेष्यानधिकरणस्यतादृूपेणप्रतीतेरनधिकरणस्य विशिष्टानधिकरणत्वात्। अदोषमूलिकायास्तस्या अनधिकरणत्वात्। असमस्तेन। मूलान्तेन॥
टी· ल· ननुमास्तूक्तवाक्यार्थोलक्षणं तथापि अदोषमूलायास्तद्धर्मप्रकारकप्रतीतेरभावकालीनाप्रतीतिस्तद्धर्मावच्छिन्नभेदइत्यस्तुलक्षणंतत्राह अदोषमूलता
उ· दात्म्यप्रकारकेति स्वभेदापत्तेः। शुक्तौशुक्तित्वावच्छिन्नभेदापत्तेः रूप्यात्मनाधीकालेइष्टापत्तिः शुक्तिभेदस्यतदाप्रातीतिकत्वादत्त आह शुक्तेरूप्यात्मना अ
८८ प्रतीतिकालइति। सामग्रीतिशुक्तित्वव्यंजकनीलपृष्ठाद्यवच्छिन्नसन्निकर्षेत्यर्थः प्रतीयमानपदेतिप्रतीतिपदेत्यर्थः पूर्वोक्तलक्षणवाक्यस्यैवमूलान्तंप्रतियो
गिविशेषणमंगीकृत्यार्थांतरोक्तेरभावविशेष्यतयाप्रतीतेः पूर्वमुपपादनात् अत्रापितथातथाचैवैयर्थ्यमितिभावः। प्रतीतिपदस्यापिचशुक्त्यादितादात्म्यप्रमि
तिविषयत्वा— भावः शुक्त्यादिभेदइतिपर्यवसन्नंसचफलेकोन्वयः। नहिशुक्त्यादिभेदग्रहोत्पत्तिक्षणे अत्रशुक्तितादात्म्यप्रमाविषयत्वंनेतिग्रहीतुंशक्यतेप्र
मादिघटितत्वाच्चक्षुराद्ययोग्यत्वाच्चननुतत्तज्ज्ञानव्यक्तित्वमेवघटादिभेदत्वंतथाचपटोनघटइत्यादिपद्यज्ज्ञानव्यक्तिर्घटादिभेदज्ञानसर्वसंमतानतद्य—
क्तिःस्वप्रकाशाद्घटादिभेदइतिचेन्नानुगतोहितत्तद्धीविषयोवाच्योऽन्यथाघटादितादात्म्यबुद्धावनुगतरूपेणविरोधित्वासंभवात्। अनुगतभेदाकारबुद्ध्य

विशेष्यानधिकरणस्यसुतरांविशिष्टानधिकरणत्वात् नहि———————पुरुषहीनेदण्डिपुरुषसम्बन्धः नचादोषमूलेत्यशरीरजन्य
त्वमित्यत्रशरीरमिवप्रतियोगिविशेषणंवाधितसङ्ग्रहायनञासमस्तप्रतीतेरसमस्तेनानन्वयात् नह्यब्राह्मणःसमीचीनइत्यनेनसमीचीनवि
प्राभावः प्रतीयते अदोषमूलतादात्म्यप्रकारकप्रतीत्यभावोक्तौचशुक्तेरूप्यात्मनाऽप्रतीतिकालेसामग्रीविरहाच्छुक्त्यात्मनाचाप्रतीतौस्वभेदा
पतेस्तादवस्थ्यात् नचतदापिप्रतीयमानशुक्त्यात्मनाप्रतीयमानत्वमीश्वरज्ञानमादायास्त्येवेतिवाच्यम् एवंसत्यप्रतीतिदशाविरहेणप्रतीय
मानपदवैयर्थ्यात् नचान्योन्याभावत्वंतत् तस्यानिरूपणात्॥ १९ नुपपत्तेश्च अतएवतत्तत्कालीनाधिकरणमेवभेदइतिपक्षोपिहेयः। यत्तु अदोषमूलेत्या
दिवाक्यंनलक्षणपरंकिंतुस्वरूपभेदस्यपादृशंज्ञानंतादात्म्यबुद्धिविरोधितत्परमितितन्नुच्छं सामग्रीविरहाधीनशुक्तित्वप्रकारकप्रतीत्यभावकालीनप्रतीतेः सामग्रीसंपत्त्य
धीनशुक्तितादात्म्यबुद्ध्यविरोधित्वात् मण्यादिग्रन्थेषुलक्षणत्वेनोक्तप्रतीतित्वस्योक्तत्वात् त्वद्ग्रंथेपिकेचित्त्वित्यादिनातदनुवादेनतदूषणसंभवात्। उक्तंचबोधाधिकारेलक्ष
णंस्वरूपभेदस्यतादृूपेणप्रतीतौप्रतीतिः। अन्योन्याभावस्यावाधितःसमानाधिकरणोनिषेधप्रत्ययः वैधर्म्यस्यविरोधः सचैकधर्म्यसमावेशइति। अनिरूपणादिति। उक्त
बोधाधिकारवाक्यंहिसमानाधिकरणः समानविभक्तिकपदजन्योऽनुयोगिपदत्त्समानविभक्तिकप्रतियोगिपदयुक्तनञ्जन्यः तादृशनञ्प्रतिपाद्यइतियावत्। लक्षणादि
नातत्प्रतिपाद्यत्वस्यातिप्रसक्तत्वादवाधितइतिलक्षणादिकंविनेत्यर्थकं तथाचोक्तप्रतिपाद्यताभावकालेऽव्याप्तिः सर्वेषांप्रतियोग्यनुयोगिनांबोधकोक्तपदस्यप्रयोगे रामः २९८
प्रतिसंधानेवामानाभावात् यस्यभेदस्यानुयोगिप्रतियोगितावच्छेदकविशिष्टबोधकसमानविभक्तिकपदाभ्यांयुक्तेननञाप्रतिपाद्यतातत्रासंभवस्य। तादृशप्रतिपाद्यत्वये

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसमानाधिकरणः प्रतियोगिसमानाधिकरणः निषेधप्रत्ययःप्रतीयमाननिषेधस्तथाचस्वप्रतियोगिसमानाधिकरणाभावत्वंलक्षणंनच ध्वंसप्रागभावयोर्व्याप्य
वृत्त्यत्यन्ताभावेचातिव्याप्तिरेककालदेशावच्छेदेनसामानाधिकरण्योक्तेरितिचेन्नस्वप्रतियोगित्वघटितत्वेनाननुगतत्वात् सम्बन्धांतरेणप्रतियोगिमतिवर्त्तमानेसम्ब-
न्धान्तरेणात्यन्ताभावेऽतिव्याप्तेः अवृत्तिगगनादिभेदेचाव्याप्तेः। अथप्रतियोग्यवृत्तिसार्वदिकाभावत्वंतत् नचकालभेदस्यकालवृत्तित्वात्तत्राव्याप्तिर्दैशिकविशेषण
तयावृत्तेर्निवेश्यत्वादितिचेन्नश्येनसंयोगवद्वृक्षादेः प्रतियोगिवृत्तित्वेनाव्याप्तेः नचप्रतियोगितावच्छेदकताघटकसम्बन्धेनप्रतियोगितावच्छेदकस्यय
देकदेशकालावच्छेदेनसामानाधिकरण्यंतद्वत्त्वशून्याभावत्वंतदितिवाच्यं व्याप्यवृत्तिरूपेणभेदस्थलेस्वप्रतियोगितावच्छेदकावच्छेदकदेशाद्यप्रसिद्ध्या-
असंभवात् नचव्याप्यवृत्तिघटत्वाद्यवच्छिन्नभेदस्थलेएकदेशकालावच्छेदेनेतिनदेयमितिवाच्यं एकरूपेणसर्वत्रभेदस्यप्रत्ययात् अथारोप्येवनिषेध्यते
इतिनियमात् संयोगादिनाप्रतियोगिन आरोप्येसंसर्गाभावस्तादात्म्येनचतस्मिन्नन्योन्याभावः प्रतीयतेतथाचतादात्म्येनप्रतियोग्यारोपजन्यधीविषयाभा
वत्वमन्योऽन्याभावत्वमितिचेन्नप्रतियोग्यारोपस्याभावधीहेतुत्वेमानाभावात् अनाहार्यारोपस्याभावधीविरोधित्वादाहार्यस्यचाभावधीपूर्वमसंभवात्। न
न्वेवंसंसर्गाभावधीकालेप्यन्योन्याभावधीःस्यादितिचेत्कारणांतरसत्वेस्यादेव अस्तुवातत्तदारोपनियामकस्यैवाभावधीनियामकत्वं आस्तांवा अभावप्रत्ययस्यवि

तदुक्तमाचार्यैः सापेक्षत्वात्सावधेश्च तत्त्वेद्वैतप्रसङ्गतः एकाभावादसन्देहान्नरूपंवस्तुनोभिदेति ॥ ❁ ॥

शेषप्रतियोग्यारोपोहेतुर्नत्वभावधीमात्रेऽनुमित्यादौव्यभिचारात् तथाचातीन्द्रियान्योन्याभावेऽव्याप्तिः अथतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं तदि-
तिचेन्नसंयोगविशिष्टस्यसंयोगसम्बन्धेनात्यंताभावेऽतिव्याप्तेःसंयोगविशिष्टतादात्म्यस्यसंयोगत्वात् ध्वंसप्रागभावयोरिवान्योन्याभावस्यापिप्रतियोगितायाःस
म्बन्धावच्छिन्नत्वेमानाभावाच्च अथसम्बन्धावच्छिन्नप्रतियोगिताकत्वशून्यत्वेसतिनित्याभावत्वंतदितिचेन्नसम्बन्धत्वस्यदुर्वचत्वात्। घटत्वादेरेवतादात्म्यसम्ब
न्धरूपत्वेनासंभवात्। नचसांसर्गिकावच्छेदकताविशेषोनिवेश्यइतिवाच्यंतत्रमानाभावात्। अतएवतादात्म्यमतिरिक्तंस्वीकृत्यतदवच्छिन्नप्रतियोगिताकाभा
वत्वंतदितिवाच्यमित्यपास्तंतत्रमानाभावात् अधिकंवैधाधिकारशिरोमणौद्रष्टव्यं यत्तु अभावत्वान्योन्याभावत्वसंसर्गाभावत्वध्वंसत्वप्रागभावत्वादयः प्रतीतिविशे
षसाक्षिका अखंडोपाधयोऽतिरिक्ताएवपदार्थाइतितत्रोक्तंतत्रापिअन्योन्याभावत्वप्रकारकज्ञानस्यतदपेक्षत्वेनात्माश्रयादिकं धर्मरूपान्योन्याभावेऽन्योन्याभा
वांतरस्यावश्यकत्वेनानवस्थादिकंधर्मिस्वरूपत्वेसप्रतियोगिकत्वानुपपत्त्यादिकमुक्तंवक्ष्यमाणंचदूषणंदुस्तरंवो ध्वंसापेक्षत्वात् धर्मिप्रतियोगिधीसापेक्षप्र-
त्यक्षकत्वात् सावधेःसप्रतियोगिकत्वात्। तत्त्वेभेदस्यघटादिरूपत्वेअद्वैतप्रसंगतः पूर्वोक्तरीत्यापटादेः घटाद्यभेदप्रसंगात् एकाभावात्। कपालादेर्घटादिरूपस्य
प्रतियोगिकभेदाश्रयतेनएकत्वाभावप्रसंगात्॥ असंदेहात् घटादिस्वरूपस्यनिश्चयेपटादिभेदासंदेहप्रसंगात्। पटादिभिन्नघटादिवस्तुनोरूपंनेत्यर्थः॥ ❁ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यापिभेदत्वस्यापिस्वरूपत्वेघटादिस्वरूपत्वेतत्तद्व्यक्तिरूपभेदत्वतादात्म्यस्यैवभेदपदवृत्तिनिमित्तत्वेनव्यवहारवैलक्षण्योपपादनेपीतिशेषः अनुगतेति। पटादिभेदत्वरूपैकविषयकेत्यर्थः अत्यंताभेदेपिविशेषबलात्सामानाधिकरण्यंजलीयपरमाण्वादेरूपादिनेवेतिवातयोर्भेदसहिष्णुरभेदएवविषयःघटादेरिवरूपादिनेतिवातन्त्रनोत्पः घटादौभेदस्याधारत्वानुभवेनविशेषणतारव्यातिरिक्तसम्बन्धस्याधारतावच्छेदकत्वेनावश्यंवाच्यतयासम्बन्धत्वसंभवेनाभेदस्यसम्बन्धत्वेमानाभावइत्याशयवान्नाद्य इत्याहघटइति। भेदविषयतयेतिआधारतानियामकसम्बन्धविषयकतयेत्यर्थः भेदाभेदेतिभेदस्याभेदेत्यर्थः। अत्यंताभेदेआधारत्वानुभवानुपपत्त्याविशेषणतारव्यःसम्बन्धोति

किञ्चघटस्यभेदत्वेएकतरपरिशेषापत्तिःनन्वैक्यस्यज्ञानस्यानन्दस्यचब्रह्मस्वरूपत्वेएकतरपरिशेषापत्तिस्तवापिसमानानचवस्तुनएकत्वेनेष्टापत्तिः प्रकृतेपिसाम्यादितिचेत् नएकतरपरिशेषापत्त्याघटइतिभेदइतिविलक्षणव्यवहाराभावस्यापादनात् नचप्रवृत्तिनिमित्तघटत्वभेदत्वयोर्भेदात्तदुपपत्तिर्भेदत्वस्यनिर्वक्तुमशक्यत्वात् तथाहिनतावज्जातिःजात्यादिसाधारण्यात्नोपाधिःतादात्म्यावच्छिन्नप्रतियोगिकाभावत्वादिरूपःतादात्म्यस्यभेदविरहरूपत्वेऽन्योन्याश्रयात्तन्निष्ठासाधारणधर्मरूपत्वेतदवच्छिन्नप्रतियोगिकात्यंताभावेऽतिव्याप्तेस्तस्यापिस्वरूपत्वेऽनुगतव्यवहारानापत्तेः नचब्रह्मानन्दादावपिविलक्षणव्यवहारोनस्यादितिवाच्यम् कल्पितधर्मभेदमादायोपपत्तेर्नचभेदत्वमपितथास्त्वितिवाच्यम् तर्हिनिराकार्यासिकिञ्चभेदस्यस्वरूपत्वेइदंभिन्नमस्यभेदइतिसम्बन्धित्वेनधीर्नस्यात् नचानन्दोब्रह्मणइतिवदुपपत्तिःप्रमाणसिद्धेत्वैक्येभेदव्यवहारस्यौपचारिकत्वंकल्प्यतेराहोःशिरइत्यादिवत् नचप्रकृतेतथाऐक्येमानाभावाद्बाधकाच्चनपक्षांतरानुपपत्तेरेवपक्षांतरपरिग्रहःशशशृङ्गादौभावत्वाभावत्वयोरन्यतरानुपपत्त्याऽन्यतरपरिग्रहापत्तेर्नचतत्रोभयत्रबाधकादृलीकत्वेनोपपत्तिःप्रकृतेप्युभयत्रबाधकादाविद्यकत्वेनोपपत्तेःसंभवात् नन्वस्तिभेदस्यस्वरूपत्वेमानम् नृद्घटइतिवद्घटःपटात्मकोनेतिपटतादात्म्यनिषेधरूपस्यभेदस्यघटसामानाधिकरण्येनाभेदप्रत्यक्षंतथाघटभेदयोरेकैकस्यप्रतीतावितरस्यनियमेनप्रतीयमानत्वादिलिङ्गंसत्यंभेदस्तुवस्तूनांस्वरूपंनात्रसंशयइत्याद्यागमश्चेतिचेत्न घटःपटात्मकोनेत्यादेरन्योन्याभावभेदविषयतयाभेदाभेदाविषयत्वादन्यथानीलोघटइत्यादेरपिरूपाभेदविषयत्वापत्तेःलिङ्गस्यचाभेदसिद्धेःपूर्वमसिद्धत्वात्॥ २१ रिक्तएवयुक्तःघटभेदोनघटइत्यादावपिघटभेदादेस्तस्मिन्नाधारत्वभेदयोःकल्पनाद्विशेषणतैवसम्बन्धइतिभावः ननुयावदाश्रयस्थितिकस्यात्यंताभेदस्वीकारेवाधकाभावआश्रयाश्रयिभावस्तुविशेषबलात्तत्राह अन्यथेति। रूपाभेदेति। रूपात्यंताभेदेत्यर्थः तवमतेनित्यरूपादेरिवजन्यरूपादेरपिस्वाश्रयात्यंताभेदःस्यात् नचरूपादिनाशकालेघटादौतद्भेदाप्रतीत्यानतथेतिवाच्यंघटसंयोगादेर्नाशकालेघटादिमद्भेदस्यभूतलादावभेदस्वीकारसंभवात् घटसंयोगादिकालेपितत्प्रतीत्यापत्तेरेवंविशेषस्थलेभेदस्वीकारेणोपपत्तावभेदेमानाभावःगुणगुण्यादिस्थलेतुभेदाभेदयोर्युक्तिरुक्तेतिभावः असिद्धत्वादिति। घटस्यशब्दादिनाप्रतीतावपिनभेदप्रतीतिःप्रतीतावित्यस्यप्रत्यक्षेइत्यर्थकत्वेपिदोषादिनाभेदाग्रहेपिघटादेःप्रत्यक्षप्र

॥अद्वैतसिद्धिः॥

रामः

२९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातीतिसत्तामपिव्यक्तौनश्यतोरूपादेस्तस्यामिवसत्तामपिजातौनश्यत्याव्यक्तेरपितस्यामत्यंताभेदः तवमतेपिनयुक्त इतितत्रव्यभिचारइतिभावःविशेषेति। यत्वत त्वयोरननुगमात्सामान्यतोनव्याप्तिः किन्तुघटःपटभेदाभिन्नःतत्समानाधिकृतत्वात् पटभेदवदितिविशेषतःसावाच्यातथाचपटादौव्यभिचारःतस्यापिभेदवाचकन ञ्पदसमानविभक्तिकपदप्रतिपाद्यत्वादितिभावः अधिष्ठानेतिवस्तूनांसत्यमबाध्यमधिष्ठानीभूतंयद्रूपंतदेवभेदस्तद्भेदशून्यमितिवाधायांसामानाधिकरण्यमिति भावःद्वितीयइति। आद्येपीतिशेषः ननुभेदत्वांशेऽनुगताकारधीरस्तुतत्राह नचभेदत्वमितिधर्मिप्रतियोगिघटितत्वेन आधारत्वप्रतियोगित्वनिरूपकत्वेनभेदग्रहणे भेदंप्रति आधारत्वप्रतियोगित्वप्रकारकज्ञानेइत्यर्थः प्रतियोगिज्ञानेप्रतियोगित्वप्रकारकज्ञानेसति। भेदज्ञानं। भेदंप्रतिआधारत्वप्रतियोगित्वप्रकारकप्रत्यक्षंप्रति योगिज्ञानं। प्रतियोगित्वप्रकारकज्ञानं। घटादिप्रतियोगितायाः पटादिनिष्ठाधारतायाश्चनिरूपकत्वेनभेदस्यप्रत्यक्षंप्रतितादृशप्रतियोगित्वाधारत्वप्रकारकधीरूप नयविधयापरमतेकारणमवश्यंतादृशबुद्धौचप्रतियोग्यनुयोगिनोर्भेदज्ञानंकारणं पटोघटाभिन्नएवघटभिन्नोनवेतिभेदव्यतिरेकसंशयनिश्चयसत्त्वेउक्तबुद्धेर

सामान्यव्याप्तेर्जातिव्यक्त्यादौसमानसंवित्संवेद्ये व्यभिचाराद्विशेषव्याप्तावपिप्रतियोगिनिव्यभिचाराच्च आगमस्यचाधिष्ठानातिरेकेणासत्त्वपरत्वात् किञ्चपटाद्भेदः घटमात्ररूपंवाघटकुड्यादिसर्वरूपंवा आद्येकुड्यादिःपटभेदोनस्यात् द्वितीयेस्वरूपाणामननुगतत्वात्पटभेदानुगतप्रतीतिर्नस्यात् नचपटज्ञानेच्छादौयथापटविषयत्वेनानुगतेनानुगतव्यवहारस्तथापटप्रतियोगित्वेनात्राप्यनुगतव्यवहारइतिवाच्यम् एतावता हिज्ञानादिषुपटविषयंज्ञानंपटविषयेच्छेतिपटविषयत्वांशेऽनुगमवत्पटप्रतियोगित्वांशएवानुगमः स्यान्नभेदांशेपिनचभेदत्वमप्येकमितिवाऽस्यामुष्माद्भेदइतिवाधर्मिप्रतियोगिघटितत्वेनभेदग्रहणेपरस्पराश्रयः धर्मिप्रतियोगिज्ञानेभेदज्ञानंतस्मिंश्चसत्यस्यामुष्मादितिविलक्षणधर्मिप्रतियोगिज्ञानमितिघटपटौभिन्नावितिघटपटविशेषणतयातयोर्भेदइतितद्विशेष्यतयावाग्रहणेप्यन्योन्याश्रयएव ॥ ऽनुत्पत्तेर्यद्भावसंशयनिश्चयौ

यत्रप्रतिबंधकौतन्निश्चयस्तद्धेतुरितिन्यायात्। तथाचोक्तबुद्धेःकारणंभेदज्ञानंतस्याःकार्यंप्रत्यक्षमेववाच्यंभेदज्ञानांतरस्याननुभवादित्यन्योन्याश्रयः। अथवा धर्मिप्रतियोगिघटितत्वेनभेदग्रहणेआधारत्वप्रतियोगित्वविषयतानिरूपितभेदविषयताशालिज्ञानेधर्मिप्रतियोगिज्ञाने। आधारत्वप्रतियोगित्वप्रकारकज्ञाने सति। भेदज्ञानंउक्तभेदज्ञानंधर्मिप्रतियोगिज्ञानं आधारत्वप्रतियोगित्वप्रकारकज्ञानं यद्वियदीयसंयोगादिप्रकारकंसंयोगादिसम्बन्धेनयत्प्रकारकंवाज्ञानंतत् तत्रसंयोगादिप्रकारकनिश्चयजन्यंनह्यसंयुक्तत्वेननिश्चितंयत् तत्संयोगादेःसंयोगादिसम्बन्धेनतस्यवाविशिष्टधीस्तथाचघटादिप्रकारकज्ञानेघटादावृत्तित्वज्ञानस्येवसंयोगादिसम्बन्धेनघटादिप्रकारकज्ञानेपिघटादौसंयोगादिरूपवृत्तिशून्यत्वनिश्चयस्यप्रतिबंधकत्वंयत् क्लृप्तं तत्रघटत्वावच्छिन्नविषयता निरूपितसंयोगत्वावच्छिन्नविषयताशालिज्ञानत्वेनप्रतिबध्यतावाच्या॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰सि॰ एवंचोक्तशून्यत्वनिश्चयाभावत्वेनहेतुत्वेगौरवात् घटादौसंयोगादिप्रकारकज्ञानत्वेनैवहेतुत्वंउक्तशून्यत्वनिश्चयकालेचोक्तज्ञानाभावान्नोक्तकार्यापत्तिस्तथाचघटत्वावच्छि
दी॰ल॰ न्नविषयतानिरूपितप्रतियोगिताविषयताकेपटत्वाद्यवच्छिन्नविषयतानिरूपिताधारताविषयताकेचभेदज्ञानेघटःप्रतियोगीपटआधारइतिज्ञानयोर्हेतुत्वमावश्यकमिति
उ॰ भावः यद्वानेत्याकारप्रत्यक्षवारणायभेदत्वाभाववत्त्वादिप्रकारकप्रत्यक्षेकिंचिद्धर्मावच्छिन्नविषयतानिरूपितप्रतियोगित्वविषयताकधीत्वेनतादृशाधारताविषयताकधीत्वे
६० नचहेतुत्वंनचत्तथापिभेदेप्रतियोगितानिरूपकत्वाभावादिनिश्चयेनेत्याकारकप्रत्यक्षंस्यादितिवाच्यंउक्तधीभ्यांउक्तप्रत्यक्षेजननीयेउक्ताभावादिनिश्चयाभावस्यापिसहका
रित्वकल्पनात् नचैवमभावप्रत्यक्षंनियमेनप्रतियोगित्वाधारत्वप्रकारकंस्यात् तत्पूर्वंप्रतियोगित्वाद्युपनयनियमात् नतुकदाचित् प्रतियोगित्वादिसंसर्गेणघटादिप्रकारक
मितिवाच्यंप्रतियोगित्वादेःप्रकारत्वेपिसंसर्गत्वेबाधकाभावात् उक्तहेतुत्वास्वीकारेपिप्रतियोगित्वादेरनुपस्थितस्यापिप्रकारत्वमतेतदंगीकारात् एतेनभेदोनदुर्निरूपः ।
नहिभेदप्रत्यक्षेप्रतियोगित्वादिप्रकारकधीर्नवातस्यांप्रतियोग्यनुयोगिनोर्भेदधीहेतुरपितुघटोनपटइत्यादिज्ञानेघटत्वपटत्वादिप्रकारकज्ञानयोर्हेतुत्वंनचघटःपटाभिन्न
इतिनिश्चयेपिभेदज्ञानापत्तिरितिवाच्यंउक्तनिश्चयस्यबाधविधयाप्रतिबन्धकत्वात्। तदुक्तंबौद्धाधिकारेअधिकरणत्वेनाप्रतीतौप्रतियोगिस्मृतिःप्रतियोगित्वेनाप्रतीताव

घटपटप्रतीतौतद्विशेष्यत्वादिनाभेदग्रहःभेदग्रहेचद्वित्वावच्छिन्नघटपटप्रतीतिरितिनचभेदस्यस्वरूपत्वात्स्वरूपप्रतीतावेवभेदधीत्वेनधीद्वयाभा
वान्नोक्तदोषइतिशङ्क्यम् स्वरूपज्ञानस्यद्वितीयत्वाभावेपिप्रतियोगिज्ञानस्यस्वरूपज्ञानातिरिक्तस्यद्वितीयस्यापेक्षणात् नचसर्वात्मकमिदमिति।
विपर्ययादर्शनेनेदंनसर्वात्मकमितिसामान्यतःसर्वतोव्यावृत्तंवस्त्वनुभूयतइतिप्रतियोगिविशेषज्ञानानपेक्षणान्नान्योन्याश्रयइतिवाच्यंसर्वात्मकंने
त्यत्रसर्वत्वंवाप्रतियोगितावच्छेदकंस्वेतरसर्वत्वंवा आद्येस्वस्माद्भेदलक्षणपेक्षासिद्धिप्रसङ्गात् द्वितीयेऽन्योन्याश्रयस्यस्पष्टत्वात्॥ ॥धिकरणास्मृतिम

हेतुरित्यपास्तंघटपटप्रतीतौघटपटोभयत्वेनप्रतीतौतद्विशेष्यत्वादिनातदुभयविशेषणकस्तदुभयविशेष्यकश्चभेदग्रहेचेतिव्यासज्यवृत्तिधर्मप्रत्यक्षेआश्रयाणांभेदग्र
हस्यहेतुत्वात्तत्कार्यीभूतंभेदप्रत्यक्षमेवद्वित्वप्रत्यक्षेकारणंवाच्यंभेदज्ञानान्तरानानुभवात्। यद्यपिद्वित्वस्यपरोक्षज्ञानंभेदज्ञानानपेक्षंतथापिपरोक्षसामग्र्यसत्त्वेप्रत्यक्षं
तदपेक्षमित्यवश्यमन्योन्याश्रयः अत्रद्वित्वप्रत्यक्षस्यविशेषणताविशेष्यतावच्छेदकप्रकारकधीविधयोक्तरीत्योभयाधारत्वावगाहिभेदज्ञानेउभयाधारत्वज्ञानस्यहेतुत्वात्त।
द्विधयाचहेतुत्वंबोध्यंनचेत्यादिघट पटयोःप्रतीयमानोभेदोघटपटावेवतत्त्वाचतयोर्ज्ञानंस्वस्मिन्नेवनहेतुरितिभावः। तयोर्भेदस्वरूपत्वेप्युभयत्वविशिष्टद्विशेषणाविशे
ष्यकयोर्भेदत्वविशिष्टप्रत्यक्षयोरुभयत्वप्रकारकधीर्हेतुःसाचद्वावित्याकारस्ताभ्यांभिन्नैवेत्याशयेनाहस्वरूपज्ञानस्येतिभेदप्रकारकज्ञानस्येत्यर्थःद्वितीयत्वाभावेपिउभय
विषयकत्वेपिप्रतियोगिज्ञानस्यभेदत्वप्रकारकधीकारणस्यद्वावित्याकारकस्यैवेलक्षणपेक्षस्वस्वभेदस्यासिद्धेतिघटाद्यभेदासिद्धेरित्यर्थः।स्पष्टत्वादिति। तथाचघटत्वाद्यनंतविशे राम
षरूपैःज्ञानासंभवेपिस्वेतरसर्वत्वरूपसामान्यरूपेणप्रतियोगिधीरस्त्येवेतिभेदज्ञानसापेक्षप्रतियोगित्वादिधीसापेक्षत्वमस्त्येवप्रतियोगित्वज्ञानएवस्वेतरभानंपुनरधिकदो ३००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्ताधिकदोषाभावमाशंक्यनिरस्यति नचेतिसर्वैरितिसर्वमित्यादिवाक्यजबोधःसर्वपदजन्यत्वेनैवसर्वविषयकोनतुसाक्षिमात्रेणासर्वत्रग्रहणमितिनेदंयुक्तंसहैवेति।नतुव्यावृत्तिबुद्धेःप्रतियोगित्वादिधीःकारणंनवातस्यांभेदग्रहइत्यर्थःजनकत्वादिति।यत्तुभेदत्वाप्रकारकज्ञानंनप्रतियोगिधीजन्यमितितद्दिष्टंभेदत्वप्रकारकज्ञानस्थलए ˜वान्योन्याश्रयस्योच्यमानत्वात्।ननुतथापिभेदग्रहकारणीभूतंप्रतियोगिज्ञानंसाक्षिरूपमस्तुतथाचतस्यभेदग्रहाजन्यत्वात्कथमन्योन्याश्रयस्तत्राह।साक्षीचेति।भिन्नतयानगृह्णातीति।घटःपटनिष्ठभेदप्रतियोगीतिभेदग्रहेपटभेदप्रतियोगित्वप्रकारकधीरूपनयविधयाहेतुर्वाच्यएवंघटःप्रतियोगीतिग्रहेपिघटःपटनिष्ठभेदप्रतियो गीनेतिधीकालेपटनिष्ठभेदोघटीयइतिज्ञानानुत्पत्तेस्तादृशज्ञानेघटःपटनिष्ठभेदप्रतियोगीतिधीहेतुरतएवसंयोगेनघटवद्भूतलमितिज्ञानेभूतलसंयोगवान्घटइतिधीःकारणमतएवचवक्ष्यतिभेदप्रतियोगित्वेनज्ञानंभेदधीकारणमितितथाचेतादृशंज्ञानंनसाक्षिरूपंसाक्षिणाभेदग्रहणेऽभेदभ्रमोच्छेदापत्तेरितिभावःसाक्षिसिद्धप्रतियोगिना

नचसर्वंखल्विदंब्रह्मेत्यत्रयथाब्रह्मत्वेनाप्रतीतंसर्वमुच्यतेतद्वदत्रापिसर्वस्मादित्यनेनतदात्मकत्वेनाज्ञातंसर्वंविवक्ष्यतइतिवाच्यम्स्वग्रहा
त्पूर्वंस्वस्यापिस्वात्मनाऽज्ञातत्वात्स्वस्यप्रतियोगितापत्तेःदृष्टान्तेसर्वशब्दस्यासङ्कुचितत्वेतवसम्प्रतिपत्तेश्च नचवस्तुतोभेदाश्रयस्याभेदेनाज्ञात
स्यज्ञानंप्रतियोगिज्ञानत्वेनकारणम् नतुभिन्नत्वप्रकारज्ञानत्वेनेतिवाच्यम् एवंहिचन्द्रेद्वित्वभ्रमोनस्यात् वस्तुतोभेदाभावात् नन्वस्तीदंनजाना
मिसर्वंखल्विदंब्रह्मेत्यादिषुसाक्षिसिद्धकालविषयसर्वैःसहवस्त्वज्ञानाभेदानामिवेहापिसाक्षिसिद्धेनप्रतियोगिनासहैवव्यावृत्तेःप्रतीतेर्नान्योन्याश्र
यइतिचेन्नविशिष्टज्ञानस्यविशेषणाज्ञानाजन्यत्वेपिप्रतियोगिसविकल्पकस्याभावज्ञानंप्रत्यन्वयव्यतिरेकाभ्यांजनकत्वात् साक्षीचप्रमाणमनपेक्ष्यप्र
तियोगिपटादिकंधर्मिभिन्नतयानगृह्णातीतिकथंसाक्षिसिद्धप्रतियोगिनाभेदग्रहोपपत्तिःस्यात् तदुक्तंचिन्तामणौअन्यथानिर्विकल्पकादपिघटोना
स्तीतिप्रतीत्यापत्तेर्नचैतावताप्रतियोगितावच्छेदकपटत्वादिप्रकारकज्ञानमात्रमर्थनीयंनतुधर्मिभिन्नत्वज्ञानपर्यन्तमितिवाच्यम् धर्मितावच्छेदकभे
दाज्ञानेप्रतियोगितावच्छेदकतयाऽभावनिरूपकत्वस्यैवाभावात् ॥ ९१ ॥

साक्षिरूपेणप्रतियोगिज्ञानेन अथवाभेदप्रत्यक्षमात्रस्यसाक्षिमात्रत्वान्नप्रतियोगिज्ञानजन्यतातत्राहसाक्षीचेति अन्यथाअभावबुद्धेःप्रतियोगितावच्छेदकविशिष्टज्ञानाजन्यत्वे।नत्विति।प्रतियोगिज्ञानेभेदधीर्नकारणमित्यर्थः भेदाज्ञानेभेदज्ञानविरोधिनिअभेदज्ञानेइतियावत्।अभावनिरूपकत्वस्य।भेदधीविषयत्वस्यघटत्वपटत्वयोरभेदज्ञानेघटत्वेपटनिष्ठभेदप्रतियोगितावच्छेदकत्वबुद्ध्यनुत्पत्तेः तयोर्भेदधियुक्तबुद्धौहेतुस्तत्रघटत्वतत्पटत्वताभ्यांभेदज्ञानहेतुत्वेघटत्वत्वाद्युपस्थितिकालेसानस्यात् स्वरूपतोघटत्वपटत्वयोरनुयोगिताप्रतियोगितावच्छेदकत्वबुद्धौस्वरूपतस्तयोर्भेदधीरेवहेतुर्युक्ताचघटत्वत्वाद्यनिवेशेनलाघवात्।अतोघटोनपटइत्यादिरूपोक्तावच्छेदकत्वबुद्धौपटोनघटइत्याद्याकाराघटत्वविशिष्टस्यपटत्ववि
शिष्टेभेदावगाहित्वेनघटपटयोरिवघटत्वपटत्वयोर्भेदावगाहिनीहेतुः ॥ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साचघटत्वत्वाद्यनवगाहिन्येवस्वातंत्र्येणप्रतियोगितयाभासमानस्यैवप्रतियोगितावच्छेदकविशिष्टतयाभाननियमादेवंचधर्मिप्रतियोगिनोर्भेदज्ञानस्याहेतुत्वेत
योरभेदज्ञानकालेतयोर्भेदधीर्यद्यप्यापादयितुंनशक्यतेतस्यैवप्रतिबंधकत्वात्। तथापिधर्मिताप्रतियोगितावच्छेदकयोर्भेदधीहेतुत्वेनैवधर्मिप्रतियोगिभेदज्ञानस्य
हेतुत्वमागतमितिभावः ननुतावतापिनान्योन्याश्रयः स्तंभोनकुंभइत्यादिभेदधीहेतुप्रतियोगित्वादिज्ञानेकुंभोनस्तंभइत्यादिज्ञानस्यैवहेतुत्वसंभवात्तत्राह। अन्यो
न्यधर्मभेदज्ञानेइति। अनुयोगितावच्छेदकयोर्भेदज्ञानापेक्षणेकुंभादितुल्यवित्तिवेद्यतयास्तंभकुंभयोरेकप्रतियोगिकभेदग्रहेऽपरप्रतियोगिकभेदमानमितिभा
वः अथवा अन्योन्येति। विनिगमनाविरहात्। कुंभस्तंभयोरुभयत्रोभयप्रतियोगिभेदज्ञानेप्रतियोगितावच्छेदकत्वादिधीर्हेतुः नचान्योन्याश्रयपरिहारोविनिगमकइ
तिवाच्यं तथापिकुंभोनस्तंभइतिज्ञानेस्वहेतुप्रतियोगिज्ञानहेतुतयास्तंभोनकुंभइतिज्ञानापेक्षणात्। परस्परसापेक्षत्वस्यदुर्वारत्वादितिभावः इत्येवमिति। एते अभि

अन्योन्यधर्मभेदज्ञानेचविशिष्यस्तम्भात्कुम्भस्यभेदप्रतीतौकुम्भात्स्तम्भस्यभेदधीरित्यन्योन्याश्रयतादवस्थ्यात् ननुत्वन्मतेपिबिम्बब्रह्मजीवानां
प्रतिबिम्बब्रह्माभेदेइदमनेनाभिन्नमस्मादमुष्माद्भेदः इमेअभिन्नेएतयोरभेदइत्येवंप्रतीतिः स्यात् तथाचधर्मिप्रतियोगिभावधीर्द्वित्वावच्छिन्नधी
श्चभेदज्ञानाधीनेतितद्विरुद्धाभेदज्ञानानुपपत्तिरितिचेत् नकाल्पनिकभेदज्ञानस्यधर्मिप्रतियोगिभावद्वित्वावच्छिन्नज्ञाननिर्वाहकस्यतात्त्विकाभे
दज्ञानप्रतिबन्धकत्वायोगात् किञ्चाभेदज्ञानेनधर्मिप्रतियोगिज्ञानापेक्षातस्यनिष्प्रतियोगिकवस्तुस्वरूपत्वात् सप्रतियोगिकत्वव्यवहारस्तुनिरू
पकभेदस्सप्रतियोगिकत्वेन अतएवजीवस्यप्रतियोगितयाब्रह्माभेदनिरूपकत्वं तदभिन्नतयाज्ञातस्यैवेत्यन्योन्याश्रयः धर्मिणासहाभेदेनप्रतीत-
स्यैवाभेदप्रतियोगित्वादन्यथादहनस्यापितुहिनाभेदप्रतियोगित्वापत्तेरितिनिरस्तम् भेदग्रहस्यतत्रप्रतिबन्धकत्वाच्च अतएवतत्त्वमसीत्यत्रत्वं
पदवाच्यस्यविशिष्टस्यब्रह्माभेदप्रतियोगित्वप्रसङ्गविनिवारणायविद्यमानाभेदस्यासतिप्रतिबन्धकेऽभेदयोग्यवित्त्वादिरूपेणप्रतीतिरभेद
॥धीहेतुः॥

न इत्यादिस्तेनद्वित्वावच्छिन्नबुद्धौउपयोगस्यवक्ष्यमाणस्यनासंगतिः निर्वाहकस्येतिकल्पितेधर्मिप्रतियोगिभावेकल्पितभेदएवनिर्वाहकः अयो
गादिति अभेदज्ञानकालेपि आहार्यविकल्परूपंवाभेदज्ञानमुपपद्यते अनाहार्यविकल्पभिन्नेचबाधस्यप्रतिबंधकत्वादतएव आहार्यज्ञानसामान्यंपुरुषस्यचैतन्य
मित्यादिविकल्पश्चनबाधप्रतिबध्यः। अथवा अभेदन्यूनसत्ताकत्वेनभेदधीर्नप्रतिबध्याइतिसैवप्रकृतेजायते अन्यूनसत्ताकविषयकत्वेनजायमानयोरेवज्ञान
योः प्रतिबध्यप्रतिबंधकभावाद्दोषविशेषजन्यत्वाद्वाभेदधीर्नप्रतिबध्येतिभावः। यत्तुभेदस्यमिथ्यात्वानिश्चयकालेअभेदन्यूनसत्ताकत्वेनज्ञानासंभवइतितत्तु
च्छं। भेदान्तरस्यमिथ्यात्वानिश्चयेपिययोरभेदप्रमातयोर्भेदमिथ्यात्वनिश्चयस्यानुभविकत्वात्॥यदपि अभेदस्यभेदन्यूनसत्ताकत्वंकिंनस्यादितितदपितुच्छंत्व
या अभेदान्तरस्यापिसत्यत्वस्वीकारेणोक्तस्थलेअभेदस्यसुतरांसत्यत्वस्वीकारात् तत्रादहनतुहिनस्थलीयाभेदग्रहे ॥ ॥ ॥ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

असतिप्रतिबंधकइत्यस्यकृत्यमाहभेदभ्रमेत्विति। उक्तत्वादिति। भेदप्रतियोगिकत्वेनाभेदस्यज्ञानेभेदज्ञानापेक्षणेपिनदोषस्तेनरूपेणतस्यमिथ्यात्वस्येष्टत्वादितिबोध्यंसज्ञाव

भेदभ्रमेतुदोषःप्रतिवन्धकइतिनाभेदधीरितिपरसिद्धांतंपरिकल्प्यस्वरूपभेदपक्षेवस्तुतोऽन्योन्यप्रतियोगिकयोर्घटपटस्वरूपभेदयोरन्योन्यप्रतियोगित्वयो
न्यघटपटत्वादिरूपेणाप्रतीतयोरसतिप्रतिवन्धेऽन्योन्यप्रतियोगितयाविशिष्टधीर्द्वयंभेदपक्षेपिविद्यमानभेदस्यासतिप्रतिवन्धकेभेदयोग्यनीलपीतत्वादि
रूपेणाप्रतीतिर्भेदधीहेतुःदूरस्थवनस्पत्यादौतुदूरादिदोषःप्रतिवन्धकइतिनभेदधीरितिसाम्येनसमाधानंनिरस्तम्वैषम्यस्योक्तत्वात् ननुयथागौर्ग
वयसदृशीत्यादौगवयादिनांगवादिभ्योभेदःसन्नेवप्रतियोगित्वहेतुर्नतुज्ञातःनहिगौर्गवयसदृशीतिप्रत्यक्षधीरपिनियमेनगवयोगोभिन्नइतिधीपूर्विका
नुभूयतेसुतरांशाब्दधीःतत्रभेदवाचिशब्दाभावात् तथाप्रकृतेपिअन्यथाचैत्रस्यमैत्रपितृत्वादौज्ञातएवमैत्रस्यचैत्रपुत्रत्वादिज्ञानम् गवयस्यगोसा-
दृश्येज्ञातएवगोर्गवयसदृशीतिज्ञानमितिसप्रतियोगिकपदार्थज्ञानमात्रेऽन्योन्याश्रयःस्यादितिचेन्नइष्टापत्तेःअतएवसप्रतियोगित्वेननिष्प्रतियोगि-
कत्वेनचभेदसादृश्यादिद्वैविध्यम् सर्वत्रवाधकसत्त्वादित्यस्माकंराद्धान्तःयत्तूक्तंप्रतियोगिधर्मिभेदग्रहपूर्वकत्वनियमोनानुभूयतइतितदिष्टमेवतस्यैवसप्रति
योगित्वेवाधकत्वात् प्रत्यक्षएवसप्रतियोगिकपदार्थग्रहेएवमन्योन्याश्रयस्यापाद्यत्वेशाब्देभेदवाचकपदासत्त्वस्यास्मान्प्रत्यदूषणत्वात् एवंचप्रतियोगि-
धीमात्रंनभेदधीहेतुस्तन्निर्विकल्पकादपितदापत्तेःकिन्तुप्रतियोगित्वेनतत्रापिनान्यंप्रतिप्रतियोगित्वेनकिन्तुभेदंप्रतितथाचान्योन्याश्रयःनचसप्रतियो
गिकसादृश्यादावेवंस्यादिष्टापत्तेःअभेदश्चनसप्रतियोगिकइत्युक्तत्वाच्चयत्तुयत्रधर्मिप्रतियोगिनोःसन्निहितौतत्रधर्मिप्रतियोगिसद्भावयोस्तद्भेदस्यचयुगप
द्धीरिदमनेनसदृशमितिवत् तथाविशेषण ———— विशेष्यभूतयोर्भेदभेदिनोर्विशेषणविशेष्यभावस्यचयुगपद्धीःइमौसदृशावितिवत्सर्वस्ययोग्यस्येन्द्रियस
न्निकर्षेणयुगपत्सर्वविषयकैकज्ञानसम्भवात् नहिमन्मतेदण्डीतिधीरपिदण्डज्ञानसाध्याउक्तंचैतत् यत्रधर्मिप्रतियोगिनोरन्यतरस्यासन्निधानंतत्रापिसंस्कार
सचिवेन्द्रियसन्निकर्षेणक्रमेणज्ञानमुत्पद्यते तदनेनसदृशमित्यादिवत् अन्यथाऽभेदज्ञानमपिनस्यात् तथाचनान्योन्याश्रयःतदुक्तंधर्मित्वप्रतियोगित्वतद्भावायुगप
द्यदि विशेषणंविशेष्यंचतद्भावश्चैदगृह्यतइतितन्नप्रमेयत्वादिनाघटेज्ञातेपिघटाभावइत्यप्रतीतेःघटत्वादिनाघटस्यपूर्वमवश्यंज्ञेयत्वेनयुगपदेवधर्मिप्रति
योग्यादिवुद्ध्यसिद्धेःनचतत्रघटत्वादिज्ञानसामग्रीविलम्बादेवविलम्बस्तत्त्वेइष्टापत्तिरितिवाच्यम् प्रतियोग्यविषयकाभावप्रत्ययापादनस्यैवमप्यपरिहारा
त् नचतादृक्प्रतियोगिग्रहसामग्रीकारणम् तदपेक्षयाप्रतियोगिग्रहस्यैवलघुत्वात् नन्वन्यत्वाग्रहणेप्रोक्तःकथमन्योन्यसंश्रयःअन्यत्वंयदिसिद्धंस्यात्कथमन्यो
न्यसंश्रयइत्युभयतःपाशारज्जुरितिचेन्नह्यन्यत्वबुद्धिंव्यवहारक्षमामपिनिराकुर्मःकिन्त्वनाविद्यकत्वे नोपपद्यतइतिब्रूमःकिञ्चभेदस्यविशेषणविशेष्यभावेनैवज्ञेय

योः।स्वरूपयोःविशेषणविशेष्यभावस्यआधाराधेयभावस्यप्रतियोग्यविषयकेति।नेत्याकारकेत्यर्थः।विशेषणविशेष्यभावेन। धर्मिप्रतियोगिसंसृष्टतयातद्भावप्रतीतेः। धर्मिप्रतियोगिनोः

CC-0. In Public Domain. Digitization by eGangotri

दंडचैत्रादाविति। दण्डादिप्रकारतानिरूपितसांसर्गिकविषयतानिरूपितंचैत्रादिविशेष्यताकज्ञाने चैत्रादौ दण्डादिभेदज्ञानंहेतुः दण्डादेःस्वस्मिन्संयोगादिनावि
शिष्टबुद्ध्यभावादेकस्मिन्नपिवस्तुनिभेदभ्रमदशायांविशिष्टबुद्धेरुत्पत्तेश्चतथाचभेदे धर्मिप्रतियोगिनोर्विशिष्टबुद्धावपिभेदे चधर्मिप्रतियोगिनोर्भेदज्ञानंहेतुरेवं
तत्रापितज्ज्ञानमित्यनवस्थेतिभावः नप्राथमिकाभेदादिधीरिति भेदविशिष्टज्ञानंतत्प्रयोजकंभेदविशिष्टज्ञानंचभेदविशिष्टज्ञानांतरंविनानसंभवतीत्यर्थः। समानमितित
याचस्वरूपसंतंभेदंविनाविशिष्टप्रमाँसंभवतिसम्बन्धासंभवादित्येतावन्मात्रमावाभ्यांवाच्यंनतुभेदज्ञानस्यविशिष्टधीहेतुत्वमितिभावः अज्ञातेनापीति। अभेदज्ञाने

भेदप्रतीत्यधीनतायादण्डचैत्रादौदृष्टत्वेनभेदप्रतीतिपरम्परानवस्थास्यात् नचब्रह्मजीवाभिन्नंजगन्मिथ्येत्यादावप्यभेदादेर्विशेषणतया
भेदज्ञानस्यापेक्षणीयतयाऽनवस्थापत्तेर्नप्राथमिकाभेदादिधीरितितवापिसमानमितिवाच्यम् अविद्याकल्पितभेदेनापिविशेषणत्वाद्युप प
त्तेः नचैवंतवापि। भेदभेद्ययोःस्वरूपतोभेदाभावाद्भेदस्याधिकरणानतिरेकात्। धर्मोभेदइतिपक्षेतुप्रतीत्यनवस्थोद्धारेपिविषयानवस्थायाद्
ष्परिहरत्वापत्तेः नचाविद्यकभेदपक्षेप्यनवस्थादिर्दोषः अनुपपत्तेरलङ्कारत्वात् अतएवाभिन्नंब्रह्मेत्यत्राभेदस्यभिन्नतयाज्ञातस्यविशेषण
त्वेनतेनसहब्रह्माभेदबोधनानुपपत्तिःप्राचीनभेदधियाप्रतिबन्धादितिनिरस्तम् अनिर्वचनीयभेदज्ञानस्यतात्त्विकाभेदज्ञानाप्रतिबन्धकत्वा
त् किञ्च धर्मभेदपक्षेप्रत्यक्षंकिम्भेदमेवगोचरयतिउतवस्त्वपिनाद्यःभेदइत्येवाप्रतीतेः द्वितीयेपिकिंभेदपूर्वकंवस्तुगोचरयेदुतवस्तुपूर्वकं
भेदंयुगपद्वोभयम् नाद्यः भेदइत्येवाप्रतीतेःविरम्यव्यापारायोगाच्च अतएवनद्वितीयः नतृतीयः वस्तुग्रहस्यभेदग्रहजनकतायाःस्थापितत्वात्
नचवस्तुमात्रज्ञानानंतरभाविनाविशिष्टज्ञानेनयुगपदुभयग्रहः प्रतियोगित्वादिनाज्ञानस्यैवभेदधीहेतुत्वात् अन्यथापञ्चमीप्रयोगाद्यनुपपत्तेः
तत्रचप्रागुक्तोदोषः अतएवविशिष्टधियोविशेषणाज्ञानजन्यत्वमतेऽनयोर्भेदइतिज्ञानानंतरमिमौभिन्नावितिधियःसम्भवःविशेषणाज्ञानाज
न्यत्वेतुयुगपदेवोभयगोचरधियःसम्भवइतिनिरस्तं अनयोर्भेदइत्यादौषष्ठ्योल्लिख्यमानसम्बन्धग्रहस्यपूर्वमवश्यापेक्षणीयतयाऽनवस्थाया ॥ अद्वैतसिद्धिः ॥
दुष्परिहरत्वात् नचविम्बप्रतिविम्बयोर्जीवब्रह्मणोश्चाभेदग्राहिप्रत्यक्षशाब्दश्चकिमभेदमेवगोचरयेदित्यादिविकल्पसाम्यमभेदस्यवस्तुरूपत्वेनद्द

तदभावात् भेदभ्रमेचतज्ज्ञावादन्वयव्यतिरेकसिद्धमुक्तहेतुत्वंनापलापार्हमन्यथाव्यासज्यवृत्तिद्वित्वादिप्रत्यक्षेप्याश्रयभेदधीर्हेतुर्नस्यात् तदपलापेपिनतेनिस्तारोभे
दभेद्ययोर्विशिष्टप्रमायांस्वरूपसतोपिभेदस्याभावात्। अभेदविशिष्टप्रमायांतुकल्पितभेदएवास्तीतिभावः। प्रतीत्यनवस्थोद्धारेपीति। भेदधीहेतुत्वस्योक्तस्यापलापेने ॥
त्यादिः। भेदपूर्वकं। भेदमात्रधीपूर्वकं। प्रतियोग्यनुयोगिघटादिमात्रधीपूर्वकंविरम्येति। विलंबेनेत्यर्थः भेदग्रहणकालेवस्तुग्रहणाभावेवीजाभावादितिभावः। अतएव ॥ श्रीरामः
। विरम्यव्यापारादेवपटत्वादिमात्ररूपेणाज्ञानस्याहेतुत्वेनतत् पूर्वकत्वेमानाभावादितिभावः पंचमीत्यादि। कारणीभूतज्ञानस्यपंचम्यादिनोल्लेखानुपपत्तेः प्रागुक्तोऽन्योन्या ३०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रामाणिकस्य अप्रामाणिकस्यैव। इमौ वनस्पती। वनस्पतिरूपेतादात्म्यं नास्ति तथा च रजतत्वतादात्म्यमिह नास्तीति निषेधस्यावश्यकत्वे एतदनुयोगिकरजतप्रतियोगिकतादात्म्यमिह नास्तीत्यपि निषेधो वाच्यः उक्ततादात्म्यत्वेन तादात्म्यस्य भ्रमे भानात् इमे शुक्तिरजते एतदुभयत्र तादात्म्यं नास्ति प्रतीत्यापत्तेरिति॥ स्तम्भस्यानारोपे प्रत्यक्षत्वानुपपत्तिः। सास्य सम्बन्धादित्यपि वोध्यं तादात्म्यमात्रं नारोप्यते किंतु स्तम्भोपीत्युक्तौ स्तम्भादौ कुंभादितादात्म्यमप्रामाणिकरूपेणारोपणीयं वाच्यं आरोप्ये अधिष्ठानतादात्म्यारोपस्य तादात्म्यारोपसामान्येऽनुभवसिद्धत्वात्तथा च तदेव तादात्म्यं निषेध्यं भ्रमनिषेधयोरेकविषयकत्वानुरोधादेवं च प्रामाणिकरूपेणातादात्म्यनिषेधः स्थित एवेति भावः वस्तुतस्तादात्म्यारोपस्थले वाधकधीविषयभेदस्याप्रामाणिकत्वं तादात्म्यत्वादिप्रामाणिकरूपेणापि प्रसक्तस्याप्रामाणिकस्यैव तादात्म्यस्य निषेधात्। प्रतियोगिनोऽप्रामाणिकत्वेनैव प्रकृते भेदाप्रामाणिकत्वोक्तेस्तथा च स्तंभतादात्म्यभ्रमोक्तिर्व्यर्थेति ध्येयं असन्निधानेति। रजतस्यासन्निहितत्वान्नेदंत्वेन प्रतीतिर्वनस्पत्योस्तु सन्निहित-

किञ्च भेदस्यान्योन्याभावत्वे तत्प्रतियोगिनस्तम्भकुम्भयोस्तादात्म्यस्याप्रामाणिकत्वेनान्योन्याभावस्याप्यप्रामाणिकत्वं स्यात् न च हैतादेरप्रामाणिकत्वे तद्विरहस्याप्रामाणिकत्वापत्तिः अतिरेकपक्षे इष्टापत्तेः अनतिरेकपक्षे त्वधिकरणप्रामाणिकत्वस्यैव प्रामाणिकत्वे तत्र तया प्रतियोग्यप्रामाणिकत्वेपि प्रामाणिकत्वोपपत्तेः न चान्योन्याभावेपि तत्पक्षे तथाङ्गीक्रियतामिति वाच्यं तस्याधिकरणरूपतायां शून्यवादाद्यापत्तेरुक्तत्वात् यत्त्वप्रामाणिकस्य निषेधप्रतियोगित्वमित्युक्तं परैस्तन्न वारयामः किन्त्वधिकरणातिरेके निषेधस्याप्रामाणिकत्वमात्रं ब्रूमः नन्वत्र न कुम्भस्तम्भोभयतादात्म्यं निषेधप्रतियोगि किन्तु स्तम्भतादात्म्यं स्तम्भे प्रमितं कुम्भगतनिषेधप्रतियोगीति न प्रतियोग्यप्रामाणिकत्वमिति चेन्न तादात्म्यमात्रस्य निषेधप्रतियोगित्वे दूरस्थवनस्पत्योरिव वाधोत्तरकालमिमौ वनस्पती इतिवदिमे शुक्तिरजते इति प्रतीत्यापत्तेः न चासन्निधानकृतो विशेषः एतावतापि शुक्तितद्रजते इति प्रतीत्यापत्तेः

यत्त्वन्योन्याभावसंसर्गाभावयोर्लक्षणं यत्राधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः यत्राधिकरणे प्रतियोगिनमारोप्य निषेधावगमः स संसर्गाभाव इति तन्न अतीन्द्रियभेदे संसर्गाभावे च तन्मतेऽव्याप्तेः शब्दजन्याभावबुद्धौ व्यभिचारेणारोपस्याभावबुद्धावहेतुत्वाच्च॥ ॥

त्वात्सेति भावः। तद्रजते इति। इदं न रजतं किन्तु मयानुभूतं तदित्यनुभूयत एवेति न वाच्यं अत्र यद्रजतमभूत्तन्मिथ्येति धीर्न स्यात् किन्तु तद्देशान्तरस्थमिति धीः स्यादिति भावात् अतीन्द्रिये इत्यादि। अभावप्रत्यक्षे आरोपस्य हेतुत्वे अतीन्द्रियाभावेऽव्याप्तिरभावधीमात्रे तद्धेतुत्वे व्यभिचार इत्यर्थः। ननु प्रतियोगिनमारोप्येत्यत्र प्रतियोग्यारोपजन्यत्वं नार्थः किन्तु प्रतियोग्यनुयोगिनोः संसर्गविषयकत्व ------ व्याप्याया धीस्तद्विषयाभावत्वं संसर्गाभावत्वमेवं प्रतियोग्यनुयोगिनोस्तादात्म्यविषयकत्वव्याप्यधीविषयाभावत्वं भेदत्वमप्रामाणिकस्यैव निषेधाभ्युपगमात् वायुरूपादिसंसर्गाद्यप्रसिद्धिर्न दोष इति चेन्न स्तंभनिष्ठं स्तंभतादात्म्यं कुंभे नास्तीति धीविषयाभावस्याभावद्वयवहिर्भावापत्तेः उक्ततादात्म्यस्यानुयोगिनिष्ठत्वाभावात्। गुणो न संयोगीति धीविषयाभावस्य संसर्गाभावत्वापत्तेः। संयोगितादात्म्यस्य प्रतियोगिसंयोगसंसर्गरूपत्वात्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि· टी·ल· उ· ६३

किञ्चव्याप्यतातत्तद्व्यक्तित्वेनअभावधीत्वेनभेदधीत्वादिनावा आद्येऽननुगमः।द्वितीयेऽसंभवस्तृतीयेऽन्योन्याश्रयः।यदपिस्वाभावाभावरूपाभावत्वंसंसर्गाभावत्वंस्वाभा
वाभावत्वशून्याभावत्वमभेदत्वंघटस्यात्यन्ताभावः प्रागभावादिर्वास्वाभावरूपघटस्याभावरूपःपटभेदस्तुस्वाभावरूपघटत्वस्यनाभावरूपइतितदपिन।घटभेदभेदस्य
घटेप्रतीयमानस्यघटस्वरूपत्वेनस्वाभावाभावरूपत्वस्यघटभेदेपिसत्त्वात्त्वसंसर्गाभावाभावरूपत्वोक्तौचात्माश्रयात् नचस्वाभावानांयावतामभावरूपत्वंवाच्यं तथा
चनघटभेदेऽतिव्याप्तिस्तस्यघटत्वरूपंस्वात्यंताभावंप्रत्यभावत्वाभावादितिवाच्यंघटात्यंताभावभेदस्यघटस्वरूपत्ववत् पटस्वरूपत्वस्यापिवाच्यत्वेनघटात्यन्ताभा
वेपटरूपस्वाभावंप्रत्यभावत्वाभावेनासंभवात् घटभेदघटत्वात्यंताभावयोः भेदेमानाभावेनातिव्याप्तितादवस्थ्याच्चस्ववृत्तीत्यादि।घटभेदेघटभेदांतरस्वीकारेऽनव।
स्थातदस्वीकारेस्वेनैवस्वस्मिन् भेदव्यवहारोवाच्यःसचानुपपन्नःस्वस्मिन् सम्बन्धासंभवादित्यर्थः।पक्षानुपपत्तेरिति।नचस्वरूपभेदपक्षेघटादेर्भेदरूपत्वंधर्मभे

किञ्चभेदेस्वेतरभेदस्यवक्तव्यतयास्ववृत्तिविरोधोऽनवस्थावानचब्रह्माभेदेस्वाभेदेस्वाभेदस्यवक्तव्यतयास्ववृत्तित्वंसमानमितिवाच्यंअभेदस्यस्वा।
निर्वाहकत्वादित्यवेहिनचभेदेतथाभेदाधिकरणाक——भेदव्यवहारस्यस्वरूपेणनिर्वाहेघटेपितथात्वेधर्मभेदपक्षानुपपत्तेःकिञ्चभेदेभेदत्व
मुपाधिरूपंजातिरूपंवावाच्यंतत्रपुनर्भेदोवाच्यःअन्यथाभेदत्वस्यान्यस्माद्भेदोनस्यात् तथाचान्योन्यवृत्त्यास्ववृत्त्यापत्तेःस्ववृत्तित्ववत्तस्यापिविरुद्ध
त्वात् नचाभेदेप्यभेदत्वंवाच्यंतत्रपुनरभेदोवाच्यःअन्यथातस्यस्वाभेदोनस्यादितितत्रापितथापत्तिःप्रमेयत्वाभिधेयत्वादिवदन्योन्यवृत्तित्वस्याभे
देऽदोषत्वेभेदेपिसाम्यमितिवाच्यम् अस्माकमभेदमात्रस्याभेदत्वस्यचब्रह्माभेदाभिन्नतयाऽन्योन्यइत्यस्यैवाभावेनान्योन्यवृत्तित्वस्यापादयितुमश
क्यत्वात् नचतर्हिघटेघटाभेदस्यजीवेजीवाभेदस्यवाजीवब्रह्माभेदत्वेवेदान्तवैयर्थ्यम् भेदभ्रमनिवर्त्तकवृत्तेर्महावाक्यंविनाऽनुपपत्तेरुक्तत्वात् य
त्तुप्रमेयत्वादौप्रमितत्वादन्योन्यवृत्तिरदोषइतितन्न आत्माश्रयादितत्त्वदोषेणतत्रापिप्रमितत्वासिद्धेः अतएवनकश्चित्केवलान्वयी॥ ऽ दपक्षेतुघटादि

निष्ठभेदस्यघटादिप्रतियोगिकभेदरूपत्वमितिविशेषइतिवाच्यंभेदस्यानुयोगिस्वरूपत्वासंभवादेवधर्मभेदपक्षस्वीकारात् स्ववृत्त्यापत्तेःस्ववृत्तित्वापत्तेर्भेदत्वेतदाश्रया
न्यस्यभेदस्यकल्पनेतत्रापिभेदांतरमित्यनवस्था।तस्या।अन्योन्यवृत्तित्वस्यअभेदत्वस्या।अभेदत्वाकारानुगतबुद्धेरभेदरूपब्रह्मण्येवसंभवेनाभेदत्वंनतदन्यत् स्वीक्रि।
यतेभेदत्वंतुभेदादन्यद्वाच्य मन्यथासर्वानुगतभेदाभावेनानुगतबुद्ध्यसंभवात् ब्रह्मरूपत्वंतुभेदस्यनिषेध्यत्वादिनानिरस्तमितिभावः।उक्तत्वात् अखण्डार्थवादेविवे।
चितत्वात्।प्रमेयत्वादौप्रमेयत्वाभिधेयत्वयोः।तत्त्वदोषेणस्वविषयसामान्येतात्विकताप्रच्यावकदोषेण।दूषकताप्रयोजकत्वरूपसत्त्वेपिनदोषइत्ययुक्तमितिभावःक
श्चित्।कापिव्यक्तिःकेवलान्वयीसर्ववृत्तिः।तत्रमेयत्वादिव्यक्तौनसाव्यक्तिर्वर्त्ततेस्ववृत्तित्वासंभवात्।मेयत्वव्यक्त्यंतरंतुवर्त्ततेअतएवमेयत्वत्वरूपेणमेयत्वंकेवला। रामः
न्वयिअत्यंताभावप्रतियोगितानवच्छेदकमेयत्वत्ववत्त्वादतएवयत्रमेयत्वेयदभिधेयत्वंतदभिधेयत्वेनमेयत्वमितिभावः॥ ६ ॥ ६ ॥ ❁ ॥ ❁ ॥ ३०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तु भेदाभेदत्वयोरन्योन्यज्ञाने भेदत्वे भेदवृत्तिः प्रमितातद्ज्ञाने चान्योन्यवृत्तित्वं नापादनार्हमितितत्तुच्छं। तस्यज्ञानेपि प्रमितत्वानियमात् भेदो घटादिभेदोभिन्नेघटादिभेदविशिष्टेघटादिभेदोपहितेवा आद्ये आत्माश्रयः। द्वितीये भेदविशिष्टबुद्धौ भेदज्ञानांतरं हेतुस्तत्रापि सैव हेतुर्भेदज्ञानांतराभावादित्यन्योन्याश्रयः। आद्येपि भेदान्तरविशिष्टस्याश्रयत्वे तादृशभेदान्तरस्यापि स्वाश्रितभेदविशिष्टाश्रितत्वे विषयान्योन्याश्रयः घटभेदस्य घटभेदशून्ये स्वीकारे घटेपि तदापत्त्या विरोधः। स्वरूपत्वेन अद्वैतिब्रह्मरूपत्वेन तद्विकल्पेति। वृत्तिविकल्पेत्यर्थः। अनुकूलत्वादिति। प्रपंचेऽनिर्वाच्यत्वादेर्मिथ्यात्वेपि धर्मिसमसत्ताकत्वात् स्वविरुद्धतात्विकताप्रतिक्षेपकत्वमिति भावः। योग्यतायाइत्यादि। योग्यतातत्प्रयोजकत्वधर्मोवाभिन्नोऽभिन्नोवेत्यादिदोषइतिभावः। ननु सोपहिते भेदोवर्त्तते स्वज्ञाने तु नस्वज्ञानांतरं हेतुर्येनान्योन्याश्रयः किन्तुस्वयोग्यताज्ञानं तत्रापि प्रमारूपफलज्ञानं हेतुस्तत्राह भेदाभेदावित्यादि। भेदप्रमात्वं भेदवतिभेदप्रकारकधीत्वं अबाधितभेदधीत्वं वा तथा च भेदप्र

किञ्च भेदः किम्भिन्नेनिविशतेऽभिन्नेवा आद्ये आत्माश्रयोऽन्योन्याश्रयो वा द्वितीये विरोधः न चाभेदानिर्वाच्यत्वादिकं किं तद्वृतितदभाववतिवेत्यादिविकल्पस्यात्रापि साम्यमिति वाच्यम् अभेदस्यस्वरूपत्वेन तत्र तद्विकल्पानवकाशात् अनिर्वाच्यत्वादावस्य विकल्पस्यानिर्वाच्यत्वप्रयोजकस्यास्माकमनुकूलत्वात् न च भेदोपि स्वरूपम् प्रागेव निरासात् न च भेदः स्वाश्रययोग्ये वर्त्तते योग्यता च प्रमारूपफलैकोन्नेयेति वाच्यम् योग्यताया भेदं विना वक्तुमशक्यत्वात् न ह्यभिन्ने कदापि तद्योग्यताधर्मान्तरस्यापि भेदमपुरस्कृत्य योग्यत्वाप्रयोजकत्वात् भेदाभेदावज्ञात्वाप्रमप्रमारूपफलभेदस्यैवाज्ञानेन भेदयोग्यतायाः प्रमारूपफलभेदानुन्नेयत्वाच्च अम्बव्याघातकैरेवं जातिभिन्नैः सदुत्तरैः निरस्तं भेदमादाय स्वात्माभेदो निषीदति विशेषतो भेदखण्डनम्॥ १६॥ नन्वस्माकं भेदोनस्वरूपमात्रं किन्त्वन्योन्याभावः स च वस्तुनः सविशेषाभिन्नः ततश्च भिन्नत्वान्नानवस्थादिः भेदप्रतिनिधेर्विशेषस्य विद्यमानत्वान्न पर्यायत्वादिकं विशेषश्च भेदहीनेप्येकतरपरिशेषाभावादिनिर्वाहक इति चेत् न अपर्यायत्वादिप्रमाजनकस्य स्वरूपातिरिक्तस्य विशेषस्याङ्गीकारे तस्यैव भेदत्वेन भेदस्य धर्म्यभेदोक्त्ययोगात् विशेषस्यापि भेदः सविशेषाभिन्न एव वाच्यः तथा चानवस्था

मत्वं भेदाभावघटितमिव भेदप्रमात्वमपि भेदज्ञानज्ञेयमिति परस्परसापेक्षतादुर्वारेति भावः। श्रीः तर्कैरित्यादिविशेषात् भेदखण्डनं॥ १६॥ अनवस्थादिः धर्मभेदपक्षोक्तः पर्यायत्वादिकं घटभेदादिशब्दानामेकार्थकत्वादिकं एकतरपरिशेषाभावेति। एकस्यैव यत् कार्यं तदभावेत्यर्थः घटइत्यादिव्यहाराङ्गेदादिव्यवहारैवैलक्षण्येतियावत्। स्वरूपातिरिक्तस्येति। घटादिस्वरूपातिरिक्तस्येत्यर्थः। तत्रहेतुरपर्यायत्वेत्यादि। विशेषस्य घटाद्यनतिरिक्तत्वे भेदपदस्य घटपदापर्यायत्वप्रमापकत्वं नस्यात्तदतिरेके तु घटादिप्रतियोगिकविशेषवत्त्वमेव भेदपदशक्यतावच्छेदकमिति नोक्तदोषस्तथा च विशेषस्यैव भेदत्वंयुक्तं न हि घटो न पट इत्यत्र घटप्रतियोगिकत्वे न किंचिदानुभविकमिति भावः। विशेषस्य घटादिनिष्ठविशेषस्य भेदो घटाभेदः सविशेषाभिन्नः घटादिप्रतियोगिकविशेषान्तरवान् अनवस्था अनंतविशेषयुक्तानवस्था॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२
अ॰ सि॰ मानाभावादिति। विशेषे विशेषांतरास्वीकारे विशेषयद्भेदयोः पर्यायत्वादिकं स्वरूपभेदपक्षोक्त एकत्वाभावप्रयुक्तशून्यत्वापत्यादिदोषश्च किञ्च घटादिप्रतियोगिकविशे
टी॰ ल॰ षवत्त्वं पटादिप्रतियोगिकत्वावच्छेदेन वाच्यं अन्यथा घटो न पट इत्यादिवद्घटो घटवानित्यपि स्यात्तथा च विशेषाधिकरणत्वावच्छेदकता अतिरिक्तापटादिप्रतियोगिकत्वे
उ॰ षु कल्पनीयास्तथा च भेद एवातिरिक्तो घटादिषु युक्त इति विशेषे मानाभाव इति भावः। भेदस्य सत्यात्यन्तिकभेदस्यांगीकर्त्तुमशक्यतया इत्यत्रान्वयः। अत्यन्तभेदे सत्त्वे ज्ञाना
९४ नंदयोरैक्यासंभवेन नाखंडार्थत्वं भेदाभेदयोः सत्ययोः स्वीकारे ज्ञानानंदयोरभेदसंसर्गकबोधस्वीकारे तु एकधेत्यादिश्रुतिविरोधोपीत्यर्थः भेदे। सत्यभेदे। अत्रापि। स
त्यविशेषेपि तत्तादवस्थ्यात्। ऐकरस्यश्रुतिविरोधतादवस्थ्यात् ज्ञानानंदस्वरूपयोर्भेदाभावएव अपर्यायत्वादिकं तु ज्ञानत्वानंदत्वविशिष्टयोर्भेदादित्याशयेनाह ल— ति

न च वैशेषिकाभिमतविशेषवत्तस्य स्वपरनिर्वाहकत्वम् एतादृशविशेषे मानाभावात् ननु विज्ञानमानन्दं ब्रह्मेत्यादिवाक्यबोध्यविज्ञानानन्दादी नां तन्मतेपि भेदस्य भेदाभेदयोर्वाऽखण्डार्थत्वे नेकधैवानुद्रष्टव्यमित्यादिश्रुतिविरोधेन चाङ्गीकर्त्तुमशक्यतया भेदप्रतिनिधेर्विशेषस्याऽपर्यायत्वा द्यर्थमवश्यं स्वीकार इत्यर्थापत्तिरेव मानमिति चेन्न भेदे ऐकरस्यश्रुतिरोधवदत्रापि तत्तादवस्थ्यात् लक्ष्यार्थाभेदेपि वाच्यार्थभेदेनाप ——— र्यायत्वस्य व्यावर्त्यभेदाद्वैयर्थ्यस्यान्यथैवोपपत्तेः किञ्च तवापि ज्ञानानन्दत्वादिनिमित्तभेदादेवापर्यायत्वमस्तु किं विशेषेण न चैवं धर्माणिति श्रुत्या तयोरपि भेदनिषेधान्नैवमिति वाच्यं तर्हि विशेषस्याप्याश्रितत्वेन धर्मतया तस्यापि भेदनिषेधात्तेनाप्यनुपपत्तिः न च ज्ञानत्वानन्दत्वयोरर्थप्रका शत्वनिरुपाधिकेष्टत्वरूपयोरर्थप्रकाशनिरुपाधिकेष्टरूपाश्रयविशेष आवश्यक इति वाच्यम् ज्ञानत्वानन्दत्वयोर्जातिरूपत्वेनोक्तरूपत्वाभावात् न चाकाशशब्दाश्रयशब्दयोः प्रवृत्तिनिमित्ताभेदे न पर्यायत्वापत्तिस्तत्परिहाराय विशेषो वाच्य इति वाच्यम् पर्यायत्वेपि सहप्रयोगस्य व्याख्यानव्या ख्येयभावादिनाप्युपपत्तेः न चैवं ज्ञानानन्दयोरेकतरपरिशेषेण मोक्ष आनन्दप्रकाशो न स्यादिति वाच्यम् तयोर्भेदाभावेनैकतरत्वस्यैवाभावान्न द्वयोर्वच नेतरविधानात् एतेन शोधिततत्पदार्थादैक्यस्य न भेदो नापि भेदाभेदौ किन्त्वत्यन्ताभेदः एवं च विशेषानङ्गीकारे स्वप्रकाशचैतन्यभाने ऐक्यभानापत्तिः तत्प्रकाशस्य भेदभ्रमाविरोधित्वेप्यैक्यप्रकाशस्य तद्विरोधः तस्य निरपेक्षत्वेप्यैक्यस्य सापेक्षत्वं च नोपपद्यत इति निरस्तम्॥ १२ धर्मानिति। धर्मान्पृथक्पश्यन्

तानेवानुविधावतीति श्रुतिः आश्रयविशेषः आश्रयप्रतियोगिको विशेषः आवश्यक इति। अर्थप्रकाशनिरुपाधिकेष्टव्यक्तेरेकत्वेन तद्गतजातिरूपत्वस्य ज्ञानत्वादौ वक्तुमश क्यत्वेनोक्तव्यक्तिरूपत्वमेव वाच्यं तथा च विशेषं विना न धर्मधर्मितेति भावः। वृत्तिविशेषरूपोपाधिभेदेन कल्पितभेदकव्यक्तिषु ज्ञानत्वादिजातिसंभव इत्याशयेनाह ज्ञानत्वे ति व्याख्यानेति आकाशं शब्दाश्रय इति वाक्ये शब्दाश्रय इति व्याख्यानं आकाशमिति व्याख्येयं स्वसमानार्थकत्वबोधकं पदं व्याख्यानं तथा चाकाशपदं शब्दाश्रयपदार्थबोधक रामः मिति वाक्यार्थबोधस्तथा चाकाशपदार्थमजानंतं शब्दाश्रयपदार्थं जानंतं प्रति व्याख्यानमुपयुज्यते एकतरत्वस्येति। न चैकस्य परिशेषेणोत्येवार्थ इति वाच्यं एकस्यैव ज्ञानानंद ३०४

CC-0. In Public Domain. Digitization by eGangotri

कल्पितांशमिति चिद्रूपानंदरूपस्यानादिकल्पितभेदेन चिदंशज्ञानेप्यानंदरूपैक्यस्य नज्ञानं तज्ज्ञानस्यैवाधिष्ठानज्ञानत्वेन सकलभ्रमविरोधित्वं चिद्रूपस्य निरपेक्षत्वेपि भेदाभाववत्स्वरूपैक्यरूपेण कल्पितभेदात्मापेक्षाविदित्यर्थः फलस्येति। चिदंशज्ञानेपि पूर्णानंदं न जानामीत्यादिव्यवहारवत् प्रकृते फलं नेत्यर्थः साक्षिसिद्धतयेति आनंदादेर्ब्रह्मधर्मत्वस्य परोक्षत्वेपि प्रातीतिकत्वात् साक्षिसिद्धत्वं अथवा मम मज्ञानस्यानंदइत्याद्यपरोक्षतयात्मधर्मत्वं प्रतीयमानमेव ब्रह्मधर्मत्वमात्मन एव वस्तुतो ब्रह्मत्वादिति भावः। व्यावृत्तः व्यावर्तकवान्। सदास्ति सर्वकालविशिष्टः सर्वत्रास्ति। सर्वदेशविशिष्टः। असाधारणस्वरूपस्य समवायत्वसम्बन्धत्वादिविशिष्टस्य एकरूपेणाविशिष्ट

आवरकाज्ञानकल्पितांशमादाय सर्वस्योपपत्तेः नचैकस्याएव शुक्तेरावृत्तानावृत्तत्वे शुक्त्यंशभेदएवं स्यादिति वाच्यं तदंशकल्पकस्य फलस्याभावात् नन्वेवं धर्मानिति श्रुतिरस्तु मानं अत्र हि ब्रह्मधर्मानुक्त्वा भेदो निषिध्यते नच प्रतिनिधेरभावे धर्मधर्म्मिभावो धर्माणामनेकत्वं च युक्तमिति चेत् न धर्मानित्यस्य निषेधानुवादत्वेन धर्मत्वानेकत्वादौ तात्पर्याभावात् नच श्रुतितोन्यतो ब्रह्मधर्मप्राप्तिः आविद्यकमात्रस्य साक्षिसिद्धतया प्राप्तेः ननु गुणगुणिनोरभेदपक्षे घटोपलम्भे शुक्लाद्यनुपलम्भार्थं भेदाभेदपक्षे तयोरविरोधार्थमत्यन्तभेदपक्षेपि समवायः संबद्धः सत्तासती अन्त्यो विशेषो व्यावृत्तः कालः सदास्ति देशः सर्वत्रास्तीत्यबाधितव्यवहारार्थं विशेषोङ्गीकार्यः अभावादावप्यस्तित्वादिर्नाभावतो भिन्नः गुणादिष्वनन्तर्भावेन षडेव पदार्था इति नियमभङ्गापत्तेः अनियमपक्षेप्यस्तित्वेप्यस्तित्वांतरमित्यनवस्थापत्तेस्तत्रापि सोङ्गीकार्य इति चेत् न स्वभावविशेषादेव सर्वस्योपपत्तेः न च तर्हि विशेषस्याङ्गीकारेणमन्मतप्रवेश इति वाच्यम् तत्तदसाधारणस्वरूपस्यैव स्वभावविशेषशब्दार्थत्वेन त्वदुक्तविशेषानुक्तेः तत्तदसाधारण——रूपेण समवायादेः स्वनिर्वाहकत्वात् अतएव स्वनिर्वाहकत्वं हि स्वकर्मकनिर्वहणकर्तृत्वं तच्चैकस्मिन्विरुद्धमिति तदुपपादनायापि विशेषाङ्गीकार इति निरस्तम् स्वनिर्वाहकशब्दस्य स्वेतरानपेक्षव्यवहारविषयत्वमात्रार्थकत्वात् अन्यथा विशेषोप्यनवस्थाभिया वस्त्वभिन्न इति तवाङ्गीकारेण तत्तद्दूषणपातात् स्वरूपभेदपक्षोक्तैकतरपरिशेषादिदूषणतादवस्थ्यापत्तेश्च न चान्त्यविशेषवदस्य धर्मिग्राहकमानेन तादृक्स्वभावतया सिद्धेः पर्यनुयोगायोग इति वाच्यम् दृष्टान्त इव दार्ष्टान्तिके स्वरूपातिरेकस्य त्वयैवानङ्गीकारेण वैषम्यात् ॥

प्रमां प्रति विशेष्यत्वविशेषणत्वयोरभावेपि समवायत्वसम्बन्धत्वाभ्यां सत्त्वासद्भिन्नत्वाभ्यां अन्त्यविशेषत्वव्यावर्तकवत्त्वाभ्यां कालत्वसर्वकालत्वाभ्यां देशत्वसर्वदेशत्वाभ्यां तयोः सम्भवोऽभेदेपि ताभ्यां कल्पितभेदस्वीकारादिति भावः। स्वनिर्वाहकत्वात्। विशेषं विनैव स्वविशेष्यकप्रमाविशेषणत्वात् अतएव। विशेषानंगीकारादेव स्वेतरेति विशेषेत्यर्थः वस्त्वभिन्नः विशेषांतरं विनैव वस्त्वभिन्नः तत्तद्दूषणेति घटविशेषादियदपर्यायत्वादीत्यर्थः। वैषम्यादिति। अन्त्यविशेषस्य धर्मिभिन्नत्वेन तद्व्यावर्तकत्वं तादात्म्ये न स्वव्यावर्तकत्वं च संभवति प्रकृते तूक्तदोषेभ्यो न निस्तार इति प्रतिकूलतर्कैः धर्मिग्राहकमानमपि नावतरतीति भावः। वस्तुतस्तु रूपादेरेव धर्मिव्यावर्तकत्वेनान्त्यविशेषेपि न मानमिति न सद्दृष्टान्तः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्र। सोमे। अत्रविशेषेतथाचविशेषस्यैवमुख्यत्वापातेनतदसंभवेभेदइतिविपरीतंस्यात् नेतिव्यवहारेविशेषोविषयइत्यस्यापिसुवचत्वादितिभावः। भेदेमुख्यत्वबाध
कंविशेषेक्वपमाहविशेषेति। किञ्चेत्यादि। यत्तुविशेषस्यभेदकार्येऽभेदकार्येवाप्रतिनिधित्वेविवादेपितत्सिद्धिरागतेवेतितन्नोद्ध्यात्। नहिप्रकृतेविशेषस्याभेदकार्येप्रति
निधित्वमुक्तंकिन्तुभेदस्याबोधाभावइति। भेदस्यप्रतिनिधित्वेबाधकइतिशेषः। अभेदेयथाज्ञायतेतथानभेदइतिसनप्रतिनिधिरितिभावः। अलौकिकस्थले। ज्ञानपूर्णा
नंदाद्यंशस्थलेद्वयोर्भेदविशेषयोःसाम्यात् अप्रत्यक्षत्वेनकल्पनार्हत्वेनचतुल्यत्वात्। लौकिकस्थलेपि समवायःसंबंधइत्यादौकल्पनार्हत्वेनतुल्यत्वात्। एकतरप
रिशेषाभावःएकस्यैवयत्कार्यंतदभावः अविद्यादेरिति अविद्यातत्कल्पितधर्मधर्मिभावादेरित्यर्थः अविद्याचजगदुपादानत्वादिनाश्रुत्याचसिद्धैवतदसिद्धावपिप्रकृता।

यत्तुयत्रैवभेदाभावोभेदकार्यञ्चप्रमितं तत्रैवविशेषःकल्प्यते नतुप्रमितभेदे घटपटादौविशेषमादायभेदत्यागःनहिसोमाभावेपूतीकइति तन्ना
भेपिसइतितन्नमुख्यत्वनियामकस्यतत्रैवा——ऽभावात् विशेषभेदयोरुभयोरपिस्वरूपपर्यवसन्नत्वेनलाघवभङ्गेरनवकाशात् किञ्चभेदःस्व
यमेवस्वकार्यंकरोत्वभेदकार्यार्थंतत्प्रतिनिधिरस्त्वित्याद्यापत्तेश्च नचानन्दादावभेदवद्भेदबोधाभावःअलौकिकस्थलेद्वयोःसाम्यात् नन्वनुमानमत्र
मानम् तथाहिब्रह्मस्वरूपभूतयोर्विज्ञानानन्दयोर्ब्रह्माभेदयोश्चैकतरपरिशेषाभावःप्रमेयत्वादेःस्वाश्रितत्वादिकम्वाभेदान्यनियम्यांभेदानियम्यत्वेस।
तिनियम्यत्वात् यद्यदनियम्यत्वेसतिनियम्यंतत्तदन्यनियम्यंयथासंमतम् ब्रह्मस्वरूपभूतंविज्ञानानन्दादिकंवाभेदान्यैकतरापरिशेषनिर्वाहकवत् भे
दहीनत्वेसत्येकतरापरिशेषरूपनिर्वाह्यवत्त्वात् यद्येनहीनत्वेसतियन्निर्वाह्यवत्तत्तदन्यतन्निर्वाहकवत् यथासम्मतम् स्वाश्रितंप्रमेयत्वादिकंवाभेदा।
न्याश्रयाश्रयिभावनिर्वाहकवत् भेदहीनत्वेसत्याश्रयाश्रयिभावरूपनिर्वाह्यवत्त्वाद्यथासम्मतमित्यादिकमितिचेत् नत्वदभिमतविशेषादन्यस्यैवा
विद्यादेःसर्वत्रनियामकत्वसम्भवेनार्थान्तरात् आविद्यकभेदनियम्यत्वेनबाधादसिद्धेश्च ननुतथापिप्रत्यक्षमत्रमानंतथाहि नंतुपटादिबुद्धीनांभिन्न
घटादिबुद्धितोवैलक्षण्यंतावदनुभूयते तच्चनतावत्सम्बन्धविषयत्वेनकुण्डबदरादिबुद्धितोवैलक्षण्यानुभवात् नापिसंयोगान्यसम्बन्धविषयत्वेन
घटतज्ज्ञानतदभावबुद्धितोपिवैलक्षण्यानुभवात्॥ ९९ नुमानेनैव तत्सिद्ध्यापातोभेदज्ञानादिकमादायार्थान्तरानपायश्च ननुभेदान्यमात्रनियम्यत्वादिकंवा

च्यं तथाचाविद्यादेर्नियामकत्वंनभेदंविनेतिनार्थान्तरं तत्राह आविद्यकेति। तंतुपटादिबुद्धीनां। तंतुःपटइत्यादिबुद्धीनां। भिन्नघटादीति। घटःपटभिन्नइत्यादीत्यर्थः।
बुद्धितोवैलक्षण्यंबुद्धिष्ववर्त्तमानधर्मवत्त्वं। विषयत्वेन। विषयत्वाभिन्नं घटःपटभिन्नइत्यादौभेदादेःसंसर्गोनभातितत्स्वरूपत्वात् किन्तुभेदाभिन्नंघटादिस्वरूप
मात्रंतन्तुःपटइत्यादौतुसंसर्गोभातीत्यर्थः वैलक्षण्यानुभवात्। सम्बन्धांशेवैलक्षण्यानुभवादेवमग्रेपिबोध्यंउक्तस्थलेऽभेदसंसर्गानुभवादित्यपिबोध्यंघटतज्ज्ञा
नतदभावबुद्धितः। घटो ज्ञातः प्रतियोगितासम्बन्धेनाभाववान्। इत्यादिबुद्धेः॥ ६ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यासत्तीतिसम्बन्धेत्यर्थः घटतद्धर्मिकान्योन्याभावबुद्धेरिति तद्धर्मिकोन्योन्याभावो यस्य कपालादेः सतद्धर्मिकान्योन्याभावः कपालादिस्तस्य घटेयाबुद्धिः घटः कपालद्वयमित्याकारातस्याइत्यर्थः। घटपटादिबुद्धितः। घटपटादौ घटत्वपटत्वबुद्धितः। वैलक्षण्याभावेति। घटादौ घटत्वादेः समवायसम्बन्धावगाहिबुद्धितो घटः कपालद्वयमितिबुद्धेसम्बन्धांशेवैलक्षण्यमनुभूयमानंनस्यादुभयोरपिसमवायविषयकत्वाविशेषान्नचतयोर्वैलक्षण्यमिष्टमेवेतिवाच्यं कपालंघटइतिवत् घटो घटत्वमित्यस्यापत्तेरिति। भावः। यथाश्रुतंतत्त्वसंगतंतंतुपटादिबुद्धेः स्वरूपसंयोगान्यसम्बन्धविषयकत्वरूपंवैलक्षण्यस्योक्तत्वेनघटः पटोनेत्यादिबुद्धौ स्वरूपसम्बन्धविषयकत्वस्यघटपटादिधीवैलक्षण्यस्यसंभवात्। आश्रयाश्रयिभावनियमः। सम्बन्धानाशादिः ननुयुतसिद्धविषयकत्वंवैलक्षण्यमस्तुतत्राह नवाकुण्डेतिभागोवेतिवाकारोनास्यायांसंयुक्तना

नापिस्वरूपप्रत्यासत्तिसंयोगान्यसम्बन्धविषयत्वेनघटतद्धर्मिकान्योन्याभावबुद्धेर्घटपटादिबुद्धितोवैलक्षण्याभावापातात् नाप्ययुतसिद्धिविषयत्वेनआश्रयाश्रयिभावनियमोह्ययुतसिद्धिः तत्रचतदानींतनआश्रयाश्रयिभावः कुण्डवदरादावपिभाति नियमस्तुनतंतुपटादिबुद्धावपि नहितंतुपटादिधीः प्रत्यक्षाऽनयोः सम्बन्धनाशोवाविभागोवानभविष्यतीत्याकारा नवाकुण्डवदरादिधीस्तयोः सम्बन्धनाशोवाविभागोभविष्यतीत्याकारा नापिसमवायविषयत्वेन उक्तन्यायेनसम्बन्धनित्यत्वस्यसम्बध्ययुतसिद्धत्वस्यवातत्रास्फुरणात् तस्माद्भेदविषयत्वेनैववैलक्षण्यंवाच्यम् अयंघटः गजादिकंसेनापन्नमेवतारङ्कः इत्यादौपुरोवर्त्तिनाघटादेरिवातानवितानात्मकास्तन्तवएवपटः शुक्लः पटइत्यादावपितत्वादिनापटस्याभेदप्रतीतेः नचात्रपटत्वशुक्लत्वयोरेकस्यत्वमेवभातीतिवाच्यम् पटशुक्लयोरैक्यस्यापितत्रान्तर्गतेरन्यथाक्वाप्यभेदोनस्यात् घटः पटोनेतिधीश्चभेदविषयानस्यात् दण्डीचैत्रइत्यादावपिदण्डिनाचैत्रस्याभेदोभात्येव नचशुक्लः पटइत्यत्रशुक्लवानेवशुक्लइतिप्रतीयतइतिवाच्यम् शुक्लंरूपमित्यत्रयच्छुक्लंतस्यैवेहप्रतीतेः अन्यथेहापिदण्डीतिवच्छुक्लीतिस्यात् मतुब्लोपादिकल्पनंशब्दविषयकव्यवहारे नतुप्रतीतौपटस्यशौक्ल्यमित्यादिधीर्नभेदविषयाकिंतुसम्बन्धविषयासतीसत्तेत्यादिवद्भेदा भावेपिउपपन्नाच॥ ११ शाक्तंयोगनाशस्यत्वेविभागा

नुत्पत्तेः। सम्बन्धनाशस्यैवयुतसिद्धित्वात्। अस्फुरणादिति। समवायत्वस्याखंडस्यैवभानस्वीकारेपिघटइतिबुद्धितः कपालद्वयंघटइतिबुद्धौसम्बन्धवैलक्षण्यंनस्यादितिबोध्यं एकस्यत्वं एकधर्मिणिवैशिष्ट्यं अन्तर्गतेर्भानात्। नस्यादिति नञंविनायत्राभेदोभातितत्रैववाक्येनञिसत्त्वेभेदोभाति अतएवभूतलेघटोनेत्यादौनभेदभानमितिभावः। ननूक्तनियमेव्यभिचारः दण्डीचैत्रइत्यादावभेदभानेपिनदण्डीचैत्रइत्यत्रभेदभानात्तत्राह दण्डीत्यादि यत् शुक्लं। यच्छुक्लपदार्थः तस्यैवेतिशुक्लंरूपंशुक्लः पटइत्येतयोरेकप्रकारकत्वमानुभविकमित्यर्थः शुक्लीतिस्यात्। शुक्लविशिष्टप्रकारकत्वमनुभूयेत मतुप्लोपेति। नचमतुप्लोपविधिर्व्यर्थः शुक्लपटइत्यादिप्रयोगसाभेदेनैवोपपत्तेरितिवाच्यं स्वरविशेषार्थत्वात् उपपन्नेति। भेदप्रतिनिधिनाविशेषेणोत्यादिः विशेषस्यशुक्लत्वादिकमेवप्रतियोगितावच्छेदकंनतुशुक्लरूपत्वादिकं

तेनपटः शुक्लरूपमित्यादौनप्रयोगप्रत्ययौ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२
अ॰सि॰ यत्तुरूपंपटइत्यादिप्रत्ययःस्यादेवतादृशप्रयोगस्तुप्रथमपुरुषबहुवचनलट्लोडंतवचिप्रयोगवत् नसाधुरितितन्नतादृशप्रत्ययस्यानुभविकत्वाभावात्। वस्तुरूपत्वा
टी॰ल॰ दिनारूपादेर्नघटाद्यभेदोमानाभावात् किन्तुशुक्लत्वादिना अतएवमन्मतेपिनतथाप्रयोगप्रत्ययौ अविरोधायेति। सतिशेषाभेदोनभेदविरोधीतिभावः। अभेदेव्यावहारि
उ॰ काभेदेकाल्पनिकभेदंप्रातीतिकभेदंभिन्नसत्ताकत्वेनैवभेदाभेदौनविरुद्धौव्यवहारदशायांयुक्तिबाध्यत्वादिनाभेदएवप्रातीतिकः अतएवतंतुपटयोःकार्यकारणभावो
९६ पिप्रातीतिकः अहेतुत्वादिति। अभेदविरोधिविशेषणतयाभेदप्रकारकधीर्नञ्समभिव्याहृतवाक्येनोल्लिख्यतेतादृशविशेषणताचगुणगुण्यादिभेदस्यनकल्पितेतिनोक्त

पटस्यतंत्वन्यत्वेचगुरुत्वद्वयापत्तिःतंतुमतिपटस्य—वृत्तिश्चनस्यात् मूर्त्तानांसमानदेशताविरोधात् व्यवहारार्थक्रियाभेदादिकंतुपत्रताटङ्कादिवद्यु
क्तम् तस्मात्तंतुपटादिषुद्विरभेदविषयैव——यदिचेयंकेवलाभेदविषयातर्हिसामानाधिकरण्यव्यवहारंनजनयेत् घटःकलशइत्याद्यव्यवहारात्
तेनज्ञायतेऽधिकोप्यस्यविषयोस्तिनचायंभेदःपटोनशुक्लइत्युल्लेखापातात् भेदा—भेदाविरोधायविशेषकस्यावश्यकत्वाच्चतस्माद्योधिकोविषयःस
विशेषइतिचेत् नसत्यप्यभेदेकाल्पनिकभेदमादायतथाव्यवहारोपपत्याविशेषासिद्धेः नचतर्हिपटोनशुक्लइतिप्रतीत्यापत्तिःफलबलेनकाल्पनि
कभेदस्यसामानाधिकरण्यादिव्यवहारमात्रनिर्वाहकत्वकल्पनेनविपरीतोल्लेखनंप्रत्यहेतुत्वात् तस्मादेवंविशेषोयंनमानविषयःसखेविषादंजहि
मत्सिद्धाविद्ययासर्वसङ्गतिःविशेषखण्डनम्॥१७॥ एवंप्रत्यक्षतःप्राप्तभेदस्यैवनिवारणात् असाक्षात्कृतजीवेशभेदादौकाकथातव तथाहिईश्वर
स्याप्रत्यक्षत्वेनतद्धर्मिकस्यतत्प्रतियोगिकस्यवाभेदस्यग्रहीतुमशक्यत्वात् नन्वीशधर्मिकभेदस्यजीवाप्रत्यक्षत्वेपिस्वधर्मिकभेदस्तथापितत्प्रत्य
क्षोनाहंसर्वज्ञोनाहंनिर्दुःखइत्यनुभवात् नचयोग्यप्रतियोगिकत्वमभावेयोग्यत्वप्रयोजकमितिवाच्यम् स्तम्भःपिशाचोनेत्यादिप्रत्यक्षरूपफलबलेन
संसर्गाभावेतथात्वेप्यन्योन्याभावेऽधिकरणयोग्यतायाएवतन्त्रत्वात् वस्तुतस्तुसंसर्गाभावेपिनतन्मात्रंयोग्यताजलपरमाणौयोग्यपृथिवीत्वाभाव
ग्रहप्रसङ्गात् किन्तुयत्रयत्सत्त्वमनुपलब्धिविरोधितस्याभावोयोग्यइत्यधिकरणनियतैवसर्वाभावस्याधारणीयोग्यतासाचप्रकृतेप्यस्त्येव अन्यथा
ऽभेदश्रुतेरप्रसक्तप्रतिषेधकतापत्तेःभेदश्रुतेश्चत्वदुक्तप्रत्यक्षसिद्धभेदानुवादित्वंनस्यात् ईशधर्मिकजीवेभेदेपितान्यहंवेदसर्वाणिनत्वंवेत्थपरंतपउत्त
मःपुरुषस्त्वन्यइत्यादितद्वचनानुमितप्रत्यक्षसिद्धत्वमेवेतिचेन्न॥ १९ व्यवहारेयदासाकलितादोषान्तरात्तदाघटोनशुक्लइतिभ्रमोभवत्येवेतिभावः। श्रीतर्कैरित्या
दिविशेषपरिखण्डनम्॥१७॥ अनुपलब्धिविरोधिउपलब्ध्यापादकंजलपरिमाणौयदिपृथिवीत्वंस्यात्तर्ह्युपलभ्येतेतिनापादयितुंशक्यंतत्रतत्सत्त्वेप्यनुपलब्धिसंभवात् यो
ग्यव्यक्तिघटितसन्निकर्षस्यैवजात्यादिचाक्षुषोपधायकत्वात् इतिभावः। अस्त्येवेतिस्तंभोयदिपिशाचःस्यात्तर्हितयोपलभ्येतेत्यस्येवाहंयदिनिर्दुःखःस्यांतर्हितथोपलभ्ये
यमित्यस्यापिसंभवात् नान्यहमित्यादिनत्वंसर्वाणिवेत्थेत्यत्रजीवेसर्वज्ञात् भेदोऽर्थआख्यातस्यकर्त्तृवाचित्वात्तथाचसर्वज्ञेपिजीवभेदधीरीशस्यास्तीत्यभिमानः। वस्तुतआख्यातस्यक

रामः ३०६

CC-0. In Public Domain. Digitization by eGangotri

उक्तानुभवस्य नाहं निर्दुःखइत्यादेः संसाराधारस्य संसारोपलक्षितचिद्व्यक्तेस्तदनाधारात् तदनुपलक्षितचिद्व्यक्तितः एतावतापीत्यपिनोक्तप्रतिपत्तौ अज्ञानाश्रयाभिन्नाहमर्थे भेदो भाति न त्वज्ञानाश्रयेइतिसूचितं नतु शुद्धइति। अज्ञानोपहिते निर्दुःखभेदस्त्वयाप्युच्यते तथा च तस्यैवोक्तधीविषयत्वसंभवे शुद्धस्य निर्दुःखाद्भेदमानाभावो न ह्युक्तधीरज्ञानोपहितं नावलंबते किन्तु शुद्धमिति वक्तुं शक्यमिति भावः। शुद्धचिति शुद्धचित्त्वावच्छिन्नप्रतियोगिताकभेदाभाव उच्यते तत्तच्छुद्धचिद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावो वा आद्ये आह तदस्माकमनुकूलमिति। चैतन्ये। शुद्धचिति। अभेदस्य शुद्धचित्त्वावच्छिन्नप्रतियोगिताकभेदाभावस्य शुद्धचित्त्वं च शुद्धचिदन्याविषयकधीविषयत्वं द्वितीये त्वाह भवत्प्रतिकूलं चेति। चकारादस्माकमित्यस्य समुच्चयः। ननु अहं न निर्दुःख इत्यनुभवाच्छुद्धे जीवस्वरूपे संसारानाधारे शस्वरूपाद्भेदसिद्धिरत

उक्तानुभवस्यांतःकरणाद्यवच्छिन्नचैतन्यस्य तदनवच्छिन्नचैतन्यप्रतियोगिकभेदावगाहितया शुद्धचैतन्यधर्मिकनिर्दुःखादिप्रतियोगिकभेदानवगाहित्वात् श्रुतिरप्यवच्छिन्नभेदानुवादिनी भेदनिषेधश्रुतिस्त्वनुमानादिप्रसक्तभेदनिषेधपरा न च योहमस्वाप्संयस्य ममाज्ञानसंसारादि सोऽहं निर्दुःखोनेति सुषुप्तिकालीनान्तःकरणानवच्छिन्नाभेदेनाज्ञानाद्याश्रयाभेदेन च प्रत्यभिज्ञायमाने शुद्धे भेदप्रतीतिः संसाराधारस्य तदनाधाराद्भेद एव ह्यावयोर्विवादो न तु चैतन्यस्य चैतन्यादिति वाच्यम् एतावताप्यज्ञानावच्छिन्न एव भेदग्रहो न तु शुद्धे नहि सुषुप्तिकालेऽन्तःकरणानवच्छिन्नत्ववदज्ञानानवच्छिन्नत्वमप्यस्ति यत्तु चैत—न्याद्भेदो नास्तीति तदस्माकमनुकूलम् चैतन्ये स्वाभाविकस्याभेदस्यैवास्मद्रहस्यत्वात् भवत्प्रतिकूलं च न हि भवतां चैत्रमैत्रादिचैतन्यानामैक्यमिति मतं अहमर्थस्य यथा न शुद्धात्मकत्वं तथोक्तं प्राक् साक्षिप्रत्यक्षस्याऽध्यस्तादिसाधारणतया तत्सिद्धत्वमात्रेणाभेदेऽबाधित्वमसम्भावितमेव एतेन जीवानां परस्परं भेदे———— प्रत्यक्षं प्रमाणमिति निरस्तम् नाहं चैत्र इत्यादेरवच्छिन्नभेदविषयत्वात् घटो न ब्रह्म घटो न पटो नाहं घट इत्यादिप्रत्यक्षस्य कल्पितभेदविषयत्वेन तात्त्विकभेदासिद्धेः तस्माद्भेदपञ्चके न प्रत्यक्षं प्रमाणं भेदपञ्चके प्रत्यक्षभङ्गः॥ १८ ॥ नाप्यनुमानं जीवेश्वरौ भिन्नौ विरुद्धधर्माधिकरणत्वात् दहनतुहिनवदित्यत्र दुःखादेरन्तःकरणादिधर्मत्वेन स्वरूपासिद्धेः एकत्रैव निर्दुःखत्वदुःखवत्त्वयोरवच्छेदभेदेन दृष्टतया धर्मिभेदासाधकत्वात् भेदमात्रे सिद्धसाधनात् तात्त्विकभेदसाधने साध्यवैकल्यात् ब्रह्म तत्त्वतो जीवाद्भिन्नं सर्वज्ञत्वात् व्यतिरेकेण जीववदित्यत्राप्रसिद्धविशेषणत्वात् ब्रह्मधर्मिसत्तासमानसत्ताकभेदवदिति साध्यकरणेऽसाधारण्यात् ॥ १९ ॥

आहाहमर्थस्येति। साक्षिप्रत्यक्षस्यान्तरंगत्वात् मानान्तराबाध्यमिति परोक्तं निरस्यति। साक्षीति। जीवानां जीवस्वरूपाणां अवच्छिन्नभेदेति। मनःशरीरावच्छिन्नयोर्भेदेत्यर्थः तर्कैरित्यादिना ध्यक्षं भेदपञ्चके॥ १८॥ जीवेश्वरावित्यादि। ईशस्वरूपं जीवस्वरूपाद्भिन्नं तद्वृत्तिदुःखादिशून्यत्वात् यो यद्वृत्तिधर्मशून्यः स तदन्यो यथा दहनधर्मशून्यस्तुहिनस्तदन्य इत्यर्थः तदीयस्वाभाविकधर्मशून्यत्वं हेतुस्तदीयधर्मशून्यत्वं वा आद्ये आह दुःखादेरिति द्वितीये आह एकत्रैवेति धर्मिभेदासाधकत्वात्। अनौपाधिकभेदासाधकत्वात् औपाधिकविरुद्धधर्मः औपाधिकमेव भेदं साधयतीत्यर्थः भेदमात्रे औपाधिकसाधारणभेदे असाधारण्यात् साध्यवत्त्वेन निश्चितघटादितो व्यावृत्तत्वात् यत्किञ्चिद्धर्मिसत्तासमसत्ताकभेदेन सिद्धसाधनाद्यपि बोध्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गुणत्वावान्तरजात्यासजातीयाश्रयेति। स्ववृत्तिर्या गुणत्वव्याप्यजातिस्तद्विशिष्टस्याश्रयेत्यर्थः स्वसंख्यासंख्येयेति। स्वसमसंख्येत्यर्थः व्यभिचारादिति कल्पितसमसंख्यत्व
मादाय सिद्धसाधनाच्चपि वोध्यं द्रव्यत्वव्याप्यजात्या नाना। स्ववृत्तिर्या द्रव्यत्वव्याप्या जातिस्तद्विशिष्टान्यासमवेतवहुत्वसंख्यावान् आकाशे व्यभिचारादश्रावणेति असिद्धेः द्र
व्यत्वगुणाधिकरणत्वयोरभावात् कल्पितस्य धूमादेर्ह्रदादावपि सत्त्वात् पक्षेतत्समानसत्ताकोहेत्वभाव एव स्वरूपासिद्धिरिति भावः कल्पितोक्तसंख्यया सिद्धसाधनाच्चपि वोध्यं
साम्यात् तर्कशून्यत्वेन तुल्यत्वात् एतेनाप्रसिद्धविशेषणत्वाभाससाम्यादिना अप्रसिद्धविशेषणत्वं समर्थयितुं पुनराह अप्रसिद्धेति द्रव्यत्वादेरिवेति इच्छादिकं द्रव्याश्रि

आत्मत्वं नानाव्यक्तिनिष्ठं जातित्वात् पृथिवीत्ववदित्यत्रात्मैक्यवादिनं प्रत्यसिद्धेः कल्पितव्यक्तिनिष्ठत्वेन सिद्धसाधनाच्च दुःखं गुणत्वावान्तरजात्यासजा
तीयाश्रयभिन्नाश्रितं गुणत्वात् रूपवदित्यत्र शब्दे व्यभिचारात् दुःखादीनामन्तःकरणधर्मत्वेन सिद्धसाधनाच्च विमतानि शरीराणि स्वसंख्यासंख्ये
यात्मवन्ति शरीरत्वात् संमतवदित्यत्र योगिशरीरे व्यभिचारात् आत्मा धर्मिसत्तासमानसत्ता———कात्मप्रतियोगिकभेदवान् द्रव्यत्वात् घटवत् आ
त्मा द्रव्यत्वव्याप्यजात्या नाना अश्रावणविशेषगुणाधिकरणत्वाद्घटवदित्यत्र चात्मनो निर्गुणत्वेनासिद्धेः चैत्रश्चैत्रप्रतियोगिकोक्तभेदवान् उक्त
हेतोरुक्तदृष्टान्तवदित्याभाससाम्याच्च एतेन नवीनानुमानान्यपि निरस्तानि ईश्वरो जीवप्रतियोगिकतात्त्विकभेदवान् सर्वशक्तित्वात्सर्वज्ञत्वात्सर्वका
र्यकर्तृत्वात्स्वतन्त्रत्वाद्वा व्यतिरेकेण जीववत् जीवो वा ब्रह्मप्रतियोगिकतात्त्विकभेदवान् अल्पशक्तित्वादल्पज्ञत्वादल्पकर्तृत्वात्संसारित्वाद्वा व्यतिरेके
ण ब्रह्मवदित्यादिषु भेदस्य स्वरूपत्वेन तद्ब्रह्मसाधने वाधात् न च विशेषमादाय तदुपपादनम् तस्य स्वरूपानतिरेकेण तद्व्रत्वासम्पादकत्वात् अप्रसि
द्धविशेषणतापत्तेश्च न च जीवब्रह्माऽभेदेऽनिष्टप्रसक्त्याऽदृष्टव्यातिरिक्तद्रव्यत्वादेरिवत्वत्सिद्धस्वप्रकाशत्वादेरिव च साध्यस्य मानयोग्यत्वसम्भव इति
वाच्यम् तात्त्विकभेदव्यतिरेकेणौपाधिकल्पितभेदेन सर्वानिष्टपरिहारसम्भवात् न च जीवो ब्रह्म वा किञ्चिद्धर्मिकप्रतियोगिज्ञानावाध्यभेदप्रतियोगि अधि-
ष्ठानत्वात् शुक्तिवत् इति सामान्यतः साध्यप्रसिद्धिरिति वाच्यम् यत्किञ्चिदभावप्रतियोगिघटादिज्ञानावाध्यभेदप्रतियोगित्वेनात्मज्ञानावाध्यभेदासिद्धेः
स्वप्रतियोगिज्ञानावाध्यभेदप्रतियोगित्वसाध्ये दृष्टान्ते स्वपदेन शुक्तेर्दार्ष्टान्तिके स्वपदेनात्मन उक्तेर्व्याप्तिग्रहानुपपत्तेः यत्तु जीवाद्भिन्नं इत्येवं साध्यं मिथ्या
भेदेन पश्चात्सिद्धसाधनं निरसनीयमिति तन्न निरसनोपायस्य निरसिष्यमाणत्वात् न च ब्रह्म जीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवदित्येव साध्यं ध
र्मिपदेन ब्रह्मण उ

तं गुणत्वादित्यादौ अदृष्टद्रव्याश्रितत्ववाधादृष्टान्यद्रव्याश्रितत्वस्यैव मिथ्याभेदवाधादमिथ्याभेदस्यानुमितिरित्यर्थः स्वप्रकाशत्वादेरिवेति वेद्यत्वं किंचिन्निष्ठा
त्यंताभावप्रतियोगीत्यनुमानेनावेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वस्य प्रसिद्धिरिव जीवो ब्रह्म वा किंचिद्धर्मिकेत्यादिवक्ष्यमाणानुमानेन जीवादिप्रतियोगिकतात्त्विकभेदप्रसिद्धिरिति
भावः संभव इति तथा च मिथ्याभेदवाधे सिद्धः किञ्चिद्धर्मिप्रतियोगिज्ञानावाध्यभेदेति किंचिद्विशेष्यकं यत्प्रतियोगिज्ञानं तदवाध्यभेदेत्यर्थः दृष्टान्ते उदाहरणवाक्ये। दार्ष्टान्तिके प्रतिज्ञावाक्ये

CC-0. In Public Domain. Digitization by eGangotri

यत्तु प्रतियोगिसामान्यज्ञानाबाध्यत्वं निवेश्यमिति तत्तुच्छं आत्मनोपि प्रतियोगिसामान्यान्तर्गतत्वेन तद्बाध्यभेदाप्रसिद्धेः न च बाध्यत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगीत्यनुमाने
नाबाध्यत्वप्रसिद्धिरिति वाच्यं तावतात्मन्यबाध्यत्वसिद्धावप्यबाध्यभेदाप्रसिद्धेः अगृह्यमाणविशेषावस्थायामेवासाधारण्यं दोषः प्रकृते तु तर्केण विशेषावस्थाग्रहान्नासाधारण्य
मिति परोक्तं दूषणायाह विपक्षबाधकरूपविशेषेति तर्कगृहीतविशेषेत्यर्थः यत्र हीत्यादि। वह्न्यभावव्यापकत्वेन धूमाभावस्य ग्रहस्थले वह्नित्वेन प्रसिद्धिरपेक्ष्यते तां विना व
ह्न्यभावत्वेन ग्रहासंभवात् वह्न्यभावाभावत्वरूपानुमेयतावच्छेदकरूपेण प्रसिद्धिस्तु तत्रापि नापेक्ष्यत इति भावः। साध्यतेऽनुमीयते साध्यप्रसिद्ध्या तादात्म्याभावप्रसिद्ध्या व्याप्ति
ग्रहेति तादात्म्यव्यापकाभावप्रतियोगित्वग्रहेत्यर्थः भेदस्य तादात्म्याभावत्वे मानाभावात् तादात्म्ये न जीवं प्रति व्यापकताज्ञानात् न जीवभेदानुमिति संभवतीति तु युक्तं वक्तुं व्या

यत्किञ्चिद्दूर्युक्तो घटादिधर्मिसमानसत्त्वेन सिद्धसाधनात् विपक्षबाधकरूपविशेषाभावे पूर्वोक्तासाधारण्यानतिवृत्तेश्च यत्तु ब्रह्म जीवप्रतियोगिकतात्त्वि
काभेदवन्नेति तन्न एवमपि तात्त्विकाभेदस्य तात्त्विकाभावेन सिद्धसाधनात् अभावेपि तात्त्विकत्वविशेषणेऽप्रसिद्धितादवस्थ्यात् नन्वत्र जीवप्रतियोगिक
तात्त्विकभेदस्यान्योन्याभावरूपत्वान्नाप्रसिद्धिर्दोषः यत्र त्वभावव्यापकतया हेत्वभावो गृह्यते तत्रैव साध्यप्रसिद्धिरङ्गम् इह तु जीवतादात्म्यव्यापकताहे
त्वभावस्य ग्राह्या तद्भावो हेतुना साध्यत इति किं साध्यप्रसिद्ध्या तां विनापि व्याप्तिग्रहोपपत्तेः सन्देहरूपपक्षतासंपत्तयेपि न तदपेक्षा तस्याः सिसाधयिषा
विरहसहकृतसाधकमानाभावरूपत्वेन सन्देहाद्यघटितत्वात् ब्रह्म तत्त्वतो जीवभिन्नं न वेति सन्देहाभावेपि जीवब्रह्मणोर्भेदे तात्त्विकत्वमस्ति न वेति
सन्देहसम्भवाच्च प्रमेयत्वमेतन्निष्ठात्यंताभावप्रतियोगि न वेति सन्देहवदिति चेत् न एवं हि प्रसिद्धेतरभेदस्य पृथिव्यामिव प्रसिद्धजीवभेदो ब्रह्मणि
सिद्ध्यतु न तु तद्गततात्त्विकत्त्वमपि व्यापकव्यतिरेकस्य व्याप्यव्यतिरेकमात्रसाधनसमर्थत्वात् अन्यथातिप्रसङ्गात् यदपि भेदतात्त्विकत्वं धर्मिनिष्ठ
त्वेनोदटङ्कि। तदपि साध्याप्रसिद्ध्या दुष्टम् नापि ब्रह्म जीवाद्भिन्नं दुःखाननुभवितृत्वात् घटवदित्यन्वयी सर्वानुभवितरि हेतोरसिद्धेः स्वनिष्ठेति विशेष
णे जीवे व्यभिचारः दुःखस्यान्तःकरणनिष्ठत्वात् मिथ्याभेदे न सिद्धसाधनाच्च न च भेदे साध्येऽर्थशून्यभ्रान्त्यासिद्धसाधनोत्तरयोगइति वाच्यम् ॥ ❀ ॥

प्यव्यतिरेकमात्रेति ननु मिथ्याभेदेनैकव्यतिरेकः शुक्तौ तद्देके येसत्यपि मिथ्यातद्भेदसम्भवादिति चेद्भ्रान्तोसि एकव्यतिरेकत्वेनैव भेदकल्पनात् प्रातीतिकभेदस्य व्यावहारिकै
क्यविरोधित्वाभावेपि तथा कल्पनायां बाधकाभावात् प्रकृतेपि तात्त्विकजीवस्वरूपैक्याविरोधितद्व्यतिरेकत्वेन व्यावहारिकभेदकल्पनसंभवात् जीवात्। जीवस्वरूपात्। जीवे
जीवस्वरूपे दुःखस्य स्वनिष्ठदुःखानुभवितृत्वस्य अंतःकरणनिष्ठत्वात् अन्तःकरणोपहितनिष्ठत्वात् अविद्योपहितनिष्ठत्वाद्वा ब्रह्मणस्तु नोक्तानुभवितृत्वं स्वनिष्ठपदे न स्वसमा
नसत्ताकस्वनिष्ठत्वस्य वाच्यत्वात् अन्यथा ब्रह्मणो दुःखादिजगदुपादानत्वेन स्वरूपासिद्धेः एतेन दुःखाननुभवितृत्वं दुःखानुभवजन्यविक्रियाशून्यत्वम् अतो नासिद्धिरिति
परास्तं विक्रियादिजगदुपादाने तत् शून्यत्वासिद्धेः विक्रियायां मिथ्यात्वज्ञाने नैव ब्रह्मणो जीवाद्विशेषात् धर्मिसमानसत्ताकेत्यस्य विक्रियाविशेषणत्वे जीवस्वरूपे व्यभिचारः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतोः। व्याप्तिपक्षधर्मतावतः एतेनसिद्धसाधनादिनातदेवविवृणोतिउपहितस्येति। ईशत्वजीवत्वोपहितयोःसिद्धसाधनात्। ईशत्वाद्युपहितसमसत्ताकंघटादिरूपधर्मिसम।
सत्ताकंचभेदमादायसिद्धसाधनात् धर्मित्ववत् ज्ञानविशेष्यत्ववत्संसर्गानुयोगित्ववद्वापारमार्थिकभेदाप्रसिद्धेराह यावत्स्वरूपमनुवर्त्तमानेति। ब्रह्मस्वरूपकालत्वव्यापक
स्वकालत्वकस्यतदर्थस्यमिथ्याभेदेपिसंभवेनसिद्धसाधनाद्राहस्वाज्ञानेति। अनादिमिथ्याभेदमादायसिद्धसाधनादाह स्वज्ञानेतिसाध्यवैकल्यात्। घटादिवृत्तिभेदेपारमार्थिक

भ्रान्तेर्वस्तुशून्यत्वस्यैवाभावादुक्तमिदमनिर्वाच्यवादेन चैतदनुमितिविषयतयाप्रामाणिकत्वेनसिद्धमतःकथंमिथ्यात्वम् अनुमितिविषयतायाःप्रा
माणिकत्वेऽतन्त्रत्वात् नचैवंमिथ्यात्वाद्यनुमानेष्वपिकल्पितमिथ्यात्वादिनासिद्धसाधनापत्तिःकल्पितत्वेनव्यावहारिकमभिप्रेतंप्रातिभासिक।
त्वंवा आद्यइष्टापत्तेः अन्त्येहेतोःस्वसमानसत्ताकसाध्यसाधकतयाप्रातिभासिकत्वाप्रसक्तेः एतेनब्रह्मजीवप्रतियोगिकधर्मिसत्तासमानसत्ताक
भेदवत् दुःखाननुभवितृत्वात् अभ्रान्तत्वात् असंसारित्वात् घटवत् जीवोवाब्रह्मप्रतियोगिकतादृग्भेदवान् असर्वशक्त्यादिभ्यइतिनिरस्तम्
उपहितस्यपक्षत्वेधर्मिसमसत्ताकत्वेपितात्त्विकत्वासिद्धेः सिद्धसाधनात् शोधिततत्त्वंपदार्थपक्षत्वेतयोर्द्धर्मित्वाभावेनबाधापत्तेः नचधर्मि
त्वाभावंप्रतिधर्मित्वाऽधर्मित्वाभ्यांव्याघातःब्रह्मणिसर्वनिषेधस्यस्वरूपव्याघाताभावात् नचधर्मिशब्देनाश्रयमात्रविवक्षाधर्मित्ववदाश्रयत्वस्या
पितत्रासत्त्वात् यत्तुधर्मिशब्दस्यपित्रादिशब्दवत्सम्बन्धिशब्दत्वेनयत्किञ्चिद्धर्मिसमसत्ताकतयानसिद्धसाधनमितितन्नशब्दस्वभावोपन्यासस्यानु
मानंप्रत्यनुपयोगात् एतेनधर्मिपदस्थानेस्वपदमित्यप्यपास्तम् धर्मिपदतुल्ययोगक्षेमत्वात् अतएवधर्मिसत्तासमानसत्ताकपदस्थानेपारमार्थिके
तिवायावत्स्वरूपमनुवर्त्तमानेतिवास्वाज्ञानाकार्येतिवास्वज्ञानाबाध्येतिवाविशेषणंदेयंस्वपदस्यसमभिव्याहृततत्तत्परत्वस्यव्युत्पत्तिसिद्धत्वादितिनिर
स्तम् आद्येसाध्यवैकल्याच्च नचघटोजीवप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवान् जीवधर्मिकधर्मिज्ञानाबाध्याभेदाप्रतियोगित्वात् यद्यज्ज्ञानाबा।
ध्यपद्धर्मिकाभेदाप्रतियोगितत्तज्ज्ञानाबाध्यतत्प्रतियोगिकभेदवत् यथादूरस्थवनस्पत्योरेकइत्याद्यनुमानेनसाध्यसिद्धेर्नाप्रसिद्धिरितिवाच्यम् यत्त
च्छब्दाननुगमेनपक्षधर्मेहेतौव्याप्त्यग्रहात् धर्मित्वप्रतियोगित्वादिसामान्याकारेणव्याप्तिग्रहेविशिष्यसाधनायोगात् नचैवंस्वप्रागभावव्यतिरिक्ते
त्यादौकागतिरितिवाच्यम् ॥ ॐ ॥ ९९ त्वाभावात् नाप्रसिद्धिर्नोक्तभेदे उक्ताभावः ननुयत्त्वतत्त्वेननिवेश्यकिंतुधर्मित्वप्रतियोगित्वेएवतत्राह धर्मित्वेतियत्कि
ञ्चिदित्यादिः धर्मिप्रतियोगिसामान्यनिवेशेतुमांप्रत्यसिद्धिः भेदादिप्रपंचस्यात्मरूपधर्मिप्रतियोगिधीबाध्यत्वात् विशिष्यजीवज्ञानाबाध्यस्वरूपेणतथाचपटादिरू
पप्रतियोगिज्ञानाबाध्यमिथ्याभेदस्यघटादौसिद्धिःस्यात् ननुजीवज्ञानाबाध्यभेदस्येतिभावः ननुजीवस्वरूपस्यत्वन्मतेधर्मिप्रतियोगित्वाभावात् धर्मिप्रतियोगिसामा।
न्यज्ञानाबाध्यभेदोनाप्रसिद्धइतिचेत्तर्हिजीवस्वरूपज्ञानाबाध्यभेदाप्रसिद्ध्योद्देश्यासिद्धिरत्रजीवस्वरूपस्यसद्रूपत्वेनदृश्यमात्रसत्तद्भेदात्स्वरूपासिद्धिरपिबोध्या॥ ॐ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेनजीवस्वरूपंदूरस्थवनस्पत्योरेकत्वेस्यन्यतरज्ञानाबाध्यभेदत्वेनसाध्यत्वान्नाननुगमादिकमित्यपास्तं सद्रूपान्यरूपेणाभेदाप्रतियोगित्वस्यहेतुत्वेतुस्वरूपासिद्धिवारणेपिअप्रयोजकत्वंतादृशभेदस्यव्यावहारिकत्वेनतदप्रतियोगित्वस्यव्यावहारिकभेदेनैवोपपत्तेरितिध्येयं अनुमानांतरेस्वपदस्थानेपक्षदृष्टान्तान्यतरपदप्रवेशेनानुमानेऽनुकूलतर्काणां तत्रोक्तत्वान्नाप्रयोजकताविरोधश्चेत्यादितथाचजीवेशस्वरूपयोरेकमपरस्मात् धर्मिज्ञानाबाध्यभेदवत् स्वधर्मात्यंताभावात् तद्व्याप्यात् सर्वदास्वधर्मसामानाधिकरण्यायोग्याद्वेतिप्रयोगःस्वाभाविकत्वस्यधर्मिसमानसत्ताकत्वरूपत्वेप्याह तच्छब्देनेति॥ आगन्तुकं धर्मिसमानसत्ताकान्यत् जीवत्वादच्छिन्नेतिजी

तत्राप्येतद्दूषणसंचारेणाव्यतिरेकिणिवा अनुमानान्तरेवातात्पर्यात् नापिब्रह्मतत्त्वतोजीवाभिन्नंनेतिसाध्यम् एवंचनसाध्यवैकल्यशङ्कापित्वन्मतेपिकल्पितेघटेऽकल्पितजीवात्तात्त्विकभेदवत्तात्त्विकाभेदस्याप्यभावादितिवाच्यम् तात्त्विकाभेदस्यातात्त्विकेनाभावेनसिद्धसाधनस्योक्तत्वात् नापिजीवेश्वरौधर्मिज्ञानाबाध्यपरस्परप्रतियोगिकभेदवन्तौविरुद्धधर्माधिकरणत्वात् दहनतुहिनवत् विरोधश्चपरस्परात्यंताभावरूपत्वंतद्व्याप्यत्वंवाकालभेदेनापिसामानाधिकरण्यायोग्यत्वंवासंयोगतदत्यन्ताभावयोश्चसामानाधिकरण्यंमतद्द्वयेपिनेतिनतदाश्रयेव्यभिचारइतिवाच्यम् धर्मिपदसाद्यपदोषस्यप्रागेवोक्तत्वात् अव्याप्यवृत्तिदुःखशब्दाद्यधिकरणेव्यभिचाराच्चजीवब्रह्मभेदाऽसिद्धौस्वतन्त्रत्वास्वतन्त्रत्वादीनांसामानाधिकरण्यायोग्यत्वरूपविरोधस्यैवासिद्धात्स्वरूपासिद्धेः कल्पितसार्वज्ञ्यासार्वज्ञ्यादिव्यवस्थायावर्णह्रस्वत्वदीर्घत्वादिव्यवस्थावत्कल्पितभेदेनैवोपपत्त्यातात्त्विकभेदंप्रत्यप्रयोजकत्वाच्च नचाऽल्पशक्तिरसार्वज्ञ्यंपारतंत्र्यमपूर्णता उपजीवकत्वंजीवत्वमीशत्वंतद्विपर्ययःस्वाभाविकंतयोरेतन्नास्यथातुकथंचनेत्यादिश्रुत्यासार्वज्ञ्यादेःस्वाभाविकत्वोक्त्याकल्पितत्वासिद्धिः अनाद्यविद्यासिद्धत्वेनेदानींतनत्वाभावेनचस्वाभाविकत्वोक्तेस्तच्छब्देनोपहितयोरेवपरामर्शान्नतत्रस्वाभाविकत्वोक्तिविरोधः नह्युपहितेपिसर्वज्ञत्वादिकमागंतुकं नापिब्रह्मस्वज्ञानाबाध्यजीवप्रतियोगिकभेदवत्सदार्थत्वाद्घटवत् चेतनत्वंजीवत्वावच्छिन्नप्रतियोगिताकधर्मिज्ञानाबाध्यभेदवद्वृत्तिसर्वचेतनवृत्तित्वात् चेतनाऽवृत्तित्वरहितत्वाद्वाशब्दार्थत्ववदितिवाच्यंस्वपदधर्मिपदाननुगमतादवस्थ्यात् अन्त्यहेतौजीवत्वेव्यभिचाराच्चजडवृत्तित्वाद्युपाधिसत्त्वेनविपक्षबाधकाभावेनचाप्रयोजकत्वात् ब्रह्मणोजीववत्संसारित्वापत्ताविष्टापत्तिःकल्पितभेदेनवापरिहारोविधेयःतदुक्तमप्रमेयेऽनुमानस्यप्रवृत्तिर्नकथंचनप्रमेयस्यत्वनात्मत्वात्तत्रभेदानुमेष्यते ॥ ॥

वस्वरूपत्वावच्छिन्नेत्यर्थः जीवत्वेजीवस्वरूपनिष्ठे अविद्याश्रयत्वादौननुब्रह्मजीवस्वरूपयोर्भेदाभावेब्रह्मणोपिसंसारित्वंस्यादित्याशंक्यसंसारित्वमविद्याश्रयत्वंतदापंप्रत्यावरणंतत्त्वं आद्येपिशुद्धब्रह्मणस्तदापाद्यतेउपहितस्यवा आद्यआह ब्रह्मणइति। जीववत् जीवस्वरूपवत्। आद्यद्वितीयेत्वाहकल्पितभेदेति उपहितस्याविद्याश्रयस्यशुद्धात्कल्पितभेदेत्यर्थः। प्रतिबिंबत्वोपहितंप्रत्येवावरणमुपाधेःप्रतिबिंबपक्षपातित्वात्शुद्धस्यबिम्बत्वोपहितस्यचब्रह्मणःप्रतिबिम्बात्कल्पितभेदेननतत्प्रत्यावरणमितिवार्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व

२ अ॰सि॰ धर्मानधिकरणतयाभेदानुमापकधर्मानधिकरणतया अविद्याश्रयत्वरूपसंसारित्वस्येष्टत्वेनतदापत्तिरूपतर्कोऽप्रवृत्त्याचेतिशेषः अथवाब्रह्मणोऽविद्योपहितब्रह्मणः
टी॰ल॰ संसारित्वापत्तौ अविद्याश्रयत्वापत्तौवाशब्दस्त्वर्थकः परिहारः अयं प्रत्यावरणं तत्त्वपरिहारः धर्मानधिकरणतयाभेदानुमापकादिसर्वधर्मानधिकरणतयेतिबोध्यं इष्टापत्तिः
उ॰ सिद्धसाधनंतस्येत्यादिब्रह्मनजीवोभिन्नमित्यादिवाक्यस्यभेदाभावादिप्रकारकधीद्वारकाखण्डार्थधीहेतुतयासर्वप्रपंचोच्छेदकत्वेनभेदतात्त्विकताधीनिवर्त्तकत्वमित्यर्थः
९९ तर्कैरित्यादि। चित्तोभेदानुमाभिदा ॥ १९ ॥ तात्त्विकाभेदस्यतात्त्विकोमैत्राभेदोयत्रतत्स्यउपाधित्वेति। ननुयत्रयत्रानुसंधातृत्वंतत्रोक्तभेदाभावइतिव्यतिरेकव्याप्त्यभावान्ना
यमुपाधिरितिचेत् भ्रांतोसिपटादौयत्रयत्रोक्तमैत्रभेदस्तत्राननुसंधातृत्वंमैत्रादौयत्रानुसंधातृत्वंतत्रोक्तमैत्रभेदाभावइतिव्याप्तिद्वयस्यमन्मतेसत्त्वात् ननुद्वितीयस्य

शुद्धचैतन्येधर्मानधिकरणतयाऽनुमानाप्रसरोयत्रप्रसरस्तत्रेष्टापत्तिरित्यर्थः नचैवमैक्यानुमानमपिकथंभवत्यद्यस्यतद्दैक्यानुमितिःकथ
मितिपठितुंशक्यत्वादितिवाच्यम् शुद्धचैतन्यैक्यस्यशब्दैकगम्यत्वेनतत्राननुमेयत्वस्येष्टत्वात् नचतर्ह्यैक्यानुमानोपन्यासानर्थक्यम् तस्य
भेदेतात्त्विकत्वभ्रममात्रनिरासफलकत्वात् तस्मादप्रसिद्धविशेषणत्वादन्यथैवोपपत्तितः सर्वशक्त्यस्यशक्त्यादेर्नभेदेतन्त्रताततः जीवब्रह्मभे
दानुमानभङ्गः ॥ १९ ॥ एवंजीवानामपिपरस्परभेदेनानुमानम् चैत्रोमैत्रप्रतियोगिकधर्मिज्ञानाबाध्यभेदवान् मैत्रप्रतियोगिकतात्त्विकाभेदवा
न्नेतिवामैत्रानुसंहितदुःखाननुसन्धातृत्वात् मैत्रस्मृतसर्वास्मर्तृत्वात् मैत्रानुभूतसर्वाननुभवितृत्वाच्च घटवदित्यत्रप्रथमसाध्येधर्मिपदविक
ल्पेनद्वितीयसाध्येतात्त्विकाभेदस्यातात्त्विकभेदेनसिद्धसाधनात् उपहितस्यपक्षत्वेऽर्थान्तरात् चैतन्यमात्रपक्षत्वेहेत्वसिद्धेः साधनैकदेशस्यान
नुसन्धातृत्वादेरुपाधित्वसम्भवाच्च विमतोबन्धध्वंसःस्वप्रतियोगितावच्छेदकावच्छिन्नाधारप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवन्निष्ठःबन्धध्वं
सत्वात् त्वन्मतवत् जीवः संसारी संसारध्वंसाधारोवास्वज्ञानाबाध्यजीवप्रतियोगिकभेदवान् संसारिप्रतियोगिकस्वज्ञानाबाध्यभेदवान्वास्वज्ञानाबा
ध्यसंसारध्वंसाधिकरणप्रतियोगिकभेदवान्वा पदार्थत्वात् घटवत् विमतआनन्दः स्वनिष्ठदुःखविरोधित्वव्याप्यधर्मेणसजातीयप्रतियोगिकस्व—
ज्ञानाबाध्यभेदवान्दुःखविरोधित्वात् दुःखाभावत्ववदित्यादिषुबन्धप्रतियोगिकभेदवतिकालादौध्वंसस्यविद्यमानत्वेनार्थान्तरात्॥ ।१। ध्वाभावस्यघटा

दावपिसत्त्वेनतत्रानुसंधातृत्वाभावेननद्वितीयव्याप्तिरितिवाच्यं उक्तभेदरूपद्वितीयसाध्यस्यमन्मतेमिथ्यात्वेनतदभावस्यघटादौसत्त्वेपित्वन्मतेतदसत्त्वात् द्वितीयव्याप्तेरुपाधि
तायामतंत्रत्वाच्च अत्रशरीराजन्यत्वेशरीरस्यैवमैत्रानुसंहितेतस्यवैयर्थ्यमननुसंधातृत्वंतुस्वरूपासिद्धं। यथाचोक्तवैयर्थ्यंप्रामाणिकंतथाप्रथमपरिच्छेदेप्रपंचसत्त्वानुमान
भंगेविवेचितंजीवइत्यादि जीवोजीवभेदवान् संसारीसंसारिभेदवान् संसारध्वंसवान् संसारध्वंसवद्भेदवानितिक्रमोबोध्यः जीवत्वोपहितयोर्भेदस्यसिद्धत्वात्संसारीत्यादि अविद्या रामः
रूपसंसाराश्रयत्वमविद्योपहितस्यैवतथाचतयोर्भेदस्यापिनानाविद्यापक्षेसिद्धत्वात् संसारध्वंसेत्यादि उक्तध्वंसवत्त्वेनव्यवह्रियमाणंतदुपलब्धिर्नजीवस्वरूपंध्वंसवदंतार्थः अ

र्थान्तरवारणायस्वज्ञानाबाध्येतिवाच्यं स्वः पक्षः कालादावित्यादिना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरीरादिग्रहणं घटादिध्वंससमभूतलादाविव अविद्यादिबन्धध्वंसस्य शरीरादावपि प्रमितिसंभवादेतेन भेदवति देशे दैशिकसंबंधेन वृत्तेः साध्यत्वान्नार्थान्तरमित्यपास्तं साधारणेति बंधत्वप्रकारकव्यवहारविषयत्वं निगडसाधारणमिति तु शोभते बंधत्वस्य निगडसाधारण्याभावे तस्यापि तत्साधारण्याभावात् दुःखनिगडान्यतरध्वंसत्वादिकं च प्रयोजकमन्यथा चैत्रघटान्यतरादिनापि चैत्रादिभेदः चैत्रादौ कुतो न साध्यते सामान्याभावत्वाभावादिति तत् बन्धव्यक्तित्वरूपस्य प्रतियोगितावच्छेदकावच्छिन्नाधारभेदवन्निष्ठत्वसाधने तु बाधः यत्तु आधारांतं बद्धार्थकमिति तत् शोभते उन्मत्तस्य बद्धेति द्व्यक्षरं प्रस्मृतवत एव तावदक्षराणामाधुनिकलक्षणावत्तावक्तुंयुक्तत्वात्

दुःखनिगडसाधारणबन्धत्वासम्भवाच्च स्वपदाननुगमाच्च चैत्रबन्धध्वंसः चैत्रबन्धाधारप्रतियोगिकभेदवन्निष्ठः बन्धध्वंसत्वात्संमतवदित्याभाससाम्याच्च विपक्षबाधकाभावाच्च ध्वंसस्य प्रतियोगितावच्छेदकं न नानाबन्धानुगतबन्धत्वं तस्य सामान्याभावत्वाभावात् एतेनात्ममात्रभेदे आत्मा आत्मप्रतियोगिकस्वज्ञानाबाध्यभेदवान् पदार्थत्वात् घटवत् आत्मवैभवपक्षे आकाश आत्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधारविशेषगुणवद्विभुव्यतिरिक्तः द्रव्यत्वात् पृथिवीवत् पृथिवीत्वं जलत्वं तेजस्त्ववायुत्वमनस्त्वेतरद्रव्यत्वसाक्षाद्व्याप्यजातिभिन्नं प्रमेयत्वात् जलत्ववत् गगनत्वजातिपक्षे तदितरत्वमपि विशेषणं सत्ताद्रव्यत्वान्यात्मनिष्ठजात्यन्या द्रव्यत्वं वा सत्तान्यात्मनिष्ठजात्यन्यमेयत्वाद्घटवत् आत्माणुत्वमते आत्मा द्रव्यत्वव्याप्यजातिमान् अविभुद्रव्यत्वात् घटवदित्यादिभिरात्मत्वजातिसिद्धौ तात्त्विकात्मभेदसिद्धिरिति निरस्तम् आद्ये जडत्वमुपाधिः आत्मपदयोः स्थाने चैत्रपदं प्रक्षिप्याभाससाम्यं च द्वितीये शब्दानाश्रयत्वमुपाधिः विभावात्मान्यत्वं विशेषणं दत्त्वात्माकाशभिन्नस्य विभोर्विशेषगुणवतः साधनप्रसङ्गाच्च जातिपक्षकानुमानेषु कल्पितव्यक्तिभेदेनापि जातेरुपपत्त्या तात्त्विकव्यक्तिभेदापर्यवसायित्वेनार्थान्तरात् न च जातेर्धर्मिज्ञानाबाध्यभेदं विना योगः अन्यथा व्यक्तभेदः क्वापि जातिबाधको न स्यादिति वाच्यं जातेर्व्यक्तिभेदसमानसत्ताकत्वनियमेन प्रातिभासिकभेदस्य व्यावहारिकजातिं प्रति न साधकत्वमिति व्यक्त्यभेदस्य जातिबाधकत्वसम्भवात् जीवभेदानुमानभङ्गः॥२०॥ ननु यद्यात्मैक्यं स्याच्चैत्रेण सर्वदुःखाद्यनुसन्धानं स्यादिति चेदौपाधिकभेदेनाननुसन्धानोपपत्तेः ननु हस्तपादाद्युपाधिभेदेप्यनुसन्धानदर्शनादुपाधिभेदो प्रयोजकः न च विश्लिष्टोपाधिभेदस्तत्र तन्त्रं मातृसुखादेर्गर्भस्थेनानुसन्धानापातात् भारते उद्यतायुधदोर्दण्डाः पतितस्वशिरोऽसिभिः पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीन्युधीत्यादिना विश्लेषेप्यनुसन्धानोक्तेश्चेति चेत् न न हि वयं किञ्चिदुपाधिभेदमात्रमननुसन्धानप्रयोजकं ब्रूमः॥

आकाश इत्यादि कालभेदं परमाणुभेदं चादाय सिद्धसाधनाद्विशेषगुणवद्विभुपदे द्रव्यत्वादिति आकाशभेदद्रव्यत्वयोर्घटादौ व्याप्तिग्रहः गगनत्वजातीति औपाधिकव्यक्तिभेदस्य जातिव्यवस्थापकत्वे गगनत्वात्मत्वादिकं जातिः जडत्वमिति व्यतिरेकव्याप्तिर्मन्मतेस्त्येव तस्या उपाधित्वेनुपयोगश्च शब्दानाश्रयत्वमिति न च पक्षेतरत्वतुल्यता व्याप्तिग्राहकतर्कस्याभावात् उपाधौ साध्यव्यापकताग्राहकतर्कसत्त्वात् वन्हिरनुष्ण इत्यादावतेजस्त्वादिवत् प्रसंगादिति साध्याप्रसिद्धिस्तु यथाश्रुतेपि न हि धर्म्मिसामान्यज्ञानाबाध्यभेदः प्रसिद्धः न स्यादिति व्यक्त्यभेदेपि प्रातीतिकस्य व्यक्तिभेदस्य संभवादिति शेषः तर्कैरित्यादि जीवभेदानुमाभिदा॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अननुसंधानप्रयोजकंतन्मनोवच्छिन्नगतसुखादिवेत्तृत्वस्यतदविद्यावच्छिन्नगतसुखादिवेत्तृत्वस्यवातदधीनस्मरणादेश्चाभावव्याप्यं अंतःकरणरूपोपाधिभेदंतन्मनो
न्यमनोयोगिनानाशरीरेषुनानामनःस्वीकारमतेआहाविद्याभेदमितितदविद्यान्याविद्यामित्यर्थः ऐक्यादिति नचैवंप्रदीपवदावेशःतथाहिदर्शयतीतितत्रभाष्येयोगिनांनाना
शरीरेषुनानामनःसृष्टयुक्तेरसंगतिरितिवाच्यं। यथादीपएकोनेकदीपभावमापद्यते एवमेकोपिविद्वानैश्वर्ययोगादनेकभावमापद्यसर्वाणिशरीराण्याविशतीतितत्रत्यभा
ष्येमनोनानाशरीरैरसंगतित्वस्यास्फुटत्वात् चक्षुरादिनानात्वेनैवानेकभावापत्तेःसंभवात् एकस्यैवमनस्त्वेविपुलीकृतस्यनानादेशस्थनानाशरीरेष्ववस्थानसंभवात्नचै
वंचक्षुरादेरपितदापतिरेकशरीरेचासुषादिकालेशरीरान्तरेपितदापत्तेःपदप्यात्ममनसोर्भेदानुपपत्तेरनेकशरीरासंभवइत्याशंक्य एकमनोनुवर्त्तीन्यपराणिसमनस्कानि
शरीराणीतिभाष्येसमाहितंतदपिनानामनस्कत्वस्यनस्फुटबोधकंवस्तुतस्तूक्तभाष्यशंकायामतभेदेनाभिप्रायभेदः मनसएवजीवोपाधित्वेमनोभेदेनजीवभेदापत्तिःइत्ये

किन्त्वन्तःकरणरूपोपाधिभेदमविद्याभेदंवासचभेदः कवन्धेयोगिनिचनास्त्येवतेनतत्रानुसन्धानम् चैत्रमैत्रयोश्चास्तीत्य ननुसन्धानम् एते
नशरीररूपोपाधिभेदस्याननुसन्धानप्रयोजकत्वेबाल्यानुभूतस्ययौवनेजातिस्मरेणपूर्वजन्मानुभूतस्ययोगिनांनानाशरीरानुभूतस्यचस्मरणान
स्यादितिनिरस्तम् शरीरभेदस्यतत्रातन्त्रत्वात् योगिजातिस्मर्तृणामन्तःकरणैक्यात् नचचैतन्यैक्येंतःकरणभेदस्यनाननुसन्धानप्रयोजकत्वं
चक्षुरादिकरणभेदेप्यनुसन्धानदर्शनादितिवाच्यम् अन्यकरणभेदेनतथादर्शनेप्यन्तःकरणभेदस्यतदैक्याध्यासापन्नेऽननुसन्धानप्रयोजक
त्वंकल्प्यते अन्यथाब्रह्मैक्यस्यजीवेश्रुतिसिद्धतयासर्वानुसन्धानापत्तेः नचान्तःकरणप्रत्यहंसुषुप्तौविलयेनपूर्वेद्युरनुभूतस्याननुसन्धाना
पत्तिरितिवाच्यम् संस्कारात्मनाऽवस्थितस्यैवपुनरुद्बोधेनतत्रान्तःकरणभेदाभावात् नचैवंसुप्तप्रलीनमुक्तानामननुसन्धानप्रयोजकान्तः
करणभेदाभावात्संसारिदुःखानुसन्धानापत्तिरितिवाच्यम् तेषामनुसन्धानप्रयोजकान्तःकरणैक्याध्यासरूपसामग्रीविरहात् नहिप्रतिबन्ध
कमात्रेणकार्यविरहः किंतुसामग्रीविरहेणापि ॥ ऐक्यः अविद्यायाउपाधित्वेतुमनोभेदेनविरुद्धनानाकार्याणांनानाशरीरेष्वापत्तिरित्यपरः तत्राद्यस्य
।समाधानं एकमेवमनोनानाशरीरेष्वितिद्वितीयस्यतुमनोभेदे पूर्वावस्थितमनोनुवर्त्तित्वमन्यमनसांस्वीक्रियतेतादृशत्वेनैवयोगिनातत्स्रष्टेरितिएवंचाद्यमते।
मनोभेदएवाननुसंधानेप्रयोजकोद्वितीयमतेतु अविद्याभेदइतिविभावनीयंसंस्कारात्मनेतितथाचात्यंतिकस्तन्मनोभेदःप्रयोजकः सचतन्मनःशून्यावस्थायां
नास्त्येवतन्मनोऽभेदस्यापितत्रसत्त्वात्। प्रतिबन्धकेतितन्मनोवच्छिन्नानुभवजन्यस्मरणंप्रतितन्मनोभेदस्यप्रतिबंधकत्वमित्याशयेनेदंवस्तुतोऽविद्यावृत्तिसा
मान्यस्यस्वपरिणामस्यविद्यानुपादानकमनोवच्छेदेनोत्पत्तिवारणायअवच्छेदकतासम्बन्धेनतत्तदविद्यावृत्तिंप्रतितत्तदविद्योपादानकमनोभेदस्यप्रतिबंधकत्वं
नचतत्तदविद्योपादानकमनसांताप्रतिहेतुत्वमेवलाघवादास्तामितिवाच्यं उक्तमनस्त्वेनहेतुत्वंतत्तद्व्यक्तित्वेनवाआद्येगौरवं ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्त्ये स्थूलसूक्ष्मनानावस्थासाधारणतद्व्यक्तित्वाभावादेकस्थूलावस्थायास्तद्व्यक्तित्वे नहेतुत्वेऽन्यस्थूलावस्थायास्तदसंभवः सूक्ष्मावस्थाया अहेतुत्वे तदवच्छेदेन सौषुप्तवृत्त्यसंभवः सर्वावस्थानां तत्तद्व्यक्तित्वे नहेतुत्वे त्वति गौरवं परमार्थतस्तु प्रतिबन्धकत्वपक्षेपि तत्तदविद्योपादानकमनोवस्थाव्यक्तिप्रतियोगिकात्यन्तिकभेदत्वेन प्रतिबंधकत्वं वाच्यं तथा च विनिगमकाभावात्प्रत्येकव्यक्त्यनन्तभावेनानन्तप्रतिबंधकत्वापत्त्या तत्तदविद्योपादानकमन आत्यन्तिकभेदत्वेन प्रतिबंधकत्वं वाच्यमिति तदपेक्षया लाघवादुक्तमनस्त्वेन हेतुत्वमेव युक्तं एवं च स्मरणस्याप्रमात्वेनाविद्यावृत्तित्वात्तदविद्योपादानकमनोवच्छिन्नत्वनियमः तत्तन्मनः परिणामसुखादेरपरोक्ष्यन्तु तत्संसृष्टसाक्षिरूपं तत्तन्मनोवच्छिन्नमेवेति न तन्मनोन्तरावच्छेदेना———————पादनाहंसुखादावविद्यावृत्तिस्वीकारे तु नतरां नन्वंतःकरणैक्याध्यासस्यानुसंधानसामग्रीत्वेन सुषुप्त्यादौ कथन्तद्वारणं मनः सूक्ष्मावस्थैक्याध्यासस्य तत्रापि सत्त्वात् किम्वा तस्य तत्त्वे मानमिति चेत् स्मृतिरूपानुसंधान।

नन्वेवं मुक्तस्य स्वरूपसुखानुभवोपि न स्यादिति वाच्यम् तस्याजन्यत्वेनान्तःकरणानपेक्षत्वात् जीवविभाजकोपाध्यज्ञानभेदाभेदाभ्यामननुसन्धानानुसन्धानोपपत्तेश्च न च ज्ञानप्रागभाववदज्ञानस्यापि भेदाभेदयोः तत्राप्रयोजकत्वं यावंति ज्ञानानि तावन्त्यज्ञानानीति मते एकस्मिन्नपि जीवे ब्रह्मविषयकाज्ञानानां भिन्नत्वेनानुसन्धानविरहप्रसङ्गादिति वाच्यं ज्ञानप्रागभावानां ज्ञानसमसङ्ख्याज्ञानानां च जीवविभाजकत्वाभावेनानुसंधानादावप्रयोजकत्वात् मुक्तस्यैवं संसारदुःखानुसन्धानापत्तिः अविद्यारूपोपाधिभेदादननुसन्धाने स्वरूपसुखस्याप्यननुभवापातः इति तन्न वैषयिकसुखाद्यनुसन्धाने तस्य तन्त्रत्वेन स्वप्रकाशरूपस्फुरणे तदनपेक्षत्वात् नन्वेवमनेकाविद्यासम्बन्धस्य दुःखानुसन्धानरूपस्यानर्थस्य च विशिष्टगतत्वे वन्धमोक्षयोर्वैयधिकरण्यापातेन शुद्धगतत्वे वाच्ये यच्छुद्धं चैत्रीयदुःखानुसन्धातृ तदेव मैत्रीयदुःखानुसन्धात्रिति कथमनुसन्धानाननुसन्धानव्यवस्थेति चेत् न ॥ ❁ ॥ १ स्वसुषुप्त्यादावभावात् अवच्छेदकतासम्बन्धेन स्मृतिं प्रति अहंकारत्वेन हेतुत्वादेव तत्र तद्वारणमित्यत्र तात्पर्यात् सुषुप्त्यादावहंकाराभावात् न स्यादिति सुषुप्तौ विशिष्टानुभववारणायानुभवं प्रत्यपि अहंकारत्वेन हेतुत्वादिति भावः अजन्यत्वेनेति विशिष्टाविषयकत्वेन चेति शेषः जन्यविशिष्टबुद्धावेवोक्तहेतुत्वमिति भावः अंतःकरणानपेक्षत्वात् अहंकारानपेक्षत्वात् विभाजकत्वाभावेनेति चरमनष्टाज्ञानस्यैवकैवल्याव्यवहितपूर्वत्वेन विभाजकत्वं न तु नानाज्ञानानामथवा यदज्ञानेनोपहितात् स्वोपहितविभाजकं तदज्ञानं तदज्ञानोपहितनिष्ठसुखाद्यननुसंधाने प्रयोजकमिति भावः मनोभेदेप्येकैवाविद्या सापि न जीवविभाजिके त्येकजीववादे तु मनोभेद एव प्रयोजकः मरणरोगविशेषादौ नाम न आद्यैक्येप्यननुसंधानप्रयोजकत्वमित्यादि वोध्यं भेदात् भंगात् तदज्ञानात्यन्ताभाव एव तदज्ञानोपादानकसुखाद्यननुसंधानप्रयोजक इति भावः तंत्रत्वेन । तदविद्यावृत्तिरूपसुखाद्यनुसंधाने तदविद्योपादानं सुखादावविद्यावृत्त्यभावपक्षेपि स्मृतिरूपाविद्यावृत्तौ तदविद्याजन्यसुखाद्यवच्छिन्नचितिश्च सोपादानं एवं अविद्याभेदाभेदयोरननुसंधानानुसन्धानप्रयोजकत्वे ॥ ❁ ॥ १ ॥ ❁ ॥ ६ ॥ ❁ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ॰सि॰ शुद्धभेदेतिमोक्षभागिशुद्धभेदेत्यर्थः उपाधेराश्रयकोट्यप्रवेशात्। औपाधिकभेदेनेति। शुद्धस्यैवतत्तदुपाध्यवच्छेदेनस्वभेदेनेत्यर्थः।निरस्तमिति अन्यथा शरीरोपहित
टी॰ल॰ स्यवद्धस्यशरीरनाशान्नाशोनतुमुक्तिरितितत्वापिदोषः अथशरीरोपहितस्यैवशरीरावच्छेदेनशुद्धस्यापिवद्धत्वात्तस्यमुक्तिस्तर्हि अविद्योपहितस्यैवाविद्यावच्छेदे
उ॰ नशुद्धस्यापिवद्धत्वात्तत्रमुक्तिरितिसमंप्रतिविम्बेइत्यादितथाचविम्बत्वाद्यवच्छेदेनमन्मतेशुद्धमुखस्यश्यामत्वादिवत् तत्तत्करणावच्छेदेनतार्किकमतेनभसस्त
१०१ अविद्यात्मकवन्धनिवृत्त्यात्मकमोक्षस्यशुद्धगतत्वेपिदुःखाद्यनुसन्धानत्वस्योपहितवर्तितयाशुद्धभेदापादनायोगात् नचसंसारस्यशुद्धगतत्वे ब्रह्मण्यपिसंसारित्वापत्तिः विम्बप्रतिविम्बयोरवदातत्वश्यामत्ववद्घटाकाशमहाकाशयोः परिच्छिन्नत्वापरिच्छिन्नत्ववदेकस्यैवनभसस्तत्तत्कर्णापुटावच्छेदेनतत्तच्छ्रोत्रतावच्च औपाधिकभेदेनसंसारित्वासंसारित्वव्यवस्थोपपत्तेः अतएवदुःखानुसन्धानरूपस्यानर्थस्योपहितनिष्ठत्वेनतस्यकल्पितत्वेनवद्धस्यनिवृत्तिरेवनतुमोक्षइत्यापातइतिनिरस्तम् उपाधेः कल्पितत्वेननिवृत्तावप्युपधेयस्याकल्पिततयातन्निवृत्त्ययोगान्मोक्षान्वयितोपपत्तिः नचप्रतिविम्बस्यस्वच्छायावद्वस्त्वंतरत्वेनाकाशस्यत्वन्मतेपिकार्यद्रव्यतयासावयवत्वेनतेजसाहंकारकार्याणांश्रोत्राणांस्वतएवभिन्नत्वेनदृष्टान्तासम्मतिरितिवाच्यम् प्रतिविम्बेवस्त्वंतरत्वस्यनिरसिष्यमाणत्वात् आकाशश्रोत्रभावस्यपरीत्याद्दृष्टांतत्वात् आत्मेन्द्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइतिश्रुतेर्विशिष्टस्यैवभोक्तृत्वात् तस्यचभिन्नत्वात्व्यवस्थेतिकेचिदुक्तप्रकारेणाप्यनुसन्धानानुसन्धानोपपत्तेश्च अतएवशुद्धचिन्मात्रगतत्वेतत्रभेदाप्रतीत्याभेदस्यकल्पितस्याप्यभावःभावेवाभेदस्यैवव्यवस्थारूपस्वकार्यकारिणोवद्धमुक्तत्ववद्धर्मिज्ञानावाध्यत्वं अभेदस्यत्वऽव्यवस्थारूपस्वकार्याकारिणोऽनुक्तत्ववन्मिथ्यात्वापात आविद्यकभेदहीनस्यमुक्तस्यसंसारिदुःखानुभवापातश्च इतिनिरस्तम् अवस्थायाः स्वसमानसत्ताकभेदकार्यत्वेनस्वाधिकसत्ताकभेदानाक्षेपकत्वात् अवस्थायास्तु शुद्धचैतन्याभेदाकार्यत्वेनतदकारित्वप्रयुक्तमिथ्यात्वस्यापादयितुमशक्यत्वात् उपाध्यभेदस्यैवतत्रतन्त्रत्वात्किन्त्वौपाधिकल्पितांशजीवानांवाऽनुसन्धानमापाद्यते अंशिनोब्रह्मणोवानाद्यः हस्तावच्छिन्नेनपादावच्छिन्नदुःखाद्यननुसन्धानात् नचनवयंभोगायतनानांसाङ्कर्यमापादयामः येनपादेमेवेदनाशिरसिमेसुखमितिनस्यात् किन्त्वनुसन्धानमात्रम् तच्चांशानामस्त्येव अन्यथाचैत्रदेहलग्नकण्टकोद्धरणायमैत्रस्यैवपादलग्नकण्टकोद्धरणायहस्तस्यव्यापारोनस्यादितिवाच्यं ॥ २ ॥ तच्छब्दग्राहकत्वाद्व्यव।

ख्यात्वमि

स्था आत्मेन्द्रियमनइतिसमाहारः युक्तंमिलितंयोभोक्तातत्युक्तमात्मारीत्यन्वयः तेनभोक्तुरविशेषणत्वात् नपुंस्त्वानुपपत्तिः विशिष्टस्येन्द्रियमनोविशिष्टात्मनः।भिन्नत्वादितिकायव्यूहस्थलेतु अपवादः अनाक्षेपकत्वादिति। नचयस्मिन् धर्मिणिकार्यकरोयोभेदः सतत्समानसत्ताकइतिनियमात् शुद्धेऽनुसंधानरूपकार्यकरस्य शुद्धसमानसत्तेतिवाच्यं प्रातीतिकस्यापिशुक्त्यादिभेदस्यशुक्त्यादेहानादिकरत्वात् तत्र अननुसंधानव्यवस्थाया अभावेहस्तेत्यादि। हस्तावच्छेदेनपादावच्छिन्नदुःखाद्युपलंभाभावादित्यर्थः।सांकर्ये हस्तावच्छेदेनपादावच्छिन्नसुखाद्युपलंभादिमत्वं पादे पाद एव शिरसि शिरस्येव ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दुःखस्येति दुःखं यदवच्छेदेनोत्पद्यते तदवच्छेदेनैवोपलभ्यते अतो दुःखोत्पादनियमेनैव तदुपलंभोत्पादनियमात् दुःखस्येत्याद्युक्तं तथा च दुःखाद्युपलंभनियमस्य पूर्वोक्त त्वेपि न संदर्भविरोधः तथा चान्तःकरणाद्यैक्यस्यानुसन्धानप्रयोजकत्वेच। हस्तावच्छेदेन हस्तघटितशरीरावच्छेदेन अनुसंधानं योहं पादावच्छेदेन दुःखी सोहं हस्तावच्छेदेनाद् सीत्यनुसंधानं अभोक्तृत्वेन। सुखादिसाक्षात्कारशून्यत्वेन मिथ्यात्वेनाज्ञानं यत्तच्छून्यत्वेन वा अनुसंधानाद्यविद्याकार्यमविद्योपहितब्रह्मोपादानकं न तु शुद्धब्रह्मोपादानकमि

पादावच्छिन्नदुःखस्य हस्तावच्छिन्ने अनुत्पाद नवत् चैत्रीयदुःखाद्यनुसन्धानस्य मैत्रेऽनुत्पादः हस्ते दुःखप्रयोजकसामग्रीविरहवत् मैत्रेऽनुसन्धानप्रयोजकोपाध्यैक्याभावात् तथा च हस्तावच्छेदेनानुसंधानमस्त्येवेति न तत्र व्यापाराभावापत्तिः। नांत्यः तस्याभोक्तृत्वेन भोगाप्रसङ्गात् दुःखादिज्ञानमात्रस्य सर्वज्ञे तस्मिन्निष्टत्वात् न च भोक्तृजीवाभिन्नत्वेन ब्रह्मणोपि भोक्तृत्वापत्तिः बिम्बप्रतिबिम्बवत् व्यवस्थोपपत्तेः अनुसन्धानस्यावच्छिन्नगततया शुद्धब्रह्मणापादनायोगाच्च न चैतावता बन्धमोक्षयोर्वैयधिकरण्यं अविद्यात्मकबन्धस्य शुद्धगतत्वेन सामानाधिकरण्योपपत्तेः अवच्छिन्नस्यानुसन्धातृत्वेप्यवस्यात्रयानुसृतविद्यावच्छिन्नद्वारा शुद्धेऽनुसन्धातृत्वस्येष्टत्वात् अनेन जीवेनेत्यादिश्रुतेः यथा स्वकर्णपुटपरिच्छिन्ननादोपलम्भे भागान्तरवर्तिनादानुपलम्भस्तथा सुखदुःखाद्युपलम्भानुपलम्भौ न चात्मभेदे कर्णपुटानान्तत्तदीयत्वनियामकत्वदेकात्मवादे सर्वदेहानां स्वीयत्वेन तत्तदीयत्वनियमाभावेन व्यवस्थानुपपत्तिरिति वाच्यम् तवात्मभेदेनेवावच्छेदकाज्ञानादिभेदेन मम व्यवस्थोपपत्तेः किञ्च व्यवस्थया भेदं वदन्त्रष्टव्यः केयं व्यवस्थानतावद्धर्मभेदः एकस्मिन्नेव वस्तु खदुःखदर्शनेन व्यभिचारात् भिन्नाश्रयधर्मोक्तावन्योन्याश्रयात् विरुद्धधर्मोक्तौ तु विरुद्धत्वस्य सहानवस्थानरूपत्वेऽसिद्धेः वध्यघातकभावरूपत्वे तस्यैकाश्रयत्वेनोपपत्त्या भेदासाधकत्वात् नाप्यनुसन्धानानुसन्धाने तयोरुक्तेन प्रकारेणोपाधिभेदेनोपपत्तेरात्मभेदासाधकत्वस्योक्तत्वात् अत एव बद्धमुक्तादि व्यवस्थापि न स्वाभाविकभेदसाधना यतस्तदुपाध्युपगमापगमाभ्यामेव व्यवस्थोपपत्तेः न चोपाधेरप्युपहितनिष्ठत्वेनात्माश्रयादिर्दोषः उपाधेरविशेषणत्वेन व्यक्तंतरानपेक्षत्वेनात्माश्रयादिचतुर्णामनवकाशात् एतेन शुद्धनिष्ठत्वे किमेकैकोपाध्यपगमे मुक्तिरुत सर्वोपाध्यपगमः नाद्यः सदामुक्तिरेव न तु बन्ध इत्यापातात् नान्त्यः अधुना बन्ध एव न कस्यापि मुक्तिरित्यापातादिति निरस्तम् येनोपाधिना यस्य चैतन्यस्य परिच्छिन्नत्वं तस्मिन् चैतन्ये तदुपाध्यपगमस्यैव मुक्तित्वेन नाना। जीववादे पूर्वोक्तदोषानवकाशात् एकजीववादे सर्वोपाधिविगमस्यैव मुक्तितयेदानीं मुक्त्यभावस्येष्टत्वात् ननूपाधेः कथं भेदकत्वं तथाहि उपाधिः किमेकदेशेन सम्बध्यते कृत्स्नेन वा आद्ये तन्मते स्वाभाविकांशाभावेनौपाधिकत्वं वाच्यम् तथा चानवस्था अन्त्ये न भेदकता कृत्स्नस्यैकोपाधिग्रस्तत्वात्॥ ११ तिपक्षेपि समाधत्ते अनुसं

धानस्येति। अवच्छिन्नद्वारेति। शुद्धस्यावच्छिन्नतादात्म्यात् परंपरयानुसंधानवत्त्वं अनेनेत्यादिश्रुतौ आत्मनास्वरूपेणाभिन्नो योऽयं जीवस्तेनानुप्रविश्य व्याकरवाणीति ब्रह्मणः आलोचनं आत्माश्रयादिरिति। उपाधेः स्वोपहितनिष्ठत्वे आत्माश्रयः उपाध्यंतरोपहितनिष्ठत्वे तस्यैतदुपहितनिष्ठत्वेऽन्योन्याश्रयः उपाध्यंतरोपहितनिष्ठत्वे तस्याप्युपाध्यंतरोपहितनिष्ठत्वमित्ये

वमनवस्था एवं चक्रकमपि अविशेषणत्वेन स्वाश्रयकोट्यप्रवेशेन अनपेक्षत्वेन स्वोपहित॥
निष्ठत्वेन॥

CC-0. In Public Domain. Digitization by eGangotri

मिथ्याभेदप्रयोजकेतिमिथ्याभेदसमनियतेत्यर्थः सत्यप्यैक्येभासमानत्वात्तद्धीनिवर्त्यत्वाच्चमिथ्याभेदस्तस्योपाधिवाधकज्ञानंविनावाधाभावादुपाधिप्रयोज्यत्वंतथाचानाद्युपा
धिस्थलेऽनादिभेदः साद्युपाधिसम्बन्धेतुतेनतज्जनकसामग्र्यैववाभेदोपपत्तिरित्युभयस्थलेकल्पितभेदेनशुद्धस्यैवभागद्वयायत्तत्वादेकस्मिन्नेवशुद्धेभागेउपाधिसम्बन्धान्न
कृत्स्नेशुद्धेतदापत्तिरथभेदखण्डनोक्तयुक्तिभिर्भेदासंभवेनभागासंभवइतिचेन्नमिथ्यात्वेनतस्येष्टत्वात् अतएवत्वदीयटीकायाभवेदित्यादिदूषणमपिसत्योपाधिकृतसत्यभेद

गगनादावपिस्वाभाविकांशाभावेघटाद्युपाधिसम्बन्धोनस्यादेवतदुक्तम् भवेदुपाधिसम्बन्धएकदेशेथसर्वगः एकदेशेनवस्थास्यात्सर्वगश्चेन्नभेदकइति
चेत् नसर्वविकल्पासहत्वेनमिथ्याभूतस्यैवोपाधेर्मिथ्याभेदप्रयोजकत्वस्यप्रागेवोपपादनात् यथाचात्मनांसर्वगतानांभेदेव्यवस्थानुपपत्तिस्तथाप्रपञ्चि
तंभाष्यकृद्भिः जीवभेदानुकूलतर्कभङ्गः ॥ २१॥ एवंजडेशभेदेजडजीवभेदेचतात्त्विकेप्रमाणंनास्तिब्रह्मजीवोवाऽनात्मप्रतियोगिकधर्मिज्ञानावाध्यभेदवा
न् पदार्थत्वात् घटवत् ब्रह्मजीवोवाघटप्रतियोगिकधर्मिज्ञानावाध्यभेदवान् घटासम्बद्धकालसम्बन्धित्वात् तदसम्बद्धदेशसम्बन्धित्वात् तज्जनकाजन्यत्वा
त्पटवत् ब्रह्मजीवोवाजडप्रतियोगिकधर्मिज्ञानावाध्यभेदवान् जडानात्मकत्वात् यदेवंतदेवंयथादूरस्थवनस्पत्योरेकइत्यादिषुपूर्वोक्तदोषाननिवृत्तेःप
रिच्छिन्नत्वस्यजडत्वस्यचोपाधित्वाच्चजीवोब्रह्मवात्मप्रतियोगिकतादृग्भेदाधिकरणंपदार्थत्वादित्याद्याभाससाम्याच्च नचघटाभेदेघटसिद्धेवतत्सिद्धावेदं
तवैयर्थ्यंब्रह्मणोजडत्वाद्यापत्तिः मुक्तिसमानाधिकरणबन्धाधारस्यजीवस्यजडवन्निवृत्त्यापत्तिः गौरोहमित्यादिप्रतीतिश्चप्रमास्यादित्यादिविपक्षवाध
कान्नाभाससाम्यादिकमितिवाच्यम् स्वप्रकाशत्वेनसर्वप्रत्ययवेद्यत्वेनब्रह्मसिद्धावपिसविलासाज्ञाननिवर्तकज्ञानायवेदान्तसाफल्यस्यवहुधाभिधानात् घ
टादेःकल्पितव्यक्त्यंतरेणकल्पितभेदस्याभावेपियथानकल्पितव्यक्त्यात्मकत्वंतद्वत्प्रातिभासिकत्वंतद्वद्विशेषदर्शनेननिवृत्तिर्वाकल्पितव्यक्त्यन्तरेण
क्यज्ञानप्रमात्वंवातथाप्रकृतेपिकल्पितजडेनभेदाभावेपिनतदात्मकत्वादीतिनविपक्षवाधकस्यकस्याप्यत्रप्रसरः एवंजडानामन्योन्यभेदेपिनानुमा
नंघटः तत्त्वतःशुक्त्यभिन्नोनशुक्तिसम्बद्धकालासम्बन्धित्वात् तज्जनकाजन्यत्वात् तत्रारोपितरूप्यवत् व्यावहारिकभेदसत्वयाप्यङ्गीकारेणनप
क्षदृष्टान्ताद्यनुपपत्तिः अन्यथाभेदसिद्ध्यसिद्ध्योर्दोषतदभावयोश्चाभेदेनस्वक्रियाविरोधः स्यादित्यत्रतात्त्विकशुक्त्यभिन्नत्वरूपप्रतियोग्यप्रसिद्ध्या
साध्याप्रसिद्धेः ॥ ॥ ऐक्यैवेत्युक्तं यत्तुसत्यभेदेनव्यवस्थाया असंभवेमिथ्याभेदेनसुतरांसइतितन्नोक्तं मिथ्याभेदस्यतर्कासहत्वेपिव्यवस्थाकालेऽनुच्छे

दात् । तर्कैरित्यादिजीवभेदोनतर्कभाक् ॥ २१ ॥ ॥ ब्रह्मजीवोवाब्रह्मणोजीवस्यवास्वरूपं। जीवत्वाद्युपहितस्यपक्षत्वेतत्रतज्ज्ञानावाध्यभेदस्यसिद्धत्वात् तस्य
शुद्धात्मज्ञानेनैववाध्यत्वात् प्रतियोग्यप्रसिध्येतिनचब्रह्मप्रतियोगिप्रसिद्धिर्ब्रह्मनिष्ठस्यशुक्त्यभेदस्यब्रह्मरूपत्वादितिवाच्यंशुक्तित्वेनशुक्त्यभेदस्यशुक्तिरूपस्यप्रकृ
तेनिवेश्यत्वात् अन्यथाब्रह्मस्वरूपस्यसद्रूपेणशुक्त्यभेदस्यघटेपिसत्त्वेनवाधापत्तेः॥ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यस्य इतिपदार्थस्य इत्यत्र इतिपदार्थे तात्त्विकाभाववानिति कृते इतिपावत् यथाश्रुते नञर्थे तत्त्वत इतिनामार्थस्याभेदान्वयानुपपत्तिः सुतरामिति। अभेदे तात्त्विकत्वविशेषणे ब्रह्मरूपस्य तस्य प्रसिद्धिः संभाव्यते अभावे तद्विशेषणे तु न तत्प्रसिद्धिरित्यर्थः ब्रह्मरूपाभावस्य तथा प्रसिद्धावपि सिद्धसाधनवारणाय निवेश्यस्य तदन्यस्योक्ताभावस्याप्रसिद्धिः। आत्मभेदमादायार्थांतरादंतर्गणिकेति। अनात्मप्रतियोगिकेत्यर्थः। धर्मानधिकरणघटेति न चाधिष्ठानघटधर्मस्य कल्पितघटवृत्तित्वेन कल्पितत्वान्नेदं युक्तमिति वाच्यं सर्वधर्माणां स्ववृत्तित्वेन कल्पनासंभवात्। धर्मसमानसत्ताकस्ववृत्तित्वस्य निवेश्यत्वेन कल्पितघटवृत्तित्वस्याधिष्ठानीभूतधर्मसमानसत्ताकत्वाभावेनादोषात् स्व

तत्त्वत इत्यस्य नेत्यत्र विशेषणत्वे सुतरामप्रसिद्धेः घटादिसमसत्ताकभेदमात्रेणाहेतोरुपपत्त्याऽप्रयोजकत्वाच्च भेदस्य तात्त्विकत्वे वाधस्योक्तत्वेन वाधाच्च अनात्मा स्ववृत्ति धर्मानाधारज्ञानावाध्यांतर्गणिकभेदवान् पदार्थत्वादात्मवत् विपक्षे च दूरस्थवनस्पत्योः शुक्तिरूप्ययोश्चाभेदग्राहिप्रत्यक्षं तत्त्वावेदकं स्यान्मुक्तिसंसारादिसाङ्कर्यं स्यादित्यादि वाधकमिति यत्तन्न ——— एकत्र घटे कल्पिता येऽनेके घटास्तेषु स्ववृत्तिधर्मानधिकरणघटज्ञानवाध्यभेदवत्सु व्यभिचारात् यत्किञ्चित्स्ववृत्तिधर्मानाधारोक्तौ घटत्वानधिकरणपटज्ञानावाध्यभेदेनात्मज्ञानवाध्येनार्थांतरम् स्ववृत्त्यशेषधर्मानाधारोक्तौ तवमते ब्रह्मणोऽपि वाच्यत्वादिकेवलान्वयिधर्माधारत्वेन साध्याप्रसिद्धेः कल्पितेन सह तात्त्विकभेदाभाववत् तात्त्विकाभेदस्याप्यभावेनोदाहृतस्थले तत्त्वावेदकत्वसाङ्कर्यादीनामप्रसङ्गात् यत्त्वात्मनामात्मानात्मनोश्च परस्परतात्त्विकभेदेऽनात्मा स्वावृत्तिधर्माधिकरणप्रतियोगिकप्रतियोगिज्ञानावाध्यभेदाधिकरणं यत्स्वावृत्तिधर्माधिकरणं तत्प्रतियोगिकप्रतियोगिज्ञानावाध्यभेदाधिकरणं पदार्थत्वात् आत्मवत् पक्षे स्वावृत्तिधर्माधिकरणमात्मा ततो भिन्नादात्मान्तराद्भिन्नत्वेन साध्यसिद्धिः दृष्टान्ते च स्वावृत्तिधर्माधिकरणं जडं ततो भिन्नाज्जडान्तराद्भिन्नत्वेन साध्यसत्त्वमिति तन्न पक्षदृष्टान्तयोः स्वपदार्थप्रतियोगिपदार्थयोरननुगमेन व्याप्यत्वासिद्धेः अजडत्वस्योपाधित्वाच्च जडत्वेन व्यतिरेकिणा सत्प्रतिपक्षाच्च यदपि जीवस्य ब्रह्मतो जीवाच्च जडस्य सत्यभेदे पृथिवी ब्रह्मप्रतियोगिकधर्मिज्ञानावाध्यभेदाधिकरणं यदब्बाद्यनधिकरणं तत्प्रतियोगिकप्रतियोगिज्ञानावाध्यभेदवती वस्तुत्वात्तोयवत् अब्बादीत्यादिशब्देन तत्तद्वादिनः प्रति तत्तद्वादिसिद्धाः पृथिवीत्वभिन्नाजडनिष्ठधर्मा विवक्षिताः पक्षे ब्रह्मभिन्नाज्जीवाद्भिन्नत्वेन साध्यसिद्धिः॥ २१ तत्किञ्चिद्धर्म

निवेशपक्षे यथाश्रुतस्यापि युक्तत्वाच्च घटत्वेति। अनात्मत्वसामानाधिकरण्यविशिष्टघटत्वेत्यर्थः। एतेनात्मनोऽपि घटत्वानधिकरणत्वाद्घटत्वानाधारज्ञानवाध्यत्वसामान्याभाववद्भेदमादायनार्थांतरमित्यपास्तं साध्याप्रसिद्धेरिति स्वावृत्तिधर्माधारोक्तौ तु स्वपदस्य पक्षीभूतानात्मपरत्वे तदप्रसिद्धिः धर्ममात्रस्यैवमन्मतेऽनात्मवृत्तित्वाद्यत् किञ्चिदनात्मपरत्वेऽपि आत्मनो निर्धर्मकत्वेनानात्मन एव तथात्वात्तज्ज्ञानावाध्यभेदमादायार्थांतरं। स्वावृत्तिधर्मेत्यादि। स्वमनात्मा तदवृत्तिधर्माधिकरणमात्मेति पराभिमानः। यत्त्वादृशेति। स्वमनात्माव्यतिरेकिणा यत्र यत्रोक्तसाध्याभावरूपसाध्याभावस्तत्राजडत्वमिति व्यतिरेकव्याप्तिमता। ब्रह्मप्रतियोगिकेत्यादि अब्बाद्यनधिकरणमित्यत्र विशेषणेन जीवे ब्रह्मभेदसिद्धिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ·सि· पार्थवभिन्नत्वेनेतिजीवभेदस्यदृष्टान्तेसिद्ध्यभावेपिपृथिवीभेदस्यमानान्तरेणसिद्ध्याव्याप्तिग्रहइतिभावः जीवब्रह्मभिन्नात्मनइतिसाध्याप्रसिद्धिस्तुयथाश्रुतेपिनहि अज्ञाद्य
टी·ल· नधिकरणान्तेनविवक्षितंब्रह्मप्रतियोगिकतात्त्विकभेदवच्चेतनत्वरूपंप्रसिद्धमस्ति अथमन्मतेऽप्रसिद्धप्रतियोगिकाभावस्वीकारान्नदोषइतिब्रूषेतर्हि उक्तविशेष
उ· णदानेपितत्तुल्यं अथत्वांप्रत्यनुमानेसाध्याप्रसिद्धिर्दूषणमेवेतिब्रूषेतदपितुल्यं पूर्वप्रयोगएवान्तर्गणिकेति आन्तर्गणिकत्वमज्ञाद्यनधिकरणब्रह्मप्रतियोगिकत्वं।
१०३ आन्तर्गणिकेत्यस्यपूर्वेजीवस्यजीवान्तरादपिभेदसिद्ध्यर्थमिति क्वचित्पाठः सचान्तर्गणिकभेदेत्यस्यप्रयोजनोक्तिः। विशेषणांसत्यन्तस्यविशेष्यदलं अत्रेतिनिर
स्तमित्यनुषज्यतेनिरासइतितदर्थः। तेनसाम्यादिहेतूनांनानन्वयः अनधिकरणेत्यत्रअनधिकरणमित्यत्र आभाससाम्यात् ब्रह्मजीवान्यात्मानुमानाभासेनतर्कमू।

दृष्टान्तेतुब्रह्मभिन्नपार्थिवभिन्नत्वेनेतितन्न अज्ञाद्यनधिकरणत्ववज्जीवत्वानधिकरणेत्यपिविशेषणंदत्वा जीवब्रह्मभिन्नात्मनोपिसाधनप्रसङ्गात् गन्धाधारत्वादिव्यतिरेकिणासत्प्रतिपक्षसम्भवाच्च धर्मिपदविकल्पनिबन्धनदोषतादवस्थ्याच्च एतेनजीवस्यब्रह्मजीवान्तराभ्यांजीवाच्चजडस्यभेदेपूर्वप्रयोगएवान्तर्गणिकभेदवदित्यज्ञाद्यनधिकरणेत्यत्रविशेषणंदत्वानुमानंनिरस्तम् जीवस्यब्रह्मजीवान्तराभ्यांजडस्यचजीवाद्ब्रह्मणोजडाच्चभेदेपृथिवीब्रह्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधिकरणमज्ञाद्यनधिकरणमान्तर्गणिकभेदवच्च यत्तत्प्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवत्त्वेसति अज्ञाद्यनधिकरणासंसारिधर्मिकधर्मिज्ञानाबाध्यभेदप्रतियोगिनीवस्तुत्वादस्तुवदित्यत्रब्रह्मणोजडादपिभेदार्थंपूर्वस्माद्धिकमज्ञाद्यनधिकरणासंसारीत्यादिविशेषणम् अत्रपक्षेऽज्ञाद्यनधिकरणमसंसारिब्रह्मतद्धर्मिकभेदप्रतियोगित्वेनसाध्यसिद्धिः दृष्टान्तेत्वज्ञाद्यनधिकरणासंसारिपार्थिवन्तद्धर्मिकभेदप्रतियोगित्वेनेतिज्ञेयम् अत्रजीवत्वानधिकरणत्वस्याज्ञाद्यनधिकरणेत्यत्रविशेषणत्वेनपूर्ववदाभाससाम्यात् पाकजरूपाधिकरणत्वादिनासत्प्रतिपक्षाच्च धर्म्यादिपदविकल्पग्रासाच्च एवंभेदमात्रेपिनानुमानंब्रह्मभेदहीनंनावतिष्ठतेस्वज्ञानाबाध्यभेदवद्वापदार्थत्वाद्घटवत् ॥ ❀ ॥

न्यतयातुल्यत्वात्पाकजरूपाधिकरणत्वादिनेतिव्यतिरेकिणेतिशेषः पाकजरूपानधिकरणत्वादिनेतिपाठेतुब्रह्मपक्षीकृत्यसत्प्रतिपक्षप्रयोगोबोध्यः नचपूर्वानुमानस्यपृथिवीपक्षकस्यब्रह्मपक्षकंपाकजरूपानधिकरणत्वहेतुकानुमानंनसत्प्रतिपक्षः किन्तुपृथिवीपक्षकमेवेतिवाच्यं पूर्वानुमानेहिपृथिव्यांब्रह्मनिष्ठभेदप्रतियोगित्वंभासतेब्रह्मणिउक्तसाध्याभावानुमानेपि अज्ञाद्यनधिकरणासंसारित्वेनरूपेणभासमानपृथिवीनिष्ठभेदाप्रतियोगित्वस्यब्रह्मणिभानंतथाचतुल्यवित्तिवेद्यत्वात्तत्रतादृशपृथिव्यांब्रह्मनिष्ठभेदाप्रतियोगित्वस्यापिभानसंभवात् पृथिवीपक्षकानुमान
एवसत्प्रतिपक्षानुमानस्यपर्यवसानात्। नचतथापिपृथिव्याः पृथिवीत्वेनब्रह्मणश्चोक्तासंसारित्वेनपूर्वानुमानेभानात् सत्प्रतिपक्षानुमानेतुपृथिव्याउक्तासंसा रामः
रित्वेनब्रह्मणोब्रह्मत्वेनभानात् नसत्प्रतिपक्षतेतिवाच्यंप्राचीनमतेसमानविषयकयोर्भिन्नप्रकारेणापिज्ञानयोर्विरोधित्वाभ्युपगमात् ॥ ❀ ॥ ❀ ॥ ३१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मुक्त्यसहवृत्तित्वस्य मुक्ताधारान्यत्वस्य उपाधित्वादिति भेदशून्यत्वाभावरूपप्रथमस्य द्वितीयस्य च साध्यस्य व्यापकत्वं घटादौ ब्रह्मणि तु साध्यं सन्दिग्धमिति तत्रोपाध्याभावेपि न क्षतिः यत्तु उक्तानुमानेषु उक्तोपाध्ययोनयुक्ताः यत्र यत्रोक्तोपाध्याभावः तत्रोक्तसाध्याभाव इति व्यतिरेकव्याप्त्यभावादिति तन्न। उक्तव्याप्तेरुपाधित्वानुयोगात् नहि स्वानधिकरणसाधनाधिकरणे वर्त्तमानो यस्तत्समानाधिकरणसाध्यव्यापकत्वादिरूपोपाधित्वे सा निवेश्यते ब्रह्माभेदस्याब्रह्मनिरूप्यत्वेनेति पाठः अब्रह्मरू-

मुक्त्यसहवृत्तित्वस्य जडत्वस्य चोपाधित्वात् स्वपदविकल्पग्रासाच्च एतेनानात्मास्वान्यज्ञानाबाध्यभेदाधिकरणं पदार्थत्वादात्मवदिति निरस्तम् ब्रह्मभेदो न सर्वनिष्ठात्यन्ताभावप्रतियोगी ब्रह्मनिरूप्यत्वाद् ब्रह्माभेदवदित्यत्र ब्रह्मभिन्नावृत्तित्वमुपाधिः ब्रह्माभेदस्याब्रह्मनिरूप्यत्वेन तदनिरूप्यतया साधनवैकल्यं च ब्रह्मज्ञानं स्वाबाध्यभेदवद्विषयकं ज्ञानत्वाच्छुक्तिज्ञानवदित्यत्रानात्मविषयत्वमुपाधिः स्वपदेन ब्रह्मज्ञानोक्तौ तदबाध्यभेदाप्रसिद्ध्या साध्याप्रसिद्धिः शुक्तिज्ञानोक्तौ सिद्धसाधनम् घटो घटसंसर्गानवच्छिन्नप्रतियोगिताकपटादिधर्मिकत्रैकालिकाभावप्रतियोगी द्रव्यत्वात्पटवदित्यत्र काल्प-निकाभावस्यापि कालत्रयवृत्तित्वसम्भवेन सिद्धसाधनम् घटसंसर्गानवच्छिन्नेतिवत्तादात्म्यानवच्छिन्नेत्यपि विशेषणं दत्त्वा पञ्चमाभावसाधनस्या-पि प्रसङ्गः स्वविपक्षबाधकाभावस्योभयत्र समत्वात् समानाधिकरणकर्मप्रागभावसमानकालीनज्ञानबाधायोग्यो भेदः परमार्थसन्प्रातिभासिकत्वानधिकरणत्वे सत्यसत्त्वानधिकरणत्वात् स्वासत्त्वागोचरप्रमां प्रति साक्षाद्विषयत्वात् आरोपितमिथ्यात्वकत्वात् कल्पकरहितत्वात् स्वविषयकसाक्षात्कारासर्वभावित्वादात्मवत् ब्रह्मजीवप्रतियोगिको भेदः परमार्थसन् अनादित्वादात्मवत् साक्षिवेद्यसुखदुःखादिभेदः परमार्थसन् अनिषेध्यत्वेन दोषाजन्यज्ञानं प्रति साक्षाद्विषयत्वात् धर्माधर्मयागदानादिभेदः परमार्थसन् श्रुतितात्पर्यविषयत्वादित्यादिष्वात्मासाधारणधर्माणां चेतनत्वादीनामुपाधित्वं जडत्वादिना सत्प्रतिपक्षश्च मिथ्यात्वसाधकानां प्राबल्यस्योक्तत्वेन तैर्बाधश्च आद्ये च प्रातिभासिकत्वस्य दोषप्रयुक्तभानत्वात्मकत्वेऽसिद्धिः ब्रह्मज्ञानेतरबाध्यत्वो-क्तौ चरमवृत्त्यव्यवहितप्रातिभासिके व्यभिचारश्च द्वितीये हेतौ तादृक्प्रमाविषयत्वस्य भेदपारमार्थिकत्वसिद्ध्यधीनत्वेन साध्याविशेषपर्यवसानम् तृतीये च चरमवृत्त्यन्याबाध्यमिथ्यात्वकत्वस्योपाधित्वम् चतुर्थेऽविद्यारूपकल्पकसत्त्वेनासिद्धिः पञ्चमे दृष्टिसृष्टिपक्षेऽसिद्धिः इतरत्राप्रयोजकता अनादित्वं चाज्ञानादौ व्यभिचारि दोषाजन्यज्ञानं प्रतीत्यत्र श्रुतितात्पर्यविषयत्वादित्यत्र चासिद्धिः साक्ष्यवच्छेदकवृत्तेर्दोषजन्यत्वाच्च मुख्यतस्तात्पर्यस्य तत्राभावात् तस्माद्भेदपंचकं नानुमानविषयः भेदपञ्चकेऽनुमानभङ्गः॥२२॥

पेणाभेदेनैव ब्रह्माभेदो निरूप्यते। नतु ब्रह्मणा तस्य भेदं प्रत्येव निरूपकत्वात् नच ब्रह्माभेदाभावे प्रतियोगितावच्छेदकत्वाद् ब्रह्मापि निरूपकमिति वाच्यं। भेदं प्रति प्रतियोगित्वरूपनिरूपकत्वस्यैव वाच्यतया तदवच्छेदकत्वरूपनिरूपकत्वनिवेशासंभवात् उभयसाधारणनिरूप्यत्वत्वाभावात्। समानाधिकरणेति स्वसमानाधिकरणेत्यर्थः स्वं ज्ञानं पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् सामानाधिकरण्येन प्रतीतिभेदे बाधासिद्ध्योर्वारणाय योग्यांतं ब्रह्मणि शुक्तिरूप्यं नास्तीत्यादिप्रमाविषयब्रह्मरूपाभावांशे विशेषणे रूप्यादौ व्यभिचारात् सा-

CC-0. In Public Domain. Digitization by eGangotri

२ अ·सि अध्ययनासंभवादितिशाखान्तरवाक्यसार्थक्योपीतिशेषः इत्यादिवत् इत्यादिविहितंयत् प्राकृतप्रणायनान्यप्रणायनन्तद्दत् भेषजमितिवदिति। अन्यथातत्रापयनुवादोनस्यात् ष
टी·ल ड्विंशतिरित्यादि——षड्विंशतिरस्यवंक्रयइत्यादिमंत्रस्याश्वमेधेचोदकप्राप्तस्यचतुस्त्रिंशद्वाजिनइत्यादिवैशेषिकमंत्रेणापोदितस्यनचतुस्त्रिंशदितिब्रूयात् षड्विंशतिरित्येवब्रू

उ· ननुभेदतात्त्विकत्वेद्वासुपर्णायआत्मनितिष्ठन्नित्योनित्यानांचेतनश्चेतनानांअजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यइतिश्रुतयोमानमितिचेन्नद्वा
१०४ सुपर्णेत्यत्रपूर्वार्द्धेनभेदोऽप्रमेयोऽपदार्थत्वाद्वाक्यार्थत्वाच्चद्वित्वस्यस्वाश्रयप्रतियोगिकभेदसमानाधिकरणत्वनियमात् श्रुतद्वित्वार्थापत्तिसमधिगम्यस्यापिभेदस्यश्रो
तत्वमितिचेत्द्वौचन्द्रमसावितयत्रेवकल्पितभेदेनाप्युपपत्तेः तात्त्विकभेदानाक्षेपकत्वात् अतएवनोत्तरार्द्धस्यापितात्त्विकभेदपरत्वम् वस्तुतस्त्वस्याःश्रुतेःपैङ्गिरहस्यब्राह्म
णोबुद्धिजीवपरतयाव्याकृतत्वेनजीवेशभेदपरत्वस्यवक्तुमशक्यत्वात् यआत्मनितिष्ठन्नित्यादावाधेयभावस्यचेतनश्चेतनानामितिनिर्द्धारणस्याजोन्यइत्यत्र
भेदव्यपदेशस्यकाल्पनिकभेदमादायाप्युपपत्तेर्भेदतात्त्विकत्वापर्यवसायित्वात् श्रुत्यन्तरविरोधाच्चनचैतच्छ्रुतिविरोधात्सैवश्रुतिरन्यपराभेदश्रुतेःप्रत्यक्ष
सिद्धभेदानुवादित्वेनहीनबलत्वात्नचजीवत्वावच्छिन्नजीवभेदस्याप्राप्त्यानहिंस्यादित्यादिवदननुवादत्वम्जीवेईशभेदस्यप्रत्यक्षसिद्धतयातदन्यथानुपपत्ति
सिद्धेशधर्मिकजीवत्वावच्छिन्नभेदस्यापिप्रत्यक्षसिद्धतुल्यकक्षतयातद्बोधकश्रुतेरनुवादोपपत्तेः नहिंस्यादित्यत्रतुनानुवादकशङ्कापिब्राह्मणोनहन्तव्यइत्यादेः
पुरोवादकत्वनिर्णायकाभावात् नचपुंविशेषंप्रत्यस्याअर्थत्वशाखांतरस्थविधिवाक्यवदितिवाच्यम् एकस्यानेकशाखाध्ययनासम्भवात् प्रत्यक्षस्यसर्वपुरुषसाधा
रणयेनप्राथमिकप्रसरत्वेनचपुरुषविशेषंप्रत्यपिसार्थकत्वस्यवक्तुमशक्यत्वात् नचद्वयोःप्रणयन्तीत्यादिवद्वर्त्तमानमात्रग्राहिप्रत्यक्षाप्राप्तकालत्रयाबाध्यभेद
प्रापकत्वमितिवाच्यम् अजोन्यइत्यादौत्रिकालाबाध्यत्वबोधकपदाभावात् नचाभेदेषड्विधतात्पर्यलिङ्गवद्भेदार्थत्वंभेदश्रुतेरितिवाच्यंतत्रप्रयोजनवत्त्वेप्य
नुवादत्वापरिहारात् अग्निर्हिमस्यभेषजमितिवत् नचषड्विंशतिरित्येवब्रूयादितिवत्प्रतिप्रसवार्थंतदपेक्षयाहीनबलत्वेनप्रतिप्रसवायोगात् भेदनिषेधकश्रुतेर्भेदता
त्त्विकत्वनिषेधपरत्वेनभेदस्वरूपप्रतिपादकवाक्यस्यतत्प्रतिप्रसवायोगात् नचप्रत्यक्षस्याप्रामाण्येश्रुतेस्तत्सिद्धानुवादकत्वायोगः तस्याज्ञाततज्ज्ञापकत्वमात्रेण
नुवादकत्वोपपत्तेःनन्वेवमपिनिरपेक्षानुवादत्वेनधारावाहिकद्वितीयादिज्ञानवदप्रमात्वोपपत्तिरितिवाच्यंनिरपेक्षसापेक्षसाधारणानुवादत्वमात्रस्याप्रामाण्य
प्रयोजकत्वात् दृष्टान्तस्यातिरिक्तकालकलाविषयत्वेनप्रतिज्ञानमनधिगतार्थविषयतयाविषमत्वात् नचविद्वद्वाक्यवत्सप्रयोजनानुवादत्वेनस्वार्थपरतात
स्यस्वार्थबोधकत्वेपिद्वित्वसम्पादकतयास्वार्थपरत्वाभावात् नचयत्तन्नेत्यादिनिषेधार्थानुवादलिङ्गाभावेनविधेयान्तरश्रवणेननिषेधार्थानुवादत्वायोगःयत्तदि
त्यादेरनुवादलिङ्गत्वेप्यनुवादव्या——पकत्वाभावात् अन्येनापिद्युन्नयनसम्भवात् ब्राह्मणोनहन्तव्यइत्यादौयत्तत्पदाभावेपिनिषेधायानुवाददर्शनात् विधेयान्तरस रामः
यादित्यनेनप्रतिप्रसववदित्यर्थः तदपेक्षयाभेदनिषेधश्रुत्यपेक्षयातत्प्रतिप्रसवायोगात्। भेदसत्यत्वप्रतिप्रसवायोगात् विधेयांतरेतिउपासनादीत्यर्थः॥ ६ ॥ ॥ २१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतियोगिग्रहार्थं प्रतियोग्यनुयोगिग्रहार्थं मिथ्यात्वानुमानस्यागमबाधोद्धारे एतत्प्रकरणस्य विस्तरेणार्थविवेचनं द्रष्टव्यं तर्कैरित्यादिभिर्दृष्टश्रुत्यनुवादिता॥२३॥ अनुवादकत्वाभावेपि निःप्रयोजनानुवादकत्वाभावेपि व्यावहारिकभेदपरत्वेनेति व्यवहारदशायां प्रवृत्तिनिवृत्त्यादिप्रयोजनवदनुवादेन विद्वद्वाक्यैर्द्वैतवाक्यं स्वार्थपरं द्वित्वं संपादनेविद्वद्वाक्यस्यैवोक्तप्रयोजने तस्य तात्पर्येपि धूमोस्तीति वह्नितात्पर्यकस्य धूम इव स्वार्थे तयोरवांतरतात्पर्यसंभवादत एवार्थेऽनुपलब्धे तत्प्रमाणमिति सूत्रगतानुपलब्धपदं निःप्रयोजनं यदनुपलब्धं तदन्यपरमिति तयोरग्निहोत्रादिवाक्यस्येव व्यावहारिकप्रामाण्यमिति भावः अप्रामाण्यापातः तात्विकप्रामाण्याभावापातः अर्थवादवाक्यवदिति कर्मभी

नचैवं विधानार्थानुवादे तात्विकत्वनियमः यद्रजतं तदानयेत्यादावन्यविधानार्थं भ्रान्तिसिद्धानुवादे तात्विकत्वादर्शनात् नचानुवादत्वेपि यथार्थत्वरूपप्रामाण्याहानिरिति वाच्यम् तस्य बाधकाभावनिबन्धनत्वेन प्रकृतेऽसम्भवात् नन्वौपनिषदस्य ब्रह्मणः शास्त्रातिरिक्तेनाप्राप्तेस्तद्धर्मिकस्य तत्प्रतियोगिकस्य वा भेदस्य कथं शास्त्रनिरपेक्षप्रत्यक्षादिना प्राप्तिरिति चेन्न प्रतियोगिग्रहार्थं तदपेक्षत्वेपि स्वसमानविषयप्रमाणपूर्वकत्वानियमेन प्रत्यक्षस्य भेदप्रापकत्वोपपत्तेः यद्यपीशधर्मिकस्य भेदस्य प्रत्यक्षेणाप्राप्तिः तथापि प्रत्यक्षसिद्धजीवधर्मिके शभेदान्यथानुपपत्तिसिद्धस्यापि तस्य श्रुतार्थापत्तिसिद्धस्यौतत्वस्य प्रत्यक्षसिद्धत्वोपपत्तेः भेदश्रुतेरनुवादकत्वम्॥२३॥ अथवाऽनुवादकत्वाभावेपि व्यावहारिकभेदपरत्वेनैव श्रुत्युपपत्तिः नचाप्रामाण्यापातः अर्थवादवाक्यवदुपपत्तेः प्रतीयमानार्थे वाभेदश्रुतिविरोधेनाप्रामाण्यस्येष्टत्वाच्च नचाभेदश्रुतेरखण्डचिन्मात्रपरत्वेन भेदाविरोधित्वं द्वारीभूतार्थमादाय तद्विरोधात् नापि वैपरीत्यं प्राप्ताप्राप्तार्थत्वाभ्यां विशेषात् नचैक्यश्रुतेरपि प्रत्यक्षविरुद्धत्वादप्रामाण्यं मानान्तरप्राप्तिवत्तद्विरोधस्यापि दौर्बल्यहेतुत्वादिति वाच्यम् विरोधेविरोधिनो मानत्ववदनुवादकत्वापवादकस्य मानतया अनपेक्षितत्वात् किञ्च षड्विधतात्पर्यलिङ्गवत्त्वादैक्यश्रुतेः प्राबल्यम् नच तात्पर्यमात्रज्ञापकत्वेन तेषामर्थतथात्वाज्ञापकत्वमिति वाच्यम् श्रुतेस्तत्परत्वज्ञापनेन परम्परयोपयोगात् एतद्विरुद्धश्रुतेः श्रूयमाणेर्थे तात्पर्याभावसम्पादनेनाधिकबलत्वसम्पादकत्वाच्च नचात्रापि स्वाद्वत्ति अनश्नन् पूर्णः परो जीवसङ्घोऽह्यपूर्णा इत्याद्युपपत्तिरूपं सत्यं भिदा सत्यं भिदा सत्यं भिदा सत्यं भिदेत्यादावभ्यासादिरूपं च तात्पर्यलिङ्गमस्तीति भेदश्रुतिरपि तत्परेति वाच्यम् अत्तीति अपूर्णा इति च जीवानुवादेन तस्य पूर्णब्रह्मरूपताविधानार्थत्वेन भेदोपपत्तित्वाभावात् सत्यं भिदेति च न भेदाभ्यासः एतद्वाक्यस्याप्रामाणिकत्वात् प्रामाणिकत्वे वा बाधासामानाधिकरण्येनाभेदे पर्यवसानात् ननु भेदश्रुतिरेव प्रबला असंजातविरोधित्वात् प्रबलेति चेत् अभेदश्रुतिरूपविरोधिनो जातत्वात्॥

मांसकानां तव च मते वायुर्वै इत्याद्यर्थवादानां यथा स्वार्थे तात्विकप्रामाण्याभावेपि स्तुतौ तात्विकप्रामाण्यं तथा भेदश्रुतेः प्रवृत्त्यादौ त्वन्म '' त्यक्षादिसंवादात् निरवकाशत्वाते तात्विकप्रामाण्यमस्तु मन्मते तु सर्वश्रुतीनां साक्षात्परंपरया वा शुद्धब्रह्मपरत्वमिति भावः। अप्रामाण्यस्य तात्विकप्रामाण्याभावस्य अप्रामाण्यं तात्विकप्रामाण्याभावः। मानत्ववत् निर्णीतमानत्वस्यैव मानतया निर्णीतमानतायाः तथा च विरोधिप्रत्यक्षे मानत्वानिर्णयान्न श्रुतेस्तात्विकमानत्वमिति भावः उपयोगात् अर्थतथात्वोपयोगात् जातत्वादिति। श्रवणादिसहकृतश्रुतिजन्यैक्यज्ञानं स्वोत्तरप्रत्यक्षं बाधते बाधजातीयत्वात् स्वपूर्वप्रत्यक्षमपि बाधते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच निर्णीतमानताकं यत्र मानद्वयं तत्रैवोपक्रमादिन्याय इत्यादिमिथ्यात्वानुमानबाधोद्धारोक्तं बोध्यं दैनंदिनेति यद्वा जन्ममरणायोग्यता तद्रातनसर्गाद्यभावः प्रतिपाद्यते प्राकृतसृष्टिप्रलयकालयोश्च ब्रह्मलोकगतानां जन्मादियोग्यता तत्कैवल्योत्तरमेव महास्वप्नादिप्रवृत्तेः सर्गेपीत्यस्य सर्गसामान्यपरत्वे तु तद्वैयर्थ्यं नोपजायंत इत्यस्यैव पूर्णत्वात् तस्माद्दैनंदिनसर्गपरं तत्। वस्तुतः सर्गादीत्यादिपदेन न दैनंदिनप्रलयस्यैव ग्रहणं किन्तु प्राकृतसृष्टिप्रलययोरपि तथा च सर्गादिकालजननादिसामान्याभाव एव बोध्यते तत्र च विशेषाप्रसक्तिर्न दोष इति भावः मायाशब्दस्येति तेषामेवैष ब्रह्मलोको नयेषु जिह्ममनृतं माया चेति श्रुत्यैकवाक्यत्वादिति शेषः अंतर्भावोक्तेरिति यत्तु सर्वकामवा

प्रत्यक्षादेरप्रामाण्येन तत्संवादस्य प्राबल्याप्रयोजकत्वात् शतमप्यन्धानामिति न्यायात् व्यावहारिकभेदविषयत्वेन सावकाशत्वाच्च ननु नायं भेदो व्यावहारिकः मुक्तावपि भेदस्य श्रुतिस्मृतिभ्यां सिद्धेरिति चेत् तस्या मुक्तेरवान्तरत्वात् नन्विदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायन्ते प्रलये न व्यथंति चेत्यादिस्मृतौ सर्गाद्यभावोक्तेः न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशस इति स्मृतौ मायानिषेधाद्यो वेद निहितं गुहायां सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चितेत्यत्र शुद्धब्रह्मज्ञानफलत्वोक्तेश्च तया विशुद्धब्रह्मविषयत्वेन स्वीकृताया भूमविद्यायाः फलोक्त्यवसरे तस्य सर्वेषु लोकेषु कामचारो भवति पञ्चधा सप्तधेत्यादिभेदोक्तेः परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षन्क्रीडन् रममाण इत्यादौ स्वरूपाभिव्यक्तमुक्तेश्च तथा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीत्यत्र कर्मक्षयोक्तेश्च जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति भेदज्ञानान्मोक्षोक्तेश्च त्वन्मतेपि भेदभोगादिपरेषु फलाध्यायान्तपादस्थेषु जगद्व्यापारवर्ज्यं सङ्कल्पादेव तच्छ्रुतेः भोगमात्रस्य साम्यलिङ्गाच्चेति सूत्रेषु प्रक्रान्तशुद्धविद्याफलस्यैव वक्तव्यत्वाच्च परममुक्तित्वमेवेति चेत् न सगुणोपासनया ब्रह्मलोकं गतस्यापि न स पुनरावर्त्तत इति श्रुत्या दैनंदिनसर्गाद्यसम्बन्धस्य प्रतिपादनेनावान्तरमुक्तावप्युपपत्तेः न यत्र मायेत्यादिस्मृतौ च मात्सर्यादिपरत्वेन मूलमायाविरहाप्रतीतेरन्यथा श्यामावदातत्वादिविरोधापत्तेः यो वेद निहितमित्यत्र शुद्धब्रह्मज्ञानफलभूताया सर्वकामावाप्तिः सा न वैषयिकभोगरूपा किन्तु सर्ववैषयिकसुखानामेतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या ब्रह्मानन्दे अन्तर्भावोक्तेस्तदभिप्रायेति न तद्बलात् नानाकामावाप्तेः शुद्धज्ञानफलत्वं भूमविद्याफलोक्त्यवसरे सर्वलोककामचारैकधाभावादेः फलस्य भूमविद्यावाक्योपक्रमे प्राणविद्याफलत्वेनोक्तस्य ज्योतिष्टोमप्रकरणश्रूयमाणाहीनद्वादशोपसत्तावन्निर्गुणविद्यास्तावकत्वेनाप्युपपत्तेः॥

कोन्तर्भावाश्रवणान्नैवमिति तच्चोद्यं सर्वकामपदस्य सर्वसुखार्थकस्यापि ब्रह्मानंदपरत्वं सर्वसुखानां ब्रह्मानंदाभेदादित्यस्य प्रकृतग्रंथार्थत्वात्॥ उपक्रमे प्राणविद्या उपक्रमस्य प्राणविद्या उक्तस्य भूमविद्यांते उक्तस्य प्राणविद्यायाः पूर्वमुक्तत्वेपि तत्फलस्यानुक्तत्वाद्भूमविद्यान्ते तदुक्तं वस्तुत उपक्रमे उक्तस्येति योजना अतिवादीत्यनेन प्राणो वाव आशाया भूयानित्यनेन चोक्तस्येति तदर्थः आशाद्युपासनाफलापेक्षया अधिकफलवदुपासनविषयत्वस्यैव भूयस्त्वरूपत्वात् तादृशप्राणवादित्वस्य चातिवादित्वरूपत्वादत एवोक्तवाक्यस्यैव फलसम्बन्धविधायकत्वेन सर्वकामादिवाक्यस्य स्तावकत्वं सङ्गच्छते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवास्तुतिनिर्देशादेवप्राणविद्याप्रकरणे फलसम्बन्धबोधकवाक्यंकल्पनीयंनपश्योमृत्युंपश्यतीत्यादिकिन्तुभूमविद्याफलपरत्वसंभवान्नस्तावकमितिभावः। ज्योतिष्टो
मेत्यादिउपसदांविधानोत्तरंतिस्रएवसाह्नस्योपसदोद्वादशाहीनस्येतिवाक्यंएकाहसमाप्यमानरूपसाह्नात्मकज्योतिष्टोमप्रकरणेश्रूयतेतत्रतिस्रइत्यनेनत्रित्वस्ये
वद्वादशेत्यनेनद्वादशत्वस्योपसदुद्देशेनविधिःसाह्नस्याहीनस्येतित्वनुवादःउपसदांसाह्नांगतयाविहितत्वेनतदपूर्वसाधनतयोद्देश्यत्वसंभवादेवंचनप्रकरणबाधः
अहीनस्येत्यस्यापिसाह्नसम्बन्धानुवादत्वंनहीयतेसौद्विरात्रादिप्रकृतिनेतिव्युत्पत्तेःमध्योदात्तस्यतस्याद्युदात्तनञ्समासत्वासंभवेपि अह्नःखःक्रताविति सूत्रेणतस्य।
समूहइत्यनुवृत्तिसहितेनविहितखप्रत्ययान्तत्वेपिवावृत्तिकृतभेदेनक्रतुसमूहरूपसाह्नबोधकत्वादितिप्राप्ते अहीनपदस्यसाह्नवाचकत्वेसाह्नस्याहीनस्येत्यनयोर्वै
यर्थ्यापत्तेरेवकारेणचतुराद्युपसदांसाह्नसाधनत्वानुवादानुपपत्तेरहीनपदस्ययजतिचोदनाचोदितसत्राद्यन्यसुत्यासमूहएवप्रयोगाच्चाहीनपदेनद्वादशाहात्मको
क्तसमूहमुद्दिश्यद्वादशोपसत्ताविधीयतेउपसदामतिदेशेनप्राप्तिसंभवेप्यतिदेशप्रवृत्तिपूर्वंद्वादशत्वप्राप्त्यर्थंविधिःषष्ठ्यांतस्यनामार्थान्वयस्वीकारेतुअहीनोपसदे
वोद्देश्याद्वादशाहप्रकरणस्यवाक्यंतुसत्रात्मकद्वादशाहेद्वादशोपसत्ताविधायकमितिभाष्याभिप्रायःवस्तुतःसत्रात्मकइवाहीनात्मकेपिद्वादशाहेतत्प्रकरणस्य

स्वयंज्योतिरित्यादौजक्षणप्रभृतीनामिवगर्भत्वेनपरममुक्तेस्तत्रोक्तत्वात्तदभिमत्तभेदगर्भक्रीडादीनांपरममुक्तित्वाभावात् पुण्यपापेवि
धूयेत्यत्रपरमसाम्यस्यैक्यरूपतयाकर्मक्षयस्यैक्यरूपमुक्तिफलतयाभेदगर्भमुक्तिफलत्वाभावात् जुष्टमित्यत्रान्यपदस्यदेहेन्द्रियादिविलक्ष
णात्मपरत्वेनजीवेशभेदपरत्वाभावात्॥

११ वाक्यस्यतद्विधायकत्वसंभवात् एकवाक्यतानुरोधात् ज्योतिष्टोमप्रकरणस्थंद्वादशाहीनस्येतिवाक्यंस्तावकंद्वाद
शस्यद्वादशभिरुपसद्भिरुपकारःसाह्नस्यततोऽल्पाभिरितिस्तुतिरितिवार्त्तिककारादयइतितृतीयतृतीयेस्थितंतद्वद्भूमविद्याशेषस्यवाक्यंस्तावकमित्यर्थः। इवगर्भत्वेनेति
अथयत्रदेवइवराजेवाहमेवेदंसर्वमस्मीतिमन्यतेसोऽस्यपरमोलोकइतिवि द्वत्स्वप्नबोधकश्रुतावि वशब्दोक्तेःस्वप्नस्यपूर्वानुभवमूलकत्वाद्दिदमनुभवबोधकसत्तत्र
पर्येतीत्यादिश्रुतौजक्षन्नित्यादिपदोत्तरमिवशब्दाध्याहारस्तथाचसविद्वान् तत्रोत्तमपुरुषस्वरूपेस्वात्मनिपरिसर्वतोभावेनेति अविद्यकासर्वभावनिवृत्त्यासर्वसाक्षिरूपाप्त्या
अहमेवेदंसर्वमितिमन्यते आत्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवदितिश्रुत्यंतरात् ननु आत्मान्यसर्वबाधात् कथंसर्वमहमेवेतिमन्यतेतत्राहजक्षन्निदे
त्यादिइवशब्दस्याल्पार्थकत्वाबाधितजक्षत्यादिरूपसर्वात्मकतांमन्यतेबाधितानुवृत्त्यैवजीवन्मुक्तभोगात्ततएवाहंमनुरित्यादावपीवशब्दाध्याहारइतिभावः ऐक्य
रूपतयेति अन्यथापरमपदवैयर्थ्यंब्रह्मवेदब्रह्मैवभवतिब्रह्मैवसन्ब्रह्माप्येतिब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदित्यादिश्रुतिविरोधश्चेतिविलक्षणेति अन्यदेवत
द्विदितादित्यादाविव अन्यैवशोभाविधोरित्यादाविवचान्यपदंविलक्षणार्थकं। नहिविदितादीश्वरादिरूपाद्विशिष्टात्मनोऽत्यंतभिन्नंब्रह्मनवाशोभायामन्यत्वमात्रेण
चमत्कारःनचलक्षणादोषःभेदवतीवात्मपदस्यतत्तद्वैलक्षण्यवतिशक्तिसंभवात् तर्कैरित्यादि। असत्यभेदधीःश्रुतिः॥ २४॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दान्तरादीनां उक्तशब्दान्तरादीनां भेदकत्वेपीति ज्योतिष्टोमप्रकरणस्थेषु सोमेनयजेत हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोतीत्यादिषु यागाद्युपरक्तभावनानामेकजाती
यत्वं भिन्नजातीयत्वं वेति संशये ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र स्वर्गकर्मक भावनामात्रविधानात्तदनुवादेनोक्तवाक्यैः सोमविशिष्टयागविधिः फलवाक्यं च यजेः प्रकृ
तयागदानाद्युपलक्षणत्वेन ज्योतिष्टोमपदं यागदानादिनामेति प्राप्ते कारणीभूतभावनावैजात्यं विना कार्यीभूतयागादिगतविधेयतावच्छेदकयागविशेषत्वादिरूपवैजात्या
सम्भवात् प्राप्तभावनानुवादेन सोमयागाद्यनेकगुणविध्यसम्भवेन सोमयागादिविशिष्टभावनाया एव विधेर्वाच्यत्वात्तु यागादिधात्वर्थवैजात्ये सति भावनावैजात्यमावश्य।
कमिति विजातीयार्थक धातुनानात्वरूपं शब्दान्तरं भावनाभेदकमित्युक्तं तथा च प्रकृते प्रबोधनोत्थानरूपधात्वर्थवैजात्यं भावनावैजात्यसाधकमास्तां न तु जीवेशस्वरू
पयोर्वैजात्यसाधकं। दर्शपूर्णमासप्रकरणस्थ समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्यत्र न भावनावैजात्यं धात्वर्थवैजात्ये मानाभावात् न
च विहितजातीयविधानायोगाद्धात्वर्थवैजात्यं प्रथमवाक्ये समित्यदस्य तत्प्रख्यन्यायेन नामत्वात्तद्विहितयागानुवादेनान्यवाक्यानां देवतारूपगुणविधायकत्वात् अथया।

तथा च भेदज्ञानस्य न मुक्तिहेतुत्वमितोऽवगम्यते मन्मते भेद भोगादिपरेषु सङ्कल्पादेवतच्छ्रुतेरित्यारभ्याध्यायपरिसमाप्तिपर्यन्ताधिकरणेषु सगुणविद्याफलस्योक्त
तया शुद्धब्रह्मविद्याफलाप्रतिपादकत्वात् तस्मात्परममुक्तौ भेदस्याप्रसक्तेर्व्यावहारिकत्वोपपत्त्या भेदश्रुतेर्व्यावहारिकभेदपरत्वं स्थितं भेदश्रुतेर्व्यावहा
रिकभेदपरत्वोपपत्तिः॥२४॥ ननु पूर्वतन्त्रे द्वितीयाध्याये यैरेव शब्दान्तरादिभिः कर्मभेद उक्तस्तैरेव जीवेशभेदोपि सिध्यति तथा हि एष एव जीवं प्रबोध
यति एतस्माज्जीव उत्तिष्ठतीति विरुद्धार्थधातुनिष्पन्नाख्यातरूप शब्दान्तरस्य नित्यः परो नित्यो जीव इत्यप्रत्यभिज्ञायमानपुनः श्रुतिरूपाभ्यासस्य द्वा।
सुपर्णेत्यादिसङ्ख्यायाः अशब्दं अनश्नन् इत्यादेर्भेदकस्य गुणान्तरस्य यतो वाचो निवर्तन्त इत्यादिप्रकरणांतरस्य जीवेशाविति नामधेयभेदस्य सत्त्वाच्चेति।
चेत् न प्रत्यक्षादिसमकक्षतया शब्दान्तरादीनां भेदकत्वेपि॥ ११ ज्यामंत्रात्समिद्वत्तनूनपातादिरपि देवताप्राप्तुं शक्या तथाप्युपांशुयाजानुवादेन वाक्यपंचकेपि दे
वताविधिर्याज्यामंत्रेण समिदादिप्राप्तिसंभवेप्यनुमंत्रणमंत्रैर्वसंतादिदेवतानामपि विकल्पेन प्राप्त्या नियमविधित्वसंभवादिति प्राप्ते उभयाकांक्षालभ्यत्वेन याज्याया एव देव
ताकल्पकत्वसंभवेऽन्यतराकांक्षालभ्यानुमंत्रणमंत्रस्य तदभावादुक्तवाक्यानां प्राप्तदेवतानियमविधित्वासंभवेन यागविधित्वाद्विहितजातीयविधानासंभवात्त तद्वाक्य
विधेयतावच्छेदकतया पंचवैजात्यसिद्धिः न च समिदादिपदानां नामत्वात्तद्भेदेनैव सेति वाच्यं यागवैजात्यासिद्धौ देवतानुवादकत्वेनैवोपपत्तौ नामत्वानिर्णयात्। अभ्या
सेन यागवैजात्यसिद्धेतु व्यवहारार्थं नामभेदविर्णय इत्युक्तं तथा च विभिन्नविधिविधेयतावच्छेदकतया वैजात्यभेदस्वीकारावश्यकत्वेपि नित्यः परो नित्यो जीव इत्या।
दौ नित्यत्वस्येशस्वरूपे विहितस्य जीवस्वरूपे कथनं तयोरभेदज्ञापनायामपि संभवतीति दध्ना जुहोतीत्यादाविवान्यपरत्वादन्यपरपुनःश्रुत्यभावोऽन्यथा विधेयेनि। रामः
त्वत्व एव वैजात्यं स्यान्न तु तदुद्देश्ययोः॥ ९॥ ॥ ॥ ३१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिस्रः आहुतीर्जुहोति आज्यभागौ यजतीत्यादौ त्रित्वादिसंख्यया न भावनाभेदः त्रित्वादिसंख्यायाः स्वाश्रयप्रतियोगिकस्वाश्रयानुयोगिकभेदव्याप्यत्वेपि प्रकृते भावना
यास्त्रित्वसंख्याश्रयत्वेनाप्रतीतेः। नापि धात्वर्थभेदः प्राथमिके धात्वर्थान्वितभावनाबोधे धात्वर्थावच्छेदकत्वेन संख्यापेक्षायां प्रथमोपस्थितत्वेनैकत्वस्यैव तत्र तथात्वक
ल्पनेन पाश्चात्यबोधे आवृत्तिभेदमादायैव श्रुतसंख्यान्वयात्तथाच प्रथमप्रतीतमेकत्वं विधेयतावच्छेदकैकजात्यैवेति पाश्चात्यत्रित्वादेर्न विरोधः अत एव प्रयाजानां प्राथ
मिकं पंचत्वस्य विधेयतावच्छेदकवैजात्यैरेवोपस्थितत्वेन लघुभूतैः स्वीकारादेकादशप्रयाजान्यजतीति वैकृतवाक्योपात्तसंख्याया आवृत्तिभेदेन तत्तद्व्यक्तित्वेन भेदमा
दायोपपत्तिरिति प्राप्ते सहोच्चरितपदानां संभूयैकविशिष्टार्थप्रमापकत्वस्योक्तप्राथमिकबोधात्पूर्वमेव गृहीतत्वात् तद्बाधापसंख्यापेक्षायां द्वितीयबोधे श्रुतसंख्याया
एवान्वयो न तु तत्पूर्वमेव संख्यांतरकल्पनमन्यथा प्राथमिकबोधे द्रव्यांतरादेरपि कल्पनेन श्रुतद्रव्यादेरनन्वयापत्तेः कर्मोत्पत्तिवाक्यान्यवाक्ये श्रुतं प्रयाजेकादशत्वं
तु न वैजात्येन भेदकं कर्मोत्पत्तिवाक्यजन्यधीकाले तादृशभेदकसंख्यायाः अक्लृप्तत्वात् त्रिर्वेदिं प्रोक्षतीत्यादौ तु विधेयक्रियाभ्यासार्थकसुच्प्रत्ययान्तत्वेन त्रिरित्यस्य न
विधेयतावच्छेदकनानावैजात्यैर्भेदकत्वं समिधो यजतीत्यादौ समिधोऽग्ने आज्यस्य व्यन्तु इति मंत्रेण प्राप्तं यत् वहुत्वं तद्वत्समिद्देवताकत्वानुवादकत्वेन समिध इत्यस्य
नोक्तभेदकत्वमुक्तरीत्यैव बोधोपपत्तौ वहुत्वविशिष्टकर्मविधाने गौरवात् कर्मगतत्वेन संख्याया अप्रतीतेः। तथाच धात्वर्थोत्पत्तिवाक्यश्रुतधात्वर्थगतसंख्या धात्वर्थभे
दकेति धात्वर्थभेदाद्भावनाभेद इत्युक्तं जीवपरद्वित्ववाक्ये तु न उक्तसंख्यास्तीति नोक्तभेदिका विधीयमाने श्रुतसंख्यायाः उक्तभेदकत्वस्वीकारेपि विधीयमानपर्याप्तसंख्या
यास्तदभावात्तथा च जीवस्य भोक्तृत्वेनोच्यमानस्याविधेयत्वान्नोक्तसंख्या तथा। तथात्वेपि स्वादूत्तीत्युच्यमानस्योपहितस्यैव ब्रह्मभेदो वाच्यः स चेष्टो ममापि एवं वैश्वदेव्या
मिक्षेत्यनेन द्रव्यदेवताविशिष्टयागविध्युत्तरं वाजिभ्यो वाजिनमिति श्रूयते तत्र वाजमन्नमामिक्षारूपं येषामस्तीति व्युत्पत्त्या वाजिपदेन विश्वदेवोक्तेस्तत्र वाजिनसम्ब
न्धस्तया चामिक्षया सह वाजिनस्यैकत्र यागे विकल्पः समुच्चयो वा अथवा आमिक्षानुनिष्पन्नवाजिनसम्बन्धाद्वाजिनपदस्यामिक्षायागे गौणत्वात्तदुद्देशेन वाजिदेवता
याविकल्पेन समुच्चयेन वा विधिरिति प्राप्ते ———————— वाजिपदस्य रूढ्यावलीयस्त्वस्योक्तेर्योगेन विश्वदेवानुक्तेरुत्पत्तिशिष्टत्वेन प्रबलया आमिक्षया विश्वदेवत
या वा सहोत्पन्नशिष्टस्य वाजिनस्य वाजिनां वा विकल्पाद्यसंभवात्। द्रव्यदेवताविशिष्टं आमिक्षायागाद्द्विजातीयं यागांतरं विधीयते इति यस्मिन् कर्मणि यो गुणो न निवे
शार्हस्ततो वैजात्येन स्वान्वयितया विधेयकर्मणः स भेदक इत्युक्तं अनश्नन्नित्यायुक्ता भोक्तृत्वादिगुणास्तु न जीवस्वरूपे निवेशनार्हा न न्वाङ्गतस्तेन भवत्यसङ्गो ह्य
यं पुरुष इत्यादिश्रुत्या युक्त्या च तत्रापि तल्लिङ्गैरतो नायं ततो ब्रह्मभेदकः एवं कौडपायिनामयने उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासा
भ्यामित्यादौ जुहोतिना अग्निहोत्रादिनाम्ना च दूरस्थनित्याग्निहोत्रस्याप्युक्तिसंभवात् अनेकगुणविशिष्टप्रयोगविधिसंभवाच्च न कर्मणो नित्याग्निहोत्रादितो वैजात्येन भे
द इति प्राप्ते क्रतिविषयत्वेन ज्ञाप्यत्वमज्ञातनिष्ठज्ञाप्यत्वं च विधिवाक्यमात्रस्यावश्यं वाच्यं तस्यानुज्ञापकत्वात् प्रमापकत्वाच्च तत्रायमुपादेयकालादिभिन्नेष्वेव द्वितीयं वि
धेयत्वाख्यं कालादावपि तदुभयं च प्रधानत्वाद्धात्वर्थभावनायामेव स्वीक्रियते तद्बाधके सति तु नामाद्यर्थेपि यथाहवनीये जुहोतीत्यादौ विशिष्टविधिगौरवादाहवनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२
अ॰सि॰ यादौ दूरस्थप्राप्तहोमानुवादे न विधीयमाने प्रकृते तु मासादिगुणस्य विधेयत्वसंभवे पुपादेयत्वासंभवात्तदुभयाश्रयो नित्याग्निहोत्रादितो विजातीयकर्म। सायं जुहोति
दी॰ल॰ इत्यादौ तु सन्निध्यादिसहितजुहोतिना ज्ञातहोमस्योपस्थानात्तत्रैवोपादेयत्वं कालस्य तु विधेयत्वमिति तयोर्वैयधिकरण्यं स्वीक्रियते तु सन्निध्याद्यभावादग्निहोत्रादि
उ॰ पदस्याग्निदेवताकहोममात्रबोधनान्न तथा। तथा चानुपादेयगुणयुक्तानुपस्थितिरूपं प्रकरणान्तरं तथा भेदकमित्युक्तं यतो वेत्यादौ तु निर्गुणस्यैवोक्त्या तदसिद्धं ए-
१०७ वं ज्योतिष्टोमं प्रकृत्य अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति श्रूयते तत्र गुणविशेषेषु ज्योतिरादिपदानाम प्रसिद्धेः द्योतनात्म
कार्थकत्वेन कर्मण्यपि तथा संभवात्तदेव विधीयते एतेनेत्यनेन तत्र सहस्रदक्षिणत्वमेतेन क्रतुद्दिकामो यजेतेत्यनेन सम्बन्धश्च विधीयते यत्र त्वयशब्दादिनियामकाभा
भावः तत्रैकस्यैव नानासंज्ञानां संकल्पादिव्यवहारे विकल्प इत्युक्तं जीवेशादिनाम्नां तु उक्तनियामकाभावान्न भेदकत्वमीश्वरसहस्रनामादिवत् भेदकत्वेपि स्वबोध्य
तावच्छेदकजीवत्वेशत्वादिना तद्वाच्यं तत्त्वेष्टं ममापीत्याशयेन भेदकत्वेपीत्यपि शब्द उक्तः। किंच शब्दान्तरादीनामुक्तरीत्या विधेयभावनादिषु विभिन्नवैजात्यसाध

तात्त्विकाभेदाविरोधित्वात् किन्त्वादृष्टचरस्त्वं मीमांसकोयः कर्मभेदे शास्त्रभेदे वा प्रमाणत्वेन क्लृप्तानां शब्दान्तरादीनां चेतनभेदे प्रमाणत्वं क
ल्पयसि न ह्यन्यभेदप्रयोजकस्यान्यभेदप्रयोजकता विशिष्टभेदप्रयोजकस्यापि विशेषणभेदस्य विशेष्यभेदकतापत्तेः देवदत्त उत्तिष्ठति शिष्यं
बोधयति यजति ददाति जुहोतीत्यादावपि भेदापत्तेः न शब्दान्तरस्य कर्तृभेदकता शब्दान्तरादेरात्मभेदकत्वाभावः॥ २५॥ ननु षड्विधतात्प-
र्यलिङ्गोपेतश्रुतिगम्यभेदस्य कथमतात्त्विकत्वम् तथाहि आथर्वणे द्वासुपर्णेत्युपक्रमः परमं साम्यमुपैतीत्युपसंहारः तयोरन्यः अनश्नन्न
न्यः अन्यमीशमित्यभ्यासः शास्त्रैकगम्येश्वरप्रतियोगिकस्य कालत्रयाबाध्यभेदस्य शास्त्रं विनाऽप्राप्तेरपूर्वता पुण्यपापे विधूयेति फलम् त
स्य महिमानमिति स्तुतिरूपोर्थवादः अत्ति अनश्नन्नित्युपपत्तिः ॥ ः ॥ कत्वेपि न तदाश्रयाणां स्वाभाविकभेदसाधकत्वं तद्वैजात्यरूपोपाधिकृतत्त
दाश्रयभेदं विना तत्तद्वैजात्यभेदस्यानुपपत्तेः तदाश्रयाणामौपाधिकभेदमात्रसिद्धेरत एव तन्त्रेणानुष्ठीयमानसप्तदशप्राजापत्यादिस्थले एकस्यामेव यागव्यक्तौ
सप्तदशवैजात्यानीति सिद्धान्तस्तथा च जीवेशयोर्वैजात्योपहितरूपेण भेदसिद्धावपि तत्स्वरूपस्योक्तयागस्वरूपस्येव स्वाभाविकमैक्यमप्रत्यूहमित्याशयेनाह तत्ता
त्त्विकाभेदाविरोधित्वादिति औपाधिकभेदस्य मिथ्यात्वेन तात्त्विकाभेदाविरोधित्वादित्यर्थः त्वं तादृशः ननु भावनादिरूपविशेषणभेदात्तदुपहितचेतनभेदोस्तु इत्या
शंक्य तावता ह्यौपाधिको भेदः स्यान्न तु स्वाभाविकस्तत्र तस्यासाधकत्वादित्याशयेनाह नहीति। विशिष्टभेदेति। उपहितभेदेत्यर्थः विशेषणभेदस्य उपाधिभेदमात्रस्य
विशेष्यभेदकत्वापत्तेः अनौपाधिके उपाध्याश्रयभेदे प्रयोजकत्वापत्तेः। इष्टापत्तावाह देवेति। भेदापत्तेरुत्थानादिभावनाभेदाद्देवदत्तस्य तस्मादनौपाधिकभेदापत्तेः राम:
श्रीतर्कैरित्यादिनाभ्यासादेश्चितो भिदा ॥ २५ ॥ ॥ ३१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मायामात्रमित्यादि मायामात्रमिदं द्वैतमद्वैतं परमार्थत इति गौडपादीयोक्तश्रुतौ द्वैतपदं भेदसामान्यार्थकं मायामात्रपदमीश्वरेच्छाधीनतया सत्यमित्यर्थकं तथा च सर्वो पिभेदः सत्य अद्वैतं तु परमार्थतः स्वतंत्रतः स्वतंत्रमीशमादाया द्वैतमित्यर्थः एक एव स्वतंत्र इति यावत् परमार्थः स्वतंत्रः स्यादिति स्मृतेरिति श्रुत्यादेरद्वैतार्थकत्वखण्डनं परेणोक्तं तत्र द्वैतशब्द इव प्रकृते द्विशब्दो भेदार्थक इत्यभिमानः अतिप्रसंगात्। ज्योतिरादिपदेन तत्समानार्थकपदांतरेण वा ज्योतिष्टोमाद्यभ्यासस्याभावप्रसंगात्। य दिन्यायेनेति। सप्तमं परमध्वर्युरं जलिना गृह्णातीत्यादौ श्रुतपदस्य सम्बन्ध्याकांक्षायामेकहायन्या सोमं क्रीणातीत्यनेनोपस्थिता या एकहायन्यास्तत्वेन यथा सम्बन्धस्तथा पश्यतीत्यनेनोपस्थितस्य जीवस्य भेदप्रतियोग्याकांक्षायामित्यर्थः असंयुक्तं प्रकरणादिति कर्त्तव्यतार्थित्वादिति सूत्रं दर्शपौर्णमासादिकं प्रकृत्य समिधो यजतीत्यादि श्रूयते तत्सदर्शादौ समिदाद्यंगतावोधकत्वमस्मिन्वेति संशये साध्यसाधनाकांक्षयोः स्वर्गयागाद्यन्वयेन विच्छेदान्नोक्तवोधकत्वमिति प्राप्ते तयोर्विच्छेदेपीतिकर्त्तव्यताकांक्षया समि

अत्र च मायामात्रमिदं द्वैतमित्यादाविव द्विशब्द एव भेदवाचकस्तदाक्षेपकीवाद्विलसद्ध्यैवैक्याविरोधिनीतिवा भवतु पक्रमो भेदविषयः तद्भिन्नत्व विशेषितमेव च तद्गतवहुधर्मयोगित्वन्तत्सादृश्यं न तु विशेष्यमात्रं नायं सः किन्तु तत्सदृशः नायन्तत्सदृशः किन्तु स एवेति सादृश्यैक्ययोरेकतरविधा नायान्यतरनिषेधात् गगनं गगनाकारमित्यादि तु तत्सदृशवस्त्वंतरनिषेधपरं गगनाद्येकदेशस्य तदेकदेशसादृश्यपरं वेत्युपसंहारोपि भेदविषय ए व अभ्यासत्वेप्यर्थत एवैकप्रकारत्वं तन्त्रं न तु शब्दतोऽतिप्रसङ्गात् अन्यमीशमस्य त्रेशगतान्यत्वं प्रतिपश्यतीति प्रकृतो जीव एव यदिन्यायेन प्रतियोगित यासंवन्ध्यत इत्यभ्यासोपि सम्भवतीति चेत् मैवम् आथर्वणे प्रथममुण्डके कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति शौनकप्रश्नानन्तरं द्वे विद्ये वेदितव्ये इति विद्याद्वयमवतार्य ऋग्वेदादिलक्षणामपरामुक्त्वा अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमित्यादिना परविद्या विषयमक्षरं प्रश्नानुसारेण प्रतिपादयताऽभेदस्यैवोपक्रान्तत्वात् अन्यथा तदुत्तरत्वानुपपत्तेः द्वितीयमुण्डके पुरुष एवेदं विश्वं ब्रह्मैवेदं विश्वमिदं व रिष्ठमिति मध्ये परामर्शात् तृतीयमुण्डकान्ते च परेऽव्यये सर्व एकीभवंति स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्यैक्यलक्षणफलेनोपसंहाराच्च मुण्डकत्र यात्मिकाया उपनिषद ऐक्यपरत्वे स्थितेऽसंयुक्तं प्रकरणादिति न्यायेन ॥ ऐन्द्रधोयजतीत्याद्युत्तरं दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादि पूर्वमिति पदकल्पनया समिदाद्य न्वयेनोक्तवोधकत्वमावश्यकमिति कर्त्तव्यतात्वं च सामान्यतो व्यापारत्वेनाख्यातपदात् ज्ञातभावनायाः विशेषरूपत्वं तथा च यागसाधनव्यापारस्य विशेषजिज्ञासाया अदृष्टद्वारा समि दादीनां द्रव्यदेवतादिसंस्कारद्वारावघातादीनामुक्तवाक्येन साधनत्ववोधनान्निवृत्तिरिति पार्थसारथ्यादयः। यागादिकरणनिष्ठा पूर्वप्रयोजकशक्तिसाधनत्वं तत् योयत्र शक्तः स तज्ज नक इति हि मीमांसकाः तथा च कारणत्वं तदवच्छेदिका वा शक्तिरुभयथापि तज्जनकाकांक्षया समिदादिजन्यशक्तिमङ्गं दर्शपौर्णमासाभ्यां यजेतेत्युक्तवाक्यजधीनेन कारणत्वरूपा सा अनन्यथासिद्धनियतपूर्ववर्त्तितावच्छेदकरूपैव एवं कारणतावच्छेदकरूपापि तद्रूपैव तथा च जातिरूपत्वे नित्यायान्तत्र कथं जनकापेक्षेति वाच्यं मीमांसकमते प्रतिवंधकेन शक्ते र्नाशादुत्तेजकेन चोत्पत्तेरनित्यत्वसंभवोऽखण्डकारणतारूपत्वेपि तद्विशिष्टस्यैव फलोपधायकत्वेन तज्जनकापेक्षाया आवश्यकत्वात्॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंचइज्यगुणादीनांस्थिरत्वेनक्रियाविशिष्टरूपेणैवशक्तिसाधनत्वमित्यन्येतथाचविनियोजकश्रुत्याद्यसंयुक्तमपिसमिदादिप्रकरणादुभयाकांक्षारूपाद्दर्शाद्यंगमितिक
र्त्तव्यतार्थित्वादुक्तेतिकर्त्तव्यत्तात्वेनतदपेक्षत्वादितिसूत्रार्थइतितृतीयतृतीयेस्थितं इत्यादेरित्यादिवाक्यार्थस्यतथाचोक्तन्यायेनसमिदादिवाक्यार्थस्ययथादर्शाद्युपकार
कत्वंनिर्णीयतेतथाद्वासुपर्णेत्यस्यैक्यवुद्ध्युपकारकत्वमित्यर्थः ननुद्वासुपर्णेत्यादावैक्यस्यास्पष्टत्वान्नोक्तन्यायस्तत्राहाभिक्रमणेतिदर्शपौर्णमासेप्रकृत्यप्रयाजसमी
पेश्रूयते अभिक्रामंजुहोतीतितत्राभिक्राममित्यस्यणमुलंतत्वेनाभिक्रमस्येत्यर्थकत्वात् जुहोतिनाप्राकरणिकसर्वहोमानुवादादुद्देशेनाभिक्रमणंविधीयतेप्रयाजानां
सन्निधिसत्त्वेपितदपेक्षयाप्रकरणस्यवलवत्त्वादन्यथातिसन्निहितोत्तमप्रयाजांगंस्यात्। नचावांतरप्रकरणेनप्रयाज्यांगतेतिवाच्यं अवांतरप्रकरणस्यविनियोज
कत्वेसर्वेषामंगानांतत्संभवेनमिथोंगांगितापत्तेरितिप्राप्तेप्रयाजान्विधायत्रीन् प्रयाजानिष्ट्वासमानयत्तउपभृतइत्यनेनउपभृतस्याज्यस्यार्द्धंजुह्वांस्थाप्यमित्येवं
रूपंसमानयनंविधायाभिक्रामंजुहोतीत्युक्त्वायोवैप्रयाजानांमिथुनंवेदसमिधोवर्हिर्वतनूनपादेकएवेत्यादिनाप्रयाज्यानिष्ट्वाहवींष्यभिघारयतीत्यंतेनप्रयाजप

अभिक्रमणादिवन्मध्यस्थितवाक्यस्यापिद्वासुपर्णेत्यादेस्तदनुकूलत्वेसम्भवतिमहाप्रकरणविरोधेनविपरीततात्पर्यकल्पनयाभेदोपक्रमत्वाभा-
वात् परमंसाम्यमुपैतीत्यस्यपूर्वोक्तन्यायेनैक्यपरतयाभेदोपसंहारत्वाभावात् अतएवानश्नन्नन्यइत्यादिनानतात्त्विकभेदाभ्यासः नापीशस्यशा-
स्त्रगम्यतयातत्प्रतियोगिकस्तद्धर्मिकोवाभेदोऽपूर्वः ईशज्ञानमात्रेतदपेक्षायामपिप्रत्यक्षेणतत्समकक्षमानेनचतयोः प्राप्तत्वात् त्वदुक्तफला
र्थवादयोरैक्यपक्षेपिसम्भवेननभेदासाधारणलिङ्गता अनश्नन्नित्यादेः काल्पनिकभेदेनोपपत्त्यातात्विकभेदोपपत्तित्वाभावात् नन्वंतर्यामिब्राह्मणेष
ड्विधतात्पर्यलिङ्गोपेतंवाक्यंभेदप्रमाणंतथाहिवेत्थनुत्वंकाप्यतसंतर्यामिणमित्युपक्रमः एषत आत्मा अन्तर्यामीत्युपसंहारः एषतआत्मेत्याद्येकविं
शतिकृत्वोभ्यासः अन्तर्यामित्वस्याप्राप्ततयाऽपूर्वता ॥ ❁ ॥

रामर्शात् तत्संदर्भस्यप्रयाजप्रकरणत्वनिश्चयात् तेनतन्मध्येयद्यद्विहितंतत् प्रया
जांगमितिनिश्चयात्तदीयात्तदीयांगानांतुनसंदंशोनतस्यावांतरप्रकरणन्तदुक्तंनविद्यतेतुसन्दंशोयत्रवाचनिकैर्गुणैस्तत्रांगानांकथंभावः सन्नप्यविनियोजकः निष्फ
लत्वेनसर्वेषांनविशेषोवगम्यतेकः शेषः कस्यशेषित्वमतः सर्वंप्रधानांगमितितृतीयप्रथमेस्थितं। तथाचतन्न्यायेनपूर्वापरवाक्यार्थयोरैक्यवुद्ध्युपकारकत्वान्मध्यस्थद्वा
सुपर्णेत्याद्यर्थस्यापितदित्यर्थः ननुयद्भूतयोनिमितिप्रथमेमुंडकेप्राणादिकारणत्वस्यद्वितीयेद्वासुपर्णेत्यादेस्तृतीयेसखंडस्यप्रतिपादनादभिक्रमणादिवदेवतन्मध्य
स्थपुरुषएवेदमित्यादेरपितदनुकूलत्वंतत्राहमहाप्रकरणेतिप्रथममुण्डकादौयत्तदद्रेश्यमित्युपक्रमस्यतृतीयमुण्डकान्तेपरेव्ययेसर्वएकीभवंतीत्युपसंहारस्यपुरु
षएवेदमित्यादिपरामर्शस्यचाद्वैतनिष्ठत्वाद्द्वैतस्यैवमहाप्रकरणित्वात्तद्विरुद्धतात्पर्यस्यसखण्डेवक्तुमशक्यत्वात्स्वखण्डाद्वैतवुद्ध्युपकारकत्वमेवभूतयोन्यादिवाक्यानां
अभिक्रमणादेःप्रयाजाद्युपकारकत्वन्तुनमहाप्रकरणविरुद्धमितिभावः प्राप्तत्वादिति अतात्विकस्यापिभेदस्योक्तमानप्राप्तत्वमितिभावः॥ ❁ ॥ ६ ॥ ❁ ॥

CC-0. In Public Domain. Digitization by eGangotri

सवै सूत्रात्मान्तर्यामिणोर्वेत्ता ब्रह्मगवीः ब्रह्मिष्ठार्थं स्थापिता गाः उद्दजसे गृह्णासि। पृथिवी पृथिव्यभिमानिदेवता। चतुरध्याय्यां तृतीयादि चतुरध्याय्यां अनेन आत्मवेदनेन ।
सर्वमभवत् अपरिच्छिन्नमभवत् सूत्रात्मेति तदन्तरान्तर्यामीति शेषः कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेत्यत्र ब्रह्माण्डारंभकभूतरूपब्रह्मलोकानामंतरस्य पृष्टत्वे
नतादृशः सूत्रात्मातस्याप्यंतरोंतर्यामी च प्रतिपादित इति भावः सर्वांतरेति। अंतर्यामिपर्यन्तं सर्वान्तरेत्यर्थः श्रौतर्कैरित्यादिभेदवाक्यं न तत्परम्॥ २६॥ सम्भवादिति न चक ।

सवै ब्रह्मविदित्यादि फलं तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तञ्चान्तर्यामिणं ब्रह्मगवीरुद्दजसे मूर्द्धा ते विपतिष्यतीति निन्दारूपोऽर्थवादः यस्य पृथिवी शरीरं
यं पृथिवी न वेद इत्याद्युपपत्तिरिति चेत् मैवं आत्मेत्येवोपासीतेति सूत्रित ब्रह्मविद्याविवरणरूपायां चतुरध्याय्यां अनेन ह्येतत्सर्वं वेदेत्येकविज्ञानेन सर्व
विज्ञान प्रतिज्ञापूर्वकं ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदित्यभेदेनोपक्रम्य षष्ठाध्यायान्ते मैत्रेयीब्राह्मणे निगम
नरूपे यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिनाऽभेदेनैवोपसंहारात् अध्यायचतुष्टयस्याप्यभेदपरत्वे स्थिते तदन्तर्गतस्य ब्रह्मलोकान्तरसूत्रात्मप्र
तिपादनपरस्योत्तरब्राह्मणप्रतिपाद्यनिरुपाधिकसर्वान्तरब्रह्मप्रतिपत्त्यनुकूलस्य महाप्रकरणविरोधेन तद्विरोधिभेदत्वाभावात् तदुपन्यस्तलिङ्गानां भेदपर
तानिर्णायकत्वेपि कल्पितभेदपरतया तात्त्विकाभेदाविरोधित्वात् अत एव न शारीरश्चोभयेपि हि भेदेनैनमधीयत इति सूत्रविरोधः न वा तज्ज्ञाप्यव्याहतिः भेदश्रुतेः
षड्विधतात्पर्यलिङ्गभङ्गः॥ २६॥ नन्वैक्यमात्मस्वरूपमुतान्यत् नाद्यः एकतरपरिशेषाद्यापत्तेः सापेक्षस्यैक्यस्य निरपेक्षात्मत्वायोगाच्च नान्त्यः सत्यत्वेऽद्वै
तहानेः मिथ्यात्वे तत्त्वमसीत्यादेरतत्त्वावेदकत्वापत्तेरिति चेत् न आद्यमेवानवद्यम् ज्ञानानन्दयोरात्मैक्येपि यथा नैकतरपरिशेषपर्यायत्वादिकं कल्पिता
नन्दत्वादिधर्मात् तथा प्रकृतेपि सम्भवात् ऐक्येऽभिज्ञेयत्वस्य प्रागुक्तेः तस्यापि निरपेक्षतया निरपेक्षात्मरूपत्वाविरोधात् अज्ञानाद्यधिष्ठानतया भासमाना
त्मरूपत्वेप्यैक्यस्य तज्ज्ञोचरवृत्तिविशेषस्याज्ञाननिवर्तकस्येदानीमसत्त्वात्संसारोपपत्तेः अन्यपक्षदोषास्त्वनुक्तोपालम्भा एव अत एवातिरिक्तमैक्यं नैकत्व
संख्या न वा तन्निष्ठाशेषधर्मवत्त्वं न वा तन्निष्ठसाधारणधर्मवत्त्वं निर्द्धर्मके ब्रह्मणि तेषामभावात् नापि भेदविरहः भेदस्यैक्यविरहरूपत्वे नान्योन्याश्रयात् नापि
तद्वृत्तिधर्मानधिकरणत्वं शून्यस्यापि ब्रह्मैक्यापातादिति निरस्तम् तद्वृत्तिधर्मानाधारत्वोपलक्षितस्वरूपस्याभेदत्वात् शून्यस्य निरूपत्वात् न शून्यस्यैक्यरूप
ता न च तद्वृत्तिधर्मनिषेधेन तद्वृत्तिधर्मविधानप्रसङ्गः विशेषनिषेधस्य शेषाभ्यनुज्ञाफलत्वादिति वाच्यम् शेषविधायकत्वस्य सर्वत्रासम्प्रतिपत्तेः अन्यथा वायोर्नी
लरूपमित्यस्य गौरं प्रति विधायकतापत्तेः नन्वभेदे भेदत्वपारमार्थिकत्वासद्वैलक्षण्यादीनि तत्त्वतः संति न वा आद्ये सद्वितीयत्वापत्तिः द्वितीयेऽभेदत्वहानिरिति चेत् न तत्त्वतः

ल्पितेन भेदेन वास्तवैकतरपरिशेषस्यानिवृत्तिरिति वाच्यं उक्तपरिशेषस्येष्टत्वात् सर्वव्यवहाराणां कल्पितभेदेनैवोपपत्तेः निःस्वरूपत्वात् उक्तस्वरूपहीनत्वात् शेषेति विशेषान्तरेत्यर्थः॥
अन्यथेति तथा च नीरूपत्वरूपेण तत्रैव निर्धर्मकत्वरूपेण प्रकृते पर्यवसानं न च निर्द्धर्मकत्वमद्याप्यसिद्धमिति वाच्यं तस्य संदिग्धत्वे सधर्मकत्वस्यापि संदेहात्। सधर्मकत्वापरिशेषणात्वदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आत्मस्वरूपस्य ब्रह्मरूपस्य यथा चोपलक्षितस्याखण्डरूपता तथा विवेचितं। तर्कैरित्यादिर्ब्रह्मजीवैक्यसंगतिः॥ २७॥ प्रधानप्रमेयेतिमहातात्पर्यविषयाखण्डे

नचैवमभेदस्याबाधितात्मस्वरूपपर्यवसाने तस्य चात्मस्वरूपस्य परैरपि संमतत्वेन त्वच्छास्त्राविषयत्वमिति वाच्यं जीवावृत्तिधर्मानधिकरणत्वोपलक्षितात्मस्वरूपस्य परैरनङ्गीकारात् तदेवमुक्ते जीवब्रह्माभेदे तत्त्वमसि सवा अयमात्मा ब्रह्म इत्यादिश्रुतिर्मानम् ऐक्यस्वरूपोपपत्तिः॥ २७॥ ननु सार्वज्ञ्यासार्वज्ञ्यादिविशिष्टयोरैक्यमयोग्यतापराहतं कथमुदाहृतश्रुत्या बोध्यमिति चेत् न सोयमित्यादाविव विरुद्धाकारत्यागेन शुद्धयोरैक्यबोधनात् ननु विरुद्धाकारत्यागः किमविवक्षामात्रेण उतानित्यत्वेन उत मिथ्यात्वेन नाद्यः विरुद्धाकारस्याविवक्षायामप्यनपायात् नहि असद्वा इदमग्र आसीत् सर्वं खल्विदं ब्रह्मेत्यादिश्रुत्या सत्त्वशून्यत्वयोश्चित्त्वजडत्वयोर्वेहाविवक्षामात्रेण ब्रह्मणः शून्येन जडेन चैक्यं सुवचम् नहि द्वितीयः तत्त्वं भविष्यसीति निर्देशापत्त्याऽसीति वर्त्तमाननिर्देशायोगात् दशाभेदेन भेदाभेदयोः सत्त्वापत्त्या त्वयाप्यनङ्गीकाराच्च जीवेशयोः स्वातन्त्र्यपारतन्त्र्यादेर्नित्यत्वाच्च न तृतीयः निर्दोषश्रुतिसाक्षिसिद्धयोर्विरुद्धधर्मयोर्मिथ्यात्वायोगादिति चेत् न विरुद्धाकारस्याविवक्षयैव त्यागात् त्यागश्च ब्रह्मानुभवाविषयत्वम् न त्वपायः तस्य चरमसाक्षात्कारसाध्यत्वात् तथा च तत्तेदंते इवानपेते अपि सार्वज्ञ्यासार्वज्ञ्ये नाश्रयाभेदविरोधाय अविवक्षा च प्रधानप्रमेयनिर्वाहाय न च सोयमित्यत्र तत्तेदन्तयोर्न त्यागः क्रमेणैकत्र तयोरविरोधादिति वाच्यम् अभेदपरेऽस्मिन्विशेषणयोरैक्यापत्त्या क्रमेणैकत्र सत्त्वेपि तत्त्यागस्यावश्यकत्वात् असद्वेत्यादौ सर्वं खल्विदं ब्रह्मेत्यादौ च न शून्यजडैक्यापत्तौ शून्यसतोः चिज्जडयोर्वा विरुद्धाकारपरित्यागेन जीवब्रह्मणोरिवानुस्यूतस्याकारस्याभावात् असतो निःस्वरूपत्वात् जडस्य बाध्यस्वरूपत्वात् जीवब्रह्माभेदे प्रमाणम्॥ २८॥ नन्वैक्यश्रुत्या प्रत्यक्षसिद्धं जीवमनूद्य ब्रह्मत्वं वा बोधनीयं श्रुतिसिद्धं ब्रह्मानूद्य तस्य जीवत्वं वा उभयानुवादेनाभेदो वा विधेयः सर्वथाप्युपजीव्यविरोधान्नैक्ये प्रामाण्यं प्रत्यक्षेण जीवस्य ब्रह्मभिन्नत्वेन श्रुत्या च सर्वज्ञत्वादिमद्ब्रह्मग्राहिण्या तद्धीनत्वेनानुभूयमानाज्जीवाद्भिन्नत्वेन ब्रह्मणो ज्ञायमानत्वात् न चानुमानेन ब्रह्मोपस्थितिः तेनापि सर्वज्ञत्वादिना ब्रह्मणो विषयीकरणेनोपजीव्यविरोधतादवस्थ्यादिति चेत् न शक्तिग्रहादौ तयोरुपजीव्यत्वेपि स्वप्रमेयेऽनुपजीव्यत्वात् तदुक्तं वाचस्पतिना यदुपजीव्यं तन्न बाधते यद्बाधते तन्नोपजीव्यमिति यथा कथंचिदपेक्षामात्रेणोपजीव्यत्वे नेदं रजतमित्यत्रापीदं रजतमित्यस्योपजीव्यतापत्तेः ननु यद्धि यदपेक्षं यस्य बाधे तस्य बाधापत्तिश्च तत्तस्योपजीव्यम् प्रकृते च धर्म्यादिग्राहकस्यैव स्वप्रामाण्यग्राहकतया तद्बाधे स्वबाधापत्तिः निषेध्यार्पणस्थले तु न तथा नहि ब्रह्मरूपधर्मिज्ञानाप्रामाण्ये ऐक्यज्ञानाप्रामाण्यवत्प्रतिषेध्यज्ञानाप्रामाण्ये प्रतिषेधज्ञानाप्रामाण्यम् प्रतिषेधशास्त्रलोपप्रसङ्गादिति चेत् सत्यम् सार्वज्ञ्यादिविशिष्टं न तद्धर्मि किंतु ब्रह्मस्वरूपमात्रं विशिष्टधर्मिज्ञानप्रामाण्यमैक्यज्ञानप्रामाण्ये। नापेक्ष्यते किंतु स्वरूपज्ञानप्रामाण्यमात्रम् अन्यथेदं रजतमित्यस्यापि धर्मिज्ञानत्वेनोपजीव्यतया निषेधज्ञानप्रामाण्ये रजतत्वविशिष्टेदंज्ञानप्रामाण्यं स्यात्॥

कोत्यर्थः। अभेदपरे। अखण्डैक्यपरे अनुस्यूतस्य। एकावृत्तिधर्मानधिकरणत्वोपलक्षितस्य परस्वरूपस्य यत्तु विरुद्धाकारस्य मुख्यार्थत्वात्तदनुरोधेनैक्यमेव न विवक्ष्यतामिति तन्न तात्पर्यविषयत्वेनैक्यस्यैव मुख्यार्थत्वात्। श्रीः तर्कैरित्यादिः ऐक्यमाननिरूपणं॥ २८॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

समानत्वात् मानसिद्धत्वात्। तदाग्नेयैकास्यतत्त्वंपदवाच्यतावच्छेदकोपलक्षितयोश्चित्वेनाग्नेयैकास्य अधिष्ठानलक्षणायां पुरोडाशसाधनत्वोपलक्षितकपाललक्षणायाम् उ
क्तसाधनत्वेनानुपस्थितस्यसाध्यानाकांक्षत्वेनतुषोपवापरूपसाध्यानन्वयेनोक्तलक्षणाद्दत्तोत्तरत्वादितिउक्तरूपस्यविशेषणत्वरूपत्वेस्वरूपलक्षणेउपलक्ष्यतावच्छेदकानपेक्ष
णेनोपलक्षणेपितदापत्तेरित्यर्थः सगुणोस्त्वितीति। सगुणकर्मास्त्वित्यर्थः तत्प्राबल्येसावयवत्वबोधकस्यमानस्यप्रामाण्यनिश्चयेपरमाणुसावयवत्वस्यावधित्वनिश्चयेइ।

रजतत्ववैशिष्ट्यस्यधर्मित्वाप्रयोजकत्ववत्सार्वज्ञ्यादिवैशिष्ट्यस्यापितदप्रयोजकत्वस्यप्रकृतेपिसमानत्वात् नन्वेवमसाधारणसार्वज्ञ्यादिधर्मावच्छेदेनब्रह्मणो
ऽनुद्देश्यत्वेसाधारणधर्मेणस्वरूपेणवोद्देश्यतावाच्यातत्राद्येइष्टापत्तिः चित्त्वादिसाधारणधर्मेणैक्यस्यास्माभिरभ्युपगमात् द्वितीयेब्रह्मैक्यासिद्धिः साधारणस्वरू
पमात्रोद्देशादितिचेत् नब्रह्मैक्यासिद्धिरित्यत्रब्रह्मशब्देनसार्वज्ञ्यादिविशिष्टंचेदभिमतंतत्रेष्टापत्तिः तदात्वमाचलक्षितयोरेवपदार्थयोरैक्यबोधनस्यप्राक्प्रतिपादित
त्वात् अतएवशब्देनासाधारणब्रह्मस्वरूपोद्देशस्यासाधारणधर्मेणविनाऽसिद्धेरुपजीव्यविरोधनादवश्यमितिनिरस्तम् असाधारणधर्मस्योद्देश्यसमर्पणेउपलक्षकत्वा
त् नचोपलक्ष्यतावच्छेदकाभावेउपलक्षकत्वासिद्धिः चित्त्वस्यतत्त्वेसिद्धसाधनादितिवाच्यम् स्वरूपलक्षणेउपलक्ष्यतावच्छेदकस्यानपेक्षणात् यत्तुचित्त्वेनैक्ये
सिद्धसाधनं तच्चचित्त्वेक्यस्येष्टत्वेपितदाग्नेयैक्यस्यतत्त्वानिष्टत्वात् इष्टेचाऽविवादात् अतएवपुरोडाशकपालेनतुषानुपवपतीत्यत्राधिष्ठानलक्षणा
यामन्यतोऽप्राप्ततुषोपवापविधानरूपेष्टसिद्धिवदत्रनलक्षणायामिष्टसिद्धिर्येनलक्षणास्यादितिनिरस्तम् चित्त्वैक्यस्यप्राप्तत्वेप्याग्नेयैक्यस्याप्राप्तस्यलक्षणाप्रापणी
यस्यसत्त्वात् सोयमित्यत्राप्युक्तप्रकारस्यावश्यवाच्यत्वात् नचतत्ताविशिष्टस्यतत्रोद्देश्यतायद्वृत्तयाज्ञातएवयदन्वयधीः तत्तस्यविशेषणत्वस्यतत्तादेसम्भवा
दितिवाच्यम् दत्तोत्तरत्वात् नन्वेवंपरमाणुः सावयवः ईश्वरोनसर्वज्ञः आदित्योयूपइत्यादौउपजीव्यविरोधोनस्यात् उत्पन्नशिष्टगुणविधौसगुणोस्त्वितिवाक्यविरोध
श्चनस्यात् तत्रापिपरमाणुत्वादिविशिष्टंनधर्मिकिंतुस्वरूपमात्रमितिसुवचत्वादितिचेत् नपरमाण्वादेः स्वरूपेणापिसावयवत्वादिकंप्रतिधर्मित्वेपरमाणुत्वा
दिकंधर्मिसमानसत्ताकंपरमाण्वादौनस्यात् तदीयासमसत्ताकत्वकल्पनस्यतस्मिन्सावयवत्वबोधकप्राबल्याधीनत्वात् तत्प्राबल्येनुमानाभावात् प्रस्तुतश्रान्तवा।
क्यत्वेनदुर्बलत्वात् आदित्योयूपइत्यत्राभेदोनप्रमेयः स्तुतिद्वारान्यशेषत्वात्स्तुतेश्चप्रत्यक्षाविरुद्धैर्गुणैरपिसम्भवेप्रत्यक्षविरुद्धार्थकल्पनायोगात् उत्पन्नशिष्टगुणवि
धौतूत्पत्तिवाक्यस्थितामिक्षादिपदस्यद्रव्यसामान्यपरत्वेतत्सदवैयर्थ्यापत्तिः तद्धितार्थान्तर्गतास्येतिसर्वनाम्नायजतिचोदनाद्रव्यदेवताक्रियमितिन्यायेनयागचोदनाप्रा

तियावत्। अनुमानाभावात् पक्षेसाध्यनिश्चयेनानुमानानवतारात् सावयवत्वज्ञानानुमानमूलन्यायवाक्यस्येतिशेषः दुर्बलत्वात्। अनुमानाप ((त्रेणचद्रव्यसामान्यलाभात्॥
र्यवसायित्वात्। गुणेत्यादिसपदलक्ष्यमाणादित्यगुणैः उत्पन्नशिष्टगुणविधौवाजिनादिगुणस्यवाजिभ्योवाजिनमित्यादिनाआमिक्षायागेविधौयजतिचोदनायजिधात्वर्थघटकं द्र
व्यदेवताक्रियंद्रव्यंदेवतात्यागक्रियाचतत्रथादेवतोद्देशेनद्रव्यत्यागोयजेः शक्तिरित्यर्थः समुदायेक्तार्थत्वादितिसूत्रशेषः। समुदायघटितेआर्थैर्यजतेः कृतप्रयोगादित्यर्थः। सा।

भा॰ टि॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैश्वदेव्यामिक्षेत्यादावामिक्षादिपदे विशेषलाभेन लाघवात् द्रव्यत्वं देवतात्वं च तद्धितशक्यतावच्छेदकं मिथोऽन्वयस्तु वाक्यार्थ इति भावः। करणसंसर्गीति। आगंतुकेत्यर्थः॥ श्रीः तर्केरित्यादिर्नोपजीव्यविरुद्धता॥२९॥ वसंतसहचरितेऽध्ययने अध्ययनविषयेवसंतसहचरितेवसंतादिभ्यष्ठगित्यनेनतदधीतेतद्वेदेत्यर्थेठग्विधानाद्वसंतस्यकालत्वेनाध्ययनाविषयत्वाद्वसंतप्रतिपादकोग्रंथोवसंतशब्दार्थस्तस्यवसंतसम्बन्धिपदसम्बन्धित्वेनवसंतसाहचर्यादित्युक्तंपदविधौ।पदेनविधीयमानेसमासादौप्रयोगस्येतिऋद्धस्यराजपुरुषइत्यादावसमर्थपदाश्रितत्ववारणायेतिशेषः संप्रसारणमिति इग्यणः संप्रसारणमिति सूत्रेयणःस्थानेयइग्वर्णःससंप्रसारणसंज्ञइति चेत्

प्रक्रान्तेऽनन्यशेषतयाप्रबलत्वात्प्रमाणवाक्यत्वाच्चतद्विरोध्यैक्यप्रतिपादकतयास्वरूपलक्षणायायुक्ततमत्वात् ननुरूप्यरूपनिषेधार्पकस्यापेक्षितस्यापिपरीक्षितत्वाभावाद्यद्यपिदुर्बलत्वमुपजीव्यत्वमात्रस्यप्राबल्याप्रयोजकत्वात्तथापीहनिषेधार्पिकाभेदश्रुतिःसाक्षिप्रत्यक्षंचनिर्दोषत्वात्परीक्षितमितिप्रबलंतद्विरोधात्कथमैक्यपराश्रुतिरितिचेत् ननिर्दोषायाअपिश्रुतेर्भेदपरत्वस्यैवाभावेनतद्विरोधस्यैक्यश्रुतावसम्भवित्वात् नहिश्रुतेरुपक्रमादिषड्विधतात्पर्यलिङ्ग-भून्यार्थपरत्वंतन्नियामकाभावात् अन्यथातिप्रसङ्गात् साक्षिणोपिनिर्दोषत्वमात्रेणपरीक्षितत्वाभावात् दुःखाभावादावारोपितसुखादेरपिप्रामाणिकत्वापत्तेःमन्मतेप्रातिभासिकमात्रस्यसाक्षिसिद्धस्यमिथ्यात्वात् साक्षिणोपिदोषजन्यवृत्त्युपरक्तत्वेनाऽबाध्यत्वासिद्धेरुक्तत्वाच्च प्रमाणतदाभासव्यवस्थापिप्रातिभासिकव्यावहारिकयोःकरणसंसर्गिदोषप्रयुक्तत्वाप्रयुक्तत्वाभ्यांव्यावहारिकस्यचैतन्यमात्रस्याज्ञानदोषप्रयुक्तत्वात् तस्मादुपजीव्यविरोधाभावात्प्रत्युताभेदश्रुतेरेवसर्वशेषितयाभेदश्रुतिंप्रत्युपजीव्यत्वाद्भेदश्रुतेरेवतद्विरोधेनतदनुकूलतयानेयत्वात् सर्वविरोधशून्यंतत्त्वमस्यादिवाक्यंतथाचैक्यपरमितिसिद्धम् ऐक्यश्रुतेरुपजीव्यबाधाभावः॥२९॥ नन्वेवंपदद्वयेपिलक्षणास्यात् तथाचमन्मतमाश्रित्यैकपदलक्षणैवलक्षणीया तथाहिद्वासुपर्णासयुजेसखौजीवस्यब्रह्मसाहचर्योक्तेस्तत्साहचर्यात्तदितिव्यपदेशःवसंतादिभ्यष्ठगित्यत्रवसंतसहचरितेऽध्ययनेवसन्तपदप्रयोगस्यमहाभाष्येउक्तत्वात् सन्मूलाःप्रजाःसदायतनाइत्यादिवाक्यशेषात्प्रसिद्धतदाश्रितत्वाद्वातदितिव्यपदेशःसमर्थःपदविधिरित्यत्रसूत्रेसमर्थपदाश्रितत्वेनपदविधौसमर्थपदप्रयोगस्यमहाभाष्योक्तेः सन्मूलाः सोम्येमाः सर्वाः प्रजाइतिवाक्यशेषात्प्रसिद्धतज्जन्यत्वाद्वातत्पदप्रयोगः ब्राह्मणोस्यमुखमासीदित्यादिप्रयोगवत् इग्यणःसंप्रसारणमित्यत्रसंप्रसारणाज्जातोवर्णःसंप्रसारणमितिमहाभाष्योक्तेःप्राणबन्धनंहिसोम्यमनइतिवाक्यशेषेणजीवस्येशाधीनत्वोक्त्यातदधीनत्वाद्वातच्छब्दप्रयोगः॥ ∵ ॥ राम. ३२०

हिग्यज संप्रसारणमित्यादौदोषोनहिग्यजोयणःस्थानेइकःसिद्धोस्तियःस्यःसंप्रसारणमित्यनेनविधीयेतेत्यनेनवर्णसंज्ञापक्षंदूषयित्वायणःस्थानेइग्भवनरूपोवाक्यार्थःससंप्रसारणसंज्ञइतिपक्षांतरमाशंक्यवाक्यार्थस्यासत्त्वरूपत्वेनस्थानित्वाद्यभावात्संप्रसारणस्येत्यादौदोषइतितदपिदूषयित्वाकाकाज्जातेकाकादिपदस्येवसंप्रसारणाज्जातेसंप्रसारणपदस्योक्तिस्तथाचोक्तवाक्यार्थस्यसंप्रसारणसंज्ञकस्यस्थानित्वाद्यभावेपितस्माज्जातस्येकारादिवर्णस्यापिसंप्रसारणसंज्ञकत्वेनस्थानित्वाद्युपपत्तिरित्युक्तं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धान्यमितिदर्शपूर्णमासयोःपेषणार्थंदृषदिनिक्षिप्ततंडुलानुमंत्रणार्थंधान्यमित्यादिमंत्रःपठितस्तस्यशाक्त्यानामयननामकसत्रस्यांगभूतेष्वुतरसमयशब्दितमांसमयपुरोडाश
द्रव्यकेषुसवनीयपुरोडाशेष्वतिदेशात्प्राप्तस्यधान्यपदस्यानेतरस्यपदमूह्यंनवेतिसंशयेनोह्यंप्रकृतावपितंडुलेषुसमवेतार्थत्वाभावात्देवस्यत्वासवितुरित्यादिमंत्रेसवित्रादिपदवदि
तिप्राप्तेधान्यशब्दस्यद्रव्यप्रकाशनरूपदृष्टार्थकत्वायधान्यप्रकृतिकार्थकत्वात्प्रकृतौसमवेतार्थत्वादूह्यमितिनवमप्रथमेस्थितंतत्रयथाधान्याधीनमर्थस्तथाप्रकृतेरीशाधीनःतत्स।
दार्थइत्यर्थःबहुगणेत्यादिबहुगणवतुडतिसंख्येतिसूत्रेबहुगणादीनांसंख्यासंज्ञाविधानेसंख्यापूर्वकोद्विगुरित्यादौएकद्व्यादिसंख्याग्रहणंनस्यात्।कृत्रिमाकृत्रिमयोःकृत्रिमे।
कार्यसंप्रत्ययइतिन्यायेनकृत्रिमसंख्यानांबहुगणादीनामेवग्रहणसंभवादित्याशंक्यउक्तसूत्रेणसंज्ञानविधीयतेकिंतुबहुगणादयःसंख्यावदित्यतिदिश्यंतेवतिंविना।

धान्यमसि धिनुहीत्यत्र मन्त्रे तण्डुले धान्यपदप्रयोगवत् तत्सादृश्याद्वा तच्छब्दप्रयोगः सारूप्यादिति जैमिनिसूत्रम् आदित्यो यूप इत्यादिकं सादृश्यादिषु
क्तत्वात् तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति ब्रह्मसूत्रे ब्रह्मगुणयोगाज्जीवे तद्व्यपदेश इत्युक्तेः महाभाष्ये च बहुगणेत्यादिसूत्रे वतिं विनैव संज्ञा।
वदिति वत्यर्थो वगम्यते अब्रह्मदत्तं ब्रह्मदत्तेत्याह तेवयं मन्यामहे ब्रह्मदत्तवदयं भवतीत्युक्तेश्चेति चेन्न अभेदे तात्पर्येऽवधृते तन्निर्वाहकलक्षणा बाहु
ल्यस्यादोषत्वात् नहि लक्षणैक्यानुरोधेन तात्पर्यपरित्यागः तदुक्तं न्यायचिंतामणौ तात्पर्याद्धि वृत्तिर्न तु वृत्तेस्तात्पर्यमिति जहदजहल्लक्षणया मुख्यपरत्वे
सम्भवति तत्सहचरिताद्यर्थपरत्वकल्पनस्यानुचितत्वाच्च यथाऽभेदपरत्वेन बोधकत्वानुपपत्तिस्तथोक्तं प्राक् द्वा सुपर्णा सयुजा इत्यनेन न जीवस्य ब्रह्मणा सह
चरितत्वोक्तिः किंत्वन्तःकरणेनेति न तेन सहचरितत्वप्रसिद्धिरपि नवा सन्मूलाः प्रजा इत्यादिना जीवस्य तदाश्रितत्वप्रसिद्धिः प्रजाशब्दस्य प्रजायमानवाचकत्वे
न जीवस्य नित्यस्याप्रतिपादनात् अतएव न तज्जन्यत्वेनापि तच्छब्दप्रयोगः ब्राह्मणोऽस्य मुखमित्येव मुखाज्जातत्वहेतुतः यथावटच्छुतोतद्ज्जीवो ब्रह्मेति वा गभ
वेदिति स्मृतिरपस्मृतिरेव श्रुतिविरोधात् यत्तु तद्गुणसारत्वादित्यादिना जीवे ब्रह्मगुणयोग उक्त इत्युक्तम् तन्न बुद्धिगुणसूक्ष्मत्वयोगाज्जीवे ब्रह्म।
णीव सूक्ष्मत्वमित्येवंपरत्वात् सूत्रस्य एतेन शाखासदेशे चन्द्रे शाखेतिवत् जीवांतर्यामितया जीवसदेशे ब्रह्मणि त्वमिति प्रयोगः आत्मनि ति।
ष्ठन्नी तिष्ठते ब्राह्मणो वै सर्वा देवता इत्यादिवज्जीवाश्रयत्वाद्वा ब्रह्मणः सर्वकर्तृत्वेन यजमानः प्रस्तर इत्यादिवत्तत्सिद्ध्या वा ब्रह्मणि त्वमिति व्यपदेश इति निरस्त

पिसंख्याशब्दस्यगौण्यावृत्त्यासंख्यासदृशार्थकत्वसंभवादित्युक्तंतेवयंतात्पर्यविदोवयंतात्पर्यात्।उपक्रमोपसंहारार्थवादोपपत्त्यादिनिर्णीततात्पर्यात्वृत्तेःवृत्तिलाघवात्उ
पक्रमादिबहूनामबाधायवृत्तिलाघवंत्यज्यतेऽन्यथार्थवादादावपिलक्षणानस्यात्।उपक्रमोपसंहारादिप्रतीतैकवाक्यतांस्त्वाअर्थवादस्यनानापदमुख्यताःयोपासीतेत्यादिपदा
ध्याहारापत्तेः।अतएवोपक्रममात्रानुरोधेनऋगादिपदेउच्चैर्ऋचाक्रियतेइत्यादिविधिस्थेपिलक्षणाश्रितायत्रतूपक्रमादिकमनिर्णायकंतत्रतात्पर्यनिर्णायकत्वेनवृत्तिला
घवमप्यादृियतेयथास्यपत्यधिकरणेइतिभावःनित्यस्येतिनचोपाधिकजन्यत्वंजीवस्यापीतिवाच्यंप्रजापदेनसोपाधिकजीवग्रहणेतस्यैवतदाश्रितत्वाभापसातत्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विशेष्यांशेति तथा च विशेष्यांशो न त्यक्तः त्वन्मते तु विशेष्यमपि त्यक्तमिति तवैव दोष इति भावः तिष्ठसीत्यस्य सत्तावानित्यर्थः अस भुवीति स्मृतेस्तथा च तत्प्रयुक्तसत्ताकत्व लाभान्मिथ्यात्वं जीवस्य स्यादध्यस्तस्यैवाधिष्ठानरूपसत्ताधीनसत्ताकत्वा इत आह ततः संजात इति औपाधिकजन्यत्वस्यैव वाच्यत्वाज्जीवस्वरूपानिर्णयः तथा च तज्ज्ञाना न्मोक्षानापत्तिरत आह तस्येति सम्बन्धविशेषानिर्णयात सदोषत्वदवस्थोऽत आह तस्मिन्निति यत्रास्तुन्वंतीति तत्र हविर्धान इति हविर्धानाख्यगृहमध्ये दक्षिणोत्तरप्रदेशयोः सोमाख्य हविर्धारणार्थं हविर्धानाख्यशकटे स्थाप्येते तयोर्मध्ये यत्र दक्षिणाहविर्धाने सोमाभिषवः क्रियते तत्समीपे इत्यर्थः उक्तं हि तृतीयसप्तमे उत यत्सुन्वंतीत्यादिवाक्ये सामिधेन्यनुवचनो द्देशेन न हविर्धानं विधीयते हविर्धारणार्थत्वेन प्रयोजनांतरानाकांक्षत्वात् किंतु हविर्धानयोः समीपदेशस्य सामिधेन्यंगतया प्रकृतिप्राप्ताहवनीयप्रत्यग्देशरूपत्वेन दक्षिणाहवि र्धानसमीपं नियम्यते तत्रैव स्थित्वा सामिधेनीरनुब्रूयादिति प्रोद्गातॄणामिति प्रैतु होतुश्चमसः प्रब्रह्मणः प्रयजमानस्य प्रोद्गातॄणामिति चमसाध्वर्यून्प्रत्यध्वर्योः प्रैषः । सदोमंडपे

ननु जहदजहल्लक्षणायां वाच्यांतर्गतत्वेन प्राग्धीस्थस्य स्वबाधकात्त्यक्तस्य पुनः स्वीकारः जहल्लक्षणायामधीस्थस्यात्यक्तस्यैव स्वीकारः त्यक्तस्वीकारादस्म धीस्थस्वीकार इति चेत् न अनुपपत्त्या विशेषणत्यागेपि विशेष्यांशात्यागात् एतेन तच्छब्दात्परत्र तृतीयादिविभक्तेः सुपां सुलुगित्यादिना प्रथमैकवचनादे शो वानुस्वात तथा च तेन त्वं तिष्ठसीति वा ततः संजात इति वा तस्य त्वमिति वा तस्मिन्त्वमिति वार्थः अनेन जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति सन्मूलाः सोम्येमाः सर्वाः प्रजाः ऐतदात्म्यमिदं सर्वमित्यादिवाक्यशेषात् तथा च मीमांसका उत यत्सुन्वंति सामिधेनीस्तदन्वाहुरित्यत्र यत्तच्छब्दयोः स प्तम्यर्थे प्रथमां स्वीकृत्य यत्र सुन्वंति तत्र हविर्धाने स्थित्वा सामिधेनीरनुब्रूयादिति व्याख्यां चक्रुः न्यायाच्च निरवकाशप्रधानभूतानेकप्रातिपदिकस्वार स्याय सङ्कुचितार्थत्वेन सावकाशाप्रधानैकविभक्त्यस्वारस्यमिति निरस्तम् प्रोद्गातॄणामित्यत्र विभक्तिस्वारस्याय प्रातिपदिकस्यान्यथा नयनवदत्रा पि प्रातिपदिकस्यैवान्यथा नयनाच्च ॥ १९ होत्रादयः सोमभक्षपितारः संति तेषां मध्ये होतारं प्रति होतृचमसः प्रैतु गच्छतु एवं ब्रह्माणं प्रति तच्चमसः प्रैतु इ त्याद्यर्थस्तत्रोद्गायते ऋक्षीयाख्याया द्वितीयस्याः सोमभक्षे वाचकत्वादुद्गातृपदस्य तत्कर्तृवाचकत्वाद्धोद्गातृशब्दितस्यैकत्वात् पाशाधिकरणन्यायेन बहुवचनं ने यं अथवा प्रकरणोऽप्यंतासंभवात्पाशबहुत्वं वाध्यतामिह तूद्गातृशब्दस्य जहत्स्वार्थलक्षणयोद्गात्रप्रवचनसम्बन्धरूपावांतरसामान्येनोद्गातप्रस्तोतप्रतिहर्तृसु ब्रह्मण्यबोधकत्वात्तेषामुद्गातृचमसभक्षकत्वमिति प्राप्त एकस्तोत्रसम्बन्धः सदोमंडपे संनिधानमित्यादेरुक्तसामान्यापेक्षयाप्यवांतरसामान्यत्वात्तेनैव रूपेण लक्षणोचि त्यात्तस्य च सुब्रह्मण्यव्याहृतत्वादपसुब्रह्मण्यानां त्रयाणामेव भक्षकत्वेति तृतीयपंचमे स्थितं यत्तु योगेनाप्युक्तत्रितयपरत्वसंभव इति तन्न तुच्छ भूरिप्रयोगेन द्वितीयसामभागक र्तॄरिरूढेर्योगापहारकत्वात् रथकाराधिकरणन्यायात् वार्त्तिकादौ लक्षणाया एवोक्तत्वाच्च प्रातिपदिकस्यैवेति । यथा प्रोद्गातॄणामित्यत्रैकत्वे विभक्तेर्जहल्लक्षणा यामसंतवाधादानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन तामकृत्वा प्रातिपदिकस्य लक्षणाश्रिता अन्यथा हि होतुरित्यादावेकवचनप्राप्तस्यैकत्वस्याक्षणिकं बहुवचन

CC-0. In Public Domain. Digitization by eGangotri

तथोपक्रमादिगृहीताखंडब्रह्मतात्पर्यानुरोधेनप्रथमायास्तृतीयार्थकत्वमङ्गत्वात त्वंपदयोरेवं भागत्यागलक्षणाश्रयितुंयुक्तातावताहिनविभक्त्यस्वारस्यंप्रथ
माविभक्त्योर्नामोत्तरस्थयोस्तदर्थाभेदबोधानुकूलत्वस्यैवस्वारस्यरूपत्वात् नापिनाम्नोः सोयमित्यादावस्यंताभेदरूपाखंडार्थकत्वस्यैवतत्स्वारस्यत्वात् षष्ठीव
हुवचनस्येत्यादिप्रथमायाएकवचनंयथासुपांसुलुगित्यादिनातृतीयाद्यर्थेविहितंतथाषष्ठीवहुवचनमेकत्वादौविभक्त्यंतरार्थेवानविहितमतोनतस्यान्य
थानयनसंभवइत्यर्थः सक्तूनित्यादिदर्शपौर्णमासयोःश्रुतंसक्तूनांभूतभाव्युपयोगाभावेनासंस्कार्यत्वात्द्वितीयावहुवचनस्यतृतीयार्थकत्वमिवोक्तस्यलेष
ष्ठीवहुवचनस्यापिविभक्त्यंतरार्थकत्वमेकत्वार्थकत्वंचसंभवतिव्यत्ययोवहुलंसुप्तिङुपग्रहेत्याद्यनुशासनादित्यर्थः प्रधानार्थेति।कर्तृकारकादिरूपप्रधान
वाचकत्वेनप्रथमादिविभक्तेरेवप्राधान्यंननुप्रथमायाःकर्तृवाचित्वमानाभावःप्रातिपदिकार्थेत्यादिनाप्रातिपदिकान्नियतोपस्थितिकार्थएवप्रथमाविधानात्।चैत्रःप
चतीत्यादौतिङादिनाकर्त्रादेरुक्तत्वेनान्यलभ्यत्वाच्चतथाचप्रत्ययप्राधान्येनेत्युक्तविशेष्यतयाप्रधानीभूतकारकवाचित्वरूपप्राधान्यस्यप्रथमायामसंभवात्।नामार्थवि
शेषणासंख्यावाचित्वेननामापेक्षयागुणत्वाच्चतस्यामेवलक्षणायुक्तानचैवमनभिहितइतिसूत्रंव्यर्थमभिहितस्यकर्मादेरन्यलभ्यत्वादेवतत्रद्वितीयाद्यभावसंभः

नचषष्ठीवहुवचनस्यप्रथमैकवचनवदन्यत्राविधानेनतस्यान्यथानयनमसम्भवीतिवहुवचनानुसारेणप्रातिपदिकस्यप्रस्तोत्रादि
छन्दोगेषुलक्षणाश्रितेतिवाच्यंसक्तून्जुहोतीत्यत्रेवान्यत्रनयनस्यासम्भावितत्वाभावात्किन्तुनतावत्प्रातिपदिकस्यनिरवकाशत्वंविभ-
क्तेः सङ्ख्यायामिवविशेष्यांशेसावकाशत्वात् नापिप्राधान्यंप्रधानार्थवाचकस्यप्रत्ययस्यैवप्राधान्यात्॥ १ ॥ ॥ १ ॥

वात् अतएववहुपटुरित्यादौवहुत्वोक्तार्थत्वात् कल्पवादयोनस्युरित्युक्तमितिवाच्यंसंख्याविभक्त्यर्थइतिमतेकर्मणियदेकत्वंतत्रद्वितीयैकवचनमित्यादेर्वा
च्यत्वात्कटः कृतइत्यादौद्वितीयैकवचनादिप्रसक्तेस्तद्वारणायोक्तसूत्रसार्थक्यात्।कृदादिनाकर्मादेरुक्तत्वेपितदेकत्वस्यानुक्तत्वात् नचपरत्वात्प्रथमेति
वाच्यंकर्तव्यः कटइत्यादौकृद्योगलक्षणाषष्ठीप्रसंगात्तस्याः प्रथमातोपिपरत्वात्कारकमात्रंविभक्त्यर्थइतिमतेतूक्तसूत्रंव्यर्थमेवेतिचेन्नतिङ्समानाधिकरणे
प्रथमेतिवार्त्तिकवचनात् प्रथमायाःकर्त्रादिशक्त्यावश्यकत्वात्। आख्यातादिनाप्रातिपदिकसमानाधिकरणेनोक्तार्थेप्रथमेतितदर्थात् नचकर्तव्योयंघटइत्यादौ
परत्वात्षष्ठीस्यादितिवाच्यंप्रकरणांतेअन्योक्तेप्रथमेतिसूत्रणीयमितिवार्त्तिकाशयात्।अतएवप्रथमायाःकारकविभक्तिकत्वेनतदंतात्शसप्रत्ययसंभवेनैक
शइत्यादिसूत्रस्यतादृशप्रयोगःसंगच्छतेनचवसुगत्याकारकात्शसादिविधानमितिवाच्यंतथासतिनटस्यश्रवणंमातुःस्मरणमित्यादावतिप्रसंगात्गतिकारकोपपदा
नामितिनित्यसमासस्यगतिकारकोपपदादितिप्रकृतिस्वरस्यचापत्तेः अतएवोक्तवार्त्तिकतात्पर्यविदावोपदेवेनत्वर्थसंवुद्ध्युक्तार्थेप्राद्गतिसूत्रितंलिंगार्थेसंवोध
नेउक्तकारकार्थेचप्रथमेतितद्वृत्तौव्याख्यातंतथाचलिंगसंवोधनवदाख्यातायुक्तकारकमपिप्रथमावाच्यमितितदभिमतंस्पष्टमेकविभक्त्यंतेनत्रयाणांनिर्देशात्॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उ० २ अ० सि० टी० ल० ११२

क्रमादीश्वरस्यापि संबुद्ध्युक्तात् सुऔजसइतिसूत्रयतस्तदेवाभिमतमेवमन्येष्वपि सारस्वतादिव्याकरणेषु अन्योक्तेप्रथमेत्यादिसूत्रणाद्यमर्थो निष्प्रत्यूहः कदाचिदभिधीयमानकर्मशक्त्याप्रयोज्यव्यापारआक्षिप्यते कदाचिच्चाभिधीयमानकर्तृशक्त्याप्रयोजकव्यापारइत्यर्थके भावार्थचरणीयवार्त्तिकग्रंथे घटोभवतीत्यादौ प्रथमाभिहितकर्तृशक्त्याप्रयोजकव्यापाराक्षेपइतिन्यायसुधाकारैरुक्तं।उक्तंनिरुक्तकारैरुक्तं असंभवादितिशेषशब्दश्रवणात् प्रतिपत्तेराकांक्षितत्वेन प्रयाजशेषस्य प्रतिपत्तिरूपउपयुक्तसंस्कारो वि दक्षितो हविषामुपयोक्ष्यमाणसंस्कारेत्वदृष्टकल्पनास्यात्तत्स्यात् श्रुतशेषपदस्य प्रतिपत्तिरूपदृष्टार्थत्वस्य चानुरोधेन विभक्त्यावपि लक्षणेति चतुर्थप्रथमे।

तदुक्तं प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थस्य प्राधान्यमिति नापि प्रातिपदिकानेकत्वं स्वारस्ये तन्त्रम् गभीरायां नद्यामित्यादावनेकत्वेप्यस्वारस्य दर्शनात् तात्पर्यबलात्तत्र तथेति चेत् समे प्रकृतेपि यत्तु प्रयाजशेषेण हवींष्यभिघारयतीत्यत्र प्रयाजशेषं हविष्षु प्रक्षिपतीति द्वितीयाविभक्त्यस्वारस्यं सक्तून् जुहोतीत्यादावपि द्वितीयाविभक्त्यस्वारस्यम् लक्षणादितदगत्या प्रयाजशेषेणेत्यादावुपयुक्तसंस्कारव्यतिरेकेण प्रकारांतरस्यासम्भवात् सक्तूनित्यादौ भूतभाव्युपयोगाभावेन संस्कार्यत्वायोगात् एतेन तस्य त्वं तत्त्वमिति समस्तं पदमिति निरस्तम् असमासेनैव षष्ठ्यर्थलक्षणादिगौरवरहितेनोपपत्तौ षष्ठीसमासस्यान्याय्यत्वात् अन्यथास्य पदस्याधिकरणविरोधापत्तेः ननु एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्यत्र तत्पदेन नात्मा परामृश्यते किन्त्वैतदात्म्यं नपुंसकत्वात् एतदात्म्यमित्यस्य एष चासावात्मा च एतदात्मा तस्येदमैतदात्म्यं एवं च एतदीयं वस्तु त्वमसीत्यर्थो न त्वात्माभेदः एतदात्मा यस्य तदैतदात्म्यमित्यर्थे भावप्रत्ययवैयर्थ्यापत्तेः ततो वरमर्थान्तराश्रयणम् विचित्रा हि तद्धितगतिरिति वचनात् स स्रष्टा चैव संहर्ता नियन्ता रक्षिता हरिः तेन व्याप्तमिदं सर्वमैतदात्म्यमतो विदुरिति स्मृतेश्चेति चेत् न तस्येदमित्यर्थे ष्यञोऽविधानात् प्रयोगादर्शनाच्च स्वार्थे च सौख्यमित्यादिप्रयोगदर्शनात् तथा चैतत्सदात्मा यस्य सर्वस्य तदेतदात्म तस्य भाव ऐतदात्म्यं सामानाधिकरण्यं च स्वार्थिकत्वाद्भावभवित्रोरभेदोपचाराद्यो वै भूमा तत्सुखमितिवत् यत्तु स्मृतावेतद्व्यापकत्वेनैतदात्म्योक्तिः सा न युक्ता एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधात् ननु शरीरवाचिनां देवमनुष्यशब्दानां शरीरीपर्यंतत्वदर्शनात् ब्रह्मशरीरभूतजीववाचित्वं पदस्य ब्रह्मपर्यंतत्वेन तत्त्वमिति व्यपदेशः शरीरशरीरिभावनिबन्धनः यस्यात्मा शरीरमित्यादिश्रुतेरिति मुख्यमेवास्य त्वमिते पदद्वयमिति चेत्।।

११ स्थितं स्थपतीति निषादस्थपतिं याजयेदित्यादौ निषादस्य संकरजातिविशेषस्य स्थपतिरीश्वरस्त्रैवर्णिक इति नार्थः पूर्वपदे सम्बन्धिलक्षणापत्तेः किंतु निषादाभिन्नः स्थपतिरेवं च तस्य यागानुष्ठानोपयुक्तं तद्बोधकवेदवाक्यार्थज्ञानमध्ययनाभावेन पूर्वमसिद्धमपि कल्प्यते न तु तद्दोषान्मुख्यार्थत्यागः फलमुखगौरवस्यादोषत्वादिति षष्ठप्रथमे। स्थितं नपुंसकत्वादिति। तत्सत्यमित्यत्र नपुंसकशब्दनिर्दिष्टब्रह्मण एव नपुंसकतत्पदेन निर्देशसंभवान्नेदं युक्तं न हि तत्सत्यमित्यत्र सर्वं सत्यमित्यर्थः असत्कारणनिरासाय सदेव सोम्येत्यादिनोक्तस्य कारणस्य सत्त्वस्य तत्र परामर्शात्। स आत्मेति कारणवाचितत्पदसमभिव्याहारात् किंच एतदात्मीयार्थकत्वे तत्पदस्य विशेषणतया पुंस्त्वापत्तिर्न हि वस्त्रं शुक्लं घटस्तदिति साधुर्व्यत्ययो बहुलमित्यस्य शरणीकर

राम० ३२२

CC-0. In Public Domain. Digitization by eGangotri

ननुशरीरिण्येवशक्तिरस्तुअसाधारण्येनोक्तनिर्देशस्तुपराभ्युपगमादित्यतआह प्रवृत्तीति। अचक्षुरभिलापस्यादिनामनुष्यत्वादेरात्मावृत्तित्वमुक्तंतथाचमनुष्यत्वादिरूपेणमनुष्या
दिपदजन्योबोधोनशरीरिणःसंभवति।नचमनुष्यत्वादिमच्छरीरावच्छिन्नात्मत्वेनमनुष्यादिपदशक्यतास्तुतत्रापितस्यभूरिप्रयोगादितिवाच्यंशकशरीराभेदेन लक्षणयावाप्रयोगोपप
त्तावनेकशक्तत्वस्यान्याय्यत्वात् अत्रमन्मतेअत्रेदंबोध्यंनाभेदनिबंधनःप्रयोगःशरीरिणिसंभवतिब्रह्मणिपरमतेपृथिवीजीवादिभेदनिर्णयसत्त्वादहंमनुष्यइत्यादिप्रयोगस्तुयु
क्तोजीवानामात्मनिशरीराभेदभ्रमसत्त्वादिति अन्यथैवेति। यथाशकुनिरन्यत्रविश्राममलब्ध्वासूत्रमाश्रयतितथाजीवःस्वरूपमित्यत्रान्यत्रविश्रामालब्धि पूर्वकाश्रय

नशरीरिपर्यंतत्वमितितद्बोधकत्वंवातत्रापिशक्तत्वंवाशरीरविषयवृत्त्यैवतत्प्रतिपादकत्वंवानाद्यःमुख्यत्वानुपपादनात् नद्वितीयःशरीरंवाचिनामित्यसाधार-
ण्येननिर्देशानुपपत्तेःप्रवृत्तिनिमित्तमनुष्यत्वादिजातेःशरीरिण्यवृत्तेरुक्तत्वाच्च नतृतीयःअन्यविषयवृत्तेरन्यत्रानुपयोगेनशरीरशरीरिणोरनादिभ्रमसिद्धाभेद
निबन्धनोयंप्रयोगोवाच्यःतथाचात्राप्यभेदनिबन्धनएवायंप्रयोगःअभेदस्तुबाधकाभावादत्रतात्त्विकइत्येवविशेषःयत्तुआदित्योब्रह्मेतिवज्जीवेब्रह्मत्वोपासनार्थःतत्त्वमसी
तिनिर्देशइतितन्न अनुपासनाप्रकरणस्थत्वेनदृष्टान्तवैषम्यात् उक्तरीत्यावस्तुनिष्ठत्वेसम्भवतितत्यागायोगाच्चननुसआत्मातत्त्वमसीत्यत्रअतत्त्वमसीतिपदच्छेदःशब्दोऽनि
त्यइत्यत्रानित्यइतिपदच्छेदोयथाघटदृष्टान्तानुसारेणतथात्रापिशकुनिसूत्रादिदृष्टान्तानुसारात् नह्याद्येखण्डेसयथाशकुनिःसूत्रेणप्रबद्धइत्युक्तयोःशकुनिसूत्रयोःषष्ठेल
वणमेतदुदकइत्यादिनोक्तयोर्लवणोदकयोःसप्तमेपुरुषंसोम्यगन्धारेभ्यइत्यादिनोक्तयोःपुरुषगन्धारदेशयोःनवमेचापहार्षीत्स्तेयमकार्षीदित्यादिनोक्तयोःस्तेना
पहार्ययोश्चैक्यं स्तेनापहार्यदृष्टांतेहिस्पष्टएवज्ञानिनोनर्थःपरकीयब्रह्मत्वाभिमानीहिस्तेनः नतुविद्यमानब्रह्मत्वाज्ञानीतिचेत्नशकुनिसूत्रादौदृष्टान्ते।
विद्यमानोपिभेदोनाऽतदितिपदच्छेदप्रयोजकः तंविनैवतदुपपत्तेःघटदृष्टान्तस्तुननित्यत्वउपपद्यतइतिवैषम्यात् तथाहिजरादिरोगग्रस्तस्यतन्निर्मोके
स्वास्थ्येविश्रान्तिवज्जाग्रत्स्वप्नावस्थयोःकरणव्यापारजनितश्रमापनुत्तयेजीवस्यदेवतात्मकस्वरूपेवस्थानमित्यस्मिन्नर्थेशकुनिसूत्रदृष्टांतइत्यन्यथैवोपप
तेः स्वमपीतोभवतीतिश्रुतेः ननुब्रह्मणिस्वशब्दोनजीवाभेदाभिप्रायःकिन्त्वात्मीयत्वार्थःस्वातंत्र्याभिप्रायोवास्वातंत्र्यात्स्वइतिप्रोक्तइत्यागमात् अपीतोभवती
त्यस्यापितिरोहितःसन्प्राप्तोभवतीत्येवार्थः नत्वभिन्नइतिअपेरपिधानेइणश्चगतौनिष्ठायाःकर्त्तरिशक्तेःक्लृप्तत्वात्ऐक्येयोगरूढ्योरभावाच्चेतिचेत् नस्वशब्द।
स्यस्वरूपेमुख्यस्यार्थान्तरपरत्वेगौणीलक्षणयोरन्यतरापत्तेःअभेदेयोगरूढ्योरभावेपिउपसर्गप्रकृतिप्रत्ययपर्यालोचनयालब्धस्वरूपप्राप्तिरूपार्थस्याभेदेपर्यवसाना

णस्यसाधर्म्येणविवक्षितत्वात् नभेदांतर्भावेनसाधर्म्यंतथासतिस्वरूपत्वासंभवादितिभावः ननुजीवःप्राणमाश्रयतइतिश्रुतावुक्तंस्वरूपावस्थानंकथमुच्यतेत।
त्राह स्वमपीत इतिप्राणपदेनब्रह्मोक्तंसतासोम्यतदासंपन्नः स्वमपीतइतिश्रुतेःस्वाप्ययादिति न्यायाच्चतस्यजीवस्वरूपत्वंमुख्यस्य।लाघवात्शक्तस्यार्थांतरप
रत्वेस्वीयादिपरत्वेपर्यवसानादितिसंस्कारावस्थाप्राप्त्यनुकूलव्यापारोपि पूर्ववसितेरर्थः जगतःप्रभवाप्ययोरितिप्रयोगात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तावस्थाफलभागित्वेस्वमित्यस्यकर्मतात्तिरोहितगतेस्तदर्थत्वेपिउक्तप्राप्तेरिवगतेरप्यौपाधिकत्वेनसंभवादुक्तप्राप्तावेवतिरोधानपर्यवसानाच्चनक्षतिः भेदपरेणाजीवमनूद्यता
त्विकलक्षणब्रह्मात्मकतत्त्वस्यपरेणाविरोधः स्वरूपार्थकस्वशब्दविरोधः अन्यथासाधनविशेषेण अन्यथोपपत्तेरितिजललीनलवणसाधनविशेषोपलभ्यत्वसा
धर्म्येणदृष्टांतः पुरुषदृष्टांतइति उपदेशोत्तरमेवोहापोहेनपथागंधारदेशोज्ञायतेतथाब्रह्मसंशेदृष्टांतः अनृतदृष्टांतेनअनृताभिसंधोनृतेनात्मानमंतर्धायपरशुंतप्तम्

अतएवसेकार्थत्वेअपीतइत्यस्यभवतेश्चाकर्मकतयाश्रुतद्वितीयायोगः अश्रुततृतीयाकस्यनमितिनिरस्तम् अतएवयथास्मिन्नाकाशेश्येनोवासुपर्णोवाविपरि
पत्यश्रांतःसंहत्यपक्षौसंलयायैवध्रियतेएवमेवायंपुरुषइतिसुषुप्तिसमयेश्रुत्यन्तरेभिन्नश्येनीडदृष्टांतोक्तिरितिचनिरस्तम् सर्वसाम्यस्यदृष्टांततायामतन्त्रत्वा
त् नचप्राज्ञेनात्मनासम्परिष्वक्तइतिसुषुप्तिविषयभेदश्रुत्यात्वन्मतेपिभेदपरेणसुषुप्त्युत्क्रान्त्योर्भेदेनेतिसूत्रेणात्यक्षेपिजागरणइवसुषुप्तावप्याविद्यकजीवब्रह्म
भेदस्वीकारेणविरोधइतिवाच्यम् यतोजाग्रत्त्वप्रयोरिवस्फुटतरविज्ञेयोनास्तीत्यभिप्रायेणस्वरूपप्राप्त्युक्तिःनतात्यंतिकाभेदाभिप्रायेणअन्यथासुषुप्तिसुक्त्योरविशेषापत्तेः
यदिसज्जगतोमूलंतदाकथंनोपलभ्यतइत्याशङ्कायांविद्यमानमपिवस्तुनोपलभ्यते अन्यथातूपलभ्यतइत्यंसमर्थस्पष्टीकर्तुंलवणोदकदृष्टांतइतितत्राप्यन्यथोपपत्तेःय
द्येवंलवणमिवेन्द्रियैरनुपलभ्यमानमपिजगन्मूलंसदुपायांतरेणोपलब्धुंशक्यतइतितस्यैवोपलम्भेकउपायइत्याशङ्कायामाचार्यवान्पुरुषोवेदेत्युपायंवक्तुंगान्धारपु
रुषदृष्टान्तइति तत्राप्यन्यथैवोपपत्तेः तथाचाचार्यवान्पुरुषोविद्वान्येनक्रमेणसतासम्पद्यतेसक इत्याशङ्कायांसत्याभिसन्धस्यार्थप्राप्तिरनृताभिसन्धस्या
नर्थप्राप्तिरितिवक्तुंस्तेनास्तेनदृष्टांतइतितत्राप्यन्यथैवोपपत्तेःनचसत्यानृतदृष्टान्तेनपूर्वैरपहार्षीत्स्तेयमकार्षीदित्युदाहरणायोगः तदुपपादकत्वेनपृथग्दृ
ष्टांतत्वाभावात् ननुद्वितीयखण्डेनानात्ययानांवृक्षाणांरसानित्यादिनोक्तानांनानावृक्षरसानांतृतीयेइमाःसोम्यनद्यइत्यादिनोक्तयोर्नदीसमुद्रयोश्चैकत्वंव
क्तुंनहिशक्यम् नहिनानावृक्षरसाअन्योन्यभेदत्यागेनप्राक्सिद्धेनमधुनासैक्यमापद्यंसेनवाप्राग्भेदभ्रांतिविषयाःपश्चात्तदविषयाःकिंतुतत्रवइवपरंअन्योन्यभिन्नाएवप्रा
गसिद्धंमधूत्पादयन्ति नचेदंदार्ष्टान्तिकानुगुणम् नदीसमुद्रदृष्टान्तेपिकिंनदीसमुद्रावयविनोरैक्यम् किंवातदवयवजलाणूनाम् उतद्रव्यांतरारम्भः ना
द्यद्वितीयोमाषराशौप्रक्षिप्तमाषतदवयवानामिवक्षीरेप्रक्षिप्तनीरतदवयवानामिवचान्योन्यमिश्रीभावेपिप्राग्भिन्नानांपश्चादप्यैक्यायोगात् तृतीयेतुभेदएवएवंदार्ष्टांतिकान
नुगुण्यंचेतिचेत् नस्फुटावच्छेदकविरहेणस्पष्टभेदाभावाभिप्रायेणवृक्षरसादिदृष्टान्तानामुपात्तत्वेनदृष्टान्तेवास्तवभेदाभेदयोरौदासीन्येनत्वदुक्तदूषणगणानामगणनीयत्वा

तिगच्छतिसदह्यतेथहन्यतइत्यादिनादृत्युदाहरणायोगःपुरुषंसोम्योतहस्तगृहीतमित्यादिपूर्ववाक्यमयुक्तं।तदुपपादकत्वेनपदितस्यकर्त्ताभवतिततएवानृतमात्मानंकुरुतेइत्यंतवाक्यं
विनास्तेयंनकृतमित्यस्यानृतस्यासघट्टत्वेनपृथग्दृष्टांतत्वाभावादितिअनृताभिसंधप्रयुक्तवंधे नसाधर्म्येणास्तेनःसंसारिणांसत्यादिसंदुत्वप्रयुक्तमुक्त्यासाधर्म्येणास्तेनएवज्ञानि
नांदृष्टांतइतिभावः स्फु टावच्छेदकेति अहंकारोपाधीत्यर्थः स्पष्टभेदाभावाभिप्रायेणद्र[illegible]विषयभेदाभावेनसाधर्म्येण॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूक्ष्मोपाध्यवच्छिन्नस्याहंकारोपलक्षितस्यतद्विलयइत्यत्रापिसंबध्यतेसूक्ष्मोपाध्यभावेइतितदर्थः महोपाध्यवच्छिन्नस्याविद्योपलक्षितस्यतद्विलये अविद्याविरहे संभावनेतिजीवब्रह्मस्वरूपयो
रैक्यभावनेत्यर्थः संपद्येत्यस्यसंपद्यामहइत्यस्यसत्संपत्तेर्जीवस्वरूपाभिन्नब्रह्मस्वरूपेस्पष्टभेदाभावस्यज्ञानपूर्वकत्वाभावादहंब्रह्मेतिज्ञानपूर्वकत्वाभावात् ननुनविदुः सतिसंपद्यामहइत्यनेनस
त्संपत्तेरज्ञानत्वमुक्तंतर्हिचनोक्तज्ञानाभावलाभइतिचेन्नसतिसंपद्यामहइत्यस्यस्वमपीतोभवतीत्येकवाक्यतयास्वाभिन्नेसतिसंपद्यामहइत्यर्थात् उक्तस्वरूपभेदाभावाज्ञानोक्तावोक्तस्वरूपात्म

वत्ता

अतएवसतोभेदस्याज्ञानमात्रेदृष्टान्तइतिनिरस्तंभेदसत्तायामौदासीन्यात् नचैवमस्फुटभेदविषयत्वस्यात्यंतिकाभेदेनुपयोगः सूक्ष्मोपाध्यवच्छिन्नस्यमहोपा
ध्यवच्छिन्नैक्यवत्तदवच्छिन्नस्यापितद्विलयेऽनवच्छिन्नैक्यमितिसम्भावनाबुद्धिजननद्वारोपयोगित्वसम्भवात् अतएवताःसमुद्रात्समुद्रमेवापियंतिससमुद्र
एवभवतीत्यत्रप्रकृतनदीकर्तृकस्यसमुद्रभवनविधानेसुवर्णकुण्डलंभवतीतिवत्ताःसमुद्रएवभवंतीतिव्यपदेशःस्यात् अतोनद्योनियतजलराशिरूपात्समुद्रात्स
मुद्रंगच्छंतितंप्रविशंतिचसमुद्रस्तुसएवनैतासांसमुद्रत्वमितिवासससमुद्रएवनतुनदीत्वंप्राप्नोतीतिवार्थःसतोप्यन्योन्यभेदस्याज्ञानएवैमौदृष्टांतौ अतएवनानारसवाक्येदार्ष्टां
तिकेएवमेवखलुसोम्येमाः सर्वाःप्रजाःसतिसम्पद्यनविदुःसतिसम्पद्यामहइतितइहव्याघ्रोवेतिनदीसमुद्रवाक्येचदार्ष्टांतिकेसतआगम्यनविदुःसतआगच्छामहइतितइ
हव्याघ्रोवेतिसतोभेदस्याज्ञानेनैवानर्थउक्तइतिनिरस्तम् स्पष्टभेदविषयताभावाभिप्रायेणदृष्टान्तत्वात् यच्चभेदाज्ञाननिबन्धनव्याघ्रादिरूपानर्थपराश्रुति
रितितन्नसतिसम्पद्येत्यस्यासन्नत्वान्नविदुरित्यनेनसत्सम्पत्त्यज्ञानमुच्यते नतुभेदाज्ञानं तथाचसत्सम्पत्तेर्ज्ञानपूर्वकत्वाभावान्नत्तद्वासनयातत्तद्व्याघ्रादिभा
वएवभवतीत्येतत्परत्वात् तस्मादृष्टांतवर्याणांभेदेतात्पर्यहानितः एतेषामनुसारेणच्छेदोनातदितिस्फुटम् नन्वाद्यखण्डेस्वप्नांतंमेसोम्यविजानी
हीतिस्यात् स्त्रशङ्कानास्यदसुषुप्तिनिदर्शनेनचतुर्थेचास्ययदेकांशाखांजीवोजहातीत्यादिनाऽन्वयव्यतिरेकोक्त्वा अष्टमेचपुरुषंसोम्योपतापिनमभि
त्यादिनास्यात् स्त्रशङ्कानास्यदमरणनिदर्शनेनेश्वराधीनत्वस्योक्तत्वादत्रदित्येवच्छेदोयुक्तइतिचेत् नस्वप्नांतमित्यादेः सुषुप्त्यवस्थायामेवजीवा
त्वविनिर्मुक्तंस्वदेवतारूपंदर्शयिष्यामीत्यनेनाभिप्रायेणोद्दालकेनावतारितत्वेनेश्वराधीनत्वपरत्वाभावात् जलादुत्थितानांवीचीतरङ्गफेनबु
द्बुदादीनांपुनस्तद्भावंगतानांविनाशोदृष्टोजीवानांप्रत्यहंस्वरूपतांगच्छतांमरणप्रलययोश्चनाशाभावः कथमित्येतदाशङ्कायांतत्परिहारत्वेनो
क्तस्यवृक्षशाखानिदर्शनस्यजीवाधिष्ठितंशरीरंजीवतितदपेतंचम्रियतेनतुजीवोम्रियतइत्येतत्परत्वात्॥ ११ कविशेषणाज्ञानस्यैवविवक्षितत्वात् अथवा
हंकारानुपहितरूपेणासत्त्वाप्यापितादृशरूपंनविदुः सुतरामनुपहितसद्रूपोहमितिनविदुरित्यर्थस्यविवक्षितत्वात् वस्तुतःसतिसंपद्यनविदुःसतिसंपद्यामहइत्या
स्यसुषुप्तिकालीनोक्तभेदाभावरूपसंपत्तिंप्राप्यापिसतिब्रह्मणिसंपद्यामहेअभिन्नावयमितिनविदुरहंब्रह्मेतिनविदुरित्यर्थःपरंज्योतिरूपसंपद्येत्यत्रैकेपिसंपदःप्रयोगात् अ
तएवयथाहिरण्यनिधिनिहितमित्यादिसर्वाःप्रजाअहरहर्गच्छंत्योपिब्रह्मलोकंनविदंत्यनृतेनहिप्रत्यूढाइत्यत्रस्पष्टोयमर्थःरूपमिति।सोयस्पष्टभेदाभाववत्त्वेनेतिशेषः॥ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रक्रांतेति अस्य सोम्य महतो वृक्षस्येत्यादिना प्रक्रांतेत्यर्थः परत्वाभावेनेति शाखासमभिव्याहारात् मोदमानस्तिष्ठत्यस्य पदे कांशाखां जहात्यथ साशुष्यति सर्वं जहाति सर्वः शुष्यती
त्यनेन मोदमानस्याशोषणोक्तेश्चासांसारित्वं नहि च्छेदनाद्युत्तरशोषणकाले वृक्षस्य जीवसम्बन्धो येन शुष्यद्वृक्षसम्बन्धेन जीवस्यैव शोषणमुच्येत मोदमानत्वं तु जीवसम्बन्धादचेतने
पि प्रयोगार्हं तथा चानेकजीवपदानां प्रसिद्धसंसार्यर्थकत्वत्यागो न युक्त इति भावः एषोणुरिति। ननु मुंडके एषोणुरात्मेत्यात्मन्यादेशाद्योगेऽणिमशब्दस्यैवेशे प्रयोगादीश एव वक्तुं
योग्यस्थाणिमशब्दो युक्त इति चेन्न अणुशब्दप्रतिपाद्येऽणिमशब्दो न प्रयुक्तः श्रुतावित्युच्यते प्रक्रांते णिम इत्यस्य धानायां प्रयोगे वीजाभाव इति वा आद्ये एषोणुरित्यादि अंत्ये तु व
टवीजे दृश्यमानधानानां बहुत्वेनाणव इत्युक्तावपि न्यग्रोधोपादानत्वे जगन्मूलीभूतब्रह्मण एकस्य दृष्टांतत्वे च बहुत्वानुपयोगादेकवचनं एकस्याप्यणुभावोपहितस्यैवोपादानता
न तु स्थूलरूपेण विकृतस्येति ज्ञापनायाणुभावाभिन्नत्वेन धाना निर्देशः उक्तज्ञापनमप्यविकृतब्रह्मण उपादानत्वज्ञापनाय पुंलिंगं तु उक्तभावप्रत्ययानुरोधादिति भावः पर

जीवापेतं वाव किलेदं शरीरं म्रियते न जीवो म्रियत इति वाक्यशेषात् यथा सोम्योपतापिनमित्यस्यापि आचार्यवान् विद्वान्केन क्रमेण सत्संपद्य
त इत्याशङ्कायां तत्क्रमदर्शनपरत्वेनेश्वराधीनत्वे तात्पर्याभावात् यत्तु चतुर्थे जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठतीत्यत्र जीवश
ब्द ईश्वरपरः मोदमान इति संसारिणः पृथगुक्तेरिति तन्न मोदमान इत्यस्य दृष्टांतत्वेन प्रक्रांतवृक्षविशेषणत्वेन संसारिपरत्वाभावेन जीव इत्यत्र श्रुता
र्थत्यागायोगात् यच्च पञ्चमे एतस्यैव सोम्यैषोणिम्न एवं महान्न्यग्रोधस्तिष्ठतीत्यत्राणिमशब्दः सूक्ष्मेश्वरपरः स य एषोणिमैतदात्म्यमिदं सर्वमिति इहैव
श्रुतावीश्वरे तस्य प्रयोगान्न तु धानापरः तासां किमत्र पश्यसीति अण्व इवेमा धाना इति भावप्रत्ययरहितेन स्त्रीलिंगेन बहुवचनांतेन इवशब्दशिरस्केन अणुश
ब्देन निर्दिष्टतया तद्विपरीताणिमशब्दानर्हत्वाच्चेति चेति तन्न एषोणुरात्मेत्यत्र भावप्रत्ययरहितप्रयोगविषयेपीश्वरे एषोणिमा इति प्रयोगदर्शनेन धानास्तु तथा
वक्तुं शक्यत्वात् न च तर्हि न निभालयस इत्युक्तादृश्यत्वायोगः अनुभूतायां धानायामेवं महान्न्यग्रोधस्तिष्ठति स तु त्वयाऽनभिव्यक्तत्वान्न ज्ञायत इत्येवंपरत्वात् ननु या
द्यष्टमे विदुषो ब्रह्मप्राप्तिमात्रं विवक्षितं तद्यथास्य वाङ्मनसि सम्पद्यत इत्यादि तेजः परस्यां देवतायामित्यंतमेव वाक्यं स्यात् यावन्न वाङ्मनसि संपद्यत इत्यादि व्यर्थं स्यादिति चे

मतेवटवीजधानास्थत्वेन नियंतृत्वादियुक्तस्येशस्य सूक्ष्मतायां प्रकृतवाक्यतात्पर्यं यं वै सोम्येत्यादौ यमणिमानं न पश्यसि एतस्य वटधानास्थस्य कार्यं न्यग्रोध इत्याद्या
र्थकत्वसंभवात् तत्र न्यग्रोधमात्रस्येशजन्यत्वोक्तिर्व्यर्था श्रद्धत्स्वेत्यप्यसंगतं तत्रासंभावनाविरहादिति वोध्यं न चैवं न्यग्रोध इत्यनेन सकलजीवरूपो नियम्योर्थो वोध्यते न्यग्भावे
न रुध्यते सा वीशेनेति व्युत्पत्तेरिति वाच्यं रूढित्यागस्यायुक्तत्वात्। अदृश्यत्वायोग इति अणिम्नातां न निभालयस इत्यत्राणिमशब्देनापिधानाया वाच्यत्वात्तस्याश्च किंपश्यसीत्यादिनां दृ
श्यत्वस्योक्तत्वात् पुनरदृश्यत्वोक्तिरयुक्तेत्यर्थः न ज्ञायत इति तथा च यं वै सोम्येत्यादेर्यमणिमानं न निभालयसे एषोऽणिमा एवं न्यग्रोधः दृश्यमानन्यग्रोधसदृशन्यग्रोधाभिन्नः एतस्य धानारू
पस्याणिम्नस्तिष्ठतीति तादृशाणिमनि तिष्ठति ननु सूक्ष्मधानामध्ये महान्यग्रोधाभिन्नाणिमा कथं तिष्ठति तत्राह श्रद्धत्स्वेति संस्काररूपाणिमावस्थायाः सूक्ष्मायामपि धानायां स्थितिसंभवदी

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषः सत्संपत्युत्तरंसंसारमोक्षरूपः अन्वयव्यतिरेकाभ्यां वागाद्यसंपत्तौविशेषज्ञानात् सद्संपात्तवागादिसंपत्तौविशेषज्ञानाभावेनसत्संपत्तिरितिवागादिसंपतिरेवसंपत्तौ
क्रमइत्यस्ययावदित्यादिनाज्ञापनेननतद्यर्थमित्यर्थः।जीवएवेति।अनश्नन्नन्यइतिश्रुतेः असंभवादितितथाचतमेवेत्यादिवाक्यबोध्योनजीवः।उक्तवाक्यैक्यवाक्यतापत्तेःजगत्कर्तृत्वबो
धकभागेतदादिशब्दाभावादितिसिद्धांतवाक्यार्थः नचप्राणोत्यादितथाचयोगोपिनसंभवतिजीवयतीतिणिजर्थस्तुनश्रुतइतिभावः प्रवेशोक्तीतिजीवेनात्मनानुप्रविश्येतिप्रवेश
क्तीत्यर्थः परत्वादिति तथाचजीवस्यनामरूपयोःप्रवेशंविनातत्परिणामब्रह्मांडादिषूपादानत्वासंभवात्प्रवेशोक्तिर्नव्यर्था पूर्वपूर्वभूतानुप्रविष्टस्यैवोत्तरोत्तरभूतोपादानत्वं

नलौकिकमरणेयः सत्सम्पत्तिक्रमः सएवविदुषोपिविशेषस्तुज्ञानाज्ञानकृत इत्यमुमर्थं प्रतिपादयितुं दृष्टांते न्वयव्यतिरेकाभ्यां सत्सम्पत्तिक्रम इति वै
यर्थ्याभावात् नचतत्सत्यंस आत्मेत्यत्रआत्मशब्देनअणिमशब्दोक्तेश्वरएवगृह्यतेनजीवः यदाप्नोतियदादत्तेयच्चात्तिविषयानिह यच्चास्यसं
ततोभावस्तेनात्मेतिनिगद्यतइतिवचनादितिवाच्यं कतमआत्मेत्यादावात्मशब्दस्यजीवेप्रसिद्धत्वात् वचनोक्तविषयात्तृत्वस्यजीव एवचस
म्भवात् तत्परिग्रहस्यैवोचितत्वात् यच्चतमेवैकंजानथात्मानमितिवाक्योक्तोनजीवः तद्वादिशब्दाभावादितिसिद्धान्तितम् तदात्मशब्दस्यन।
जीवेऽमुख्यत्वाभिप्रायेणकिंतुप्रधानादौ जीवस्यत्वात्मत्वेपरिच्छिन्नतयाजगत्कर्तृत्वासम्भवाद्युदासइत्येवंपरंजीवेनात्मनेतिसामानाधिकरण्या
नुपपत्तेश्चनचजीवशब्देनेश्वरएवोक्तः रूढिपरित्यागेकारणाभावात् रूढेश्चक्लृप्तत्वात् अहंहिजीवसंज्ञइत्यादेश्चाभेदपक्षेपिसम्भवात् नचप्रा
णधारकत्वमीशमात्रवृत्तिजीवसाधारणत्वात् नचत्रिवृत्करणपूर्वकनामरूपव्याकरणस्यजीवेऽसम्भवः अस्मदादावसम्भवेपि अत्रिवृ
त्कृतभूतारब्धलिङ्गशरीराभिमानिनोहिरण्यगर्भस्यनामरूपात्मकप्रपञ्चव्याकरणसम्भवात् नचतर्हिपुनर्जीवप्रवेशोक्त्ययोगः तत्तेजऐक्षत
तताआपऐक्षन्त इमास्तिस्रोदेवता इतिपूर्वमेवचेतनत्वसिद्धेरितिवाच्यं अव्याकृतभूतसृष्टेःसाक्षात्कारणत्ववद्ब्रह्माण्डादिसृष्टौनसाक्षात्कारणता किंतु
स्वाभिन्नजीवद्वारेणेत्येवंपरत्वात् किंत्वेकमेवाद्वितीयमित्युपक्रमात् नश्येनादिदृष्टांतानुसारादतदितिपदच्छेदोयुक्तः एकविज्ञानेनसर्वविज्ञानप्रति
ज्ञानविरोधात् ब्रह्मजीवैक्यस्याप्रसक्तत्वेननिषेधानुपपत्तेश्च ॥१॥ हि आकाशवाय्वादिसृष्टंतदभिध्यानादेवतुतल्लिंगात्सइतिन्यायात्तत्परिणामिकारणावच्छे
देनैवपरिणामानामुपादानचित्सम्बन्धस्यसंभवाच्चकुलालादेरपिकपालाद्यवच्छिन्नचिन्मात्रात्यापत्तसाक्षिरूपेणैवघटादौनिमित्तोपादानत्वादितिभावः।संज्ञामूर्तीत्याद्यधिकर
णेजीवेनात्मनाउपविश्येत्यादौजीवस्यैवप्रवेशान्वयः।नामरूपव्याकर्तृत्वान्वयस्तुत्रिवृतंकुर्वतईशस्यैवतयोरभेदाच्चसमानकर्तृकत्वार्थकक्त्वाप्रत्ययइत्युक्तत्वेपिसंभवमात्रेण
जीवस्यैवोभयत्रान्वयउक्तः अथवासाक्षाज्जीवनैरपेक्ष्येणजीवद्वाराजीवसापेक्षतयातथाचजीवेनेत्यादिश्रुतौहिरण्यगर्भजीवस्यव्याकर्तृत्वाप्रतीतावपिश्रुत्यंतरेयाप्रतीत्यातस्यापि
ब्रह्मांडादिव्याकर्तृत्वमितिभावः।एवंचसर्वाणिहवाइमानिभूतानिआकाशादेवसमुत्पद्यंतेआकाशोवैनामव्यपरूपयोर्निर्वहितेत्यादिश्रुतीनांनविरोधइतिध्येयं॥ २ ६ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रैक्येनाध्यस्तत्वादित्यादि। ननु त्वन्मतेपि ममदेह इत्यादिप्रत्ययेन देहत्वादिरूपेणानैक्याध्यासः किंतु मनुष्यत्वादिरूपेणैव एवं मम चक्षुरित्यादिप्रत्ययात्काणत्वादिनैवाध्यासः यत्किंचित्स्वा
तंत्र्यमपि न जीवस्येति तदीशलक्षणमेव स्वातंत्र्यं हि स्वभिन्नानधीनतया देहादिविनियोक्तृत्वं जीवस्तु स्वभिन्नस्येशस्याधीन एव तया च स्वामित्व स्वातंत्र्यरूपत्वाभावादैक्याध्यस्ते देहादौ स्वा।
मित्वाभावेपि न क्षतिरिति चेन्न स्वत्वाननुगमात् ईशे हि तदन्यानधीनत्वघटितस्वातंत्र्यं तच्च न जीवे तत्तज्जीवे तत्तज्जीवान्यानधीनत्वघटितस्यैव भावात् न चानधीनघटितस्य तस्येशनिष्ठ

न चेष्टापूर्त्तमन्यमाना वरिष्ठमित्यादाविव श्रुतितात्पर्यापरिज्ञानेन तद्देक आहुरसदेवेदमग्र आसीदित्यादाविवाऽनादिकुसमयेन वा देहेंद्रियादौ न्यतिस्वा
तन्त्र्यरूपस्यैश्वर्यस्य सर्वैरपि स्वात्मन्यभिमन्यमानत्वेन प्रत्यक्षेण वा प्रसक्तिरैक्यस्येति वाच्यम् ऐक्यतात्पर्यस्य प्रमितत्वेन मुसमयत्वस्य व्यवस्थापि
तत्वेन च तात्पर्यापरिज्ञानकुसमयप्राप्तत्वस्य वक्तुमशक्यत्वात् ऐक्यलिङ्गस्याप्यभिमानिकत्वाभावेन तेन चेत्प्रसक्तिः तदा निषेद्धुमशक्यतैव देहेंद्रियादीनां जी
वस्यैक्येनाध्यस्तत्वात्तान्प्रतिस्वातन्त्र्याभिमानस्य सार्वलौकिकस्य वक्तुमशक्यत्वात् यत्किञ्चित्प्रतिस्वातन्त्र्यस्येश्वरलक्षणत्वाभावाच्च एतेनैकमेवाद्वि
तीयमिति समाभ्यधिकराहित्यस्योपक्रमादैतदात्म्यमिति तस्योपसंहारात् अतत्त्वमसीति नवकृत्वोभ्यासात् शास्त्रं विनाशास्यैक्यगम्यस्येश्वरभेदस्याप्रस।
क्ततयाऽपूर्वत्वात् अथ सम्पत्स्य इति फलश्रवणात् येनाश्रुतं श्रुतं भवतीत्यर्थवादात् शकुनिसूत्रादिदृष्टान्तै रुपपादनात् षड्विधतात्पर्यलिङ्गानि भेद
पराण्येवेति निरस्तम् एकमेवेत्यत्र समाभ्यधिकराहित्यमात्रेण भेदोपक्रमत्वाभावात् अभेदेपि तत्सम्भवात् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानवि
रोधात् द्वितीयाभावमात्रस्यैवोपक्रमात् अत एवाभ्यासोपसंहारावपि भेदविषयौ न भवतः अभेदे तु यथाऽपूर्वता तथोक्तम् फलार्थवादोपपत्ती नाम
भेद एव सम्भवाच्च तथा शास्त्रान्तरस्थिताभेदवाक्यानामुपासनाप्रकरणस्थितानां तूपासनापरतया नाभेदपरवाक्यविरोधः॥ तत्त्वमसिवाक्यार्थनि
रूपणम्॥ ३०॥ बृहदारण्यकस्थितस्य तु ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीतीति वाक्यस्यानुपासनाप्रकरणस्थतयाऽ
भेदप्रमापकत्वमेव न च तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति भेदपरवाक्यशेषविरोधः तत्रापि देवादि
षु प्रबुद्धं पुरुषं निर्धार्य स एव तदभवदिति ब्रह्माभेदपरत्वेन भेदपरत्वाभावात् न चात्र वाक्ये ब्रह्मण एव प्रकृतत्वान्नानेन जीवब्रह्मैक्यसिद्धिरिति शङ्क्यम् यो
यो देवानामिति जीवपरामर्शिवाक्यशेषानुसारेण ब्रह्मपदस्य कार्यब्रह्मपरत्वात्॥ ऐस्य जीवनिष्ठत्वं नेति वाच्यमनधीनत्वस्य जीवेप्यनभिमन्यमानत्वादीशाधीनोहमिति राम॰ ३२५
सर्वैरपि स्वीकारात् किंच यत्किंचिदित्यादेरयमर्थः जीवे यत्किंचित्प्रतिस्वातंत्र्यमेव वाच्यं तदपि नेशस्वरूपस्य शुद्धस्य लक्षणं किंतूपहितस्य तथा च तत्त्वमस्यादौ तद्भेदबोधकत्वे स्वा
पितत्वदिष्टसिद्धिः अस्मत्संमतस्य शुद्धयोरैक्यस्यानुपमर्दात् भेदोपक्रमत्वाभावात्।तात्त्विकभेदोपक्रमत्वाभावात् अभेदेपि वास्तवाभेदेपि तथा च समाभ्यधिकराहित्यादपकृष्टानां सत्त्वा।
लाभेनातात्त्विकभेदप्रत्ययेपि न क्षतिः मात्रस्यैवेति। मुख्यार्थत्यागानौचित्यादिति भावः तदुपक्रमेत्यनुक्तत्वमुक्तम्॥श्रीः तर्केत्यादिः तत्त्वमस्यर्थनिरूपणम्॥ ३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मेत्येवोपासीतेत्यादि उक्तवाक्ये आत्मनउपासिधातुरूपशब्दमुपासनात्मकज्ञानंचप्रतिकर्मतावोध्यायेतिशब्देतिभाष्यादवुक्तंतद्दूत्यत्रक्तेपीत्यर्थः दृष्टांतदार्ष्टांतिकयोरात्मस्वरूप मात्रस्यप्रतिपाद्यतालाभायेतिशब्दइत्यपिवोध्यं पश्यन्नित्यादि। लक्षणाहेत्वोवित्यादिनाहेतौशतृप्रत्ययादित्यादिः स्मृतेरपीतिनविरोधइत्यत्रान्वेति उपहितयोरिति अंतर्या मित्वाहंत्वाद्युपहितयोरैक्याभावादंतर्यामिणोहंत्वाद्युपहितसर्वात्मस्वरूपत्वात् स र्वनाम्नाभिधानंनेतिस्मृत्यर्थः भूतपूर्वगत्यावाधितानुवृत्त्याहारीभूतवोधस्याहंत्वं॥

शुद्धब्रह्मपरत्वेचवोधनिमित्तस्यतस्मात्तत्सर्वमभवदितिसार्वात्म्यलक्षणफलकीर्त्तनस्यायुक्तत्वापत्तेः नचनामब्रह्मेत्युपासीतआदित्योब्रह्मेत्यादेशइत्यादाविति शब्दशिरस्कतयानामाद्यभेदाभाववदत्रापीतिशब्दशिरस्कतयाब्रह्माभेदाभावइतिशङ्क्यम् अनुपासनाप्रकरणस्थत्वेनाभेदाविवक्षायानामब्रह्मेत्यादाविववक्तुमश क्यत्वात् नचेतिशब्दवैयर्थ्यआत्मेत्येवोपासीतेत्यादाविवशब्दज्ञानयोःस्वाभाविकसकर्मकत्वप्राप्तौतन्निराकरणपरत्वेनोपयोगात् यच्चाहंशब्दोजीवांतर्यामिणिमुख्यः अहंमनुरभवंसूर्यश्चेति अंतर्यामिण्यहंशब्दप्रयोगात् सर्वांतर्यामिकोविष्णुःसर्वनाम्नाभिधीयतेएषोहंत्वमसौचेतिनतुसर्वस्वरूपतइतिवचनाच्चेति तन्नशास्त्र दृष्ट्यातूपदेशोवामदेववदितिन्यायेनवामदेवजीवचैतन्यस्यवस्तुतोब्रह्माभेदेनसूर्यादिभावस्योक्ततयांतर्यामिपरत्वाभावात् तद्योयोदेवानांप्रत्यवुध्यतसएवतदभवदिति पूर्ववाक्येतत्त्ववोधनिमित्तकब्रह्मभावस्यप्रकृततयापश्यन्नृतिपेदइत्यादेरपिवोधनिमित्तब्रह्मभावपरतयांतर्यामिपरत्वाभावात् स्मृतेरप्यसाधारणतत्तदात्मनिशक्ते एवश्यकतयातत्सहचारेणअंतर्यामिणिराशोहमित्यादिप्रयोगः नतुसर्वस्वरूपतइतिनिषेधस्यतूपहितयोरैक्याभावनिवन्धनत्वान्नविरोधः अतएवविशिष्टचैतन्यरूपेवाम देवेविशिष्टचैतन्यरूपमनुसूर्यादिभावोनसम्भवतीतिनिरस्तम् शास्त्रदृष्ट्योक्तत्वात् नचतर्हिशुद्धचित्यःभवमित्युत्तमपुरुषायोगः भूतपूर्वगत्यासम्भवात् नचा हंभूमिमददामार्यायेत्याद्ययोगः नहिचिन्मात्रंभूमिदात्रितिवाच्यम् उपहितचित्त्वमादायतेषामुपपत्तेः अहंनामाभवत्तस्योपनिषदहमित्यादेश्चताहृशो पासनापरत्वेनशक्तिनिर्णायकत्वाभावात् तस्मान्नांतर्याम्यभेदपरेयंश्रुतिः अंतर्यामिणिभेदाप्रसक्तेश्च नचनियम्यानन्त्यादिनाप्रसक्तिःएकस्मिन्न पिजीवेऽनेकावयवनियामकत्वस्यैकस्मिन्नपिराजन्येऽनेकदेहनियामकत्वस्यचदर्शनात् सयश्चायंपुरुषेयश्चासावादित्येसएकइत्यस्यापिनान्तर्यामैक्यपर ताब्रह्मविदाप्नोतिपरमित्यादिनाशुद्धस्यब्रह्मणःप्रकृततयातस्मिन्नुपाधिकृतभेदस्यतात्त्विकत्वप्रसक्तौतन्निराकरणार्थत्वेनैक्योपदेशोपपत्तेः नचैवंच्छान्दोग्ये यएषआदित्येपुरुषोदृश्यतेसोहमस्मीत्यत्रसएवैनान्ब्रह्मगमयतीतिभेदपरोत्तरवाक्यविरोधः तस्योपासनाप्रकरणस्थत्वेनाहंग्रहोपासनापरत याविरोधाभावात् नचोपासनाप्रकरणस्थितवत्वादैक्यासिद्धावनुपासनाप्रकरणस्थितादपितदसिद्धिःशङ्क्या अन्यशेषत्वस्यतत्प्रयोजकस्याभावात्॥ ५

प्रकारकस्याखंडाकारवोधपूर्वंभूतत्वेनेतिवार्थः उपहितचितमादायेतिउपहितचितोदात्मत्वेनतदुपस्थितिद्वाराखंडार्थत्वमादायेत्यर्थः ब्रह्मगमयतीति॥ एवदेवयथोब्रह्मपथएतेनप्रतिपद्यमानादमंमानवमावर्त्तंनावर्त्ततदतिशेषःअन्यशेषत्वस्यऐक्यान्यपरत्वस्यतत्प्रयोजकस्यैक्यासिद्धिप्रयोजकस्य॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतर्यामिभेदज्ञाननिंदनमितिनियम्यभेदेनांतर्यामीनानेतिभेदप्रसक्तौतन्निषेधपरपूर्ववाक्यस्यभेदनिंदयोपकारइतिभावः।तथाचासौमदन्यस्संतर्यामीअन्यः अहंमदंतर्यामीतुन
दन्यइत्युक्तवाक्यार्थः ज्ञानपरत्वादितिज्ञानबोधकपूर्वापरैकवाक्यत्वानुरोधेनोपासनाफलज्ञानलक्षकत्वमुपास्तेःस्वीक्रियतेअन्यथापूर्वापरवाक्यस्थवकुतरेषुज्ञानार्थकपदेषूपासन
लक्षणापत्तेरितिभावः यत्तुब्रह्मवाइदमग्रआसीदित्यत्रब्रह्मपदस्यकार्यब्रह्मपरत्वेतदाहुर्यद्ब्रह्मविद्ययासर्वंभविष्यंतोमन्यंतेकिमुतद्ब्रह्मेत्यादिपूर्ववाक्यासंगतिर्नहिकार्यब्रह्मविद्य

अथयोन्यांदेवतामुपास्तइत्युत्तरवाक्यस्यभेदज्ञाननिन्दापरतयातदनुसारेणपूर्ववाक्यस्योपासनापरत्वायोगात यत्तुब्रह्मशब्दोत्रबृंहणार्थइतिनपरब्रह्मेत्यसिद्धिः
अन्यथापूर्ववाक्येआत्मानमेवावेदित्यनेनैवब्रह्मेतिज्ञानस्यसिद्धत्वात् ब्रह्मास्मीतिव्यर्थमितितत्रआत्मशब्देनजीवचैतन्यमनूद्यबृंहितत्वाद्युपलक्षितब्रह्मचैतन्याभे
दविधिपरत्वेनसार्थकत्वात् तथाचस्मृतिरहंहरिःसर्वमिदंजनार्दनइत्यादिकापिसङ्गच्छते यत्तुअथयोन्यांदेवतामुपास्तेअन्योसावन्योहमस्मीतिनसवेदयथापशुरित्यत्रा
तर्यामिभेदज्ञाननिन्दनमितितन्नअन्तर्यामिणोऽप्रकृतत्वात् परद्वयलक्षणादेस्तात्पर्यानुरोधेनलब्धत्वात् यत्त्वत्रयोन्योदेवोऽन्यांविलक्षणांदेवतामुपास्तेअन्योसौपरमा·
त्माअहमस्मीतिनसवेदयथापशुरित्यर्थइतितत्तुच्छंव्यवहितान्वयदोषात् अहंशब्दसन्निहितान्यइत्यस्ययद्वत्यत्रनयनात् नचपस्ययेनार्थसम्बन्धइतिन्यायेनसन्निधाना
द्योग्यतायाः प्रबलत्वमितिशङ्क्यम् यथास्थितार्थसम्बन्धेप्युक्तक्रमेणयोग्यतासत्त्वात् नचेयंश्रुतिःस्वातन्त्र्येणान्यस्यज्ञाननिषेधिकाअन्यत्रप्रतियो
गिनिस्वातन्त्र्योपस्थापकपदाभावात् यत्तुकैश्चिदुक्तं उपास्तइतिश्रवणात्प्रयत्नसाध्यज्ञानविजातीयवृत्त्यंतररूपोपासनायाएवनिषेधोनतुज्ञान·
स्येत्युक्तं तन्न तद्योयोदेवानांप्रत्यबुध्यतेति पूर्ववाक्येनसवेदेतिनिन्दावाक्येचवेदनस्यैवनिर्देशात्मध्यस्थितोपास्तेरपिज्ञानपरत्वात् एवंमुण्डकेस
योहवैतत्परमंब्रह्मवेदब्रह्मैवभवति एतदपिवाक्यंब्रह्मपरमेव नचद्वितीयोब्रह्मशब्दोजीवपरएव तस्यजातिजीवकमलासनाद्यनेकार्थत्वात्
द्वेब्रह्मणी इत्यादौजीवेब्रह्मशब्दप्रयोगाच्च तथाचयःपरमंब्रह्मवेदसजीवएवभवति नतुपरंब्रह्मेत्यर्थः अतएवाद्योब्रह्मशब्दः परमत्वेनविशे
षितइतिवाच्यंजीवेब्रह्मपदप्रयोगसम्भवेपिप्रकृतेपरब्रह्मोपादानमेवोचितम् जीवभावस्याब्रह्मभावस्यचप्रागेवसिद्धत्वाब्रह्मज्ञानसाध्यत्वाभावात् एवंचा
र्थाद्वितीयब्रह्मभवनमपिपरमत्वविशेषितमेव यच्च ब्रह्मभवतीत्यस्यबृंहितत्वरूपब्रह्मत्वाक्रान्तोभवतीत्यर्थः संपूज्यब्राह्मणंभक्त्याशूद्रोपिब्राह्मणोभवेदि
तिवत् नहिशूद्रोपिपूजितब्राह्मणव्यक्तिर्भवतिकिंतुब्राह्मणत्वजात्याक्रांतइति तन्नपूर्वोक्तयुक्त्याप्रकृतेव्यक्त्यभेदस्यैवसम्भवेनदृष्टांतवैषम्यात्॥ ६ ॥

यासार्वात्म्यंतथाचतस्यकारणब्रह्मपरत्वमेवएवंचतत्सर्वमभवदितितुनफलोक्तिः किंतुब्रह्मणःपूर्णस्वरूपानुभवप्रयुक्तानंदोद्रेकात्सार्वात्म्योक्तिरितितत्तुच्छं।नहिकारण
ब्रह्मणःस्वरूपानुभवआनंदोद्रेकोवाकादाचित्कस्तयाचज्ञानेनाज्ञाननिवृत्त्यातत्प्रयुक्तपरिच्छेदनिवृत्तिरूपंसार्वात्म्यंहिरण्यगर्भरूपकार्यब्रह्मणएवेतिभाष्योक्तमेवयुक्तंकिमु
तद्ब्रह्मेत्यादेस्तुनविरोधः आत्मानमेवेत्यादिनाआत्मस्वरूपमात्ररूपब्रह्मज्ञानात्सार्वात्म्योक्तेरेतदुत्तरत्वेनब्रह्मपदस्यकार्यब्रह्मपरत्वेपिक्षत्यभावात्वैषम्यादिति॥ ६ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रह्मतत्त्वंतपोवेदइतिकोशादिनाब्रह्मशब्दस्यशुद्धात्मनिरूढेःसत्त्वाद्यौगिकत्वंहिकार्यकत्वमयुक्तमित्यपिबोध्यं।अस्यमहिमानमितिजुष्टंयदापश्यत्यन्यमीशमित्यादिः देहेंद्रियेत्यादिजुष्टंसंसारिभिःसेव्यमानंअस्यईशस्यमहिमानमेतदधिष्ठानकत्वेनएततत्सत्तयालब्धसत्ताकत्वादियुक्तंपश्यतिमिथ्यात्वादियुक्तंपश्यतीतियावत्ई शस्वरूपंचततोन्यत्विलक्षणंसत्यत्वाद्युपलक्षितंपश्यतियःसवीतशोकइत्यर्थःऔपाधिकभेदमितिब्रह्मैवसन्नित्यादिनाब्रह्मतादात्म्यापन्नस्यैवकर्तृत्वंप्रतीयतेतस्यच कर्मीभूतशुद्धब्रह्मभिन्नत्वमौपाधिकमस्तीतिभावःस्यानैक्येत्यादिगावोनृपाश्चएकीभूताःभ्रमरेणकीटएकीभूतइतिव्यवहारदर्शनादित्यर्थःननुगताःकलापंचदशप्रति।

नचास्यमहिमानमितिवाक्यशेषात्तदीयमहत्त्वप्राप्तिरेवनतुतद्भावइतियुक्तम् देहेंद्रियादिप्रपञ्चविलक्षणंयोवेदप्रपञ्चंतद्विभूतिंयोवेदसवीत शोकोभवतीत्येवंपरत्वात् नचयथानद्यःस्यन्दमानाइतिभिन्ननदीसमुद्रदृष्टान्तोक्तिरयुक्तेतिवाच्यम् स्वरूपभेदविलयनमात्रपरत्वेनदृष्टान्तोपपत्तेरुक्त त्वात्परात्परंपुरुषमुपैतिदिव्यमितिनदेशान्तरस्थब्रह्मप्राप्त्युक्तिपरातस्याःसगुणोपासनाफलत्वेनब्रह्मविद्याफलत्वासम्भवेनस्वरूपभूतब्रह्मप्राप्ति परत्वात् नचाद्वैतिमतेनित्यंब्रह्मभूतस्यापूर्वब्रह्मभावोक्तिरयुक्तेतिवाच्यम् कण्ठगतचामीकरादौभ्रांतिनिवृत्तिमात्रेणप्राप्तप्राप्तिरूपतयाफलत्वदर्शनात्न चारोपनिवृत्तेरशाब्दत्वम् श्रुतार्थापत्तिगम्यतयाशाब्दत्वोपपत्तेःब्रह्मैवसन् ब्रह्माप्येतीतिश्रुतिरप्यैक्यपरानचप्रथमब्रह्मपदस्यजीवपरत्वाभावेकर्तृकर्मभा वविरोधःसाक्षात्कारप्राक्कालीनौपाधिकभेदमादायतादृग्निर्देशोपपत्तेःपरेऽव्ययेसर्वएकीभवन्तीत्येतदप्यभेदमानम् नचगावःसायंगोष्ठेएकीभवन्तिए कीभूतानृपाःसर्वेवृष्णयःपाण्डवंशरैःकीटोभ्रमरेणैकीभूतइतिस्यानैक्यमत्यैक्यसादृश्यनिबन्धनैकीभावस्यगोनृपकीटभ्रमरादौदर्शनात् अत्रापितैरेवनि मित्तैर्गौणएकीभावइतिवाच्यं मुख्यत्वेसम्भवतिगौणत्वस्यायोगात् ब्रह्मैक्यमात्रपरत्वेनसकृच्छ्रवितस्यनानेकार्थपरत्वशङ्कापिनचैक्यस्यप्रागेवसिद्धतया अभूततद्भावार्थच्विप्रत्ययायोगःस्वगृहनिक्षिप्ताज्ञातनिधिवत्ततोव्यावृत्तत्वेनाभूतसमतयाच्विप्रत्ययोपपत्तेः नचपरेऽव्ययइतिश्रुतसप्तमीहानिरश्रुत तृतीयाकल्पनापत्तिश्चेतिवाच्यम् श्रुत्यंतरानुसारेणसप्तम्याअननुसरणीयत्वात् नचपरमंसाम्यमुपैतिपरात्परंपुरुषमुपैतीतिचपूर्वोत्तरवाक्य। विरोधःतस्यप्रागेवनिरासात् तथान्तर्याम्प्रकरणस्थंनान्योतोस्तिद्रष्टेतिवाक्यं अक्षरप्रकरणस्थंनान्यदतोस्तिद्रष्टृतिवाक्यंचैक्येप्रमाणं॥ ६ ॥

ष्ठादेवाश्चसर्वेप्रतिदेवतासुःकर्माणिविज्ञानमयश्चआत्मापरेऽव्ययेसर्वएकीभवंतीत्यत्रएकीभावस्यभेदाभावरूपत्वेकलादावनन्वयस्तथाचकलादयःसत्संप्रयुक्तक्रमे णप्रतिष्ठादिकंगताःसंतःपरेऽव्ययेस्यानैक्यरूपैकीभावंप्राप्ताःकर्माणिज्ञानप्रयुक्तनिवृत्तिरूपैक्यंप्राप्तानि।अथवाकलादेवकर्माणितादृशनिवृत्तिरूपैक्यंप्राप्तानि।विज्ञानम यस्तुभेदाभावरूपैक्यंप्राप्तइत्यर्थःतथाचसकृदुच्चरितैकपदस्यनानार्थबोधकत्वमावृत्त्यैवेतिवाक्यभेदस्तत्राह ब्रह्मैक्यमात्रेति।कलादिविज्ञानमयान्तःपरब्रह्मणिअ भेदंप्राप्नुवंतीत्येवार्थःप्रतिष्ठादिगतकलादेःकलाद्यवच्छिन्नसद्रूपेणापूर्वस्थितस्यज्ञानोत्तरंशुद्धसद्रूपैक्येनावस्थानादितिभावः॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

२ अ॰सि॰ टी॰उ॰ १९७

निषेधाच्चेति आर्त्तशब्दस्यमिथ्यार्थकत्वेननिषेधकत्वं आर्त्तियुक्तत्वेनदुःखयुक्तत्वेन आर्त्तियोगोदुःखयोगः विनश्वरमितियस्योभयंहविरार्त्तिमार्च्छेदित्यादौनाशार्थकत्वद
ष्टेरित्यादिःमिथ्येतिवेति अतइत्यस्यानुषंगेणातोब्रह्मणोविनाशीत्यर्थलाभेनब्रह्मणोखंडाकारवृत्त्यभिव्यक्तस्यैवब्रह्मान्यसर्वनाशकत्वात् ज्ञाननिवर्त्यत्वरूपमिथ्यात्वलाभःसा
मान्यतइतिननुद्वितीयाभावस्यभयाभावप्रयोजकत्वंनयुक्तं द्वितीयाभावस्यैवद्वितीयत्वादितिचेन्नांतोस्मिनहियन्मदन्यन्नास्तीत्यादौद्वितीयाभावस्यभयाभावप्रयोजकत्वमुच्यतेकिं
तुभयहेतुत्वेनयत्यत्प्रमाणसिद्धंतस्यकस्मादित्यनेनाक्षेपेकृतेतत्रहेतुरनात्ममिथ्यात्वंयन्मदन्यन्नास्तीत्यनेनोक्तंअधिकरणंविनानिषेधापर्यवसानेनयत्रयत्रमदन्यत्

नचातइत्यनेनप्रस्तुतंसर्वनियन्तारंपरामृश्यअन्योद्रष्टानास्तीत्युक्तेसर्वनियामकद्रष्टृंतरनिषेधआयाति नतुद्रष्टृसामान्यनिषेधः अस्मिन्ग्रामेअयमेवस
र्वनियामकोनान्यःपुरुषोस्तीत्यादावन्यशब्दस्यप्रस्तुतसदृशान्यपरतयाव्युत्पन्नत्वात् समानमितरच्छेनेनेत्यत्रइतरशब्दस्यपूर्वनिर्दिष्टसदृशपरत्वोक्ते
श्चेतिवाच्यम् अनेनह्येतत्सर्वंवेदेतिप्रतिज्ञातस्यएकविज्ञानेनसर्वविज्ञानस्यउपपादनार्थंअन्यत्वेनप्रतीतेनजीवेनाभेदबोधनात् अचेतनवर्गस्यातोन्यदार्त्त
मेतिनेतीतिनिषेधाच्चजीवब्रह्माभेदएववाक्यप्रमेयः दृष्टांतेत्वभेदस्याविवक्षितत्वात् त्वदुक्तप्रकाराश्रयणेबाधकाभावात् नचात्राप्यन्तर्यामिवाक्येआत्मनोन्तरः
यमात्मानवेदयस्यात्माशरीरंयआत्मानमन्तरोयमयतीतिपूर्ववाक्येनएषतआत्माअन्तर्याम्यमृतः अतोन्यदार्त्तमित्युत्तरवाक्येनचविरोधः तत्रपरमात्मनोन्यंचेतन
मङ्गीकृत्यतस्यार्त्तियुक्तत्वेनास्वातन्त्र्यस्यैवोक्तेरितिवाच्यम् पूर्ववाक्यस्योपाधिकभेदमात्रेणोपपत्तेः उत्तरवाक्येननचेतनान्तरस्यार्त्तियोगोविधीयतेकिंतु
एषोन्तर्यामीतेआत्मेतिजीवस्वरूपभूतादन्तर्यामिणोव्यतिरिक्तंसर्वमार्त्तंविनश्वरमितिवामिथ्येतिवाबोधनान्नविरोधशङ्का अतएवअक्षरवाक्येपि
एतस्यवा अक्षरस्यप्रशासनेगार्गिसूर्याचन्द्रमसौविधृतौतिष्ठतइत्यादिपूर्ववाक्येनविरोधइत्यपास्तम् किञ्चद्वितीयाद्वैभयंभवतीतिभेद
स्यभयहेतुत्वेननिन्दितत्वादप्यभेदएवोपनिषद्गम्यः नचास्यविरोधिनःसमानाद्भयंभवतीत्येवार्थः लोकेतादृशादेवभयदर्शनेनलोकसि।
द्धानुवादित्वात् पूर्वत्रतस्मादेकाकीविभेतिउत्तरत्रतस्मादेकाकीनरमतइतिश्रवणाच्चेतिवाच्यम् यन्मदन्यन्नास्तिकस्मान्नुविभेमीतिततएवा।
स्यभयंवीयायेतिश्रुतेःसामान्यतोद्वितीयमात्रदर्शनस्यैवभयहेतुत्वात् विशेषकल्पनायोगात् एकाकीविभेतीतिपूर्ववाक्येपरमार्थदर्शनरहितस्यतन्निमित्तभय
सम्भवात् एकाकीविभेतीत्युक्तम्॥

यद्यस्मसक्तंतत्रतन्नास्तीत्यर्थात् तथाचद्वितीयमात्रदर्शनस्यैवभयहेतुत्वादित्यत्रद्वितीयस्यविरोधिसमानतदितररूपस्यसत्त्वे
नज्ञायमानस्यैवप्रमाणसिद्धंभयहेतुत्वमित्यर्थःएतेनद्वितीयसामान्यस्यभयहेतुतत्त्वज्ञानादेरपिभयहेतुतास्यादित्यपास्तंनचैवंद्वितीयाद्वैभयमित्यस्यभयहेतुत्वेनमानसिद्धस्यै ३२७
वानुवादात्द्वितीयसामान्यनिंदापरत्वंनस्यादितिप्रकृतानुपयोगइतिवाच्यं द्वितीयपदस्यात्मभिन्नार्थकतयात्मभिन्नादेवभयंनत्वात्मनइतिभयहेतोरात्मभेदोक्ताभेदनिंदाद्वा
राअभेदस्तुत्याप्रकृतोपयोगात्। विशेषकल्पनायोगात्। विरोधिनःसमानाद्भयमित्यर्थकल्पनायाअयोगात्। विभेतीत्युक्तमिति॥

राम॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकाकी विरोधिसमानही नोपि विभेत्येव सत्यत्वेनज्ञायमानाविद्यातन्मूलकचिंतादिसंभवात् यदातु मदन्यन्नास्तीति निश्चितंतदा न विभेतीत्यन्वयव्यतिरेकयोर्ज्ञाप नायोक्तमितिभावः नास्तीत्युक्तमिति मदन्यन्नास्तीति निश्चयस्याभावे एकाकी अपि न रमते इतिज्ञापनायेति शेषः अतएव स द्वितीयमैच्छदित्यादिस्पष्टिरुक्ता आत्मेत्येवोपासीतेत्यादिनात्मनो द्वितीयशून्यस्य ज्ञेयत्वमुक्त्वा तदेतत्प्रेय इत्यादिनात्मभिन्नमिथ्यात्वानन्वयपूर्वकात्मज्ञानान्नितरां रमते इति सूचितमितिभा वः। अल्पार्थ केत्यादि अल्पमपि अंतरं भेदं कुरुते जानाति चेत्तदा तस्य भयमित्यनेन भेदसामान्यनिंदेतिभावः। एतस्यएतत्पदार्थस्य अनुक्तत्वादि ति। नच पदिन्यायेनोपस्थितएतत्पदार्थ एव प्रतियोगीति वाच्यं समानमितरत् श्येनेनेत्यादावपि श्येनेतरस्य सर्वस्य ग्रहणापत्तेरथनिराकांक्षाणां ग्रह

उत्तरवाक्ये तस्मादेकाकी न रमत इत्यत्र इष्टसंयोगजन्यरतेरेकाकिन्यभावात् एकाकिनो रतिर्नास्तीत्युक्तं ततश्चात तत्त्वज्ञविषयोक्तवाक्यानु सारेण तत्त्वज्ञविषयमध्यवाक्यस्य स्वार्थसमर्पणेनाप्युपयुक्तत्वात् तद्विरोध्यर्थपरत्वायोगात् यएतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भ यं भवतीति भेदनिन्दयाप्यभेदसिद्धिः नचैतस्मिन्निति श्रवणात्स्वगतभेदे निषेधोयं न भेदमात्रनिषेध इति शङ्क्यम् अल्पार्थकारशब्दस्वारस्याद प्यर्थकोसदस्वारस्यात् एतस्य प्रतियोगित्वेनानुक्तत्वाच्च भेदमात्रनिषेधपरतया तद्विशेषनिषेधपरत्वकल्पनायोगात् एवं एको देवः सर्वभूतेषु गूढ इत्यादिश्रुतिरप्येकत्वे प्रमाणम् नचांतर्याम्येकपरेयं श्रुतिः यतोवाइमानि भूतानि जायंते इत्यादाविव भूतशब्दस्य चेतनपरत्वादिति वाच्यम् दृष्टान्ता सम्प्रतिपत्तेः चेतनस्य जायमानत्वाद्ययोगात् भूतहिंसानिषेधवाक्य इव चेतनाधिष्ठितप्राणशरीरादेरेव भूतशब्दवाच्यत्वाच्च अतएवैक एवहि भूतात्मा भूते भूते व्यवस्थित इत्यादिश्रुतिरप्येवं यावन्मोहं तु भेदः स्याज्जीवस्य च परस्य च ततः परं न भेदोस्ति भेदहेतोरभावतः विभेदजनकेज्ञा नेनाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीत्यादिस्मृत्या भेदस्याविद्यकत्वप्रतीतेरभेद एव तात्त्विक इति गम्यते न चात्र भेदशब्दो मि त्रभेद इत्यादाविव वैमत्यार्थः तथा सति लक्षणापत्तेः॥ १ एणायोगात्तदितरतस्यैव साकांक्षस्य ग्रहणं तदा प्रकृतेपि ब्रह्मविदाप्नोति परमित्यादिना द्वितीया त्मनो विहितत्वेन तत्स्तुतये द्वितीयमात्रनिंदाया आकांक्षितत्वेन द्वितीयमात्रस्यैव प्रतियोगित्वं किंचारादिपदस्वारस्यविरुद्धमेतत्पदार्थप्रतियोगित्वं त्यक्ता पदि न्याये नैवोपस्थितपंचकोशानामेव ग्रहणं युक्तमन्यथातिसन्निहितस्यारपदार्थस्यैव प्रतियोगित्वापत्तेर्नहि पदिन्यायेनस्ववाक्योपस्थितस्यैव ग्रहणं युक्तं पदे जुहोतीत्यत्र एकहायन्यश्रवणात् एकहायन्या सोमं क्रीणातीति पूर्ववाक्यएव तच्छ्रवणात्। अंतर्याम्येकपरा अंतर्यामीन नानेत्येवंपरा न तु चेतनो न ना नेत्येवंपरा चेतनाधिष्ठितेति चिन्तादात्म्यापत्तेरित्यर्थः तथा च तादृशभूतसाधारतया निर्देशादेकदेवशब्दितशुद्धात्मभेदेपि शुद्धात्मा नाना नेत्येवंपरत्वं न व्याहतं के वलो निर्गुणइति वाक्यशेषात् लक्षणापत्तेरिति। वैमत्यत्वं विरुद्धमतित्वं तदपेक्षया लघुत्वेनान्योन्याभावत्वरूपाखंडधर्मस्यैवाभिदिधातुशक्यतावच्छेदकत्वमितिभा वः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ अ॰ सि॰ टी॰ ल॰ ३ ११८

अन्योन्याभावादेरिति घटवान् पटवतो भिन्न इत्यादौ विलक्षणार्थकभिदेः घटवत्त्वादिकं शक्यतावच्छेदकं पंचम्याव्यावृत्तत्वमर्थस्तथा च पटवद्व्यावृत्तघटवानित्यर्थ
इत्याशयेनादिपदमुक्तमन्यथा वैमत्यइव द्वैधीभावादावपि रूढ्यनापत्तेरिति भावः प्रागेव पूर्वोपायादौ सर्वत्रगमचिंत्यं चेत्यादिवाक्यैरेव तन्नत्क्षेत्रेति। शरीररूपक्षेत्रेत्यर्थः इ
दं शरीरं कौंतेय क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विद इति पूर्ववाक्येन शरीरवेत्तृरूपक्षेत्रज्ञस्योक्तत्वात् तमपहाय सर्वक्षेत्रज्ञे लक्षणा न युक्तेति भावः
परत्वेपीत्यपिनोक्तवाक्ये स्यापि जीवस्य गुणसंवृत्तरूपेणैव कर्तृत्वादिसंसारो गुणातीतरूपेण तु ब्रह्मैकमित्यत्रैव तात्पर्यमिति सूचितं उक्तवाक्ये सर्वक्षेत्रज्ञत्वेनेश एव क्षे॰
त्रज्ञ उक्तः बहुधनदत्वेन महाराज एव धनद इत्युक्तिवत् तथा च कुवेरे धनदपदरूढिवत् क्षेत्रज्ञ आत्मा पुरुष इत्यादि कोशात् भूरिप्रयोगाच्च शब्दानां जीवे क्षेत्रज्ञपदस्य

अन्योन्याभावादेरेव मुख्यत्वात् श्रुतार्थत्यागस्य चान्याय्यत्वात् क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेत्यादिस्मृतिरप्यत्र मानम् नच क्षेत्रज्ञं सर्वज्ञं मां
सर्वक्षेत्रेषु निद्धीत्यर्थः महाभूतान्यहङ्कार इत्याद्युक्त्वा एतत् क्षेत्रं समासेन सविकारमुदाहृतमित्यनेन यस्य पृथिवी शरीरमित्यादिश्रुत्येश्वरशरीरतयो
क्तचेतनाचेतनात्मकसर्वं क्षेत्रमित्युक्तत्वादिति वाच्यम् सर्वनियामकतया सकलक्षेत्रसम्बन्धस्य प्रागेव सिद्धेः पौनरुक्त्यापत्तेः तन्नत्वक्षेत्राधिष्ठातृत्वेन क्षेत्र
ज्ञपदवाच्यजीवाभेदपरत्वस्यैवोचितत्वात् अतएव क्षेत्राणि च शरीराणि बीजानि च शुभाशुभं तानि वेत्ति योगात्मा ततः क्षेत्रज्ञ उच्यते प्रकृतेश्च विकाराणां
द्रष्टारमगुणान्वितं क्षेत्रज्ञमाहुर्जीवं तु कर्त्तारं गुणसंवृतमित्यादिस्मृतौ क्षेत्रज्ञशब्दस्य सर्वान्तर्यामिसर्वज्ञपरत्वेपि प्रकृते तदसम्भवः जीवे सुप्रसिद्धत्वा
च्च न च शास्त्रस्थावेतिन्यायस्तस्यैकतराशास्त्रीयविषयत्वात् एवमन्यान्यपि वाक्यानि यथासम्भवमैक्ये योज्यानि तस्मादागम एवैको मानम् अहं ब्रह्मास्मी
त्याद्यनेकश्रुतिस्मृत्यर्थकथनम्॥ ३१॥ एवमनुमानमपि तत्र मानम् जीवाः परमात्मनस्तत्त्वतो न भिद्यन्ते आत्मत्वात् परमात्मवत् आत्मत्वं जातिरत्र हेतुः
तथा चाभेदहेतूच्छित्तिरेव प्रतिकूलस्तर्क इति चेत् न तत्त्वतोऽभेदेपि व्यावहारिकभेदेनैव व्यावहारिकजातेरनुच्छेदोपपत्तेः ज्ञातृत्वादित्यप्यत्र हेतुः जीवेउ
पधेये अन्तःकरणोपहितत्वेन तस्यासिद्धेरभावात् स्वव्यवहारे स्वभिन्नज्ञानानपेक्षत्वं वा हेतुः तवापि जीवस्य स्वाभिन्ननित्यज्ञानस्याबाध्यव्यवहारविषयत्वा
त् अबाध्यत्वमप्यत्र हेतुः न च जडे व्यभिचारः तत्र बाध्यत्वेन हेतोरेवाभावात् तात्त्विकभेदस्य सर्वत्रासम्भवेन व्यभिचारानवकाशाच्च॥ रूढिरव्याहतेत्याशयेनाह जीवे

सुप्रसिद्धत्वाच्चेति शास्त्रस्थावेति यववराहादिशब्दानां शास्त्रस्थेषु आर्येषु प्रसिद्धो दीर्घशूकसूकरादिरेवार्थो ग्राह्यो न तु म्लेच्छप्रसिद्धः प्रियंगुकाकादिः शब्दार्थो विप्लवपालनस्यार्थ
निमित्तकत्वादार्या हि वैदिका वेदार्थाविप्लुतिमिच्छंति म्लेच्छास्तु लौकिकव्यवहारमात्रमिति शास्त्रास्थावात्तन्निमित्तत्वादिति सूत्रार्थः श्रीः तर्कैरित्यादि अहं ब्रह्मेति निर्णयः ३१॥ श्रीः॥ शं॰
कते आत्मत्वमिति स्वाभिन्ननित्यज्ञानस्य स्वाभिन्नं साक्षिरूपं नित्यज्ञानं यस्य तादृशस्य परमते सति धर्मिण्युत्पत्तिनाशवान्योधर्मस्तदन्यधर्मस्य धर्मभेदो भेदप्रतिनिधिना विशेषेण १२९
धर्मधर्मिभावादिरिति स्वीकारात् साक्षिजीवयोरभेदः बाध्यत्वेन बाध्यत्वसंशयेन। अभावात् अनिश्चयात्। ननु व्यभिचारसंदेहः प्रतिबंधकोस्त्वत आह तात्त्विकभेदस्येति। असंभवेनानि

अनुग्रहादिति एकेनात्मना सर्वव्यवहारोपपत्त्या तत्र नानात्वे गौरवाच्चेति शेषः अपास्तमिति। भेदस्य प्रातीतिकत्वे व्यावहारिकभेदस्य तात्त्विकाभावे व्यावहारिकाभावे वा इष्टापत्तिरित्यपि बोध्यं चैत्राधिष्ठितानि चैत्रात्मस्वरूपाधिष्ठितानि चैत्रात्मस्वरूपान्यत्वं यत्संसारिस्वरूपं तदनधिष्ठितत्वमेवोक्तसाध्यं वाच्यं तथा च स्वमते प्रतियोग्यप्रसिद्धेराह चैत्रमात्रभोगेत्यादि। चैत्रीयाज्ञानकार्यदुःखाद्यवच्छेदकानि चैत्रस्वरूपगतदुःखाद्यवच्छेदकानीति वार्थः सर्वथानुपपत्तेरिति एकस्य सुषुप्त्यादिकाले सर्वेषां तदापत्तेः दृष्टिसृष्टीति। तस्य स्वे स्वप्नवदेकमनोविलासत्वेन।

नचैवं व्यावहारिकभेदव्यतिरेकोऽप्येवमेव साध्यतां जीवपरमात्मनोरिति वाच्यम् तत्र प्रत्यक्षविरोधस्यैव बाधकत्वात् श्रुत्यनुग्रहाद्याभाससाम्यापादनाप्रयोजकत्वान्नवकाशात् अतएव विमता जीवाः चैत्राततत्त्वतो न भिद्यन्ते जीवत्वात् चैत्रवदिति जीवैक्ये विमता जीवा वस्तुतो ब्रह्मणो न भिद्यन्ते वस्तुत्वात् ब्रह्मवदिति ब्रह्मजीवैक्ये च यदनुमानं तत्र व्यवहारतोऽपि न भिद्यन्त इत्यप्येवं साध्यतामित्याभाससाम्यमपास्तं एवं विमतानि शरीराणि चैत्राधिष्ठितानि शरीरत्वात् संमतवत् नचैतावता न जीवैक्यसिद्धिः चैत्राधिष्ठितत्वेऽपि अन्याधिष्ठितत्वसम्भवात् चैत्रमात्राधिष्ठितत्वे तु अन्तर्याम्यधिष्ठितत्वेन दृष्टान्ते साध्यवैकल्यापत्तिरिति वाच्यम् चैत्रमात्रसंसार्यधिष्ठितत्वस्य साध्यत्वात् चैत्रमात्रभोगायतनानीति वा साध्यम् नच भोक्तृत्वमन्तः करणविशिष्टस्य तच्च प्रतिशरीरं भिन्नं यद्यैकं शुद्धचैतन्यं तन्न भोक्तृ इति बाध इति वाच्यं भोक्तृत्वस्य विशिष्टवृत्तित्वेऽपि विशेष्यवृत्तित्वानपायात् नचैवं विमतानि शरीराणि चैत्रमनसैव युक्तानीत्याभाससाम्यम् मनसोऽप्यैक्ये व्यवस्थायाः सर्वथानुपपत्तेः श्रुत्यनुग्रहाननुग्रहाभ्यां विशेषाच्च दृष्टिसृष्टिपक्षे तदभ्युपगमाच्च आत्मा द्रव्यत्वापरजात्या नाना न विभुत्वादाकाशवत् नच प्रतिकल्पमाकाशस्य भेदेन साध्यवैकल्यं परिच्छिन्नत्वेन साधनवैकल्यं च आत्मत्वस्य परमाणुत्वादिवद्जातित्वेऽपि आत्मभेदसिद्ध्या चार्थान्तरमिति वाच्यं आत्मत्वाधिकरणं द्रव्यत्वापरजात्यैककालेनानान समानकालीनमूर्तमात्रसंयुक्तत्वात् गगनवदित्यत्र तात्पर्यात् पक्षविशेषणमहिम्ना च नार्थान्तरम् विमतो भेदो मिथ्या। एकस्यां दृशि कल्पितो वा भेदत्वात् दृश्यत्वाद्वा चन्द्रभेदवत् एकस्यां दृशि क्षणिकवादिकल्पितभेदवद्वा मिथ्यात्वं तु प्रागुक्तमेव नच कल्पिताकल्पितसाधारणभेदत्वासिद्धिः भेदे अकल्पितत्वस्यैवासिद्धेः अतएव चन्द्रस्य कल्पितद्वितीयचन्द्राद्भेदस्य सत्यत्वेन दृष्टान्ते साध्यवैकल्यं मुक्तेः संसारात् ब्रह्मणो अनृताद्भेदे च व्यभिचार इति निरस्तं नचैवमभेदो मिथ्या भेदत्वात् देहात्माभेदवत् इत्यादि सुसाध्यं शून्यवादापत्तेरुक्तत्वात् एवं विमता भेदधीर्मिथ्या भेदधीत्वात् चन्द्रभेदधीवत् नच ब्रह्मानृतभेदप्रतीत्यादौ व्यभिचारः तासामपि पक्षसमत्वात् आभाससाम्यस्य तात्त्विकत्वे प्रत्येतव्यत्वानुपपत्त्यैव निरासः॥

सर्वव्यवहारस्य वक्तुं शक्यत्वात् द्रव्यत्वापरजात्या नाना न। स्वसमानाधिकरणा या द्रव्यत्वन्यूनवृत्तिजातिस्तदाश्रयप्रतियोगिकभेदवत् यत्तदन्यः स्वं भेदः आत्मत्वाधिकरणं आत्मत्वजातिमान् एककाल इति उक्ताश्रयस्य समानकालीनं तद्भिन्नं यद्यत्तदन्यमिति साध्यं समानकालीनमूर्तमात्रेति स्वसमानकालीनयावन्मूर्तेत्यर्थः कल्पान्तरीयमूर्तसंयोगस्याकाशे विरहात्कालीनां तं भेदे। सर्वभेदेषु। असिद्धेरिति प्रातीतिकव्यावहारिकयोरेकजातीयत्वमित्युक्तं अभेदोऽभेदस्य रूपं तात्त्विकत्वे तात्त्विकत्वस्वीकारे प्रत्येतव्यत्वानुपपत्त्या दृष्ट त्वानुपपत्त्या आभाससाम्यस्य निरासः॥

महत्त्वतः उक्तविभुत्वात् यद्दुःखं यथाखं तथेदं तथाविमतं सावयवत्वेनेत्यादि सावयवत्वेनयत्साध्यवैकल्यं तन्नेत्यर्थः स्वांतः पदेनस्वावयवस्यैववाच्यत्वेनसाध्यवै-
कल्यमितिभावः। स्वांतः पदंनस्वावयवार्थकं किंतु तदन्यार्थकमित्याशयेनाह स्वांतरिति स्वावयवातिरिक्तस्य द्रव्यत्वव्याप्यजात्येत्यस्य पूर्वोक्तानुमानेनएव तस्यतात्व
र्यमितिभावः। एकयैवाकाशात्मादिव्यक्त्यासकालीनयावद्व्यवहारोपपत्तौ तत्कालेतन्नानात्वकल्पनेगौरवमितितर्कः संवित्चित्। स्वांतर्गणिकस्वाभाविकभे
दहीनेति संविदनुयोगिप्रतियोगिकभेदआकाशानुयोगिप्रतियोगिकभेदश्चेत्यन्यतरस्यतात्विकत्वेनाभाववतीत्यर्थः उपाधिमित्यादि प्रतियोग्यनुयोगिभिन्न
धर्मप्रत्यक्षमंतरेणाजायमानप्रत्यक्षविषयोक्तान्यतरवत्त्वादित्यर्थः प्रतियोग्यनुयोगिरूपधर्मप्रत्यक्षमंतरेणाजायमानप्रत्यक्षविषयभेदकघटपटादौव्य-
भिचाराद्भिन्नांतंयद्यदनुयोगिप्रतियोगिभिन्नधर्मप्रत्यक्षमंतरेणाजायमानप्रत्यक्षविषययद्भेदवत्तदनुयोगिप्रतियोगिकतादृशभेदस्यतात्विकत्वेनाभाववं
दिति सामान्यतो व्याप्तिर्बोध्या अथवाअजायमानांतंनहेतौप्रविष्टं किंतु तर्कज्ञापनार्थंव्याप्यवृत्तित्वेनोक्तान्यतरस्याभाववतीतिवासाध्यं साध्यवैकल्यं प्रतिक

अतएवविमतंतात्विकस्वान्तर्भेदशून्यंमहत्त्वतः यदेवं तत्तथा यद्दुःखं तथेदंततस्तथेत्यत्रगगनस्य सावयवत्वेननसाध्यवैकल्यं स्वान्तः
पदेन स्वावयवातिरिक्तस्योक्तेः एवंसंवित् स्वान्तर्गणिकस्वाभाविकभेदहीना उपाधिमन्तरेणाविभाव्यमानभेदत्वात् गगनवत् नच-
साध्यवैकल्यंनैयायिकदिशादृष्टान्तोक्तेः नचेच्छादेरपिघटपटाद्युपाधिभेदेनैवविभाव्यमानभेदतयाव्यभिचारस्तेष्वितिवाच्यम् इच्छा-
दीनामेकान्तःकरणपरिणामत्वेनतत्रापिसाध्यसत्त्वात् विमतोऽव्याप्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकोभेदः स्वसमानाधिकरणात्यन्ताभावप्रति-
योगीभेदत्वात् संयुक्तप्रतियोगिकभेदवत् विमतोभेदः केवलान्वय्यत्यंताभावप्रतियोगीपदार्थत्वात् नित्यद्रव्यवत् स्वरूपेणात्यंता-
भावप्रतियोगित्वेयथानतुच्छत्वंपारमार्थिकत्वाकारेणात्यंताभावप्रतियोगित्वेब्रह्मवत्सद्रूपतोपपत्त्यानयथार्थांतरंतत्प्रागुक्तम्॥ ६ ॥

त्यमाकाशव्यक्तिभेदादाकाशस्यतात्विकत्वेनोक्तान्यतरवत्त्वं विभाव्यमानभेदतयाविभाव्यमानइच्छाद्यंतराद्भेदोयत्रतादृशतयातथाचघटेच्छानपटेच्छेत्यादिव्यवहा-
रस्योपाधिकभेदविषयकत्वादिच्छाव्यक्तिर्जगत्यामेकैवएवंसुखादिव्यक्तिरितिभावः एकांतःकरणपरिणामत्वेन॥ नानेच्छादिरूपेणपरिणतैकांतःकरणव्यक्तिरूपत्वेनएकैवम-
नोव्यक्तिर्घटेच्छापटेच्छादिरूपनानावस्थांप्राप्नोतीतिसंकुचितप्रसारितावस्थाभेदेनेवतत्तदवस्थारूपोपाधिभेदेनैवनानात्वस्वभावतइतिभावः नानामनःपरिणामानांतुविनाप्युपाधिंविभा-
व्यमानभेदत्वान्नतेषुव्यभिचारः अव्याप्यवृत्तीत्यादि। जीवत्वेशत्वादेर्मन्मतेव्याप्यवृत्तित्वाभावेपिपरमतेव्याप्यवृत्तित्वात् जीवेशभेदोऽव्याप्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताक राम.
त्वेनपक्षः ननुप्रतियोगितावच्छेदकरूपात्यंताभावेनसहभेदस्यसामानाधिकरण्यंबाधितमितिचेत्सत्यमतएवस्वप्रतियोगितावच्छेदकभिन्नस्वस्वात्यंताभावस्यसामानाधि- ३२९
करण्यंभेदेसिध्यति ननुमूलाग्रावच्छिन्नवृक्षयोर्भेदात् मूलावच्छिन्नसंयोगवद्भेदेनोक्तसंयोगरूपेणस्वात्यंताभावेनसमानाधिकरणः तथाचसाध्यवैकल्यमतआह॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

अन्योन्याभावत्वमित्यादिदृष्टान्तसिद्ध्यर्थं दृष्टान्ते साध्यसिद्ध्यर्थं सत्त्वेन विद्यमानत्वेन असदन्यथाख्यातिवादिनोऽसद्विषयकभ्रमवादिनस्तव माध्वस्य अथवाऽसत्ख्यातिवादिनस्तव माध्वस्य व्यधिकरणप्रकारकख्यातिरूपान्यथाख्यातिवादिनस्तव तार्किकस्यानङ्गीकृतत्वेन शुक्तौ शुक्तिभेदस्यानङ्गीकृतत्वेन तस्योक्तसाध्यस्य साध्यत्वात् त्वां प्रत्यसिद्धत्वात् त्वन्मते आरोपितस्यालीकत्वेन शुक्त्यादिदेशे तदधिकरणत्वं न संभवतीति भावः एकत्वव्याप्यमिति स्वप्रतियोगिकभेदवत्त्वं स्वसमानकालीनत्वं चेत्युभयसम्बन्धेन यत्स्वाश्रयवत्त्वं तच्च समवायश्चेत्युभयसम्बन्धेन वर्त्तते यत्तदन्यदित्यर्थः। आद्योभयसम्बन्धेन घटत्वाश्रयत्वं समवायश्चेत्युभयसम्बन्धेन घटान्तरे वर्त्तते घटत्वं चैत्रत्वं तु न तथा तत्समवायिशरीरद्वयस्यैकदाभावात्। न च घटत्वमिवात्मत्वमपि तथा कल्पितस्यात्मभेदस्यात्मनि त्वयापि स्वीकारादिति वाच्यं तात्त्विकभेदस्य निवेशात्। त्वया घटयोस्तात्त्विकभेदस्याप्रसिद्धप्रतियो

अन्योन्याभावत्वं स्वसमानाधिकरणात्यन्ताभावप्रतियोगिवृत्तित्रैकालिकाभाववृत्तित्वे सति अभावत्वसाक्षाद्व्याप्यत्वात् अत्यन्ताभावत्ववदित्यनुमानं पूर्वोक्तसंयुक्तप्रतियोगिकभेदरूपदृष्टान्तसिद्ध्यर्थम् न च शुक्तौ शुक्तिभेदस्यारोपितस्य सत्त्वेन सिद्धसाधनम् असदन्यथाख्यातिवादिनस्तवानङ्गीकृतत्वेन तस्य साध्यत्वात् न च त्रैकालिकत्वे मिथ्यात्वायोगः मायाचित्सम्बन्धस्य कालत्वेन सर्वकालस्थितेरतद्विरोधित्वात् न चाव्याप्यवृत्तितया संयोगादिवत् समानाधिकरणात्यन्ताभावप्रतियोगित्वेनार्थान्तरम् पक्षविशेषणमहिम्ना अव्याप्यवृत्तित्वस्यासम्भवेन तद्योगात् अनुसन्धानाद्यव्यवस्थादिकं प्रागेव निराकृतं अप्रयोजकत्वाभाससाम्यसत्प्रतिपक्षोपाध्यादि पूर्वोक्तप्रपञ्चमिथ्यात्वानुमानवन्निराकरणीयम् एवमात्मत्वमेकत्वव्याप्यं आत्ममात्रवृत्तित्वाच्चैत्रत्ववदित्याद्यपि द्रष्टव्यम् जीवब्रह्माभेदानुमानम्॥३२॥

पादोऽस्य विश्वा भूतानीति श्रुतौ ममैवांशो जीवलोके जीवभूतः सनातन इति स्मृतौ चांशत्वव्यपदेशादपि जीवे ब्रह्माभेदसिद्धिः यद्यपि ब्रह्म प्रति जीवस्यांशत्वं न तावदारम्भकत्वं ब्रह्मणो नादित्वात् नापि खण्डत्वं अच्छेद्यत्वात् नापि समुदायित्वं समुदायस्य समुदाय्यनन्यत्वेन व्यवहारदशायामपि संसार्यन्यशुद्धब्रह्माभावापातात् नापि भिन्नाभिन्नद्रव्यत्वमनङ्गीकारात् नापि पटं प्रति खण्डस्येव प्रदेशत्वं निष्प्रदेशब्रह्मप्रतिकल्पनां विना तद्योगात् तथापि घटाकाशस्य महाकाशं प्रतीव कल्पितप्रदेशत्वरूपमंशत्वं जीवस्यावच्छेदपक्षे सम्भवति स्वतो निरंशेऽपि औपाधिकांशो यथा युज्यते तथोक्तं पुरस्तात् न तु सदृशत्वे सति ततो न्यूनत्वम् स्थूलपटं प्रति सूक्ष्मपटस्यांशत्वापत्तेः वस्त्रैकदेशे मुख्यस्यांशशब्दस्य स्वतो निरंशेऽपि कल्पितैकदेशे प्रयोगस्यार्थान्तरे प्रयोगकल्पनापेक्षया अभ्यर्हितत्वात्॥

गिकभेदस्य च स्वीकारात् त्वां प्रत्युक्तानुमानस्य निर्दोषत्वात्॥ श्रीः तत्त्वैरित्यादि जीवब्रह्माभिदानुमा ३२॥ भिन्नाभिन्नद्रव्यत्वं यद्द्रव्यीयतात्त्विकभेदाभेदवत् यद्द्रव्यं तस्य तदंशः प्रदेशत्वरूपमिति। यद्द्रव्यभिन्नाभिन्नं यद्द्रव्यं तस्य तत्प्रदेशः घटाकाशं महाकाशं जीवश्चिदिति सामानाधिकरण्येन प्रत्ययादवच्छिन्नानवच्छिन्नयोराकाशयोरिव चितोरंशांशितेति भावः ननु ममैवांश इत्यादावंशशब्दस्य गौण्या वृत्त्या बोध्यतावच्छेदकमुक्तं न त्वंशपदशक्यतावच्छेदकमतो नोक्तापत्तिस्तत्राह वस्त्विति। एकदेशे उक्तप्रदेशे कल्पितैकदेश इति कल्पितरूप्यादौ रूप्यादिशब्दस्येव जीवे चिद्रूपब्रह्मणः कल्पितांशेऽप्यंशशब्दस्य प्रयोगो युक्तः सुतरां मन्मते अंशमात्रस्य कल्पितत्वादिति भावः अर्थान्तरे गौण्या वृत्त्या लभ्ये उक्तार्थे॥ [illegible] ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ.२ अ.सि. सूत्रविरोधेतिसोऽन्वेष्टव्यइत्यादिनानाव्यपदेशादपिजीवोब्रह्मणोंऽशोनत्वत्यंतभिन्नः यतोऽन्यथापितयोरैक्यमादायापिब्रह्मणोदासकितवादिस्वरूपत्वमधीयतइत्यु
टी.ल. क्तसूत्रार्थविरोधेत्यर्थः कुत्रचित्। चैत्रोनमैत्रतुल्यबलः किंतुतद्वत्किंचिदंशबलइत्यादौ अन्यत्रोक्तगौणार्थे॥ श्रोःतर्केरित्यादिअंशत्वमेवसाधकं॥३३॥ष्ठै

१२० अंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएके इतिसूत्रेसोन्वेष्टव्यःसविजिज्ञासितव्यःएतदेवविदित्वामुनिर्भवतियआत्मनितिष्ठन्नित्यादिभेद
व्यपदेशस्यब्रह्मदाशाब्रह्मदासाब्रह्मेमेकितवाउतेत्याथर्वणमन्त्रेअभेदव्यपदेशस्यचोदाहृतत्वाच्चोक्तार्थपरिग्रहस्योचितत्वात् आत्यंतिकभेदगर्भार्थान्तरस्वीकारे
चैतत्सूत्रविरोधापत्तेःकुत्रचिदन्यत्रप्रयोगदर्शनमात्रेणसर्वत्रतत्कल्पनेबहुविप्लवापत्तेश्चअतएवनन्वनुजीवस्यशुद्धचैतन्यांशत्वंवाईश्वरांशत्वंवापादोस्येत्यनयाश्रुत्या
वोध्यंनाद्यःपादोस्यविश्वाभूतानीतिश्रुताविदंशब्देनसहस्रशीर्षत्वादिविशिष्टप्रकृतेश्वरस्यममैवांशइतिस्मृतौचस्वेरप्रयुक्तास्मच्छब्देनेश्वरस्यैवोक्तेःनान्त्यःत्वन्मतेई
श्वरस्याप्युपहितत्वेनघटाकाशंप्रतिकरकाकाशस्येवेश्वरंप्रतिजीवस्यांशत्वायोगात् नचगृहाकाशस्येवपुनर्घटेनेवेश्वरोपाधिनावच्छिन्नमेवचैतन्यंपुनर्जीवोपाधिना
वच्छिद्यतइतिवाच्यम् तथात्वेहिमुक्तस्यशुद्धब्रह्मत्वंनस्यात् तस्मात्त्वन्मतेपिनमुख्यमंशत्वंनाप्यौपाधिकंवक्तुंशक्यं अतोमदुक्तप्रकारएवादरणीयइतिनिर
स्तम् अर्थान्तरपरिग्रहेविरोधस्योक्तत्वात् श्रुतिस्मृतिगतसर्वनाम्नासहस्रशीर्षत्वाद्युपलक्षितचैतन्यपरामर्शादुक्तदूषणानवकाशाच्च तस्मात्त्वंस्त्रीत्वंपुमानसि
त्वंकुमारउतवाकुमारीत्वंजीर्णोदण्डेनवञ्चसित्वंजातोभवसिविश्वतोमुखःसर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वाभिवदन्यदास्तइत्यादिश्रुत्याजीवब्रह्माभे
देप्रमितेपिमन्तृमंतव्यादिभेदव्यपदेशनिर्वाहार्थंकाल्पनिकांशत्वस्यश्रुतिस्मृतिभ्यामाहृतत्वेनतद्बलादप्यभेदोवगम्यतइतिसिद्धम्॥अंशत्वेनैक्यसिद्धिः॥३३॥ तथाजी
वब्रह्मणोर्मुखप्रतिमुखवद्बिम्बप्रतिबिम्बरूपत्वादप्यभेदोवगन्तव्यः ननुदृष्टान्तेनाभेदः संप्रतिपन्नः चैत्रच्छायेभिन्नेइतिवच्चैत्रतत्प्रतिबिम्बेभिन्नेइत्येवपार्श्वस्थितेनग्र
हणात् स्वेनापिस्वकरतस्यबिम्बेभिन्नेइतिग्रहणाच्चेतिचेत्नआपाततोभेदप्रतीतावपिसयुक्तिकप्रत्यक्षेणबिम्बप्रतिबिम्बयोरैक्यसिद्ध्यादृष्टान्तत्वोपपत्तेः तथाहित्वक्ष
णापरिज्ञानेभेदभ्रमवतोपिबहिःस्थितश्चैत्रोयत्स्वलक्षणकत्वेनप्रतिपन्नः ततोगृहस्थेतथाभातितस्मिन्चैत्रएवायमितिधीः तथाग्रीवास्थमुखंय
त्स्वलक्षणकंप्रतिपन्नंदर्पण स्थमपितथेत्यवधार्यतदेवेदंमुखमितिसएवायंकरइतिचस्वपरसाधारणप्रतीतिरप्यनुभवसिद्धा नचकिंचित्स्वच्छतामात्रादौमुखच्छाया
मात्रेप्रतीतेपिसंस्थानविशेषाप्रतीत्याप्रत्यभिज्ञाअसिद्धेतिवाच्यम् सर्वत्राप्रतीतावपिनिर्मलदर्पणादावेवतत्सिद्ध्यादृष्टान्तसिद्धेः ननुस्वनेत्रगो
लकादौस्वस्याभिज्ञाविरहान्नप्रत्यभिज्ञापिकथमितिचेत्नदर्पणाहतचक्षूरश्मीनामग्रावच्छेदेनसम्बन्धात्स्वनेत्रगोलकादीनांअभिज्ञायाःसन्निहितपूर्वसमयएवसम्भवा
त् यत्तुसूर्यपार्श्वस्थितेप्रतिसूर्येप्रत्यभिज्ञाविरहवदत्रापिप्रत्यभिज्ञाविरहइतितन्नतत्रोपाधेःअत्रैवानाकलनेनौपाधिकत्वानिर्णयात्तथाचोपाधिनिब राम.
न्धनत्वज्ञानंतद्व्यक्षणकत्वज्ञानंचाभेदसाक्षात्कारेसामग्रीतस्यांसत्यांदर्पणेममममुखंलग्नमित्यनुभवाभावएवानुभवविरुद्धः॥ ॥ ३३०

संनिहितेतिसंभवप्राचुर्येणोक्तं असंनिहितपूर्वसमयेप्यभिज्ञायाः संस्कारद्वाराहेतुत्वसंभवात्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपाध्यवच्छिन्न इति। दर्पणाद्युपाधिसम्बन्धेन कल्पितेन विशिष्टस्य बिंबस्यैव प्रतिबिंबत्वात् तद्रूपेणैव दृष्टत्वादि धीः असत्कल्पत्वात् अभेदव्याप्यस्वलक्षणकत्वप्रमया वा।
धितत्वात् श्वैत्यव्याप्यशंखत्वसाक्षात्कारे पीतभेदस्य तद्व्याप्यशंखत्वस्य च साक्षात्कारे पीतसाक्षात्कारवत्। पीताभेदसाक्षात्कारवत् अज्ञानांशेति। आवरणशक्तीत्यर्थः उ
पादानांशस्य विक्षेपशक्तेः प्रतिबिंबः प्रतिबिंबस्वरूपं बिंबाभिन्नः बिंबस्वरूपाद् इदं हीनं तेन जीवेश्वररूपबिंबप्रतिबिंबयोः व्यावहारिकयोर्व्यावहारिकभेदस्य कल्पितत्वेन त

यत्तु चैत्रप्रतिबिम्बो दृष्टो न चैत्रः किंतु तेनानुमित इति विपरीतानुभवविरोध इति तन्न वस्तुतोऽभेदे ज्ञातेपि उपाध्यवच्छिन्नो दृष्टोऽनवच्छिन्नोनुमित इति प्र
तीत्यविरोधात् शरङ्गङ्ग·पावर्षन्तुगङ्गानुमानवत् न चैवं प्रतिमुखे प्रत्यङ्मुखत्वादिना दृश्यमाने स्वमुखे तद्बुद्धिः स्यात् बालानां च प्रतिबिम्बे बालान्तरभ्रमो
न स्यादिति वाच्यम् तयोः सलक्षणत्वाज्ञाननिबन्धनत्वात् अतएव कदाचित्प्रतिमुखेपि मम मुखमिति बुद्धिव्यपदेशौ न चायं व्यवहारो भेदज्ञानपूर्वकत्वेन मार्गे
स्वपदयां स्वपदव्यवहारवद्गौणः स्वलक्षणकतज्ज्ञानदशायां भेदज्ञानस्यासत्कल्पत्वात् नन्वविवादस्तावद् इदंसाक्षात्कारे अन्यथात्वयापि कस्य भ्रमत्वमुच्यते।
न च भेदं भेदकं च साक्षात्कुर्वन्न भेदं साक्षात्कु
र्वाणो दृष्ट इति चेत् न श्वैत्यव्याप्यशङ्खत्वसाक्षात्कारे पीतसाक्षात्कारवदुपाधिमाहात्म्याद् भेदं साक्षात्कुर्वाणोपि भेदं साक्षात्करोतीत्यङ्गीक्रियते अनुभवा
स्यदुरपह्नवत्वात् न चैवमुपादानस्यैकाज्ञानस्यैकाज्ञानेन निवृत्तेर्भ्रमानुत्पत्तिः तन्निवर्तने उपाधिविरहस्यापि सहकारित्वात् न चैवं तज्ज्ञाने सति तं न जानामीत्यन
नुभवेन तस्य स्वप्रागभावप्रतीवाज्ञानं प्रत्यप्यन्यानपेक्षस्यैव निवर्तकत्वमिति वाच्यम् न जानामीति व्यवहारप्रयोजकाज्ञानांशनिवर्तनेपि भ्रमस्यानुभूयमानत्वेन तदु
पादानांशस्य निवृत्तौ जीवन्मुक्तौ प्रारब्धकर्मण इवोपाधेरेव प्रतिबन्धकतया तद्विरहापेक्षाया आवश्यकत्वात् एतेन भेदभ्रमस्यास्य मूलाविद्योपादानकत्वे व्यावहा
रिकत्वापत्तिः अज्ञानानुपादानकत्वेऽपसिद्धान्तः बिम्बप्रतिबिम्बभेदस्य सत्यत्वापत्तिश्चेति निरस्तम् उक्तन्यायेनोपपत्तेर्व्यावहारिकत्वेप्यनुपपत्त्यभावाच्च तयोरैक्येनु
मानमपि प्रमाणं तत्र यद्यप्यत्यन्तसादृश्यस्येतरकरादौ व्यभिचारितयापि प्रतिबिम्बो बिम्बाभिन्नः तद्गतासाधारणधर्मवत्त्वात् तद्विरुद्धधर्मानधिकरणत्वात् बिम्बा
जनकाजन्यत्वाच्च न च द्वितीयहेतोरसिद्धिः प्रत्यङ्मुखत्वादिविरुद्धधर्मस्योपाधिकृतत्वेन स्वाभाविकविरुद्धधर्मानधिकरणत्वस्य सत्त्वात् न च बिम्बानन्तरजाते प्रतिबिम्बे तृती
यहेतोरसिद्धिः ऐक्यवादिनं प्रति बिम्बानन्तरत्वस्यैवासिद्धेः ननु पृथक्कार्यानुरोधेन परिवेषं द्वापच्छायाप्रतिसूर्यादाविवात्रापि पृथक्कारणं कल्पनीयं प्रतिबिम्बमपि हि छा
याविशेषः नहि भेरीघातादिक्षणसहेतुभावाद्ध्वनावुपरतेपि श्रूयमाणः प्रतिध्वनिर्न शब्दान्तरमिति चेन्न प्रतिबिम्बस्य छायाविरोधिन्यालोकेपि सम्भवेन छायाविशेषत्वासिद्धेः प्र
तिध्वानस्य तु भिन्नकालत्वेन तद्भेदस्य प्रकृतेनुपयोगात् कार्यपार्थक्यसिद्ध्युत्तरकालकल्प्यकारणभेदस्य प्रथमं वक्तुमशक्यत्वात् क्षणसहेतुभावेन कार्यस्यैवाभावाच्च॥ ॥

दभावमादाय नार्थान्तरं बिंबाजनकाजन्यत्वादिति। जन्यबिंबस्थले हेतुः बिंबानन्तरत्वस्यैवेति उपाध्यन्वयव्यतिरेकयोरुपाधिसम्बन्धाद्युपरतावुपक्षीणत्वेन न प्रतिबिंबोत्पत्तिसाधक।
तेति भावः अनुपयोगादिति। तथा च प्रतिध्वनिर्न प्रतिबिंबं किंतु कंठादिसमवेतशब्दजन्य आकाशसमवेतः शब्दः कार्यस्य बिंबभिन्नप्रतिबिंबस्य॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अन्योन्याश्रयापत्तेरितिकारणांतरकल्पनेगौरवादित्यपिबोध्यंतस्मिंश्चेतिप्रत्यक्षागमयोर्भेदतात्विकत्वेऔदासीन्यात्‌विंबाकारणाजन्यत्वादिहेतुनातस्यसाधनीयत्वेनकारणां
तरकल्पनाधीनंसोपपत्तिकत्वंज्ञानमितिभावः नोपरक्तमितिनेक्षेतोद्यंतमादित्यंनास्तंयंतंकदाचनेत्यादिः व्यवहारः सूर्यस्यवाविप्रतिविंवेसूर्यपदप्रयोगः वारिस्थत्वेनव्यावहारि
कप्रातीतिकसाधारणांयद्वारिस्थतात्वंतदवच्छिन्नेनउपस्थिताशेषवारिस्थेतिव्यावहारिकरूपविशेषरहितप्रातीतिकवारिस्थेसर्यस्तयाचव्यावहारिकवारिस्थसूर्यासंभवा

प्रत्यक्षस्यभेदाभेदयोः समत्वात्‌ युक्त्याअभेदएवप्रावल्याच्च अतएवोक्तं विवरणेदर्पणादौनमुखव्यक्त्यन्तरमस्तितज्जनकशून्यत्वात्‌शशशिरसिविषाणवदितिए
वमभेदधियउपपादितत्वात्‌अस्याःप्रावल्यम्‌ व्यक्त्यन्तरहेत्वभावात्‌ सैवनास्तीत्यपास्तंप्राक्‌नचच्छायादाविवकारणभेदस्यकल्प्यत्वेनभेदबुद्धिःसोपपत्तिकातथात्व
सद्रव्यानन्तर्भावितमोवद्द्रव्यान्तरमेवेतिवाच्यम्‌ एवंअन्योन्याश्रयापत्तेःभेदसोपपत्तिकत्वेद्रव्यान्तरत्वकारणान्तरयोःकल्पनंतस्मिंश्चसोपपत्तिकत्वमितिअतएवनोपरक्तंन
वारिस्थमितिस्मार्त्तव्यवहारोमुख्यः नतुविचित्रितःसिंहः यथादारुमयीयोषायथाचर्ममयोमृगइत्यादिवद्गौणः नचत्वत्पक्षेपिवारिस्थशब्दोनमुख्यः वारिणिसूर्यान्तराभावा
त्‌गगनस्थस्यवारिस्थत्वायोगादितिवाच्यम्‌वारिस्थत्वेनोपस्थिताशेषवारिस्थसूर्यनिषेधात्‌ ननुनवारिस्थत्वेनसूर्यएवोपस्थितः तयोरभेदोनहिप्रत्यक्षसिद्धः ना
पियुक्तः न्यूनाधिकपरिमाणवत्त्वचलत्वाचलत्वोपाधिसंयुक्तत्वासंयुक्तत्वगादिग्राह्यत्वाग्राह्यत्वप्रत्यग्प्राङ्मुखत्वादिनाकस्तूरीप्रतिबिम्बयोःसौरभासौरभादिना
चभेदसिद्धेरितिचेत्‌ नन्यूनपरिमाणादिनासौरभाभावादिनाचोपाधिगतस्यभेदः साधनीयः तथाचोपाधिगतत्वस्यबिम्बेकल्पितत्वेनपक्षहेत्वादेरसिद्धेः कल्पितहे
त्वादिनातत्समानसत्ताकसाध्यसिद्धावविवादाच्च नापियथैषापुरुषेच्छायाएतस्मिन्नेतदाततम्‌ छायायथापुंसदृशीपुमधीनाचदृश्यतेएवमेवात्मकाः सर्वेब्र
ह्माद्याः परमात्मनइतिश्रुत्याभेदइतिवाच्यं कल्पितभेदमात्रेणसादृश्योपपत्तेः तन्नात्त्विकत्वेश्रुतितात्पर्याभावात्‌ ऐक्यप्रतिपादकानेकश्रुतिविरोधाच्च ननुतत्त्वलक्ष
णस्यैवदर्पणस्थत्वेनारोपिततयातद्रूपादियुक्तस्येवतद्गन्धादियुक्तस्यापिदर्पणस्थत्वेनप्रतीतिः स्यादितिचेत्‌ नतत्त्वलक्षणकत्वेनारोपितत्वेपियाव
त्त्वलक्षणकत्वेनारोपितत्वानंगीकारेणगन्धादिप्रतीत्यापादनस्याशक्यत्वात्‌ नन्वेवंदर्पणेमुखस्याभावेउपाधेःप्रतिबिंबपक्षपातित्वेनमुखप्रतिमुखयोर
वदाततत्त्वश्यामत्ववज्जीवब्रह्मणोः संसारित्वासंसारित्वादिव्यवस्थाकथमितिचेत्‌ नआरोपितेनादर्शस्थत्वेनविशिष्टेप्रतिबिम्बेतद्धर्मस्यमालिन्यादेः सम्भवात्‌ नचो
पाधिस्थत्वस्याप्यारोप्यत्वेनकथंमालिन्याश्रयतावच्छेदकत्वं एकविशिष्टे इतरारोपाभावादितिवाच्यम्‌ ॥ ऽऽत्यातीतिकतद्ग्रहणांवारिस्थपदंमुख्यंहृत्वे

वस्वप्नेभुक्ताकृदिताध्रुवमर्थलाभइत्यादौस्वाप्नभोजनादौभुज्यादेरिवारोपितवारिस्थताकेपिवारिस्थशब्दस्यमुख्यत्वमेवव्यावहारिकभोजनत्वादेःप्रवृत्तिनिमित्तस्यतत्रापिसत्त्वा
दितिभावः। भेदः बिंबभेदः एतस्मिन्परमात्मनि। एततजगदाततंयथैत्यस्योन्तरवाक्यस्यत्वान्नतथैत्यपेक्षतेएवमित्यस्यात्रापिसम्बन्धोवा। तत्त्वलक्षणकत्वेनारोपितत्वेपीत्यादि
तत्त्वलक्षणकत्वविशिष्टेदर्पणस्थत्वस्यारोपेपियावत्तत्त्वलक्षणकत्वविशिष्टेतदनारोपात्‌दर्पणेमुखंगंधादिविशिष्टमितिप्रत्ययाभावादित्यर्थः॥ ॥

नतु तस्येति आरोपिताधिकसत्ताकत्वमारोपिताश्रयतावच्छेदकत्वे तंत्रमिति तु भ्रमः स्वप्नादौ एककल्पितविशिष्टे परस्य कल्पनादधिष्ठानस्यैव तात्त्विकत्वापेक्षणात् अविद्योपहित। स्येति उपाधेराश्रयकोटावन्यत्वेन स्वोपहितस्यैवाविद्याश्रयत्वं तथा च प्रतिबिंबमेव दर्पणस्थमित्यादेर्दर्पणाद्युपहितमेव दर्पणस्थं नतु शुद्धं मुखमित्याद्यर्थः एतेन शुद्धस्यैव मुखस्य दर्प। णाद्युपाध्यवच्छेदेन मालिन्याद्युपपादनेन एतेन मुखं मलिनमिति प्रमाऽस्वीकारेण स्वलक्षणाननुगमेन यावत् विंबधर्माननुगमेन यत्तु उपहितवृत्तेः शुद्धवृत्तेरखंडाकारवृत्तिवि

आरोपपूर्वप्रतीतधर्मविशिष्टस्यैवारोप्याश्रयत्वात् नतु तस्य सत्यत्वमपीति परप्रक्रियानिबन्धनदोषानवकाशात् नच प्रतिमुखमेव दर्पणस्थं नतु मुखमिति प्रतिबिम्बदर्पणस्थत्वानुभवेन कथं प्रतिबिम्बत्वस्य तत्रस्थत्वगर्भतेति वाच्यम् अविद्योपहितस्याविद्याश्रयत्ववत् दर्पणोपहितस्य दर्पणाश्रितत्वसम्भवात् एतेन मालिन्यस्थानीयस्य संसारस्य विशिष्टवृत्तित्वात् शुद्धाश्रितमोक्षसामानाधिकरण्यायोग इति निरस्तम् संसारस्तावदुपहितवृत्तिः तथा चोपधेयांशमादाय सामानाधिकरण्यसम्भवात् तथा च वृक्षस्य कपिसंयोगाधारताग्रेणैव मुखे मालिन्यं दर्पणसम्बन्धेनावच्छिद्यते एतावानेव विशेषः वृक्षे संयोगस्तु साहजिकः मुखे त्वौपाधिकं मालिन्यं तेनोपहिते उपाध्यवच्छिन्न एव मुखे मालिन्यधीः एतेन दर्पणमालिन्यस्य मुखनिष्ठत्वे संसारस्यापि शुद्धनिष्ठतापत्तिः वृक्षः संयुक्त इतिव। त्मुखं मलिनमिति प्रतीत्यापत्तिः मुखं न मलिनं किंतु प्रतिमुखमित्यनुभवविरोधापत्तिश्चेति निरस्तं ननु कस्तूर्यादिप्रतिबिम्बस्य स्वलक्षणाननुगमेन कथं विंबैकम् नच तदाकारतामात्रेण तत्त्वं तर्हि छायाप्रतिमुद्राप्रतिमादीनामपि तत्त्वं स्यात् प्रत्यङ्मुखत्वादेर्भेदकस्यात्रापि सत्त्वाच्च नच प्रत्यङ्मुखत्वधीर्भ्रान्ता प्रतिबिम्बंबिम्बाभिमुखं नेति कदाप्यननुभवादिति चेत् न दर्पणादिप्रतिबिम्बे स्वलक्षणानुगमेन बिम्बैकत्वव्यवस्थिते प्रतिबिम्बत्वावच्छेदेनैव तत्कल्पनात् छायादौ स्वलक्षणकत्वस्य कुत्राप्यदर्शनेन साम्याभावात् नापि प्रत्यङ्मुखत्वादिभेदकम् मलिनत्ववदुपाधिकृतत्वात् अतएव जपाकुसुमे रक्तताप्रतीतिवत्तद्धीर्नभ्रांता दर्पणाहतं चक्षुः प्रत्यङ्मुखं भवति तस्य च स्वाभिमुखतया ग्रहणसामर्थ्याच्चान्याभिमुखस्य मुखादेस्तथाग्रहणोपपत्तेश्च तदुक्तं दर्पणाभिहता दृष्टिः पराञ्चत्स्वमाननम् व्याप्नुवत्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम् नच पराग्वृत्तस्य स्वस्यैव ग्रहणे पार्श्वस्थस्य मुखद्वयप्रतीत्ययोगः स्वमुखस्यैवेति नियमासिद्धेः रूपाधिसन्निहितमात्र। स्यैव तथाग्रहणात् नचैवं दर्पणादेर्नेत्राभिघातकतामात्रेणोपक्षीणतया दर्पणैक्य इव दर्पणभेदेऽप्यनेकमुखप्रतीतिर्न स्यादिति वाच्यं अभिघातकानेकत्वे न चक्षुषोऽनेकाग्रसंपत्त्या प्रत्यग्रं स्वाभिघातकावच्छेदकमुखग्राहकतया दृष्टान्तवैषम्यात्॥ विषयत्वस्य वाचस्पतिमते शुद्धवृत्तितापत्तिरि।

ति तत्र तन्मतेऽविद्याविषयताद्यवच्छेदेनोक्तविषयत्वं न तन्नवच्छिन्नमिति विशेषसंभवात् उपहिताभेदेन शुद्धस्याप्युपहितनिष्ठसंसारीयपरापरासम्बन्धेन शुद्धनिष्ठमोक्षस्योपहितनिष्ठसंसारेणैकधर्मिसम्बन्धोपपत्तेश्च अनेकाग्रसंपत्त्या। नानाकिरणपुंजरूपनानावयवावच्छेदेनाभिहन्यमानत्वसंपत्त्या प्रत्यग्रं प्रतिनिदृशावयवावच्छेदेन स्वाभिघातकावच्छेदकमुखग्राहकतया स्वाभिघातकेषु दर्पणादिरूपावच्छेदकेषु मुखसाक्षात्कारोपधायकमुखसंयोगवत्तया उक्तदर्पणादिसंस्पृष्टत्वेन मुखसाक्षात्कारोपधायकसंयोगवत्तयेति यावत्।

उपाधिप्राबल्येति मण्याद्युपाधीनामुक्तधीहेतुत्वेत्यर्थः अंगीकारादिति स्वच्छोपाधेः प्रतिबिंबप्रत्यक्षप्रयोजकत्वं सर्वसंमतमिति भावः इष्टापत्तेरिति अतएव दर्पणेपुत्रादिमुखदृष्टा
मुखर्तविशेषः श्रीजगन्नाथमुखदृष्ट्या पुण्यविशेषः जले राहुग्रस्तसूर्यादिदृष्ट्या पापविशेषः उपाधिविनिर्मुक्तेति प्रतिबिंबत्वानुपहितमुखदर्शनविशेषजन्यसुखं न प्र
तिबिंबमुखदर्शनात् मंचस्थत्वादिविशिष्टमधुसूदनादिदर्शनजन्यपुण्यं न मंचस्थत्वाद्यनुपहितमधुसूदनादिप्रतिबिंबदर्शनात् उदयगिरिसन्निधानविशेषविशिष्टादि

न च मणिदर्पणकृपाणादिषु विरूद्धरूपानेकमुखप्रतीतिः कथमेवं युज्यत इति अन्वयव्यतिरेकसिद्धोपाधिप्राबल्यनिबन्धनत्वादिति गृहाण न च चक्षुःपरि
वृत्तिप्रक्रिया ब्रह्मप्रतिबिंबे जीवे न संभवतीति वाच्यम् चाक्षुषप्रतिबिंबविषयतयैवास्या उपपादितत्वात् न च विरलावयवस्य जलस्य नेत्राभिघातकत्वे जलान्तर्गतशिला
द्यग्रहणप्रसङ्गः सर्वावच्छेदेनाभिघाताभावे नांतरेपि चक्षुषः प्रवेशसम्भवात् न चैवं बहुयोजनव्यवहितोर्द्ध्वभागसूर्यादिग्रहणे पृष्ठभागस्थस्यापि व्यवहित
स्यापि ग्रहणापत्तिरिति वाच्यम् चक्षुर्योगमनागमनाभ्यां विशेषात् न हि दूरस्थसूर्यग्रहणं वदता पृष्ठकुड्यादिकं भित्वा चक्षुर्गच्छतीत्युक्तं भवति न चैवं शिलाभिह
तमपि चक्षुः परावृत्य मुखं गृह्णात्विति वाच्यं तथापि प्रतिबिम्बं तत्रोत्पद्यतामित्यापत्तेः अस्वच्छतया परिहारस्यास्माकमपि समत्वात् तथ स्वच्छएवोत्पद्यते मम मत
तएव चक्षुः परावर्त्तत इत्यङ्गीकारात् न चैवं प्रतिबिम्बदर्शने नापि बिम्बदर्शनजन्यसुखपुण्यादिप्रसङ्गः यत्र तद्दर्शनमात्रजन्यता सामान्यतस्तत्रेष्टापत्तेः।
यत्र चोपाधिविनिर्मुक्तज्ञानत्वेन विशिष्य जन्यता तत्रापादकाभावात् न चैवं सूर्यकस्यापि सूर्यवद्दुर्दर्शतापत्तिः गोलके सूर्यतेजःसांमुख्यस्य दुर्दर्शताप्रयोज।
कस्य सूर्यकग्रहणकालेऽभावात् न च स्वच्छदर्पणइव किञ्चित्स्वच्छताम्रादावपि मुखसंस्थानविशेषप्रतीत्यापातः उपाधिगतात्यन्तस्वच्छताव्यतिरेकप्रयोज
कमालिन्यादेरेव तत्र प्रतिबन्धकत्वात् अन्यथा तत्रापि तादृक्संस्थानविशेषवत्प्रतिबिम्बं तत्र कथं नोत्पद्यत इत्यस्य दुःपरिहरत्वापत्तेः नन्ववच्छेदपक्षे द्विगुणीकृ
त्यवृत्त्यसम्भवेपि प्रतिबिम्बपक्षे तत्सम्भवे नांतर्यामित्वमिति स्ववचनविरोध उपाधेः प्रतिबिम्बपक्षपातित्वमित्युक्तयोगश्चेति चेन्न सर्वोपाध्यव
च्छिन्नत्वैकदेशोपाध्यवच्छिन्नत्वाभ्यामुपाधिकल्पितभेदेन च स्वोक्तविरोधोपपत्तेः अतएव दर्पणेन मुखमित्येवोपाधिसंसृष्टतया निर्दिश्यते न
तु नेदं रूप्यमितिवन्नैतन्मुखमिति स्वरूपेण ननु नात्र मुखच्छायासीदित्यननुभवेन प्रत्युतैतावंतं कालमत्र प्रतिसूर्य आसीदिति वत्प्रतिमुखमा
सीदित्येवानुभवे न प्रतिबिंबमिवादर्श इत्यादिस्मृत्या च प्रतिमुखे दर्पणस्थत्वस्याप्यबाधएव न हि भूमौ मेघो नेत्येतावतापि मेघच्छायापि तत्राबाधितो।

त्यदर्शनावर्जनस्य तादृशादित्यप्रबिंबदर्शनान्नबाधः अंतर्यामित्वंप्रति बिंबजीवंप्रति अंतर्यामित्वसंभवः स्ववचनविरोधः विवरणोक्ति ((तिचेत्·॥
विरोधः बिंबप्रतिबिंबयोरैक्येन द्विगुणत्वासंभवादिति शेषः इत्युक्तयोग इति बिंबप्रतिबिंबयोरभिन्नतयोपाधिसम्बन्धाविशेषादिति शेषः सर्वेत्यादिबिं।
बीभूतोंतर्यामी सर्वजीवोपाध्यवच्छिन्नः प्रतिबिंबीभूतजीवास्तु एकैकोपाध्यवच्छिन्ना इत्यर्थः एकजीववादे त्वाह उपाधिकल्पितेति॥ ॥

संभवादिति प्रतिमुखमासीदितितु न निषेधविघातकं निषेधपूर्वं प्रतिमुखसम्बन्धस्य स्थितत्वाद् दर्पणे प्रतिमुखसम्बन्धोनुपपन्नत्वान्मिथ्येत्यनुभवाच्च कल्पितभेदादिति आ
काशस्थस्य वारिस्थान्यत्वात् दृष्टेत्यनेनोक्तं चाक्षुषदृष्ट्यवच्छिन्नस्याविद्यादृष्ट्यवच्छिन्नप्रतिविंबान्यत्वाच्चेत्यर्थः प्रमयेत्यादि। सत्यत्वाद्युपलक्षितात्मन एव तत्त्वमस्यादिवा
क्येन प्रमितत्वात्तच्छ्रवणमेव विधीयते व्यावहारिकयूपादेरेव व्यावहारिकप्रमाणाश्रुत्या विहितत्वात्स एवानुष्ठीयते आदित्यादेर्वारिस्थत्वादिविशिष्टस्य व्यावहारिक
स्यासंभवात् प्रातीतिकस्यैव ग्रहणमिति भावः। अतएव चोपमा सूर्यकादिवदिति। अतएव जीवेश्वरयोर्भेदादेव उपमा व्रहवः सूर्यकाय इत्सूर्यस्य सदृशा जलेष्वेव मैका

न मुखप्रतिमुखयोरेकस्वलक्षणकत्वे नैकाव्यवस्थित्या मुखस्यैव तत्त्यत्वनिषेधे न प्रतिमुखस्य तत्त्यत्वनिषेधसम्भवात् मेघच्छायाप्रतिसूर्यादीनां च न त
थेति न मेघादिनिषेधेन च्छायादिनिषेधः स्मृतिस्तु प्रातीतिकार्थमादाय दृष्टान्तपरा न चैवं प्रतिबिंबादिम्बानुमानोच्छेदः साध्याविशेषादिति वाच्यं उपाधि
कल्पितभेदेन विशेषोपपत्तेः एतेन नेक्षेतोद्यन्तमादित्यमित्यनेनोद्यत्प्रतिबिम्बदर्शनस्यापि निषेधः स्यात् वारिस्थसूर्यदर्शननिषेधेनाकाशस्थसूर्यदर्शनस्या
पि निषेधः स्यात् प्रतिबिम्बदर्शनेनैव दृष्टत्वात् स्नायादिति शास्त्रार्थोप्यनुष्ठितः स्यादिति निरस्तम् कल्पितभेदादेव शास्त्रीयव्यवस्थोपपत्तेः न चानौ
दुम्बरतयाज्ञाते नौदुम्बरेणौदुम्बरो यूपो भवतीति शास्त्रार्थासिद्धिप्रसंगः आत्मतयाज्ञातदेहश्रवणादिना आत्मा श्रोतव्य इति शास्त्रार्थसिद्धिप्रसङ्गश्चेति वाच्यं प्र
मया उपपत्तौ संभवं त्यां भ्रमेण तदुपपादनस्यायुक्तत्वात् नन्वनादेर्जीवस्य नोपाध्यधीनं प्रतिबिंबत्वं किंतु तदधीनत्वे सति तत्सदृशत्वम् तच्च भेद
व्याप्तमिति विरुद्धो हेतुः उक्तं हि सूत्रकृता अतएव चोपमा सूर्यकादिवदिति चेत् न उपाध्यधीनत्वं हि उपाधौ सत्येव सत्त्वं तच्च नानादित्वविरोधि अना
द्युपाधिनाऽनादिजीवस्यापि तत्संभवात् अतएव प्रतिबिम्बपदस्य भेदसादृश्यार्थकत्वमादाय विरुद्धत्वोक्तिर्हेतावयुक्ता तदेवं प्रतिबिंबस्य बिम्बेनै
क्येऽव्यवस्थिते ब्रह्मैकं जीवजातस्य सिद्धं तत्प्रतिबिंबनात् बिम्बप्रतिबिम्बन्यायेनैक्यसिद्धिः॥ ३४॥ नन्वणुत्वाज्जीवस्य कथं व्यापकादीशाद्भे
द इति चेत् न नित्यः सर्वगतः स वा एष महानज आत्मा इत्यादिश्रुत्या जीवो नाणुः प्रत्यक्षगुणाश्रयत्वात्प्रत्यक्षत्वाच्च घटवत् आत्मत्वादभूतत्वाच्चेशवदित्याद्यनुमानेश्च
जीवानणुत्वसिद्धेः विपक्षे च देहव्यापिसुखज्ञानाद्यनुपलम्भापत्तिर्बाधिका न चाणुर्ह्येष आत्मा यं वा एते सिनीतः पुण्यं च पापं च वालाग्रशतभागस्य शतधा कल्पितस्य च भा
गो जीवः स विज्ञेयः स चानन्त्याय कल्पत इति श्रुत्या जीवोऽणुरिति वाच्यं व्यापकत्वप्रतिपादकबहुश्रुतिविरोधेन दुर्विज्ञेयत्वपरत्वात् देहव्यापिगुणोपलम्भस्यान्यथयितुम

त्मकालोकेपरात्मसदृशामता इत्यादिवाक्यं सूर्यतत्प्रतिविंबयोरिवेशजीवयोर्भेद इति बोधयतीति पराभिमतोऽर्थः मन्मते तु अरूपवदेव हि तत्प्रधानत्वादित्यादिसू (शक्यत्वात्॥
त्रेणाद्वितीयात्मबोधनादेवोपमा यथा ह्ययं ज्योतिरात्मेत्यादिश्रुतिः सूर्यतत्प्रतिविंबयोरिव ब्रह्मजीवयोर्मिथ्याभेदं बोधयतीत्यर्थः भेदसादृश्येति भेदघटितसादृश्येत्यर्थः श्रीः त
कैरित्यादिविवेकं प्रतिविंबगं ३४ देहव्यापीत्यादि देहनानावयवावच्छिन्ननानासुखादीनां युगपदुपलब्धिर्न स्यादुपलब्धेरात्मगतायास्तेषु युगपत्सम्बन्धाभावादिति भावः। सिनीतः बे

आनंत्यायकल्पत इत्यनेनमुक्तिकालेपरिच्छेदाभावोक्तेरसंगतेश्चेत्यपिवोध्यं नव्याप्तः। नापरिच्छिन्नः हेत्वसिद्धेरिति धर्मिसमानसत्ताकत्वेन हेत्वाद्यभावस्यैव हेत्वाद्यसिद्धिरूपत्वात्। आ
त्मनीत्यादि अनुभूतिरूपस्याप्यात्मनः सुखाद्युपहितानुभूत्यात्मकत्वं सुखादिरूपेणापरिणातमनोनिवंधनमित्यर्थः ब्रह्मचव्यापकमिति ब्रह्मलोकस्य कार्यब्रह्मप्राप्तिरुक्तश्रुत्यावोध्यते साचवु
द्ध्युपाधिकास्यवदेवयानः पंथा इति शेषात्। उक्तस्मृतौ तु ब्रह्मलोकप्राप्त्यस्य शुद्धब्रह्मप्राप्तिरुच्यते सा चौपाधिकभेदवाधपराकल्पपर्यंतं ब्रह्मलोकभोगसमाप्तौ देशांतरावच्छेदेन ब्रह्मणि

एतेनजीवोनव्याप्तः उत्क्रांतिमत्त्वाद्गतिमत्त्वात्क्रियावत्त्वाच्चखगशरीरवत् विपक्षेहेतूच्छित्त्यापत्तिरेवेतिनिरस्तम् हेत्वसिद्धेः नचसोस्माच्छरीरादुत्क्रम्यामुंलोकम-
धिगच्छति अमुष्मादिमंलोकमागच्छतीत्यादिश्रुतिभिः तत्रचान्द्रमसंज्योतिर्योगीप्राप्य निवर्तत इत्यादिस्मृतिभिश्च हेतुसिद्धिरितिवाच्यम् उत्क्रमणादीनां वुद्धिगतत्वेना ना
तदुपहितेश्रुत्याप्रतिपादनात् नचनाकस्यपृष्ठेतेसुकृतेनुभूत्वेमंलोकंहीनतरंवाविशंतीतेअशुभमनुभूयावर्त्तंत इत्यादौश्रुतौ सुखदुःखाद्यनुभवस्यामाँधिकरण्य
स्यगतावुक्तेः कथंतस्यावुद्धिगतत्वमितिवाच्यम् आत्मनिसुखदुःखाद्यनुभवस्यापिवुद्ध्युपाधिकत्वेन तत्सामानाधिकरण्यस्यगतौ स्वाभाविकत्वासाधकत्वात् न
नुस एनान्ब्रह्मगमयतीत्यादिश्रुतौ तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाइत्यादिस्मृतौ च गतेर्मुक्तिसामानाधिकरण्योक्तेः कथमसिद्धिरितिचेत् न अव्यापकस्यै
वाव्यापकंप्रत्येवगमनं ब्रह्म च व्यापकं तत्प्रतिगमनासम्भवेन गमनपदस्योपाधिकृतभेदराहित्यपरतया गतिमुक्तिसामानाधिकरण्याप्रतिपादकत्वात् ननु तेन
प्रद्योतेनैव आत्मा निष्क्रामतीत्यात्मनिष्क्रमणश्रुतेर्नासिद्धिः अन्यथा मोक्षादिकमपिवुद्धेरेवस्यात् नापिश्रुत्यावुद्ध्युपाधिकगत्यादिविषयत्वं संभवति तद्यथानः
सुसमाहितमुत्सर्जद्यायादेवमेवायंशारीरआत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन् यातीतिस्वाभाविकगत्याश्रयशकटदृष्टान्तोक्तेरितिचेत् न एष इति वुद्ध्युपहितस्यै
वपरामर्शेनशुद्धात्मनिष्ठत्वस्यगतावनुक्तेः मोक्षेचवुद्ध्युपरमेणतन्निष्ठत्वस्यासंभावितत्वतयावैषम्यात् सर्वसाम्यस्यदृष्टान्ततायामप्रयोजकत्वेन तद्बलेनस्वाभाविकत्वपर्य
न्तस्यासिद्धेः नचतमुत्क्रामन्तंप्राणोनूत्क्रामतीत्यादिश्रुतौप्राणास्यवुद्धिगतितः प्रागेवजीवेगत्युक्तेः कथंवुद्धिगतत्वान्यथासिद्धिरितिवाच्यं प्राणाख्यांशेनक्रियाशक्तिशालि
नापश्चाद्गतावप्यंशान्तरेणप्रथममुत्क्रमणसंभवात् एतेनमन उदक्रामन्मीलित इवाश्नन्पिवन्नास्तैवेत्यादिश्रुतौ मनउत्क्रमणेप्यात्मनस्तदभावश्रवणाच्च कथंतद्गतेरेवग
तिमत्त्वमितिनिरस्तम् उपहितस्योपाधिनिवन्धनगतिमत्त्वेवुद्ध्यनुपहितस्य तदभावाविरोधात् नचतथाविद्वान्नामरूपाद्विमुक्तः परात्परंपुरुषमुपैतिदिव्यमित्यादिश्रुतौ
नामरूपविमोक्षानन्तरमपिगतिश्रवणात्कथंसोपाधिकीतिवाच्यं परमपुरुषस्यसर्वत्रसन्निहितत्वेनतंप्रतिगमनासम्भवेन उपैतीत्यस्यापिपूर्ववदर्थान्तरपरत्वात्

मुख्यगतौ मानाभावात्। भोगदेशेपुनर्मुख्यगतेर्व्यर्थत्वात् एतेनव्यापके आकाशादौ संयोगानुकूलमूर्तक्रियादृष्टेत्यपास्तं अंशांतरेण ज्ञानशक्तिशालिना नचशक्तिद्वयविशिष्ट-
भागद्वयाभावादिदमयुक्तमिति वाच्यं शरीरेविशेषज्ञानलोपोत्तरंप्राणक्रियालोप इत्यस्य विवक्षितत्वात् उपहितस्य संकल्पादिवृत्तिविशिष्टमनसः उपाधिनिवंधनगति
मत्त्वेपि संकल्पाद्यभावनिवंधनाभावरूपगतिमत्त्वे वोधितेपिवुद्ध्यनुपहितस्य उत्क्रमनोरहितस्य तदभावाविरोधात् उक्तगत्यभाववोधनाविरोधात्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

अयोगादिति। विंवप्रतिविंवयोर्वास्तवैक्येपिकल्पितभेदेनोपाधेः प्रतिविंवपक्षिपातात्। प्रतिविंवएवगत्यादिसंभवात् परभ्रांत्यनुवादोयं कर्त्तुरवच्छिन्नस्ये-
त्यादि। एतल्लोकाद्बुद्धेरेवगतिर्नतुतदुपहितस्यतथाचास्मिंल्लोकेतेनयत्कृतंकर्मतस्यस्वाश्रयेभोगानुपधायकत्वरूपाहानिः परलोकस्थेनबुद्ध्युपहितेनचय
त्रकृतंतदीयभोगस्यतत्राभ्यागमः स्यादित्यर्थः यद्बुद्ध्यवच्छिन्नेनेत्यादिययावुद्धिव्यक्त्यावच्छिन्नेनकृतंयद्बुद्धिव्यक्त्यवच्छेदेनात्मनोयत् कर्मकर्तृत्वंतद्व्यक्त्य
वच्छेदेनैवतत्फलभोक्तृत्वंवुद्धिगतकर्तृत्वादिकंवुद्ध्यवच्छेदेनशुद्धात्मन्येवकल्पितमवस्थाभेदेपिवुद्धिव्यक्त्यनुगमस्योक्तत्वात् प्रदेशोस्तितात्विकप्रदेशोस्ति
कल्पितस्तुसविद्यमानोपिकृतहान्यादिपरिहारेनोपयुज्यतेउक्तरीत्यैवतत्संभवादितिभावः कल्पितप्रदेशरूपस्यावच्छिन्नस्यैक्यमादायाप्युक्तपरिहारः संभ

अतएवपरंज्योतिरूपसंपद्यस्वेनरूपेणाभिनिष्पद्यते सउत्तमः पुरुषः सतत्रपर्येतीत्यादिश्रुतिरपिनगत्यर्था ननुवुद्धिगतेनगत्यादिना
किंतदवच्छिन्नात्मनिगत्यादिजायते उतवुद्धिगतमेवारोप्यते उतोपचर्यतेनाद्यः घटगत्यातदवच्छिन्ननभसिगत्यन्तरादर्शनात् अन्यथाय
तोघटस्यवुद्धेर्वागतिः तत्राकाशस्यात्मनोवासच्छिद्रत्वंस्यात् अन्यत्रद्विगुणीकृत्यवृत्तिश्चस्यात् नचप्रतिबिम्बपक्षेनोक्तदोषइतिवाच्यम् तस्यवस्त्व
तरत्वमतेउक्तदोषाभावेपिदर्पणहताद्दृष्टिः परावृत्यमुखंगृह्णातीतित्वन्मतेउपाधिगत्याबिंबेनगतिरितिप्रतिविंबेप्यस्याअयोगात् नान्त्योकर्त्तुरव
च्छिन्नस्येतरात्मप्रदेशस्यनभोगायतनलोकप्राप्तिः किंतुगतयाबुद्ध्याऽवच्छिन्नस्यप्रदेशान्तरस्यैवेतिस्वीकारेकृतहान्यादिप्रसङ्गात् कर्त्तुर्भोक्तुश्चा
वच्छिन्नस्यभिन्नत्वात् अभिन्नेचानवच्छिन्नेकर्तृत्वाद्यभावादितिचेत् नउपाधिगत्याउपहितेगतिप्रयोगऔपचारिकएव नचैवंकृतहान्याद्यापत्तिः य
द्बुद्ध्यवच्छिन्नेनयेनैवात्मनायत्कृतंतदवच्छिन्नेनतेनैवभोजनात् नह्यात्मनोनिरवयवस्यप्रदेशोस्तियत्त्ववच्छिन्नस्यकर्त्तुर्भोक्तुर्भेदइत्युक्तं त
त्र अवच्छेद्यात्मनोऽवच्छेदकवुद्धेश्चैक्येवच्छिन्नभेदस्यवक्तुमशक्यत्वात् नचात्मत्वमणुनिष्ठद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् पृथिवीत्ववदित्यनुमा-
नम् व्यापकावृत्तित्वस्योपाधित्वात् स्पर्शादिसामानाधिकरण्यस्याप्येवंसाधनप्रसङ्गाच्च॥१२ वतीत्याशयेनपरोक्तंतद्भेदंदूषयतियच्चेति। अवच्छेद्येत्यादि

अवच्छेद्यावच्छेदकस्वरूपयोर्नानात्वाभावेऽवच्छिन्नस्वरूपमेकमेवतन्नानात्वेमानाभावादन्यथाप्रतिविंवंशुक्तिरूप्यादिकंचोपाधेर्गतागताभ्यांभिद्येतनहितत्रभेदो
नानुभूयतेअत्रत्वनुभूयतेइतिवक्तुंशक्यंएवंचवुद्धिगतगत्यादिनातदवच्छिन्नात्मनिगत्यादिकंजायतइतिप्रथमपक्षेपिनदोषः कृतहान्याद्यभावात् अवच्छिन्ननभ-
आदेर्घटाद्यवच्छेदेनशुद्धनभआदौकल्पितत्वेनशुक्त्यवच्छेदेनात्मनिकल्पितस्यशुक्तिरूप्यस्यशुक्तिगतौगतिरिवघटादिगतौगत्यंतरोत्पादसंभवात् नचोक्तसच्छि-
द्रत्वापत्तिः शुद्धाकाशात्मनोः घटादिपूर्वदेशेसत्त्वात् द्विगुणीकृत्याकाशादेरुत्तरदेशेवृत्तिस्तुइष्टैवशुद्धावच्छिन्नरूपाभ्यांपूर्वदेशइवसत्त्वादितिभावः व्याप
कावृत्त्वस्येतिव्यापकावृत्तित्वमेवसाध्यमितितुभ्रमः व्यापकान्यवृत्तित्वस्यैवसाध्यत्वात् तथात्वेचव्यापकान्यवृत्तित्वस्यैवोपाधित्वसंभवात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कु० २
अ० सि०
टी० ल०
१२७

भूतेतरत्वे इत्यादि आकाशे कालदिशोरीश्वरे च व्यभिचारवारणाय क्रमेण विशेषणानि परत्वासमवायिकारणं घटादौ दिक्कालसंयोगौ द्वितीयहेतौ आकाशे व्यभिचारवारणाय शब्देतरेति। ईश्वरे तस्मै अनित्येति कालदिशोस्तस्मै विशेषेति अनात्मत्वमिति धर्मिग्राहकमानसिद्धव्याप्तत्वाकाशादौ साध्याव्याप्तमनात्मत्वमिति चेत्किं ततः नहि साध्यव्याप्यत्वमुपाधेरपेक्ष्यते किंतु साध्यव्यापकत्वं उपाधिवृत्तित्वेन मनोवृत्तित्वेन मध्यमेति। मन्मतेऽणुपरिमाणमेव मन इति चेत्तर्हि स्वं प्रत्येव तद्दृष्टांतनीयं न तु मां प्रति जडत्वस्य ज्ञानस्वरूपान्यत्वस्य उभलंभविरोध इति उपलंभोजन्यो नित्यो वा आद्ये हस्तपादाद्यवच्छिन्नसुखादिषु मनसंयुक्तात्मसमवायस्य युगपदसंभवो नित्यस्य त्वन्मते गुणगुणिभेदाद्गुणिसम्बन्ध एव सुखादावुपलंभरूपगुणसम्बन्धो वाच्यो न च युगपद्धस्ताद्यवच्छिन्नसुखादावात्मसमवायसंभवः अनुभवविरोधश्चेति न चा

जीवो न व्याप्तः भूतेतरत्वे सति परत्वासमवायिकारणानाधारत्वे सत्यसर्वज्ञत्वात् शब्देतरानित्यविशेषगुणाश्रयत्वात् संस्काराश्रयत्वाच्च घटवदि
त्यत्रानात्मत्वमुपाधिः अनित्यविशेषगुणसंस्कारादीनामुपाधिवृत्तित्वेनासिद्धिश्च एवं महत्त्वस्यापि सुसाधनत्वं च जीवोऽणुः ज्ञानासमवायिकारण
संयोगाश्रयत्वात् मनोवत् इत्यत्र मनसो मध्यमपरिमाणत्वेन दृष्टांतासंप्रतिपत्तेः जडत्वस्योपाधित्वाच्च सर्वत्र चात्रव्यापि सुखज्ञानाद्युपलंभविरोधः
प्रतिकूलस्तर्कः एकस्याणोरेकदाव्यवहितदेशद्वयावच्छेदासंभवेन पादे मे सुखं शिरसि मे वेदनेत्यादि युगपदनुभवविरोधश्च न च गुणिनो
णुत्वेपि गुणव्याप्त्याव्यापि सुखज्ञानानुभवाविरोधः गुणिव्यतिरेकेण गुणस्यासंभावितत्वात् अन्यथा घटव्यतिरेकेणापि घटरूपं स्यात्॥
प्रदीपादन्यत्र दृश्यमानापि प्रभा न प्रदीपगुणः किंत्वनुद्भूतस्पर्शं द्रव्यान्तरम् न च जातिसमवायादेर्धर्मितोऽन्यत्र वर्त्तनवत् अत्रापि गुणस्य बुद्धे
रन्यत्रोपलम्भः स्यादिति वाच्यम् जातिसमवायादिवदत्रापि तर्हि व्यापकत्वप्रसङ्गात् धर्मिणो विहायापि स्थितौ तस्य नियामकाभावात् न च कारण
नियमान्नियमः तर्हि अभ्यर्हितसमवायिकारणनियमादेव नियमेऽणुमात्रदेशतादुर्वारैव न च वह्नेरौष्ण्यं वहिर्नोपलभ्येत समीपवर्त्यनुद्भूतरूपतेजसस्त
दित्युच्यमानेव वह्नेरौष्ण्यं न सिद्ध्येदिति वाच्यम् बाधके सति सविधे तेजोन्तरकल्पनेपि दृश्यमानवह्नावनुभूयमानोष्णस्पर्शे बाधकाभावे तस्मिंस्तेजोन्तरी
यत्वकल्पनस्याशक्यत्वात् एतेन केतक्यादेः परितो गन्धानुभवाद्गुणानां गुणिनैरपेक्ष्यं न च तत्र केतक्यवयवानां परितः प्रसरतां ते गन्धाः तर्हि द्रव्यक्षयप्रसङ्गात्॥

त्मनिष्ठसुखादौ शरीरद्वारात्मसंबद्धत्वेन हस्तादेरवच्छेदकत्वमिति वाच्यं अवच्छेद्यस्याधिकरणे साक्षात्संबद्धस्यैवावच्छेदकत्वात् शाखादौ तथा दृष्टत्वान्न च सुखादि
कं नात्मनो गुणः किंतु देहस्येति वाच्यं लाघवेन जनकादृष्टसामानाधिकरण्यस्य तत्र स्वीकारात् गुणव्याप्त्या गुणसंबंधेन गुणिव्यतिरेकेण गुणस्य सम्बन्धेन अत्रापि गुणस्य आ
त्मन्यपि विद्यमानस्य गुणस्य बुद्धेः चैतन्यस्य जातिसमवायवदिति जात्यादेः सर्वगतत्वं प्राचीनरीत्या वाच्यं तथा च तद्वदात्मगुणस्यापि तत्स्यादिति भावः कारणनियमान्नि
यमः सुखादावेव तत्तदात्मसंबद्धशरीरसम्बन्धरूपकारणसत्त्वात्तत्रैव तत्तदात्मनिष्ठज्ञानसम्बन्धः समवायीति। समवायिकारण एव कार्यस्य समवायादन्यत्र ज्ञानसम्बन्धासं

रामः
३३७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसमवायिकारणेएवज्ञानंसमवैतीतिविषयतासंबंधेनसुखसंबद्धमपिभवतु इतिचेन्न। सुखादेर्हि आत्मनिष्ठत्वमेवतथावाच्यमहंसुखीत्यनुभवात् तथाचात्मनिष्ठज्ञानेनसामानाधिकरण्यस्यैवसुखादौसंभवात् विषयताख्यसम्बन्धस्यतत्रस्वीकारेमानाभावः वस्तुतस्तावतापियुगपद्धस्तपादाद्यवच्छिन्नसुखादिमत्त्वस्यात्मन्यसंभवादहंहस्तेसुखीपादेदुःखीत्यनुभवासंभवः परमार्थतस्तु परमते सुखादिज्ञानस्यात्माभिन्ननित्यसाक्षिरूपत्वात् कारणानियम्यत्वेनसंभवस्यैवतथाप्युपेत्यदमुक्तंतथाचाणुपरिमाणात्मगुणज्ञानस्यसुखादौविषयत्वकल्पनादात्मनएवहस्तपादाद्यवच्छिन्नसुखादौयुगपत्समवायकल्पनायुक्तेत्यात्मसाक्षिणोर्विशेषाख्यं

नचावयवांतरप्रवेशान्नदस्यः स्फटिककरण्डिकास्थकस्तूर्यादावयवांतरानुप्रवेशकल्पनेमानाभावादितिनिरस्तम् समवायिनैरपेक्ष्ये कार्यस्य निराश्रयत्वापत्तौतत्स्वत्वासत्तिनिबन्धनकारणान्तरस्याप्युच्छेदेकार्यत्वहानेरेवतत्रकल्पनायांमानत्वात् यत्तुनित्यःसर्वगतःस्थाणुरित्यत्रसर्वगतेविभावणुजीवोव्यवस्थितइतिस्मृत्यन्तरानुसारात्सर्वगतस्थाणुश्चेतिविग्रहइति तन्न आकाशवत्सर्वगतश्चनित्यःसवाएषमहानजआत्मेतिश्रुत्यनुसार्यर्थस्यैवोचितत्वात् अणुरितिपदच्छेदेतद्विरोधापत्तेः यत्तुक्रमेणनानादेहसंबन्धादणोरेवसर्वगतत्वोक्तिरिति तन्न अशेषवाचिसर्वशब्दसंकोचेमानाभावात् यत्तुमत्स्यसत्वादिनैवाव्यापकत्वंसाधनीयमित्युक्तं तन्न प्रतिकूलतर्कस्योक्तत्वात् व्यापकत्वसाधनेतस्यैवानुकूलत्वेनाप्रयोजकत्वाभावाच्च नन्वात्मनोव्यापकत्वेसर्वाणिशरीराणिसर्वस्यैवभोगायतनानिस्युः तथाहिसर्वशरीरेंद्रियादीनांसर्वदासर्वात्मसंयुक्तत्वात्कर्मणामपिसाधारणदेहादिकृतत्वेनासाधारण्यायोगात् अहंत्वारोपादेपिनियामकमूलसंबन्धादेरभावेनैयत्यायोगादितिचेत् नतथापीश्वरस्यव्यापकत्वेनसर्वशरीराणांतद्भोगजनकत्वापत्तेःसमानत्वात् नचतददृष्टाजन्यत्वात्तत्संयुक्तत्वेपिनतत्रभोगजननंतर्हीहापिसमं नचकर्मणामेवकथमसाधारण्यंपूर्वतत्कर्मजन्यत्वात् एवमनादितैव अन्यथाईशात्मनितवाप्यगतेःचैत्रभोगजनकांकुरादेःतददृष्टजन्यत्वात् आत्मसमवेतस्यचादृष्टस्यसाक्षादंकुरासंबन्धात् आत्मद्वारसम्बन्धस्यवाच्यतायामात्मनोविभुत्वम् नच चैत्रभोगाहेतोरप्यंकुरादेरात्मद्वाराऽदृष्टसंबन्धेपितदजन्यत्वेनस्यात्तन्त्रत्वमितिवाच्यम् जनकादृष्टनिरूपितात्मद्वारकसन्निकर्षस्यातिप्रसंगाभावेनतन्त्रत्वात् जनकतात्वदृष्टस्यफलैकोन्नेया एवमेवोपपत्तौ प्रतियोग्यभाववाच्यवाचकज्ञानज्ञेयाद्यविवादृष्टकार्ययोरपिसंबन्धान्तरस्वीकारेमानाभावः यत्तुकारीर्यदृष्टस्यदृष्टस्यासहतदुद्देशेनविहितक्रियाजन्यत्वादिरूपःसंबन्धोस्तीत्युक्तम् तन्नतत्रापियजमानात्मद्वारकसंयुक्तसमवायस्यैवजलक्षरणादिप्रयोजकत्वात्·॥ ॥

भेदप्रतिनिधिंस्वीकृत्यगुणगुणित्वयोरणुत्वव्यापकत्वयोःकल्पनंमहागौरवपराहतमितिभावः मानत्वादिति स्फटिककरंडकायांतुकस्तूरिकाभागनिःसरणकालेऽवयवांतरंप्रविशति। तदप्रवेशेपिसूक्ष्मभावश्चतोलनसमयेस्वल्पन्यूनत्वस्यानुपलब्धिसंभवात् मानाभावादिति। क्रमेणमनुष्यादिजातीयसर्वदेहपरिग्रहेपिनान्यात्माधिष्ठितदेहगतत्वंसमुद्रांतःपातिवालुकादिगतत्वंवाजनकादृष्टेति। जनकतावच्छेदकवैजात्यविशिष्टादृष्टेत्यर्थः समवायस्यैवेति·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कार्यकारणयोस्तत्तावच्छेदकसम्बन्धलाभायसम्बन्धोमृग्यते उक्तलाभश्चात्मद्वारकोक्तसम्बन्धेनैवसमवायेनजलगतस्परणंप्रतिजलगतेनस्वाश्रयात्मसंयोगेनोक्तादृ
ष्टस्यहेतुत्वादुक्तक्रियाजन्यत्वसम्बन्धेनतुनोक्तलाभइतिभावः। प्रागुक्तैवेतिदेहात्मनोर्नसंयोगः सम्बन्धः किंत्वध्यस्तंतादात्म्यंतदपिकर्ममूलकंतदपिपूर्वकर्ममूलं नित्यनव
स्थात्वनादित्वादनिर्वाच्यवादानुकूलत्वाच्चनदोषइत्याद्युक्तं नन्वीश्वरस्याचिंत्यशक्तित्वाज्जीवादृष्टभोगादेर्नेश्वरे आपत्तिरितिचेन्नहितत्रएवसर्वत्रसमाधानसंभवे।
नत्वदीययुक्तिशास्त्रवैयर्थ्य ननु अंकुरादावदृष्टस्यना महारकसम्बन्धेनहेतुत्वंकिंतुस्वाश्रयकालवृत्तित्वेनस्ववृत्तिमेयत्वाश्रयत्वेनस्ववृत्तिसत्ताश्रयत्वादिनावासम्ब
न्धेनांकुराद्यवयवनिष्ठेनेतिचेन्नविनिगमकाभावेनस्ववृत्तिद्रव्यत्वाश्रयत्वादिनाकारीर्यदृष्टादिहेतुत्वानंत्यापत्तेः सम्बन्धघटकतयाव्यापकात्मव्यक्तिकल्पनस्यैवोचितत्वात्।
नचतथात्वेनादृष्टतत्कार्ययोरेकजातिकल्पनापिस्यादितिवाच्यंसांकर्यादिदोषादेकात्मव्यक्तेः स्वकलादृष्टसम्बन्धघटकतयाकल्पनयैवोपपत्तौनानात्मव्यक्तीनांतदी।

एतच्चसर्वंपरीत्योक्तम् स्वमतेचव्यवस्थाप्रागुक्तैव तथाचबुद्धेर्गुणे——————नात्मगुणेनचैवह्याराग्रमात्रोह्यवरोपिदृष्टइतिश्रुतौबुद्धिगुणेनारा
ग्रमात्रत्वोक्तेः स्वाभाविकमेवविभुत्वं नचात्रात्मगुणेनाराग्रमात्रत्वंबुद्धेर्गुणेनचावरत्वमितिव्युत्क्रमयोजनातद्यथाऽणुनश्चक्षुषः प्रकाशोव्याप्तः ए
वमेवास्यपुरुषस्यप्रकाशोव्याप्तः अणुर्ह्येवैषपुरुष इतिश्रुत्यनुसारादितिवाच्यम्व्यापकत्वबोधकानेकश्रुतिविरोधेनबुद्धेर्गुणेनेत्येतदनुसारेण चा।
स्याएवौपाधिकाणुत्वपरत्वात्पुरुषस्येतिषष्ठ्याराहोः शिरइत्यादिवदुपचरितार्थत्वाच्च तथाचनव्युत्क्रमेणान्वयः तस्मादणुत्वंनात्मभेदकम्॥ आत्म
नोऽणुत्वभङ्गः॥ ३५॥ स्थितानिग्रन्थेषुप्रकटमुपदिष्टानिगुरुभिर्गुणावादोषोवानममपरवाक्यानिवदतः परंत्वस्मिन्नस्तिश्रमफलमिदंयन्निजधियाश्रु
तीनांयुक्तीनामकलिगुरुवाचांचविषयः॥ ❁ ॥ इत्यद्वैतसिद्धावात्मनिरूपणंनामद्वितीयःपरिच्छेदः॥ २॥ ❁ ॥ शुभं ॥

याणुपरिमाणानांचकल्पनेगौरवादितिदिक्॥ औपाधिकाणुत्वेति। चक्षुषोपिसावयवत्वेनमध्यमपरिमाणत्वादात्मनोपितद्वाच्यंनतुमुख्याणुत्वंतथात्वत्वन्मतेप्यात्मनितस्यासं
भवात् जन्यत्वाद्यापत्तेश्चौपाधिकमेवतत् अतएवश्वेताश्वतरे अंगुष्ठमात्रोरवितुल्यरूपः संकल्पाहंकारसमन्वितोयइत्युक्त्वाबुद्धेर्गुणेनेत्याद्युक्तमितिभावः उपचरितार्थत्वा
त् कल्पिततादात्म्यार्थत्वात्। राहुत्वशिरस्त्वाभ्यामिवप्राप्तप्रकाशरूपशुद्धात्मबुद्ध्युपहितात्मत्वाभ्यांकल्पितभेदेनकल्पिततादात्म्यसत्वात्घटस्येनेत्यमित्यादाविवमुख्यार्थे
वषष्ठीचक्षुषः प्रकाशेपिविस्तृतावस्थारूपेतथैवसम्बन्धस्यवाच्यत्वात्। व्युत्क्रमेणेतिबुद्धेर्गुणेनाराग्रमात्रः आत्मगुणेत्ववरोपिश्रवणमननादियुक्तैर्दृष्टः साक्षात्कृतः नास्तिवरो।
महान्यतः सतया अपच्छिन्नइतियावत्। बुद्धेर्गुणोमध्यमपरिमाणंमुख्यमात्मगुणस्त्वपरिच्छिन्नत्वंनमुख्यगुणः किंत्वात्मस्वरूपइत्याशयेनगुणपदोत्तरमुक्तमन्यथाबुद्धेरात्मन
श्चगुणेनेतिब्रूयात् तथाचक्रमान्वयसंभवेव्युत्क्रमोनयुक्तइतिभावः तर्कैः सारस्वतैरत्नैः चंद्रिकाचंद्रभूषणैः दुरंतध्वांतभंगायआत्माणुत्वस्यभंजनं॥ द्रौपदीशाकमात्राद्यैस्त्रिलोकी
येनतर्पितातज्जीवब्रह्मणोरैक्येब्रह्मैवसाक्षिणोहरिः॥ इत्यद्वैतसिद्धिटीकायांद्वितीयःपरिच्छेदः समाप्तः॥ २॥

CC-0. In Public Domain. Digitization by eGangotri

॥ अथलघुचन्द्रिकोपेताया अद्वैतसिद्धाः तृतीयपरिच्छेद प्रारम्भः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उ.३
अ.सि.
टी.ल.
१

॥ॐ श्रीगणेशायनमः॥ श्रीनारायणतीर्थानांगुरूणांचरणस्मृतिः॥ अहंतयैवव्याकुर्वेसारस्वतसरस्वतीः तदंगतयामुमुक्षुभिरनुष्ठेये। तदिच्छाप्रयुक्ते
च्छाधीनमुमुक्षुप्रवृत्तिविषये अंगस्यांगिरूपफलेच्छाधीनचिकीर्षाजन्यकृतिसाध्यत्वादपूर्वविशिष्टयागेच्छयाप्रयाजादेरिवसाक्षात्कारविशिष्टश्रवणेच्छयाम
नननिदिध्यासनयोश्चिकीर्षाश्रवणस्यमननाद्यंगत्वाभावेतुसाक्षात्कारेच्छयैवतयोःसेतिअंगांगितविचारस्यकर्तव्यस्यफलमितिभावः। प्रमेयावगमंप्रत्य
व्यवधानात् प्रमाणस्वरूपंप्रतिकारणत्वात्। प्रत्यगात्मप्रवणेति। ब्रह्मात्मैक्यमात्रविषयकेत्यर्थः। तदेकाग्रवृत्तीति। विपरीतभावनाशून्यब्रह्मात्मैक्याकार
वृत्तीत्यर्थः॥ मननेनासंभावितत्वज्ञानरूपस्योपेक्षाज्ञानचित्तविक्षेपयोर्हेतोर्निवृत्त्योपेक्षानात्मकब्रह्मात्मैक्यमात्रज्ञानेनोक्तसंस्कारेणनिदिध्यासनेन
चतस्यवाहुल्यरूपंतत् प्रयुक्तजातिविशेषरूपंवादार्ढ्यंसंपद्यतेततोविपरीतसंस्कारनिवृत्त्योक्तैकाग्रवृत्तिरितिभावः। ब्रह्मानुभवहेतुतां अविद्यानि
वृत्त्युपधापकानुभवप्रयोजकतां अंगस्यप्रधानजन्यफलाहेतुत्वात्। नचोक्तदृढसंस्कारद्वारोक्तैकाग्रवृत्तिरूपोक्तानुभवप्रयोजकतांप्रतिपद्यतेइत्ये

॥ॐ॥ तदेवमैकात्म्येव्यवस्थितेतत्साक्षात्कारायश्रवणमङ्गिमनननिदिध्यासनेतदङ्गतयामुमुक्षुभिरनुष्ठेये तदुक्तंविवरणेश्रव
णमङ्गिप्रमाणस्यप्रमेयावगमंप्रत्यव्यवधानात् मनननिदिध्यासनेतुचित्तस्यप्रत्यगात्मप्रवणसंस्कारपरिनिष्पन्नतदेकाग्रवृत्ति
कार्यद्वारेणब्रह्मानुभवहेतुतांप्रतिपद्येतेइतिफलोपकार्यंगे ननुश्रवणंतावद्विचाररूपंशाब्दज्ञानेनकरणंवेदेनधर्मइवब्रह्मणिप्रमी
यमाणेविचारस्यानुमानादौतर्कस्येवशब्दरूपेतज्ज्ञानरूपेवाकरणेइतिकर्तव्यतामात्रत्वादितिचेन्नशब्दशक्तितात्पर्यावधारणंताव
द्विचारः अवधृतशक्तितात्पर्यकश्चशब्दःकरणमितिविचारस्यकरणकोटिप्रवेशेनेतिकर्तव्यतात्वाभावात् अंगित्वनिर्णयात् तदुक्तंविद्यासा
गरेअनुमितौलिङ्गज्ञानवत्तात्पर्यविशिष्टशब्दज्ञानंकरणंअतस्तात्पर्यावधारणरूपविचारस्याङ्गित्वं॥ १ वकुतोनोक्तमितिवाच्यं विपरीतसंस्का
रनिवृत्त्युत्पत्तिकालेजायमानवृत्तावप्रामाण्यशंकासंभवेनतत् शून्यवृत्त्यंतरस्यैवाविद्यानिवृत्त्युपधापकत्वात्। फलोपकार्यंगेउक्तैकाग्रवृत्तिरूपोयःफलस्या
प्रामाण्यशंकाशून्यसाक्षात्कारस्यप्रयोजकउपकारस्तज्जनकांगे शक्तितात्पर्येति प्रमाजननानुकूलशक्तिरूपतात्पर्येत्यर्थः अपौरुषेयेवेदेपुरुषेच्छा
रूपशक्त्यभावात्। करणकोटिप्रवेशेन। करणतावच्छेदकघटकत्वेन। ननुशब्दत्वेनैवकरणत्वंनत्ववधृततात्पर्यकशब्दत्वेनगौरवात्तत्राह तदुक्तं
विद्येति। लिंगज्ञानवत् लिंगविशिष्टज्ञानवत्। तात्पर्यविशिष्टशब्दज्ञानं। तात्पर्यावधारणविशिष्टशब्दज्ञानं॥ लिंगज्ञानत्वेनकरणताग्राहकंज्ञायमान
लिंगत्वेनेवशब्दज्ञानतात्पर्यावधारणत्वेनकरणताग्राहकंमानमवधृततात्पर्यकशब्दज्ञानत्वेनापिकरणतांगृह्णातिविशिष्टधर्मिकमानस्यबाधकंविनाविशेषणे
विधेयग्राहकत्वनियमात्ज्ञायमानलिंगस्यातीतादेरपिज्ञानसंबंधेनकारणत्वमित्यादिकमुदयनमतेप्रथमपरिच्छेदेऽस्माभिरुक्तंविशेषणस्यकरणताग्राहकत्वेऽन्य

राम.
३३६

CC-0. In Public Domain. Digitization by eGangotri

नचाकांक्षेतिविभक्त्यादिसमभिव्याहारविशेषरूपाकांक्षाविशिष्टनामादिशब्दज्ञानत्वेनादिपदात्पदांतरेणसहसंभूयविशिष्टार्थबोधकमिदंपदमित्या।
कारज्ञानत्वेनैवचकारणत्वसंभवेइत्यर्थः। एवकारादवधृततात्पर्यकशब्दज्ञानत्वेनकारणत्वव्यवच्छेदस्तत्रहेतुरुपक्षीणतयातात्पर्यज्ञानस्येत्यंतं। उपक्षीणत
या। अन्यथासिद्धातथाचावधृततात्पर्यकशब्दत्वेनापिनतरांकरणतेतिभावः करणकोटिप्रवेशइति। अपीत्यादिस्तात्पर्यज्ञानस्येत्यनुषज्यतां उक्तज्ञानत्वेनैव
चकरणत्वसंभवेपितात्पर्यज्ञानस्यकरणकोटिप्रवेशेत्यर्थः। आकांक्षादिकमिति तथाचाकांक्षादिज्ञानाभावेविपरीतव्युत्पन्नस्येवतात्पर्यज्ञानाभावेमुका।
दिवाक्यश्रोतुः शाब्दबोधोत्पत्तावपिस्वविशिष्टशाब्दबोधेसाकांक्षशब्दज्ञानस्येवतात्पर्यज्ञानस्यापिहेतुत्वमन्वयव्यतिरेकवत्त्वात्यदभावविषयकोत्पत्त
संशयव्यतिरेकनिश्चयोपत्वप्रतिबंधकोतन्निश्चयत्वहेतुरितिव्याप्तेश्चेतिभावः। अन्योन्याश्रयः। वाक्यार्थस्यशाब्दबोधपूर्वमानांतरेणाऽनिश्चयात्शाब्द
निश्चयेसत्येववाक्यार्थघटिततात्पर्यनिश्चयस्तस्मिन् सत्येवशाब्दनिश्चयइत्यन्योन्याश्रयः। सामान्यतस्तात्पर्यनिश्चयकालीनापातरूपेणपदार्थत्वरू

नचाकांक्षादिसहितशब्दज्ञानस्यैवकरणत्वसंभवेतात्पर्यभ्रमनिरासोपक्षीणतयोक्ततात्पर्यज्ञानस्यकरणकोटिप्रवेशेमननादेर
पितत्कोटिप्रवेशः स्यादितियुक्तं एवंह्याकांक्षादिधियोपिनिराकांक्षत्वादिभ्रमनिरासकत्वमात्रेणोपपत्त्यावाकांक्षादिकमपिक
रणकोटिप्रविष्टंनस्यात् नचान्योन्याश्रयः सामान्यतोर्थावगमेन तात्पर्यग्रहसंभवात् अन्यथानानार्थादौविनिगमनादिकंच
नस्यात् तथाच सर्वत्रतात्पर्यज्ञानस्याजनकत्वेपियत्रतात्पर्यसंशयविपर्ययोत्तरशाब्दधीः तत्रतात्पर्यज्ञानस्यहेतुताग्राह्यसं
शयविपर्ययोत्तरप्रत्यक्षेविशेषदर्शनस्येव अतएवनविवरणविरोधोपिनतुतात्पर्यज्ञानस्यकरणकोटिप्रवेशेवेदेपितात्पर्य।
भ्रमसंभवात् वाह्यागमेपितात्पर्यप्रमासंभवात् शाब्दज्ञानकरण दुष्टत्वादुष्टत्वव्यवस्थानस्यादितिचेत्॥९ पेणपदार्थविषयके

नवा॥ नानार्थेति॥ अन्वययोग्यनानार्थोपस्थापकपदेत्यर्थः। गांदेहीत्यादौधेनुभूतलादिनानार्थानांदानकर्मत्वान्वययोग्यत्वेनयोग्यताननिविनिग।
मिका किंतुतात्पर्यमितिभावः। विपर्ययोत्तरेतितात्पर्यनिश्चयोत्तरोपलक्षणम्। विशेषदर्शनस्येवेति तदनुत्तरप्रत्यक्षेविशेषादर्शनस्येवस्वविशिष्टा
न्यशाब्दबोधेतात्पर्यज्ञानाभावस्यहेतुतातेनतात्पर्यानिश्चयेपिसामान्यसामग्र्याशाब्दबुद्धेर्नापत्तिः। एवंचलिंगन्यायेनावधृततात्पर्यकशब्दत्वेनहेतु
त्वंमन नादौतुनलिंगन्यायः शब्दाघटितरूपेणैवतत्रहेतुत्वात् विनिगमकाभावेनायुक्तशब्दत्वेनतद्धेतुत्वंविवरणविरोधः। विवरणोक्तश्चवर्णागि
त्वविरोधः। तात्पर्यप्रमासंभवात्। स्वर्गकामःसिकताभक्षयेदित्यादौसिकताभक्षणादौस्वर्गसाधनत्वबाधेपितन्मतेबाधाभावसंभवेनाबाधितवाक्यार्थतात्प
र्यधीसंभवात्। नस्यादिति तथाचाप्तशब्दत्वेनैवशाब्दप्रमायामनाप्तशब्दत्वेनशाब्दभ्रमेहेतुत्वावश्यकत्वेतात्पर्यज्ञानमन्यथासिद्धमित्यभिमानः॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।कुत्रचिद्विषयेदुष्टत्वेन। यथार्थतात्पर्यशून्यत्वेनतथाचाबाधितवाक्यार्थधीरेवशाब्दप्रमाहेतुर्वीयागमेतुवाक्यार्थोबाधितोवाद्यानामबाधितत्वधी।
स्तुनोपयुक्तावस्तुतोनिर्दोषत्वरूपाप्तत्ववत्। शब्दत्वेनशाब्दप्रमाहेतुत्वेप्युक्तयुक्त्यातात्पर्येणावधारितशब्दत्वेनापिहेतुत्वमव्याहतं। करणतावच्छेदकघ।
टकत्वेनशेषित्वमुक्त्वाकरणंप्रतिसन्निपात्यंगत्वेनापितदाह तात्पर्यांशिस्येति। तात्पर्यावधारणस्येत्यर्थः। अप्रयोजकत्वादिति। ननुकरणोपकारकगतदृष्टादृष्टान्य
तरोपकारजनकांगत्वमेवसन्निपात्यंगत्वमितिचेत्। केनत्वमित्थंप्रतारितः करणस्वरूपेतद्गतयोग्यतायांवाप्रयोजकांगत्वमेवहितदन्यथाद्रव्यदेवतादीनां
सन्निपात्याराद्उपकारांगयोरंतर्भावासंभवेनतृतीयांगकल्पनापत्तेर्नहिद्रव्यादिकंकरणीपद्रव्येऽवघातादिवत् दृष्टंप्रोक्षणादिवददृष्टंवातिशयंजनयतिकिंचा
भिक्रमणादेः प्रयाजादिकंप्रतित्वन्मतेसन्निपातित्वमाराद्उपकारकत्वंवानाद्यउक्तलक्षणाभावात्। करणोपकारकोद्देशेनविहितत्वंहिलक्षणंत्वयावाच्यम
न्यथाकर्तृगतादृष्टजनकस्यापितदापत्तेः। नांत्यः सन्निपातित्वसंभवेतस्यान्यत्वात्। मन्मतेतुकर्तृसंस्कारनिष्पद्वाराप्रयाजहोमनिष्पादकत्वात्संनिपात्यंगतोप
पत्तिः। तथाचप्रोक्षणादेर्व्रीह्यादिनिष्ठातिशयाधीनकरणनिष्ठयोग्यतायामिवतात्पर्यावधारणस्यापिकरणीभूतशब्दनिष्ठायामेवतत्तात्पर्यकत्वरूपयोग्य।

नवेदेकदाचित्कस्यचित्कुत्रचित्तात्पर्यभ्रमेपिनिर्दुष्टत्वेनयथार्थतात्पर्यमस्त्येव परागमेतुपौरुषेयतयाप्रतारणादिमत्पुरुष।
प्रणीततयादुष्टत्वेननतथेतिदुष्टत्वादुष्टत्वव्यवस्थासंभवात् तात्पर्यांशस्यावघातादेरिवयागेशब्देसन्निपत्योपकारकतयाकरणको।
टिनिविष्टत्वेनांगित्वम् नचदृष्टान्तेकरणद्रव्यशेषत्वात्तथा सर्वसाम्यस्यदृष्टान्तत्वाप्रयोजकत्वात् ननुसंनिपत्योपकारकत्वेपिन।
फलोपकारकमनननिदिध्यासनरूपांगंप्रतिशेषिता अन्यथाप्रयाजादिप्रति अवघातादिः शेषीस्यादितिचेत् नविशिष्टयाग
तायांप्रयोजकत्वात् सन्निपात्यंगत्वमव्याहतं। तस्माद्गुणकर्मत्वरूपेऽयंसन्निपातित्वविभ्रमः तदेवंयुज्यते ऐप्रविष्टतयाशेषित्वेद्दृष्टापत्तेः ॥६
शास्त्रविचारास्समभूपतेः। तथाहिपारमार्षसूत्रंयैस्तुद्रव्यंचिकीर्ष्यतेगुणस्तत्रप्रतीयेतेति। ननुसन्निपात्यंगस्यापिकथमंगित्वंपूद्देशेनयद्विहितंतत
स्यैवतदंगित्वेनावघातादेः प्रयाजाद्यंगित्वा संभवादितिचेन्न परमापूर्वप्रयोजकयोग्यताविशिष्टयागमुद्दिश्यैवप्रयाजादिकंविधेययागस्वरूपेतत्सा
धनत्वासंभवात् तथाचोक्तयोग्यतायायागस्वरूपस्यचोद्देश्यत्वेनांगित्वात्। योग्यतोपधायकत्वोपहितेनरूपेणप्रोक्षणादेः यागस्वरूपोपहितवेतुथ्या
द्युपहितरूपेणावघातादेश्चांगित्वसंभवात्तद्वदवधृततात्पर्यकत्वरूपायांत्रह्मानुभवप्रयोजकयोग्यतातद्विशिष्टशब्दोद्देशेनमननादेर्विधानादु
क्तयोग्यताया अपिउद्देश्यत्वेनांगित्वादुक्तयोग्यतोपहितरूपेणतात्पर्यावधारणस्यमननाद्यंगितातदिदमुक्तं विशिष्टयागप्रविष्टतयेति। यागत
न्निष्ठयोग्यतान्यतरोपहितरूपेणेत्यर्थः। शेषितेप्रयाजादिकंप्रतिव्रीह्यवघातप्रोक्षणादेः शेषित्वे॥

CC-0. In Public Domain. Digitization by eGangotri

असाधारण्येनोक्तान्यरूपेण अवघातत्वादिना। असाधारणफलोपकारकत्वे। असाधारणस्य मुख्यफलोपकारस्य जनकत्वे। असंभावनाविशेषेति। तात्पर्यासंभावनावि-
शेषेत्यर्थः। जनकत्वादसाधारण्येन जनकत्वात्। सातात्पर्यावधारणात्वरूपासाधारण्येन शेषिता। उक्तान्यतररूपफलोपकारजनकत्वस्यावघातत्वादिरूपेण स-
त्वेपि तेन रूपेण स्वर्गादिरूपमुख्यफलाजनकत्वाच्च शेषितात्पर्यावधारणात्वरूपेण शाब्दसाक्षात्काररूपमुख्यफलजनकतातृक्तैवेत्याशयेन श्रवणस्यैवोक्तात-
थाचोपकारस्यासाधारण्यमुख्यफलजनकतानिर्वाहकत्वरूपं विवक्षितमिति भावः। करणीभूतशब्दगतेति। उक्तासाधारणेत्यर्थः। अथवा संनिपत्योपकारका-
त्वेनांगित्वसंवादोपमिति यथाश्रुत एवार्थः मनननिदिध्यासनयोस्त्विति तु शब्दात् संनियत्योपकारकत्वेन मुख्यफलजनकत्वेन वानांगित्वमित्यर्थः। दीक्षणीयाद्यंगस्य
दीक्षणीयादिरूपस्यांगस्यातद्गतातिशयेति सोमगतातिशयेत्यर्थः। अभिषवग्रहणादीति सोमममभिषुणोति आश्विनं गृह्णातीत्याद्युक्ताभिषवादीत्यर्थः उक्तोत्तरत्वा-

असाधारण्येन शेषितातु असाधारणफलोपकारकत्वे स्यात् असंभावनाविशेषनिवृत्तिरूपासाधारणोपकारजनकत्वात्तस्यापि श्रवणस्यासंभावितैव
अतएवोक्तं चित्सुखाचार्यैः करणीभूतशब्दगतातिशयहेतुत्वात् श्रवणस्य करणत्वेनांगित्वं मनननिदिध्यासनयोस्तु सहकारिभूतचित्तगतातिशयहे-
तुत्वात् फलोपकार्यंगतेति नचैवं सोमयागसहकारिभूतदीक्षणीयाद्यंगस्य तद्गतातिशयहेत्वभिषवग्रहणादिकं प्रत्यंगत्वं प्रसज्येतेति वाच्यम् पूर्ववा-
दुक्तोत्तरत्वात् तदुक्तं तत्त्वशुद्धौ करणीभूतशब्दधर्मशक्तितात्पर्यविषयत्वात् श्रवणस्य करणान्तर्भावेनांगित्वमिति नच शब्देनापरोक्षज्ञानस्यावप्र-
तिरुद्धापरोक्षज्ञानोत्पाद्यायां मनननिदिध्यासनयोरिव परोक्षज्ञानस्यावप्रतिरुद्धपरोक्षज्ञानोत्पाद्यायां श्रवणस्याप्यपेक्षिततया त्रयाणामपि फ-
लोपकार्यंगत्वमेवेति कथं परस्परांगांगिभाव इति वाच्यम् मनननिदिध्यासने फले जनयितव्ये शब्दस्य सहकारिणं संपादयतः श्रवणं तु
तस्य फलजनकतामेवेति विशेषात् यत्र च नैवं तत्र तुल्यवदंगत्वेव एतेन यो वृष्टिकामो योन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत॥९

त। विशिष्टयागप्रविष्टतया शेषित्वस्येष्टत्वादित्युक्तोत्तरत्वात्। जनकतां जननयोग्यतां। योवृष्टीत्यादि। ब्रह्मसामाख्यस्तोत्रं प्रकृत्य यो वृष्टीत्यादिवाक्यं श्रुतं तेन वृष्ट्या-
द्युद्देशेनोक्तस्तोत्राश्रितं सौभराख्यसाम विधीयते सौभराश्रितं हीषादिकं वृष्ट्यादिफलाय विधीयते सौभरस्य निधनाख्याऽन्तिमावयवाधारतया हीषादीनां शाखाभेदे-
न पाठात् निधनावच्छेदेनैवाश्रयत्वमिति प्राप्ते फलोद्देशेन हीषादेरपूर्वविधिकल्पने गौरवादुक्तपाठादनियमेन सौभरांगतया प्राप्तं हीषादिकं नियम्यते वृष्टिसाधनसौभर एव
हीषिति अन्नाद्यसाधनसौभर एव ऊर्गिति स्वर्गसाधनसौभरस्य ऊ इति हीषादिशून्यनिधनयुक्तसौभरस्य शाखांतरे क्वचित्पाठेपि तत्र हीषादीनां पक्षेप्यप्रा-
प्ततात्तत्प्रकृते उद्देश्यता। नच वृष्टिकामादिपदेषु वृष्ट्यादिसाधनसौभरेषु लक्षणादोषः वृष्ट्यादिकामपुरुषशेषत्वमेव हि हीषादीनां वाक्यार्थः। नियमविधित्वाद्यनुरोधेन वृष्ट्या-
दिसाधनसौभरद्वारकं परं तत्स्वीक्रियते साक्षात् शेषत्वे बाधके सति परंपरया तत्स्वीकारस्य युक्तत्वात्। वृष्टिकामादिपदैः स्वसाधनसौभरद्वारा वृष्ट्यादेः भाव्यत्वेन बोधनसंभवाच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्हीषादिकंसौभरेतिकर्तव्यतारूपंनतुवृष्ट्यादिफलसाधनमितिद्वितीयद्वितीयेस्थितां फलायसौभरेतिकर्तव्यतानिधनगतहीषादीनांफलानुकूलासौभरगतयोग्य
तातज्जनकानांनिधनगतहीषादीनां।करणस्वरूपसंपादकत्वेति।करणस्वरूपतद्गतयोग्यतान्यतरप्रयोजकत्वेत्यर्थः।तत्प्रयोजकत्वस्य अंग्यंगभावप्रयोजकत्वस्य अत्र श्र
वणमननयोः।तत्र।हीषऊर्गाद्योः।ननुमननादिरूपंकरणसहकारिणांप्रतिश्रवणस्यश्रवणत्वरूपासाधारण्येनैवप्रयाजादिरूपंकरणसहकारिणांप्रतिअवघातादेरवघात-
त्वादिरूपासाधारण्येनांगित्वस्यात्रचमुख्यफलजनकतापर्यवसितस्यासाधारणफलोपकारकत्वस्याभावान्नतदितिवाच्यंकरणस्वरूपतद्योग्यतान्यतरस्यापिकिंचिदपेक्ष्यमु-

हीषितिवृष्टिकामायनिधनंकुर्यात् ऊर्गित्यन्नाद्यकामायऊइतिस्वर्गकामायेतिश्रुतानांवृष्ट्यादिफलायसौभरेतिकर्त्तव्यतानिधनगतहीषादीनांश्र
वणमननादिवत्परस्परमंगांगिभावप्रसंगइतिनिरस्तम् करणस्वरूपसंपादकत्वसहकारिसंपादकत्वरूपतत्प्रयोजकत्वस्यात्रैवतत्राभावा
त् नचैवंकरणापूर्वोत्पत्तौयागार्थस्यावघातादेः परमापूर्वोत्पत्तौतदर्थः प्रयाजादिःशेषःस्यादितिवाच्यं एकफलेउभयोर्यागार्थत्वाभावेनवि
शेषात् ननुक्लृप्तपरोक्षज्ञानंलोकेशब्दस्यफलं तथाचशब्दातिशयाधायकस्यश्रवणस्यसाक्षात्कारफलेजनकांगित्वंकथमितिचेत् सा
क्षात्त्वंनजातिः नवाइन्द्रियजन्यत्वादिकंनियामकंकिंतुविषयगताज्ञाननिवर्त्तकत्त्वमेवापरोक्षत्वेप्रयोजकंतच्चाज्ञाननिवर्त्तकत्त्वंविषयपर्यन्त
त्वेनतच्चात्मपर्यन्तत्वादत्रास्त्येवेतिनादृष्टकल्पना इदंचप्रकरणवलादपिसिद्धमस्यांगित्वंश्रवणस्यफलसंवन्धेनप्राधान्यसिद्धावितिकर्त्त
व्यताकांक्षायाःसम्भवात् ननुयद्यपिचित्तैकाग्र्यस्यसूक्ष्मवस्तुज्ञानहेतुत्वंदृष्टमस्तितथापिमननंनचित्तैकाग्र्यहेतुःयुक्त्यनुसन्धानरूपमनन-
स्यायुक्तत्वशङ्कानिवर्त्तकतायाएवदृष्टत्वेनचित्तैकाग्र्यहेतुत्वकल्पनेसतिदृष्टहान्यापत्तेःमननविधेरपूर्वत्वापाताच्चमतिर्यावद्युक्तेतिस्मृतिविरो-
धाच्चेतिचेत् नतर्हिकशंकायांसत्यांनानाकोटौचित्तविक्षेपस्य तस्याश्चनिवृत्तौयुक्तत्वेनावधारणविषयकोटौचित्तप्रवणतायास्तावत्पर्यन्तमस्यदृष्ट
त्वेनदृष्टहान्यपूर्वविधिस्मृतिविरोधाभावात् निदिध्यासनस्यतुविपरीतसंस्काररूपविपरीतभावनानिवर्त्तकतासकलसिद्धा॥

ख्यत्वेनतज्जनकतासत्वादि-
त्याशंकांनिरस्यति नचैवमित्यादिकरणापूर्वोत्पत्तौयागार्थस्य।उत्पत्त्यपूर्वजनकतयायागतद्योग्यतान्यतरजनकस्य।परमापूर्वोत्पत्तौतदर्थः।परमापूर्वजननीयेयागसह-
कारी एकफलेइत्यादि।यस्मिन्परमापूर्वेजननीयेप्रयाजादिर्यागसहकारीतज्जनकत्वस्यावघातत्वादिरूपेणावघाताद्यभावेनविशेषादित्यर्थः।तथाचयस्मिन्फलेसहका-
रिणांप्रसंगितावाच्यातत्त्वमेवमुख्यत्वमुक्तमितिभावः।शब्दातिशयाधायकस्य।शब्दफलशाब्दबोधजनकस्य।साक्षात्कारफलेइत्यादि।यस्मिन्साक्षात्कारेजननीयेमननादिकंसह-
कारितज्जनकत्वेनांगित्वंयदुक्तंतत्कथमित्यर्थः।पर्यंतत्वेनसंस्पृष्टत्वेन।अत्र।श्रवणजन्यशाब्दज्ञानेप्रकरणवलात्।इतिकर्त्तव्यताकांक्षावलात्।फलसंवंधेनवक्ष्यमाणरीत्याद्रष्ट-
व्यः श्रोतव्यइतिश्रुत्युक्तेनफलसंवंधेन इतिकर्त्तव्यताकांक्षायाः। स्वनिष्ठायांफलजननयोग्यतायांजनकाकांक्षायाः।भावनानिवर्तकतासंस्कारनिवर्त्तकता·॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजततयाज्ञातरजतत्वावच्छिन्नप्रकारतानिरूपितज्ञानीयविशेष्यतावत्। सत्वादिति। तथाचतथासंस्कारानुवृत्तौ शुक्तिप्रत्यक्षमसिद्धमिति भावः। इत्या
दाविव। इत्यादिमंत्रस्य बर्हिर्लवनादौ स्वीयसाधनताबोधकसामर्थ्यमिव फलसंबंधे। फलस्य निदिध्यासननिष्ठसाधनत्वे। न शक्तिर्नबोधकत्वरूपं।
सामर्थ्यं मंत्रादिसाधननिष्ठमर्थप्रकाशनसामर्थ्यमेव शब्दसामर्थ्यविधया श्रुतिकल्पनद्वारा साधनताबोधकं न तु साधनबोधकशब्दनिष्ठमिति भा
वः। अध्याह्रियते। तत इत्यनेन परामृश्यते न चक्षुषा दृश्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु इत्यादिवाक्ये कर्म
णः पूर्वमुक्तत्वात्तस्यैव श्रवणरूपविचारात्मकस्य परामर्शः कर्मत्वरूपेण परामर्शेपि योग्यताबलात् श्रवणात्मककर्मभानं न कर्मणेति निषेधस्तु
तदन्यकर्मणः ज्ञानप्रसादपदेन मननाधीनबुद्ध्यैकाग्र्यस्य विशुद्धसत्वपदेन निष्कामकर्मानुष्ठानाधीनसत्वशुद्धेः ध्यायमानपदेन निदिध्यासनस्योक्तत्वा
द्वशिष्टश्रवणस्यैव ततः पदेन वक्तुमौचित्यात्। अव्यवहितपाठेति। सुवर्णं भार्यसुवर्णएव भवति दुर्वर्णोस्य भ्रातव्य इत्यादाविवाव्यहितपठितेष्ट विशे

ननु तन्निवृत्तेर्न ज्ञानहेतुता दृष्टा रूप्यसंस्कारानुवृत्तावपि शुक्तिसाक्षात्कारदर्शनादिति चेत् न इयं शुक्तिरिति ज्ञानानन्तरं तद्रजततया
ज्ञातमिति स्मृतेर्ज्ञातगोचरसंस्कारसत्वेपि तद्रजतमित्यस्मरणेन विपरीतसंस्कारनिवृत्तेस्तत्रापि सत्वात् ननु शब्दसामर्थ्यरूपेण लिंगेन
ततस्तु तं पश्यते निष्कलं ध्यायमान इत्यादिवाक्येन निदिध्यासनस्य फलसंबन्धात् प्रकरणेन च श्रवणादिकं निदिध्यासने सन्निपत्यांग
मिति चेत् न निदिध्यासनपदस्य बर्हिर्देवसदनं दामीत्यादाविव साक्षात्काररूपफलसंबन्धेन शक्तिरिति शब्दसामर्थ्याभावात् वाक्येपि योग्यता
बलाच्छ्रवणमेवाध्याह्रियते तथा च तत्र ततः श्रवणात् ध्यायमानो निष्कलं ब्रह्म पश्यतीत्यनुकूलार्थस्यैव पर्यवसानात् तस्माद्द्रष्टव्यः।
श्रोतव्य इति दर्शनेनाव्यवहितपाठरूपसन्निधानाच्छ्रवणस्य दर्शनेन साक्षादन्वयादङ्गित्वं॥ एषसाधनत्वं श्रवणे विधिना बोध्यते मनननिदिध्यास
नयोस्तु श्रोतव्य इत्यनेन व्यवधानादर्शनरूपेष्टसाधनत्वबोधनासंभवात्॥ प्रकरणेन श्रवणांगतानिश्चयेन श्रवणरूपेष्टसाधनत्वमेव बोध्यते यत्तु दर्शपौर्ण
मासयोः श्रूयते हस्तावनेनिक्ते उलपराजीं स्तृणातीत्यत्राव्यवहितपठितेष्वुलपराजिस्तरणमात्रे हस्तावनेजनं नांगमपि तु योग्यत्वात् तदुत्तरकरिष्यमाणोप्व
पीत्वस्य तृतीयप्रथमे आनंतर्यमचोदनेत्यधिकरणे उक्तत्वात् संनिधानं नान्वयनियामकमिति तन्न तत्र हि हस्तावनेजनस्य कर्तृसंस्कारत्वात्कर्तुश्च प्रयोगा
न्वयित्वेन तद्द्वारा करिष्यमाणसर्वार्थत्वं लिंगप्रकरणाभ्यामुक्तं प्रकृते त्वज्यकरणस्य फलान्वयात्पूर्वमसिद्धत्वाल्लिंगस्य च मननादौ सत्वेपि सन्निधानसहकृत
लिंगस्य बलवत्वेन श्रवणे दर्शनान्वयनियामकत्वसंभवात् तत एव स एव वैहविषा हविर्यजते योदाभ्यं गृहीत्वा सोमाय यजते परा वा एतस्यायुः प्राण एति योंशुं गृह्णा
तीत्यनारभ्य श्रुतं अंशुमदाभ्यमिति यागनामनी अंशोर्यजतस्यश्रवणेपि गृह्णातिचोदनासामान्येन ज्योतिष्टोमप्रकृतिकत्वात् तदीयद्रव्यदेवतासंबंधेन यागत्वसिद्धिस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उ·३
अ·सि·
टी·ल·
४

तथाचनाम्नाभेदात् ज्योतिष्टोमाङ्गिन्नौयागावेतावित्याशंक्य अदाभ्यस्याव्यवहितपाठात् ग्रहणेनैवान्वयाद्दंशौ चयजतेरश्रवणाद्ग्रहणस्यसंस्कारत्वे पिनामसंभवाद्ग्रहणएवनामभेदाद्भिन्नेविधीयेतेतेचज्योतिष्टोमांगेइतिद्वितीयतृतीयेसिद्धांतितं सस्वाख्यायज्ञस्यतस्मात् यत्किंचित् प्राचीनमग्नीषोमीयात्तेनोपांशुचरंतीतिज्योतिष्टोमेश्रुतंउपांशुत्वंअग्नीषोमीयप्राचीनस्यपदार्थस्यांगनतुयज्ञभागस्ययत्किंचिदित्यनेनोक्तपदार्थस्ययज्ञसेत्यनेनोक्तयज्ञापेक्षयासंनिधानादित्युक्तंनचप्रथमे। किंचवेदांतविज्ञानसुनिश्चितार्थाआचार्यवान् पुरुषोवेदेत्यादिवाक्येषुश्रवणादर्शनयोः साधनसाध्यतावोधकत्वंमिः शंकंविज्ञानशब्देनविचारस्यैवोक्तत्वात् सुनिश्चयस्यवेदांतज्ञानमात्रेणासंभवाद्धिशब्दसार्थकानुरोधाच्च आचार्यवत्वस्यविचारसंबंधेनैवोक्तत्वाच्च अन्यथात्रैवर्णिकमात्रस्याचार्यसंबंधेनवाक्यवैयर्थ्यादितिध्येयंनिदिध्यासनस्यदर्शनजननयोग्यतामभ्युपेत्यापिसन्निधानसहितयोग्यतयाश्रवणस्यैवदर्शनान्वयइत्युक्तंवस्तुतोनिदिध्यासनस्यनसेत्याशयेनाह किंचेति। मूलप्रमाणदाढ्यात् निदिध्यासनप्रयोजकवेदांतवाक्यस्यनिर्दोषता

किञ्चनिदिध्यासनरूपभावनाप्रकर्षजन्यत्वेसाक्षात्कारस्यकामिनीसाक्षात्कारवदप्रमात्वापातः नचमूलप्रमाणदाढ्यात्प्रमात्वंतर्हितद्वेदसाक्षात्कारकरणमस्तुकिंतदुपजीविनान्येन एतेननिदिध्यासनसहकृतमनःकरणकत्वमपिनिरस्तम् मनननिदिध्यासनयोः श्रवणांगत्वम् १ तच्चश्रवणादिकंविषयावगमंप्रत्यन्वयव्यतिरेकसिद्धोपायइतितद्विधेर्नापूर्वादिविधित्वंकिंतुनियमविधित्वमेव नन्वत्रश्रवणस्यापरोक्षफलंप्रतिसाधनत्वं तच्चान्यतोनावगतमित्यपूर्वविधित्वमितिचेत् नगांधर्वशास्त्रविचारेषड्जादिसाक्षात्कारहेतुतायाद्दृष्टत्वात् नचैतावताशास्त्रविचारःसर्वत्रार्थसाक्षात्कारहेतुरितिनसिद्धंधर्मशास्त्रविचारेव्यभिचारादितिवाच्यम् अपरोक्षार्थकशास्त्रविचारत्वेनसाक्षात्का

त॥ एतेनउपजीव्यवेदांतवाक्यस्यैवकरणत्वसंभवेननिदिध्यासनरूपसहकारिमूलंवेदांतवाक्यमेव १२जनकतायास्तद्दर्शनवलेनसिद्धेः ॥५

वाच्यंतथाचतदेवकरणमस्त्वितिभावः॥ मनसइतिमनसःकरणत्वस्यकुत्राप्यक्लृप्तत्वात्सुखादीनांसाक्षिभास्यत्वान्नतत्करणंकरणत्वेनक्लृप्तवाक्यादेव साक्षात्कारसंभवाच्चनचसाक्षात्काराव्यवहितपूर्ववाक्यानुसंधानकल्पनेगौरवमितिवाच्यं। निदिध्यासनस्यशाब्दत्वेतदनुसंधानस्यावश्यकत्वात्स्मृतित्वेतत्रैववाक्यविषयकत्वसंभवात्वाक्यसंस्कारादेः पूर्वसत्वादितिभावः। यत्तुश्रुतमतस्यैवनिदिध्यासनमतस्तत्रश्रवणमननेउपकारकत्वादंगेइतितन्तुच्छं। एतावताप्यंगत्वासिद्धेस्तदुद्देशेनविहितत्वस्यैवतदंगत्वरूपत्वात्। उत्तरवर्तिनोरपिमनननिदिध्यासनयोःश्रवणेफलोपकार्यंगतासंभवात् अतएवश्रुतामत्वातथाध्यात्वातदज्ञानविपर्ययौसंशयंचनिराकृत्यलभतेब्रह्मदर्शनमितिस्मृतिःनविरुध्यतेतस्मान्जंजभ्यमानानुवचनवत्ततस्तुतंपश्यतेनिष्कलंध्यायमानइत्यत्रकर्तृकारकगतत्वेनश्रुतंध्यानंकर्तृसंस्कारकतयाश्रवणांगंनिःसंदिग्धवाक्यांतरेणतत्तइतिपंचम्याचनिःसंदिग्धहेतुतावोधिकयाश्रवणस्यदर्शनार्थत्वात्

॥श्रीः॥ [illegible] ॥४॥

राम·
३३९

अपरोक्षयोग्यार्थसाक्षात्कारत्वेनेति। विचार्यमाणेत्यादि। तेन विचारं विनापि शाब्दात्मसाक्षात्कारेऽपि यागांजनादिना स्वर्गनिध्यादिसाक्षात्कारेऽपि च न व्यभिचारः उच्छेदापात।
इति। स्वर्गादिविजातीयफले यागादिविजातीयक्रियाया हेतुत्वात् बाध्येतेति॥ येन येन दर्शाद्यपूर्वसाधनद्रव्यमुपक्रान्तं तेन तेन विकृत्यपूर्वसाधनद्रव्यमुपकुर्यादित्यतिदेशेन नी

आत्मा च षड्जादिवदपरोक्षो न धर्मादिः न चापरोक्षे विचारवैयर्थ्यं न हि यद्यदपरोक्षं तत्तद्विचार्यमिति नियम इति वाच्यं अपरोक्षे विचार्यत्वनियमाभाव।
वद्विचार्यत्वनियमोऽपि नास्ति षड्जादावपरोक्षेऽपि विचार्यत्वदर्शनात् तद्वदेव साफल्यसंभवाच्च सन्दिग्धत्वसप्रयोजनत्वयोरेव सर्वत्र विचार्यत्वे प्रयो
जकत्वात् एतेन विचार्यशास्त्रार्थस्य साक्षात्कारयोग्यस्य साक्षात्कारे स हेतुरिति न युज्यते कालान्तरे साक्षात्करिष्यमाणत्वेन तद्योग्ये विचार्यशास्त्रार्थे स्वर्गनिध्या
दौ विचारेण तदभावादिति निरस्तम् निध्यादिसाक्षात्कारे तदसन्निकर्षादजातेऽपि तद्धेतुतां न गच्छति तत्र विचारस्येन्द्रियसहकारित्वेन तद्विलम्बेन विलम्बात् प्रकृ
ते तु शाब्दत्वात् साक्षात्कारस्य न तदपेक्षा अपरोक्षयोग्यार्थसाक्षात्कारत्वेन कार्यत्वस्य तादृशार्थकशास्त्रविचारत्वेन साधनत्वस्य सत्त्वात् एतेन प्रकृ
तकार्यविजातीयकार्ये प्रकृतविचारविजातीयविचारस्य हेतुताक्लृप्तिमात्रेण तस्यापूर्वविधित्वत्यागेऽपूर्वविधिमात्रोच्छेदापात इति निरस्तम् ननु पाक्षि
कप्राप्तौ नियमः सा च साधनान्तरप्राप्तौ न च रूपादिरहितात्मज्ञाने तत्प्राप्तिरस्तीति चेत् न निर्विशेषात्मनि मानान्तराप्राप्तावप्यात्मनि सामान्यतः तत्प्राप्ति
रस्तीति नियमसंभवात् यथापूर्वीयेषु व्रीहिविशेषेषु नखविदलनादेरप्राप्तावपि व्रीहिसामान्ये तत्प्राप्त्या व्रीहीनवहन्तीति नियमविधिः ननु व्रीहीनवहं
तीत्यत्र व्रीहिपदमपूर्वीयद्रव्यपरं न तु व्रीहिमात्रपरं अन्यथा यवेष्ववघात औपदेशिको न स्यात् नीवारेषु च व्रीहित्वाभावेनातिदिष्टोऽपि बाध्येतेति न व
मेस्यापि तत्त्वेनापूर्वीयद्रव्य एव विदलनादिप्राप्तेर्वक्तव्यत्वात् अन्यथा वैतुष्यमात्रेऽवघातनियमे द्रव्यार्जने याजनाद्युपायनियमवत्तस्य पुरुषार्थत्वप्रस
ङ्गेन लौकिकेष्वपि व्रीहिषु दलने प्रत्यवेयादिति चेत् न नियम्यमानावघातस्यापूर्वीयद्रव्यमात्रविषयत्वेऽपि सामान्यविषयकप्राप्त्यैव नियमोपपत्तौ विशेषविष
यप्राप्तेरनपेक्षितत्वात् न च निर्विशेषसविशेषरूपविशिष्टद्वयानुगते विशेषाभावादिद्वारा वेदान्तवेद्ये चिन्मात्रे न मानान्तरप्राप्तिरिति वाच्यं उभयानुगते सवि
शेषतया प्रमेयतायां मानान्तरप्राप्तेः सत्त्वात् सजातीये प्राप्त्यापि यत्र सजातीयान्तरे नियमसंभवः तदा किमु वाच्यमेकस्मिन्नेवात्मनि अवस्थाविशेषेण मानान्तरप्रा
प्त्या विशेषान्तरे नियम इति न चैवं विशेषान्तरे प्राप्त्या विशेषान्तरनियमे वैयधिकरण्यमिति वाच्यम् व्यक्तिसामानाधिकरण्याभावेऽपि अनन्यगत्या सामा
न्यधर्ममादाय सामानाधिकरण्यांगीकारात्॥ ९ वारेष्ववघातादिसिद्धिः व्रीहित्वेन द्रव्ये विशेषिते तु सा न स्यादिति भावः। प्राप्तिर्वक्तव्येति पाठः। प्राप्तेर्वक्तव्यत्वादि
ति पाठे तु पूर्वोक्तं न युक्तमिति शेषः। प्रत्यवेयादिति। याजनादिनैव द्रव्यमर्जनीयमिति नियमजन्यादृष्टस्य सार्थक्याय याजनाद्यन्योपायेन द्रव्यार्जने यथा प्रत्यवायः कल्प्यते त।
॥ था अवघातेनैव वैतुष्यं साध्यमित्यत्र तत्सार्थक्याय दलनादिना वैतुष्यसंपादने तत्कल्पना स्यादिति भावः॥

CC-0. In Public Domain. Digitization by eGangotri

उ·३ अ·सि· ।सविशेषनिर्विशेषस्वरूपदशाद्वयानुस्मृतेति। सविशेषतादात्म्ययुक्तं निर्विशेषादत्यंताभिन्नं वेत्यर्थः। सविशेषप्रवृत्तप्रमाणस्य सगुणमपि विषय इति तत्रापि तत्प्राप्तिरिति भावः। संभव
टी·ल· प्राचुर्येणेदं सविशेषनिर्विशेषयोस्तादात्म्यादिरूपस्यैकजातीयत्वस्यापि संभवात्। ग्रहणकेति। संग्राहकेत्यर्थः। निर्णयाय तद्विचारेतिनिर्णयमुद्दिश्य तद्विचारानुष्ठानेत्यर्थः।
५ ब्रह्मज्ञाने। ब्रह्मसाक्षात्कारमुद्दिश्य तद्विचारेति। तद्विचारानुष्ठानेत्यर्थः। स्वातंत्र्येणाश्रुतिनैरपेक्ष्येण। अप्रमाणतया अप्रामाण्यशंकाशून्यज्ञानानुपधायकतया। श्रुतितात्पर्य

नन्वत्रान्यैव गतिरस्ति तथाहि अपूर्वीयेषु व्रीहिषु नियमादृष्टाजनकस्यापि दलनस्य प्राप्तिरस्ति न हि यत्र तेनवैतुष्यसंपादनं तत्र तत्प्राप्तिः किंतु शक्तत्वेन प्रसक्तिमात्रमिति चेत् न एवं तत्र योग्यत्वमिति पर्यवसितोर्थः तच्च तज्जातीयेऽन्वयः ननु तत्र तथा च वैयधिकरण्यतादवस्थ्यम् प्रकृते च सविशेषनिर्विशेषरूपदशाद्वयानुस्मृतेकात्म्यविषयतया वैयधिकरण्यशंकानवकाशश्च तत्त्वकौमुदीकृतस्तु यथा मंत्रार्थज्ञानस्य कल्पसूत्रा त्मीयग्रहणकवाक्यादिनापि प्राप्तत्वेन पक्षेऽप्राप्तं मंत्रसाध्यत्वं नियम्यते मंत्रैरेव स्मृतिः साध्येति तथा वेदांतमूलस्त्रीशूद्रसाधारणस्मृतिपुराणादि प्राप्त्या पक्षेऽप्राप्तवेदांतश्रवणादिपरिपूरणार्थो नियमः श्रोतव्यः श्रुतिवाक्येभ्य इत्यादिस्मृतेरित्याहुः न चेतिहासपुराणाभ्यां वेदं समुपबृंहयेदित्यादिस्मृतिविरोधः अविचारिते नोपबृंहणायोगादिति वाच्यम् वेदांततात्पर्यनिर्णयाय तद्विचारापेक्षायामपि ब्रह्मज्ञाने तद्विचारापेक्षाविरहात् न च कर्मविषयकस्मृतिभिः कर्मज्ञानस्येव ब्रह्मविषयाद्भारतादेरितिहासादपि साक्षाद्ब्रह्मज्ञानस्योदयात् ब्रह्मज्ञाने पि तदपेक्षेति वाच्यं उभयत्रापि स्मृत्यादेः स्वातंत्र्येणाप्रमाणतया श्रुतितात्पर्यनिर्णायकत्वात् अत एवोक्तं वेदं समुपबृंहयेदिति न तु वेदार्थं जानीयादिति यत्तु श्रोतव्यः श्रुतिवाक्येभ्य इत्यादिकं श्रुतिमूलप्रमाणाभिप्रायकमिति तन्न पंचमीप्रतीतहेतुत्वस्य साक्षात्संभवे पारंपर्यकल्पनायोगात् न च विप्रकीर्णनानाशाखार्थसंग्रहादिरूपेणेतिहासादिना तत्त्वनिश्चयदर्शनात् सति च तस्मिन्विविदिषाद्वारा तदर्थाया अंतःकरणशुद्धेरनपेक्षितत्वात् आपरोक्ष्यस्य स्वविषयस्वभावादेव सिद्धावेदजन्यब्रह्मज्ञाने इतिहासजन्याद्धिकस्यापरोक्ष्यस्याननुभवेन तस्य नियमादृष्टसाध्यत्वात् ज्ञानस्य च स्वप्रागभावनिवर्तन इवाज्ञाननिवर्त्तनेऽदृष्टनिरपेक्षत्वात् अन्यस्य च नियमादृष्टसाध्यस्याभावान्न नियमविधिरिति वाच्यम् तमेतं वेदानुवचनेनेत्यादिश्रुतिबलाद्यज्ञादिजन्यादृष्टस्य नियमादृष्टस्य च विविदिषाद्वारकान्तःकरणशुद्धेरेव साध्यायाः संभवेन ज्ञानस्वरूपोपकारितया तत्साध्याज्ञाननिवृत्तौ तदपेक्षत्वाच्च॥ ((निर्णायकत्वात् श्रुतिसापेक्ष

तया प्रामाण्यस्यैव वाच्यत्वेन श्रुतिजन्यज्ञानस्यावश्यकत्वात् न स्मृतेः प्रमाणत्वेनोपयोगोऽध्ययनसिद्धवेदार्थज्ञानस्याध्ययनविधिना नियमितत्वादिति भावः। अन्यस्यवि पम ३५०
विदिषाद्वारकांतःकरणशुद्ध्याद्यन्यस्याप्यज्ञादिजन्यादृष्टस्येति नियमादृष्टान्यस्य यज्ञादिजन्यादृष्टस्येत्यर्थः। नियमादृष्टस्य ज्ञानस्वरूपोपकारितयेत्यत्रान्वयः उभयो
र्ज्ञानोपकारित्वे हेतुमाह विविदिषेत्यादि चित्तशुद्धिद्वारा नित्यनैमित्तिकादिप्रधानकर्ममात्रस्यैव यज्ञादिश्रुत्यादिविविदिषार्थत्वबोधनात्तदव्याहतमिति भावः॥ ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततसाध्येति। ज्ञानसाध्येत्यर्थः। तदपेक्षत्वात्। प्रतिबंधकपापनिवृत्तिद्वारा नियमादृष्टापेक्षत्वात्। प्रारब्धभोगहेतुकर्मादिवत् पापांतरस्य ज्ञानप्रतिबंधकत्वसपेहिकमप्रस्तुतप्रतिबंधे तद्दर्शनादिति न्यायसिद्धत्वात् तदपेक्षत्वमिति भावः। विद्यायुक्तेति। अंगाववद्धोपासनायुक्तेत्यर्थः। चिराचिरेत्यादि। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरमिति श्रुतेरुक्तोपासनासहितासहितकर्मणां चिराचिरफलजनकत्वमिव श्रवणे नियमविधिबलादेवतदीयनियमादृष्टसहितासहितवाक्यस्य चिराचिरसाक्षात्कारजनकत्वं कल्प्यते न्यथोक्तविधिवैयर्थ्यापत्तेस्तथा चोक्तनियमादृष्टनाश्यत्वेनाविद्यानिवृत्तिप्रतिबंधकपापस्य कल्पनापाअभावेपि न क्षतिरिति भावः। तर्कैरित्यादि श्रवणादेर्नियः

विद्यायुक्ततदयुक्तकर्मजन्यफलगतिचिराचिरस्वरूपातिशयवत् नियमादृष्टजन्यसाक्षात्कारे तदजन्यतत्त्वनिश्चयापेक्षयातिशयकल्पनस्यावश्यकत्वाच्च नियमविधित्वसंभवात् तस्मात् नियमादृष्टसाध्यस्य व्यावर्त्यस्यापि संभवात् श्रवणादेर्नियमनं सर्वथैवोपपद्यत इति अत एव शूद्रप्रणीतात्मप्रबन्धादिमाप्तिनिमित्तकाप्रांशपूरणार्थो नियमविधिरित्याचार्यान्तरोक्तिरपि व्याख्याता विवरणोक्तनियमोपपत्तिः। २। ननु किमिदं श्रवणं नाम शक्तितात्पर्यावधारणं वा तद्धि शिष्टशब्दावधारणं वा तात्पर्यप्रमापकलिङ्गावधारणं वाऽऽगमाचार्योपदेशजज्ञानं वा नाद्यः अवाच्ये ब्रह्मणि शक्त्यसंभवात् तात्पर्यस्यापि न तावदापातधीजन्यस्य विचारनिवर्त्यस्य संशयस्य धर्मिणि तस्य प्रागेव निश्चितत्वेन तन्निश्चयार्थतात्पर्यनिश्चयसाधनस्य विचारस्य वैयर्थ्यात् अन्यथा विचारानन्तरमपि संशयादिप्रसंगात् नापि संशयधर्मिगतप्रकारविशेषे तद्धि शिष्टे तदुपलक्षिते वा अखण्डार्थतारूपे नः अवधारणस्य ज्ञानत्वेन विधेयत्वस्य त्वयानङ्गीकारात् अत एव न द्वितीयादि। नापि गुरुमुखाद्वेदान्तानां ब्रह्मणि संयोजनं तस्याद्यपक्षानतिरेकात् नापि वाक्यविशेषप्रयोगरूपवादकथाश्रवणम् तत्र श्रवणपदाप्रयोगात् अत एव मनननिदिध्यासनयोरपि न विधिः तयोरपि ज्ञानानतिरेकादिति चेत् न आद्यपक्षस्यैव क्षोदसहत्वात् न च तत्र शक्त्यसम्भवो दोषः शुद्धे शक्त्यसम्भवेपि विशिष्टशक्तेस्तद्बोधोपयोगिन्या अवधारणीयायाः संभवात् तात्पर्यस्यापि संशयधर्मिणो निश्चितत्वेन तत्रासंभवेपि संशयकोट्युपलक्षिते निर्विशेषे संभवेन विचारावैयर्थ्यात् न चाखण्डार्थताहानिः स्वरूपमात्रोपलक्षकतया अखण्डार्थताया उपपादितत्वात् न चावधारणस्य ज्ञानरूपस्याविधेयता तस्य तर्कत्वेन ज्ञानविजातीयचेतोवृत्त्यन्तरत्वात् ॥ १ स्यता। २ शक्तितात्पर्येति। शब्द।

शक्तितात्पर्येत्यर्थः संशयस्य धर्मिणि। संशयकोट्योः सत्त्वादितदभावयोरन्यतराश्रये अन्यथानिश्चिते संशयमंगीकृत्य तत्सार्थक्योक्तौ तद्बोधोपयोगिन्या अवधारणीयायाः शुद्धबोधोपयोगित्वेनावधारणीयायाः। विशिष्टशक्तिज्ञानाधीनविशिष्टोपस्थितौ सत्यामेव तदधीनशुद्धोपस्थित्या शुद्धप्रमोदयात् शुद्धप्रमाप्रयोजकोपस्थितिविषयविशिष्टशक्तित्वेनावधारणं शुद्धबोधहेतुरिति भावः। तर्कत्वेन यदि शुद्धप्रमाप्रयोजकोपस्थितिविषयशक्तं न स्यात् तदा शुद्धोपक्रमादियुक्तं न स्यादिति तर्कत्वेन न च स्वर्वत्रलौकिकादिवाक्येषु तर्कस्यनापेक्षा शक्तितात्पर्यज्ञानेनापि शाब्दधीदर्शनात्तथा च तात्पर्यज्ञानत्वेनैव कारणत्वात्तर्कविधिर्न युक्त इति वाच्यं। तावतापि तात्पर्यस्यैव तर्कस्य स्वो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लौकिकादिवाक्येष्वपि तात्पर्यानुमापकलिंगाभावस्य तात्पर्याभावेनापादकेनोक्तरीत्यापत्तिसंभवाच्च प्रामाण्यानभ्युपगमेनेति। व्याप्यत्वेन ज्ञायमानं ज्ञानं वानानुमितिकरणं किंतु तज्जन्यसंस्कारः पक्षधर्मताज्ञानं च तन्निष्ठशक्तिरूपो ह्येधहेतुरित्येवमन्मते स्वीक्रियत इति भावः॥ अस्य तात्पर्यावधारणस्य तत्पूर्वकालीनत्वेन विपर्ययात्नुमानात्मिकायाउपक्रमादिहेतुकतात्पर्यानुमितेः पूर्वकालीनत्वेन उक्तानुमित्यधीनतात्पर्यसंशयाभावस्योक्तावधारणेन शाब्दबोधे जननीये द्वारत्वाद् उक्तावधारणात् पूर्वं नोक्तानुमितिर्न चापत्ते

सुरेश्वराचार्यैः श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नत इति श्रवणादेः क्रियापदप्रयोगात् एवमेव मनननिदिध्यासनयोरपि विधेयत्वमुन्नेयम् नच तात्पर्यरूपे विषये उपक्रमादिरूपे च प्रमाणे सति जायमानस्य तस्य ज्ञानवहिर्भावानुपपत्तिः तद्बहिर्भूतवाग्धेनूपासनादौ प्रमाणवस्तुपरतंत्रत्वादर्शनादिति वाच्यम् अन्मते लिंगस्य प्रामाण्यानभ्युपगमेन सति प्रमा[...]णइत्यस्यैवाभावात् उपक्रमादेः प्रमाणत्वपक्षे तत्पूर्वकालीनत्वेनास्य प्रमाणे सतीत्येतदंशासिद्धेः तस्माच्छ्रवणादेरधीरूपतया मनोव्यापारत्वेन विधेयत्वोपपत्तिः सिद्धान्तबिन्दुवेदान्तकल्पलतयो विस्तरः यच्चानुवादित्वादिवर्णनं वाचस्पत्येतत्मस्यानान्तरत्वान्न विधित्वोक्तिविरोधि श्रवणादेर्विधेयत्वोपपत्तिः।३। एवं विचारविधायकश्रवणविधिरेव जिज्ञासासूत्रमूलं नच विचारविधौ श्रवणसाध्यपरोक्षज्ञानाधीनाया अपरोक्षज्ञानकामनाया अधिकारिविशेषणत्वांगीकारेणान्योन्याश्रयापात इति वाच्यम् अधीतवेदस्य विदितपदपदार्थसंगतिकस्यापाततो जायमानपरोक्षज्ञानाधीनापरोक्षज्ञानकामनायाऽधिकारिविशेषणत्वेनोक्तान्योन्याश्रयानवतारात् नच जिज्ञासासूत्रोक्तो विचारस्तत्त्वनिर्णायकन्यायानुसन्धानरूपः अन्यथा न्यायग्रन्थनात्मकशास्त्रारम्भसिद्धयेतत्कर्तव्यतोक्त्ययुक्तेः इतरस्य वेदेतिकर्तव्यतानुपपत्तेश्च श्रवणं च नोक्तन्यायानुसन्धानरूपं मनननामेदप्रसंगात् अतो न श्रवणविधिजिज्ञासासूत्रयोर्मूलमूलिभाव इति वाच्यं जिज्ञासासूत्रस्य श्रवणविधिसमानविषयतया मूलमूलिभावाभावेपि श्रवणविधिविषयशक्तितात्पर्यावधारणात्मकश्रवणाक्षिप्तोपक्रमोपसंहारादितात्पर्यलिंगविचारमादाय समानविषयत्वसंभवेन तदुपपत्तेः मननं तु श्रुतस्यार्थस्य युक्तिभिश्चिंतनमिति न तदभेदोपि अर्थाक्षिप्तविचारस्येतिकर्तव्यतात्वेपि तात्पर्यावधारणरूपे श्रवणे उक्तस्यांगित्वस्यानपायात् यत्तु युक्तिभिरनुचिंतनं नाम यदि श्रवणनिश्चितस्य तात्पर्यस्य तद्विषयस्य वा स्मरणं प्रत्यभिज्ञानं वा संस्कारदार्ढ्यफलकं श्रवणसमानाकारमभिज्ञांतरं वा तर्हि तस्यावश्यकश्रवणाद्व्यस्यैव सिद्धेर्मननविधिर्वैयर्थ्यं त्रिविधस्यापि तस्य श्रवणानंतर्गतयुक्त्यनपेक्षत्वेन श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिरिति व्यवस्थापकस्मृतिविरोध

रपि मानसज्ञानत्वमिति युक्तं। तस्माभ्रमत्वेनाविद्यावृत्तित्वेपि वाधकालीनेच्छाजन्यत्वेन ज्ञानत्वाभावात् पुरुषेच्छाधीनत्वेनाहार्यवृत्तिमात्रस्य पुंपरतंत्रत्वेन ज्ञानत्वाभावात्। अनुवादित्वेति। श्रोतव्य इत्यादेर्विधित्वाभावे त्यर्थः। आदिपदात् सहकार्यन्तरविधिरित्यादिसूत्रस्य कृत्वाचिंतात्वादिसंग्रहः श्रौतकैरित्यादिश्रवणादेर्विधेयता।४। विचारविधायकेति। उक्ततर्कविधायके त्यर्थः आपाततो जायमानेति श्रवणादिकं विनैव जायमाने त्यर्थः। विषयतया मूलमूलीभावाभावे विषयतया यो मूलमूलीभावस्तदभावे लिंगविचारं लिंगनिर्णायकतर्कं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शास्त्रारंभोपयुक्तविचारकर्त्तव्यतां। शास्त्राधीनविचारेप्रवृत्तिहेतुधीविषयीभूतांविचारकर्त्तव्यतां॥ अभ्यर्हिततयेति। श्रवणस्यांगित्वेनांगात्तद्विषयाद्युक्तत्वशंकानि। वर्त्तकविचाररूपमननादभ्यर्हितत्वात् श्रवणनिर्वाहकविचारस्याभ्यर्हितत्वमितिभावः। आनुषंगिकत्वात्। नांतरीयकत्वात्। तात्पर्यविषयेयुक्तत्वशंकानिवर्त्तकविचाररूपमननादसंशयेसतितात्पर्यंप्योचित्यावर्जितसंशयोदयात्तात्पर्यावधारणार्थप्रवृत्त्यैवोक्तसंशयनिवृत्तिहेतुविचारस्याप्यनुष्ठानलाभात् तत्कर्त्तव्यतायाः पृथगुक्तिर्व्यर्थेतिभावः। अथवा अभ्यर्हितत्वादित्यनेनकरणीभूतशब्दगतातिशयाधायित्वेनाभ्यर्हितंयत् श्रवणंतत्स्वरूपनिष्पादकत्वेनोपक्रमादिविचारस्यमननाद्यपेक्षयाभ्यर्हितत्वमुक्तं। आनुषंगिकत्वादित्यनेनतुश्रवण स्यांगित्वेनतदिच्छाप्रयुक्तानुष्ठानकत्वरूपमानुषंगिकत्वंमननस्योच्यतइतिध्येयं। यद्वेतिवेदांतश्रवणंयत्तद्युपायस्तर्कसववाश्रुतिलिंगादिकोन्यायः शब्दशक्तिविवेककृत्॥ आगमार्थविनिश्चित्यैमंतव्यइतिभण्यतेवेदशब्दानुरोधेनतर्कोपिविनियुज्यतेइतिसुरेश्वराचार्योक्तेः वेदांता।

श्रवणंयावदज्ञानंमतिर्यावदयुक्ततेतिमननस्यश्रवणानिवर्त्तितायुक्तत्वशङ्कानिवर्त्तकत्वप्रतिपादकस्मृतिविरोधश्चेतितन्न अनुचिंतनस्य श्रुतार्थविषयकयुक्तायुक्तत्वादिसंशयनिवर्तकयुक्त्यनुसन्धानरूपत्वेनविवक्षिततयात्वदुक्तदोषानवकाशात् नचैवंयुक्तायुक्तत्वसंशयादेः संशयपूर्वपक्षसिद्धान्तैः मीमांसाशास्त्रग्रथितात् संशयादिनिवर्तकात्न्यायजातादन्येनानिवृत्तेःतादृशन्यायग्रथनात्मकमीमांसाशास्त्रारंभोपयुक्तविचारकर्त्तव्यतांप्रतिपादयदाद्यसूत्रंमननविधिमूलमेवस्यात् नतुश्रवणविधिमूलमितिवाच्यम् तात्पर्यविषययुक्तायुक्तत्वादिसंशयादिनिवर्त्तकविचारापेक्षयातात्पर्यनिर्णायकश्रवणाक्षिप्तलिङ्गविचारस्याभ्यर्हिततयातदाक्षेपकश्रवणविधिमूलत्वस्यैववक्तुमुचितत्वात् युक्तायुक्तत्वविचारस्यानुषङ्गिकत्वाच्च यद्वा समन्वयाध्यायोक्ततात्पर्यनिश्चायकोपक्रमादियुक्त्यनुसन्धानंश्रवणम् द्वितीयाध्यायोक्ताथसत्त्वशंकानिवर्तकयुक्त्यनुसन्धानंमननम् नन्वेवंविवरणोक्तिविरोधः यौक्तिकासंभावनाविपरीतभावनानिरासितर्काणांप्रथमज्ञानान्तर्भूतत्वादित्यादिनाऽर्थोपपत्तीनामपिश्रवणांतर्गतिमुक्त्वा॥ २१ नामशेषाणामादिमध्यावसानतः ब्रह्मात्मन्येवतात्पर्यमितिधीः श्रवणंभवेत् समन्वयाध्यायएतत् सूक्तं तीर्थकरादिभिः। तर्कैः संभावनार्थश्चद्वितीयाध्यायईरितइतिविद्यारण्याद्याचार्योक्तेश्चेतिशेषः॥ यौक्तिकेत्यादि आत्मैकत्वविद्याप्रतिपत्तयेसर्वेवेदांताआरभ्यंत। इतिभाष्येप्रतिपत्तिशब्दवैयर्थ्यमाशंक्य असंभावनाविपरीतभावनानिवर्त्तकतर्काधीनंप्रतिष्ठितत्त्वंप्रतिपत्तिशब्देनोच्यतइतिनतद्वैयर्थ्यमितिपंचपाद्यामुक्तं आत्मैकत्वविद्याशब्दप्रमाणाज्जायमानाअपरोक्षविषयकत्वेनापरोक्षरूपापिचित्तस्यानैकाग्रतादोषात् विपरीतसंस्कारदोषाच्चपरोक्षरूपेचनाविद्यानिवर्त्तिका। मननजनितप्रमेयादिसंभावनायुक्तंब्रह्मात्मभावनाप्रचयरूपनिदिध्यासनाधीनैकाग्रवृत्तियुक्तंचचित्तंसहकृत्यशब्दप्रमाणेनजनितात्वविद्यानिवर्त्तिका॥ तस्मादुक्ततर्कशब्देनोक्तचित्तमुच्यतेयौक्तिकासंभावनाविपरीतभावनानिरासितर्काणांप्रथमज्ञानेंतर्भूतत्वादितितत्रत्यविवरणवाक्यसंक्षेपः। अर्थोपपत्तीनां। अर्थायुक्त

उ.३
अ.सि.
टी.ल.
७

प्रचयनिमित्तेति तदेकाग्रवृत्तिविशेषणंप्रचयजनितेत्यर्थः। प्रचयहेतुचित्तैकाग्र्येति। प्रचयजनितैकाग्र्यवृत्तीत्यर्थः। यद्यपिब्रह्मात्मत्वविपरीतभावनेत्यादि वाक्यमंतर्भूतत्वादित्येतद्वाक्यस्यपूर्वस्वतः प्रामाण्यव्यवस्थायाः पूर्वमुक्तंतथापिमुखंव्यादायस्वपिति इत्यादाविवांतर्गतिमुक्तेत्यत्रविपरीतयोर्वापर्य्यंवोध्यं। विरोधस्याकिंचित्करत्वात्। विरोधोपदिस्यात् तथापितस्यपूर्वोक्तयद्दैत्यादिमतेवाधकत्वाभावात्। वस्तुतस्तुनहिरोधोनास्त्येवेतिभावः। नचप्रथमज्ञानद्त्यस्यश्रवणे इत्यर्थकत्वान्मननस्यश्रवणांतर्गत्युक्तावाधकत्वमितिवाच्यंप्रथमज्ञानेप्रथमज्ञानसाधने इतितत्त्वदीपनेव्याख्यानात्। ननुशक्तितात्पर्यावधारणानुकूलतर्कएवतर्कशाब्देनोच्यतांतत्राह यौक्तिकेत्यादि इत्यादिनाततग्रंथस्यतत्त्वदीपनेवतारितत्वाच्चतथाचोक्ततर्कस्येवासंभावनादिनिवर्तकमननादिरूपतर्काणामपिश्रवणसहकृतशब्दजन्यापरोक्षरूपस्यप्राथमिकज्ञानस्यसाधनेंतर्भावात् मननादिकमपितर्कपदार्थ इतिभावः। श्रवणसहकृतशब्दात् प्रथमंपरोक्षज्ञानंपश्चान्मनननिदिध्यासनसह कृतशब्दादपरोक्षज्ञानमित्यस्मिन्विवरणोवस्यमाणमतांतरेमननादेर्नप्रथमज्ञानजातीयज्ञानसाधनेप्यंतर्भावः शब्दजन्यात्मज्ञानंसर्वमपरोक्षमितिमुख्यमतेतुतस्यतदंतर्भावएवेत्याशयेनप्रथमपदमुक्तं श्रवणसहकृतशब्दजन्यप्रथमज्ञानजा

ब्रह्मात्मत्वविपरीतभावनाप्रचयनिमित्ततदेकाग्रवृत्त्ययोग्यत्वमसंभावनाविपरीतभावनातुशरीराध्याससंस्कारप्रचय इत्यादिना संभावनानिवर्तकस्यमननस्यार्थनिश्चयानंतरभाविभावनाप्रचयहेतुचित्तैकाग्र्यहेतुतायाएवोक्तत्वादितिचेत् नभिन्नप्रस्थानतयाविवरणविरोधस्याकिंचित्करत्वात् नचजिज्ञासासूत्रस्यांशेमननविधिमूलत्वापातः समन्वयोक्तविचारस्याभ्यर्हिततयाश्रवणविधिमूलत्वस्यैववक्तव्यत्वोक्तेः॥

तीयेतितदर्थस्तेनमननादिरहितश्रवणजन्येप्रथमज्ञानेमननाद्यनपेक्षायामपिनप्रथमपदासंगतिः। निश्चयानंतरभाविभावनाप्रचयजनितैकाग्रवृत्तौमननहेतुतेतितुप्रकृतानुपयुक्तं। संभावनाबुद्धिद्वाराएकाग्रवृत्तौमननस्यहेतुत्वेपिश्रवणांतर्गत्यलाभात्॥ उक्तवृत्त्ययोग्यत्वंबुद्धक्तवृत्तियोग्यताविरोधिनी असंभावना। ननुप्रमेयादिसंभावनायामननमूलत्वोक्तेरादिपदेनप्रमाणगततात्पर्यतल्लिंगादिसंभावनाग्राह्यातथाचतात्पर्यनिर्णायकतर्कोपिमननमितितस्यश्रवणांतर्भावइतिचेन्न आदिपदेनप्रमेयसंभावनाबुद्ध्यनुकूलाया विश्वमिथ्यात्वादिसंभावनायाएवग्रहणात्। तात्पर्यलिंगादिसाधारणसंभावनामात्रस्यप्रकृतेग्रहणेपिमननस्यश्रवणांगताप्रतिपादकविवरणोक्तानुरोधेनांगांगिकोटिभेदेनमननस्यहैविध्यावश्यकत्वात् अंगस्यमननस्यश्रवणानंतरभावेनानुपपत्त्यभावात्। ननुद्वितीयाध्यायस्यमननरूपत्वेतत्कर्तव्यतांशेमननविधिमूलकत्वमाद्यसूत्रस्यस्यात् तस्याध्यायचतुष्टयात्मकविचारकर्तव्यताबोधकत्वादित्याशंक्यनिषेधतिनचजिज्ञासेत्यादि। समन्वयेत्यादिसूत्रस्यविधिमूलकत्वंविधिवाक्यार्थस्योक्तिद्वाराविधिवाक्यार्थनिश्चयापेक्षितन्यायसूचकत्वं। तत्राद्यसूत्रंमोक्षजनकज्ञानापवेशांतश्रवणंकार्यमितिवोधयदुक्तबोधानुकूलन्यायस्यैवसूचकत्वेनश्रवणविधिमूलकमेवश्रवणस्यप्रथमाध्यायरूपत्वेनांगित्वेनकरणनिष्ठातिशयहे

पत्र. ३४२

CC-0. In Public Domain. Digitization by eGangotri

मननादिरूपद्वितीयाध्यायादौ प्रवृत्तिस्तु श्रवणफलोपकारीत्युक्त्येति श्रवणकर्तव्यतोक्तिद्वारैव मननादिविधिवाक्यार्थानुकूलन्यायाः सूत्रेण सूच्यं तेन तु मननादिकर्तव्यतोक्तिद्वारा। यत्तु विविदिषाद्वाराचित्तैकाग्र्यद्वारा च ज्ञानसाधनकर्मोपासनाविधिमूलकत्वमपि सूत्रस्य स्यात् तृतीयाध्यायादौ तादृशकर्मादेरुक्तत्वात् इति तत्तुच्छं। सर्वापेक्षा चेत्यादिसूत्रेषु कर्मादिविध्यर्थनिश्चयापेक्षितन्यायसूचनात् विचारकर्तव्यताबोधकाद्यसूत्रे कर्मादिविधिमूलकत्वापादनस्यायुक्तत्वात्। तथैवं तृतीयाद्यध्यायविचारप्रवर्तकत्वमाद्यसूत्रस्य कथमिति चेच्छ्रवणकर्तव्यतोक्तिद्वारैव। तथा हि ज्ञानार्थं श्रवणं कार्यमित्युक्त्या श्रवणोपकारकशमाद्यनुष्ठानस्य सूचनात् शमादिकमंतरंगसाधनं विविदिषुणानुष्ठेयं न त्वग्निहोत्रादिकं विविदिषासाधनत्वेन वहि-

ननु मन्तव्यश्चोपपत्तिभिरिति स्मृतिगतोपपत्तिशब्दस्य मतिर्याविदयुक्तेति स्मृतिस्थायुक्तशब्दस्य च श्रोतव्यः श्रुतिवाक्येभ्य इति श्रुतिशब्दस्येव सामान्यपरत्वाद्धानेन आदौ यच्छ्रुत्या सिद्धं पश्चान्न्यायेन साधितमिति न्यायेन युक्तानपेक्षश्रद्धामात्रेण प्रतिवाक्यमयमस्य वाक्यस्यार्थ इति गुरुमुखादिदार्थग्रहणं श्रवणं पश्चान्न्यायानुसन्धानं मननमिति भेदसंभवे युक्तिष्वेव श्रवणमननभेदकथनायोग इति चेत् न वाक्यार्थग्रहणस्य प्रमारूपतयाऽविधेयत्वस्योक्तत्वात् ननूक्तस्य वाक्यार्थग्रहणस्य श्रवणादित्रयानन्तर्भावे चतुर्थस्यापि मुमुक्षुरनुष्ठेयत्वापात इति चेत् न तस्य ज्ञानरूपतयाऽनुष्ठानानर्हत्वात् श्रद्धामात्रात्त्वत एव जाततत्वेनाप्युतत्रत्वाच्च न चैवं केवलं गुरुमुखात्तदर्थं श्रुतवति श्रुतमनेनेति प्रयोगानुपपत्तिः विधेयतान्यथानुपपत्त्या अर्थान्तरपरत्वे स्थिते अस्य प्रयोगस्य गौणतादिना कथंचिदुपपादनीयत्वात् अत एव स्मृतिगतोपपत्त्युक्तपदयोर्न सामान्यपरता न च प्रमाणभूतश्रुतितात्पर्ये निश्चिते अर्थसत्त्वार्थमुपपत्त्यपेक्षायोगेन मननस्यार्थासत्त्वरूपाप्रामाण्यशङ्कानिवर्तकत्वेव क्तव्ये निश्चितप्रामाण्यस्यापुंसो मननाभावप्रसंग इति वाच्यम् नादृशं प्रति तदभावस्येष्टत्वात् कृष्णले अतिदेशप्राप्तस्यावघातस्य द्वारबाधेन बाधदर्शनात् तस्मात्तात्पर्यावधारणं श्रवणं तच्च लिंगविचाराधीनमिति विचारकर्तव्यतापरमाद्यसूत्रं श्रवणविधिमूलकं न तु मननविधिमूलकमिति सिद्धम्॥ जिज्ञासासूत्रस्य श्रव(ण विधिमात्रमूलत्वम्॥

रंगत्वादित्यपि सूचितं तथा चांतरंगबहिरंगसाधनविचारकर्तव्यताया अपि सूचनात्तत् प्रवर्तकत्वमेव ज्ञानादिफलार्थं कार्यमित्युक्त्या तादृशफलविचारोऽपि सूचित इति बोध्यं। प्रमारूपतयेति। न च गुरोः मुखाधीनत्वविशिष्टरूपेण प्रमापि विधीयतामिति वाच्यं तेन रूपेण तस्य श्रवणपदार्थतानिर्णयात् मननत्वस्य तात्पर्यलिंगविचारसाधारणस्यार्थासत्त्वशंकानिवर्तकविचारे वक्तुमशक्यत्वेनोक्तविचारत्वाभ्यां श्रोतव्यो मंतव्य इति विधिद्वयावश्यकत्वेन गुरुमुखाधीनार्थग्रहणस्य श्रोतव्यपदार्थत्वकल्पनानवकाशात्। गौणतादिनेति। तात्पर्यावधारणादेरनादिवैदिकप्रयोगेन रूढत्वात्। तादृश्यात् शाब्दबोधे गौणी वृत्तिरादिपदात् श्रावणप्रत्ययेऽपि श्रुधातोः शक्त्या शब्दश्रावणप्रत्ययजन्यत्वात् शाब्दबोधे लक्षणेत्यर्थः। श्रोः तर्केत्यादिः श्रवणत्वाद्यसूत्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ·३
अ·सि·
दी·ल·
८

॥ उत्तरक्रतुविधीति। विचारोत्तरमनुष्ठेयापेक्षितवस्तुतत्विधीत्यर्थः॥ विधेः प्रयोजकतायांप्रकारमाह उत्तरक्रतुविधिभिरिति विधिवोधितंक्रत्वनुष्ठा नंक्रतुज्ञानमपेक्षतेतच्च विचारमित्यर्थः अनेकक्रतुविधीनामाक्षेपकत्वंयत्त्वयास्वीकृतंतदपेक्षयातरतीत्याद्येकविधेराक्षेपकत्वंलघुतयाचक्रतुवि धेराक्षेपकत्वसादृश्यमभ्युपेत्योक्तमित्याशयेनाह युक्तमिति। तरतीत्यादिकंनविधिः किंतुलोकसिद्धस्यज्ञानाज्ञानयोःनाश्यनाशकत्वस्यानुवादस्त थाचज्ञानेनकार्येणाकारणस्यविचारस्याक्षेपेपिनतस्यवैधत्वसिद्धिरित्याशयेनाह यद्यपीति। अन्यथाविधेराक्षेपकत्वसंभवेपिविधिमूलकज्ञानस्यैवाक्षेपका त्वस्वीकारे कर्मज्ञानादेवेति। श्रवणविधिवाक्यार्थश्रवणानुष्ठानाधीनब्रह्मज्ञानस्येवक्रतुविध्यधीनक्रतुज्ञानस्याक्षेपकत्वंसंभवतिनचकर्मज्ञानस्याक्षे पकत्वंनतत्वेनकिंतुविधिवोधितानुष्ठानापेक्षितज्ञानत्वेनेतिविधावेवतात्पर्यपर्यवसानमितिवाच्यं। ब्रह्मज्ञानस्यापिहिविधिवोधितश्रवणापेक्षि तफलत्वेनैवतत्। अथकाम्यमानज्ञानत्वेनैवतस्यतत्काम्यताचमोक्षसाधनतयेतिचेत्तर्हिक्रतुज्ञानस्यापितेनैवरूपेणतच्चरूपंवैधानुष्ठानहे

ननुत्वन्मतेकर्मकाण्डविचारोयथोत्तरक्रतुविधिप्रयुक्तः तथाब्रह्मकाण्डविचारोपिज्ञानविधिप्रयुक्तइत्येवकिंनस्यात् उत्तरक्रतुवि धिभिः स्वानुष्ठाप्यार्थनिर्णयान्तविचारस्येवतरतिशोकमात्मविदित्यादिनाशोकनिवृत्तिहेतुत्वेनावगतेनात्मज्ञानेनस्वसिद्धयेवेदान्त विचारस्याक्षेपात् युक्तंचानेकेषांक्रतुविधीनांआक्षेपकत्वादृश्येकस्यैवाक्षेपकत्वमितिचेत् नयद्यपिकार्येणकारणाक्षेपःसंभवतितथापितत स्यवैधत्वसिद्ध्यर्थंविधिमूलत्वस्यावश्यवक्तव्यत्वात् अन्यथाकर्मकाण्डविचारस्यापिकर्मज्ञानादेवाक्षेपेऽध्ययनविधेर्वाउत्तरक्रतुविधीनांवा आक्षेपकत्वोक्तिरयुक्तास्यात्मननविधिमूलत्वंवदतात्वयापिअस्याक्षेपस्यावश्यंपरिहरणीयत्वात् एतेनार्थावगमपर्यंताध्ययनविधिप्रयुक्तत्वस्य कर्मविचारवद्ब्रह्मविचारेपिसंभवेनश्रवणविधिप्रयुक्तत्वम्॥ तुत्वेनाध्ययनादिहेतुत्वेनवेत्यस्यतननुवैधत्वसिद्धेःकिंफलमितिचेत्शीघ्रकर्तव्यतादिज्ञा नेप्रामाण्यस्यनिश्चयादिनाशीघ्रंविचारेप्रवृत्त्यादिकमेव। त्वयापीति। ननुमन्मतेविचारस्यमननविधिनासाक्षाद्विधानमेवेतिचेत्ममापिवार्तिककारमतेतस्यश्रव णविधिनासाक्षाद्विधानमथविवरणमतेविचारस्यश्रवणविध्याक्षेपदोषइतिचेत्तर्हितवापिमननेविधिव्यर्थोब्रह्मज्ञानेनैवाक्षेपसंभवात्निदिध्यासनविषयगु णांशेनिदिध्यासनांगतयाविधिरपिव्यर्थोनिदिध्यासनविधिनैवाक्षेपसंभवात् अथगुरुमुखाधीनत्वादेर्नियम्यमानत्वेननव्यर्थतेतिचेत्तर्हिविवरणमतेपिश्रवण राम·
विधिनावेदांतादेर्नियम्यमानत्वेनवेदांतविचारेणैवब्रह्मज्ञातव्यमितिनियमसिद्ध्यर्थंविचारः श्रवणविधिनैवाक्षिप्यतेतस्याक्षेपकत्वस्वीकारेहितस्यस्वविष ३५३
यवेदांतेष्वेवोपस्थितप्रत्यासन्नेषुविचाराक्षेपकत्वेलाघवात्तेषुतदाक्षेपसिद्धिस्तथाचप्रथमाध्यायस्यार्थकांवेदांतवाक्यविचारवोधकसूत्राद्युपपत्तिश्चब्रह्म ज्ञानस्यतदपेक्षकत्वेतुतस्यस्वहेतुवेदांतवाक्यतात्पर्यावधारणस्यानुपपत्त्यास्वत्यादिविचारएवआक्षिप्येततेनापितत्संभवात्वेदांतविचारापेक्षयासुकरत्वाच्चेतिध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवृत्तेश्चेति। वक्तव्यत्वादित्यत्रान्वयः। अवघातवत्। अवघात इव। विचार इति शेषः। दृष्टफलत्वेन। दृष्टफलोपधानापत्त्या मुंडकेत्यादि। मुंडकोपनिषदध्ययनानुवादेन शिरोव्रतस्य कारीरीप्रतिपादकानुवाकाध्ययनानुवादेन भूमौ स्थितान्नभक्षणस्य विधायकं तेषामेवैतां ब्रह्मविद्यां वदेत् शिरोव्रतं विधिवद्यैस्तु चीर्णमित्यादिवाक्यं तद्वदित्यर्थः। तां। वैणवीं कृष्णलसदृशीमश्विं चतुर्भिर्देवस्य त्वा सवितुरित्यादिभिश्चतुर्भिर्मन्त्रैः। अर्थप्राप्तेति। हस्तेनाश्विग्रहणं विना मृत्खननस्य तत्कार्यानुपपत्त्या प्राप्यमाणेत्यर्थः। उक्तानुपपत्त्यपेक्षया शीघ्रप्रवृत्तयोक्तस्तुत्या चतुर्मन्त्रादानाभ्यां विशिष्टभावनाविधानेप्युक्तानुपपत्त्यैवादानस्य प्राप्यमाणत्वेन तदंशेनुवादतुल्यत्वादनु-

न च साक्षात्कारफलकमावृत्तिगुणकं मननाद्यङ्गकमिदं श्रवणं अध्ययनविधिप्रयुक्तश्रवणमात्राद्भिन्नमिति विध्यन्तरं युक्तमिति वाच्यं ब्रह्मविचारस्याप्यध्ययनविधिप्रयुक्तत्वेपि साक्षात्कारस्यापरोक्षैकरसात्मविषयत्वेनैव सिद्धेः आवृत्तेश्च विध्यन्तराङ्गीकारेप्यवघातवद्दृष्टफलत्वेनैव वक्तव्यत्वात् कर्मकाण्डेपि तात्पर्यावधारणपर्यन्तं विचारावृत्तेरपेक्षितत्वात् ततः परं ब्रह्मकाण्डेपि तदावृत्तेरनपेक्षितत्वात् मननस्य च कर्मकाण्डेपि तदर्थनिश्चयायापेक्षितत्वादध्ययनविधिविहितैकदेशारण्यकाध्ययनानुवादेन वाक्यान्तरेणारण्याद्यंगांतरविधानवत् मुण्डककारीर्याध्ययनानुवादेन शिरोव्रतभूभोजनाद्यंगविधानवत् तां चतुर्भिरादत्त इत्यत्रार्थप्राप्तादानानुवादेन संख्याविधानवच्चाध्ययनविध्याक्षिप्तविचारैकदेशानुवादेन त्वद्धीत्या मननाद्यंगविधानस्य संभवादिति निरस्तं मननविधिमूलत्ववादिनोपि समानत्वात् अध्ययनविधेः स्वाध्यायावाप्तिफलकतयार्थज्ञानफलकत्वाभावात् अध्येतव्य इति कर्मप्रधानतव्यप्रत्ययेन स्वाध्यायस्यैव फलत्वावगमात् न च तस्यापुरुषार्थतया फलवदर्थावबोधपर्यन्तं व्यापारः चित्रया यजेत पशुकाम इत्यादावपि काम्यमानपश्वादेरप्यफलत्वापत्तेः॥ परंपरयापुरुषार्थसाधनतया फलत्वे प्रकृतेपि तस्य संभवात् तस्माच्छ्रवणविधिर्मूलं विचारविधायकजिज्ञासासूत्रस्य न तु मनन विधिरिति। सिद्धम् विचारस्य श्रवणविधिमूलत्वोपपत्तिः॥५॥ प्रस्थानान्तरे तु अध्ययनविधेरेवार्थावगमपर्यन्तत्वात्काण्डद्वयविचाराक्षेपकत्वं श्रवणादिषु न विधिः तेषामन्वयव्यतिरेकसिद्धसाक्षात्कारसाधनताकत्वादित्युक्तम् न चाध्ययनाभावे प्रत्यवायश्रवणात् अध्ययनस्य नित्यतया अप्यवगमात् कथं तस्यार्थावगमपर्यन्तत्वमिति वाच्यम् अर्थज्ञानार्थत्वेप्यध्ययनविधेरवैयर्थ्यायाधीतेनैव वेदेन कर्तव्यतां ज्ञात्वा अनुष्ठितं फलायालमित्यादिनियमाश्रयणादस्त्वध्ययने यथोक्तनित्यादिकर्मानुष्ठानासिद्ध्या प्रत्यवायश्रवणोपपत्तिः॥

१ वादत्वोक्तिर्न च प्राप्यमाणत्वे श्रुत्या विशिष्टविधानं व्यर्थमिति वाच्यं लिंगेन मन्त्राणामनुपपत्त्या चादानस्याप्यमानत्वेपि मन्त्राणां समुच्चयस्याभायतत्सार्थक्यात्। समानत्वादिति। मननेगुरुमुखाधीनत्वादेर्नियम्यत्वेन तद्वन्मननविधिरावश्यकश्चेन्ममापि विचारे वेदान्तादेर्नियम्यत्वेन विचारविधेरावश्यकत्वमित्यादि समानमित्यर्थः। तवैवमते उक्तदोषः मन्मते अर्थज्ञानोद्देशेनाध्ययनविधानादर्थज्ञानपर्यन्ताध्ययनविधेर्विचाराक्षेपकत्वशंकाया असंभवादित्याशयेनाहाध्ययनविधेरिति॥ तर्कैरित्यादिविधानमूलता स्थितिः॥५॥ अवैयर्थ्यायेति। विधिं विनाप्यध्ययनस्यार्थज्ञानहेतुतायालोकसिद्धत्वेन विधिवैयर्थ्यं स्यात् तदभावायेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उ.३

अ.सि. केचित्तं त्वरलकारादयः ॥ षष्ठद्वितीयांत्याधिकरणे तैस्तयोक्तत्वात् स्मरणेनेति । योनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय इति स्मरणादिनेत्य
टी.ल. र्थः । पशुपुरोडाशादिवदिति ॥ अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशं निर्वपतीत्यनेनाग्नीषोमीयपशुमुद्दिश्य विहितः पुरोडाशयागोऽग्नीषोमीयपशुयागस्य देवता
९ स्मरणरूपसंस्कारात्मकं सन्निपत्योपकारं करोतीति दशमे स्थितमुक्तोपकारं देवतोद्देशेन कुर्वन्नपि पुरोडाशद्रव्यस्य यागांशेनादृष्टार्थकः स इति चतुर्थप्रथमे स्थितं । आदिना ।
दर्शपौर्णमासादेरिव नित्यकाम्यत्वं वोध्यं श्रीतकैरित्यादि श्रवणाद्यविधेयता ॥ ६ ॥ श्रवणं शब्दजं ज्ञानमुपपत्त्यनुचिंतनं । मतिर्निरंतरा चिंता निदिध्यासनमुच्यते । ब्रह्मज्ञा
नमुद्दिश्योक्तश्रवणस्योक्तविधिना विधानादपूर्वविधिस्तत्राज्ञानविरोधिज्ञानत्वेन श्रवणं प्रतिसंशयादिविरोधिज्ञानत्वेन मननं प्रति अपरोक्षज्ञानत्वेन निदिध्यासनं प्रत्युद्देश्यमि
तिपरोक्तेरुक्तश्रवणस्योक्तविधिमाशंक्य निरस्यति यत्त्विति । तद्भिन्ने । आपातदर्शनभिन्ने ब्रह्मज्ञाने तदुद्देशेनेति यावत् । वाक्यार्थज्ञानमिति विधिरिति शेषः । विधेयमिति पूर्वोक्ता

तथा चार्थज्ञानार्थस्याप्यध्ययनस्य फलतो नित्यत्वमिति केचित् अपरे त्वनध्ययने सन्ध्यानुपासनेनेव साक्षात्प्रत्यवायस्मरणेनाध्ययनस्यादृष्टार्थत्वेप्यर्थज्ञानस्यापि दृष्टत्वादपेक्षितत्वाच्च तादर्थ्यमपीत्युभयार्थता पशुपुरोडाशादिवदित्याहुः अत्र चाध्ययनविधेर्नित्यत्वे सत्युभयविचाराक्षेपकत्वपरेणाप्यङ्गीकृतं तदयुक्तम् जिज्ञासासूत्रस्य मननविधिमूलत्ववादिनस्तस्य तदङ्गीकारानर्हत्वात् अयुक्तत्वशङ्कानिवर्त्तकमननरूपविचारस्याप्यध्ययनविध्याक्षिप्तत्वेन तत्र विधिवैयर्थ्यात्सूत्रस्य तन्मूलत्वासिद्धेः । वाचस्पत्युक्तस्वाध्यायविधिविचाराक्षेपकत्वोपपत्तिः ॥ ६ ॥ यत्तु शब्दजज्ञानस्वरूपमेव श्रवणं विधेयमिति तन्न आपातदर्शनस्य तद्भिन्नाजायमानत्वात् न च तद्भिन्ने प्रतिवाक्यं अस्य वाक्यस्यायमर्थ इति सिद्धार्थोक्तिरूपगुरूपदेशेनानेकशाखास्थवाक्यार्थज्ञाने वेदांतरूपवाक्यार्थविचारस्य सामान्यतः साधनत्वेन प्राप्तत्वात् न च यथा घटादावितरभेदे सिद्धेपि पृथिवीत्वोपहिते तदसिद्धेः पृथिवी इतरेभ्यो भिद्यत इत्यत्र न सिद्धसाधनम् यथा च स्थानप्रकरणाधिकरणोक्तरीत्या राजसूयान्तर्गतेष्टिपशुसोमेषु प्रातिस्विकरूपेण चोदकत इतिकर्त्तव्यताप्राप्तावपि राजसू

नुषंगो वा । तथा चापातदर्शनान्यब्रह्मज्ञानायानेकशाखास्थवेदांतवाक्यानां गुरूपदेशेनार्थग्रहणरूपश्रवणं विधीयत इति भावः । उभयरूपे तदप्राप्तिः ॥
क्तश्रवणस्य तात्पर्यावधारणात्मकविचाररूपस्य दृष्टद्वारोक्तब्रह्मज्ञानहेतुता प्राप्ता गुरूपदेशाधीनवाक्यार्थज्ञानत्वेन वाक्यार्थनिश्चयं प्रत्युक्तद्वाराहेतुत्वस्य दुर्बोधत्वा । राम.
स्त्रार्थज्ञानेन्वयव्यतिरेकाभ्यां गृहीतत्वादित्याशयेन दूषयति वेदांतस्येति विचारस्य तात्पर्यावधारणरूपतर्कसाधनस्योक्तश्रवणस्य पृथिवीत्वोपहिते पृथिवीत्वा
वच्छेदेन स्थानप्रकरणाधिकरणोक्तरीत्येति स्थानप्रकरणयोर्विरोधे प्रकरणं वलवत्तेनेष्टिपशुसोमयागसमूहात्मकराजसूयप्रकरणेभिषेचनीयनामकसोमयागसं
निधौ अक्षैर्दीव्यतीत्यादिनोक्तविदेवनादीनां राजसूयांगतानत्वभिषेचनीयांगता अभिषेचनीयत्वादिप्रत्येकरूपेणाकांक्षाविरहाच्चोदकप्राप्ताक्तांगैराकांक्षाशांतेः ॥

CC-0. In Public Domain. Digitization by eGangotri

राजसूयत्वेन रूपेणातु आकांक्षास्तितेन रूपेणोद्दिश्यश्रुत्यादिना विहितांगसंदेशात्। राजसूयापत्येना उत्पुनाति राजसूयेनेजानः सर्वमायुरेतीत्यादिनाप राजमर्शात् पवित्रादारभ्यक्षत्रस्य धृतिं यावद्राजा राजसूयत्वरूपेणाकांक्षासत्त्वादिति तृतीयतृतीयोक्तरीत्येत्यर्थः। विचारत्वोपहितइति गुरुमुखाधीनवाक्यार्थज्ञानत्वेन तात्पर्यावधारणरूपविचारद्वारा वाक्यार्थनिश्चयहेतुतायाः प्राप्तत्वेपि वेदांतवाक्यीयगुरुमुखाधीनार्थज्ञानत्वेनोक्तद्वारा ब्रह्मनिश्चयत्वावच्छिन्नंप्रति हेतुतानप्राप्तेत्यर्थः। कल्पनापत्तेरिति। सामान्यरूपेण साध्यसाधनभावस्य प्राप्तत्वेपि विशेषरूपेणातमादायापूर्वविधिस्वीकारे दृष्टोपकारजनकत्वसंभवेप्य दृष्टोपकारमंगीकृत्यापूर्वविधिस्वीकारेच आपूर्वीयव्रीहिवैतुष्यत्वाघवच्छिन्नंप्रत्यवघातत्वादीनां हेतुत्वमादाय प्रोक्षणादेरिवावघातादेरप्यदृष्टोपकारहेतुत्वमादाय वा नियमविधिमात्रोच्छेदइत्यपि बोध्यं ननु सर्ववेदवाक्यानामसाधारणतत्तदर्थइव ब्रह्मण्यपर्थस्तत्तत् शब्दानां योगिकगौण्यादिद्वत्यातत्तद्गुणविशिष्टब्रह्मप्रतिपादकत्वात्तथाचतादृशब्रह्मज्ञानहेतुतायाः सर्ववेदवाक्ये प्राप्तत्वादपूर्वविधिरितिचेन्नउक्तोत्तरत्वात्। सर्ववेदाधीनोक्तज्ञानस्यापि दुर्बोधवाक्यार्थज्ञानत्वेनोक्तज्ञानेहेतुतायाः प्राप्तत्वात् वेदांतान्विधिवत्श्रुत्वा संन्यसेदनृणो द्विजः वेदांतेषु प्रतितिष्ठितः। दिने दिने च वेदांतश्रवणाद्भक्तिसं।

तथा वेदान्तविचारत्वोपहितेब्रह्मज्ञानहेतुताया अप्राप्तेरपूर्वविधितेतिवाच्यम् सामान्यतः प्राप्तसाध्यसाधनभावमनादृत्यविशेषोपाधिनाऽप्राप्तसाधनत्वप्राप्तयेऽपूर्वविध्यंगीकारेज्योतिष्टोमादिवाक्यविचारेपितेन रूपेण तद्वाक्यार्थज्ञानंप्रत्यप्राप्तसाधनतासिद्धयेऽपूर्वविध्यंतरकल्पनापत्तेः एतेन निदिध्यासनस्याव्यक्तस्वभावब्रह्मसाक्षात्कारहेतुतानान्यतः प्राप्नोतिस तावदपूर्वविधिः। तथाऽज्ञातादौ निदिध्यासनासंभवेन श्रवणमननयोर्निदिध्यासनेलिङ्गादेवप्राप्तावपि नियतविषयकनिदिध्यासनविषयगुणान्यगुणेषु लिंगेन तयोरप्राप्तेः तद्विधिरप्यपूर्वविधिरेव॥ २१ युतादित्यादिस्मृत्या दृढत्वमेतद्विषयस्तु बोधः प्रयातिवेदांतनिषेवनेनेत्यादिभट्टाचार्यद्युक्तेः संत्वोपनिषदमित्यादिसमाख्ययावेदांतश्रवणस्यैव तज्जन्यज्ञानस्यैव वा मोक्षप्रयोजकत्वात्। अग्निहोत्रादिवाक्यानां ब्रह्मण्यपितात्पर्येवाक्यभेदापत्तेः। मुख्यार्थसंभवे गौणाद्यर्थस्याग्राह्यत्वाच्च। एतेन सर्ववेदवाक्येषु ब्रह्मण्युपक्रमादिविचाररूपमननेप्यपूर्वविधिरपास्तो बोध्यः। तस्मादेनं सर्वदानधीत्य विचार्य्य च ज्ञातुमिच्छेदिति श्रुतिस्तु सर्ववेदविचारस्य न साक्षाद्ब्रह्मधीहेतुत्वपरा किंतु कर्मानुष्ठानाधीनचित्तशुद्धिद्वारा कर्मकाण्डस्य तद्द्वारा च ब्रह्मकांडस्य विचारतद्धेतुत्वपरा अन्यथोक्तदोषगणग्रासात् अथ श्रवणमननयोर्निदिध्यासनोद्देशेनापूर्वविधिं परोक्तमुक्तदूषणातिदेशेन दूषयति तेनेति। प्राप्तविधानासंभवेत्यर्थः। अज्ञानादाविस्यादि। अज्ञाननिवृत्तिरूपस्वकार्यद्वारोक्तश्रवणस्य प्रमाणगततात्पर्यप्रमेययोः संशयादिनिवृत्तिरूपस्वकार्यद्वारोक्तमननस्य निदिध्यासने हेतुत्वं तादृशद्वारं विना तदनुत्पत्तेरित्यर्थः॥ नियतविषयकेति। सर्ववेदोक्तगुणानां निदिध्यासनस्याशक्यत्वात् यावंतो निदिध्यासितुं येन शक्यंते तावद्विषयकनिदिध्यासनं तं प्रतिविधीयत इति नियतगुणविषयकं तदिति भावः। अपूर्वविधिरेवेति॥ २ ६ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उ॰३ अ॰सि॰ टी॰ल॰ १०

उक्तान्यगुणश्रवणमननयोर्निदिध्यासनंप्रत्यदृष्टद्वारोपकारकांगत्वंदर्शदौप्रयाजादेरिवेतिभावः।निरस्तमिति।श्रोतव्यइत्यादिवाक्येनिदिध्यासनांगताश्रवणादेस्तयोच्यते।तत्रत्वद्रीत्यागुरुमुखश्रवणादेर्नियमविधिर्मुक्तः अपूर्वविध्यपेक्षयालाघवात्।निदिध्यासनाविषयगुणेषुश्रवणाद्यनुष्ठानेमानाभावात्मद्रीत्यातुश्रवणस्यैवफलवत्त्वस्यस्थापितत्वात्तदंगेमनननिदिध्यासनेइत्याशयेनाह विपरीतेति विपरीतांगांगीभावस्य।श्रवणंप्रतिमनननिदिध्यासनयोः दृष्टद्वाराफलोपकार्यंगत्वस्य।अत्र तद्विजिज्ञासस्वश्रोतव्यइत्यादिवाक्येशिलातलेत्यादिवाचस्पतिमतंनिरंतरज्ञानधाराखपनिदिध्यासनसमभिव्याहारात्श्रवणमननेज्ञानस्वरूपेपरमतेप्युक्तरीत्यातथांगीकारेज्ञानस्याविधेयस्वरूपत्वात्वाचस्पतिमतइवोक्तवाक्यंनविधायकमितिभावः।अर्थवादानुरोधेन।दुर्बलार्थवादानुरोधेन।असंजातविरोधित्वादिनाप्रबलार्थवादानुरोधेनतुविधावप्युपक्रमाधिकरणादिसिद्धालक्षणास्त्येव।नचोक्तार्थवादानुरोधेनविधौसाधनप्रसक्तेःतिवचनंव्यर्थमितिवाच्यमुक्तवचनस्यविरोधरर्थवादापेक्षयो।

एवंचश्रवणमननयोर्निदिध्यासितव्यगुणांशेदृष्टद्वारेणान्यत्रत्वदृष्टद्वारेणनिदिध्यासनांगतेतिनिरस्तम् श्रवणादीनांनिर्गुणविषयतयासगुणविषयत्वाभावात् विपरीतांगांगिभावस्यस्थापितत्वाच्चसूक्ष्मार्थगोचरनिदिध्यासनस्यतादृशार्थविषयसाक्षात्कारहेतुतायादृष्टत्वेनाऽपूर्वत्वाभावाच्चनन्वत्रश्रूयमाणलिङ्गादेःकागतिरितिचेत् शिलातलयुक्तस्तुरंतेक्षरण्यवत्कुरण्ठीभावाज्जतिलयवाग्वाजुहुयादित्यादाविवार्थवादत्वमेवनचपत्न्यवेक्षितमाज्यंभवतिविदुषाकर्मकर्त्तव्यंतस्मात्पश्येतनित्यशइत्यादिनाज्ञानस्यापिविधानंदृष्टमितिवाच्यम् तत्रतद्धेतिंद्रियसंयोगादेर्विधेयत्वात् अनन्यगत्यात्लक्षणायादृष्टत्वात् नचनविधौपरःशब्दार्थइत्यनेनविरोधः गोभिःश्रीणीतमत्सरमित्यादौविधिवाक्येपिलक्षणादर्शनेनतस्यौत्सर्गिकत्वात् अर्थवादानुरोधेनविधौनपरःशब्दार्थइत्यर्थकत्वाच्च नचसाक्षात्कृतिसाध्यत्वस्येन्द्रियसंप्रयोगेप्यभावात् इन्द्रियनिष्ठक्रियाद्वारापरंपरयाकृतिसाध्यत्वस्यज्ञानेपिसंभवात् अनिच्छतोदुर्गन्धादिज्ञानवदनिष्टसंप्रयोगस्यापिदर्शनाच्चज्ञानसाम्यंसंप्रयोगस्येतिवाच्यम् स्वर्गादाविवस्वेच्छाधीनकृतिसाध्यत्वस्यविधेयताप्रयोजकस्यज्ञानेअभावात्संप्रयोगस्यतुतद्विपरीत्येनविशेषात्।

त्सर्गिकंप्राबल्यंविधायकत्वादितिन्यायमूलकत्वात्।स्वेच्छाधीनकृतिसाध्यत्वस्य।स्वेच्छाजन्यकृतिसाध्यत्वस्य।स्वर्गेच्छास्वर्गसाधनीभूतायांयागादिकृतौनकारणं किंतुयागादिचिकीर्षातथाचस्वचिकीर्षाधीनकृतिसाध्यत्वंकृतेः साध्यतास्थ्यविषयतापर्यवसन्नंविधेयताप्रयोजकंनचज्ञानेसाध्यतास्थ्यविषयतयाकश्चित्प्रवर्त्ततेकिंचोक्तसाध्यत्वयुक्तायाआहार्यवृत्तेर्ज्ञानत्वाभावेनोक्तसाध्यत्वावच्छेदेनैवज्ञानत्वाभावः कल्प्यतेनहिआहार्यवृत्तौउक्तसाध्येकुत्रचिद्व्यजानामीत्याद्यनुभवोलोकानामिच्छाजन्यज्ञानत्वेनपराभिमतेनतदिच्छानामेवविशिष्यावश्यकेहेतुत्वेप्रमाणहेतुत्वेमानाभावात्।तस्यप्रमात्वासिद्धेरन्यथातत्पूर्वमिंद्रियसंयोगाद्यनंतव्यक्तीनांज्ञानहेतूनांकल्पनेमहागौरवादनुमित्यादाविच्छाजन्यत्वकल्पनंतुप्रक्रियामात्रंसिद्धेःप्रतिबंधकत्वएवगौरवेणाननुभवेनचप्रभाकराणांविवादादनिष्टसंप्रयोगस्यतूक्तबाधकाभावेपिनांतरीयकत्वादेवनोक्तसा

ध्यत्वविधेयत्वमितिभावः॥

राम॰ ३५५

CC-0. In Public Domain. Digitization by eGangotri

नचभक्षेहीत्यादिभक्षेहिमाविशेत्यादिर्भक्षमंत्रः तत्रउपहूतस्योपहूतोभक्षयामीत्याद्यंशोभक्षणस्यप्रकाशकः अश्विनोस्त्वाबाहुभ्यांसंध्यासमित्याद्यंशोग्रहणस्य अवख्येपमित्याद्यंशोवेक्षणस्यासंध्यासंधारयामितत्रसर्वोपिमंत्रोभक्षणेविनियोक्तव्योभक्षानुवाकसमाख्यातः ग्रहणादिप्रकाशकांशानांभक्षणप्रकाशकांशेनगृहीत्वावेक्ष्यसम्यग्जरणायभक्षयामीत्येकवाक्यतासंभवाच्च। अतएवग्रहणाद्युत्तरवर्तिनिसम्यग्जरणपूर्ववर्तिनिभक्षणेलक्षणायद्यपिग्रहणादिकंतत्तदंशस्यमुख्यार्थः तत्रैवचतस्यलिंगंविनियोजकंसंभवतिलिंगंचसमाख्यावाक्यापेक्षयाप्रबलंतथापिग्रहणादेरार्थिकत्वेनाविहितत्वादंगत्वर्थत्वेनतादर्थ्येसतितस्यकत्वपूर्वानुपयोगित्वाल्लिंगमपुरस्कृत्योक्तलक्षणैवयुक्तालाक्षणिकार्थेपिसवित्रादिपदानांविनियोगस्येष्टत्वादितिभा

नचभक्षेहीतिभक्षमंत्रेतृप्तेरनुनिष्पादितयाः ननुष्ठेयत्वेनतृप्तिप्रकाशकभागस्यतत्रविभज्यविनियोगाभावेप्यवेक्षणस्यानुष्ठेयत्वात् तत्प्रकाशकभागस्यावेक्षणेविभज्यविनियोगइतितृतीयाध्यायोक्तिविरोधइतिवाच्यं इंद्रियसंप्रयोगरूपावेक्षणस्यतृप्त्यादिवदनुनिष्पादित्वाभावेनानुष्ठेयतयातत्प्रकाशकभागस्यतस्मिन्विभज्यविनियोगइत्येवंपरत्वात् यच्चैकश्रोत्रगतानेकगकारेषुबुभुत्साप्रयत्नाभ्यामभीष्टगकारज्ञानदर्शनेनज्ञानस्यापिविधेयत्वमितितन्नअनभिमतविषयवैमुख्यस्यैवबुभुत्साप्रयत्नसाध्यतयाज्ञानंप्रतितयोरजनकत्वात् नच। यदेवविद्ययाकरोतीतिविद्याया अंगत्वश्रवणात् अविहितस्यचांगत्वानुपपत्त्याविद्याया विधेयत्वमितिवाच्यम् तस्यवाक्यस्योद्गीथोपासनाप्रकरणस्थतयातत्र त्यविद्यापदस्योपासनपरतयाविहितत्वेनांगत्वाविरोधात् तन्निर्द्धारणानियमस्तद्दृष्टेरित्यत्रविद्याया अंगाववद्धाया अंगत्वनिरासेपिनविधेयत्वहानिः ननुयथादुर्गन्धादिज्ञानस्येच्छाविषयत्वाभावेपिब्रह्मज्ञानस्यतद्विषयत्वं यथाचज्ञानांतरस्यनियमादृष्टासाध्यत्वेपिब्रह्मज्ञानस्यतत्साध्यत्वं यथावापर्वतादिज्ञानस्यनयनोन्मीलनेसतिप्रयत्नांतरनिरपेक्षत्वेपि। ध्रुवारुन्धत्यादिज्ञानेतत्सापेक्षत्वम् तथातिसूक्ष्मब्रह्मज्ञानस्यइच्छाप्रयत्नसाध्यत्वसंभवइतिचेत्॥ ९ क्षेअविहितस्यापिग्रहणादेः विहितभक्षणान्यथानुपपत्तिलब्धानुष्ठानकत्वेनोक्तानुष्ठानस्यचमंत्राधीनस्मृतिसाध्यत्वेनापूर्वप्रयोजकग्रहणाद्युद्देशेनतत्तदंशविनियोगोयुक्तइतितृतीयद्वितीयेस्थितंमंद्राभिभूतिरित्यादितृप्यत्विंतिसंततृप्तिप्रकाशकमपिनतृप्तौविनियुज्यतेतृप्तेर्भक्षणानुनिष्पादितत्वेनाननुष्ठेयत्वेनानुष्ठानापेक्षितस्मृत्यनपेक्षत्वात् स्मारकमंत्रानपेक्षणत्वात् तथाचतृप्यत्विंतिभक्षयामीत्येकवाक्यतयातृप्तिविशिष्टभक्षणार्थत्वेनोत्साहविशेषजननपर्यवसानात् वाक्येनतस्यभक्षणार्थत्वमित्यपितदुत्तराधिकरणेस्थितं इंद्रियसंयोगरूपावेक्षणस्येति। ज्ञानरूपावेक्षणस्यतु इंद्रियसंयोगानुनिष्पादित्वेनतृप्तिवद्‍ननुष्ठेयतेतिसूच्यते। अजनकत्वादिति। श्रोत्रसन्निकृष्टगकाराणांमध्येयत्रद्वेषस्तत्रतस्यसामग्रीविघटनरूपवैमुख्येइच्छाप्रयत्नौहेतूयत्रनद्वेषस्तत्रतस्येनतदपेक्षेतिभावः अविहितस्येति। तदुक्तंशाबरभाष्ये

नवाविहितप्रकरणम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रामाणिकेत्यादि। प्रामाणिकंयत् दृष्टात् ज्ञानस्यानित्यत्वादिधर्मादिलक्षणं ज्ञानस्येच्छाविषयत्वादिकं तद्दर्शनमात्रेण प्रामाणिकं दृष्टात् ज्ञानस्याविधेयत्वात्विलक्षणं ज्ञानस्यविधेयत्वेन कल्पनार्हमित्यर्थः। निरोधादीनां। इच्छाधीनत्वेनानुभूयमाननिरोधोऽस्त्यस्यादीनामन्यपरत्वस्योपासनान्यनिष्ठत्वस्य लाक्षणिकत्वोपपत्तेरिति। यत्तु सर्वत्र लक्षणानौचित्ये तितन्न ज्ञानमात्रस्य प्रज्ञाशब्दार्थत्वे प्रशब्दवैयर्थ्यापत्तेः प्रकृष्टज्ञानरूपयोगार्थादरे तु ज्ञानविध्यनुपपत्तेः करणरूपप्रत्ययार्थमादाय प्रकृष्टज्ञानसाधनरूपविचारार्थकत्वौचित्यादाचार्यैस्तु अनुपपत्तिसत्त्वे लक्षणापि न दोष इत्याशयेन विचारत्वरूपेण लक्षणोक्ता एवं पत्य

नप्रामाणिकदृष्टविजातीयकिंचिद्धर्मदर्शनेनाप्रामाणिकवैजात्यस्य कल्पयितुमशक्यत्वात् प्रयत्नान्वयव्यतिरेकयोश्च ज्ञानसाधनजनने उपक्षीणतया ध्रुवा रुन्ध्यत्यादिनिदर्शनान्यथासिद्धतया तन्न्यायेन ब्रह्मज्ञाने कृतिसाध्यत्वस्य वक्तुमशक्यत्वाच्च न च शास्त्रार्थज्ञानस्य नियमेन पुंतंत्रत्वदर्शनात् ब्रह्मणश्च शास्त्रार्थत्वात्तज्ज्ञानस्य पुंतंत्रत्वमिति वाच्यं तत्रापि ज्ञानसाधनस्यैव पुंतंत्रत्वात् यत्त्वप्रशस्तप्रशस्तज्ञानयोर्विधिनिषेधदर्शनं तदपि ज्ञानकारणविषयकमेव यच्चेच्छादिनोत्पत्तिनिरोधयोरनुभवः सोऽपि करणव्यापारविषय एव न चैवं नामादिषु ब्रह्मोपासनायां त्वयाविधेयत्वेनाङ्गीकृतायां पुंतन्त्रत्वं न सिद्ध्येत् तत्रापि मनोधारणादेरेव पुंतंत्रत्वस्य वक्तुं शक्यत्वादिति वाच्यम् ज्ञानविध्युक्तानुपपत्तेस्तत्राभावेन निरोधादीनामन्यपरत्वस्य वक्तुमशक्यत्वात् न चोक्तज्ञानरूपश्रवणादिष्वपि प्रयत्नसाध्यत्वस्यानुभवसिद्धत्वाद्विधेयत्वमिति वाच्यम् अनुभवान्यथासिद्धेरुक्तत्वात् न च त्वयापि निदिध्यासनस्य परोक्षज्ञानसन्तानरूपस्य विधेयत्वं वदता सन्तानिनां ज्ञानानामपि विधेयत्वमंगीकर्त्तव्यमेव तदविधाने सन्तानविधानानुपपत्तेरिति वाच्यम् आवृत्तिगुणयोगस्यैव विधेयत्वात् उपनिषदमावर्त्तयेदित्यत्रेव न च श्रवणादेर्ज्ञानात्मकत्वे श्रवणं यावदज्ञानमिति अज्ञानविरोधित्वस्मृतेः श्रवणेनाज्ञानं निवृत्तमित्यनुभवस्य चानुपपत्तिरिति वाच्यम् वाक्यार्थप्रमित्युपयुक्ततात्पर्यनिर्णयद्वारा उपक्रमादिलिंगविचारात्मश्रवणादेरज्ञानादिविरोधितयास्मृत्यनुभवयोरुपपत्तेः विज्ञाय प्रज्ञां कुर्वीतेत्यादौ ज्ञानविध्युक्तानुपपत्त्या प्रज्ञाशब्दस्य विचारलाक्षणिकत्वोपपत्तेः न च त्वयाविधेयत्वेनांगीकृतस्य ध्यानस्य ज्ञानभिन्नत्वे तस्य स्वविषये व्यवहारजनकत्वं न स्यादिति वाच्यं तदन्यज्ञानेनैव तत्कारणतयावश्यकेन तद्विषये व्यवहारोपपत्तेः प्रमाणवतो गौरवस्यादोषत्वात्॥ (वेक्षितमित्यादावप्युपवादिशब्दवैयर्थ्यापत्तेश्चासुषमात्रादिकं नार्थः किंतु तदुत्तरश्रुत्यनुगुद्धिविचारः। आलोचनात्मकविचारे अवपूर्वकेक्षतेर्निरूढलाक्षणिकत्वात् चाक्षुषत्वेनाज्ञातेऽपि पुरुषेऽनपनोन्मीलनवत्त्वज्ञानादेवापमवेक्षत इत्यादिप्रयोगानादित्वादीक्षणहेतुचक्षुःसंप्रयोगे वा विदुषा कर्मकार्यमित्यादौ तु विदेर्विचारेऽपि शक्त्या कर्मविचारस्यैवार्थः। तस्मात्पश्येतइत्यादौ तु कर्तव्याकर्तव्यं सर्वं विचारयेदित्येवार्थः त्वयापि वाच्यः। प्रमाणवत इति। वस्तुतो ज्ञानान्यस्यापि शशविषाणादिविकल्पस्य व्यवहारादिहेतुत्वेन तत्साधारणजातिविशेषस्य ध्यानादिनिष्ठस्य तदच्छेदकत्वाच्चानुपपत्तिः। परं तु ध्यानोत्तरं स्मृत्यादेः ध्यानपूर्वत्वेऽदृष्टत्वनुभवादेरानुभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।द्वाराभिप्रायेतितस्याभिध्यानात्योजनात्तत्त्वभावादित्यादेर्योजनापदेनश्रवणमननोक्तेस्तत्त्वभावपदेनसाक्षात्कारोक्तेः श्रवणाद्यधीनसाक्षात्कारेणाविश्वमा।
यानिवृत्तिरंतेप्रारब्धभोगसमाप्तौतुभूयोवशिष्टदेहेंद्रियादिरूपमायानिवृत्तिरित्यर्थः।तत्त्वस्यसर्वाधिष्ठानस्यभावोविद्यानिवृत्तिरूपाप्राप्तिर्यस्मादितिव्युत्पत्ते।
प्राप्ताविति।अस्माज्ज्ञावपदनिष्पत्तेरित्यपिबोध्यं।यत्कारणोसतीत्यादिकारणेसति अन्यथाकर्तुमशक्यत्वंयदित्यर्थः।तेनेतिशेषः।अविधेयत्वंब्रूमइत्यनुषज्यते।यस्य

अतएवध्यानविषयेजानामीत्यनुभवस्मरणेतद्भिन्नज्ञानप्रयुक्ततयाव्याख्यातेतस्याभिध्यानादितिश्रुतौध्यानस्यमायाख्याविद्याऽनिवर्त्तकत्वेपित
द्युक्तिर्ध्यानानन्तरभाविसाक्षात्कारद्वाराभिप्रायेतिनतयाविरोधः यत्तूपासीतेत्युपक्रम्ययएवंवेदेत्युपसंहारेणत्वयापिविधेयत्वेनांगीकृतायामुपासनायां
विद्धातुप्रयोगेणोपासनायांज्ञानत्वावगमात् अन्यत्रापिज्ञानत्वंनविधेयत्वविरोधीतितन्नउक्तानुपपत्त्याविदेस्तत्रामुख्यत्वेनज्ञानत्वागमकत्वात् धात्व
नेकार्थत्वेनवानचमानतंत्रतामात्रेणकथमपुंतंत्रताप्रतिग्रहीत्रादितंत्रस्यापिदानादेस्तद्दर्शनादितिवाच्यम् नह्यन्यतंत्रतामात्रेणाविधेयत्वंब्रूमः
किंतुपुमिच्छाभिर्यत्कारणेसति अन्यथाकर्त्तुमशक्यत्वम् ज्ञानस्यपुरुषतंत्रताभङ्गः॥७॥ किंचविधीयमानंज्ञानंकिंशाब्दंकिंवातदभ्यासः यद्या
तत्त्वमनपेक्ष्यारोपितविषतयाध्यानंकिंवाऽऽपरोक्ष्यफलकंज्ञानान्तरम् नाद्यः कर्मकाण्डइवगृहीतसङ्गतेः स्वतःसिद्धत्वेनकृत्यसाध्यतया
विध्यविषयत्वात् नचकर्मकाण्डेप्यापातजन्यस्यस्वतःसिद्धत्वेपिविमर्श्वजन्यस्यकृतिसाध्यत्वम् अन्यथाऽध्ययनविधेरुत्तरक्रतुविधेर्वा
तदाक्षेपकतानस्यादितिवाच्यम् तज्जनकविचारएवविधेयताप्रयोजककृतिसाध्यत्वपर्यवसानेनतादृशज्ञानेप्यसंभवात् नद्वितीयःस
किंमोक्षायविधीयतेसाक्षात्कारायवानाद्यःतस्यनैयोगिकत्वेनस्वर्गादिवदनित्यत्वापातात् नचवंधध्वंसस्यनैयोगिकत्वेपिध्वंसत्वात्प्रागुक्त्यादिव
त्वाच्चनित्यत्वोपपत्तिरितिवाच्यम् नहिमन्नयएवलन्नयेपिवन्धध्वंसमात्रंमुक्तिः किंतुलोकान्तरप्राप्तिस्तस्यामुक्तदोषतादवस्थ्यापत्तिः ना॰
चानावृत्तिश्रुत्यानित्यत्वम् तद्यथेहकर्मजितोलोकः क्षीयतेएवमेवामुत्रपुण्यजितोलोकः क्षीयतइतिश्रुत्यानैयोगिकस्यानित्यत्वावगमात्
नचैतच्छ्रुतिविरोधेनतस्याअनित्यत्वाबोधकत्वं यत्कृतकंतदनित्यमितियुक्त्युपोद्बलिततयाप्राबल्यात् नद्वितीयःतत्किंदृष्टफलकमदृष्टफलकंवा ना
द्यःपरोक्षज्ञानाभ्यासेनतत्तत्साक्षात्कारादर्शनात् नद्वितीयःप्रमाणायत्तत्वात्तस्य॥ १कारणोसत्यपिपुमिच्छाभिरन्यथाकरणं निरोधरूपंतस्यज्ञानत्वेमानाभावाद्विधेय।

त्वंतदन्यस्यज्ञानस्यपुंतंत्रत्वाभावेननतदितिभावः।श्रीः तर्कैरित्यादिज्ञानापुरुषतंत्रता।७ गृहीतसंगतेः।गृहीतपदतदर्थसंबंधस्यपुंसः।तदाक्षेपकत्वाविमर्शाक्षेपकताप्राबल्या।
दिति।अन्यथाअक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतमितिश्रुतेरविनाशिफलबोधकत्वंस्यात्।दृष्टफलकं।साक्षात्काररूपेफलेलोकसिद्धहेतुताकं॥तथाचनियमविधिः।अदृष्ट
फलकं।अदृष्टद्वारोक्तफलेहेतुस्तथाचापूर्वविधिः।परोक्षज्ञानाभ्यासेन।शाब्दादिरूपेणवह्न्यादिज्ञानेन।प्रमाणायत्तत्वात्।प्रमाणमात्रजन्यत्वात्तस्योक्तफलस्यमात्रपदादुक्ताद्दृष्टा।

।अतएव। साक्षात्कारंप्रत्युक्तहेतुत्वयोरसंभवादेवशब्दस्यापीति। ब्रह्मणीतिशेषः। तादृशज्ञानस्यविधेयत्वाभिमतज्ञानस्यविधिफलत्वाभावाद्विधिनानुष्ठापनीयत्वाभावात्। ततज्ज्ञानंयदिशाब्दंतदाज्ञानांतरमित्युक्तमसंगतमथतदधीनस्मरणंतथापिस्वतःसिद्धशब्दज्ञानाधीनत्वेनप्रमाणायतत्वाद्द्वापसीपदूषणमितिभावः प्रधानभूतापरोक्षफलकतया।प्रधानंसद्यदपरोक्षफलकंतत्तया।प्राधान्येहेतुमाह प्रमेयावगममिति।अंगतयासाक्षात्करणतया।मननिदिध्यासनयोस्तुसहकारित्वेनगतातिशयहेतुत्वेनोक्तकारणत्वाभावात्नप्राधान्यमितिभावः।तर्कैरित्यादिज्ञानस्यविधिभंजनं।८। तद्धास्यविजज्ञौअस्योद्दालकस्यतत्तस्मात्तत्त्वमसीत्याद्युपदेशादात्मानंविज्ञातवान्श्वेतकेतुरितिशेषः।तमसःपारमज्ञानप्रयुक्ताद्विलक्षणंसर्वाधिष्ठानमनवच्छिन्नानंदंदर्शयतिसाक्षात्कारयतितस्मैमृदितकषायायतमसःपारंद

अतएवनतृतीयः ध्यानस्यज्ञानरूपत्वाभावाच्च नचतुर्थः शब्दस्यापिप्रामाण्याभावापातात्ब्रह्मणिप्रमाणीभूतज्ञानकर्तव्यतायामेवप्रामाण्यात् नचमहातात्पर्यमादायब्रह्मण्यपिप्रामाण्यंतादृशज्ञानस्यापिप्रमाणायत्ततयाविधिफलत्वाभावात् तस्मात्यत्स्वेक्षितमाज्यमित्यादावपिज्ञानस्याविधानात् ध्यानस्यापिविज्ञानव्यतिरेकसाधनात् सूक्ष्मशास्त्रार्थबुद्धौकृतयन्वयव्यतिरेकयोः तत्साधनविषयतयाऽन्यथासिद्धत्वाच्चनात्मज्ञानंविधातुंशक्यते तदेवंश्रवणस्यज्ञानरूपत्वेविधेयत्वानुपपत्तिः तस्माज्ज्ञानविजानीयंश्रवणमपरोक्षज्ञानजनकशब्देतिकर्तव्यतारूपविचारात्मकंमनननिदिध्यासनाङ्गकंप्रमेयावगमंप्रत्यंगतयाप्रधानभूतापरोक्षज्ञानफलकतयाविधीयतइतिसिद्धम् ज्ञानविधिभङ्गः॥ ८ ॥ ननुकथमपरोक्षज्ञानजनकत्वंशब्दस्यमानाभावादितिचेत् नतद्धास्यविजज्ञौतमसः पारंदर्शयतीत्यादेः वेदान्तविज्ञानसुनिश्चितार्थाइत्यादेश्चमानत्वात् पूर्ववाक्येफलजनकापरोक्षज्ञानस्योपदेशमात्रसाध्यत्वोक्तेःद्वितीयश्रुतौशाब्दज्ञानस्यविपदेनविशेष्यविषयत्वस्यलाभात् सुपदेनापरोक्षत्वोक्तेः नचविजज्ञावित्यादेःपरोक्षज्ञानेनापिचरितार्थतातमसःपारंदर्शयितीत्युत्तरवाक्यस्वरसेनापरोक्षज्ञानपरत्वसिद्धेः नचग्राममार्गोपदेष्टरिग्रामंदर्शयतीतिवत्स्वरंपरयाप्रयोजकतयोपचारःसाक्षात्साधनत्वेबाधकाभावेनतस्यात्रान्याय्यत्वात् उपदेशातिरिक्तकारणस्यनारदसनत्कुमाराख्यायिकायामप्रतीतेश्चनचमनसैवानुद्रष्टव्यमित्यादिश्रुतिविरोधः तस्याश्चित्तैकाग्र्यपरत्वात्॥ ९ ॥

र्शयतिभगवान्सनत्कुमारइतिश्रुतेः।।अपरोक्ष त्वोक्तेरपरोक्षस्यैवोक्तेः।तथाचवेदांतवाक्याद्यद्विशेषविषयकमद्वितीयत्वाद्युपलक्षणेनव्यावृत्ताधिष्ठानमात्रविषयकंज्ञानंतेनसुनिश्चितः तदभिन्नस्यापरोक्षस्याप्रमातेनागृह्यमाणस्यविषयीकृतोवेदांतवाक्यार्थोऽखंडब्रह्मात्मैक्यरूपोयैस्तेतथेत्यर्थइतिभावः।उत्तरवाक्यस्वरसेनेति।छांदोग्येतस्मैइत्यादिवाक्येनसप्तमप्रपाठकांतस्थेनाविद्यानिवर्तकज्ञानस्यापरोक्षत्वोक्त्यापष्ठप्रपाठकस्थेतद्धास्यविजज्ञाविति वाक्येपिविशब्दस्यापरोक्षोक्तज्ञानपरत्वंनिश्चीयतेच रसवाक्यस्यचरमज्ञानपरत्वोचित्यादितिभावः।आचार्यवान्पुरुषोवेदेत्यनेनाचार्योपदेशजज्ञानवंतमुद्दिश्यतस्यतावदित्यादिनातज्ज्ञानादेवकैवल्योक्तेरित्यपिबोध्यं।कारणस्य।

।अन्यथेत्यादि। अर्थपदस्य संनिहितवेदांतमात्रार्थपरत्वेन विचारकर्तव्यत्वादेरपि तादृशार्थत्वेनापरोक्षत्वापत्तिरित्यर्थः ब्रह्ममात्रेति वेदांतशब्दस्य वेदशेषप
ठ्यमानं नार्थः चरमस्य वाक्यस्य पदस्य वा तत्त्वेन तत्त्वमस्यादेरतत्त्वापत्तेर्नाप्युपनिषद्व्यवहारविषयभागांतर्गतत्वविशिष्टं तस्य यौगिकत्वादन्यथा कर्मकांडां।
शवाक्यस्यापि तत्त्वापत्तेः किंतु सर्वस्य वेदस्यांतः परमतात्पर्यविषयो बोधकतासंबंधेन यत्रेति व्युत्पत्त्या तत्त्वमस्यादिवाक्यमेव तद्बोध्यता ब्रह्मण एवेति भावः। एवं हीति।
एवमपीत्यर्थः। तेन शब्दस्य परोक्षज्ञानहेतुत्वं क्लृप्तमिति सूच्यते। सर्वांशस्येति। मनसः करणत्वं तज्जन्यज्ञाने चापरोक्षत्वं कल्प्यं शब्दं तु करणत्वं क्लृप्तं तज्जन्यज्ञानस्यापरो।

नच सुपदस्याप्रामाण्यशंकाविरहपरत्वेन द्वितीयवाक्ये न तेनापरोक्षरूपताप्राप्तिः अन्यथा वेदान्तबोध्यस्य विचारकर्त्तव्यतादेरप्यपरोक्षत्वा-
पातादिति वाच्यम् निश्चितपदेनैवाप्रामाण्यशंकाविरहादेर्लब्धेः सुपदस्यातत्परत्वात् नापि वेदान्तबोध्यस्य ब्रह्मातिरिक्तस्याप्येवमा-
परोक्ष्यापत्तिः अर्थपदस्य मुख्यतत्तात्पर्यविषयपरत्वात् वेदान्तबोध्यताया ब्रह्ममात्रपर्यवसन्नत्वाच्च एवमनुमानमप्यत्र मानम् अपरोक्ष-
त्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति परोक्षज्ञाननिष्ठान्यताभावाप्रतियोगित्वात् ज्ञानत्ववत् नच कर्मकाण्डजन्यज्ञानवृत्तीत्येवमपि साध्येते-
ति वाच्यम् विपक्षबाधकसत्त्वासत्त्वाभ्यां विशेषात् तथाहि तत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानाजनकत्वेऽपरोक्षभ्रमनिवृत्तिर्न स्यात् नच मन-
सैवापरोक्षज्ञानं मनसः कुत्राप्यसाधारण्येन प्रमाकरणत्वाभावात् आत्मनः स्वप्रकाशत्वात् सुखादीनां साक्षिवेद्यत्वात् नच श-
ब्देऽपरोक्षज्ञानजनकत्ववत् अन्यत्राक्लृप्तमेव मनसि तत्कल्पनीयं एवं हि सर्वांशस्यैव मनसि कल्पनेन विशेषात् नचैवं ज्योति-
ष्टोमादिविषयकर्मकाण्डजन्यज्ञाने कल्प्यकमस्ति तत्र हि कल्पनीयमनुष्ठानाय वा फलाय वा नाद्यः परोक्षज्ञानादेव तत्संभवात् त-
त एवानुष्ठानात्फलसिद्धेः न द्वितीयोऽपि न च विमतः शब्दो नापरोक्षधीहेतुः शब्दत्वादिति प्रतिसाधनं दशमस्त्वमसीत्यादावेव व्य-
भिचारात् नच तत्रापीन्द्रियमेव करणं शब्दस्तत्सहकारीति वाच्यम् क्वचिद्बहुलतमे तमसि लोचनहीनस्यापि तद्वाक्यादपरोक्षभ्रमनिवर्तकस्य दश-
मोऽस्मीत्यपरोक्षज्ञानस्य दर्शनात् यत्रापीन्द्रियसद्भावः तत्रापि तदप्रयोजकमेव॥ ((क्षत्वमात्रं कल्प्यमिति भावः। मां प्रति दुष्टो यो हेतुस्तेन मां प्रति सत्प्रतिपक्षासंभ

वइत्याशयेनाह दशम इति। तत्रापीत्यादि। आत्मांशे इंद्रियसन्निकर्षात् दशमत्वांशे शब्दादेकं ज्ञानमित्यर्थः। लोचनहीनस्य। वहिरिंद्रियसन्निकर्षशून्यस्य। मनसस्तु करणत्वं न क्लृ
प्तमिति भावः। न चात्रैव शब्दस्य मनसो वा करणत्वं कल्प्यत इत्यत्र विनिगमकाभाव इति वाच्यं। शब्दस्य ज्ञानकारणत्वेन क्लृप्तत्वेन दत्तोत्तरत्वात्। किंच शब्दजन्यज्ञानस्यापरोक्षत्वम
स्माकं दशमस्त्वमित्यादौ न कल्प्यं किंतु क्लृप्तदीपलाघवमूलकं साक्षात्कारत्वाख्यातिरिक्तधर्मकल्पनमपेक्ष्य प्रमात्रभिन्नविषयकज्ञानत्वस्य क्लृप्तस्यैव साक्षात्करोमीत्यादिव्य
वहारविषयतौचित्यादेवं च विद्यमानमपींद्रियसन्निकर्षादिकं प्रमात्रभेदप्रयोजकपूर्वोत्पन्नवृत्तिजनकत्वेनोपक्षीणं दशमस्त्वमित्याकारवृत्तौ न करणमित्याशयेनाह यत्रापीति

उ.३
अ.सि.
टी.ल.
१३

अपरोक्षभ्रमानिवृत्तिप्रसंगात् दशमान्यत्वांशेपरोक्षस्यभ्रमस्यानिवृत्तिप्रसंगात्। दशमत्वंदशत्वसंख्यापूरकत्वं। तच्चदशमत्वाश्रयाणामन्यतमत्वंदशम मात्रवि
षयकधीविषयत्वरूपंतच्चावच्छिन्नात्मवृत्तिचेत्तदासाक्षिवेद्यंशरीरवृत्तिचेत्तदापिसाक्षिणात्वचादिवृत्त्यावाअपरोक्षमित्युभयथापिप्रमात्रभेदस्यतत्रसंभवेन
तज्ञोचरंशाब्दज्ञानमुक्तापरोक्षत्ववदितिभावः। अनियमादनियमापत्तेः॥ इत्येवंरूपत्वे इत्याकारकत्वे। अज्ञानावृत्तेरिति। तथाचशाब्दवृत्तेरपरोक्षव्यवहारविषय
विषयकत्वेनाज्ञाननिवर्तकत्वमज्ञाननिवृत्तौचसत्यामपरोक्षोयमित्याकारकत्वरूपव्यवहारस्यापरोक्षत्वमित्यन्योन्याश्रयः। नप्रकाशत इत्यादौत्वादिपदादप
रोक्षभिन्नमित्यादिसंग्रहः। एतज्ज्ञानेति यतज्ज्ञानस्यापरोक्षत्वनिर्वचनायविषयापरोक्षत्वंनिरूप्यतेतज्ज्ञानेत्यर्थः। तज्ज्ञानस्यापरोक्षत्वमपरोक्षविषयकज्ञा।

नचधर्मवांस्त्वमसिपर्वतोग्निमानित्यादौविशेष्यापरोक्षत्वेपिविशेषणपारोक्ष्यवदत्रापिदशमत्वेपारोक्ष्यमस्त्वितिवाच्यं अत्रपरोक्षत्वेऽपरोक्षभ्रमा
निवृत्तिप्रसंगात् नन्वेवमपिशब्दस्यापरोक्षज्ञानजनकत्वंकिंस्वाभाविकमुतापरोक्षविषयनिमित्तकंनाद्यातिप्रसंगात् नद्वितीयःजीवाःपरमात्मनोनभिद्यंते
आत्मत्वादित्यादिनाजायमानानुमितेःश्रवणात्मागापाततोवेदान्तजन्यायाभाषाप्रबन्धजन्यायाअनधीतवेदान्तजन्यायाऐक्यप्रतीतेश्चापरोक्ष्यापातात् श्रव
णनियमादेरनियमात् किंचार्थस्यापरोक्षत्वंनतावदपरोक्षबुद्धिरूपत्वंब्रह्मण्यसत्त्वेपिदशमत्वादावभावात् चैत्रापरोक्षज्ञानेमैत्रस्यशब्दादिनाअपरोक्षा
दर्शनाच्चनाप्यपरोक्षव्यवहारविषयत्वंव्यवहारापरोक्ष्यस्यतादृगर्थविषयकत्वरूपत्वेनान्योन्याश्रयात् अपरोक्षोयमित्येवंरूपत्वेऽज्ञानावृतेतद
भावात् त्वयापिनप्रकाशत इत्यादिव्यवहारार्थमेवावरणकल्पनात् उक्तव्यवहारयोग्यत्वरूपत्वेव्यवहितघटेशब्दादपरोक्षज्ञानप्रसंगात् अपरोक्ष
ज्ञानजन्यत्वरूपत्वेचवक्ष्यमाणपक्षान्तर्भावात् तस्मादर्थस्यापरोक्षधीव्यवहारविषयत्वमेवापरोक्षत्वेवाच्यम् तच्चेतज्ज्ञानविषयत्वेनतदुक्तो
वऽन्योन्याश्रयः ज्ञानांतराभिप्रायेतुकेषांचिदपरोक्षेस्वर्गादावस्माकंशब्दादपरोक्षधीप्रसंगात् एकपुमभिप्रायेचपूर्वापरोक्षेशब्दादिनाइ
दानीमपरोक्षधीः स्यात् एककालाभिप्रायेप्रत्यक्षाग्नौलिंगाच्छब्दाद्वाऽपरोक्ष्यंस्यादितिचेत् नयंशाब्दबोधमादायपरोक्षत्वंतत्साक्षा
त्वंनरघिन्नाथावगाहित्वनिमित्तकमित्युक्तदोषानवकाशात्॥ ९९ ननुविषयस्यापरोक्षत्वमपरोक्षतज्ज्ञानविषयत्वमित्यन्योन्याश्रयः। आपरोक्ष्यंस्यादिति॥

अत्रपद्यपीष्टापत्तिरेवतथापिसुखादेःसाक्षिरूपस्यज्ञानस्यापरोक्षत्वेज्ञानांतरापेक्षायानियमःसुखादौवृत्तिंविनापिसाक्ष्यभिन्नसुखादिविषयकत्वस्यापरोक्षत्वरूप
त्वसंभवात् किंतुज्ञानस्यनांतरघटितापरोक्षत्वंवाच्येज्ञानांतरस्यापिज्ञानांतरघटितमेवतद्वाच्यमन्यथान्योन्याश्रयात्तथाचानवस्थेत्याशयेनसमाधानांतरमाह यंशाब्दमि
ति। शाब्दत्वमविवेतमनुमित्यादेरप्येतादृशापरोक्षत्वात्। यस्यप्रमातुःयंबोधमादायबोद्धृत्वंतदभिन्नार्थविषयकज्ञानत्वमेवतस्यापरोक्षत्वमित्यर्थः तदभिन्नत्वंचमनोनवच्छे
दप्रयुक्तोयोभेदस्तच्छून्यतावच्छेदकत्वंतेनघटादिप्रत्यक्षकालेपटादौप्रमातृभेदेपिनक्षतिः। यद्विषयावच्छेदेनहिचितिवृत्तिरूपेणापरिणतमनःसंबंधस्तद्विषयावच्छेदेन

क्षि२

राम.

CC-0. In Public Domain. Digitization by eGangotri

।सुखादौतुसासहजैव।इच्छादिवारणायज्ञानत्वमिति।तन्मनोवच्छिन्नचिद्भेदशून्यतावच्छेदकविषयकज्ञानत्वंतन्मनोवच्छिन्नज्ञानस्यापरोक्षत्वमितिपर्यव-
सितंतेनपुरुषांतराभिन्नविषयकज्ञानंनापरोक्षंविषयस्यापरोक्षत्वंतुनोक्तज्ञानविषयत्वंधर्माधर्मादौतत्तदापत्तेः।किंत्वनावृतत्वं।ननूक्तापरोक्षत्वेन —ज्ञानस्यहेतुत्वादे
गौरवाज्जातिविशेषरूपमपरोक्षत्वंज्ञानेयुक्तमितिचेन्नअनावृतत्वस्यैवाखंडाभावस्यतद्व्यक्तित्वेनापरोक्षज्ञानकार्य्यत्वाभिमतहेतुत्वात् घटादौतरव्यावृत्तिरेवघटत्वा-
दौतिमतेघटत्वादेरिवोक्ताभावस्यप्रतियोगिविशेषितरूपानवच्छिन्नस्यापिहेतुत्वादिसंभवात्।वस्तुतस्तुधर्मादिज्ञानस्यापरोक्षत्ववारणायमनोनवच्छेदप्रयुक्तस्यैवा-
वरणप्रयुक्तस्यापिभेदस्याभावउक्तलक्षणेवश्यंनिवेश्यः तथाचानावृतविषयज्ञानत्वमेवापरोक्षत्वंयुक्तमावरणाविरोधितावच्छेदकंतुचाक्षुषादिवृत्तावनुगतंनवेत्यत्र

नचैवंप्रत्यक्षान्तर्भावःशब्दस्यस्यादितिवाच्यम् वीहृभिन्नार्थकशब्दातिरिक्तत्वेसतिप्रत्यक्षप्रमाकरणत्वस्यप्रत्यक्षांतर्भावेतंत्रत्वात् ननुमनसैवा-
नुद्रष्टव्यमित्यादेरिवमनःकरणताप्रतिपादकस्यप्रकृतेऽभावादनौपदेशिकंशब्दस्यसाक्षात्कारकरणत्वमितिचेत् नतंत्वौपनिषदंपुरुषंपृच्छा-
मीत्यादौतत्रसाधुरिति तदन्यासाध्यत्वेसतितत्साध्यत्वरूपसाध्वर्थेविहिततद्धितश्रुत्याएवमानत्वात् ननुमनसःकरणत्वेप्यौपनिषदत्वस्य
निदिध्यासनापेक्षिततयाऽन्यथासिद्धिःनयन्मनसानमनुतइतिमनसःकरणत्वनिषेधात् नचयतोवाचोनिवर्त्तन्तइतिशब्दस्यापिकरणत्वानु-
पपत्तिःऔपनिषदत्वश्रुत्यनुसारेणतस्याः शक्त्याअबोधकत्वपरत्वात् तदुक्तम् चकितमभिधत्तेश्रुतिरपीतिनचमनसैवानुद्रष्टव्यमितितती-
याश्रुत्यनुसारेणनमनुतइत्यस्यैवापक्वमनोविषयतयाऽन्यथानयनसाम्यमितिवाच्यम् एवंसाम्येपिमनसःकरणत्वेह्यधिककल्पनाशब्दस्य
करणत्वेत्वल्पकल्पनेतिविशेषात् तस्मात्तत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानजनकत्वादविद्यानिवृत्त्यात्मकमोक्षसाधनब्रह्मसाक्षात्काराय।
मननाद्यंगकंश्रवणमङ्गि·नियमविधिविषयइतिसिद्धम् शब्दादपरोक्षोपपत्तिः।९। विश्वेश्वराख्यस्यगुरोःप्रसादादद्वैतसिद्धिर्मधुसूदनस्यअभूद
भूमिःखलुदूषणानांगुणैरमेयैरवगुम्फितश्रीः१ससंभ्रममपेक्षयापरगुणोन्नतिर्दुस्सहानितान्तमनपेक्षयानिजपुमर्थहानिः२।अतःसुमतयोयथा
नयमुपेत्यदुर्मत्सरंप्रयोजनवशानुगाः कुरुतमत्कृतौसत्कृतिम्।।३।। ।।इत्यद्वैतसिद्धौश्रवणादिनिरूपणंनामतृतीयःपरिच्छेदः।।३।। ९ ।।

नाग्रहः।नहितस्यांआवरणस्यविरोधितातन्नाशकतायेनाननुगमोदोषः।किंतदभावव्याप्यता।शब्दातिरिक्तत्वे।शब्दानुमानाद्यतिरिक्तत्वे।तेनप्रमात्रभिन्नविषयका-
नुमानादेर्नप्रत्यक्षांतर्भावः।प्रत्यक्षांतर्भावेतंत्रत्वात्।प्रत्यक्षप्रमाणलक्षणत्वात्।अनौपदेशिकमिति।तथाचौपदेशिकेनमनसःकरणत्वेनोक्तानुमानबाधः।तद्वासेत्सा-
दिकंतुनस्पष्टउपदेशइतिपराभिमानःतदन्यासाध्यत्वे।तदन्याकरणकत्वे।करणत्वेपि।निदिध्यासनाधीनधीकरणत्वेपि।अपेक्षिततया।अपेक्षितंधीघटिततया।चकितं।
शक्तिंविना।अभिधत्ते।बोधयति।श्रीः।तर्कैःसारस्वतैरत्नैश्चंद्रिकाचंद्रभूषणैः।दुरंतध्वांतभंगायश्रवणादिनिरूपणं।सारस्वतसमुद्रेकप्रसंगात्ध्वांतधिक्क्रियायपाचंद्रिकया
तस्याःपरिच्छेदास्त्रयस्थिताः।।इत्यद्वैतसिद्धिटीकायांतृतीयपरिच्छेदःस॰प॰।।३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इतिलघुचन्द्रिकोपेतायाअर्हैतसिद्ध्याः तृतीयपरिच्छेदः समाप्तः॥ ३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥अथलघुचन्द्रिकोपेताया अद्वैतसिद्धाश्चतुर्थपरिच्छेदमारम्भः॥४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ.४
अ.सि.
टी.ल.
१

॥श्रीगणेशायनमः॥ श्रीनारायणतीर्थानांपादांबुजरजोभजे यदनुध्यानमाहात्म्यादनुयामिसरस्वतींतत्कार्येतितन्नाशनाश्येत्यर्थः पाकेनिवृत्तेइति उपलक्षि-
तस्यनाशइतिव्यवहारे उपलक्षणस्यप्रतियोगित्वेनाभानात्तन्नाशमादायनस्यइतिभावः ननुपाकोपलक्षितत्वंतत्संबंधिनापाकेनस्येतरस्माद्व्यावर्त्तितत्वंतथाचपा-
कसंबंधात्पूर्वमपिचैत्रादावनुमानादिनातस्यज्ञातत्वेनतद्व्यवस्थेवेत्यतआह व्यवह्रियतेवेति पाकसंबंधात् पूर्वमित्यनुषज्यतेपूर्वकालमादायइदानीमयंपाच-
कइतिव्यवह्रियतेनेत्यर्थः। तथाचेदानींपाचकइत्यादावेतत्कालीनेनपाकसंबंधेनोपलक्षितस्यैवइदानींमुक्तइत्यत्रएतत्कालीनचरमवृत्तिसंबंधेनोपलक्षित-
स्वविषयत्वादुक्तवृत्तिपूर्वंनोक्तव्यवहारःसतत्कालस्थमासाद्यात्मकत्वेनप्रयोगाधिकरणक्षणादौपाकसंबंधाभावेप्युक्तव्यवहारःअतएवचरमवृत्त्युत्पत्तिकालप-

ॐ॥ ननुमुक्तिस्तावदविद्यानिवृत्तिर्नसम्भवतितथाहिसाकिमात्मरूपातद्भिन्नावानाद्यः असाध्यत्वापत्तेःद्वितीयेपिकिंसतीमिथ्यावा आद्ये अद्वै-
तहानिःद्वितीयेऽविद्यातत्कार्यान्यतरत्वापत्तिरितिचेन्नचरमवृत्त्युपलक्षितस्यात्मनोऽज्ञानहानिरूपत्वात् तथाचोपलक्षणस्यसाध्यतयैवसाध्यता न
चोपलक्षणनिवृत्त्यामुक्तेरपिनिवृत्तिः पाकेनिवृत्तेपाचकानिवृत्तिदर्शनात् तदुक्तंनिवृत्तिरात्मामोहस्यज्ञातत्वेनोपलक्षितः उपलक्षणना-
शेपिस्यान्मुक्तिःपाचकादितिनचवृत्त्युपलक्षितस्यपश्चादिवपूर्वमपिसत्त्वेनमोहकालेपितद्व्याप्त्यापत्तिःपूर्वमसिद्धस्योपलक्षणत्वायोगात् नहिपाकसं-
दिव बन्धात्पूर्वंपाचकोभवति तथाव्यवह्रियतेवायत्तुयदिपाककर्तृत्वमेवपाचकत्वंतदाअपचतितत्प्रयोगोभूतपूर्वन्यायेनौपचारिकः यदितु
पाककर्तृतावच्छेदकावच्छिन्नत्वंतत्कर्तृत्वात्सत्ताभावानधिकरणत्वंवातद्द्वयमपिपश्चादस्ति नचैवंमुक्तावात्मातिरिक्तयोग्यत्वादिकम-
स्तिचिन्मात्रंतुप्रागप्यस्तीत्यसाध्यतापत्तिः पाकोपलक्षितत्ववद्वृत्त्युपलक्षितत्वस्याधिकत्वेसविशेषापत्तिरिति तन्न उपलक्ष्यस्वरूप-
स्यासाध्यत्वेप्युपलक्षणगतसाध्यत्वेनोपलक्षितसाध्यत्वोपपत्तेःघटाकाशेउत्पत्तिवत् यद्वा अविद्यानिवृत्तिःतद्विरोधिवृत्तिरेवयावत्कार्योत्पत्तिविरोधि-
कार्यमेवध्वंसइत्यंगीकारात् नचवृत्तौनष्टायांविरोधिनःकार्यान्तरस्यानुदयात्तदापिध्वंससत्त्वेनसनध्वंसइतिवाच्यं॥ १र्यंतंशतवर्षादिकालमादायएतत्-
कालेयंमुक्तिमानितिव्यवह्रियतेपाकसंबंधोत्पत्तिकालपर्यंतोक्तकालमादायैतत्कालेयंपाचकइतिव्यवहारवत्कालाविषयकचरमवृत्तिपूर्वकालीनोमुक्तिव्यवहा-
रस्तुइष्टएवतादृशपाकसंबंधोत्पत्तिपूर्वकालीनव्यवहारइवेतिभावःघटाकाशइति इदानींपाचकोत्रजातइदानीमत्रपाचकःसाधितइत्यादिव्यवहारेपूर्वंविद्यमानचैत्रा-
दौपाकसंबंधोत्पत्तिःसाध्यतेआदीयपाचकेतत्व्यवहारवत्चरमवृत्तेरुत्पत्तिःसाध्यतेआदीयततदुपलक्षितेतद्व्यवहारइत्यपिबोध्यंयत्तुसाध्यत्वोपचारेमुक्तेःपुरुषार्थ-
त्वमौपचारिकंस्यादितितदह्योमौढांअन्येच्छानधीनेच्छाविषयत्वस्यपुरुषार्थत्वस्यसाध्यत्वाघटितत्वात् यावत्कार्योत्पत्तीतिकार्योत्पत्तिर्यावद्भवतितावत्कालमित्यर्थः
इतंयावत्तिष्ठतीतियावत् विरोधिकार्यमितियस्मिन्कार्येसतितत्पूर्ववर्तियन्नतिष्ठतितत् तस्यध्वंसइत्यर्थःसनध्वंसःविरोधिकार्यंनध्वंसःशैसह्यितसामक्रतिस्त्यादि

लिखितंप्रारब्धभाविनिगमादिहितत्वंतस्यइत्येतितवेदं॥

राम.
३५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावद्विरोधिकार्योदयं विरोधिकार्यस्थितिर्यावत् तथात्वात् विरोधिकार्यस्य ध्वंसत्वस्वीकारात् तस्य विभागस्य ध्वंसरूपत्वे संयोगध्वंसरूपत्वे विभागध्वंसस्य विभागादि
ध्वंसस्य अधिकरणस्वरूपता वत् परमाण्वाद्यधिकरणस्वरूपतावत् नव्यमते संयोगनाशो न विभागान्यो गौरवात्। नाप्यधिकरणस्वरूपस्तदुद्देशेन क्रियायाः प्रवृत्त्यात।
स्य क्रियासाध्यत्वावश्यकत्वाद्विभक्ताकारप्रतीतेरधिकरणातिरिक्तविभागविषयकत्वाच्च किंतु विभागस्वरूपः स च पश्चुत्तरसंयोगनाश्यस्तदाप्यतिरिक्तस्य विभागना
शस्य स्वीकारे गौरवमथोत्तरसंयोगएव तन्नाशस्तथापि यादृशविभागावच्छेद,ावच्छेदेन पुनर्नोत्तरसंयोगस्तादृशविभागएव स्वावच्छेदकावच्छिन्नसंयोगनाशस्त।

यावद्विरोधिकार्योदयमेव तथात्वात् यावद्विभागं तस्य ध्वंसरूपत्वेपि विभागध्वंसस्याधिकरणरूपतावच्चरमवृत्तिपर्यन्तं विरोधिकार्यरूपत्वेपि ध्वंसस्य
चरमवृत्तिध्वंसस्याधिकरणरूपत्वे तैव नन्वियं प्रक्रिया किमन्यत्र इहैव वा नाद्यः बिंबप्रतिबिंबैक्याज्ञाननिवृत्तिरपि ज्ञाततदैक्यरूपेति तदैक्यधीकाले सोपाधि
कतद्भेदभ्रमोपादानाज्ञानानुवृत्तस्य योगात् नांत्यः नियामकाभावात् न चेह निवृत्तेर्ज्ञाताधिष्ठानातिरेके विश्वमिथ्यात्वश्रुतिपर्यालोचनया निवृत्तेरपि निवृ
त्त्यापत्तिर्नियामिका तस्याज्ञानाद्विश्वनिवृत्तिपरत्वेन स्वतासर्वविषयनिवृत्तीतरमिथ्यात्वपरत्वादिति चेत् न तावदाद्ये दोषः सोपाधिकभ्रमउपाधिविरहका
लीनस्यैव तस्य तथात्वात् नापि द्वितीये नेति नेतीति श्रुतिस्वारस्येनात्मातिरिक्तसत्वनिवृत्तावतात्पर्यात् न च वृत्त्युपलक्षित आत्मा जीवन्मुक्तावप्यस्ती
ति तदापि मोक्षापत्तिः मुक्तिमात्रापादनस्येष्टत्वात् परममुक्तेः चरमसाक्षात्कारोपलक्षितात्मरूपत्वेन तदापादकाभावात् न च चरमसाक्षात्कारनिवृत्तेरा
त्मत्वेऽसाध्यत्वापत्तिः अविद्यानिवृत्तेरसाध्यत्वेऽप्रवृत्त्यापत्तिवदत्र तदभावात् न च जीवन्मुक्तिप्रयोजकवृत्त्यपेक्षया परममुक्तिप्रयोजकवृत्तावानन्दा
भिव्यक्तिगतविशेषाभावे चरमक्षणे न चरमश्वासेन वोपलक्षित आत्मा मुक्तिरिति किं न स्यादिति वाच्यं प्रारब्धकर्मप्रयुक्तविक्षेपाविक्षेपाभ्यामभिव्य
क्तिविशेषस्यांगीकारात् एतेन वेदान्तश्रवणादिसाध्यः पुमर्थो वाच्यः न च सत्वन्मते वक्तुं शक्यः मुक्त्यनुस्यूतसुखज्ञप्तिरूपस्यात्मनः पुरुषार्थत्वेप्यसा
ध्यत्वात् वृत्तेः साध्यत्वेपि स्वतोऽपुमर्थत्वात् तस्मादात्मव्यतिरिक्त एव वृत्तिसाध्य आवरणनिवृत्तिरूप आनन्दप्रकाशः पुमर्थो वाच्यः तथा च कथमात्मै
व निवृत्तिरित्यपास्तम् प्राप्तप्राप्तिरूपतया फलस्यानन्दप्रकाशस्य स्वरूपतोऽसाध्यत्वेपि तत्तिरोधायकाज्ञाननिवर्तकवृत्तेः साध्यत्वमात्रेण साध्यत्वो
पपत्तिः कंठगतचामीकरादौ तथादर्शनात् तस्मादज्ञानहानिरात्मस्वरूपा तदाकारावृत्तिर्वेति सिद्धम्॥

((स्य च जन्यभावत्वेन महाप्रलयावृत्तित्वात् तन्नाशः स्वा
श्रयपरमाण्वादिस्वरूपः तथा च तद्वत्यादृशावृत्त्युत्तरं न कार्यान्तरोत्पत्तिस्तन्नाशोऽधिकरणस्वरूपः। ध्वंसस्य पूर्ववर्तिदृश्यध्वंसस्य विरोधिकार्यरूपत्वेपीति पूर्वेणान्वयः।
विश्वमिथ्यात्वेति आत्मान्यमात्रस्य ज्ञाननिवर्त्यत्वेऽस्यार्थः कालीनस्यैवेति अनुभवाविरोधेनेति शेषः। नेति नेतीति निषेध्यस्याद्वैतमात्रमिथ्यात्वं बोधितमिति भावः। प्राप्तप्राप्तीति आ
नंदप्रकाशस्य फलत्वं न जन्यत्वं किंतु व्यंग्यत्वं तच्च जन्यस्यावरणनाशस्याश्रयत्वं तन्नाशोपलक्षितात्मस्वरूपस्तदोपलक्षणस्य जन्यताज्जन्यत्वमथवृत्तिरेव तदा साजन्यैवेति भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।मंदबुद्धिव्युत्पादनार्थाइति आत्मान्यत्वेदृश्यत्वस्यावश्यकत्वेन दृक्दृश्यसंबंधानुपपत्त्यादियुक्तिभिर्मिथ्यात्वावश्यकत्वेन न पंचमप्रकारत्वं सत्यध्वंसरूपत्वे
द्वैतश्रुतिविरोधः नहितस्याभावाद्वैतं मुख्यार्थः मिथ्याभूतात्मान्याविनाशिध्वंसरूपत्वेप्यतोन्यदार्तमित्यादिश्रुतिविरोधः विनाशिध्वंसानांधारात्वेतु गौरवं व्यर्थ।
ताच अंत्यमनोवृत्तेर्मुक्तित्वसंभवात्। तर्कैरित्यादि अविद्यानाशनिरूपणं।१। एतत् पदार्थमाह किमित्यादिनासत्त्वापत्तिरित्यंतेन। सत्यस्तिद्धेः।सत्ताभिव्य
क्तेः वृत्तेर्वेति प्रमात्वेन निवर्त्तकतातस्त्वोक्त चितिउक्तवृत्तौ वाअभावस्येत्यादिविजातीयस्य विषमसत्ताकस्यवाजनकत्वमिव व्यंजकत्वमव्याहतमितिभावः यत्तुसत्यं
प्रतसत्यस्यनजनकतेतितन्मोठ्यात् नहिसत्यंप्रतिजनकंब्रूमः किंतुव्यंजकंनचतदप्यदृष्टं अज्ञाननाशरूपाभिव्यक्तिमात्रस्य श्रुत्याद्यु पहितचिद्रूपे सत्यस्यवज

येतुपंचमप्रकारादिपक्षास्तेतुमन्दबुद्धिव्युत्पादनार्थाइतिनतत्समर्थनमर्थयामः॥इत्यद्वैतसिद्धावविद्यानिवृत्तिनिरूपणम्॥१॥अविद्यानिव
र्तकंचयद्यपिनस्वप्रकाशब्रह्मरूपत्वा नमात्रंतस्यतत्साधकत्वात् तथापिश्रवणादिसाध्यापरोक्षवृत्तिसमारूढंतदेव अतएवैतदपास्तंकिं।
स्वप्रकाशचिदविद्यानिवर्त्तिकातदाकाराऽपरोक्षावृत्तिर्वा नाद्यःतस्याइदानीमपिसत्त्वात् नद्वितीयःअसत्यात्सत्यसिद्धेरयोगात् अज्ञानेनजाना
मीतिज्ञप्तिविरोधस्यानुभवेनाऽज्ञप्तिरूपवृत्तिविरोधस्यासंभवात् चिताप्रकाशमानसुखादावज्ञानादर्शनाच्च किंचेच्छानिवर्त्यद्वेषवज्ज्ञातिनिवन्धनवृ
त्तिनिवर्त्यस्यसत्त्वापत्तिरिति वृत्त्युपारूढचितोवाचित्प्रतिबिंबधारिण्यावृत्तेर्वानिवर्त्तकत्वात नचासत्यायाःसत्योत्पादकत्वविरोधःअभावस्यभावजनक
त्ववदसंभवाभावात् प्रातिभासिकस्यव्यावहारिकसुखजनकत्वदर्शनाच्च नापिनजानामीतिज्ञप्तिरूपचिद्विरोधित्वानुभवविरोधःचिदसंसृष्टवृत्तेर्विरोधि
त्वस्यानङ्गीकारात् यत्तूक्तंद्वेषवत्सत्यत्वमिति तन्न अधिष्ठानतत्त्वसाक्षात्कारत्वनिबन्धननिवर्त्त कत्वस्यश्रुत्यादिज्ञानवदत्रापिसंभवेनतन्निवर्त्यस्व
प्यवत्सत्यत्वानापत्तेः यत्तूक्तंचरमवृत्तेर्घटादिवृत्त्याचिद्विषयत्वेऽविशेषइतितन्नअवच्छिन्नानवच्छिन्न———विषयतयाविशेषात् यत्तुस्वनिव।
र्त्तकत्वेस्थितिविरोधःस्वोपादाननिवर्त्तकत्वंतुअदृष्टचरमितितन्न अन्यत्रादृष्टस्यापिप्रमाणादत्रैवकल्पनात् तथाहिमायांतुप्रकृतिंविद्यादित्यवगत
मायोपादानकत्वस्याप्यात्मतत्त्वसाक्षात्कारस्यतरतिशोकमात्मवित् सोविद्याग्रन्थिंविकिरतीहसोम्येत्यादिनातन्निवर्त्तकत्वस्यप्रमितत्वात्॥ ❖ ॥

यमानस्यश्रुत्यादिसाक्षात्काररूपासत्येनैवोत्पत्तेः।चिदसंसृष्टेति तथाचचित्घटितस्यविरोधित्वात्तज्ज्ञानविरोधित्वानुभवोनायुक्तः यत्तूक्तमित्यादिघटादिवृत्तिचरम
वृत्त्योश्चिद्विषयकत्वाविशेषाच्चरमवृत्तेरेवाविद्यानिवर्तकत्वमयुक्तमितिभावः।अवच्छिन्नेत्यादि अज्ञानतत्प्रयुक्ताकाराद्यावृत्ताकाराधिष्ठानप्रमात्वेन निवर्तकता अन्यथेदं
त्वादिनारजतात्मकत्वादिनावाशुक्तिज्ञानाद्रजतोपादानाज्ञाननिवृत्त्यापातात् घटाद्यवच्छिन्नचिदाकारज्ञानंतुनतथेतिनततोज्ञाननिवृत्तिरितियथावाशोस्मीत्यादिज्ञानस्य
नाज्ञाननिवर्त्तकतातथाविवेचितमिथ्यात्वानुमाने अवगतमायोपादानकत्वस्यावगतंमायोपादानकत्वंयत्रतादृशस्यनिरुपपदप्रकृतिपदात्कार्यमात्रोपादानत्वंबुद्धमितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिति

।अदृष्टस्यापीत्यनेनादृष्टत्वं सूचितं तथा चाज्ञानस्य स्वनिवर्त्तकशुक्त्यादिप्रमाप्रागभावत्वस्वीकारात् प्रमामात्रस्य स्वप्रागभावनिवर्तकत्वं दृष्टमेव आत्मप्रमाप्रागभाव।स्य च कार्यमात्रोपादानत्वादात्मप्रमायामप्युपादानत्वमन्यथा तदन्यस्य जगदुपादानस्य कल्पने गौरवात् दृष्टं च दध्यादेर्दुग्धादिरूपपरिणामिनाशकत्वं लाघवतर्कसहकृतश्रुत्यादिमूलककल्पनायामदृष्टचरविषयकत्वेऽपि न क्षतिरिति भावः।भ्रमत्वमात्रमापाद्यते अज्ञाननिवर्तकत्वविरोधिभ्रमत्वं वा तत्र स्वोपहितविषयकाज्ञानं प्रति स्वोपहितविषयकज्ञानस्यैव निवर्त्तकत्वेनोपहितविषयकत्वरूपभ्रमत्वमिष्टमित्याशयेनाद्यमंगीकुर्वन्नंत्यं निरस्यति नन्वोपहितेति अभ्रमत्वादुक्तविरोधिभ्रमत्वाभावात्।उपाध्यविषयकत्वे सत्युपहितविषयकत्वेन निवर्त्तकत्वादुपाधिविषयकत्वमुक्तविरोधितत्त्वं नास्त्येवेति भावः।एतेनोपहितस्य शुद्धान्यत्वेन तद्विषयकत्वेऽपि भ्रमत्वमित्यपास्तमथवा वृत्त्युप

वृत्तिप्रतिबिंबितश्चितो निवर्त्तकत्वे तु नोक्तवचसः शङ्कापि तदुक्तं तृणादेर्भासिकाप्येषा सूर्यदीप्तिस्तृणं दहेत् सूर्यकान्तमुपारुह्य तन्न्यायं चितियोजयेत् नचापरोक्षवृत्तौ सत्यां चिरप्रतिबिंबनिवर्त्येन निवृत्तिविलंबादर्शनान्न विशिष्टे निवर्त्तकतेति वाच्यं शुद्धजडस्य शुद्धचितश्च जडतया तज्ज्ञासकतया चाऽज्ञानानिवर्त्तकतया विशिष्टे निवर्त्तकताया आवश्यकत्वात् यत्तु निवर्त्तकं ज्ञानमपि न शुद्धविषयकं तस्यादृश्यत्वात् नापि विशिष्टविषयकं तस्याध्यस्तत्वेन भ्रमत्वापत्तेरिति तन्न उपहितस्य विषयत्वेऽपि उपाधेरविषयत्वेनाभ्रमत्वात् यत्त्वं स्वज्ञानस्य किं निवर्त्तकं स्वयमन्यद्वा नाद्यः अन्यनिरपेक्षप्रतियोगिनो ध्वंसजनकत्वे क्षणिकत्वापत्तेः दग्धदारुदहनस्यापीश्वरेच्छादिनैव नाशात् कतकरजस्तु न पंकं नाशयति नापि स्वं विश्लेषमात्रदर्शनात् नान्त्यः शुद्धात्मनः कंचिदपि प्रसहेतुत्वात्तदन्यस्य च निवर्त्यत्वादिति तन्न तंतुनाशस्य पटनाशप्रयोजकत्वदर्शनेन स्वोपादानाविद्यानाशस्यैव तन्नाशकत्वात् नचाविद्यानाशउपलक्षिताऽऽत्मा वा वृत्तिर्वा पूर्वत्र शुद्धस्याहेतुत्वं द्वितीये प्रतियोगिमात्रस्यैव नाशकतापर्यवसानमिति वाच्यम् उभयथाप्यदोषात् वृत्तिमाद्यायैवत्र क्षण उपहितत्वेन शुद्धत्वाभावात् प्रतियोगिनः प्रतियोगित्वेन नाशकतायामितरानपेक्षत्वे हि क्षणिकत्वं रूपान्तरावच्छेदेन यत्कारणं तस्यापेक्षणे न तदिति उपादाननाशत्वावच्छिन्नस्य स्वस्यैव सर्वक्षणिकत्वानापादकनाशकत्वं स्यात्।। २१ हितचिदन्यत् यद्वा धितं तद्विषयकत्वमे

व भ्रमत्वं वृत्त्युपहितचिद्विषयकत्वमेव तात्त्विकप्रमात्वमन्यथा शुद्धस्याविषयत्वमते तात्त्विकप्रमादौर्लभ्यापत्तेः यद्वोपहितस्य विषयत्वं नामोपाधिकालीनमेव शुद्धस्य विषयत्वं न तु शुद्धन्न विषय इति विवक्षितं दृश्यत्वं तु शुद्धव्यावृत्तमेव मिथ्यात्वे हेतुर्विवेचितमिदं मिथ्यात्वानुमाने दग्धदारुदहनस्य दग्धदारूपेण तस्य दहनस्य इच्छादिनेत्यादिनावयवसंयोगनाशादिसंग्रहः निवर्त्यत्वात्।अंत्यज्ञाननिवर्त्यत्वात्।वृत्तिमाद्ययेति।वृत्त्युपहितात्मत्वेनात्मनो नाशकत्वं वृत्त्युपलक्षितात्मनो विद्यानाशस्वरूपत्वेऽपि कारणतावच्छेदकीभूतवृत्तेः कार्याव्यवहितप्राक्कालवृत्तित्वावश्यकत्वेन वृत्त्युपहितस्यैव नाशकत्वं पर्यवस्यति तथा चांत्यज्ञानस्य क्षणिकत्वमिष्टमथवा वृत्तिद्वितीयक्षणावच्छेदेनैवात्म।न्यविद्यानाशत्वस्वीकारात्तददिति भावः।द्वितीये दोषाभावं प्रकटयति प्रतियोगिन इति रूपान्तरावच्छेदेन यत्कारणं प्रतियोगित्वान्यरूपावच्छिन्नकारणतावत्।। ९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ. ४ अ. सि. टी. ल. ३

निरपेक्षप्रतियोगिनः। निरपेक्षस्यापि प्रतियोगिनः। उपपत्तेरिति। अंत्यज्ञानस्य वक्ष्यमाणाविद्यालेशरूपस्योपादाननाशहेतुत्वादंत्यक्षणावच्छिन्नस्यैवता
दृशस्योपादाननाशतायावाच्यत्वात् तादृशावच्छिन्नरूपेण स्वस्यापि स्वजन्यत्वसंभवात् तादृशोपादाननाशत्वावच्छिन्नस्यांत्यज्ञानोत्पत्तिद्वितीयक्षणस्य
संभवादंत्यज्ञानस्य न क्षणिकतेति भावः अथवांत्यज्ञानस्य स्वोत्पत्तिक्षणावच्छेदेनाप्यविद्यालेशरूपस्योपादाननाशत्वमास्तां तथापि प्रकृते उक्तलेशस्यैव
मनसोप्युपादानत्वादंत्यज्ञाननाशे मनोनाशस्यापि हेतुत्वान्मनोनाशे चांत्यज्ञानरूपस्योक्तलेशनाशस्य हेतुत्वादंत्यज्ञानोत्पत्तितृतीयक्षण एव तन्नाश
इति भावः। अथोक्तोपादाननाशत्वविशिष्टेन जायमानोंत्यज्ञाननाशः किंस्वरूप इति चेत् मिथ्याभूत आत्मातिरिक्ताविनाशिस्वरूप एव सत्यत्वे दृश्यत्वानुप
पत्तेर्विनाशित्वे विनाशधाराकल्पने गौरवान्मानाभावाच्च लाघवमनुसृत्याह वस्तुत इत्यादि स्वेतरसर्वद्वैतविरोधिनी वृत्तिरंत्यात दुत्तरं न किंचिज्जायते त
स्याश्चाग्रकालस्यैवाभावेन सुतरां न तत्र तद्वृत्त्यापादनं। न च तस्याः नाशानुत्पादे साक्षिगतेत्यादिप्रश्नावकाशः। नाशोत्पादेपि तत्संभवात् विवेचितं चेदं
पूर्वं तथा च तस्याः नाशोग्रे न जायते अग्रकालस्यैवालीकत्वात्। न चैवमात्मैव तन्नाश इत्यंगीकारो व्यर्थ इति वाच्यं अंत्यवृत्तिः क्षणमात्रस्थित्वा नश्य
तीति संसारदशायामात्मनि नाशत्वकल्पनया तथांगीकारात् प्रारब्धभोगकालीनवृत्तेस्तु अविद्यादिमात्रविरोधित्वं न तु सर्वद्वैतविरोधित्वमित्यप्यनुभवव

द्वितीयकारणनिरपेक्षप्रतियोगिनः प्रतियोगित्वोपादाननाशत्वरूपद्वयावच्छिन्नस्य नाशकत्वोपपत्तेः वस्तुतस्त्वविद्यानिवृत्तेः वृत्तिरू
पतया न निवर्तकखण्डनावकाशः वृत्तिनिवृत्तेरात्मरूपतया न तज्जनकखण्डनावकाशोपीति सर्वमवदातम् अविद्यानिवर्तकनिरूपणम्॥२॥

लात् कल्प्यते इदमेव च प्रारब्धभोगस्य देहादिपातप्रतिबंधकत्वमित्यादिशब्देर्व्यवह्रियते न तु देहादिनाशे कर्मप्रतिबंधकं कल्प्यते न चैवं चरमवृत्तिरूपो देहादिनाशः
पूर्वमपि जायतामित्यापत्तिरिति वाच्यं चरमवृत्त्यव्यवहितपूर्वक्षणस्य चरमवृत्तिहेतुत्वात्। अत्रेदं बोध्यं चरमवृत्तेः सर्वद्वैतविरोधित्वं न सर्वद्वैतनाशजनकत्वं त
ज्जन्यनाशानभ्युपगमादन्यथोक्तनाशस्यापि नाश्यत्वे नाशांतराणामपि स्वीकार्यत्वेनानवस्थापत्तेरनाश्यत्वे सत्यतापत्तेरद्वैतश्रुतिविरोधितापत्तेर्नापि द्वैताधिक
रणकालपूर्वत्वानधिकरणक्षणवृत्तित्वं। तस्य लक्षणत्वे नियामकाभावेन मानाभावादेवं च तत्त्वज्ञानस्यैव यच्छ्यापत्तिरेतावत्कालमनुवृत्तद्वैतं तत्त्वविज्ञानोत्तरं क्षणगतमिति
पर्यनुयोगश्च स्यादत्रोच्यते एवं सति कपालादिदेशावच्छेदेन दंडादिकारणकूटवान् यः क्षणस्तदव्यवहितोत्तरक्षणस्य घटादिकार्यवत्त्वेपि नियामकाभावाद्दंडादेर्घटादिहेतु
त्वस्वीकारो व्यर्थः स्यादेतावत्कालमसतो घटादेः कथमुक्तक्षणे सत्त्वमिति पर्यनुयोगश्च अथ यस्मिन्व्यर्थ उक्तक्षणत्वे घटादिमत्त्वव्याप्यत्वस्य प्रामाणिकत्वात्तस्यैव तद्व्याप्यतारू
पतन्नियामकता वक्तव्या पूर्वमसतोपि घटादेरुक्तक्षणे सत्त्वसंभव इति नोक्तपर्यनुयोग इति ब्रूषे तर्हि यायद्विषयिकप्रमासामान्यसमानविषयकाज्ञानतत्प्रयुक्ताधिकरणकाल
पूर्वत्वानधिकरणक्षणवर्तिनीति व्याप्तिः श्रुत्यादिप्रमास्यले दृष्टत्वादात्मप्रमापितथेति प्रमात्वस्यैवोक्तव्याप्यतारूपनियामकता वक्तव्या तत्त्वज्ञानस्योक्तविरोधित्वसिद्ध्यर्थो

रा म
२५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

। अथैवमपि मुमुक्षुप्रवृत्त्यनुपपत्तिः फलाभावात्तथाहि न तावन्मुक्तिफलत्वं तस्य नित्यात्मरूपत्वान्नापि वेदान्तवाक्यजन्यवृत्तिज्ञानं तस्यासुखस्वरूपत्वेन स्वतः पु
रुषार्थत्वाभावान्नापि वृत्तिविषयत्वोपहितआत्मा तस्य लोके स्वतः पुरुषार्थत्वेनाक्लृप्तत्वात् वृत्तेरस्थिरत्वेन तद्विषयत्वोपहितात्मनोप्यस्थिरत्वादिति चेन्न स्वाज्ञानविरोध्यु
पहितस्यात्मरूपस्य सुखस्यैव फलत्वात् लोकेपि हि सुखमात्मैव चन्दनादियोगजमनोवृत्तेस्तन्मात्रव्यञ्जकमात्रत्वात् मानभूवं भूयासमित्याकारिकापि अन्येच्छानधीनेच्छाप
एव एवं परम आनन्द इत्यादिश्रुतेश्चान्यथानुपपत्तेश्च स्वाज्ञानविरोधित्वं च स्वाज्ञानाधिकरणकालपूर्वत्वशून्यक्षणावृत्तित्वं एतावांस्तु विशेषो यच्चन्दनादियोगज
मनोवृत्तेर्यत् किञ्चिदज्ञानविरोधित्वं तन्नाशोत्तरमज्ञानान्तरेणात्मसुखस्यावरणात् वेदान्तजन्यवृत्तेस्त्वज्ञानसामान्यविरोधित्वं तन्नाशोत्तरमज्ञानान्तरेणा
नावरणात्। स्वाव्यवहितपूर्वक्षणे सुखावरकं यत् किञ्चिदज्ञानविरोधित्वं तु द्वयोरपि तुल्यं। न चैकदैकमेवाज्ञानमावृणोतीति सिद्धान्तात्स्वाव्यवहितपूर्वक्ष
णे सुखावरकाज्ञानसामान्यविरोधित्वमपि द्वयोस्तुल्यमिति यत्किञ्चित्पदं व्यर्थमिति वाच्यं चन्दनादियोगजवृत्तेः पूर्णानन्दावरकमूलाज्ञानाविरोधित्वात्त
त्त्ववाज्ञानं साक्ष्यानन्दावारकं प्रत्येव तस्याः विरोधित्वान्न च वृत्तेरेव सुखत्वसंभवेन नात्मा सुखरूप इति वाच्यं सुषुप्तौ निष्कामत्वकाले जागरे च भासमानसुखस्य वृत्ति

ननु त्वन्मते मुक्तौ न दुःखोच्छेदमात्रं किं तु निरतिशयानन्दस्फुरणमपि तदुक्तं तस्माद्विद्यास्तमयो नित्यानन्दप्रतीतितः निःशेषदुःखोच्छेदा
च्च पुरुषार्थः परो मत इति तत्र न तावत् सुखात्मता पुरुषार्थः सुखी स्यामिति वत् सुखं स्यामितीच्छाया अदर्शनात् पुमर्थताया इच्छानियम्यत्वात् अन्यथा बौ
द्धमतसिद्धात्मनाशादिरपि पुमर्थः स्यात् अत एव नापरकीयसुखं पुमर्थः तथेच्छाविरहात् गौरवाच्च सुखसाधने परकीयेपि स्वकीयेपि पुमर्थत्वस्या
परकीयेप्यस्वकीये पुमर्थत्वस्य च दर्शनेनेष्टत्वाविशेषात् सुखेपि तत्कल्पनाच्च दुःखतत्साधनयोः स्वकीयतयैवापुमर्थत्वस्य दर्शनेन सुखादेरपि त

त्वासंभवात्तदानन्तवृत्तिकल्पने गौरवात् एकरूपेपि साक्ष्यानन्दे ऽनुभूयमाने तारतम्यस्य व्यञ्जकवृत्तितारतम्यगतत्वान्नानुपपत्तिः ((थैव पुमर्थत्वाच्चेति चेत् ॥
तिस्तथा च यत् किञ्चिदज्ञानविरोध्युपहितात्मनः स्वतः पुरुषार्थत्वमात्रस्य त्वज्ञानसामान्यविरोध्युपहितात्मनः परमपुरुषार्थत्वादस्थिरत्वमकिञ्चित्करं तदुक्तं।
सुखानावरणादिति सत्यधीवेद्यमेतत् श्रीः तर्केत्यादि अविद्यानाशकस्थितिः॥२॥ सुखात्मतास्वाभिन्नसुखत्वं पुरुषार्थः पुमर्थत्वस्वरूपघटकं। पुमर्थतायाः येन
रूपेणायं स्वधीविषयत्वं तेन रूपेण तस्य पुंस इच्छाविषयत्वव्याप्यं तद्रूपवत्त्वं तेन रूपेण तस्य पुंसः पुमर्थ इति पुमर्थत्वलक्षणस्य इच्छानियम्यत्वात् इच्छावि
षयतावच्छेदकरूपघटितत्वात्। स्वकीयसुखत्वमिष्टसाधनत्वादिकं च तादृशरूपमिति भावः नापरकीयं सुखं पुमर्थः अपरकीयत्वं पुमर्थतामात्रे न घटकं तथे
च्छाविरहात् परकीयसुखत्वेन नियमेनेच्छाविरहात् तथा नियतेच्छावादिनं प्रत्याह गौरवादिति साधने साधनत्वेन ज्ञाते परकीयेपरकीयत्वेन ज्ञाते स्वकीये। स्वकीयत्वेन ज्ञा
ते। पुमर्थत्वस्य। पुमर्थत्वव्यवहारस्य अस्वकीये स्वकीयान्यत्वेन ज्ञाते। अपुमर्थत्वस्य। पुमर्थान्यत्वव्यवहारस्य। एवमग्रेपि बोध्यं। तथैव स्वकीयताघटितस्यैव पुमर्थत्वा

पुमर्थतामात्रघटकं ॥

उ·४ अ·सि· टी·ल· ४

पुमर्थतापुमर्थतामात्रं प्रयुक्ताघटितासाक्षात् क्रियमाणतया अनावृततयाघटितेतिशेषः संबंधस्यस्वकीयत्वादेः अवर्जनीयसन्निधिकत्वात् दैवाधीनसाम
ग्र्यधीनेच्छाविषयत्वक्त्वात् अनित्यसुखत्वादिरूपेणाज्ञानस्यकदाचित्संपत्त्यातेनरूपेणैवस्वकीयसुखत्वेनापिकदाचित् ज्ञानात्तेनरूपेणेच्छा नचैतावतास्ये
वपुरुषार्थतामात्रघटिकानित्यसुखत्वादेरपितत्त्वापत्तेरथकेवलसुखत्वेनज्ञातेपिमदीयसुखत्वेनैवेच्छा इच्छासामान्यसामग्र्यास्वमदीयत्वविषयतानिया
मकत्वादितिचेन्नउक्तनियामकत्वेमानाभावात् अनावृतत्वंभवतुइत्येवाकारस्येच्छामात्रव्यापकत्वेनमदीयत्वविषयतायास्तदनंगीकारात् अंगीकारेस्वामां
प्रत्यनावृतत्वमेवमदीयत्वमित्यविरोधात्। नहितदन्यतसुखतत्साधनादिसाधारणंमदीयत्वमेकजातीयमस्तियदिच्छाव्यापकविषयताकंस्यात्‌समत्वे
वंधमात्रंतुपरकीयमेवेदमितिज्ञातेपिमत्समवेतत्वंमत्स्वत्वंचेत्यन्यतरवत्त्वंतुपापिष्ठकाम्येपरदारादौनास्त्येवमज्ञोगयोग्यत्वंतुमांप्रत्यनावृतत्वमेवनचत
दपिदूरस्थशत्रुमरणादौनेतिवाच्यंतन्निश्चयस्यैवसुखविशेषसाधनत्वेनपुरुषार्थस्यस्वंप्रत्यनावृतत्वात् शत्रुमरणादिमात्रस्यापुरुषार्थत्वेपिक्षत्यभावा
त्नहियेयदिष्टंयस्यतस्यतत् पुरुषार्थःहेयस्यक्रीडादेरिष्टत्वेपिपुरुषार्थत्वेनाव्यवहारात् इतिभावः ईश्वरस्येत्यादि ईश्वरेच्छायाः कार्यमात्रविषयकत्वेनास्मदा

नसुखादौहि पुमर्थतानापरकीयत्वप्रयुक्तानापिस्वकीयत्वप्रयुक्तागौरवात् किंतुसाक्षात्क्रियमाणतयासंवन्धस्यचानित्यत्वसाधनपारतंत्र्या
देरिवाऽवर्जनीयसंनिधिकत्वात् नचेश्वरस्याप्यस्मदादिसुखंपुमर्थःस्यादितिवाच्यम् हेयतयाऽज्ञातत्वेसतीत्यस्यापितत्रप्रयोजकत्वात् ईश्व
रादिनाचास्मदादिसुखस्यहेयत्वेनैवज्ञानात् स्वरूपसुखेचेष्टापत्तेः नचगौरवं स्वसंवन्धित्वेनपुमर्थतावादिनोपि निषिद्धसुखेपुरुषा
र्थतानिवृत्त्यर्थंतथावश्यंविशेषणीयत्वात्॥ ९९ दिसुखविषयकत्वमितिभावः हेयतयेति वालानांपुमर्थत्वेनव्यवह्रियमाणे प्रातर्भोजनादौप्रौढानामिच्छा
सत्त्वेपितदव्यवहारात् यंप्रतियद्धेयंतदन्यत्वेनापिपुमर्थलक्षणंविशेषणीयंतथाचलोकविगीतत्वात्तत्रप्रौढानामिवस्वंप्रत्यनावृतस्वरूपसुखापेक्षयाक्षुद्रत्वा
दस्मदादिसुखेईश्वरस्यहेयतात्तंप्रतितन्नपुमर्थः वस्तुतः कार्यत्वेनाकाशत्वादिरूपतत्तदसाधारणरूपैर्वाईश्वरेच्छास्वीक्रियतेनतुसाक्षात्क्रियमाणसुखत्वेनन
वसर्वैरूपैःसर्वज्ञत्वमिवसर्वकाममपितृत्त्वमपीतिवाच्यमनादिपदार्थेषुसिद्धत्वेनकामनाविरहात् सर्वकामादिश्रुत्यायावत्कार्येषुईशेच्छाप्रतिपादनेपितद्धितिसर्वरू
पैस्तदप्रतिपादनात्तथाचास्मदादिसुखेकथमीशंप्रतिपुमर्थतापत्तिः अनावृतसुखत्वेनेश्वरधीविषयत्वस्यतेनरूपेणतदिच्छाविषयताव्याप्यत्वान्नचकेवलसुखत्वेनरूपे
णास्मदादिसुखमीश्वरंप्रतिपुमर्थःस्यादितिवाच्यंकेवलसुखत्वादिनाज्ञानस्येच्छांप्रत्यहेतुत्वात् ईश्वरेच्छांप्रतिकालादृष्टविशेषादेर्हेतुत्वात् सर्वदातदभावेनोक्तकालिक
व्याप्त्यसंभवाच्च गौरवमितिसुखादीच्छांप्रतिसुखत्वादिप्रकारकज्ञानत्वेनैवहेतुत्वसंभवेनानावृतसुखत्वादिप्रकारज्ञानत्वेनहेतुत्वेगौरवंतथापेनरूपेणतदीयज्ञानवि
षयत्वंतदीयेच्छाव्याप्यंतत्वस्यसुखत्वमात्रेसत्त्वेनानावृतत्वंनसकलपुरुषार्थताघटकमितिभावः। विलीनसुखेसुखंतेभविष्यतितत्त्वांप्रत्यनावृतमितिकस्य
चित्प्रतारणायाआवृतत्वेनज्ञाते॥

राम· ३५३

पुरुषार्थताप्रसंगः पुरुषार्थत्वव्यवहारप्रसंगः इच्छाप्रसंगो वा साक्षात्क्रियमाणत्वेन स्वप्रत्यनाहृतत्वेन स्वयं ज्ञायमानेनेति शेषः पुमर्थता पुमर्थताव्यवहार इच्छा वा अभासमानत्वादु क्तरूपेणाज्ञायमानत्वात् भाने उक्तरूपेणाज्ञायमानत्वे असंसारित्वेन त्वयायं प्रति आपद्येतेतदन्यत्वेन गौरवकरत्वादिति वस्तुस्थितिरियमुक्ता वस्तुतो यदा जीवन्मुक्तिकाले पुमर्थता तदा सुख त्वेन स्वरूपसुखं प्रकाशत एव नहि कैवल्यकाले पुमर्थता संसर्गः स्वरूपसुखस्येति ब्रूमः तदानीं तस्य व्यवहारेणानुपयोगात् कैवल्यकालस्यैवालीकत्वाच्च अथेष्टतावच्छेदकसंसर्गस्य भो ग्यविषयाव्यभिचारित्वमिति चेन्न येनेष्टतावच्छेदकेन विशिष्टे कामना तस्यैव तथात्वं सुखनासिकादिपुत्रकामनादिस्थले येन तूपलक्षिते कामना तस्य न तथात्वं यथा श्रीकृष्णविहारदेशे वृन्दावनस्थि

यथा

यत्तु साक्षात्कारेपि स्वकीयत्वेन पुरुषार्थतापत्तेर्मुक्तस्य सुखसाक्षात्काररूपतया तं प्रत्यपि तस्यापुमर्थतापत्तिः स्वेतरासंबन्धित्वेन स्वपुरुषार्थत्वे पुक्तस्वरूपेण सुखेन संसारीतरासंबद्धेन संसारिणः पुरुषार्थताप्रसङ्ग इति तन्न साक्षात्क्रियमाणत्वेनैव हि पुमर्थता मुक्तसुखसाक्षात्कारस्य तं प्रति पुमर्थत्वेपि न संसारिणस्तथा तं प्रत्यभासमानत्वात् भाने वा संसारित्वेनेष्टापत्तेः यत्तु प्रत्यक्षप्रकाशमानत्वेन सुखं पुमर्थ इति तदप्येतेन व्याख्यातम् प्रत्यक्षप्रकाशमानत्वेन साक्षात्क्रियमाणतया एवोक्तेः यत्तु सुखत्वेन प्रकाशमानं सुखं पुमर्थः न च तत्परमते मोक्षेस्तीति तच्च साक्षात्क्रियमाणत्वेनैवातिप्रसंगनिरासे धिकोक्तेर्गौरवकरत्वात् मुक्तेरानन्दरूप त्वेन पुरुषार्थत्वम् ॥ ३ ॥ ननु कस्यायं मोक्षः पुमर्थः किमहमर्थस्य आहो चिन्मात्रस्य नाद्यः त्वन्मते ऽहमर्थस्य मुक्तावनन्वयात् न द्वितीयः अहं मुक्तः स्यामिति वच्चिन्मात्रं मुक्तं स्यादितीच्छाया अननुभवादिति चेत् न अहमर्थगतचिदंशं मुक्तिकालान्वयिनं प्रति पुमर्थत्वस्य मोक्षे संभवत्त्वात् नापरतन्त्रत्वात् न च सुखस्य दुःखाभावमात्रत्वे वैशेषि कमोक्षवत् पुमर्थताऽतिरेके सद्वितीयत्वमिति वाच्यम् दुःखाभावातिरेके प्यात्मानतिरेकात् न चात्मनः सुखमात्रत्वे सुखप्रकाशाभावेनापुमर्थत्वमुभयात्मकत्वे चाखं डार्थत्वहानिरिति वाच्यम् सुखप्रकाशयोरेकात्मरूपतयोभयत्वस्यैवाभावात् न चार्थभेदाभावे सुखप्रकाश इति सह प्रयोगायोगः अविद्याकल्पि तदुःखजडात्मकत्वरूपव्यावर्त्यभेदेन तदुपपत्तेः यत्तु दुःखाभावस्य सुखस्य च तत्त्वतो दुःखाद्वैतापसिद्धान्तः अभेदे त्वपुमर्थतेति तन्न दुःखस्य कल्पितत्वेन तद्भेदस्य तत्समानयोगक्षेमतया तात्त्विकत्वाभावेनापसिद्धान्ताभावात् यत्तु स्वप्रकाशस्य सुखस्य स्वतः स्फुरणेपि दुःखाभावस्या स्फुरणादपुमर्थतेति तच्च दुःखाभावस्यात्मानतिरेकेणात्माभिन्ने सुखे स्फुरति तस्यापि स्फुरणात् तत्त्वेन स्फुरणस्याप्रयोजकताया उक्तत्वात् तस्मात् स्वप्रकाशचिदभिन्नं सुखं पुमर्थः चिन्मात्रस्य मोक्षभागितोपपत्तिः ॥ ४ ॥ १ तौ शत्रुस्वामिकग्रहादेवा न हि वृन्दावनस्थितेः शत्रुगृहादेर्वा भोगकाले

श्रीकृष्णविहारः शत्रुसत्त्वं वास्ति तथा च कैवल्ये सुखत्वाद्यसंसर्गेपि न क्षतिः अत एव यं प्रतीत्यादिलक्षणेपि न दोषः जीवन्मुक्तिकाल एव स्वप्रत्यनाहृतत्वसंसर्गस्य स्वरू पसुखे सत्त्वात् तर्कैरित्यादि मुक्तेः सुखपुमर्थता अप्रयोजकतायाः पुमर्थलक्षणाघटकत्वस्य जीवन्मुक्तौ सुखादिना साक्षात्क्रियमाणत्वसत्त्वात् प्रयोजकत्वेपि न क्षतिरित्यपि बोध्यम् उक्तत्वादिति यादृशविशेषणवत्ताकामितं तादृशविशेषणाच्चति जीवन्मुक्ते मुक्त्यन्वयोस्त्येव परमते तु लोकान्तरप्राप्तेरेव मुक्तित्वेन कामपि तच्छरीराद्यविशेषितस्य एव तदन्वय इति भावः ॥ ३

CC-0. In Public Domain. Digitization by eGangotri

अविद्यानाशकालेऽप्यविद्याप्रयुक्तकार्यसत्वे दृष्टांतमाह निवृत्तसर्पेति कारणनाशेऽपि तत्प्रयुक्तकार्यसत्वे दृष्टांतमाह दंडेति ध्वंसद्वयपराभ्युपगतध्वंसद्वयमन्यमतेतु संस्कारोऽपि ध्वंसएवप्रत्ल येवर्त्तमानस्यकार्यसूक्ष्मावस्थारूपसंस्कारस्य ध्वंसत्वात् तत्रसमवायिनं विनास्थितिस्थले समसमयस्यकार्यनाशात्पूर्ववर्त्तिनः समवायिनाशस्य अजनकत्वात् कार्यनाशाज

तत्त्वजीवन्मुक्तानां स्वानुभवसिद्धं जीवन्मुक्तस्यतत्त्वज्ञानेन निवृत्ताविद्याप्यनुवृत्तदेहादिप्रतिभासः नचतत्त्वज्ञानादविद्यानाशे सद्यः शरीरपातापत्तिः निवृत्तसर्प विभ्रमस्यापि संस्काराद्भयकंपानुवृत्तिवत् दण्डसंयोगनाशे चक्रभ्रमणवच्च संस्कारानुवृत्तेरविद्यानिवृत्तावपि तत्कार्यानुवृत्तिसंभवात् नच क्रियाज्ञानयोरेव संस्का रोनान्यस्येति वाच्यम् निःसारितपुष्पायां संपुटिकायां पुष्पवासनादर्शनात् विमतोनाशः संस्कारव्याप्तः संस्कारनाशान्यत्वे सति नाशत्वात् ज्ञाननाशवदित्यनुमानाच्च सं स्कारः कार्येऽपि ध्वंसद्वयनिरूपादानकः अविद्येवचशुद्धात्माश्रितइति नाविद्यासापेक्षः नचभावकार्यसाध्यस्तस्य संस्कारदेहादितद्धेतुप्रारब्धकर्मादेः स्थितिस्तर्हि तदु पादानाज्ञानानुवृत्त्यापात इति वाच्यं विनश्यदवस्थस्य समवायिकारणं विनास्थितिदर्शनात् नच क्षणमात्रस्थितावपि कथं बहुक्षणस्थितिरिति वाच्यं सत्युपपादके क्षणगणनाया अप्रयोजकत्वात् तत्र क्षणमात्रस्थितिः समसमयस्याजनकत्वात् अत्रतु प्रतिबन्धकाभावसहकृततद्धेतोस्तावत्कालमभावात् अतएव पूर्वज्ञानानिवृत्त साध्यस्तस्य तदनधिकविषयेणावृत्तेनाप्युत्तरज्ञानेन कथं निवृत्तिरिति निरस्तं प्रतिबन्धकाभावसहकारासहकाराभ्यां विशेषात् जीवन्मुक्तिदशायामानन्दस्फूर्त्यापाद नमिष्टमेव तत्त्वे ज्ञाते द्विचन्द्रादिवद्दोषादूधितानुवृत्तिसंभवाच्च नचतत्रैवात्रज्ञानानिवर्त्यदोषाभावेनवैषम्यम् यावत्प्रतिबन्धकसत्त्वं ज्ञानानिवर्त्यस्यदोषस्यात्रापि संभवात् सर्व ज्ञानानिवर्त्यस्यतस्य कुत्राप्यसंप्रतिपत्तेः तदुक्तं नहि जातु सैव कश्चिद्दोषोऽस्तीति यद्वा अविद्यालेशानुवृत्त्या देहाद्यनुवृत्तिः ननु लेशोनावयवः अज्ञानस्यनिरवयवत्वात् अतएवाविद्यादग्ध पटघटीन्यायेन तावत्तिष्ठतीत्यपि निरस्तम् निरवयवे एतन्न्यायासंभवादिति चेत् न आकारस्यैव लेशशब्दार्थत्वात् इन्द्रोमायाभिः पुरुरूपईयत इत्यादिश्रुत्याऽविद्याया अनेकाकारत्वा वगमात् आकारि निवृत्तावप्याकारानुवृत्तिर्व्यक्तिनिवृत्तौ जातेरिव ननु कोयमाकारोनाम जातिर्वाशक्त्यादिरूपोधर्मोवा सुवर्णकुण्डलादिवदवस्थाविशेषोवा नाद्यौ तयोर्देहादिभ्रमोपादानत्वेऽविद्यात्वापातात् अनुपादानत्वे चोपादानान्तराभावेन देहादिभ्रमोत्पत्त्ययोगात् आत्मान्यत्वेन ज्ञाननिवर्त्यत्वेन चाविद्यातत्कार्या न्यतरत्वावश्यंभावेनाज्ञाने निवृत्ते स्थित्ययोगाच्च अतएवन तृतीयः अवस्थावन्तं विनाऽवस्थायाः स्थित्ययोगादिति चेत् न अनेकशक्तिमदविद्यायाः प्रपंचे पारमार्थिकत्वादिभ्रमहेतुशक्तेः प्रपंचे अर्थक्रियासमर्थत्वसंपादकशक्तेश्च प्रारब्धकर्मसमकालीनेन तत्त्वसाक्षात्कारेण निवृत्तावपि अपरोक्षप्रति भासयोग्यार्थाभासजनिकायाः शक्तेरनुवृत्तेः तद्वती अविद्यापि तिष्ठत्येवेति नोक्तदोषावकाशः नचाविद्यायां कथं मुक्त इति व्यपदेशः शक्तिनाशमात्रात् ॥ ❦ ॥

नकत्वात् अत्राविद्यानाशस्थले प्रतिबंधकाभावेति भुज्यमानकर्माभावेत्यर्थः हेतोरविद्याद्युपादाननाशस्य अभावादित्यस्यां तेतावत्कालमिति स्थितिरिति चानुषज्यते तत् कार्येति तत्प्रयुक्तेत्यर्थः तेनानादिदृश्यसाधारण्यं समर्थत्वेति प्रपंचे मिथ्यात्वेन निश्चितेबह्वायाससाध्यकार्यविशेषमुद्दिश्य प्रवृत्त्यभावेन ताहशार्थक्रियोपधायकताप्रयोजकशक्त्यभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तज्जातीयेनप्रारब्धकर्मकालीनसाक्षात्कारसजातीयेन योजनादित्यनेनेतितथाचयोजनस्यश्रवणादिरूपस्यैवभूयस्त्वमर्थः विशेष्यान्वयस्यनिवृत्तिरूपविशेष्यान्वयस्ययो
जनाभिधानात् तत्त्वभावशब्दितसाक्षात्कारादुक्तशक्तिरूपविश्वमायानिवृत्तिरंतेप्रारब्ध भोगांतेवशिष्टशक्तिमदज्ञाननतत् प्रयुक्तदेहादिरूपविश्वमायानिवृत्तिर्भू
यश्चेत्यर्थः प्रथमान्वयेविश्वपदसंकोचोनदोषोभूयश्चेत्यादिवाक्यांतरसत्त्वात् ब्राह्मणेभ्यः सर्वधनंदत्तंयज्ञेभूयः सर्वधनंदत्तमित्यादाविवेतिवोध्यं अभ्या
र्हितत्वादितिगुणानांचपरार्थत्वादसंवंधः समत्वादितिजैमिन्युक्तेः विशेषणान्वयस्वीकारेपियोदाम्यंगृहीत्वासोमायययजतइत्यादाभ्यमित्यस्यगृहीत्वेत्यत्रेवभू
यइत्यस्यतत्त्वभावादित्यत्रैवान्वयोनतुयोजनादित्यत्रतथाचसाक्षात्कारात्विश्वमायानिवृत्तिः भूयःसाक्षात्कारादंतेवशिष्टसर्वमायानिवृत्तिरित्यर्थः। अंतइतीतिच
कारवैयर्थ्यमपिवोध्यंभूयोयोजनाद्यधीनसाक्षात्कारात्सर्वदृश्यनिवृत्तिरित्यस्यैवश्रुत्यर्थत्वेतादिपदंव्यर्थमितिभावः यत्तुध्यानादिंद्रियवृत्तीनांपरमात्मनियोजनात्
ध्यानपरिपाकरूपेंतेसतितत्त्वसाक्षात्कारजन्यभगवत्प्रसादात् विश्वमायानिवृत्तिरित्यर्थइतितन्नअभिशब्देनैवध्यानेपरिपाकलाभात् अंतशब्दस्यतत्त्वो
धकत्ववैयर्थ्यात् उक्तप्रसादस्तुनशब्दार्थस्तत्त्वस्यभावः प्राप्तिरितिव्युत्पत्त्यातत्त्वभावशब्दस्यसाक्षात्कारार्थकत्वात् अभानापादकाज्ञानेनाप्राप्तस्यप्राप्तेः साक्षात्का

अतएवसमयेसर्वशक्तिमदज्ञाननाशः तज्जातीयेनाप्रतिरुद्धेनप्रत्ययेनतथाचश्रुतिः भूयश्चान्तेविश्वमायानिवृत्तिः नचभूयइत्यस्ययो
जनादित्यनेनान्वयात् नक्लेशानुवृत्तावस्याःश्रुतेर्मानतेतिवाच्यम् विशेषणान्वयापेक्षयाविशेष्यान्वयस्याभ्यर्हितत्वात् तत्त्वभावादित्यनेनव्य
वधानात् अन्तइतिपदवैयर्थ्याच्चविपरीतयोजनस्यासंगतेः नचक्लेशस्थितौकर्मानुवृत्तिः॥ १ रूपत्वात् अथतत्त्वेभावोभक्तिर्भावशब्दस्यभक्तौ

प्रसिद्धत्वादितिचेत् तथापिभक्त्यधीनप्रसादालाभः अथतत्त्वेभावोयस्येतिवहुव्रीहिणाप्रसादलाभइतिचेन्नवहुव्रीहेस्तत्पुरुषापेक्षयाजघन्यत्वात्किंचयस्य
देवेपराभक्तिरित्यादिनाभक्त्यामामभिजानातीत्यादिनाचोत्तमभक्तेर्ज्ञानहेतुत्वस्यैवोक्तेर्द्वहन्नारदीयादौ अधममध्यमभक्तावुक्ताविधिसिध्यैभजेद्यस्तुदासव
च्चक्रपाणिनंभक्तानांप्रवरोह्येषसर्वशास्त्रार्थकोविदइत्यनेनोत्तमभक्तमुक्त्वा अहमेवपरोविष्णुर्मत्तःसर्वमिदंजगत् इतियःसततंपश्येत्तंविद्यादुत्तमोत्तमं इत्य
नेनोत्तमोत्तमभक्तेस्तत्त्वसाक्षात्काररूपत्वोक्तेर्गीतायांचार्तोजिज्ञासुरित्यादिनाज्ञानिनश्चतुर्थभक्तत्वोक्त्या तयोक्तेर्ज्ञानस्यैवभक्तित्वेनाविरोधः साक्षात्कार
स्यप्रसादहेतुत्वकल्पनंतुप्रौढ्या देवनहिलोकेतथाकृत्स्नअविद्यानिवृत्तेः प्रसादजन्यतापिनलोकेकृत्स्नानिगडमोचनादेस्तत्त्वेनकृतत्वेपिनतद्दृष्टांतेन
तस्यांसानुमातुंशक्यापक्षदृष्टांतयोरेकरूपेणासाध्यादर्शनात् तस्मात् तस्यतावदेवेत्यादिश्रुत्यैकवाक्यतयांतपदंभोगांतपरंचशब्दोवधारणार्थकः अंतेतत्त्व
भावादेवविश्वमायानिवृत्तिर्नतु अन्यापेक्षाअंतेनिवृत्तिर्भवत्येवनतुमायायाचस्थितिरिति अतएवइतरस्याप्येवमसंश्लेषःपातेत्वितिसूत्रेज्ञानाधीनात्सर्वकर्मा
संवंधात्ज्ञानिनोदेहपातेमुक्तिस्तुशब्देनावधारितातस्मात्सौत्रेणतुशब्देनसमानार्थकःश्रौतश्चशब्दःपातशब्देनसमानार्थकोंतशब्दोनतुप्रसादार्थकइतिप्रसादेनैवंनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञानप्रतिबंधेन साक्षात्कारकार्ये देहादिनाशे प्रतिबंधेन एककालीनत्वेनेति अन्योन्यस्थितेरन्योन्यनिष्ठत्वे अन्योन्याधीनत्वादोषः स च न प्रकृते इति भावः फले प्रवृत्तस्य यागादेरित्यनेन यागादेः फलसाधनतानिर्वाहकत्वमपूर्वे उक्तं। ननु फलसाधनतानिर्वाहकत्वं व्यापारविधया सूक्ष्मावस्थारूपशक्तेश्च न व्यापारत्वं यागजन्यत्वस्य पश्वादिफलजनकत्वस्य च तत्र सत्त्वे मानाभावादित्यत आह उत्पत्तौ वापीति पश्वादेरुत्पत्त्यर्थं यागाधीनो सत्साम्ययत्वाय च शक्तिमात्रमेव कल्प्यत इति शेषः अन्यथानुपपत्त्या तत्रैव तदुभयं कल्प्यत इति भावः तादृगर्थेति आचार्यवानवेदेत्यनेन विद्याया उक्तत्वात् तस्याश्चाविद्यांप्रति शीघ्रमसंतोच्छेदकत्वे मायां तु प्रकृतिमित्यादिश्रुतिसिद्धा विद्याकार्यता कस्य देहादेरसंतोच्छेदकत्वस्याप्यापत्त्या विद्याया असंतोच्छेदे भुज्यमानं कर्मैव प्रतिबंधकं कल्प्यते तथा च ज्ञानप्रयुक्तात्यंतोच्छेदं विनाप्युपादानसूक्ष्मावस्थायास्वमुद्गरपाताधीनकपालादिनाशस्थले कार्यनाशहेतुतयाक्लृप्तत्वेनाद्यतत्त्वसाक्षात्काराधीनाज्ञानसूक्ष्मावस्थाया एव पूर्वदेहादिनाशोपधायकत्वेपि देहाद्यंतरोत्पत्तिस्वीकारे तत्र भोगोपपत्तिस्तदिदमुक्तं

तदनुवृत्तौ वाज्ञानप्रतिबन्धेन लेशस्थितिरित्यन्योन्याश्रय इति वाच्यम् नतावज्ज्ञस्मैभूयश्चान्त इत्यादिश्रुतेरेव लेशानुवृत्तेरवगतत्वात् नापि स्थितौ एककालीनत्वेन दोषाभावात् यद्वा अज्ञानस्य सूक्ष्मावस्था लेशः यथा तस्मात्फले प्रवृत्तस्य यागादेः शक्तिमात्रकम् उत्पत्तौ वापि पश्वादेरपूर्वं न ततः पृथगिति वार्त्तिकेन यागे गतेपि यागसूक्ष्मावस्थारूपमपूर्वं यागसाधनतानिर्वाहकमंगीक्रियते तथा अज्ञाने गतेपि तत्सूक्ष्मावस्थारूपो लेशो देहादिप्रतीत्यनुकूलः स्वीक्रियते स्वर्गजनकताग्राहकश्रुतेरिवात्रापि जीवन्मुक्तिश्रुतेस्तादृगर्थस्वीकारात् तस्मादविद्यालेशानुवृत्त्या जीवन्मुक्तिरुपपन्नतरा जीवन्मुक्त्युपपत्तिः ५॥ यत्तु परमते अपरोक्षज्ञानिनोपि स्वयोग्यपरमानन्दहेतुपरमकाष्ठापन्नभक्त्यभावे तत्साध्यस्य मोचकस्येश्वरप्रसादस्याभावेन प्रारब्धकर्मणा संसारानुवृत्तौ जीवन्मुक्तिः तद्भावे तु प्रसादस्यापि भावेन निःशेषदुःखनिवृत्तिविशिष्टस्वतो नीचोच्चभावापन्नस्वरूपानन्दाविर्भावरूपा मुक्तिरिति तन्न तावदेवास्य चिरमित्यादिश्रुत्याऽस्योसत्त्वात्तत्त्वसाक्षात्कारस्य प्रारब्धकर्मक्षयमात्रमपेक्षणीयं कैवल्यसंपत्त्यर्थमिति प्रतिपादनेनेश्वरप्रसादापेक्षायावक्तुमशक्यत्वात् स्मृतिपुराणादीनां श्रुतिविरोधेन ऽस्तुतिपरत्वात्॥

लेशो देहादिप्रतीत्यनुकूल इति नचैवमज्ञानमेवानुवर्त्ततामिति वाच्यमज्ञाननिवृत्तेर्ज्ञानस्यैवानुभवात् तत एवाधिष्ठाने साक्षात्कृतेपि सोपाधिकभ्रमस्य ले उपाधिसान्निध्यादिना लेशोपादानकभ्रमनिवृत्तावेव प्रतिबंधः कल्प्यते न तु अज्ञाननिवृत्तौ तदननुभवात् तथा च यावन्न विमोक्ष्ये इत्यस्य यावदविद्यालेशोपादानकदेहादिना भोगस्य समाप्तिनेत्यर्थ इति भावः अत्र च जीवन्मुक्तिश्रुतिरिव शतवर्षाद्यवच्छिन्नभोगजनककर्मबोधकश्रुतिरप्युक्तार्थे मानं न हि शतवर्षाद्यवच्छिन्नभोगे क्रियमाणे पंचाशद्वर्षकाले ज्ञानोदये देहादेरत्यंतोच्छेदे सा न विरुद्ध्यते न वा तया श्रुतिबोधितकर्मणां तत्त्वज्ञाने सति नोक्तफलोपधायकत्वं किंतु पंचाशद्वर्षाद्यवच्छिन्नएव भोगे जनकत्वमिति कल्पयितुं शक्यमपूर्वनानाविधहेतुत्वकल्पनापत्तेः शतवर्षाद्यवच्छिन्नभोगानुभवाच्चेत्यपि बोध्यं श्रीः तर्कैरित्यादिजीवन्मुक्त्युपपादनं॥५॥ स्वयोग्येत्यादि ब्रह्मादीनां नामधेयस्य यादृशी भक्तिः साधयितुं योग्या तस्याः परमानन्दहेतोः

परमकाष्ठापन्नाया अभावे इत्यर्थः कर्मक्षयमात्रमिति॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावन्न विमोक्ष्य इत्यनेन भुज्यमानकर्मरूपबंधकालमात्रं विलंब इत्युक्तत्वात् यावता कालेन भुज्यमानकर्मसमाप्तिस्तदन्यकालविलंबनिषेधः श्रुत्यर्थः प्रसादापेक्षायां भुज्यमानकर्मकाले तदनुत्पत्तौ तदन्यकालविलंबात् श्रुत्यर्थबाध इतिभावः यमेवैत्यादियं पुरुषमेष परमात्मा वृणुते प्रसादेनानुगृह्णाति तेन लभ्यः साक्षात् क्रियते। ततस्तस्य संबंधेन एष परमात्मा स्वां तनुं स्वस्वरूपं विवृणुते प्रकटयति आवरणं विनाश्यते नैकी भवति न तु मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इत्यादिगीताद्युक्तेः तच्चिन्ता विपुलाह्लादक्षीणपुण्यचया तथा तदप्राप्तिमहादुःखविलीनाशेषपातकानि कृष्णासतया मुक्तिं गता न्यागोपकन्यकादत्यादि विष्णुपुराणाद्युक्तेश्च प्रारब्धकर्मक्षये प्रसादो हेतुः आद्ये सर्वपदेन प्रारब्धसाधारणकर्ममात्रस्य प्रसादनाश्यत्वप्रतीते द्वितीये तु तत्त्वसाक्षात्कारे तस्य तस्य ष्टं॥ न च तत्त्वसाक्षात्कारे तत्त्वाविद्याया नाशासंभवात् द्वितीयं स्तुतिपरं आद्यं तु प्रसादनाश्यत्वं तत्त्वसाक्षात्कारद्वारैव लोके ज्ञानाज्ञानयोर्नाश्यनाशकत्वस्य क्लृप्तत्वात् दृष्टवत् तं मुच्यते नान्यः यथा विद्यते यनायपदा चर्मवदाकाशमित्यादिश्रुतेश्चेति वाच्यं प्रसन्नभगवदुपदेशेन देहान्ते गोप्यास्तत्त्वसाक्षात्कारसंभवात् श्रवणादिनैरपेक्ष्यं तु हिरण्यगर्भादेस्तत्त्वसाक्षात्कारे त्वयापि स्वीकृतं तत्राह न चेति भोगादेवेति उक्त्वा को आह्लाददुःखभोगयोरेव कर्मना

यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामिति भक्तिजन्येश्वरप्रसादस्यापि तत्साक्षात्कारस्वरूपएवोपयोगस्य बोधितत्वेन स्मृत्यादीनामपि तदनुसारित्वात् वैपरीत्येन साध्यसाधनभावे मानाभावात् न च प्रारब्धकर्मक्षये प्रसादविनियोगः प्रसादनिरपेक्षभोगादेव तत्सिद्धेः नापि मुक्तावुच्चनीचभावः तस्य द्वितीयसापेक्षत्वेन तदासंभवात् परमं साम्यमुपैतीति परमसाम्यश्रुतेश्च सातिशयत्वेन मुक्तेः स्वर्गादिवदनित्यत्वं स्यात् अधिकदर्शने दुः(खद्वेष्यादिकं च स्यात्॥

शकत्वप्रतीतेर्नप्रसादस्य सा उपदेशद्वारा क्वचित् तत्त्वसाक्षात्कारप्रयोजकत्वं तु तस्य स्पष्टं देहान्ते देवस्तारकं व्याचष्टे इतिश्रुतेरितिभावः सा म्यश्रुतेः निरंजनः परमं साम्यमुपैति अत्र निरंजनशब्देन निरुपाधिकत्वरूपसाधारणरूपोक्तेर्विद्वान् इति संतेन पूर्ववाक्ये नज्ञेयत्वेनोपस्थितशुद्धब्रह्मणा निरुपाधिकानंदरूपेण साम्यबोधनात् परमपदेन च भेदाघटितमुक्तरूपाभेदरूपमेव साम्यमिति ज्ञापितं तथा च गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्युद्धं रामरावणयोरिवेत्यादिरामायणादाविव मुक्तस्य सदृशांतराभावद्योतनाय साम्यादिपदप्रयोग इति बोध्यमत एव निरंजन इत्यस्यैव पूर्णत्वे धिकव्यर्थमित्यपास्तं सातिशयत्वेनेति यद्यत्सातिशयं तद्विनाशि दृश्यत्वेनाविद्याप्रयुक्तत्वेन विद्योच्छेद्यत्वादितिभावः दुःखद्वेषेति न च मनोभावात् तद्भावेपि भगवत्प्रसादात्तयाभावाद्धानदुःखादीति वाच्यमपकृष्टसुखत्वावच्छिन्नप्रतिमनस्त्वेन हेतुतायाः क्लृप्तत्वेन तन्मते मुक्तौ मनआवश्यकत्वात् श्वेतद्वीपवासिनां मुक्तत्वेन त्वदभ्युपगतानां च सुराद्यभावेपि मनःसत्त्वस्य मोक्षधर्मादावुक्तत्वान्मनः सत्त्वे च पापादेर्द्वेषादेश्चावश्यकत्वान्मनसस्त्रिगुणत्वेन सात्त्विकाइव राजसादेरपि वृत्तेरावश्यकत्वाद् अधिकदर्शनस्य तद्धेतुत्वेन क्लृप्तत्वाद्द्वेषाद्यभावे मनः स्वीकारस्य व्यर्थत्वाच्च वृद्धिह्रासे सादिब्रह्मादीनां मुक्तिषु वृद्धिह्रासभाक्त्वं न्यूनाधिकत्वं अंतर्भावात् न्यूनाधिकसाधनफलांतर्भावादेवं सत्येव साध्यसाधनयोरुभयोस्तुल्यत्वेन सामंजस्यादिति परा भिमतः स्वत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंत्याधिकरण इति निषेधादित्यग्रेरन्वयः एवमित्यादियथाज्ञाने ऐहिकामुष्मिकत्वे विशेषे तथा ज्ञाने जाते मुक्तावज्ञाननिवृत्तिरूपायां कस्यचिदैहिकत्वमेव कस्यचिदामुष्मिकत्वमेव वि
शेषांतरमेव इति नियमो न तावदेव चिरं निरंजनः परममित्यादिना मुक्तावस्थायामैहिकत्व निरंजनरूपत्वावधारणादित्यर्थः इष्टापत्तिरिति उपासनातारतम्येन ब्रह्मलोकाद्याप्तौ तारत
म्यमिष्टमिति भावः तन्नियामकानंदत्वात्। तन्नियामकस्यानंदत्वात् यदेवं तदेवं यन्नियामकस्य य आनंदः स तदानंदादुत्कृष्टः ईश्वरत्वाभावेन मुक्तं प्रतीश्वरत्वाप्रसिद्ध्या साध्याप्रसिद्धेः मुक्तं

ननु मुक्तावतारतम्यं किं भेदाभावात् उत सत्यपि भेदे तत्साम्यात् नाद्यः श्रुत्या भेदसिद्धेः नान्त्यः साम्यं किं जीवेश्वरयोरुत जीवानामेव नाद्यः तयोर्विभुत्वाणुत्वशेष।
शेषिभावस्वातन्त्र्यपारतन्त्र्यादिना तारतम्यात् अनेकेश्वरापत्त्या जगत्स्रष्टृत्वयोगात् तद्बूयतारतम्यप्रतिपादकस्मृतिभिर्जगद्व्यापारवर्जमित्यादिसूत्रैरुत्कृष्टत्वनि
कृष्टत्वग्राहकानुमानैर्विरोधाच्च नान्त्यः जीवानप्रति शेषिणो लक्ष्मीतत्त्वात् तान्प्रति नियामकाहिप्यक्सेनादितश्च जीवानां निकृष्टत्वात् सैषानन्दस्येत्यादितैत्तिरीयादि।
श्रुतिभिः मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने इत्यादिस्मृतिभिः वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवमित्या।
दिसूत्रैरुक्तश्रुतितर्कानुगृहीतैरनुमानैर्विरोधाच्चेति चेत् न भेदाभावेन तारतम्यासिद्धेः यथा चक्षुरादेर्नभेदपरत्वं तथाप्रागेवगतं यत्तु द्वितीयपक्षमाशंक्य
दूषणं तदकाण्डताण्डवम् भेदसत्त्वेऽभेदात्मकपरमसाम्याभावात् तत्सत्त्वे भेदस्यैवाभावात् किंच तारतम्याभिधानं परममुक्तौ उत ब्रह्मलोकादिवा
सरूपापरमुक्तौ नाद्यः एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेरिति तृतीयांत्याधिकरणे ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनादित्येतत्सू।
त्रोक्तज्ञानगतैहिकत्वामुष्मिकत्वरूपविशेषवन्मुक्तावपि तारतम्यमाशंक्य निषेधात् द्वितीये त्विष्टापत्तिः यत्तु मुक्तजीवभोगः ईश्वरभोगान्निकृष्टः जीवभोगत्वात् संसारि
भोगवत् एवं जीवज्ञानादिकमपि पक्षीकृत्य प्रयोग ऊहनीयः ईश्वरानंदो जीवानन्दादुत्कृष्टः तन्नियामकानन्दत्वात् यदेवं तदेवं ——— यथा सेवकानन्दात्सेव्यानन्दः ईश्वरो जी
वस्वभावानंदादित उत्कृष्टस्वाभाविकानन्दादिमान् तत्सेप्सुत्वे सति तत्र शक्तत्वात् यो यत्सेप्सुत्वे सति यत्र शक्तः स तद्वान् यथा संमत इत्यादीनि तारतम्यसाधकानीति तन्न आद्ये
मुक्तस्य ब्रह्मरूपतयोपाधिकृतजीवत्वाभावेनाश्रयासिद्धेः ईश्वरत्वाभावेन साध्याप्रसिद्धेः स्वरूपासिद्धेश्च द्वितीयाद्यनुमाने जीवेश्वरविभागकाले तारतम्यसाधनं चेत् सिद्धसाधनम्
तद्भिन्ने काले चेत्पूर्वदोषानतिवृत्तिः सैषानंदस्येत्यादिश्रुतिभिर्मानुषानंदमारभ्य ब्रह्मानन्दपर्यन्तेषु उत्तरोत्तरशतगुणत्वरूपतारतम्यमुपाधितारतम्येन वदंतीभिर्निरुपाधिके स्व
रूपानंदे तारतम्यस्य वक्तुमशक्यत्वात् एतेन प्रकृतावन्धनिवृत्तिः स्वसजातीयवन्धनिवृत्त्याश्रयप्रतियोगिकतारतम्यवन्निष्ठावंधनिवृत्तित्वात् निगडवन्धननिवृत्तिवदिति निरस्तम्

प्रतियदीश्वरत्वं तत्घटितसाध्याप्रसिद्धेः सर्वज्ञीयभोगत्वेन साध्ये निवेशे तु अप्रयोजकत्वं साध्यं विनापि हेतूपपत्तेः अनतिवृत्तिरिति प्रच्छन्नज्ञानिजडभरतादिनियामकरघुगणाद्या
नंदे व्यभिचारोऽपि बोध्यः तत्सेप्सुत्वं तत्र शक्तत्वं चासिद्धं तादृशानंदस्य सिद्धत्वेनेश्वरे तत्प्राप्तीच्छाविरहात् नित्यमीशानंदं प्रतीशस्यशक्त्वाप्रसिद्धेश्च निरुपाधिकइति निरंजनः पर
मं साम्यं इत्यादिश्रुतिन्यायसिद्धनिरुपाधितोके इत्यर्थः। एतेन आश्रयासिद्ध्यादिना स्वसजातीयेति निगडवंधनिवृत्तित्वाविद्यानिवृत्तित्वान्यतररूपेण स्वसजातीयेत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणगतजातित्वेनेतिमधुरत्वादिव्याप्यजातिविशेषाणामेवतारतम्यव्यवहारास्पदत्वंतद्वृत्तिधर्मस्यैवतत्प्रतियोगिकतारतम्यशब्देनाभिधानेमुक्तानंदयोरेकजातीयत्वेपिस्व
स्वमात्रविषयकधीविषयत्वमादायार्थान्तरंनिरतिशयत्वात् निरतिशयात्मरूपत्वात् उभयवादिसिद्धेनेतिस्वरूपानंदस्यमुक्तावाविर्भावइत्युभयवादिसिद्धंनचजीवस्वरूपानंदाना।
मनादितारतम्यस्वभावत्वमितिवाच्यंजीवस्वरूपाणांतारतम्यरूपत्वेभेदमात्रेविवादपर्यवसानेनपरिभाषामात्रापत्तेःद्रव्यगतधर्मविशेषाणामपितद्रूपत्वमंगीकृत्यमुक्तौ
सुतराविर्भावइत्युक्तौउक्तश्रुतिविरोधः।नचतदन्यधर्मनिषेधउक्तश्रुतावितिवाच्यं।संकोचेमानाभावात्तदिदंवस्युतेस्वरूपानंदेतदभावादिति।एतेनमुक्तानंदस्यश्रुत्यादि
सिद्धनिर्विशेषात्मरूपत्वेनसंख्यापरिमाणकृतेतियथासप्तर्ष्यपेक्षयाष्टवसूनामाधिक्यंयथावाबदर्यपेक्षयाबिल्वस्यतथामुक्तानांमध्येएकापेक्षयान्यस्येनेत्यर्थः।मधुरत
त्वादिवत्मधुरमधुरतररसाद्योरिवस्वरूपकृतमनादिस्वनिष्ठधर्मकृतेतदभावादितिनचनिर्विशेषानंदस्यापिभेदस्यानीपेनविशेषेणधर्मधर्मिभावसंभवइतिवाच्यंउक्त

तारतम्यस्यगुणगतजातित्वेनवन्ध्यनिवृत्त्याश्रयात्मनिवक्तुमशक्यत्वात् अतएवनिवृत्तिगततारतम्यसाधनमप्यपास्तम् निवृत्तेर्निरतिशयत्वात्
आनन्दस्यस्वरूपतयोभयवादिसिद्धेनगुणत्वाभावेनतत्रापितस्यवक्तुमशक्यत्वात् एतेनस्वरूपसुखानांप्रत्येकमेकत्वेनाणुत्वेनचसंख्यापरिमाण
कृतवैषम्याभावेपिजलसुधापानजन्यसुखयोरिवमधुरमधुरतरत्वादिवच्चस्वरूपकृतंवैषम्यंमुक्ताविति निरस्तंवैषयिकसुखेसाधनतारतम्यप्रयुक्ततारत।
म्येपिस्वरूपानन्देतदभावाच्च नचसालोक्यादिमुक्तिःसायुज्यादिमुक्तितोऽपकृष्टेतिप्रसिद्धिविरोधःपरापरमुक्तिरूपतयातदुपपत्तेःसायुज्यादिगतमुक्तावुत्कृष्टत्व
व्यपदेशोपकृष्टत्वाभावमात्रेणननुसायुज्यंनैकंचन्द्रमसःसायुज्यंसलोकतामाप्नोतीत्यादिश्रुतौसत्यपिभेदेसायुज्योक्तेःसयुजःपरमात्मानंप्रविश्यचबहिर्गताइत्यादौ
सयुजांप्रवेशमात्रोक्तेश्च सयुजोभावःसायुज्यमितियुजशब्देनसंबन्धस्यैवोक्तेःसालोक्यमथसामीप्यंसारूप्यंयोगएवचेतिस्मृतौसायुज्येसंबन्धवाचकयो
गशब्दप्रयोगाच्च तस्मात्सायुज्यंनामक्षीरनीरवत् अन्यदेहाविष्टग्रहदेवतादिवच्चसंश्लेषमात्रंनत्वैक्यमितिचेत् नव्यापकेनेश्वरेणसंश्लेषस्यनित्यसिद्धत्वेनापुमर्थे

विशेषस्यधर्मत्वाद्व्यतिरेकेनिर्विशेषत्वस्यविरोधादनतिरेकेपरिभाषामात्रत्वात् ननुसायुज्यस्योत्कर्षवत्त्वेनिर्विशेषत्वहानिस्तत्राह सायुज्यादिगतमुक्तावितिसायुज्या
दिमध्येसर्वोत्कृष्टत्वेनावगतमुक्तावित्यर्थः मात्रेणेति सायुज्यावधिकापकर्षस्यसालोक्यादौतत्समसत्ताकस्यकल्पितत्वेपिसालोक्याद्यवधिकोत्कर्षःसायुज्येतत्समस
त्ताकोनकल्पितःकिंतुव्यावहारिकइतिभावःप्रवेशमात्रोक्तेरितिगृहस्थःसदृशींभार्यांविंदेतेतिवज्ञाविनींवृत्तिमाश्रित्यप्रवेशोत्तरसायुज्यस्यप्रकृतेउक्तिसंभवइतिध्येयंयद्यप्यु
पाध्योःशरीरयोःसंश्लेषात्तदुपहितचिद्रूपयोर्ब्रह्मादिजीवांतरयोर्भेदनाशेनैक्यस्यसम्मतेसंभवःज्ञेयब्रह्मणस्तुनिरुपाधिकत्वेनतेनसहैक्यस्योपाधिनिवृत्तिमंतरेणासंभवइतिसा
युज्यशब्दस्यैक्यार्थकत्वमव्याहतंतथापिपरोक्तत्वदर्शनाधीनसायुज्यस्यसंश्लेषत्वंदूषयितुमाहव्यापकेनेतिसंश्लेषस्यअणुत्वेनतन्मतसिद्धजीवसंयोगस्यनित्यसि[illegible]।
ज्ञानंविनापिसिद्धत्वेनापुरुषार्थत्वादितिनचप्रसादितपरसंश्लेषस्यपूर्वमसिद्धत्वात्पुरुषार्थत्वमितिवाच्यमीश्वरप्रसादस्यैवहितावतापुरुषार्थत्वपर्यवसानंनचतद्युक्तंतसायु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ.४
अ.सि
टी.ल.
८

अत्रब्रह्मेति नतस्यप्राणाउत्क्रामंतीत्यादिःश्रुतेरिति फलत्वाभावादित्यत्रहेतुः अत्रेतियत्रलोकेज्ञानोत्पत्तिस्तत्रेत्यर्थः लोकावाप्तिवदिति पारलौकिकफलेन्वयःलोकावाप्तिवद्यत्पारलौकिकंफलंतत्त्वाभावादित्यर्थःउत्क्रमणादिसाध्यत्वेनब्रह्मलोकावाप्तिस्तुत्यंफलमुपाध्यवच्छिन्नस्यैववाच्यमुपाधिंविनाजीवस्यगमनाद्यदृष्टेस्तयापिलिंगशरीराविद्यानाशोत्तरंस्थूलशरीरावच्छिन्नस्यैवमुक्तस्यगमनादिस्वीकाराच्चेत्याशयेनाह उपाध्यवच्छिन्नजीवस्येतितथाचोक्तश्रुत्याश्रुद्धेनज्ञेयेनब्रह्मणैकं ज्ञानोत्पत्तिलोकएवेतियद्बोधितंतद्बाधःसोपाधिकस्यलोकांतरगतजीवस्यतदभावादितिभावः नन्वत्रब्रह्मसमश्नुतइत्यत्रप्रसादितेश्वरसंयोगोत्रेवेत्यर्थःसायुज्यपदस्वारस्यात्तथाचप्रसादोज्ञानफलंप्रसादफलंतुलोकांतरेप्राप्तिस्तत्राह ब्रह्मविदिति ब्रह्मरूपत्ववदितिब्रह्मवेदब्रह्मैवभवतितद्भावभावनापन्नस्ततोसौपरमात्मनाभवस्यभेदोभेदश्चतस्याज्ञानकृतोभवेदित्यादिश्रुतिस्मृतिभिर्ज्ञानफलमुक्तश्रुत्युक्तंब्रह्मैक्यमेवेतिसायुज्यमपितदेवअतएवसालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युतदीयमानंनगृह्णंतिविनामत्सेवनंजनाइतिभागवतादौसायुज्यमेकत्वपदेनोक्तमितिभावः ननुसायुज्यशब्दस्यैकार्थकत्वेपिचंद्रमसइत्यादावुपाधौसत्यप्यौपाधिकभेदाभावेनैक्यंनत्वासंतिकंनिर्धर्मकव्यक्तिमात्रमितित्वद्भीसावाच्यमन्यतेतुतत्रापिसंश्लिष्टयोर्व्यक्त्योःस्वरूपतोभेदादुपाध्योर्मिलनेपिनैक्यंतथाचोपाध्यवच्छि

नचैतल्लोकस्थितस्यजीवस्यलोकान्तरस्थितालौकिकशरीरावच्छिन्नेनेश्वरेणसंश्लेषःसाध्यः अत्रब्रह्मसमश्नुतइतिश्रुतेःउत्क्रमणगमनादिसाध्यब्रह्मलोकावाप्तिवदुपाध्यवच्छिन्नजीवस्यानवच्छिन्नब्रह्माभेदरूपेरमसुक्तेःपारलौकिकफलत्वाभावात्ब्रह्मविदाप्नोतिपरमित्यादाववाप्तेर्ब्रह्मरूपत्ववत्सायुज्यस्यापितद्रूपतायाअंगीकरणीयत्वात्चन्द्रमसःसायुज्यमित्यादावेकोपाध्यवच्छिन्नस्योपाध्यन्तरावच्छिन्नेनैक्यानुपपत्तिवदत्रानुपपत्तेरभावात् प्रसिद्धार्थस्वीकारेबाधकस्योक्तत्वाच्च॥ १९

न्नजीवस्यलोकांतरगतस्यलोकांतरीयेश्वरेणसहौपाधिकभेदाभावरूपमैक्यंनतुनिर्धर्मकव्यक्तिमात्रमित्येवतत्रवक्तुमुचितंनचनिरंजनइत्यादिश्रुतिविरोधस्तस्यदुःखहेतूपाधिनिषेधपरत्वात्अतएवाशरीरंवावसंतमित्यादिकमपिव्याख्यातंत्वयापिप्रियाप्रियेनस्पृशतइत्यत्रप्रियशब्देनवैषयिकसुखस्यवाच्यत्वेनसंकोचावश्यकत्वात्नचमुक्तस्यकर्माभावात्शरीरग्रहणासंभवःप्रसादस्यैवतत्रहेतुत्वात्जीवन्मुक्तानुमितकर्मसत्वात्सुकृतदुष्कृतेविधुनतइत्यादेर्ब्रह्मलोकप्राप्तिनिषेधपरत्वादतएवेदंशरीरंनिहत्याविद्यांगमयित्वान्यन्नवतरंकल्याणतरंरूपंकुरुतेपित्र्यंवागांधर्वंवादैवंवाप्राजापत्यंवेत्यादिश्रुतौलिंगशरीराविद्यानाशोत्तरंमुक्तस्यपित्र्यादिदेहोप्तिरुक्ताज्ञानात्मोक्षोभवत्येवसर्वाकार्यकृतोपितुआनंदोह्रसतेकार्यात्शुभंकृत्वाचवर्द्धतेइतिब्रह्मांडेशुभाशुभकर्मभ्यांज्ञानिनआनंदवृद्धिह्रासावुक्तौब्रह्मवेदब्रह्मैवभवतीत्यादिकंतुऔपाधिकभेदाभावबोधकंसगुणस्यैवज्ञेयत्वेनज्ञेयप्राप्त्योरैक्यात्तत्राह चंद्रमसइत्यादिऐक्यानुपपत्तिवत्निर्धर्मकव्यक्तिमात्ररूपास्वैक्यानुपपत्तिवत्अत्रब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतौप्रसिद्धार्थस्वीकारइतिचंद्रमसइत्यादौप्रसिद्धस्यउपस्थितयोर्भेदाभावरूपस्यसायुज्यस्यस्वीकारइत्यर्थः उक्तत्वादितिअशरीरमित्यादिश्रुतेःसंकोचेमानाभावात्शरीराभावप्रयुक्तस्यैवप्रियाद्यस्पर्शस्योच्यमानत्वेनप्रियशब्दस्यवैषयिकसुखपरत्वेपिअशरीरपदेसंकोचस्यायुक्तत्वात्प्रसादेज्ञानजन्यत्व

म.
३५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यनिरस्तत्वात् स एष नेति नेतीत्यादि एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान् इत्यादिश्रुत्या ब्राह्मणशब्दितस्य ब्रह्मविदो धर्ममात्रनिषेधपूर्वकं कर्माधीन वृद्धिह्रासनिषेधेन कर्मजशरीरादेर्मुक्तावसंभवात् सुहृदः साधुकृत्यां द्विषंतः पापकृत्यां अपुण्यपुण्योपरमे यं पुनर्भववर्जिताः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ज्ञानाग्निदग्धकर्माणमित्यादिश्रुतिस्मृतिभिर्ज्ञानिनां सर्वकर्मफलाभोक्तृत्वलाभात् स्वेच्छाजन्यशरीरे मानाभावात् तद्बोधकस्मृत्यादेरपरमुक्तिविषयकत्वात् स यत्रायमात्माय स्वं नेतीत्यादि इति तु कामयमान इत्यंतसंसारविवेचनश्रुतिमध्यपठितस्येदं शरीरं निहत्येत्यादेरभिक्रमणवाक्यवत् संसारबोधकत्वेन मुक्तस्य शरीराबोधकत्वात् इदंपदस्य प्रत्यक्षवाचकत्वेनौत्सर्गिकस्य लिंगशरीराबोधकत्वात् गमयित्वेत्यस्य नाशयित्वेत्यर्थकत्वे लक्षणापत्तेरिदं शरीरं निहत्याविद्यामित्युक्तैवाविद्यानाशलाभसंभवेन गमयित्वेत्यस्य व्यर्थत्वात् स्थूलशरीरमभिमानाभावेन निहत्याविद्यासंस्काररूपेण प्रापय्येत्यर्थकत्वावश्यकत्वात् उक्तब्रह्मांडोक्तेः शुभाशुभकर्मप्रयुक्तलौकिकसत्कारासत्कारप्रयुक्ताविक्षेपविक्षेपाभासपरत्वेन मुक्तिसुखगतवृद्धिह्रासाबोधकत्वात् प्रपंचोपशममित्यादि स आत्मा स विज्ञेयः तमेव विदित्वेत्यादिश्रुतिभिः शुद्धस्यैव ज्ञेयत्वेन प्राप्यत्वात् कैवल्यं न सोपाधिकमित्यादिबाधकस्योक्तप्रापत्वादित्यर्थः ननु तथापि सायुज्यशब्दस्य क्वचित् सोपाधिकभेदाभावः क्वचिदखंडव्यक्तिमात्रमर्थ इति न युक्तं नानार्थत्वा

सायुज्यशब्दस्तावद्विभक्तत्वाभावाभिप्रायकः यच्चोत्तरोत्तरं शतगुणानन्दप्रकाशकवाक्येषु प्रतिवाक्यं मुक्तावकामहतशब्दप्रयोगान्मानुषानन्दवदकामहतमुक्तानन्देपि तारतम्यमिति तन्न एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति सर्वेषां लौकिकानन्दानां परमानन्दान्तर्भावाभिधानोपपत्तेः न तु तस्य तस्याकामहतस्य तावानेवानन्द इति येन तत्रापि तारतम्यं कल्प्येत तथा च सोश्नुते सर्वान्कामान् कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीत्यादिश्रुतेः स हि मुक्तो कामहत इत्यादिब्रह्माण्डोक्तेश्च न विरोधः ननु एकस्यैव श्रोत्रियस्य सर्वत्र परामर्शे मानुषादिभ्यः सावधारणशतगुणितमनुष्यगन्धर्वाद्यनेकानन्दा एकस्मिन्विरुद्धाः॥

पत्तेरखंडस्य बोधने लक्षणापत्तेश्च तत्राह सायुज्यशब्द इति विभक्तत्वाभावाभिप्रायकः चंद्रमस इत्यादौ ब्रह्मसायुज्यमित्यादौ च भेदाभाववाचकः चंद्रपदार्थस्य चंद्रशरीरावच्छिन्नरूपत्वेन तेन सह सोपाधिकजीवस्य समभिव्याहृतशरीररूपोपाध्यवच्छिन्नप्रतियोगिताकभेदस्याभावो बुध्यते उपाध्योर्मिलने सति एकोपाधिमत्त्वेनापरोपाधिमति भेदाप्रतीतेर्न तदसंभवः ब्रह्मसायुज्यमित्यादौ तु ब्रह्मपदार्थस्य शुद्धत्वेन तत्प्रतियोगिकभेदसामान्याभाव एव बुध्यते सोपाधिके च तदसंभवान्निरुपाधिकजीवस्यैव तत्पर्यवसानं॥ मेवं च सायुज्यपदस्य संबंधार्थकत्वं दूरापेतं सारूप्यं योग एव चेत्यत्रापि स एवार्थः सारूप्यैकत्वमप्युत इति स्मृतेरिति भावः मुक्तौ मुक्तात्मनि मानुषानंदवत् मानुषाद्यानंद इव अंतर्भावाभिधानोपपत्तेः अंतर्भावेन मुक्तानंदस्य शतगुणिततत्तदानंदसादृश्याभिधानोपपत्तेः तावानेव तत्तत् शतगुणितानंद एव तत्रापि मुक्तानंदेपि कामान् सुखानि कामस्य कामुकस्य कामाः सुखानि यत्र ब्रह्मसुखे तत्र तदभिन्ने सर्वत्र शतगुणितानंदेषु परामर्शे सदृशानंदसंबंधित्वेनोक्तो मानुषादिभ्यः मानुषानंदादिभ्यः शतगुणिते त्यत्रान्वयः सावधारणेति। देवगंधर्वानंदादीनामधिकत्वेन वक्ष्यमाणत्वात् मनुष्यगंधर्वानंद एव मनुष्याद्यानंदशतगुणित इत्याद्यवधारणमार्थिकं स एक इत्येकप॥
दैः शाब्दं वा बोध्यं अनेकानंदा अनेकानंदजातीयानंदाः॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकरूपतया कामसामान्याभावरूपतया व्यवस्यायोग इति अकामहतपदेन एकजातीयानंदव्याप्यनिष्कामत्वोक्त्या तादृशानंदस्य सादृश्यप्रतिपादनेनानाजातीयानां मनुष्यगंधर्वाद्यानंदानां निर्णयासंभव इत्यर्थः अश्रुतकल्पनाप्यन्यथानुपपत्त्या कार्या तत्राह बाधश्चेति बाधं विवृणोति नहीति तथा च तत्तत्श्रोत्रगुणितानंदस्तत्र बाधित इति भावः। एकत्वेपि एकजातीयानंदवत्त्वेपि वक्तव्ये उपमेये परामृश्यते उपमानतयोच्यते साम्येनेति कलाचसाकांतिमतीकलावतस्त्वमस्ति लोकस्य च नेत्रकौमुदीत्यादाविव सह निर्देशविशेषात् साम्यलाभ इति भावः तत्सजातीयधर्मवत्त्वं तत्सजातीयस्य धर्मवत्त्वं तथा च प्रकृते मनुष्यगंधर्वादेर्यत्सजातीयं तदीयधर्मवत्त्वं तदपेक्षया अपकृष्टत्वभूयस्त्वरूपं तद्धिति धर्मवत्त्वमिति भावः तदितरेति उक्तभूयस्त्वेतरेत्यर्थः तथा च अकामहतस्यानंदे मनुष्यगंधर्वाद्यपेक्षयोत्कर्षस्य कल्पितस्य सत्त्वेपि न सादृश्यहानिरिति भावः न च चरमोक्तसर्वोत्कृष्टानंदं प्रति अकामहतानंदस्य सादृश्यासंभवः भेदाभावादिति वाच्यं

भिन्नश्चेदकामहतत्वादेरेकरूपतयाश्रुतस्याव्यवस्थापकत्वादानंदव्यवस्थाऽयोगः अथ व्यवस्थार्थं एतत्सदा काम एतदितरपदकामश्चेत्त्वस्येतेतदाश्रुतिकल्पनाबाधश्च नहीन्द्रादिपदे राजपदे वा निष्कामस्य भिक्षुकस्य इन्द्राद्यानन्दानुभवोस्ति तस्माच्छ्रुत्या पूर्ववाक्ये नाऽमुक्तानां तारतम्यमुक्त्वाश्रोत्रियस्य चेत्यादिना यश्चाश्रोत्रिय इत्यादिना चोत्तरवाक्ये न मुक्तस्य तदुच्यत इति चेत् न सर्वेषु वाक्येषु अकामहतस्य मुक्तस्यैकत्वेपि तदानन्दे सर्वानन्दानामन्तर्भावात् स एव तस्मिन् तस्मिन् आनंदे वक्तव्ये परामृश्यते तत्तदिन्द्रादिसाम्येन तस्य सर्वत्राभिधानोपपत्तेः अधिकं प्रविष्टं न तु तद्धानिरिति न्यायात् साम्ये हि तत्सजातीयधर्मवत्त्वं तंत्रं न तु तदितरधर्मानधिकरणत्वमपि गौरवात् यच्च मुक्तसुखं परस्परतारतम्यवत् परस्परतारतम्यवत्साधनकात्वात् संमतवदिति तन्न असिद्धेः ननु मुक्तिः प्रयागमरणभगवद्द्वेषादिसाध्येति मते ज्ञानकर्मसमुच्चयसाध्येति मते च प्रयागमरणादीनां वर्णाश्रमकर्मणां च विषमत्वात् नासिद्धिः॥ ((तत्र गगनं गगनाकारमितिवदुपपत्तेः अकामहतजीवन्मुक्तानंदत्वेन कल्पितभेदस्य संभवाच्च न च जीवन्मुक्तस्याहत्तिन इति विशेषणासंभवः भुज्यमानवृजिनसत्त्वादिति वाच्यं अनभिमानेन वृजिनादेर्बाधितानुवृत्तत्वेन च सचक्षुरचक्षुरित्यादिवदुपपत्तेर्जीवन्मुक्तग्रहणादेवाकामहत इत्यत्र हतपदं सार्थकमन्यथा केवलीभूतस्य ग्रहणे काम इत्येवोच्येत तथा चाकामहतत्वं बाधितानुवृत्तकामत्वं सत्त्वेन प्रतीयमानो हि कामो मूढं विकलीकुर्वन् हंतीत्युच्यते इति बोध्यं प्रयागेत्यादि सितासिते सरिते यत्र संगते तत्राप्लुतासो दिवमुत्पतंति ये वै तन्वां विसृजंत्यत्र धीरास्ते जनासो अमृतत्वं भजंते इति श्रुतिः प्रयागमरणस्यामृतत्वे प्रयोजकत्वं बोधयति गुणप्रवाहोपरमस्तासां गुणधियां कथमित्यादिना गोपीनां मुक्त्यसंभवमाशंक्य द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रिया इत्यंतेन भागवतेन मुक्तिः समाहिता तदपि भगवद्द्वेषादेस्तत्प्रयोजकत्वपरं प्रयागमरणजन्यादृष्टेन द्वेषादिना तत्तीपकभगवत्स्मृतिपरंपराधीनादृष्टेन दृष्टादृष्टप्रतिबंधकनिवृत्तिद्वारा तदधीनभगवदुपदेशद्वारा वा ज्ञानसंभवात् अन्यथा लोकतृस्तज्ज्ञानकारणताबाधापत्तेर्हिरण्यदा अमृतत्वं भजंते इत्यादिश्रुतेरपि साक्षाद्धेतुत्वबोधकत्वापत्तेः दृष्टैव तं मुच्यते यदा चर्मवदाकाशमित्यादिश्रुति

बाधापत्तेः मुक्तेः कर्मसाध्यत्वे विनाशित्वादेः वक्ष्यमाणत्वाच्च अतो मतद्दृत्युक्तं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्ता

तत्सिद्धिस्तारतम्यवत्साधनकत्वसिद्धिः दुर्लभत्वेतियोयोदेवानांप्रत्यबुध्यतेत्यादिश्रुत्याशुद्धब्रह्मणोवृद्धत्वोक्तेः कस्तमित्यादिकंस्तुतिपरंसर्वगुणाइत्यादिकमपिसगुणस्तुति
परंतत्त्वत् श्रुत्यातस्यापिवृद्धत्वोक्तेः सगुणप्राप्तेस्तारतम्यस्येष्टत्वेनयथार्थकंवातेतुभ्यंआशिषःकाम्यानिआशास्तेप्रार्थयतेनसभृत्यः लाभार्थसेवकत्वेनाप्रशस्तसेवकः
वणिक् लाभार्थकव्यापारवत्त्वेनवणिक्तुल्यः मुमुक्षोर्मोक्षमुद्दिश्यभजमानात् अमुमुक्षुःमोक्षपर्यंतफलमनुद्दिश्यभजमानःपरःश्रेष्ठः हेतुगर्भविशेषणमाह
एकांतभक्तिमानितिनिर्गुणभक्तिमानित्यर्थःलक्षणंभक्तियोगस्यनिर्गुणस्यह्युदाहृतंअहेतुक्यव्यवहितायाभक्तिःपुरुषोत्तमइतिभागवतात्अहेतुकोकाम्यफलशून्यान्
चकाम्यफलाभावेस्वतोपुरुषार्थभजनेप्रवृत्त्यनुपपत्तिरितिवाच्यंभक्तेर्नांतरीयसुखधारारूपेणपरिणतमनोवृत्तिरूपत्वेनस्वतएवपुरुषार्थत्वात्तत्संसारदुःखमिश्रित।
तेनमुक्त्यपेक्षयापक्वष्टत्वंपरंप्रामाणिकंतस्याः।अव्यवहिताविच्छेदशून्याअव्यभिचारिणीतियावत्अस्यभक्तीत्यादिमुक्तिसामान्यापेक्षयागरीयस्त्वासंभवाद्रत्यभ।

ज्ञानैकसाध्येतिमतेपिंकस्तंमदामदंदेवंमदन्योज्ञातुमर्हतिसर्वेगुणाब्रह्मणेवह्युपास्यानान्यैर्देवैः किमुसर्वैर्मनुष्यैरित्यादिश्रुत्याब्रह्मापितद्दृदनचेहस
स्यगन्येकुतोदेवमुनीन्द्रवर्याइत्यादिस्मृतिभिर्देवादिमनुष्यादिस्यमुक्तिहेतुब्रह्मज्ञानगतस्यबहुतरशास्त्राश्रवणसाध्यत्वस्यबहुतरगुणविषयत्वंविना।
अयोगेनार्थापत्त्याचतत्सिद्धिरितिचेत्नकेवलकर्मपक्षेसमुच्चयपक्षेवाकर्मसाध्यत्वेनमुक्तेरनित्यत्वापत्तेःनान्यःपन्थाइत्यादिश्रुतिविरोधाच्चतृतीयपक्षेतूदाहृत
श्रुतीनांब्रह्मविद्यादुर्लभत्वप्रतिपादनपरत्वेनतदुक्तसाधनसाध्यताप्रतिपादकत्वात्नचार्थापत्त्यातत्सिद्धिःब्रह्मसाक्षात्कारस्यनिर्गुणविषयतयागुणविषयत्व
स्यैवाभावात्यत्तुयस्तआशिषआशास्तेनसभृत्यःसवैवणिक्सवैभृत्यःसचस्वामीगुणलुब्धोनकामुकोमुमुक्षोरमुमुक्षुस्तुपरश्चैकान्तभक्तिमानित्यादिस्मृ
त्यामुमुक्षुभक्तापेक्षयाऽमुमुक्षोर्भक्तस्याधिक्योक्तेः तदाधिक्यस्यलोकरीतिसिद्धत्वाच्चभक्तिःसिद्धेर्गरीयसीतिस्मृत्याऽस्यभक्तिसाध्यमुक्त्यपेक्ष
याऽधिकमुक्तिहेतुभक्तेरपि आधिक्यस्योक्तेश्चेति तन्नयस्तआशिषइत्यादिनाफलमनिच्छतोगुणलोभेनयाभक्तिस्तस्यागरीयस्त्वंयत्प्रति
पादितंतत्तत्त्वसाक्षात्कारेत्वरासंपादकंनतुमुक्तितारतम्यापेक्षकंभक्तिःसिद्धेरित्यादिनाप्रतिपादितंगरीयस्त्वमपितज्जनकत्वमात्रेणपुत्रात्पितुरिव

क्तिसाध्यत्वेनाल्पायामुक्तिस्तद्रूपांसिद्धिमपेक्ष्यतदधिकमुक्तिहेतुर्भक्तिःगरीयसीत्यर्थइतिभावः।उक्तेश्चेतितारतम्यवत्साधनकत्वंमुक्तीनामितिशेषः गुणलोभेनसु।
खधारास्नाविस्मृतिविषयचरितलोभेनतदुक्तंभागवतेदुरवगमात्मतत्त्वनिगमायतवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाःनपरिलषंतिकेचित्अपवर्गम
पीत्यादितस्यास्तुगरीयस्त्वंतस्याएवाधिक्यंत्वरासंपादकत्वंत्वरयानिष्पादकत्वंतदुक्तंभागवतेअनिमित्ताभागवतीभक्तिःसिद्धेर्गरीयसीजरयत्याशुयाकोशंनिगीर्णमन
लोयथेतिकोशंलिंगशरीरंकोशपंचकंवातत्त्वसाक्षात्कारद्वाराजरयतिनाशयतिनतुमुक्तितारतम्याक्षेपकंमुक्तिवैजात्यप्रयोजकंवैजात्यस्यतत्त्वसाक्षात्कारेआक्षेपकंनेत्यर्थः
मात्रेणेतिसिद्धेरितिषष्ठीमुक्तेःसंबंधिनीगरीयसीमुक्तिसंबंधिगरीयस्त्वंविवृणोतिजरयतीत्यादितथाचमुक्त्यपेक्षयागरीयस्त्वंप्रकृतेनार्थइतितुयुक्तंउत्तरार्द्धस्यापेक्षितसमर्थक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ.४
अ.सि.
टी.ल.
१०

नहितरणइत्यादि अपिशब्दार्थस्यसंभावितत्वस्यतरणरूपमुक्तावन्वयेतद्बलाद्विश्चितमुक्तापेक्षयापकर्षआक्षिप्येतयथाश्यामाकाद्योप्यन्नमित्युक्तेतेषामपकर्षोलभ्यतेअधि-
कारिणितदन्वयेतुतस्यैवापकर्षोविलंबेनविधेयसंबंधरूपोलभ्यतेयथासुग्रीवंप्रतितदभिषेकमाज्ञाप्यअयमप्यंगदोराजन्यौवराज्येभिषिच्यतामित्यनेनविलंबाभिषेकाभिप्रायेणभग-
वताआज्ञापितंत्वराफलालाभेतिब्राह्मणाद्यन्यस्येत्यादिः ननुविलंबिताविलंबितत्वरूपस्यतारतम्यस्यतत्त्वसाक्षात्कारेस्वीकारेतत्तरणवत्तत्फलेपितदास्तांतत्राहसाधनमात्रेतिलौकिका
लौकिकयावत्साधनेत्यर्थः नहिदंडेवितयाचकर्मणामल्पमहतांफलानांचस्वगोचरेविभागस्यानस्यामान्याद्विशेषेपिचोदितेइतिवार्तिकेनाविशेषेणस्वर्गसाधनतयाचोदितानां
ज्योतिष्टोमाग्निहोत्रादीनांतारतम्यात् तत्फलानांतारतम्योक्तावपिलोकसिद्धसर्वकारणस्यतारतम्यंनकार्यतारतम्यप्रयोजकंनानाजातीयदंडादितोप्येकजातीयघटाद्युत्पत्तेर्दृष्ट-
त्वात् घटादावविलंबोत्पत्तिकत्वरूपोत्कर्षंप्रतिदंडादिनिष्ठस्यदार्ढ्यादेः प्रयोजकत्वस्यदृष्टत्वेपिअविलंबोत्पत्तिकत्वस्यतदृष्टेः विलंबेनोत्पन्नस्यापिदंडदहनादेरविलंबेनैवघ-

यत्तुअन्येत्वेवमजानंतःश्रुत्वान्येभ्यउपासतेतेपिचातितरंत्येवमृत्युंश्रुतिपरायणा इत्यत्रापिशब्देनस्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरां
गतिं किंपुनर्ब्राह्मणाः पुण्याभक्ताराजर्षयस्तथेत्यत्रकैमुत्येनचसाधनतारतम्येनसाध्येतत्प्रतीतिरिति तन्ननहितरणेऽपीत्यस्यान्वयः।
किन्त्वधिकारिणि तथाचविलंबिततरणरूपफलसंबन्धमात्रपर्यवसानात् कैमुत्यस्यापित्वराफलालाभमात्रेणोपपत्तेःसाधनमात्रतार-
तम्यस्यफलतारतम्याप्रयोजकत्वाच्च नहिदण्डतारतम्येनघटतारतम्यंक्वचिदपिदृश्यते यत्तुसाधनस्योत्तमत्वेनसाध्यमुत्तममाप्नुयुःब्रह्मार-
यःक्रमेणैवयथानन्दश्रुतौश्रुताइतिब्रह्मानंदेअधिकंतवविज्ञानमधिकावगतिस्तवेतिसाक्षान्मोक्षधर्मेचसाधनतारतम्येनसाध्ये
तदुक्तिरिति तन्न साधनोत्तमत्वेनसाध्योत्तमत्वस्यापरमुक्तिविषयत्वात् विज्ञानगताधिक्योक्तेरपिसाक्षात्कारप्रयोजकसगुणवि-
षयज्ञानपरत्वाच्च अतएवदहरादिविद्यानांअधिकाल्पगुणविषयत्वेनसाधनतारतम्यंयत्पराभिमतंतदप्येवमितिनकश्चिद्दोषःतस्मात्स्वरूपान-
न्दस्यस्वप्रकाशात्मरूपिणःप्राप्तिर्मुक्तिर्नतत्रास्तितारतम्यंकथंचन मुक्तौतारतम्यभंगः ६॥ ११ तमोनाशादिजनकत्वदर्शनात् तथाचसाक्षात्कारस्यावि-

लंबितत्वविलंबितत्वाभ्यांमुक्तौतयोःकल्पनंदंडादेर्घटादाविवप्रत्यक्षादिबाधितंपत्रतुनमानांतरबाधःतेनबहुवित्तव्ययायाससाध्यकर्मणिप्रवृत्तस्यान्यथानुपपत्त्यास्वस्य
वित्तव्ययायाससाध्यकर्मफलापेक्षयोत्कृष्टफलकत्वंकल्प्यतएवएतेनभक्तिप्रपत्त्योर्ज्ञानसाधनयोरस्तितारतम्यंभक्तौहिकायिकादिव्यापारआवृत्तिश्चास्तिप्रपत्तौतुभगवान्मांसंसा-
रसागरात्तारयिष्यत्येवसकृदेवप्रपन्नायतवास्मीतिचयाचतेअभयंसर्वभूतेभ्योददाम्येतद्व्रतंममेतिश्रीरामोक्तेरितिविश्वासमात्ररूपायांनतदपेक्षेतिततएवज्ञानेतारतम्यंतत्रच। राम.
मुक्तावितिपरास्तंनहियादृशस्यतिमिरस्यनाशेयोवह्निःस्वरूपयोग्यस्तादृशस्यततोवन्हेरुत्कृष्टवन्हिनाजनितेनाशेकश्चनातिशयःप्रामाणिकः।एतेनप्रतियोगिनउत्कर्षइत्यप्य- ३५९
पास्तंप्रतियोगिन्यज्ञानेउत्कर्षेसतिविरहाच्चब्रह्मानंदेपंचदशप्रकरणांतर्गतग्रंथेसगुणविषयज्ञानेतिसगुणोपासनेत्यर्थःतथाचगुरोस्तवप्रसादेनतवचैवोपशिक्षयातस्यैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चप्रसादेनप्रादुर्भूतंमहामुने ज्ञानंदिव्यंममापीदंतेनास्मिविदितोममअधिकंतवविज्ञानमधिकाचगतिस्तवअधिकंचतवैश्वर्यंतच्चत्वंनावबुध्यसेबाल्याद्यसंश
याद्वापिभयाद्वाप्यविमोक्षजात् उत्पन्नेपिचविज्ञानेनाधिगच्छतितांगतिंव्यवसायेनसुदृढेनमहद्धिधेच्छिन्नसंशयः विमुच्यन्हृदयग्रंथीनासादयति ——— तांगतिं
भवांश्चोत्पन्नविज्ञानस्थिरबुद्धिरलोलुपः व्यवसायादृतेब्रह्मनासादयतियत्परं इतिमोक्षधर्मोक्तौ ज्ञानंदिव्यंउपासनारूपंतत्त्वसाक्षात्काररूपंचममजनकस्यते
नविदितोस्मिउपासनाविशेषस्यपरकीयज्ञानवैराग्यादिज्ञापकत्वात् तत्त्वसाक्षात्कृतवतस्तैस्तैर्लिंगैःपरकीयतत्त्वसाक्षात्कारस्यानुमातुंशक्यत्वाच्चतवशुकस्य
अधिकंविज्ञानंमदीयादुपासनादधिकमुपासनंअतएवफलमाकाशगमनादिरूपागतिरणिमादिरूपमैश्वर्यमपिमदीयाद्गमनादैश्वर्याद्धिकंतच्चतत्तुसर्वभूतेषुचा
त्मानमित्यादिनांमयापूर्वमुक्तंपरमतत्त्वंतुत्वंनावबुध्यसेमदुपदेशात् पूर्वंननिश्चितवाननन्तुनिष्काममनिरंतरभक्तिरूपंविज्ञानंचरमसाधनत्वेनशीघ्रंतत्त्वनिश्चयजा
नकंतच्चममस्थितमेवत्वदुपदेशात्पूर्वंततकुतोननिश्चितंतत्राहबाल्यादितिविज्ञानेउक्तभक्तौउत्पन्नेपिबाल्यादिनातत्त्वरूपांगतिंनाधिगच्छतीत्यन्वयः बाल्यात्पि
तृलाल्यमानबाल्यावस्थायाःपित्रोच्यमानेतत्त्वेभवत्यसंभावनाइदानीमुत्पन्नेनमयापितुर्निकटेयत्श्रुतमनायासेनतत्कथंतत्त्वमितिसंशयादितिएकेनैवमस्तित्रे
दमुक्तंनान्येनातद्दत्तत्त्वंनवेतिसंदेहादित्यर्थः किंकार्यंब्राह्मणेनेहमोक्षार्थश्चकिमात्मकः कथंचमोक्षः प्राप्तव्योज्ञानेनतपसाथवेतिशुकेनपितुरुपदेशेसत्य
पिसंदिहानेनपृष्टोजनकआश्रमचतुष्टयानुष्ठानमुक्तवान् तदुत्तरंप्रश्नद्वयस्यावशिष्टस्यातिरहस्योत्तरकत्वेनजनकेनानुत्तरितत्वेनभूयः शुकउवाच उ
त्पन्नेज्ञानविज्ञानेनिर्द्वन्द्वेहृदिशाश्वतेकिमवश्यंनिवस्तव्यमाश्रमेषुभवेत्त्रिषुइतितत्रयदिमोक्षरूपः पुरुषार्थआत्मस्वरूपानंदस्तदातदावरणापगमायज्ञान
मात्रमपेक्ष्यतेअथलोकांतरप्राप्त्यादिरूपस्तदातस्यस्वरूपार्थेतद्गतातिशयार्थंचश्रवणाद्यतिरिक्ततयाप्यपेक्ष्यतेसंन्यासिनस्तुनतत्संभवइतिकथंमुमुक्षोःसंन्या
साश्रमउक्तः किंचगृहस्थादिकर्मणांयदिमोक्षेउपयोगस्तदामयापिगार्हस्थ्यंवानप्रस्थंकार्यंअथविविदिषायांतदातस्याःसिद्धत्वान्नकार्यंइत्याशयस्तत्रजनकेननवि
नातत्त्वविज्ञानंमोक्षस्याधिगमोभवेत् नविनागुरुसंबंधंज्ञानस्याधिगमोभवेदित्यनेनगुरुमुखाधीनश्रवणादिमात्रंज्ञानस्यज्ञानमात्रंचमोक्षस्यहेतुरितिव्यतिरेका
मुखेनोक्त्वाकर्मणोमोक्षाहेतुत्वंसूचयित्वाभावितैः करणैश्चायंबहुसंसारयोनिषु आसादयतिशुद्धात्मामोक्षंवैप्रथमाश्रमेतमासाद्यतुमुक्तस्यदृष्टार्थस्यविपश्चि
तः त्रिष्वाश्रमेषुकोन्वर्थोभवेत्परमभीप्सितइत्यत्रबहुसंसारयोनिषुनानाविधकर्मयुक्तशरीरेषुशुद्धात्मासन्प्रथमाश्रमेमोक्षरूपमात्मानंज्ञानेनासाद्यमुक्तिंप्राप्त
स्यकर्मणानार्थइत्युक्त्वाशुद्धिद्वारकविविदिषाहेतुत्वंमोक्षाहेतुत्वंचकर्मणांस्पष्टीकृत्यसमाहितंतदनुस्मरन्जनकंआहभयादितिअविमोक्षजात्कर्मविमोक्षशंका
जन्यात् उक्तशंकाप्रयुक्तायाकर्मत्याज्यंनवेतिशंकातज्जन्यात् यत्तुअधिकाचागतिरित्यस्यमोक्षस्थानंश्वेतद्वीपादिगतिरधिकेत्यर्थइतितन्नतादृशगतौशुकस्यविद्यमा
नायांतद्धेतुतत्त्वदर्शनमपिशुकस्याधिकंतवविज्ञानमित्यनेनविद्यमानमुक्तंत्वयावा·ग्रंतस्याचबाल्यादित्याद्यसंगतमथतादृशगतिसामर्थ्यंविद्यमानमपिस्वस्यबा
ल्यादिनानजानातीत्यर्थइतिचेन्नव्यवसायेनेत्यादेरसंगतेः तत्रहिव्यवसायादृतेयत्परंब्रह्मनासादयतिपूर्वंनासादितवान्तांब्रह्मरूपांगतिंसुदृढेनव्यवसायेनमहद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धेच्छिन्नसंशयोभवानासादयतिआसादितवान्वर्त्तमानसामीप्येलट्विमुच्यहृदयग्रंथीनिरस्यास्यसंगतेश्चनहिविद्यमानसामर्थ्योज्ञानेपिहृदयग्रंथ्यनुवृत्तिः किंचोक्तसामर्थ्यजनकेननोपदिष्टंयेनतत्रैवसंशयोच्छेदंस्वयंकृतंब्रूयात् किंतुतत्त्वंतस्मात्तत्त्ववोधस्यसामग्रीउपासनादिकंतत्फलैश्वर्यादिनाप्रत्यक्षेणानुमेयंतवस्थितंतथापिवाल्यादिप्रयुक्तासंभवनादितस्त्वयातत्त्वंननिश्चितमिदानीतुमयातस्यानिरस्तत्वात् निश्चितमित्येववाक्यार्थइतियुक्तमुक्तंसगुणविषयज्ञानपरत्वादितिविज्ञानंतत्त्वदर्शनंगतिः श्रवणादिपाटवंऐश्वर्यमीश्वरभावोरागादिराहित्यंस्वाभाविकंएतत्त्रयंतवविद्यमानमधिकंमोक्षायालमेवत्वंतुतदअधिकंनाववुध्यसेमोक्षायनालमितिनिश्चितंतत्रहेतुर्वाल्यादित्यादियतउत्पन्नेपिविज्ञानेतत्त्वदर्शनेवाल्यादिदोषात्तांगतिंतत्त्वदर्शनरूपांनाधिगच्छसिप्रतिष्ठितत्वरूपांतत् प्राप्तिनलब्धवान् असंभवनादिदोषाद्धिज्ञातापिविद्याअप्रतिष्ठिताअतएवात्मैकत्वविद्याप्रतिपत्तयेइत्यत्रभाष्येप्रतिपत्तिशब्देनप्रतिष्ठितत्वमुच्यतइतिपंचपादीकृतः वाल्यादिशब्दैःप्रज्ञामांद्यंकुतर्कश्चविपर्ययदुराग्रहइतिज्ञानप्रतिवंधकत्वेनपंचदशप्रकरणाद्युक्तंत्रयमत्रोक्तंयद्यपिप्रतिवंधोवर्त्तमानोविषयासक्तिलक्षणइतिपूर्ववाक्येनतत्रविषयासक्तिरपिवर्त्तमानप्रतिवंधकत्वेनोक्ता असावपिचभावीवाभूतोवावर्त्ततेथवेतिवार्त्तिकेनभाविभूतावपिज्ञानप्रतिवंधकावुक्तौतथापिशुकस्यविषयसांनिध्येपिनिर्विकारत्वेनजनकेनपरीक्षादिनानिश्चितत्वाद्विषयासक्त्यभावस्यवर्त्तमानत्वेनतत्रनिश्चयात् भाविभूतप्रतिवंधकयोश्चानुमानादिनातत्राभावनिश्चयादुक्तत्रयमेववर्त्तमानप्रतिवंधकंशंकितंतत्रापिवाल्यशब्दितस्यप्रज्ञामांद्यस्यनासंभावनाहेतुत्वंप्रकृतेसंभवतिशुकस्यस्वाभाविकसूक्ष्मवुद्धित्वादतः संशयादितिसूक्ष्मवुद्धित्वादेवनानाविधकुतर्कावतारणाधीनतत्त्वासंभावनारूपात्संशयादित्यर्थः सोपिशिष्टकाग्रासस्यात्मस्वरूपकत्वमिथ्यात्वादिपर्यवसायिकुतर्कासंभवान्नतस्यसंभवतीत्याशयेनाहभयाद्वाप्यविमोक्षजादितिआधिकारिकत्वेनप्रवृत्तिपरस्यपितुः अनुष्ठानमालोच्यकर्मवासनादार्ढ्यात् कर्मणालोकांतरप्राप्तिःसत्यास्तीतिविपर्ययाग्रहेणकर्मत्यागनिश्चयरूपेणविमोक्षेणजनितात्भयशब्दितात् द्वैताभिनिवेशादित्यर्थः व्यवसायेनेत्यादियतोन्योपिव्यवसायाद्विनैवतांगतिंप्रतिष्ठितांलभतेअतोभवानपितेनैवउत्पन्नविज्ञानदृढानीप्रतिष्ठितत्वदर्शनः व्यतिरेकमुखेनतदेवदृढयतिस्थिरेत्यादिस्थिरबुद्धिरलोलुपोपिव्यवसायात् गुरूपदेशाधीनात्मवाल्यादिप्रयुक्तासंभावनानिवर्त्तकनिश्चयात् ऋतेयत् यस्मात् परंब्रह्मनासादयतिनप्रतिष्ठितविज्ञानविषयीकरोतिइत्यपिव्याख्यानंसंभवतीतिध्येयंएवंनिष्कामभक्त्यादियन्तारतम्यवत् विलंवाविलंवोत्पन्नरूपस्यतत्त्वदर्शनतारतम्यस्यप्रयोजकंनतुमोक्षेतत्प्रयोजकंनवातत्त्वदर्शनमोक्षयोस्तारतम्यांतरप्रयोजकमित्यर्थः भूयोगुणविषयकत्वेनोपासनोत्कर्षेणचित्तैकाग्र्यरूपेसाक्षात्तत्फलेएवोत्कर्षः तेनचाविलंवोत्पत्तिकत्वरूपस्तत्त्वदर्शनउत्कर्षः नान्योनानागुणविषयत्वादिः श्रुतेर्निर्गुणेतात्पर्यात् जातिविशेषरूपोत्कर्षस्योपासनांतरप्रयुक्ततत्त्वदर्शनाद्वृत्तेस्तत्त्वदर्शनेस्वीकारेमानाभावात्ततश्चसर्वद्वैतनिवृत्त्यामोक्षेपिनविशेषइतिभावः॥ तर्कैरित्यादितारतम्यंनमुक्तिगम्॥६॥ ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निखिलान्शिवादीन्सर्वान्द्रोपद्यादीन्ददातिशिशुपालादिभ्यः निजपदं सायुज्यमुक्तिं विद्यागुरूननुस्मरति श्रीमाधवेति गुरूणां श्रीविश्वेश्वरसरस्वतीनां गुरूमाहात्म्येन सकलशास्त्रपरिशीलनेन श्रुतवेदांतश्रवणपाटवेन मननेन च यावदवधारितं ब्रह्मानंदस्फुरणं यस्मात्तादृशं अवधारणस्य स्फुरणप्रयोजकत्वादवधारितस्य तदुक्तिः निहितं। लिखितं अतत्त्वे असत्ये तत्त्ववादी सत्यवादी मिथ्याप्रपंचे तादात्म्येन सत्यप्रकारकवचनशीलः माध्वः शीलो न्यायानिर्युक्तिकवचनं दर्शितं अकांडेनवसरे दूषणशून्ये मन्यते ग्रामसिंहस्य शुनकस्य इष्टं नैष्कर्म्यं ब्रह्मणानां इष्टादिपदाव्यवहितोत्तराणां सिद्धीनां सिद्धीति पदानां नामनामिनोरभेदोपचारादिष्टसिध्यादिग्रंथत्वाभः हिरण्यपूर्वकशिपुं प्रवक्ष्यतइतिवत् ब्रह्मणानामित्यंतेलक्षणयावातद्याभः महानुभावधौरेयशिवरामाख्यवर्णिनः एततग्रंथस्य कर्त्तारो लेखकाः केवलं वयं श्रीनारायणतीर्थनां षट्शास्त्रीपारमीयुषांच

योलक्ष्म्यानिखिलानुपेक्ष्य विबुधाने कोन्नतः स्वेच्छया यः सर्वान्स्मृतमात्र एव सततं सर्वात्मना रक्षति यश्चक्रेण निकृत्य नक्रमकरोन्मुक्तं महाकुंजरं द्वेषेणापि ददाति यो निजपदं तस्मै नमो विष्णवे १ श्रीमाधवसरस्वत्यो जयन्ति यमिनां वराः वयं येषां प्रसादेन शास्त्रार्थपरिनिष्ठिताः २ सहजसरलां प्रेम्णा दीर्घां समस्तविशोधिनीं सकृदपि कृपादृष्टिं संतो दिशंतु भवद्विधाः कथमपि सतीपूता सद्यस्त्वया विषयीकृता ममकृता ममकृतिरियं हित्वा दोषान्भवत्वतिसद्गुणा ३ गुरूणां माहात्म्यान्निजविविधविद्यापरिचयाच्छ्रुतेर्यन्मे सम्यङ्मननपरिनिष्यन्नमभवत् परब्रह्मानन्दस्फुरणमखिलानर्थशमनं तदेतस्मिन्ग्रंथे निखिलमतियत्नेन निहितम् ४ इह कुमतिरतत्त्वे तत्त्ववादी वराकः प्रलयति यदकाण्डे खण्डनाभासमुच्चैः प्रतिवचनममुष्मै तस्य को वक्तु विद्वान्न हि रुतमनुरौति ग्रामसिंहस्य सिंहः ५ कुतर्कगरलाकुलं भिषजितुं मनो दुर्धियां मया यमुदितो मुदा विषविघातिमंत्रो महान् अनेन सकलापदां विघटनेन यन्मे भवत्परं सुकृतमर्पितं तदखिलेश्वरे श्रीपतौ ६ ग्रन्थस्यैतस्य यः कर्त्ता स्तूयतां वासनिन्द्यतामपि नास्त्येव कर्तृत्वमनन्यानुभवात्मनि ७ श्रीव्यासशङ्करसुरेश्वरपद्मपादान्वेदान्तशास्त्रमुनिवन्ध्यकृतस्तथान्यान् विद्याप्रदानिहयतिप्रवरान्दयालून्सर्वान्गुरून्सततमेव नमामि भक्त्या ८ सिद्धीनामिष्टनैष्कर्म्यब्रह्मगानामियं विराट् अद्वैतसिद्धिरधुनाचतुर्थी समजायत ९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीविश्वेश्वरसरस्वतीपूज्यपादशिष्य श्रीमधुसूदनसरस्वती विरचितायामद्वैतसिद्धौ मुक्तिनिरूपणं नाम चतुर्थः परिच्छेदः ४॥ अद्वैतसिद्ध्युत्तरार्द्ध श्लोकसंख्या ४५०० १९ रणेशरणीकृत्य तीर्णः सारस्वतार्णवः भजे श्रीपरमानंदसरस्वत्यंघ्रिपंकजं यत्कृपादृष्टिलेशेन तीर्णः संसारसागरः यद्यत्संभवदुक्तिकंपरवचः संभूष्यत दूषितं व्याख्यातश्च निगूढभावगहनो वाणीसुधासागरः सर्वं तत् शरदिंदुसुंदरमुखश्रीकृष्णलीलातनो मालाभावमवाप्य सज्जनमनोमालां समाकर्षतु एवायद्यपि चंद्रिकाखिलमनोराजीवराजेरविर्ध्वांतोच्छेदकरी सरीसृपमुखव्याघातमुद्राकरी सा धूनां सरलस्वभावकरुणाकूपारसारात्मनां चेतश्चद्रमरीमरीषुरमरीजा सा तथापि स्फुटं॥ ॥इति श्रीपरमानंदसरस्वतीपूज्यपादशिष्य श्रीब्रह्मानंदसरस्वती विरचितायामद्वैतसिद्धिटीकायामद्वैतचंद्रिकायां चतुर्थः परिच्छेदः॥ उत्तरार्द्धसंख्या॥७२५०॥ पूर्वार्द्धसंख्या॥११२५०॥ समस्तग्रन्थश्लोकसंख्या॥१८५००॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूची	पत्र	पृष्ठ	वादं	अद्वैतसिद्धेर्वादसमाप्तिपत्रपृष्ठवादांकानि	पत्र	पृष्ठ	वाद		पत्र	पृष्ठ	वादः	
१३	३०	१	१	अद्वैतसिद्धौमिथ्यात्वनिरुक्तिः॥	१०७	२	२०	असतःसाधकत्वोपपत्तिः	१७६	१	३९	अज्ञानस्यजीवाश्रयत्वोपपत्तिः
	३१	२	२	मिथ्यात्वमिथ्यात्वोपपत्तिः॥	११३	१	२१	असतःसाधकत्वाभावेवाधकम्	१८०	१	४०	अविद्यायाविषयोपपत्तिः
	३८	१	३	दृश्यत्वहेतूपपत्तिः॥	११६	२	२२	दृग्दृश्यसम्बन्धभङ्गः	१८६	२	४१	अहमर्थस्यानात्मत्वोपपत्तिः
	४२	१	४	जडत्वहेतूपपत्तिः॥	१२५	१	२३	प्रपंचमिथ्यात्वानुकूलतर्कनिरूपणं	१८९	२	४२	कर्त्तृत्वाध्यासोपपत्तिः
	४५	१	५	परिछिन्नत्वहेतूपपत्तिः॥	१३३	२	२४	प्रतिकर्मव्यवस्थोपपत्तिः	१९२	१	४३	देहात्मैक्याध्याससिद्धिः
	४७	१	६	अंशित्वादिहेतूपपत्तिः॥	१४०	२	२५	मिथ्यात्वानुमितौक्तत्वप्रतिकूलतर्कभंगः	१९४	२	४४	अनिर्वाच्यत्वलक्षणम्
	४९	२	७	दृश्यत्वादीनांसोपाधिकत्वभङ्गः॥	१४४	१	२६	सामान्यतोमिथ्यात्वश्रुत्युपपत्तिः	१९५	१	४५	अनिर्वाच्यत्वसाधकानुमानम्
	५०		८	आभाससाम्यभङ्गः॥	१५०	२	२७	सर्वाद्वैतश्रुतेःप्रत्यक्षादिविरोधोद्धारः	१९९	२	४६	ख्यातिवाधान्यथानुपपत्तिः
	६६	१	९	प्रत्यक्षवाधाद्युधारः	१५३	१	२८	ज्ञाननिवर्त्यत्वान्यथानुपपत्त्याविश्वमि-(थ्यात्वं	२०१	२	४७	निषेधप्रतियोगित्वानुपपत्तिः
	६९	२	१०	प्रत्यक्षस्योपजीव्यत्वभङ्गः	१५५	२	२९	दृष्टिसृष्ट्युपपत्तिः	२०२	२	४८	नासदासीदितिश्रुत्यर्थोपपत्तिः
	७०	१	११	प्रत्यक्षस्यानुमानवाध्यत्वसिद्धिः	१५८	१	३०	एकजीवाज्ञानकल्पितत्वोपपत्तिः	२०३	१	४९	असत्ख्यातिभङ्गः
	७७	२	१२	प्रत्यक्षस्यागमवाध्यत्वम्	१५९	२	३१	अविद्यालक्षणोपपत्तिः	२०३	२	५०	अन्यथाख्यातिभङ्गः
	७९	२	१३	अपच्छेदन्यायवैषम्यभङ्गः	१६७	१	३२	अज्ञानप्रत्यक्षत्वोपपत्तिः	२०५	२	५१	अविद्यकरजतोत्पत्त्युपपत्तिः
	८०	१	१४	वह्निशैत्यानुमितिसाम्यभङ्गः	१७०	२	३३	अविद्यानुमानोपपत्तिः	२०७	२	५२	भ्रमस्यवृत्तिद्वयोपपत्तिः
	८२	१	१५	प्रत्यक्षस्यलिंगाद्यवाध्यत्ववाधकम्	१७२	१	३४	अविद्याप्रतिपादकश्रुत्युपपत्तिः	२०९	१	५३	सत्त्वत्रैविध्योपपत्तिः
	८५	१	१६	भाविबाधोपपत्तिः	१७२	२	३५	अविद्यायामर्थापत्तिः				इत्यद्वैतसिद्धौप्रथमपरिछेदःसमाप्तः१
	९२	२	१७	विश्वसत्यत्वानुमानभङ्गः	१७३	१	३६	अविद्याप्रतीत्युपपत्तिः				अथद्वितीयपरिछेदप्रारम्भः॥२॥
	९७	१	१८	विश्वमिथ्यात्वेविशेषतोनुमानानि	१७५	२	३७	अविद्याचिन्मात्राश्रयत्वोपपत्तिः	११	१	१	अखण्डलक्षणोपपत्तिवादः
	१०६	१	१९	विश्वमिथ्यात्वस्यागमादिवाधोद्धारः	१७६	१	३८	सर्वज्ञस्याज्ञानाश्रयत्वोपपत्तिः	३२	२	२	सत्याद्यवान्तरवाक्याखंडार्थतोपपत्तिः

राम
३६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूची· १४

पत्र·	पृष्ठ	वादां·	
३५	२	३	तत्त्वमस्यादिमहावाक्याखंडार्थत्वोपपत्तिः
५२	१	४	ब्रह्मणोनिर्गुणत्वोपपत्तिः
५३	१	५	ब्रह्मणोनिर्गुणत्वेप्रमाणोपपत्तिः
५६	२	६	ब्रह्मणोनिराकारत्वसिद्धिः
६०	२	७	ब्रह्मणोज्ञानत्वानंदत्वाद्वितीयत्वनित्यत्वसाक्षित्वोपपत्तिः
६२	१	८	ब्रह्मणोजगदुपादानत्वोपपत्तिः
६२	२	९	ब्रह्मणोजगन्निमित्तत्वोपपत्तिः
६६	१	१०	ब्रह्मणोजगदुपादानत्वोपपत्तिः
६९	१	११	स्वप्रकाशलक्षणोपपत्तिः
७४	१	१२	अनुभूतेःस्वप्रकाशत्वोपपत्तिः
७८	१	१३	आत्मनःस्वप्रकाशत्वोपपत्तिः
८०	१	१४	ब्रह्मणः शब्दावाच्यत्वम्
८२	२	१५	सामान्यतोभेदखण्डनम्
९४	१	१६	विशेषतोभेदखण्डनम्
९६	२	१७	विशेषखण्डनम्
९७	१	१८	भेदपञ्चकेप्रत्यक्षभङ्गः
९९	२	१९	जीवब्रह्मभेदानुमानभङ्गः
१००	१	२०	जीवभेदानुमानभङ्गः

पत्र	पृष्ठ	वादां·	
१०२	२	२१	जीवभेदानुकूलतर्कभङ्गः
१०४	१	२२	भेदपञ्चकेऽनुमानभङ्गः
१०५	१	२३	भेदश्रुतेरनुवादकत्वम्
१०६	२	२४	भेदश्रुतेर्व्यवहारिकभेदपरत्वोपपत्तिः
१०७	२	२५	शब्दान्तरादेरात्मभेदकत्वाभावः
१०९	१	२६	भेदश्रुतेःषड्विधतात्पर्यलिङ्गभङ्गः
१०९	२	२७	ऐक्यस्वरूपोपपत्तिः
१०९	२	२८	जीवब्रह्माभेदेप्रमाणम्
११०	२	२९	ऐक्यश्रुतेरुपजीव्यबाधाभावः
११५	२	३०	तत्त्वमसिवाक्यार्थनिरूपणम्
११८	२	३१	अहंब्रह्मास्मीत्याद्यनेकश्रुतिस्मृत्यर्थकथनं·
१२०	१	३२	जीवब्रह्माभेदानुमानम्·
१२०	२	३३	अंशित्वेनैक्यसिद्धिः
१२३	१	३४	विम्बप्रतिविम्बन्यायेनैक्यसिद्धिः
१२५	२	३५	आत्मनोऽणुत्वभङ्गः
			इतिद्वितीयपरिच्छेदःसमाप्तः २
			अथतृतीयपरिच्छेदप्रारम्भः ३
४	२	१	मननिदिध्यासनयोःश्रवणाङ्गत्वम्
६	१	२	विवरणोक्तनियमोपपत्तिः

पत्र	पृष्ठ	वादां·	
६	२	३	श्रवणादेर्विधेयत्वोपपत्तिः
८	१	४	जिज्ञासासूत्रस्यश्रवणविधिमात्रमूलत्वं
९	१	५	विचारस्यश्रवणविधिमूलत्वोपपत्तिः
९	२	६	स्वाध्यायविधिविचाराक्षेपकत्वोपपत्तिः
१२	१	७	ज्ञानस्यपुरुषतन्त्रताभङ्गः
१२	२	८	ज्ञानविधिभङ्गः
१४	१	९	शब्दादापरोक्षोपपत्तिः
			इतितृतीयपरिच्छेदःसमाप्तः ३
			अथचतुर्थपरिच्छेदप्रारम्भः ४
२	२	१	अविद्यानिवृत्तिनिरूपणम्
३	२	२	अविद्यानिवर्त्तकनिरूपणम्
५	१	३	मुक्तेरानंदरूपत्वेनपुरुषार्थत्वम्
५	१	४	चिन्मात्रस्यमोक्षभागितोपपत्तिः
६	२	५	जीवन्मुक्त्युपपत्तिः
१०	२	६	मुक्तौतारतम्यभङ्गः
			इतिचतुर्थपरिच्छेदःसमाप्तः ४
			सर्ववादः १०३
			ग्रंथयशपासम्मत् १९४६

रामः ३६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति लघुचन्द्रिकोपेताया अद्वैतसिद्धेश्चतुर्थपरिच्छेदः समाप्तः ॥ ४ ॥

श्रीकाशीपुर्यां स्वस्ति श्री ५ वेतियाख्यनगराधिराजमहाराजइन्द्रकिशोरबहादुरसिंहसूनुश्रीमन्महा
राजहरीन्द्रकिशोरबहादुराणां निकेतने श्रीमत्पण्डितेनोद्धवसिंहनिर्मलेन संशोधितमिदं पुस्तकं
गोवर्द्धनदासाभिधेयेन मया हरिहररत्नाकराख्यस्वीययन्त्रालये मुद्रितं येषां महाशयानामपेक्षा
भवेत् तेषां कुंजगलीति प्रथितपण्यवीथिकायाः पश्चिमद्वारनिकटवर्त्तिनि मदीयपण्यालये संमिलिष्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वित्वादिव्यक्तीनांच प्रागभावभेदाद्वैजात्यापत्तेः प्रागभावतद्ध्वंसयोः प्रतियोगितद्ध्वंससिद्ध्यधीनत्वेनान्योन्याश्रयापत्तेः प्रागभावानभ्युपगमाच्चेत्याशयेनाह नखल्विति॥
नेनत्व प्रागभावाद्यवस्था आश्रयनियमो विविधाऽवस्था व्यवस्थेतिव्युत्पत्तेर्वैलक्षण्यंचनभवति खल्वितिनिदर्शितार्थस्य प्रसिद्धत्वद्योतनाय यत्त्वाहुः एकत्वानरसहि
तैकत्वेन द्वित्वंद्वित्वसहितैकत्वेनत्रित्वं तत्सहितेनचतुष्ट्वमिति तन्न द्वयोरेवद्वित्वोत्पत्त्यनंतरंत्रित्वचतुष्ट्वाद्यापत्तेः तयोः प्रत्येकमेकत्वस्यापिसत्वेन द्वित्वसहितै
कत्वस्यतत्रैवसुलभत्वात् नचद्वित्वासमानाधिकरणैकत्वमेवतथाविधंत्रित्वहेतुरितिवाच्यम् द्वित्वानंतरमाश्रयघटकैकेनसह द्वयोस्त्रित्वव्यवहारानापत्तेः॥६॥
ननुनानैकत्वविषयिण्या अपेक्षाबुद्ध्यादित्वंद्वित्वतद्व्यक्तिव्यधिकरणैकत्वविषयिण्यात्रित्वं एवंत्रित्वादितद्व्यधिकरणैकत्वविषयिण्याचतुष्ट्वादीनिकारणवैलक्ष
ण्यादेवद्वित्वत्रित्वादिवैलक्षण्यमेवमसमवायिकारणमपित्रित्वेद्वित्वंतद्व्यक्तिव्यधिकरणैकत्वंचेत्यादितद्व्यवस्थयैवकार्यव्यवस्थासिद्धिरितिनोक्तदोषइत्याश
क्याह नेति अपेक्षाबुद्धेःकृप्तिरीदृश्येवास्यांसंख्यायांहेतुरितिनिश्चयोनास्ति उपलक्षणंचैतदसमवायिकारणत्वेनाभिमत संख्यानामप्यनिश्चयस्य तथाहि अयमेको
ऽयमेक इत्येकरूपयाद्वित्वं अयमेकोऽयमेकोऽयमेक इतिवाइमौद्वावयमेक इतिवा द्विविधयात्रित्वं एवमेकत्वचतुष्कविषयिण्या इमौद्वावयमेकोयमेक इमेत्रयो
यमेक इमौद्वाविमौद्वावितिचचतुर्विधयाचतुष्ट्वंचसर्वैरनभूयत इति नैकतरैवकारणमितिविनिगमकमस्ति इत्थंचासांसर्वासांकार्यवैजात्यप्रद्विरनुगमत्रित्वत्वाद्युच्छे
त्यादिनियामकत्वेद्वित्वस्यैकरूपस्य संभवेपित्रित्वेवैजात्यद्वयं चतुष्ट्वेवैजात्यचतुष्टयंपंचत्वेवैजात्याष्टकमित्येवंक्रमेणोत्तरोत्तरं बहुतरवैजा खं॥
नापेक्षाबुद्धिक्लृप्तिः सकलमपिशनैर्योज्यमेतत्पृथक्त्वे॥९॥ ९ दश्वस्मात् एवमेवविनिगमनाविरहात् इणातशास्त्रप्रसिद्धगुणनभाजनवैचित्र्यबुद्धीनाम
पिसंख्याज्ञानहेतूनांसंख्यावैजात्यप्रयोजकत्वेद्वित्वादिसर्वसंख्यास्वप्यनंतवैजात्यानिस्युरिति एवंनतनद्रव्यसमवेतपूर्वपूर्वसर्वसंख्यानांव्यस्तसमस्तानांस्वस्वन्यून
धिकसर्वसंख्यासुगुणनभाजनादिवैचित्र्येणप्रत्येकमसमवायिकारणत्वेवैजात्यप्रयोजकत्वेचसर्वसंख्यासुप्रत्येकमनियतानंतवैजात्यापत्तिः कारणीभूतद्वित्वाद्य
व्यवस्थयात्रित्वादिव्यवस्थापत्तिश्चबोध्या नन्वेवमेकत्वस्याप्यनुपपत्तावद्वयंब्रह्मेतिवदनेकंब्रह्मेत्यप्यापद्येतेतिचेन्न तस्यैतदनिरपेक्षत्वेनवस्तुस्वरूपत्वात् परमा
णुतदेकत्वयोर्नानाभावेनकारणपरंपराभंगाज्जन्यैकत्वासिद्धेः आकाशादेरुत्पत्तिश्रवणान्नित्यद्रव्याप्रसिद्धानित्येपितस्मिन्नानाभावात् गुणकर्मादिष्विवसर्वत्रापिव
स्तुस्वरूपमात्रावलंबनेनैवैकव्यवहारोपपत्तेः नचाश्रयगतसंख्ययैवगुणादिष्वेकत्वादिव्यवहारोनस्वरूपमात्रेणेतिसाधुः एकव्यक्तिसमवेतगुणक्रियादिषुसकला
दिषुचाश्रयैक्यापत्तौविनैवायासमसद्दिष्टसिद्ध्यापत्तेः व्यक्त्यनेकत्वाज्जातिसमवायादिषु द्वित्वादिसर्वसंख्याव्यवहारापत्तेरेकव्यक्तिगतरूपरसादिषु द्वित्वबहुत्वव्यव
हारानापत्तेश्च नत्रैकत्वंस्वरूपमेवेतिनियद्युच्येत तर्हिद्रव्येष्वपितथैवास्तु किंच्चाकाशैकत्वव्यक्तेरेकत्वव्यवहारः किमाश्रयैकत्वव्यक्त्यंतरादुतस्वतः आद्येतस्याप्य
न्यतस्तस्याप्यन्यत इत्यन्योन्याश्रयचक्रकानवस्थाःस्युः द्वितीये तस्यैवघटादीनामपिस्वतएकत्वव्यवहारोपपत्तौनैकत्वाख्यसंख्यागुणस्वीकारेप्रयोजनंप्रमाणं
वास्तीतिमूलोच्छेदादपितद्वित्वादिसिद्धिः साधकबाधकसाम्यात्संख्योक्तदूषणानिपृथक्त्वेप्यतिदिशति निखिलमपीतिनिखिलंसर्वमप्येतद्दूषणजातंसंख्यायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भिवपृथक्त्वेपियोज्यं तस्यापिसंख्यावदेवैकपृथक्त्वद्विपृथक्त्वादिभिन्नस्यकारणगतैकपृथक्त्वापेक्षाबुद्ध्यादिजन्यत्वस्यपरैरभ्युपगमादित्यर्थः त्वदुपगम न्यासेव्यामोहः स्यादितिशनैरित्युक्तम् एतेन बहुतरपतनपरिस्पंदाश्रयत्वादिह्यानसाध्याः परत्वादयः परास्ताः ॥ ९ ॥ ॐ ॥ ननुकनककुंडलयोरन्यो न्याभावलक्षणोद्भिन्नपृथक्त्वादिलक्षणश्चभेदोमास्तुनथाप्यधिकरणात्मकाभाववादिनांप्राभाकरादीनांमतेइवाधिकरणस्वरूपस्वभेदोऽस्त्वित्या शंक्याह कार्यमिति कार्यघटशरावादिनिदानादुपादानकारणान्मृदादेर्नान्यत्स्वरूपतोपिभिन्नंनभवति कुतः पृथक्कारणान्पृथगभावेनानधिगमात् मृदः पृथक्कृत्यघटादेर्दर्शयितुमशक्यत्वादित्यर्थः ननुक्षीरोदकयोर्मिलितयोः पृथक्करणासामर्थ्येपितत्स्वरूपभेदवदत्राप्यस्त्वित्याशंक्याह न हीति हियस्मात्तथात्वेकार्यस्योपादानान्यत्वेसति उपादानहेत्वोरुपादानकारणनिमित्तकारणयोर्वैलक्षण्यंविभिन्नलक्षणत्वंनसंभवतिगवाश्वयोरि वात्यंतभिन्नयोस्तयोरयुतसिद्धिनियामकस्यदुर्वचत्वात्स्वतादात्म्यापन्नकार्यजनकत्वमुपादानत्वंस्वातिरिक्तकार्यजनकत्वंनिमित्तत्वमित्येवोपादाननि मित्तयोर्लक्षणभेदस्यावश्यवाच्यतयाभेदाभ्युपगमेलक्षणभेदासंभवादित्यर्थः ननुस्वस्मिन्समवायेनकार्यजनकत्वमुपादानत्वं तदन्यसंबंधेनका र्यजनकत्वंनिमित्तत्वमित्येवलक्षणमयुतसिद्धिनियामकश्चसमवायएवाभ्युपगम्यतइतिचेन्नत्राह नभवतीति समवायाभ्युपगमाच्चसाम्यादनव

॥ कार्यंनान्यन्निदानात्पृथगनधिगमात्तत्त्वुपादानहेत्वो वैलक्षण्यंनतथात्वेनभवतिसमवायाद्यवस्थानुपेतात् ॥ ११ स्थितेरितिवा

दरायणदर्शितदिशानिरसनीयत्वेनानुपेतादनभ्युपगतात्समवायात्वदुक्तलक्षणव्यवस्थानसंभवत्येवेत्यर्थः तथाहि उपादानोपादेययोर्गुणगु णिप्रभृतीनांचनतावत्समवायास्यःसंबंधः संभवति सहिसंयोगवदेवसंबंधिभ्यांभिन्नस्तावाश्रितश्चवाच्यः तस्यचद्युभयसंबंध्याश्रितत्वंसंयोग वदेवस्वातिरिक्तसमवायेनकल्प्येत तर्हितस्यापिपूर्वसमवायसाम्यात्पूर्वसमवायंतत्संबंधिनौचाश्रयितुंसमवायांतरपर्येषणायांतस्यापिपूर्वा भ्यांसाम्यमित्यनवस्थाप्रसंगात् किंच पटादिद्रव्यस्यैकेनसमवायेनबहुभिस्तंतुभिर्गंधरसादिभिश्चनसंबद्धत्वसंभवः संयोगेनतथाऽदर्शना त् अपिच सत्त्ववयवेष्ववयविनाशस्थलेएकसंबंधिनिनश्यतिसंबंधोननश्यतीत्येतदनुभवविरुद्धं घटध्वंसाधिकरणकपालेषुघटसम वायप्रत्ययापत्तिश्च तदानींतेषुतत्समवायोनास्तीति चेदनपस्तस्यानष्टस्यचतस्यतत्रकुतोऽसत्त्वं सतएवतस्यसमवायस्तदाधारतानियाम कोनेतिचेन्नप्रागपितस्यकपालेष्वाधारतानियामकसंबंधस्यदुर्वचत्वेनपूर्वोत्तरकालयोरविशेषात् अभावीयविशेषणतानिरासोक्तयुक्तिभिरनवस्था प्रसक्त्याचविशेषणतानिशेष्यस्याप्युक्तिसंभवाभावात् एवंतंतुषुप्रागसतःपटसमवायस्योत्पत्तिमंतरेणकथंपटोत्पत्त्यनंतरमपिसत्त्वंतत्रानागतस्यानु त्पन्नस्यचासतस्तत्रसत्त्वोक्तेरनुभवपथाऽनारोहात् अतएवोपहसितंहर्षैः नयातिनचतत्रासीदस्तिपश्चात्रचांशवत्जहातिपूर्वंनाधारमहोव्यसनसंततिः

मिति कृष्णवल्लभाचार्यविरचितसामान्येत्विधमाः॥०॥

CC-0. In Public Domain. Digitization by eGangotri

जनिकर्तुः प्रकृतिः १।४।३० जनेः कर्त्ता जनिकर्त्ता जन्यर्थस्य जन्मनः कर्त्ता जायमानः तस्य प्रकृतिः
कारणं हेतुः तत् कारकं सदुपादानसंज्ञं भवति हिमवतो गङ्गा प्रभवति यथा तथा पत इति ९८

स॰सि॰ पू॰ १२ इत्थं जिज्ञासासूत्राक्षिप्तविचारांगविप्रतिपत्तौ प्रदर्शितायां सिद्धान्ती सर्ववादिविजयेन स्वमतप्रतिष्ठापनाय सन्निहिततन्मदार्थव्यवस्थापन सुखेनोपक्रममाणः सर्वजगदभिन्ननिमित्तोपादानकारणत्वोपलक्षिते सच्चिदानन्दाद्वयप्रत्यक्स्वरूपे श्रौते ब्रह्मणि सर्ववेदान्तसमन्वयप्रदर्शनेन समस्तशास्त्रार्थसंग्रहरूपामुत्तरत्रिसूत्रीमर्थतः संगृह्णन् प्रतिजानीते यस्मादिति यस्मादभिन्ननिमित्तोपादानभूताद्ब्रह्मणः सकाशात् जगतां हिरण्यगर्भादिचतुर्विधभूतग्रामान्तानां वियदादिपुरुषान्तानां वा समस्तकार्याणाम् उत्पत्तिस्तादात्म्येनाविर्भावः गुप्तिः पालनं क्षतिः कारणमात्रपरिशेषात्मा तिरोभावोपि न ह्यलेति जन्माद्यस्य यत इति सूत्रदर्शितं लक्षणं प्रतिज्ञा च एवमुत्तरत्रापि बोध्यम् सूत्रे आदिपदेन स्थितिभंगयोरेव ग्रहणं यतः शब्देन यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुतिदर्शितमूलकारणाधीनजन्मादित्रयस्यैव प्रत्यभिज्ञानात् तयास्कोपदर्शितानां ऽवान्तरकारणाधीनानामस्तिवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीत्येतेषां भावविकाराणामिति प्रदर्शनायोत्पत्तिस्थितिक्षीणत्रितयोपादानमूलकारणलाभार्थं सूत्रे पुनरुतितसिलान्तपदादेव जनिकर्त्तुः प्रकृतिरित्यनुशासनादुपादानत्वे लब्धे स्थितिभंगयोरुपादानलक्षणत्रयप्रदर्शनायेति केचित्। अन्ये तु नि

यस्मादुत्पत्तिगुप्तीक्षतिरपि जगतां यच्च शास्त्रैकयोनिः सर्वज्ञं मायया यत् सहजसुखसदद्वैतसंविल्स्वरूपम् तद्ब्र
ह्म स्वप्रकाशं श्रुतिशिखरगिरां सेवनान्यर्थभूमिः स्वात्माऽसौ यं विदित्वा जननमृतिजलधिं निस्तरन्तीह सन्तः ॥ १५ ॥ ९

मित्तमात्रेऽपि पंचम्यनुशासनात्त्वया धारणे त्रिस्कंधोपादानत्वलाभाय स्थितिहेतुत्वोक्तिस्तु चेतनत्वलाभायेति त्रितयलब्धमभिन्ननिमित्तोपादानकारणत्वमेव लक्षणमित्याहुः वस्तुतस्तु लक्षणं लक्ष्यपरिचयार्थं न चाद्वितीयं लक्ष्यमध्यारोपापवादाभ्यां कार्यजातस्य मिथ्यात्वनिर्णयमन्तरेण परिचेतुं शक्यमिति तदुपयोगितया त्रितयोपादानं यथा चैतत्तथा तदस्य लक्षणपरीक्षायां दर्शयिष्यते न चैतदचिंत्यरचनात्मकसकलजगद्विरचनमचेतनैः प्रधानादिभिः शक्यमिति सर्वज्ञसर्वशक्तिसंपन्नं श्रुत्युक्तं ब्रह्मैव कारणं सिद्ध्यतीति भावः आस्तां जगद्विरचनात्कारणस्य सर्वज्ञादिसिद्धिरिति सर्वैकदेशभूतसर्वार्थावद्योतनक्षमसमस्तविद्यास्थानोपबृंहितऋग्वेदादिलक्षणशास्त्रस्य पुरुषनिश्वसितवत राम॰
द्नायासेन प्रकाशनमेव कारणस्य सार्वज्ञ्यादि साधयितुं क्षममित्येतदर्थकं शास्त्रयोनित्वादिति सूत्रमर्थतः संगृह्णाति यच्चेति चकारोऽप्यर्थे य १२
तः शास्त्रात्मकैककार्यजनकं सदपि सर्वज्ञमिति संबंध इत्यर्थः अथवा जन्माद्यस्य यत इति सूत्रेण तन्मूलमनुमानं च कार्यलिंगकानुमानमेव कारणे प्रमाणं दर्शितं न च प्रधानादिनार्थान्तरमित्याशंक्य सूत्रस्यार्थान्तरमाह यच्चेति यद्ब्रह्म शास्त्रं श्रुतिरेकमेव योनिः प्रमाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रियासहोक्तौपुमान्शिष्यते ५=

इत्यंतंपदार्थेविप्रतिपत्तिप्रदर्शनपुरःसरंविचारमवतारयन्नन्यदर्थेपि तथातामवतारयति सर्वमिति एवंपूर्वोक्तप्रत्यगात्मानमिव विश्वस्यकृत्स्नस्यजगतो हेतुं उपादानकारणं केपि कापिलाः प्रकृतिं सत्वरजस्तमोगुणानां साम्यावस्थालक्षणां महदादिमहाभूतांतत्रयोविंशतितत्त्वात्मकविकारपरिणामिनींप्रधानाख्यां मूलप्रकृतिं अभिदधुरुक्तवंतः ततोपि केचिद्वैनाशिकविशेषा आर्हतास्त्वपराणून्पृथिव्यादिभूतचतुष्टयपरमाणून् अविद्यादिनिमित्तचक्रपरिवर्तनात् शरीराद्याकारेणबाह्यविषयाकारेण च संहन्यमानान् तथाऽभिदधुः कतिचित्पातंजलाः कणादगौतमीयाश्च सा च प्रकृतिस्ते च परमाणवस्तान् पुमान्स्त्रियेत्येकशेषः ईशेन सर्वज्ञेश्वरेणाधिष्ठितान् कार्योन्मुखतयाप्रवर्तितान् यथाक्रमं हेतूनऽभिदधुः पातंजलाईश्वराधिष्ठितांप्रकृतिं कणादगौतमीयास्तु तथाविधान्परमाणूनित्यर्थः। कतिचित् विज्ञानवादिनो नश्वरं क्षणिकं ज्ञानं विज्ञानमेवांतरं असद्बाह्याकारेणपरिणममानं तथेत्यभिदधुः एवकारस्तत्त्वतो विज्ञानमेवस्वलक्षणं वस्तु घटत्वाद्याकारस्त्वपोहरूपा अलीकाः एवेति द्योतनार्थः अन्ये माध्यमिकाः क्षणिकविज्ञानमपि पूर्वापरकालास्पर्शि वर्त

विरिंचिमिति पाठांतरं स्वभावमित्यस्य स्थाने २=

एवं विश्वस्य हेतुं प्रकृतिमभिदधुः केपि केचित्परमाणूनीशेनाधिष्ठितास्तान्कतिचन कतिचिन्नश्वरं ज्ञानमेव ॥
अन्ये शून्यं स्वभावं कतिचन समयं केपि केचिद्यदृच्छां कर्मान्ये ब्रह्म मायाशबलितमपरे सोपि तस्माद्विमृश्यः ॥ २४ ॥

अत्रच संवृणोति तत्त्वमिति संवृतिरविद्या तस्या इदमिति सांवृतम् १=

मानक्षणेप्यसदेवेति मन्यमानाः शून्यमलीकमेव सांवृतं जगदारोपाधिकरणं तथाभिदधुः। कतिचन हैरण्यगर्भाः विरंचिं हिरण्यगर्भं तथाभिदधुः पाठांतरे कतिचन लोकायतिकाः स्वभावं बीजादिस्वरूपमेवांकुरादिजननसमर्थमन्वयव्यतिरेकाभ्यां दृष्टमिति बीजादेरंकुराद्युत्पादकत्वमग्न्यौष्ण्यवत्स्वभाव एव क्षित्यादीनां चतुर्णां परिणामिस्वभावानां यथादर्शनं स्थैर्यमेवेति नकर्त्रपेक्षेत्यऽभिदधुः। केपि कालवादिनो मौहूर्तिकास्तत्तदार्तवफलपुष्पादीनां कालांतरेजन्मादर्शनात्समयं कालमेव तथाभिदधुः। ततोपि केचिदनीश्वरवादिनो यदृच्छामाकस्मिकत्वापरपर्यायामतर्कहेतुकतामभिदधुः अन्ये कर्ममीमांसकाः कर्मविहितनिषिद्धाचरणजन्यं जीवादृष्टमेव तथाभिदधुः। अपरे औपनिषदाः गुणत्रयवत्या सकलकार्यवासनासंभृतया अनिर्वचनीयया अनंतशक्त्या मायया तादात्म्यात् शबलितं नानावर्णमिव सर्वज्ञं सर्वशक्तिसंपन्नं वस्तुनः सच्चिदानंदाद्वयप्रत्यग्रूपं ब्रह्मैव केशलोमादेर्जीवत्पुरुषशरीरमिव भुजंगादे रज्ज्वादिस्वरूपमिव वा अभिन्ननिमित्तोपादानकारणमित्यभिदधुः। तस्मादित्थंवादिवाक्यैर्विप्रतिपन्नत्वात्सोपि जगद्धेतुरपि विविदिषुणा विमृश्यो विचारणीय एवेत्यर्थः ऋदुपधाच्चाक्लृपिचृतेरिति क्यप् ॥ २४ ॥

क्लृपिचृतिभिन्नादृदुपधाद्धातोः क्यप्स्यात् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu